॥ अर्हम् ॥

बृहत्तपागच्छीय-श्रीउदयसौभाग्यगणिविरचितया

# व्युत्पत्तिदीपिकाभिधान-ढुण्ढिकया समर्थितं सिद्धहेमप्राकृतव्याकरणम् - १

[ सिद्धहेमशब्दानुशासनस्य अष्टमाध्यायस्य प्रथमपादत आरभ्य अष्टमाध्यायस्य तृतीयपादपर्यन्तम् ]

सम्पादक

आचार्य-श्रीविजयशीलचन्द्रसूरि-शिष्यः

उपाध्याय-विमलकीर्तिविजयः




प्रकाशक

कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी स्मृति

संस्कार शिक्षणनिधि- अहमदाबाद

ई. २०१७ • वि.सं. २०७३

॥ अर्हम् ॥

# बृहत्तपागच्छीय-श्रीउदयसौभाग्यगणिविरचितया व्युत्पत्तिदीपिकाभिधान-ढुण्ढिकया समर्थितं सिद्धहेमप्राकृतव्याकरणम् - १

## [ अष्टमो विभागः ]

[ अष्टमाध्यायस्य प्रथमपादत आरभ्य अष्टमाध्यायस्य तृतीयपादपर्यन्तम् ]

सम्पादकः
आचार्य-श्रीविजयशीलचन्द्रसूरि-शिष्यः
उपाध्याय-विमलकीर्तिविजयः




प्रकाशकः
कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी
स्मृति संस्कार शिक्षणनिधि - अहमदाबाद.
ई. २०१७ ● वि.सं. २०७३

बृहत्तपागच्छीय-श्रीउदयसौभाग्यगणिविरचितया
व्युत्पत्तिदीपिकाभिधान-ढुण्ढिकया समर्थितं सिद्धहेमप्राकृतव्याकरणम् - १

सम्पादक: आचार्य-विजयशीलचन्द्रसूरि-शिष्य:
उपाध्याय-विमलकीर्तिविजय:

प्रकाशक: कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी स्मृति संस्कार शिक्षणनिधि
अहमदाबाद.

प्रथमावृत्ति: ई.स. २०१७ | वि.सं. २०७३ | वीर नि.सं. २५४३

प्रतय:- २५०

पृष्ठानि- १२ + ४२८ = ४४०

प्राप्तिस्थान: (१) श्रीविजयनेमिसूरीश्वरजी स्वाध्याय मंदिर,
१२, भगतबाग, नवा शारदामंदिर रोड, शेठ आणंदजी कल्याणजीनी पेढी पासे,
पालडी, अहमदाबाद-३८०००७. फोन : २६६२२४६५

(२) सरस्वती पुस्तक भण्डार
११२, हाथीखाना, रतनपोल, अहमदाबाद-३८०००१.
फोन : २५३५६६९२

(३) श्रीविजयनेमिसूरीश्वरजी ज्ञानशाला
हठीसिंह केसरीसिंहनी वाडी, दिल्ही दरवाजा बहार, शाहीबाग रोड, अहमदाबाद.
फोन : ९८९८७०४७०७

मूल्यम् - ६००/-

मुद्रक: किरीट ग्राफिक्स,
३, मंगलम एपा., भगवाननगरनो टेकरो, विश्वकुंज, पालडी, अमदावाद-७
दूरभाष: ९८९८४९००९१

**श्रुतभक्ति**

**आ ग्रंथना प्रकाशनमां**

**श्रीइन्द्रपुरी जैन संघे ( आजवा रोड-वडोदरा )**

**ज्ञानद्रव्यमांथी लाभ लई श्रुतज्ञाननी भक्ति करी छे,**
**तेमनी श्रुतभक्तिनी भूरि भूरि अनुमोदना.**

## પ્રકાશકીય નિવેદન...

પરમ પૂજ્ય આચાર્ય શ્રીવિજયસૂર્યોદયસૂરીશ્વરજી મહારાજ સાહેબની શુભભાવના તેમજ પ્રેરણાથી વિ.સં. ૨૦૪૫ના વર્ષે સ્થપાયેલ, કલિકાલસર્વજ્ઞ શ્રીહેમચન્દ્રાચાર્ય ભગવંતના નામ સાથે જોડાયેલ આ ટ્રસ્ટે, પૂજ્ય આચાર્યશ્રીના શિષ્યરત્ન વિદ્વદ્વર્ય પરમ પૂજ્ય આચાર્ય શ્રીવિજયશીલચન્દ્રસૂરીશ્વરજી મહારાજ સાહેબના માર્ગદર્શન પ્રમાણે અનેક સાહિત્યિક પ્રવૃત્તિઓ કરી છે. તેમાં મૂર્ધન્ય વિદ્વજ્જનોને 'શ્રીહેમચન્દ્રાચાર્ય ચન્દ્રક' અર્પણ કરી તેમનું બહુમાન કરવામાં આવે છે. વિદ્વજ્જનોને આમંત્રણ આપીને વિવિધ વિષયો પર પરિસંવાદ અને સંગોષ્ઠીનું પણ આયોજન કરવામાં આવે છે, અને પ્રાચીન સાહિત્યના ગ્રંથોનું સંશોધન-સંપાદન કરાવવાપૂર્વક પ્રકાશન પણ કરવામાં આવે છે. આજ પર્યંત આ ટ્રસ્ટના ઉપક્રમે આવા અનેક ગ્રંથોનું પ્રકાશન થએલ છે, જે જૈન સંઘમાં જ નહિ પણ દેશ-વિદેશના અસંખ્ય વિદ્વાનોમાં પણ પ્રશંસનીય તથા ઉપાદેય બનેલા છે, આ ટ્રસ્ટના ઉપક્રમે 'अनुसंधान' નામે એક શોધપત્રિકા પણ પ્રકાશિત કરવામાં આવે છે, જેના અદ્યાવધિમાં ૭૧ અંકો પ્રકાશિત થયા છે.

આજે આ ટ્રસ્ટના ઉપક્રમે શ્રીહેમચન્દ્રાચાર્યના सिद्धहेमव्याकरण ઉપર લખાયેલા सिद्धहेमप्राकृतव्याकरण-ढुण्ढिका નામના અપ્રગટ વિવરણનો પહેલો ભાગ પ્રકાશિત થઈ રહ્યો છે, તેનો અમને આનંદ છે. આ ગ્રંથનું હસ્તલિખિત પ્રતિઓ પરથી પ્રતિલિપિ-લેખન તેમજ સંપાદન પરમ પૂજ્ય આચાર્ય શ્રીવિજયશીલચન્દ્રસૂરીશ્વરજી મહારાજ સાહેબના શિષ્ય ઉપાધ્યાય શ્રીવિમલકીર્તિવિજયજી મહારાજે કરેલ છે. આવું સરસ કાર્ય કરવા બદલ તેઓ અભિનંદનના અધિકારી છે. શ્રીહેમચન્દ્રાચાર્યના સિદ્ધહેમચન્દ્રશબ્દાનુશાસન વ્યાકરણ પરના અપ્રકાશિત અજ્ઞાતકર્તૃકઢુંઢિકાના સાત ભાગો પ્રકાશિત થઈ ગયા છે, તેના પ્રકાશનનો લાભ પણ અમારા ટ્રસ્ટને પ્રાપ્ત થયો હતો તે અમારું પરમ સદ્ભાગ્ય છે. ગ્રંથનું સુંદર અક્ષરાંકન-મુદ્રણ કરી આપવા બદલ કિરીટ ગ્રાફિક્સ (અમદાવાદ)ને ધન્યવાદ.

**હઠીસિંહ કેસરીસિંહની વાડી, અમદાવાદ.**
**મહાસુદ -૧૪, વિ.સં. ૨૦૭૩**

**કલિકાલસર્વજ્ઞ શ્રીહેમચન્દ્રાચાર્ય નવમ**
**જન્મ શતાબ્દી સ્મૃતિ સંસ્કાર-શિક્ષણનિધિ અમદાવાદ.**

## સંપાદકીય નિવેદન... - સંપાદન પદ્ધતિ....

ગુર્જરેશ્વર સિદ્ધરાજ જયસિંહે માલવાધિપતિ ભોજરાજાની ધર્મમયી ધારાનગરી પર વિજયપતાકા ફરકાવી ધારાનગરીની સમગ્ર ઋદ્ધિ સાથે સમૃદ્ધ જ્ઞાનભંડાર પણ પાટણ લાવી ગ્રંથોનું અવલોકન કરતાં કરતાં રાજા ભોજે રચેલું ભોજવ્યાકરણ જોયું પણ ગૂર્જરદેશનું એક પણ વ્યાકરણ નહી જોવાથી બાહ્ય ઋદ્ધિ સમૃદ્ધિથી સમૃદ્ધ ગૂર્જરદેશને વિદ્યાસમૃદ્ધ બનાવવા સમૃદ્ધ વ્યાકરણની રચના કરવા કલિકાલસર્વજ્ઞ હેમચન્દ્રાચાર્યને વિનંતી કરી.

ગુર્જરેશ્વરની વિનંતીથી હેમચન્દ્રાચાર્યે એક જ વરસમાં સવાલાખ શ્લોક પ્રમાણ, પંચાંગી, અષ્ટાધ્યાયી, ગુર્જરેશ્વર અને ગ્રંથસર્જકના નામથી યુક્ત સિદ્ધહેમચન્દ્રશબ્દાનુશાસનવ્યાકરણની રચના કરી હતી. સાત અધ્યાયના અઠ્ઠાવીશ પાદમાં સંસ્કૃતભાષાના વ્યાકરણની, આઠમા અધ્યાયના ચાર પાદમાં પ્રાકૃતભાષાના વ્યાકરણની રચના કરી હતી. પ્રત્યેક પાદને અંતે મૂળરાજથી સિદ્ધરાજ સુધીના રાજાઓના રાજ્યવૈભવને - યશોગાનને વર્ણવતાં, અલંકારિક શબ્દોમાં, કાવ્યતત્ત્વોથી ભરપૂર ૩૨ શ્લોકો તથા પ્રશસ્તિના ત્રણ શ્લોકોની રચના પણ આચાર્યશ્રીએ જ કરી હતી.

પ્રાકૃતવ્યાકરણના ચાર પાદના ઉદાહરણ-પ્રત્યુદાહરણ-શ્લોક-ગદ્ય-પદ્ય પાઠોમાં ચતુર્વિંશતિસ્તવ-શ્રુતસ્તવાદિ આવશ્યક ક્રિયાનાં સૂત્રોનો, વૈરાગ્યશતક-સંબોધપ્રકરણાદિ પ્રકીર્ણક સૂત્રોનો, આવશ્યકનિર્યુક્તિ- આવશ્યકચૂર્ણિ- દશવૈકાલિક- ઉત્તરાધ્યયનાદિ આગમિક ગ્રંથોનો, સુરસુંદરીચરિયં- પઉમચરિયાદિ ચરિત્રાત્મકગ્રંથોનો, ધ્વન્યાલોક- વજ્જાલગ્ગ- શૃંગારપ્રકાશ- કાવ્યપ્રકાશાદિ કાવ્યાત્મકગ્રંથોનો, વેણીસંહાર- મુદ્રારાક્ષસ- અભિજ્ઞાનશાકુન્તલાદિ નાટકીયગ્રંથોનો સુચારૂ ઉપયોગ કર્યો છે. પંન્યાસ વજ્રસેનવિજયજી મ., પિશેલ, ડૉ. વેબર,ડૉ. કુલકર્ણી, ડૉ. હરિવલ્લભ ભાયાણી આદિ વિદ્વાનોએ કતિપય ઉદાહરણ-પ્રત્યુદાહરણ-શ્લોકોના મૂળ સ્રોતો શોધી સ્વકીય ગ્રંથોમાં પ્રાપ્ત ગ્રંથોના નામોનો ઉલ્લેખ કર્યો છે. 'સિદ્ધહેમશબ્દાનુશાસન પ્રાકૃત અધ્યાયનાં ઉદાહણોના મૂળ સ્રોત' શીર્ષકવાળો ડો. હરિવલ્લભ ભાયાણીએ લખેલ વિસ્તૃત લેખ 'અનુસંધાન-અંક ૨' પ્રકાશિત થયો છે. તે સિવાય ગ્રંથસંપાદન દરમિયાન સપ્તશતક, ગાહાકોશ, ગાહારયણકોશાદિ ગ્રંથોને પુનઃ પુનઃ અવલોકતાં અનેક ઉદાહરણ-પ્રત્યુદાહરણાદિના મૂળ સ્રોતો પ્રાપ્ત થયા છે.

સિ. હે. શબ્દાનુશાસનની રચના પછી પણ અનેક ગુરૂભગવંતોએ- વૈયાકરણીઓએ સિ. હે. શબ્દાનુશાસન પર લઘુ-બૃહદ્ ગ્રંથોની રચના કરી હતી. તેમાં પંદરમાં સૈકામાં વૃદ્ધતપાગચ્છના શ્રીલબ્ધિસાગરસૂરિના શિષ્ય શ્રીસૌભાગ્યસાગરસૂરિના શિષ્ય ઉદયસૌભાગ્યગણિવરે વ્યુત્પત્તિપ્રકાશિકા- વ્યુત્પત્તિદીપિકા નામની હૈમપ્રાકૃત

વૃત્તિઢુંઢિકાની રચના કરી હતી. અનેક પ્રાચીન જ્ઞાન ભંડારોમાં તેની હસ્તલિખિત પ્રતિઓ છે. અમદાવાદ-વડોદરા-ખંભાત- ભાવનગર-પાટણના જ્ઞાનભંડારોમાં રહેલી હસ્તલિખિત પ્રતિને આધારે સંપાદન કાર્ય કર્યું છે. શાસનસમ્રાટ આચાર્ય વિજયનેમિસૂરીશ્વરજી જ્ઞાનશાલા-ખંભાતના જ્ઞાનભંડારમાં રહેલી પ્રતિને આદર્શપ્રતિ તરીકે રાખી A સંજ્ઞા આપી છે. પ્રતિ સંપૂર્ણ શુદ્ધ છે. શેષ હસ્તલિખિત પ્રતિઓ તથા મુદ્રિત પુસ્તકો કરતાં વિશેષ ઉદાહરણોનો ઉલ્લેખ આદર્શપ્રતિમાં મળે છે.

B. C. E. સંજ્ઞક પ્રતિમાં વાચના-પાઠો સમાન મળે છે. C. સંજ્ઞક પ્રતિમાં ઘણી જગ્યાએ પાઠો લખવાના રહી જવાથી પાછળથી પાઠો ઉમેરીયા છે. D. તથા F. સંજ્ઞક પ્રતિમાં મુખ્ય મુખ્ય ચાવીરૂપ સૂત્રોમાં રહેલાં ઉદાહરણો-શબ્દોની સંક્ષેપમાં વ્યુત્પત્તિ- સાધનિકા આપી છે. બારમા સૈકામાં મલધારિ નરચન્દ્રસૂરિ મહારાજે રચેલ પ્રાકૃતપ્રબોધ ગ્રંથનું સંપાદન સા. દીપ્તિપ્રજ્ઞાશ્રીજીએ હાજાપટેલની પોળના સંવેગી ઉપાશ્રયના જ્ઞાનભંડારમાં રહેલી ત્રણ હસ્તલિખિત પ્રતિને આધારે અનુક્રમે क. - ख. - ग. સંજ્ઞા આપી, શાંતિનાથ તાડપત્રીય જૈન જ્ઞાનભંડાર-ખંભાતમાં રહેલી તાડપત્રીય પ્રતિને ता. સંજ્ઞા આપી, વાડી પાર્શ્વનાથ જ્ઞાનભંડાર (પાટણ) તથા હેમચન્દ્રાચાર્ય જ્ઞાનમંદિર (પાટણ)માં રહેલી પ્રાકૃતદીપિકાની પ્રતિને दी. સંજ્ઞા આપી કર્યુ હતું. આ તમામ પ્રતિઓના મહત્ત્વપૂર્ણ પાઠોનો- ટિપ્પણીઓનો તે તે સંજ્ઞાઓનો ઉલ્લેખ કરી ઉપયોગ કર્યો છે.

અપભ્રંશભાષાના અધ્યયન- અધ્યાપન માટેનો સર્વશ્રેષ્ઠ - સવિસ્તૃત વિવેચનાત્મકગ્રંથ એટલે ડૉ. હરિવલ્લભ ભાયાણી સંપાદિત 'સિદ્ધહેમગત અપભ્રંશવ્યાકરણ'. આ ગ્રંથમાં અપભ્રંશભાષાના પ્રત્યેક શ્લોકોના અન્વય, શ્લોકગત શબ્દોના સ્વતંત્ર અર્થ, દેશીશબ્દોનો ઉલ્લેખ, શ્લોકાર્થ- વિસ્તૃત વિવેચન, ટિપ્પણીઓ કરી સ્વકીય અભિપ્રાયોનું નિદર્શન પણ કરીયું છે. અપભ્રંશદોધક વ્યાખ્યાલેશ-દોધકવૃત્તિપ્રતિમાં સુમતિરત્ને કરેલાં શ્લોકાર્થો અને ડૉ. હરિવલ્લભ ભાયાણીએ કરેલા શ્લોકાર્થોમાં પ્રાયઃ સમાનતા જોવા મળે છે. જ્યાં વિશિષ્ટાર્થ જોવા મળે છે ત્યાં તે તે ગ્રંથની સંજ્ઞા કરી વિશિષ્ટાર્થોનો ઉલ્લેખ કર્યો છે.

ગ્રંથગત વિષયોનું વર્ણન- વર્ગીકરણ ભાગ-૨ નવ પરિશિષ્ટોમાં કર્યુ છે. તેમાં 'प्राकृतव्याकरणान्तर्गता देशीशब्दाः પરિશિષ્ટ-૮નું સંપાદન देशीशब्दकोशः, देशीशब्दसंग्रहः, पाइअसद्दमहण्णवो, अपभ्रंशव्याकरणम् ગ્રંથોને આધારે કર્યું છે. चतुर्थपादान्तर्गता धात्वादेशाः પરિશિષ્ટ-૯માં દેશીધાતુઓના અર્થોનો ઉલ્લેખ पाइअसद्दमहण्णवो આધારે કર્યો છે.

પ્રાકૃતવ્યાકરણનું અધ્યયન કરનાર-કરાવનારને સુગમતા રહે, ગ્રંથપ્રત્યે રૂચિ વધે, અપ્રગટ કૃતિ પ્રગટ થાય, પૂર્વાપર સંબંધ ધરાવતાં અનેકવિધ ગ્રંથોનો સ્વાધ્યાય થાય, તેવા શુભાશયથી હેમપ્રાકૃતવૃત્તિઢુંઢિકાનું સંપાદન કર્યુ છે. બાલબ્રહ્મચારી તપાગચ્છાધિપતિ શાસનસમ્રાટ આચાર્ય શ્રીવિજયનેમિસૂરીશ્વરજી મ.સા.ના સમુદાયના પ્રવચન પ્રભાવક તેજોમૂર્તિ પરમ પૂજ્ય આચાર્ય શ્રીવિજયસૂર્યોદયસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન વિદ્વદ્વર્ય પરમ પૂજ્ય આચાર્ય શ્રીવિજયશીલચન્દ્રસૂરીશ્વરજી મ.સા.ની પ્રેરણા- આશીર્વાદથી જ સંપાદન કાર્ય સંપન્ન થયું છે. સંપાદન કાર્ય કરતાં કોઈ પણ ક્ષતિ રહી ગઈ હોય તો વિદ્વાનોને તે અંગે ધ્યાન દોરવા વિનંતી.

સંઘસ્થવિર સિદ્ધિસૂરિ મ. સા. ના સમુદાયના આચાર્ય મુનિચન્દ્રસૂરીશ્વરજી મ.સા.ની પ્રેરણાથી આચાર્ય કૈલાશસાગરસૂરિ જ્ઞાનમંદિરમાંથી હસ્તલિખિત પ્રતિની ઝેરોક્ષ મળી હતી.

ગ્રંથકર્તા, ગ્રંથના વિષયોને વર્ણવતી, પૂર્વાપરગ્રંથોના નિર્દેશવાળી, સંશોધનાત્મક પ્રસ્તાવના મુનિ ત્રૈલોક્યમંડનવિજયજી મહારાજે લખી આપવા બદલ તેમનો ખૂબ ખૂબ આભાર.

હઠીસિંહની વાડી, અમદાવાદ
મહાસુદ-૧૪

**ઉપાધ્યાય વિમલકીર્તિવિજય**

## પ્રસ્તાવના....

# પ્રાકૃતવ્યાકરણના ક્ષેત્રે એક સુ-સંસ્કૃત કાર્ય

પ્રાકૃતભાષાનું બંધારણ, નીતિનિયમો, વાક્યરચના વગેરે અંગે છણાવટ કરતા અનેક વ્યાકરણ ગ્રંથો મધ્યકાળમાં રચાયા. કેટલાક મહત્ત્વપૂર્ણ ગ્રંથોનો ઉલ્લેખ કરીએ તો પ્રાકૃતપ્રકાશ (- વરરુચિ), પ્રાકૃતલક્ષણ (- ચંડ), પ્રાકૃતકામધેનુ (- લંકેશ્વર), પ્રાકૃતાનુશાસન (- પુરુષોત્તમ), પ્રાકૃતકલ્પતરુ (- રામશર્મા તર્કવાગીશ), પ્રાકૃતસર્વસ્વ (- માર્કંડેય), સિદ્ધહેમ પ્રાકૃતવ્યાકરણ (- હેમચંદ્રાચાર્ય), પ્રાકૃતશબ્દાનુશાસન (- ત્રિવિક્રમ), પ્રાકૃતરૂપાવતાર (- સિંહરાજ), ષડ્ભાષાચંદ્રિકા (-લક્ષ્મીધર), પ્રાકૃતમણિદીપ (-અપ્પય્યદીક્ષિત), પ્રાકૃતાનંદ (-રઘુનાથ પંડિત), પ્રાકૃતચિંતામણિ (- શુભચંદ્રસૂરિ) વગેરે અનેક નામ નોંધી શકાય. જેમના વિશે ઉલ્લેખ મળતા હોય પણ અત્યારે અનુપલબ્ધ હોય તેવાં વ્યાકરણોની સંખ્યા પણ મોટી છે. તો આ વ્યાકરણો અને ઉપલબ્ધ પ્રાકૃત સાહિત્ય તથા અભિલેખ જેવાં સાધનોના આધારે, વિવિધ ભાષાઓના માધ્યમ દ્વારા પ્રાકૃત ભાષાનું શિક્ષણ આપતા પ્રાકૃત- માર્ગોપદેશિકા, પ્રાકૃતવિજ્ઞાનપાઠમાલા જેવાં પુસ્તકો પણ બહોળા પ્રમાણમાં રચાયાં છે. આ અંગે વિશદ જાણકારી માટે 'પ્રાકૃત સાહિત્ય કા ઇતિહાસ' (- ડૉ. જગદીશચંદ્ર જૈન, ચૌખંબા વિદ્યાભવન-વારાણસી, ઈ. ૨૦૧૪) જેવા ગ્રંથો અવલોકનીય છે.

ઉપલબ્ધ વ્યાકરણ ગ્રંથોમાં કલિકાલ સર્વજ્ઞ શ્રીહેમચંદ્રાચાર્ય વિરચિત સિદ્ધહેમપ્રાકૃતવ્યાકરણ એની વ્યાપકતા, ચોકસાઈ, ઉદાહરણ પસંદગી, વિશદતા જેવા ગુણોને લીધે મોખરાનું સ્થાન ધરાવે છે. ક્રમદીશ્વરના સંક્ષિપ્તસારના ૮ મા અધ્યાયની જેમ આચાર્યે સિદ્ધહેમશબ્દાનુશાસનના ૮ મા અધ્યાયરૂપે મહારાષ્ટ્રી, શૌરસેની, માગધી, પૈશાચી, ચૂલિકાપૈશાચી અને અપભ્રંશ એમ છ (અને વચ્ચે વચ્ચે દર્શાવાયેલા પ્રયોગોને પણ ધ્યાનમાં લઈને તો 'આર્ષ' ભાષા સહિત સાત) ભાષાઓના વિષયો સમજાવ્યા છે. પરવર્તી વ્યાકરણકારો પર આ વ્યાકરણનો ઊંડો પ્રભાવ દેખાય છે.

આ સિદ્ધહેમપ્રાકૃતવ્યાકરણ પર સ્વયં આચાર્યશ્રીએ એક વૃત્તિ રચી છે. આ વૃત્તિમાં સૂત્રગત તમામ બાબતો પર વિશદ પ્રકાશ પાથરવામાં આવ્યો છે. નિયમોની સ્પષ્ટતા માટે ઢગલાબંધ ઉદાહરણ-પ્રત્યુદાહરણ આપવામાં આવ્યા છે. વૃત્તિની રચના એવી સરસ પદ્ધતિથી કરવામાં આવી છે અને ઉદાહરણો-પ્રત્યુદાહરણોની ગોઠવણ એવી સુચારુ રીતે થઈ છે કે આવા માધ્યમથી પ્રાકૃતભાષાનો અભ્યાસ કરનાર વિદ્યાર્થી અનાયાસે જ પ્રાકૃત ભાષામાં વ્યુત્પન્ન થઈ શકે.

પરંતુ આ વૃત્તિના અભ્યાસ દરમિયાન વિદ્યાર્થીને તે તે ઉદા. - પ્રત્યુ.ની રુપપ્રક્રિયા કે સાધનિકા સમજવામાં થોડીક મુશ્કેલીઓ અવશ્ય પડી શકે. પ્રાકૃત શબ્દને સંસ્કૃતમાંથી કઈ રીતે વ્યુત્પાદિત કરવો ?, એક જ ઠેકાણે બે વિભિન્ન નિયમો એકસાથે લાગુ પડતા હોય તો પ્રાધાન્ય કોને આપવું ?, નિયમો લગાડવાનો ક્રમ કયો ? કોઈ ઠેકાણે કોઈ સૂત્ર લાગુ પડે કે ન પડે તેમાં નિયામક કોણ ? વગેરે વગેરે. સદ્‌ભાગ્યે આ સમસ્યાઓનું સમાધાન કરી આપતા અને પ્રયોગોની રુપસિદ્ધિ દર્શાવતા ઘણા ગ્રંથો રચાયા છે. આ ગ્રંથો સિદ્ધહેમપ્રાકૃતવ્યાકરણના અભ્યાસ દરમિયાન વિદ્યાર્થીઓને ઘણી સહાય પૂરી પાડે છે.

રૂપપ્રક્રિયા-દર્શક ઉપલબ્ધ ગ્રંથોમાં સૌથી પ્રાચીન ગ્રંથ કલિકાલસર્વજ્ઞશ્રીના અનુકાલીન અને વસ્તુપાલ મંત્રીશ્વરના માતૃપક્ષે ગુરુભગવંત એવા મલધારી શ્રીનરચંદ્રસૂરિજીનો (કાળધર્મ સં. ૧૨૮૭) છે. તેઓએ આને 'પ્રાકૃતપ્રબોધ' એવું અભિધાન આપેલું છે.★ આ ગ્રંથમાં વૃત્તિગત તમામ પ્રયોગોની વ્યુત્પત્તિ નથી દર્શાવાઈ. પણ મહત્ત્વપૂર્ણ પ્રયોગો પર જ નોંધ કરાઈ છે. તેમાં પણ अतः सेर्डोः કે क्लीबे स्वरान् सेः જેવાં વારંવાર પ્રયોજાતાં સૂત્રો પણ દર વખતે નથી નોંધાયાં. આના લીધે ગ્રંથનું કદ અપેક્ષાકૃત ઘણું નાનું રહી શક્યું છે. અને તેમ છતાં ગોઠવણી એટલી વ્યવસ્થિત છે કે સમગ્ર ગ્રંથનું અવલોકન કરી લઈએ તો આપોઆપ કોઈપણ પ્રાકૃત પ્રયોગની વ્યુત્પત્તિ કરવા માટે સક્ષમ બની શકાય.

થોડાક સમય બાદ આ પ્રાકૃત પ્રબોધમાં જ થોડુંક ઉમેરણ કરીને 'પ્રાકૃતદીપિકા' તૈયાર થઈ. અને પછી તો આવા પ્રક્રિયાદર્શક ગ્રંથો રચવાની પરંપરા ચાલી. આ પરંપરાનો જ એક મુકામ એટલે પ્રસ્તુત ઢુંઢિકા-ટીકા. જેને કર્તાએ 'વ્યુત્પત્તિદીપિકા' તરીકે ઓળખાવી છે.

ઢુંઢિકા-પ્રકારની ટીકામાં વૃત્તિગત તમામ ઉદા.- પ્રત્યુ.ની સાધનિકા તો દર્શાવાય જ છે. સાથે સૂત્રગત શબ્દોની પણ છણાવટ થાય છે, સૂત્ર સાથે સંબંધિત મહત્ત્વપૂર્ણ વાતો પણ નોંધાય છે. વળી, પ્રાયઃ ક્યાંય પણ કોઈ સૂત્રનો નિર્દેશ કર્યા વગર અતિદેશ કરી દેવાનું વલણ હોતું નથી. એટલે આ પ્રકારના ગ્રંથો સ્વાભાવિક રીતે જ મહાકાય બનતા હોય છે. પ્રાકૃત વ્યાકરણની ઢુંઢિકા પણ આમાં અપવાદભૂત નથી.

●

પ્રસ્તુત કૃતિની રચના સાથે સંકળાયેલી વ્યક્તિઓ વિશે થોડીક વાતો જોઈ લઈએ. આના રચનાકાર ઉદયસૌભાગ્ય (એક ઉલ્લેખ પ્રમાણે હૃદયસૌભાગ્ય) નામના મુનિ છે. તેઓ વૃદ્ધતપાગચ્છના શ્રીલબ્ધિસાગરસૂરિના શિષ્ય શ્રીસૌભાગ્યસાગરસૂરિના શિષ્ય છે. તેઓએ તપાગચ્છની લઘુ પોષાળ શાખાના શ્રીહર્ષકુલગણિ પાસે સિદ્ધહેમપ્રાકૃતવ્યાકરણનું અધ્યયન કર્યું હતું અને સર્વ પ્રયોગોની વ્યુત્પત્તિનું રહસ્ય પ્રાપ્ત કર્યું હતું તેમ તેઓએ સ્વયં ગ્રંથના અંતે પ્રશસ્તિમાં નોંધ્યું છે. આ હર્ષકુલગણિનું જૈન વિદ્યાક્ષેત્રે ઘણું મોટું પ્રદાન છે. તેઓએ સં. ૧૫૫૭માં લાસમાં વસુદેવચોપાઈ, સં. ૧૫૮૩માં સૂત્રકૃતાંગદીપિકા, ત્રિભંગીસૂત્ર વગેરે ગ્રંથો રચ્યા છે. પૌર્ણમિકગચ્છના વિદ્યારત્ન મુનિએ રચેલા કૂર્માપુત્રચરિતનું સં. ૧૫૯૭માં તેઓએ સંશોધન કરી આપ્યું હતું. તેઓએ રચેલા ત્રિભંગી સૂત્રની તપગચ્છપતિ શ્રીઆનંદવિમલસૂરિજીના શિષ્ય શ્રીવિજયવિમલગણિએ (એક ઉલ્લેખ પ્રમાણો વિજયવિમલના શિષ્ય આનંદવિજયજીએ) રચેલી વૃત્તિમાં હર્ષકુલ ગણિને 'શતાર્થી'નું બિરૂદ હતું તેમ જણાવાયું છે. મતલબ કે તેઓએ એક શ્લોકના સો અર્થો કરી શકવાની વિદ્વત્તા સંપાદિત કરી હતી. આ હર્ષકુલગણિ તપગચ્છપતિ શ્રીહેમવિમલસૂરિજીના શિષ્ય હતા.

---

★ प्राकृतप्रबोधः, સં. - સાધ્વી શ્રીદીપ્તિપ્રજ્ઞાશ્રીજી, પ્ર.- શ્રી હેમચન્દ્રાચાર્ય ટ્રસ્ટ- અમદાવાદ, સં. ૨૦૬૮

ઉદયસૌભાગ્યગણિએ પ્રસ્તુત વ્યુત્પત્તિદીપિકા (ઢુંઢિકા)ની રચના સુલતાન બહાદુરશાહના રાજ્યમાં (સં. ૧૫૮૧-૯૨) સં. ૧૫૯૧માં સ્તંભતીર્થ (-ખંભાત)માં રહીને કરી છે. તેઓએ આની જે પ્રશસ્તિ રચી છે તેના છઠ્ઠા શ્લોકની ત્રીજી પંક્તિમાં તેઓએ પોતાનું નામાચરણ કર્યું છે. તેમાં અક્ષરો આમ વંચાય છે : 'सुद्धी हृदयसौभाग्यः' આના આધારે કર્તાનું નામ હૃદયસૌભાગ્ય કલ્પાયું છે. પણ 'सुद्धी' ને 'सुधीः' એમ સુધારીએ તો, વિસર્ગના અદર્શનના આધારે सुधीरुदयसौभाग्यः એમ પાઠ કલ્પી શકાય અને કર્તાનું નામ 'ઉદયસૌભાગ્ય' સમજી શકાય. જે ચોથા પાદના અંતે મળતી પુષ્પિકા સાથે પણ સુસંગત છે.

•

સિદ્ધહેમશબ્દાનુશાસનના પ્રથમ ૭ અધ્યાયમાં સંસ્કૃતભાષાનું વ્યાકરણ રજૂ થયું છે. આના પર સ્વયં શ્રીહેમચંદ્રાચાર્ય ભગવંતે તત્ત્વપ્રકાશિકા નામની ૧૮,૦૦૦ શ્લોક પ્રમાણ બૃહદ્વૃત્તિની રચના કરી છે.

આ વૃત્તિમાં સમાવિષ્ટ ૩૦,૦૦૦ કરતાં પણ વધારે ઉદાહરણ-પ્રત્યુદાહરણોની તેમજ શબ્દાનુશાસનગત તમામ સૂત્રોમાં રહેલા મૂળ શબ્દોની સાધનિકા દર્શાવતી એક વૃત્તિની રચના સં. ૧૫૯૧માં સૌભાગ્યસાગર નામના વ્યાકરણ વિશારદ મુનિએ કરી છે. આ વૃત્તિ પણ 'ઢુંઢિકા'ના નામે ઓળખાય છે. વ્યાકરણના અભ્યાસીઓ માટે આ એક મહત્ત્વપૂર્ણ સહાયક સાધન છે. આની સહાયથી વિદ્યાર્થી ઘણી સરળતાપૂર્વક વ્યાકરણમાં ગતિ કરી શકે છે.

આ મહાકાય ગ્રંથનું સંપાદન પૂજ્ય ઉપા. શ્રીવિમલકીર્તિવિજયજી ગણિએ સં. ૨૦૪૫માં આરંભ્યું હતું. કાર્ય ગંજાવર અને સંસ્થાકીય શ્રમને બદલે વ્યક્તિગત સ્તરે જ કાર્ય સાધવાનું. હસ્તપ્રત ઉકેલવાથી માંડીને પ્રૂફ જોવા સુધીનાં બધાં જ કામ જાતે કરવાનાં. એટલે સમય તો લાગે જ. લગભગ ૨૫ વર્ષે ૭ ભાગમાં, લગભગ ૨૫૦૦ પાનામાં ગ્રંથ પ્રકટ થઈ શક્યો.

આ સંપાદનને મળેલા બહોળા પ્રતિસાદે આ સંપાદન પાછળના પરિશ્રમનું જાણે સાટુવાળી આપ્યું. ઉમળકાથી છલકાતા પ્રતિભાવપત્રો કે આશીર્વાદપત્રોની જ વાત નથી કરતો. પણ જૈન શ્રીસંઘમાં વ્યાકરણના પઠન-પાઠનમાં આ ગ્રંથ એક અનિવાર્ય સાધન તરીકે વપરાતો થયો. ઘણા ઘણા અભ્યાસીઓનો સિદ્ધહેમશબ્દાનુશાસન ભણવાનો ઉત્સાહ આ ગ્રંથની મદદથી વધ્યો છે જે અમારા સૌ માટે આનંદદાયક બીના છે. પાણિનિવ્યાકરણના અભ્યાસીઓને સિદ્ધહેમની ગતિવિધિ સમજવાનું એક મહત્ત્વપૂર્ણ સાધન પણ આ રીતે ઊભું થયું છે. જાણવા મળ્યા પ્રમાણે એક બહેન 'ઢુંઢિકાવૃત્તિનું વ્યાકરણના અભ્યાસમાં પ્રદાન' એવા વિષય પર પી.એચ.ડી. પણ કરી રહ્યા છે. તો સુખ્યાત વિદ્વાન શ્રી હર્ષવદન ત્રિવેદીએ 'શબ્દસૃષ્ટિ'ના જૂન, ૨૦૧૬ના અંકમાં ખાસ એક લેખ લખીને આ સંપાદનને બિરદાવ્યું પણ છે.

મહત્ત્વની વાત તો એ છે કે આટઆટલા પરિશ્રમ પછી પણ ઉપાધ્યાય શ્રીવિમલકીર્તિવિજયજી થાક્યા નહીં. અને તરત જ પ્રાકૃતઢુંઢિકાનું કામ હાથમાં લીધું. અને ઘણા ઘણા પરિશ્રમે એ પણ આજે પ્રકાશિત થઈ રહ્યું છે. આ પ્રસંગે તેઓના નાના ગુરુભાઈ હોવાના નાતે મને આનંદ હોય તે સ્વાભાવિક જ છે. પૂર્વાચાર્યોનાં આવાં સર્જનો એક સુયોગ્ય વ્યક્તિના હાથે સંપાદિત થઈને સમાજ સુધી પહોંચતાં હોય તે ઘટનાના સાક્ષી થવાનો આનંદ તો કેવો અદકેરો હોય !

•

પ્રાકૃત એ આપણી ભાષા છે, આપણાં શાસ્ત્રોની- આપણા આગમોની ભાષા છે, પ્રભુ વીરે જનસમૂહ સુધી આત્મકલ્યાણની વાત પહોંચાડવાના માધ્યમ તરીકે અપનાવેલી ભાષા છે. જૈનો માટે તો એ માતૃભાષા જેવું સમ્માન્ય સ્થાન ધરાવે છે. અઢી-અઢી હજાર વર્ષથી જૈન શ્રમણઓએ આ ભાષાના અધ્યયન-અધ્યાપનની પરંપરાને અક્ષુણ્ણ રાખી છે, આ ભાષામાં વિપુલ પ્રમાણમાં ધર્મસાહિત્ય અને લલિતસાહિત્ય રચ્યું છે, આ ભાષાને સાચવી છે - પોષી છે - રમાડી છે - લાડ લડાવ્યાં છે. હકીકત તો એ છે કે આ ભાષા વગર તો શાસ્ત્રોનાં રહસ્યોનો- આગમોના પરમાર્થનો પાર પામવો શક્ય જ નથી.

પણ કમનસીબીએ આજનું ચિત્ર કદાચ નિરાશાજનક છે. જૈન શ્રમણવર્ગમાં પ્રાકૃતભાષાના અધ્યયનની પરિપાટી બહુ જ ઝડપથી તૂટતી જાય છે. એક તરફ, પ્રાકૃતભાષાનો સંગીન અભ્યાસ કરાવી શકે તેવા અધ્યાપકોની ખોટ પડતી જાય છે, તો બીજી તરફ, શ્રમણવર્ગમાં પણ વ્યાકરણના અભ્યાસ પ્રત્યે અરુચિ વધતી જાય છે. આને લીધે જૈન સંઘ મૂળભૂત ઘણી ઘણી બાબતોથી લગભગ વંચિત થતો જાય છે. જૈનેતર ક્ષેત્રે તપાસીએ તો પણ પ્રાકૃતભાષાનું ભવિષ્ય ચિંતાજનક જ દેખાય છે. ગુજરાત યુનિવર્સિટી હોય કે અન્ય વિદ્યાલયોના પ્રાકૃત વિભાગ હોય - બધે લગભગ મરણાસન્ન સ્થિતિ છે, પ્રાકૃતભાષાની. જાણવા મળ્યા પ્રમાણે તો ઘણે ઠેકાણે પ્રાકૃત વિભાગ જ ટૂંક સમયમાં બંધ પડે તેમ છે. સાચું કહીએ તો, જૈન સમાજ હોય કે જૈનેતર, નવા નીપજનારા પ્રાકૃતભાષાના જાણકારો પ્રમાણમાં નબળા જ હોય છે; સક્ષમ કે સમર્થ નહિ જ. બહુ બહુ તો આશ્વાસન લેવા પૂરતાં આમાં અપવાદ હોઈ શકે.

ખરેખર તો આપણે આજે જ ચેતી જવું પડે. વ્યાકરણના અધ્યયનના ફાયદા સંઘ અને સંયમી વર્ગની નવી પેઢીને ગળે ઉતારવા પડે. તે લોકોને પ્રેરણા આપીને એ ભણવા તરફ વાળવા-દોરવા પડે. અને જે થોડાક પણ સુતજનો ઉપલબ્ધ છે તેમનો લાભ લઈને વ્યાકરણના અધ્યયનની પરિપાટી પુનઃ વિકસિત થાય એ ચિરકાળજીવી થાય તેવા પ્રયાસો આદરવા જ જોઈએ.

પ્રસ્તુત પ્રકાશન એ પ્રયાસની દિશામાં જ મંડાયેલું એક નક્કર પગલું છે. આપણે એ પ્રકાશનનું સ્વાગત કરીએ, અંતરના ઉમળકાથી એને આવકારીએ.

**- આ. શ્રી વિજયશીલચંદ્રસૂરિ**
**- શિષ્ય મુનિ ત્રૈલોક્યમંડન વિજય**

| सांकेतिक शब्द: | ग्रंथ: | सांकेतिक शब्द: | ग्रंथ: |
|---|---|---|---|
| अनु० अङ्कः | अनुसन्धानः अङ्कः- ६६ | प० प्र० | परमात्मप्रकाशः । |
| अभि० शा० | अभिज्ञानशाकुन्तलम् । | पा० म० | पाइअ-सद्द-महण्णवो । |
| आव० चू० | आवश्यकचूर्णिः । | पु० प्र० | पुरातनप्रबन्धसंग्रहः । |
| आव० नि० | आवश्यकनिर्युक्तिः । | प्रा० भा० | प्राकृतभारती |
| क० द० | कविदर्पणः । | म० क० | मणोरमा कहा । |
| क० म० | कर्पूरमञ्जरी । | म० पु० | महापुराणः । |
| क० सा० | कथासरित्सागरः । | मु० रा० | मुद्राराक्षसः । |
| क० सू० | कल्पसूत्रम् । | मृ० क० | मृच्छकटिकम् । |
| का० प्र० | काव्यप्रकाशः । | रा० दू० | राजस्था रा दूहा । |
| क्रि० स० | क्रियारत्नसमुच्चयः । | व० ल० | वज्जालग्गं । |
| कु० प्र० | कुमारपालप्रतिबोधप्रबन्धः । | वृ० जा० स० | वृत्तजातिसमुच्चयः । |
| ग० व० | गउडवहो । | वे० सं० | वेणीसंहारः । |
| गा० को० | गाहाकोशः । | श० म० | शब्दरत्नमहोदधिः । |
| गा० र० | गाहारयणकोशः । | शृ० प्र० | शृङ्गारप्रकाशः । |
| गा० स० | गाथा सप्तशती । | सं. रा० | संदेशरासकः । |
| जु० जि० च० | जुगाइजिणिंदचरियं । | स० क० | सरस्वतीकण्ठाभरणम् । |
| द० वै० | दशवैकालिकसूत्रम् । | सि० श० | सिद्धहेमचन्द्रशब्दानुशासनम् । |
| धा० पा० | धातुपारायणम् । | सु० गा० सं० | सुभासियगाहासंगहो । |
| धा० र० | धातुरत्नाकरः । | सु० र० भा० | सुभाषितरत्नभाण्डागारम् । |
| ध्व० लो० | ध्वन्यालोकः । | सु० सा० | सुकृतसागरः । |
| ना० क० | नाणपंचमी कहा । | से० ब० | सेतुबन्धः । |

# સમર્પણ

જેમણે આ જગતને પ્રાકૃતભાષાના અજોડ વિદ્વાન
પરમ પૂજ્ય આચાર્ય ભગવંત શ્રીવિજયકસ્તૂરસૂરીશ્વરજી
મહારાજની ભેટ આપી તેવા શાંતમૂર્તિ - વાત્સલ્યવારિધિ
- સમયજ્ઞ પરમ પૂજ્ય આચાર્ય ભગવંત
**શ્રીવિજયવિજ્ઞાનસૂરીશ્વરજી મહારાજ સાહેબ**ના
ચરણોમાં
સાદર સમર્પણ...

बृहत्तपागच्छीय-श्रीउदयसौभाग्यगणिविरचितया
व्युत्पत्तिदीपिकाभिधान-
ढुण्ढिकया समर्थितं सिद्धहेमप्राकृतव्याकरणम् - १
[ अष्टमो विभागः ]

॥ अर्हम् ॥

॥ नमो नमः श्रीगुरुनेमिसूरये ॥

# बृहत्तपागच्छीय-श्रीउदयसौभाग्यगणिविरचितया व्युत्पत्तिदीपिकाभिधान-ढुण्ढिकया समर्थितं सिद्धहेमप्राकृतव्याकरणम् ॥

## [ प्रथमो भागः ]

## ॥ अथ अष्टमाध्यायस्य प्रथमः पादः ॥

यस्य क्रमनमस्कारः, सारसौख्यविधायकः । स श्रीविश्वविभुर्जीयात्, तमांसि[1] नितमां मम ॥

[2]सिद्धहेमाष्टमाऽध्याये, प्रोक्तं प्राकृतलक्षणम् । क्रियते ढुण्ढिका तस्य, नाम्ना व्युत्पत्तिदीपिका ॥

**अथ प्राकृतम् ॥ ८।१।१ ॥**

इह च यथा संस्कृते लक्षणे धातुप्रत्ययादिसिद्धायां प्रकृतौ पश्चाद्विभक्त्यादिविधिः तथा प्राकृतलक्षणेऽपि प्रायः प्राकृतलक्षणसिद्धां प्रकृतिमाधाय तदनन्तरं विभक्त्यादिप्रक्रिया कर्तव्या, नान्यथा, [3]रूपसिद्धिक्रमभङ्गप्रसङ्गादिति ।

**अथ** शब्द आनन्तर्याऽर्थोऽधिकाराऽर्थश्च । प्रकृतिः = संस्कृतम्, तत्र भवं - तत आगतं वा प्राकृतम् । संस्कृताऽनन्तरं प्राकृतमधिक्रियते । संस्कृताऽनन्तरं च प्राकृतस्याऽनुशासनं सिद्ध-साध्यमानभेदसंस्कृतयोनेरेव तस्य लक्षणं न देश्यस्येति ज्ञापनार्थम् । संस्कृतसमं तु संस्कृतलक्षणेनैव गतार्थम् ।

प्राकृते च प्रकृति - प्रत्यय - लिङ्ग - कारक - समास - संज्ञादयः संस्कृतवद् वेदितव्याः । लोकादिति च वर्त्तते । तेन ऋ-ॠ-ऌ-ॡ-ऐ-औ-ङ-ञ-श-ष-विसर्जनीय-प्लुतवर्ज्यो वर्णसमाम्नायो लोकादवगन्तव्यः । ङ-ञौ स्ववर्गसंयुक्तौ भवतः । ऐदौतौ च केषाञ्चित् । कैतवम् → कैअवं । सौदर्यम् → सौअरिअं । कौरवाः → कौरवा । तथा अस्वरं व्यञ्जनं द्विवचनं चतुर्थीबहुवचनं च न भवति ॥

**[ प्राकृतम् ]** प्रकृतिः = संस्कृतम्, तत्र भवम् । 'भवे' (६।३।१२३) अण्प्र० → अ । **'वृद्धिः स्वरेष्वादे०'** (७।४।१) वृद्धिः । तत आगतं वा । 'तत आगते' (६।३।१४९) अण्प्र० → अ ।

**[ देश्यम् ]** देशे भवं = देश्यम् । 'दिगादि-देहांशाद् यः' (६।३।१२४) यप्र० ।

[4]देश्यस्य प्राकृतमनेकधा । यथा-

झल्लरिपउरे गामे इल्लपुलिंदाण सुम्मए सद्दो । तह सज्जिज्जइ चिच्वी सुहेण जह वोलए तुंगी ॥

अर्थः - अजाप्रचुरे ग्रामे व्याघ्राणां शब्दः श्रूयते तथा अग्निः सज्जीक्रियते, यथा सुखेन रात्रिरतिक्रामतीत्यर्थः ।

---

१. K. नितरां । २. K. सिद्धहै० । ३. K. रूपसिद्धिः । ४. K. देश्यं ।

सत्तावीसं जोयणकरपसरो जाव अज्ज वि न होइ ।
पडिहत्थबिंबगहवइवयणे ता वच्च उज्जाणं ॥

अर्थः - सत्तावीसं जोयणशब्देन चन्द्रः, तस्य करप्रसरो यावदद्यापि न भवति । हे प्रतिहस्तबिम्बग्रहपतिवदने ! प्रतिहस्तं - न्यक्कृतं बिम्बं - मण्डलं यस्य सः = प्रतिहस्तबिम्बः, प्रतिहस्तबिम्बो ग्रहपतिश्चन्द्रो यस्मात् तत् = प्रतिहस्तबिम्बग्रहपति, एवंविधं वदनं - मुखं यस्याः सा प्रतिहस्तबिम्बग्रहपतिवदना, तस्याः सम्बोधनं क्रियते । तावत् त्वमुद्यानं व्रजेत्यर्थः ।

अत्र ऋ-ॠ-लृ-ॡ-ऐ-औ-ङ-ञ-श-ष-विसर्ग-प्लुता एतान्यक्षराणि न स्युः । ङ-ञौ स्ववर्गसंयुक्तौ भवतः । केषाञ्चिन्मते ऐदौतौ भवतः । यथा–

**[ कैअवं ]** कितवस्य भावः कर्म वा = कैतवम् । 'युवादेरण्' (७।१।६७) अण्प्र० → अ । कितवस्य इदं वा = कैतवम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः - कि० → कै० । 'ऐत एत्' (१।१४८) इति प्राप्तेऽपि केषाञ्चिन्मते ऐत् प्राकृतेऽपि दृश्यते, अतो न भवति ऐकारस्य एकारः । स्वमते तु 'अइदैत्यादौ च' (१।१५१) इति अइ प्राप्नोति । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **कैअवं** । उक्तं च–

[1]कैअवरहियं पिम्मं नत्थि च्चिय मामि ! माणुसे लोए ।
अह पिम्मं को विरहो ? अह विरहो कोवि जीए(अ)इ ? ॥

अर्थः - हे मामि ! हे सखि ! कैतवरहितं - दम्भरहितं प्रेम मानुषे लोके नास्त्येव । अथ यदि एवंविधं प्रेम वर्त्तते तदा को विरहः ? अथ विरहस्तदा कोऽपि जीवति ? । अपितु न कोऽपीत्यर्थः ॥

उक्तं च हेमाऽनेकार्थेऽपि - "कैतवं द्यूत-दम्भयोः" । [अनेकार्थसङ्ग्रहे श्लोकः-६९१]

अथ औकारः-

**[ सौअरिअं ]** सोदरस्य भावः । 'पति-राजान्त०' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः - सो० → सौ० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'स्याद्-भव्य-चैत्य-चौर्यसमेषु यात्' (२।१०७) यात् प्राग् इ० । 'लोकात्' (१।१।३) र० → रि० । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **सौअरिअं** ।

**[ कौरवा ]** कुरु । कुरोरिमे । 'उत्सादेरञ्' (६।१।१९) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः - कु० → कौ० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव्-रु० → रव्० । प्रथमा जस् । अत्र 'औत ओत्' (१।१५९) इति प्राप्तेऽपि औकारः स्थितः । 'जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः' (३।१२) दीर्घः - व० → वा० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । अत्र स्वमते तु 'अउः पौरादौ च' (१।१६२) इति अउः प्राप्नोति । अत्र स्वररहितं व्यञ्जनं स्यादित्यादिविभक्तीनां द्विवचनं चतुर्थीबहुवचनं च न भवति ॥१॥

## बहुलम् ॥ ८।१।२ ॥

बहुलमित्यधिकृतं वेदितव्यमा शास्त्रपरिसमाप्तेः । ततश्च क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव भवति, तच्च यथास्थानं दर्शयिष्यामः ॥

१.कइअवरहिअं पेम्मं णत्थि व्विअ मामि ! माणुसे लोए । अह होइ कस्स विरहो विरहे होतम्मि [2]को जिअइ ॥
[गा० स० - २।२४ । शृ० प्र० - ३१।३]
कैतवरहितं प्रेम नास्त्येव मातुलानि मानुषे लोके । अथ भवति कस्य विरहो विरहे भवति को जीवति ॥
१. पाठां० शृ० प्र० - चिअ । २. शृ० प्र० - कस्को ।

**[ बहुलं ]** बहुपूर्व० 'लांक् आदाने' (१०६८) ला । बहून् अर्थान् लातीति बहुलम् । 'क्रियाविशेषणात्' (२।२।४१) अम् । 'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलोपः । 'लोकात्' (१।१।३) बहुलम् । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **बहुलं** ॥२॥

## आर्षम् ॥ ८।१।३ ॥

ऋषीणामिदम् = आर्षम् । आर्षं प्राकृतं बहुलं भवति । तदपि यथास्थानं दर्शयिष्यामः । आर्षे हि सर्वे विधयो विकल्प्यन्ते ॥

**[ आर्षं ]** ऋषीणामिदम् = आर्षम् । 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० → अ । ('तस्येदम्' (६।३।१६०) अण्प्र० → अ०) । 'वृद्धिः स्वरेष्वा०' (७।४।१) वृद्धिः - ऋ० → आर्० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) सि० → अम्० । 'समानादमोऽतः' (१।४।४६) अलुक् । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **आर्षं** ।

आर्षे हि सर्वे विधयो वैचित्र्येण प्रवर्तन्ते इत्यर्थः ॥३॥

## दीर्घ-ह्रस्वौ मिथो वृत्तौ ॥ ८।१।४ ॥

वृत्तौ-समासे स्वराणां दीर्घ-ह्रस्वौ बहुलं भवतः । मिथः- परस्परम् ॥

तत्र ह्रस्वस्य दीर्घः - अन्तर्वेदिः → अन्तावेई । सप्तविंशतिः → सत्तावीसा ॥ क्वचिन्न भवति -जुवइअणो ॥ क्वचिद्विकल्पः-वारीमई वारिमई । भुजयन्त्रम् → भुआयन्तं भुअयन्तं ।

पतिगृहम् → पईहरं पइहरं । वेणुवनम् → वेलूवणं वेलुवणं ॥

दीर्घस्य ह्रस्वः - निअम्बसिल - खलिअ - वीइ - मालस्स ॥

क्वचिद्विकल्पः -जउँणयडं जउँणायडं । नइसोत्तं नईसोत्तं । गोरिहरं गोरीहरं । वहुमुहं वहूमुहं ॥

**[ दीर्घह्रस्वौ ]** दीर्घश्च ह्रस्वश्च = दीर्घह्रस्वौ । प्रथमा औ ।

**[ मिथो वृत्तौ ]** मिथस् । 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अव्ययस्य' (३।२।७) अम्लोपः । 'वृतूङ् वर्त्तने' (९५५) वृत् । वर्तनं = वृत्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । सप्तमी ङि । 'ङिडौं' (१।४।२५) ङि० → डौ० → औ० । 'डित्यन्त्य०' (२।१।११४) इलुक् ।

**[ अन्तावेई ]** अन्तर्मध्ये वेदिः = अन्तर्वेदिः । 'सप्तमी शौण्डाद्यैः' (३।१।८८) समासः । 'अन्त्यव्यञ्जनस्य' (१।११) र्लुक् । अनेन ह्रस्वस्य दीर्घः - त० → ता० । 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः- इ० → ई० । 'अन्त्यव्य०' (१।११) स्लुक् **अन्तावेई** । अन्तर्वेदिः - समस्थलीत्यर्थः ।

**[ सत्तावीसा ]** सप्तन् - विंशति । [1]सप्त च ते विंशतिश्च = सप्तविंशतिः । 'अन्त्यव्य०' (१।११) न्लुक् । 'क-ग-ट-ड-त-द-प०' (२।७७) प्लुक् । 'अनादौ शेषाऽऽदेशयोर्द्वित्वम्' (२।८९) द्वित्वं - त० → त्त० । अनेन ह्रस्वस्य दीर्घः - त्त० → त्ता० । 'विंशत्यादेर्लुक्' (१।२८) अनुस्वारलुक् । 'ईर्जिह्वा-सिंह-त्रिंश०' (१।९२) त्या सह वि० → वी० । 'श-षोः सः' (१।२६०) श० → स० । 'शेषं संस्कृतवत्सिद्धम्' (४।४४८) इत्युक्तत्वात् 'आत्' (२।४।१८) इत्याप्प्र० → आ । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सत्तावीसा** ।

---

१. D. सप्तभिरधिका विंशतिः ।

**[ जुवइअणो ]** युवति-जन । युवतिश्चासौ जनश्च = युवतिजनः । 'आदेर्यो जः' (१।२४५) यु० → जु० । 'क-ग-च-ज०' (१।१७७) त-जयोर्लुक् । 'नो णः' (१।२२८) न० → ण० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **जुवइज( अ )णो** ।

**[ वारीमई वारिमई ]** वारि-मति(२) । [१]वारिणि मतिर्यस्य सः = वारिमतिः । अनेन क्वचिद्वा ह्रस्वस्य दीर्घः - रि० → री० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - इ० → ई० । 'अन्त्य०' (१।११) स्लुक् **वारीमई वारिमई** ।

**[ भुआयन्तं भुअयन्तं ]** भुज-यन्त्र(२) । 'क-ग-च-ज०' (१।१७७) ज-ययोर्लुक् । अनेन क्वचिद्विकल्पेन ह्रस्वस्य दीर्घः - अ० → आ० । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **भुआयन्तं भुअयन्तं** ।

**[ पईहरं पइहरं ]** पति-गृह (२) । पत्युर्गृहं = पतिगृहम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'गृहस्य घरोऽपतौ' (२।१४४) गृह० → घर० । 'ख-घ-थ-ध-भाम्' (१।१८७) घ० → ह० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः । अनेन वा ह्रस्वस्य दीर्घः - इ० → ई० **पईहरं पइहरं** ।

**[ वेलूवणं वेलुवणं ]** वेणु-वन (२) । वेणूनां - वंशानां वनं = वेणुवनम् । 'वेणौ णो वा' (१।२०३) णु० → लु० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः । अनेन वा ह्रस्वस्य दीर्घः - लु० → लू० **वेलूवणं वेलुवणं** ।

**[ निअम्बसिलखलिअवीइमालस्स ]** नितम्बशिला - स्खलित-वीचि - मालस्य । [२]नितम्बशिलायां स्खलिता वीचिमाला - कल्लोलमाला यस्य सः, तस्य = नितम्बशिलास्खलितवीचिमालस्य । 'क-ग-च-ज०' (१।१७७) त-चयोर्लुक् । 'श-षोः सः' (१।२६०) शि० → सि० । अनेन दीर्घस्य ह्रस्वः - ला० → ल० । 'क-ग-ट-ड०' (२।७७) स्लुक् । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **निअम्बसिलखलिअवीइमालस्स** ।

**[ जउँणयडं जउँणायडं ]** यमुना - तट (२) । यमुनायास्तटं = यमुनातटम् । 'आदेर्यो जः' (१।२४५) य० → ज० । 'यमुना - चामुण्डा - कामुका-ऽतिमुक्तके मोऽनुनासिकश्च' (१।१७८) म्लुक् - अनुनासिकश्च । 'नो णः' (१।२२८) ना० → णा० । अनेन वा क्वचिद् दीर्घस्य ह्रस्वः - णा० → ण० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अस्य यः । 'टो डः' (१।१९५) टस्य डः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जउँणयडं जउँणायडं** ।

**[ नइसोत्तं नईसोत्तं ]** नदी - [३]श्रोतस् (२) । नद्याः श्रोतः = नदीश्रोतः । 'क-ग-च-ज०' (१।१७७) द्लुक् । अनेन क्वचिद् वा दीर्घस्य ह्रस्वः - ई० → इ० । 'सर्वत्र ल-व०' (२।७९) र्लोपः । 'श-षोः सः' (१।२६०) शो० → सो० । 'तैलादौ' (२।९८) द्वित्वं-त० → त्त० । 'अन्त्यव्य०' (१।११) स्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **नइसोत्तं नईसोत्तं** ।

**[ गोरिहरं गोरीहरं ]** गौरी-गृह (२) । गौर्या गृहम् । 'औत ओत्' (१।१५९) गौ० → गो० । अनेन वा क्वचिद् दीर्घस्य ह्रस्वः - री० → रि० । 'गृहस्य घरोऽपतौ' (२।१४४) गृह० → घर० । 'ख-घ-थ-ध-भाम्' (१।१८७) घस्य हः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **गोरिहरं गोरीहरं** ।

---

१. G. वारिमतिरिच्छाऽस्याऽसौ । २. D. नितम्बशिलाभिः० । K. नितम्बशिलायाः० । ३. तैलादौ - स्रोतस् ।

**[ वहूमुहं वहूमुहं ]** वधू-मुख (२) । वध्वा मुखम् । 'ख-घ-थ-ध-भाम्' (१।१८७) ध-खयोर्हः । अनेन क्वचिद् वा दीर्घस्य ह्रस्वः - हू० → हु० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वहूमुहं वहूमुहं** ॥४॥

## पदयोः सन्धिर्वा ॥ ८।१।५ ॥

संस्कृतोक्तः सन्धिः सर्वः प्राकृते पदयोर्व्यवस्थितविभाषया भवति ॥

वासेसी वास-इसी । विसमायवो विसम-आयवो । दहीसरो दहि-ईसरो । साऊअयं साउ-उअयं ॥

पदयोरिति किम् ? पाओ । पई । वत्थाओ । मुद्धाइ मुद्धाए । महइ महए ॥

बहुलाधिकारात् क्वचिद् एकपदेऽपि - काहिइ काही । बिइओ बीओ ॥

**[ पदयोः सन्धिर्वा ]** पद षष्ठी ओस् । सन्धि प्रथमा सि । वा प्रथमा सि ।

**[ वासेसी वास-इसी ]** व्यास-ऋषि (२) । व्यासश्चासौ ऋषिश्च = व्यासर्षिः । 'अधो म-न-याम्' (२।७८) य्लोपः । 'इत्कृपादौ' (१।१२८) ऋकारस्य इ० । अनेन वा सन्धिः । 'अवर्णस्ये०' (१।२१६) ए । 'श-षोः सः' (१।२६०) षि० → सि० । 'अक्लीबे सौ' (३।१९) दीर्घः - सि० → सी० । 'अन्त्यव्य०' (१।११) स्लुक् **वासेसी वास-इसी** ।

**[ विसमायवो विसम-आयवो ]** विषम - आतप (२) । विषमश्चासावातपश्च = विषमाऽऽतपः । 'श-षोः सः' (१।२६०) ष० → स० । अनेन वा सन्धिः । 'समानानां०' (१।२।१) दीर्घः-म० → मा० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अस्य यः । 'पो वः' (१।२३१) प० → व० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **विसमायवो विसम - आयवो** ।

**[ दहीसरो दहि-ईसरो ]** दधि - ईश्वर (२) । दधिप्रधान ईश्वरः = दधीश्वरः । 'ख-घ-थ-ध०' (१।१८७) धस्य हः । अनेन वा सन्धिः । 'सर्वत्र ल-व०' (२।७९) व्लोपः । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **दहीसरो दहि - ईसरो** ।

**[ साऊअयं साउ - उअयं ]** स्वादु - उदक (२) । स्वादु च तदुदकं च = स्वादूदकम् । 'सर्वत्र ल-व०' (२।७९) व्लोपः । 'क-ग-च-ज०' (१।१७७) द्वयोर्दयोर्लुक् । अनेन वा सन्धिः । 'समानानां०' (१।२।१) दीर्घः - ऊ० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अस्य यः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **साऊअयं साउ-उअयं** ।

**[ पाओ ]** पाद । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **पाओ** ।

**[ पई ]** पति । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अक्लीबे सौ' (३।१९) दीर्घः - ई० । 'अन्त्य०' (१।११) स्लुक् **पई** ।

**[ वत्थाओ ]** वस्त्र । पञ्चमी ङसि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्तस्य थः । 'अनादौ शेषाऽऽदेशयोर्द्वित्वम्' (२।८९) थस्य द्वित्वम् । 'द्वितीय - तुर्ययोरुपरि पूर्वः' (२।९०) पूर्वथस्य तः । 'जस्-शस्-ङसि०' (३।१२) त्थ० → त्था० । 'ङसेस्त्तो-दो०' (३।८) ङसि० → दो० । 'क-ग-च-ज०' (१।१७७) द्लुक् **वत्थाओ** ।

**[ मुद्धाइ मुद्धाए ]** मुग्धा (२) । तृतीया टा । 'क-ग-ट-ड०' (२।७७) ग्लुक् । 'अनादौ शेषा०' (२।८९) धस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वधस्य दः । 'टा - ङस् -डेरदा०' (३।२९) टा० → इ० - ए० **मुद्धाइ मुद्धाए** ।

**[ महइ महए ]** 'काक्षु काङ्क्षायाम्' (५८०) काक्ष्(२) । 'उदितः स्वरा०' (४।४।९८) नोऽन्तः । 'काङ्क्षेराहा-ऽहिलङ्घा-ऽहिलङ्ख-वच्च-वम्फ-मह-सिह-विलुम्पाः (४।१९२) काङ्क्ष० → मह० । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) मह० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० - ए० **महइ महए** ।

**[ काहिइ काही ]** 'डुकृंग् करणे' (८८८) कृ (२) । भवि० स्यति । 'भविष्यति हिरादिः' (३।१६६) हिरागमः । 'त्यादीनामाद्य०' (३।१३९) स्यति० → इच्० → इ० । 'आः कृगो भूत०' (४।२१४) कृ० → का० । बहुलाधिकारात् क्वचिदेकपदेऽपि सन्धिः । 'समानानां०' (१।२।१) दीर्घः - ही० **काहिइ काही** ।

**[ बिइओ बीओ ]** द्वितीय (२) । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'क-ग-च-ज०' (१।१७७) त-ययोर्लुक् । 'समानानां०' (१।२।१) दीर्घः - बी० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **बीओ** । 'पानीयादिष्वित्' (१।१०१) ईत्० → इत्० **बिइओ** ॥५॥

## न युवर्णस्याऽस्वे ॥ ८।१।६ ॥

इवर्णस्य उवर्णस्य च अस्वे वर्णे परे सन्धिर्न भवति ॥

न [1]वेरि-वग्गे वि अवयासो । [2]वंदामि अज्ज-वइरं ।

दणुइन्द - रुहिर-लित्तो सहइ उइन्दो नह-प्पहावलि-अरुणो ।
संज्झा-वहु-अवऊढो णव-वारिहरो व्व विज्जुला-पडिभिन्नो ॥१॥

युवर्णस्येति किम् ? गूढोअर-तामरसाणुसारिणी ॥ अस्व इति किम् ? पुहवीसो ॥

**[ न युवर्णस्याऽस्वे ]** न प्रथमा सि । इवर्णश्च उवर्णश्च = युवर्णस्तस्य = युवर्णस्य । षष्ठी ङस् । [3]न स्वः = अस्वस्तस्मिन् = अस्वे । सप्तमी ङि ।

**[ न वेरि-वग्गे वि अवयासो ]** न वैरिवर्गेऽपि अवकाशः । न प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **न** ।

अव्ययानि प्रायः संस्कृतसिद्धान्येव प्राकृतेऽपि ज्ञेयानि, अन्यथा अदन्तेषु 'अतः सेर्डोः (३।२) इति डो प्राप्तिः । इदुदन्तेषु 'अक्लीबे सौ' (३।१९) इति दीर्घः प्राप्तिर्भवति ।

वैरिणां वर्गः = वैरिवर्गस्तस्मिन् = वेरिवग्गे । सप्तमी ङि । 'ऐत एत्' (१।१४८) वै० → वे० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ शेषा०' (२।८९) गस्य द्वित्वम् । 'ङे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् **वेरि-वग्गे** । वैरिवर्गेऽपि संस्कृतसिद्धः । 'पदादपेर्वा' (१।४१) अलुक् । 'पो वः' (१।२३१) पि० → **वि०** । अवकाश । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'श-षोः सः' (१।२६०) श० → स० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अवयासो** । अपि अवकाश इत्यत्र अनेन सन्धिर्न भवति ।

---

१. भीअ-परित्ताण-मइं पइण्णमसिणो तुहाहिरूढस्स । मण्णे संका-विहुरे **ण वेरि-वग्गे वि अवसाओ** ॥
[ग० व० - २२०]
भीतपरित्राणमयीं प्रतिज्ञामसेस्तवाधिरूढस्य । मन्ये शङ्काविधुरे न वैरिवर्गेऽप्यवकाशः ॥
२. वंदामि अज्जधम्मं वंदे तत्तो य भद्दगुत्तं च । तत्तो य अज्जवइरं तव-नियमगुणेहिं वयरसमं ॥
वंदामि अज्जरक्खियखमणे रक्खियचरित्तसव्वस्से । रयणकरंडगभूओ अणुओगो रक्खिओ जेहिं ॥
महावीरजैनविद्यालयप्रकाशिते नन्दिसूत्रे पृ० ६ मध्ये ईदृशं टिप्पणं विद्यते - ११. अष्टाविंशतितमगाथानन्तरं शु० प्रतिं विना सर्वास्वपि सूत्रप्रतिषु गाथायुगलमिदमधिकमुपलभ्यते ।
३. D. न स्वम् = अस्वम् ।

**[ वंदामि अज्ज-वइरं ]** 'वदुङ् स्तुत्यभिवादनयोः' (७२१) वद् । 'उदितः स्व०' (४।४।९८) वन्द् । 'ङ-ञ-ण-नो व्यञ्जने' (१।२५) न्० → अनुस्वारः । वर्त्त० ए । 'तृतीयस्य मिः' (३।१४१) ए० → मि० । 'व्यञ्जना०' (४।२३९) अत् । 'मौ वा' (३।१५४) दीर्घः **वंदामि** ।

[1]आर्य-वैर । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'द्य-य्य-र्यां जः' (२।२४) र्यस्य जः । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'वैरादौ वा' (१।१५२) वै० → वइ० । द्वितीया अम् । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **अज्ज-वइरं** ।

**[ दणुईन्द - रुहिर - लित्तो०................ ]**

अस्यार्थः - उपेन्द्रः - कृष्णः शोभते । किंविशिष्टः ? दनुजेन्द्ररुधिरलिप्तः । पुनः किंविशिष्टः ? नखप्रभावलिअरुण इव । उत्प्रेक्ष्यते - सन्ध्या - वधू - अवगूढो नववारिधरः । किंविशिष्टः वारिधरः ? विद्युत्प्रभाप्रतिभिन्न इत्यर्थः ।

**[ दणुइन्द - रुहिर-लित्तो ]** दनुजेन्द्र - रुधिर-लिप्त । 'नो णः' (१।२२८) नु० → णु० । 'क-ग-च-ज०' (१।१७७) ज्लोपः । 'ह्रस्वः संयोगे' (१।८४) ए० → इ० । 'द्रे रो नवा' (२।८०) र्लोपः । अथवा 'लुग् भाजन - दनुज-राजकुले जः सस्वरस्य नवा' (१।२६७) जस्य सस्वरस्य लोपः । शेषं पूर्ववत् । रुधिर । 'ख-घ-थ०' (१।१८७) धि० → हि० । लिप्त । 'क-ग-ट-ड०' (२।७७) प्लोपः । 'अनादौ०' (२।८९) तस्य द्वित्वम् । दनुजेन्द्रस्य रुधिरं = दनुजेन्द्ररुधिरम्, तेन = दनुजेन्द्ररुधिरेण लिप्तः = दनुजेन्द्ररुधिरलिप्तः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० ।

**[ सहइ ]** 'राजृग् दीप्तौ' (८९३) राज् । 'राजेरग्घ-छज्ज-सह-रीर-रेहाः' (४।१००) राज० → सहादेशः । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० → इ० । 'व्यञ्जना०' (४।२३९) अत् ।

**[ उइन्दो ]** उपेन्द्र । 'क-ग-च-ज०' (१।१७७) प्लुक् । 'ह्रस्वः संयोगे' (१।८४) ए० → इ० । 'द्रे रो नवा' (२।८०) र्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० ।

**[ नह-प्पहावलि-अरुणो ]** नख-प्रभावल्यरुणः । 'ख-घ-थ०' (१।१८७) ख-भयोः स्थाने हः । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'समासे वा' (२।९७) द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० ।

**[ संझा-वहु-अवऊढो ]** सन्ध्या-वधू-अवगूढ । साध्वस-ध्य-ह्यां झः (२।२६) ध्या० → झा० । 'ङ-ञ-ण०' (१।२५) न्० → अनुस्वारः । 'ख-घ-थ-ध०' (१।१८७) धू० → हू० । 'दीर्घ-ह्रस्वौ मिथो वृत्तौ' (१।४) ह्रस्वः - हू० → हु० । 'क-ग-च-ज०' (१।१७७) ग्लुक् ।

**[ वारिहरो ]** वारिधर । 'ख-घ-थ-ध०' (१।१८७) ध० → ह० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० ।

**[ विज्जुला-पडिभिन्नो ]** विद्युत्-प्रतिभिन्न । 'द्य-य्य०' (२।२४) द्यु० → जु० । 'अनादौ०' (२।८९) द्वित्वं - जु० → ज्जु० । 'अन्त्यव्य०' (१।११) त्लुक् । 'विद्युत्-पत्र-पीतान्धाल्लः' (२।१७३) ल आगमः । 'आत्' (२।४।१८) आप्प्र०

---

१. D. आर्य-वज्र । आर्यश्चासौ वज्रश्च । 'द्य-य्य-र्यां जः' (२।२४) र्य० → ज० । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'ह्रस्वः संयोगे' (१।८४) ह्रस्वत्वम् । 'र्श-र्ष०' (२।१०५) रपूर्वं इः । 'क-ग-च-ज०' (१।१७७) ज्लुक् ।

२. दणुएन्दरुहिरलग्गे जस्स फुरन्ते णहप्पहाविच्छड्डे । गुप्पन्ती विवलाआ गलिअ व्व थणंसुए महासुरलच्छी ॥

[से० ब० - आश्वासः १।२]

दनुजेन्द्ररुधिरलग्ने यस्य स्फुरति नखप्रभाविच्छर्दे । व्याकुला विपलायिता गलित इव स्तनांशुके महासुरलक्ष्मीः ॥

→ आ । प्रतिभिन्न । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'प्रत्यादौ डः' (१।२०६) ति० → डि० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० ।

**[ गूढोअर[1] - तामरसाणुसारिणी ]** गूढोदर-तामरसानुसारिणीत्यर्थः । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'नो णः' (१।२२८) नु० → णु० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् । अत्र इवर्णोवर्णयोरभावात् सन्धिः ।

**[ पुहवीसो ]** पृथिवी - ईश । पृथिव्या ईशः = पृथिवीशः । 'उदृत्वादौ' (१।१३१) पृ० → पु० । 'पथि-पृथिवी-प्रतिश्रुन्मूषिक-हरिद्रा-बिभीतकेष्वत्' (१।८८) थि० → थ० । 'ख-घ-थ-ध०' (१।१८७) थ० → ह० । 'श-षोः सः' (१।२६०) श० → स० । अत्र 'पदयोः सन्धिर्वा' (१।५) सन्धिः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **पुहवीसो** ॥६॥

## एदोतोः स्वरे ॥ ८।१।७ ॥

एकार-ओकारयोः स्वरे परे सन्धिर्न भवति ॥

वहुआए नहुल्लिहणे आबंधंतीए कंचुअं अंगे ।
मयरद्धय-सर-धोरणि-धारा-छेअ व्व दीसंति ॥१॥

उवमासु अपज्जत्तेह-कलह - दंतावहासमूरु-जुअं ।
तं चेअ मलिअ-बिस-दंड-विरसमालक्खिमो एण्हि ॥२॥

अहो अच्छरिअं ॥

एदोतोरिति किम् ? [2]अत्थालोअण-तरला इयर-कईणं भमंति बुद्धीओ ।
अत्थ [3]च्चेअ निरारंभ[4]मिंति हिअयं कइंदाणं ॥३॥

**[ एदोतोः स्वरे ]** एच्च ओच्च = एदोतौ, तयोः = एदोतोः । षष्ठी ओस् । स्वर सप्तमी ङि ।

**[ वहुआए नहुल्लिहणे........... ]**

अस्यार्थः - मकरध्वजशरधोरणिधाराच्छेदा इव दृश्यन्ते । क्व ? अङ्गे । कस्याः ? वधुकायाः । किंविशिष्टेऽङ्गे ? नखैरुल्लेखनं यस्य अङ्गस्य तत्तस्मिन् । किंकुर्वन्त्या ? कञ्चुकं आबध्नन्त्या इत्यर्थः ।

**[ वहुआए ]** वधुकायाः । ह्रस्वा वधूः । 'ह्रस्वे' (७।३।४६) कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः - हू० → हु० । षष्ठी ङस् । 'टा-ङस्-ङेर०' (३।२९) ङस्० → एत्० ।

**[ नहुल्लिहणे ]** नखोल्लेखने । उत् 'लिखत् अक्षरविन्यासे' (१३३६) लिख् । उल्लिख्यते । अनट्प्र० → अन । नखैरुल्लेखनं यस्य, तस्मिन् । 'स्वराणां स्वराः' (४।२३८) एकारस्य इ० - ले० → लि० । 'ङे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् । अथवा लिख् केचित् कुटादौ पठन्ति, ततश्च 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'कुटादेर्ङिद्वदञ्णित्' (४।३।१७) इति ङित्वान्न गुणः ।

---

१. रक्खतु वो रोमलया माया - महिलत्तणे महुमहस्स । **गूढोअरतामरसाणुसारिणी** भमरमाल व्व ॥
[ग० व० - १८ । गा० र० - ९ विष्णुस्तुतिः]
रक्षतु वो रोमलता मायामहिलात्वे मधुमथनस्य । गूढोदरतामरसानुसारिणी भ्रमरमालेव ॥
[ग० व० - ८६] । २. अर्थालोकनतरलेतरकवीनां भ्राम्यन्ति बुद्धयः । अर्था एव निरारम्भं यन्ति हृदयं कवीन्द्राणाम् ॥
३. K. च्चिअ । ४. L. M. मेंति ।

**[ आबंधंतीए ]** आबध्नन्त्याः । आङ् 'बन्धंश् बन्धने' (१५५२) बन्ध् । आबध्नातीति । शतृप्र० । 'शत्रानशः' (३।१८१) शतृ० → न्त० । 'व्यञ्जना०' (४।२३९) अत् । 'ङ-ञ-ण-नो०' (१।२५) अनुस्वारः । 'अजातेः पुंसः' (३।३२) ङी । 'लुक्' (१।१०) अलुक् । षष्ठी ङस् । 'टा-ङस्-ङेर०' (३।२९) ङस्० → एत्० ।

**[ कंचुअं ]** कञ्चुक । द्वि० अम् । 'अमोऽस्य' (३।५) अलुक् । 'वा स्वरे०' (१।२४) म्० → अनुस्वारः । 'ङ-ञ-ण०' (१।२५) ञ्० → अनुस्वारः । 'क-ग-च-ज०' (१।१७७) क्लुक् ।

**[ अंगे ]** अङ्ग । 'ङ-ञ-ण०' (१।२५) ङ्० → अनुस्वारः । सप्तमी ङि । 'ङे-म्मि ङेः' (३।११) ङि० → ङे० → ए० ।

**[ उवमासु अपज्जत्तेह.......... ]**

अस्यार्थः - ऊरुयुगं उपमासु अपर्याप्तेभकलभदन्तापहासं वर्त्तते इति शेषः । इदानीं तदेव ऊरुयुगं मर्दितबिसदण्डविरसमालक्ष्यामः(क्षयामहे) इत्यर्थः ।

**[ तं चेअ ]** तद् । द्वि० अम् । 'अन्त्यव्य०' (१।११) द्लुक् । 'अमोऽस्य' (३।५) अलुक् । सिद्धापेक्षया तु 'वा स्वरे मश्च' (१।२४) अनुस्वारः । बहुलाधिकाराद् दकारस्यापि । **तं** एव । 'णइ-चेअ-चिअ०' (२।१८४) एव० → चेअ० । प्रथमा सि । 'अव्ययस्य' (३।२१८) सिलुप् **चेअ** ।

**[ मलिअ ]** 'मृदश् खे(क्षो)दे' (१५५०) मृद् । मृद्यते स्म । क्तप्र० → त । 'मृदो मल-मढ०' (४।१२६) मृद० → मल० । 'व्यञ्जना०' (४।२३९) अत् । 'क्ते' (३।१५६) ल० → लि० । 'क-ग-च-ज०' (१।१७७) त्लुक् **मलिअ** ।

**[ विरसमालक्खिमो ]** विरस । द्वि० अम् । 'अमोऽस्य' (३।५) अलुक् । आङ् 'लक्षीण् दर्शना-ऽङ्कनयोः' (१७१९) लक्ष् । 'चुरादि०' (३।४।१७) णिच्प्र० । वर्त्त० मस् । 'तृतीयस्य मो-मु-माः' (३।१४४) मस्० → मो० । 'णेरदेदावावे' (३।१४९) अत् । 'क्षः खः क्वचित्तु०' (२।३) क्षस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । 'इच्च मो-मु-मे वा' (३।१५५) क्ख० → क्खि० **विरसमालक्खिमो** ।

**[ एण्हि ]** इदानीम् । 'एण्हि एत्ताहे इदानीमः' (२।१३४) इदानीम्० → **एण्हि०** ।

**[ अहो ]** अहो । प्रथमा सि । 'अव्ययस्य' (३।२१७) सिलुप् **अहो** ।

**[ अच्छरिअं ]** आश्चर्य । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'ह्रस्वात् थ्य-श्च०' (२।२१) श्च० → छ० । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'अतो रिआ-ऽर-रिज्ज-रीअं' (२।६७) र्य० → रिअ० । स्यादिः । **अच्छरिअं** ।

अत्रैकारौकारयोः स्वरे परे न सन्धिः ।

**[ अत्थालोअण-तरला.......... ]**

अस्यार्थः - इतरकवीनां बुद्धयोऽर्थाऽऽलोकनतरला भ्रमन्ति, कवीन्द्राणां [1]हृदयमर्थे एव निरारम्भं आयातीत्यर्थः ।

**[ कईणं ]** कवि । षष्ठी आम् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः- वि० → वी० । 'क-ग-च-ज०' (१।१७७) व्लुक् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'क्त्वा-स्यादेर्ण-स्वोर्वा' (१।२७) अनुस्वारः **कईणं** ।

**[ अत्थ च्चेअ ]** अर्थ-एव । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्य०' (२।९०) पूर्वथस्य तः । 'णइ-चेअ-चिअ०' (२।१८४) एव० → चेअ० । 'सेवादौ वा' (२।९९) द्वित्वम् । 'ह्रस्वः संयोगे' (१।८४) ह्रस्वः **अत्थ च्चेअ** ।

---

१. K. हृदयमध्ये । O हृदयमर्थाः ।

**[ निरारम्भमिन्ति ]** निर्गत आरम्भो यस्मात्, तम् = **निरारम्भम्** । 'इंण्क् गतौ' (१०७५) इ । वर्त्त० अन्ति । 'बहुष्वाद्यस्य न्ति०' (३।१४२) अन्ति० → न्ति० **इन्ति** ।

**[ हिअयं ]** हृदय । 'इत्कृपादौ' (१।१२८) हृ० → हि० । 'क-ग-च-ज०' (१।१७७) द्लुक् हिअयं ।

**[ कइंदाणं ]** कवि-इन्द्र । कवीनां मध्ये इन्द्र इव । षष्ठी आम् । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'ह्रस्वः संयोगे' (१।८४) ई० → इ० । 'द्रे रो नवा' (२।८०) र्लुक् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः- द० → दा० । 'क्त्वा-स्यादे०' (१।२७) अनुस्वारः कइंदाणं ॥७॥

## स्वरस्योद्वृत्ते ॥ ८।१।८ ॥

व्यञ्जनसंपृक्तः स्वरो व्यञ्जने लुप्ते योऽवशिष्यते स उद्वृत्त इहोच्यते ॥

स्वरस्य उद्वृत्ते स्वरे परे सन्धिर्न भवति ॥

[१]विससिज्जन्त-महा-पसु-दंसण-संभम-परोप्परारूढा ।

गयणे(णि) च्चिअ गन्ध-उडिं कुणन्ति तुह कउल-णारीओ ॥

निसाअ(य)रो निसिअरो । रयणीअरो रयणिअरो । मणुअत्तं ॥

बहुलाधिकारात् क्वचिद्विकल्पः - कुंभया(आ)रो कुंभारो । सुउरिसो सूरिओ ॥

क्वचित् सन्धिरेव - सालाहणो । चक्काओ ॥

अत एव प्रतिषेधात् समासेऽपि स्वरस्य सन्धौ भिन्नपदत्वम् ॥

**[ विससिज्जन्त-महा-पसु.......... ]**

अस्यार्थः - कौलनार्यो गगने एव गन्धपु(कु)टीं कुर्वन्ति । कस्य ? तव । [२]विचित्रचित्रवाची गन्धपु(कु)टी शब्दः । किंविशिष्टाः कौलनार्यः ? विशि(श)स्यमाना-हन्यमाना ये महापशवस्तेषां यद् दर्शनं तस्य यः सम्भ्रमस्तेन परस्परमारूढाः । कुले भवाः = कौला इत्यर्थः ।

**[ गयणे( णि ) च्चिअ ]** गगन । सप्तमी ङि । 'ङे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'णइ-चेअ०' (२।१८४) एव० → चिअ० । 'सेवादौ वा' (२।९९) द्वित्वं - चिअ० → **च्चिअ०** । 'ह्रस्वः संयोगे' (१।८४) ने० → नि० ।

**[ गन्धउडिं ]** गन्ध-पु(कु)टी । द्वितीया अम् । 'क-ग-च-ज-त-द०' (१।१७७) पु(क्)लुक् । 'टो डः' (१।१९५) टी० → डी० । 'ह्रस्वोऽमि' (३।३६) डी० → डि० । 'शेषेऽदन्तवत्' (३।१२४) इति न्यायात् 'अमोऽस्य' (३।५) अलुक् । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **गन्धउडिं** ।

**[ कुणन्ति ]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० अन्ति । 'कृगेः कुणः' (४।६५) कृ० → कुण० । 'बहुष्वाद्यस्य०' (३।१४२) अन्ति० → न्ति० । 'व्यञ्जना०' (४।२३९) अत् **कुणन्ति** ।

**[ निसायरो निसिअरो ]** निशा - कर (२) । निशां करोति = निशाकरः । निशा - चर(२) । निशायां चरति = निशाचरः । 'क-ग-च-ज०' (१।१७७) क-चयोर्लुक् । 'अवर्णो यश्रुतिः । (१।१८०) अस्य यः । 'इः सदादौ वा' (१।७२) इति वा आकारस्य इकारः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निसायरो निसिअरो** ।

---

[ग० व० - ३१९] । १. विशस्यमानमहापशुदर्शनसम्भ्रमपरस्परारूढाः । गगन एव गन्धकुटीं कुर्वन्ति तव कौलनार्यः ॥

२. D. सङ्कीर्णचित्रविशेषवाची । F. चित्रविशेषवाची । C. विचित्रवाची ।

**[ रयणीअरो रयणिअरो ]** रजनी - कर(२) । रजनीं करोति । रजनी-चर(२) । रजन्यां चरति । 'क-ग-च-ज०' (१।१७७) ज-क-चानां लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अस्य यः । 'नो णः' (१।२२८) नी० → णी० । प्रथमा सि। 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **रयणीअरो** । क्वचित् संयोगं विनापि दीर्घस्य ह्रस्वः - **रयणिअरो** ।

**[ मणुअत्तं ]** मनुज । मनुजस्य भावः = मनुजत्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० । 'नो णः' (१।२२८) नु० → णु० । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'अनादौ शेषा०' (२।८९) द्वित्वं - त० → त्त० **मणुअत्तं** ।

**[ कुंभयारो कुंभारो ]** कुम्भकार (२) । 'क-ग-च-ज०' (१।१७७) क्लुक् । बहुलाधिकारात् क्वचिद्वा सन्धिर्न स्यात्। यत्र न सन्धिस्तत्र 'अवर्णो यश्रुतिः' (१।१८०) अस्य यः । अन्यत्र 'समानानां०' (१।२।१) दीर्घः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् । बाहुलकात् मोऽनुस्वारः **कुंभयारो कुंभारो** ।

**[ सुउरिसो सूरिसो ]** सु-पुरुष (२) । 'क-ग-च-ज०' (१।१७७) प्लुक् । 'पुरुषे रोः' (१।१११) रु० → रि० । द्वितीये 'समानानां०' (१।२।१) दीर्घः । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सुउरिसो सूरिसो** ।

**[ सालाहणो ]** सातं - दत्तं वाहनं येन स । अथवा सातनामा सिंहरूपो यक्षः, स वाहनमस्य सः = सातवाहनः । 'अतसी-सातवाहने लः' (१।२११) तस्य लः । 'क-ग-च-ज०' (१।१७७) व्लुक् । क्वचित् सन्धिरेव । 'समानानां०' (१।२।१) दीर्घः । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सालाहणो** ।

**[ चक्काओ ]** चक्र 'वचंक् भाषणे' (१०९६) वच् । चक्रशब्देन उच्यते । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'क्तेऽनिट०' (४।१।१११) च० → क० । 'ञ्णिति' (४।३।५०) उपान्त्यस्वरवृद्धिः । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) व-कयोर्लुक् । 'समानानां०' (१।२।१) दीर्घः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **चक्काओ** ॥८॥

## त्यादेः ॥ ८।१।९ ॥

तिवादीनां स्वरस्य स्वरे परे सन्धिर्न भवति ॥ भवति इह → होइ इह ॥

**[ त्यादेः ]** त्यादि षष्ठी ङस् ।

**[ होइ इह ]** 'भू सत्तायाम्' (१) भू । वर्त्त० तिव् । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० → इ० । इदम् । सप्तमी ङि । 'इदम इमः' (३।७२) इदम्० → इम० । 'ङेर्मेन हः' (३।७५) मकारेण सह ङेर्हः इह । अनेन सन्धिर्न भवति **होइ इह** ॥९॥

## लुक् ॥ ८।१।१० ॥

स्वरस्य स्वरे परे बहुलं लुग् भवति ॥

त्रिदशेशः → तिअसीसो । निःश्वासोच्छ्वासौ → नीसासूसासा ॥

**[ लुक् ]** लुक् प्रथमा सि ।

**[ तिअसीसो ]** त्रिदश-ईश । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'सर्वत्र ल- व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) श० → स० । अनेन अलुक् । 'लोकात्' (१।१।३) तिअसीस । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तिअसीसो** ।

**[ नीसासूसासा ]** निःश्वास-उच्छ्वास । 'निर्दुरोर्वा' (१।१३) इति निषेधविकल्पपक्षे 'अन्त्यव्यञ्जनस्य' (१।११) र्लुक्। 'र्लुकि निरः' (१।९३) दीर्घः - नि० → नी० । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'श-षोः सः' (१।२६०) शा० → सा० । 'अनुत्साहो०' (१।११४) उ० → ऊ० । अनेन अलुक् । 'लोकात्' (१।१।३) नीसासूसास । प्रथमा औ । 'द्विवचनस्य बहुवचनम्' (३।१३०) औ० → जस्० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - स० → सा० **नीसासूसासा** ॥१०॥

## अन्त्यव्यञ्जनस्य ॥ ८।१।११ ॥

शब्दानां यदन्त्यव्यञ्जनं तस्य लुग् भवति ॥ जाव । ताव । जसो । तमो । जम्मो ॥

समासे तु वाक्यविभक्त्यपेक्षायामन्त्यत्वमनन्यत्वं च तेनोभयमपि भवति ॥

सद्भिक्षुः → सभिक्खू । सज्जनः → सज्जणो । एतद्गुणाः → एअगुणा । तद्गुणाः → तग्गुणा ॥

**[ अन्त्यव्यञ्जनस्य ]** अन्त्यव्यञ्जन षष्ठी ङस् ।

**[ जाव ]** यावत् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । अनेन त्लुक् । 'आदेर्यो जः' (१।२४५) या० → जा० **जाव** ।

**[ ताव ]** तावत् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । अनेन त्लुक् **ताव** ।

**[ जसो ]** यशस् । 'आदेर्यो जः' (१।२४५) य० → ज० । 'श-षोः सः' (१।२६०) श० → स० । अनेन स्लुक्। प्रथमा सि । 'स्नमदाम-शिरो-नभः' (१।३२) पुंस्त्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जसो** ।

**[ तमो ]** तमस् । अनेन स्लुक् । प्रथमा सि । 'स्नमदाम०' (१।३२) पुंस्त्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तमो** ।

**[ जम्मो ]** जन्मन् । अनेन न्लुक् । 'न्मो मः' (२।६१) न्मस्य मः । 'अनादौ०' (२।८९) मस्य द्वित्वम् । प्रथमा सि। 'स्नमदाम०' (१।३२) पुंस्त्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जम्मो** ।

**[ सभिक्खू ]** सद्-भिक्षु । संश्चासौ भिक्षुश्च । अत्र अन्यत्वं ज्ञायते, ततोऽनेन द्लुक् । 'क्षः खः क्वचि०' (२।३) क्षस्य खः । 'अनादौ०' (२।८९) द्वित्वं-ख्खु० । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वस्य खस्य क० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - खु० → खू० । 'अन्त्य०' (१।११) स्लुक् **सभिक्खू** ।

**[ सज्जणो ]** सत्-जन । संश्चासौ जनश्च = सज्जनः । अनन्त्यत्वे त्लुक् । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सज्जणो** ।

**[ एअगुणा ]** एतद्-गुण । एतेषां गुणाः = एअगुणा । अन्त्यत्वेऽनेन द्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्०' (३।१२) दीर्घः -ण० → णा० **एअगुणा** ।

**[ तग्गुणा ]** तद्-गुण । ते च ते गुणाश्च = तग्गुणा । 'क-ग-ट-ड०' (२।७७) द्लुक् । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्०' (३।१२) दीर्घः - ण० → णा० । 'अनादौ०' (२।८९) द्वित्वं-गु० → ग्गु० **तग्गुणा** ॥११॥

## न श्रदुदोः ॥ ८।१।१२ ॥

श्रद्-उद् इत्येतयोरन्त्यव्यञ्जनस्य लुग् न भवति ॥ सद्दहिअं ॥ सद्धा । उग्गयं । उन्नयं ॥

**[ न श्रदुदोः ]** न प्रथमा सि । श्रच्च उच्च = श्रदुदौ, तयोः = श्रदुदोः । षष्ठी ओस् ।

**[ सद्दहिअं ]** श्रत्पूर्व० 'डुधांग्क् धारणे च' (११३९) धा । श्रद्धीयते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त। 'श्रदो धो दहः' (४।९) धा० → दह० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) श० → स० । 'व्यञ्जना०' (४।२३९) अत् । 'क्ते' (३।१५६) ह० → हि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे स्वरा०' (३।२५) सि० → म्० । मोऽनु०' (१।२३) अनुस्वारः **सद्दहिअं** ।

**[ सद्धा ]** श्रद्अव्ययपूर्व० 'डुधांग्क् धारणे च' (११३९) धा । श्रद्धानं = श्रद्धा । 'भिदादयः' (५।३।१०८) अङ्प्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् । बाहुलकान्न 'ख-घ-थ०' (१।१८७) ध० → ह० । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अनादौ०' (२।८९) धस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वधस्य दः । 'आत्' (२।४।१८) आप्प्र० → आ । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) श० → स० **सद्धा** ।

**[ उग्गयं ]** उदुपसर्गपूर्वकः अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । उद्गच्छति स्म । गत्यर्थात् 'गत्यर्था-ऽकर्मक०' (५।१।११) कर्त्तरि क्तप्र० → त । 'यमि-रमि-नमि-गमि०' (४।२।५५) म्लुक् । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अनादौ शेषा०' (२।८९) गस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अस्य यः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **उग्गयं** ।

**[ उन्नयं ]** उदुपसर्गपूर्वकः 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वा०' (२।३।९७) नम् । उन्नमति स्म । अकर्मकात् 'गत्यर्था०' (५।१।११) कर्त्तरि क्तप्र० → त । 'यमि-रमि-नमि-गमि०' (४।२।५५) म्लुक् । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अस्य यः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **उन्नयं** ॥१२॥

## निर्दुरोर्वा ॥ ८।१।१३ ॥

निर्-दुर् इत्येतयोरन्त्यव्यञ्जनस्य वा लुग् भवति ॥ निस्सहं नीसहं । दुस्सहो दूसहो । दुक्खिओ दुहिओ ॥

**[ निर्दुरोर्वा ]** निर् च दुर् च = निर्दुरौ, तयोः = निर्दुरोः । षष्ठी ओस् । वा प्रथमा सि ।

**[ निस्सहं नीसहं ]** निर्-सह (२) । [1]निर्गतं सहति । 'अच्' (५।१।४९) अच्प्र० → अ । अनेन वा र्लुक् । 'र्लुकि निरः' (१।९३) नि० → नी० । पक्षे- 'श-ष-से श-ष-सं वा' (१।३।६) र० → स० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **निस्सहं नीसहं** ।

**[ दुस्सहो दूसहो ]** दुर्-सह (२) । [2]दुष्टं सहति । 'अच्' (५।१।४९) अच्प्र० → अ । अनेन वा र्लुक् । 'र्लुकि दुरो वा' (१।११५) दु० → दू० । 'श-ष-से०' (१।३।६) र० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दुस्सहो दूसहो** ।

**[ दुक्खिओ दुहिओ ]** दुःख । दुष्टानि खानि-इन्द्रियाणि सञ्जातानि यस्य सः । 'तदस्य सञ्जातं तारकादिभ्य इतः' (७।१।१३८) इतप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दुःखित इति जाते प्रथमे [3]'श-ष-से श-ष-सं वा' (१।३।६)

१. K. नितरां सहते । २. K. दुष्टं सहते । ३. D. 'सर्वत्र ल०' (२।७९) र्लुक् ।

र० → स० (?)। 'क-ग-ट-ड०' (२।७७) स्लुक् । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वखस्य कः । द्वितीयेऽनेन वा र्लुक् । [1]"ख-घ-थ-ध०' (१।१८७) खस्य हः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः (३।२) सि० → डो० → ओ० **दुक्खिओ दुहिओ** ॥१३॥

## स्वरेऽन्तरश्च ॥ ८।१।१४ ॥

अन्तरो निर्दुरोश्चाऽन्त्यव्यञ्जनस्य स्वरे परे लुग् न भवति ॥

अन्तरप्पा । निरन्तरं । निरवसेसं । दुरुत्तरं । दुरवगाहं ॥ क्वचिद् भवत्यपि - अन्तोवरिं ॥

**[ स्वरेऽन्तरश्च ]** स्वर सप्तमी ङि । अन्तर् षष्ठी ङस् । च प्रथमा सि ।

**[ अन्तरप्पा ]** अन्तर्-आत्मन् । प्रथमा सि । 'भस्मा-ऽऽत्मनोः पो वा' (२।५१) त्मस्य पः । 'अनादौ०' (२।८९) पस्य द्वित्वम् । 'अन्त्य०' (१।११) न्लुक् । 'पुंस्यन आणो राजवच्च' (३।५६) इत्यतिदेशात् 'राज्ञः' (३।४९) आ । 'अन्त्य०' (१।११) स्लुक् । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० **अन्तरप्पा** ।

**[ निरन्तरं ]** निर्-अन्तर् । 'शेषं संस्कृतवत्सिद्धम्' (४।४४८) प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **निरन्तरं** ।

**[ निरवसेसं ]** निर्-अवशेष । 'श-षोः सः' (१।२६०) शस्य-षस्य सः । 'शेषं संस्कृतवत्सिद्धम्' (४।४४८) प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **निरवसेसं** ।

**[ दुरुत्तरं ]** दुर्-उत्तर । प्रथमा सि । 'लोकात्' (१।१।३) दुरुत्तर । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दुरुत्तरं** ।

**[ दुरवगाहं ]** दुर्-अवगाह । प्रथमा सि । 'लोकात्' (१।१।३) दुरवगाह । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दुरवगाहं** ।

**[ अन्तोवरिं अन्तोउवरिं ]** अन्तर् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'रः पदान्ते०' (१।३।५३) रस्य विसर्गः । 'अतो डो विसर्गस्य' (१।३७) विसर्गस्य डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) अन्तो । उपरि । प्रथमा सि । 'पो वः' (१।२३१) पस्य वः । ('क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः ?) ['वक्रादावन्तः' (१।२६) अनुस्वारः उवरिं] । 'अन्ताऽऽदौ वा' (        ) इत्यनेन वा रलोपो भवति । यत्र रलोपस्तत्र **अन्तोवरिं** इति स्यात् । अन्यत्र तु **अन्तोउवरिं** ॥१४॥

## स्त्रियामादविद्युतः ॥ ८।१।१५ ॥

स्त्रियां वर्तमानस्य शब्दस्य अन्त्यव्यञ्जनस्य आत्वं भवति, विद्युच्छब्दं वर्जयित्वा ॥ लुगपवादः ॥

सरित् → सरिआ । प्रतिपद् → पडिवआ । संपद् → संपआ ॥ बहुलाधिकाराद् ईषत्स्पृष्टतर-यश्रुतिरपि ॥ सरिया । पाडिवया । संपया ॥ अविद्युत् इति किम् ? विज्जू ॥

**[ स्त्रियामादविद्युत ]** स्त्री सप्तमी ङि । आत् प्रथमा सि । अविद्युत् षष्ठी ङस् ।

**[ सरिआ ]** सरित् । अनेन त्० → आ० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **सरिआ** ।

**[ पाडिवआ ]** प्रतिपत् । प्रथमा सि । 'प्रत्यादौ डः' (१।२०६) ति० → डि० । 'अतः समृद्ध्यादौ वा' (१।४४) प्र० → प्रा० । 'सर्वत्र०' (२।७९) र्लुक् । 'पो वः' (१।२३१) प० → व० । अनेन त्० → आ० । ' अन्त्यव्य०' (१।११) स्लुक् **पाडिवआ** ।

---

१. F. G. 'दुःख-दक्षिण-तीर्थे वा' (२।७२) ख० → ह० ।

**[ संपआ ]** संपत् । अनेन त्० → आ० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **संपआ** ।

बहुलाधिकाराद् ईषत्स्पृष्टतरे वाक्ये यस्य श्रुतिरपि-

**[ सरिया ]** सरित् । अनेन त्० → आ० । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० **सरिया** ।

**[ पाडिवया ]** प्रतिपत् । अनेन त्० → आ० । 'अवर्णो०' (१।१८०) आ० → या० । शेषं पूर्ववत् । **पाडिवया** ।

**[ संपया ]** संपत् । अनेन त्० → आ० । 'अवर्णो०' (१।१८०) आ० → या० **संपया** ।

**[ विज्जू ]** विद्युत् । 'द्य-य्य-र्यां जः' (२।२४) द्यु० → जु० । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'अन्त्यव्य०' (१।११) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - ज्जु० → ज्जू० । 'अन्त्यव्य०' (१।११) स्लुक् **विज्जू** ॥१५॥

## रो [1]रा ॥ ८।१।१६ ॥

स्त्रियां वर्तमानस्य अन्त्यस्य रेफस्य रा इत्यादेशो भवति ॥ आत्वाऽपवादः (१।१५) ॥ गिरा । धुरा । पुरा ॥

**[ रो रा ]** र् षष्ठी ङस् । रा प्रथमा सि ।

**[ गिरा ]** गिर् । प्रथमा सि । अनेन रस्य रा । 'अन्त्यव्य०' (१।११) स्लुक् **गिरा** ।

**[ धुरा ]** धुर् । प्रथमा सि । अनेन रस्य रा । 'अन्त्यव्य०' (१।११) स्लुक् **धुरा** ।

**[ पुरा ]** पुर् । प्रथमा सि । अनेन रस्य रा । 'अन्त्यव्य०' (१।११) स्लुक् **पुरा** ॥१६॥

## क्षुधो हा ॥ ८।१।१७ ॥

क्षुध्शब्दस्य अन्त्यव्यञ्जनस्य हाऽऽदेशो भवति ॥ छुहा ॥

**[ क्षुधो हा ]** क्षुध् षष्ठी ङस् । हा प्रथमा सि ।

**[ छुहा ]** क्षुध् । अनेन ध० → हा० । प्रथमा सि । छोऽक्ष्यादौ' (२।१७) क्षु० → छु० । खबाधनार्थं छकारः । 'अन्त्यव्य०' (१।११) स्लुक् **छुहा** ॥१७॥

## शरदादेरत् ॥ ८।१।१८ ॥

शरदादेरन्त्यव्यञ्जनस्य अत् भवति ॥ शरद् → सरओ । भिषक् → भिसओ ॥

**[ शरदादेरत् ]** शरदादि षष्ठी ङस् । अत् प्रथमा सि ।

**[ सरओ ]** शरत्(द्) । प्रथमा सि । 'श-षोः सः' (१।२६०) श० → स० । अनेन त०(द०) → अ० । 'प्रावृट्-शरत्तरणयः पुंसि' (१।३१) पुंस्त्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **सरओ** ।

**[ भिसओ ]** भिषक् । प्रथमा सि । 'श-षोः सः' (१।२६०) ष० → स० । अनेन कस्य अ० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **भिसओ** ॥१८॥

## दिक् - प्रावृषोः सः ॥ ८।१।१९ ॥

एतयोरन्त्यव्यञ्जनस्य सो भवति ॥ दिसा । पाउसो ॥

१. C. राः ।

**[ दिक्प्रावृषोः सः ]** दिक्-प्रावृष् षष्ठी ओस् । स प्रथमा सि ।

**[ दिसा ]** [1]दिक् । अनेन क० → स० । 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **दिसा** ।

**[ पाउसो ]** प्रावृष् । 'प्रावृट्-शरत्तरणयः पुंसि' (१।३१) पुंस्त्वम् । अनेन षस्य सः । 'उदृत्वादौ' (१।१३१) वृ० → वु० । 'क-ग-च-ज०' (१।१७७) व्लुक् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पाउसो** ॥१९॥

## आयुरप्सरसोर्वा ॥ ८।१।२० ॥

एतयोरन्त्यव्यञ्जनस्य सो वा भवति ॥ दीहाउसो दीहाऊ । अच्छरसा अच्छरा ॥

**[ आयुरप्सरसोर्वा ]** आयुरप्सरस् षष्ठी ओस् । वा प्रथमा सि ।

**[ दीहाउसो दीहाऊ ]** दीर्घ-आयुस् । दीर्घं आयुरस्य = दीर्घायुः । 'सर्वत्र०' (२।७९) र्लुक् । 'ख-घ-थ-ध०' (१।१८७) घस्य हः । 'क-ग-च-ज०' (१।१७७) य्लुक् । अनेन वा स्० → स्० । प्रथमा सि । 'स्नमदाम०' (१।३२) पुंस्त्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः **दीहाउसो** । पक्षे-दीर्घायुस् । 'सर्वत्र०' (२।७९) र्लुक् । 'ख-घ-थ०' (१।१८७) घस्य हः । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'अन्त्य०' (१।११) स्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - उ० → ऊ० । 'अन्त्य०' (१।११) स्लुक् **दीहाऊ** ।

**[ अच्छरसा अच्छरा ]** अप्सरस् । अनेन वा स्० → स्० । [2]'आत्' (२।४।१८) आप्प्र० → आ । 'ह्रस्वात् थ्य-श्च-त्स-प्सामनिश्चले' (२।२१) प्सस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **अच्छरसा** । पक्षे-अप्सरस् । 'अन्त्यव्य०' (१।११) स्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । शेषं पूर्ववत् **अच्छरा** ॥२०॥

## ककुभो हः ॥ ८।१।२१ ॥

ककुभ्शब्दस्य अन्त्यव्यञ्जनस्य हो भवति ॥ कउहा ॥

**[ ककुभो हः ]** ककुभ् षष्ठी ङस् । ह प्रथमा सि ।

**[ कउहा ]** ककुभ् । 'क-ग-च-ज०' (१।१७७) क्लुक् । अनेन भस्य हः । 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **कउहा** ॥२१॥

## धनुषो वा ॥ ८।१।२२ ॥

धनुःशब्दस्य अन्त्यव्यञ्जनस्य हो वा भवति ॥ धणुहं धणू ॥

**[ धनुषो वा ]** धनुष् षष्ठी ङस् । वा प्रथमा सि ।

**[ धणुहं धणू ]** धनुष् । प्रथमा सि । 'नो णः' (१।२२८) नु० → णु० । अनेन वा षस्य हः । 'स्नमदाम-शिरो०' (१।३२) इति पुंस्त्वप्राप्तौ 'गुणाद्याः क्लीबे वा' (१।३४) इति पुं-नपुंसकता । बाहुलकात् क्लीबत्वे 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **धणुहं** । पक्षे-धनुष् । प्रथमा सि । 'नो णः' (१।२२८) नु०

---

१. G. दिश् । 'ऋत्विज्-दिश्०' (२।१।६९) इत्यादिना दिग् । २. G. पा० पक्षे-स्त्रियामादविद्युतः (१।१५) इति स → आ -ख० ।

→ णु० । 'अन्त्य०' (१।११) षुलुक् । 'अक्लीबे सौ' (३।१९) दीर्घः - णु० → णू० । 'अन्त्य०' (१।११) स्लुक् **धणू** ॥२२॥

### मोऽनुस्वारः ॥ ८।१।२३ ॥

अन्त्यमकारस्य अनुस्वारो भवति ॥ जलं फलं वच्छं गिरिं पेच्छ ॥ क्वचिद् अनन्त्यस्याऽपि - वणम्मि वणंमि ॥

**[ मोऽनुस्वारः ]** म् षष्ठी ङस् । अनुस्वार प्रथमा सि ।

[1]**[ जलमत्थि ]** जल । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । अनेन अनुस्वारः **जलमत्थि** ।

**[ फलमत्थि ]** फल । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । अनेन अनुस्वारः **फलमत्थि** ।

**[ वच्छं पेच्छ ]** वृक्ष । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'क्षः खः क्वचित्तु०' (२।३) क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वछस्य चः । द्वितीया अम् । 'अमोऽस्य' (३।५) अलुक् । अनेन अनुस्वारः **वच्छं** ।

'दृशृं प्रेक्षणे' (४९५) दृश् । पञ्चमी हि । 'दृशो निअच्छ-पेच्छा-ऽवयच्छा०' (४।१८१) दृश्० → पेच्छ० । 'दु-सु-मु विध्यादिष्वेकस्मिंस्त्रयाणाम्' (३।१७३) हि० → सु० । 'अत इज्जस्विज्जहीज्जे-लुको वा' (३।१७५) सुलुक् **पेच्छ** ।

**[ गिरिं पेच्छ ]** गिरि । द्वितीया अम् । 'शेषेऽदन्तवत्' (३।१२४) इत्युक्तत्वात् 'अमोऽस्य' (३।२५) अलुक् । अनेन अनुस्वारः **गिरिं** । **पेच्छ** पूर्ववत् ।

**[ वणम्मि वणंमि ]** वन (२) । सप्तमी ङि । 'ङे-म्मि ङेः' (३।११) ङि० → म्मि० । 'नो णः' (१।२२८) न० → ण० । क्वचिदनन्त्यस्याऽप्यनेन मकारस्य अनुस्वारः **वणम्मि वणंमि** ॥२३॥

### वा स्वरे मश्च ॥ ८।१।२४ ॥

अन्त्यमकारस्य स्वरे परेऽनुस्वारो वा भवति । पक्षे-लुगपवादो मस्य मकारश्च भवति ॥

[2]वंदे उसहं(भं) अजिअं । उसभमजिअं च वंदे । बहुलाधिकारादन्यस्यापि व्यञ्जनस्य मकारः । साक्षात् → सक्खं । यत् → जं । तत् → तं । विष्वक् → वीसुं । पृथक् → पिहं । सम्यक् → सम्मं । इहं । इहयं । आलेट्ठुअं इत्यादि ॥

**[ वा स्वरे मश्च ]** वा प्रथमा सि । स्वर सप्तमी ङि । म् षष्ठी ङस् । च प्रथमा सि ।

**[ वंदे उसहं( भं ) अजिअं, उसभमजिअं च वंदे ]** 'वदुङ् स्तुत्यभिवादनयोः' (७२१) वद् । 'उदितः स्वरा०' (४।४।९८) नोऽन्तः - वन्द् । वर्त्त० ए । 'कर्त्तर्य०' (३।४।७१) शव्प्र० → अ । 'लुगस्या०' (२।१।११४) अलुक् । 'ङ-ञ-ण०' (१।२५) न्० → अनुस्वारः **वंदे** ।

ऋषभ । द्वितीया अम् । 'उदृत्वादौ' (१।१३१) ऋ० → उ० । 'श-षोः सः' (१।२६०) ष० → स० । 'ख-घ-थ०' (१।१८७) भ० → ह० । 'अमोऽस्य' (३।५) अलुक् । अनेन वा अनुस्वारः **उसहं**।

---

१. ढुण्ढिकाकारमते जलं-फलमत्थि । G. जलं-फलं पेच्छ । L. जलमत्थि-पेच्छ । फलं पेच्छ ।

२. **वंदे उसभं अजिअं** संभवमभिणंदणं सुमति सुप्पभ सुपासं । ससि पुप्फदंत सीयल सिज्जंसं वासुपुज्जं च ॥
[नन्दीसूत्रे सुत्तं ३ - तित्थयरावलिआ - गा० १८]

**उसभमजिअं च वंदे** संभवमभिणंदणं च सुमइं च । पउमप्पहं सुपासं जिणं च चंदप्पहं वंदे ॥
[आवश्यकसूत्रे चतुर्विंशतिस्तवे गा० २]

ऋषभमजितं च वन्दे सम्भवमभिनन्दनं च सुमतिं च । पद्मप्रभं सुपार्श्वं जिनं च चन्द्रप्रभं वन्दे ॥

अजित । द्वितीया अम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अमोऽस्य' (३।५) अलुक् । अनेन अनुस्वारः **अजिअं** ।

पक्षे-उसभमजिअं । अत्र अन्त्यव्यञ्जनेति अमो मस्य लुकि प्राप्तेऽनेन मकारो मस्यैव । 'लोकात्' (१।१।३) **उसभमजिअं** ।

**[ सक्खं ]** साक्षात् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'ह्रस्वः संयोगे' (१।८४) सा० → स० । 'क्षः खः क्वचित्तु०' (२।३) क्षस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वखस्य कः । 'वाऽव्ययोत्खातादावदातः' (१।६७) क्खा० → क्ख० । बहुलाधिकारादनेन अन्यस्याऽपि व्यञ्जनस्य मकारः । अत्र त्० → म्० । अनेन अनुस्वारः **सक्खं** ।

**[ जं ]** [1]यत् । 'आदेर्यो जः' (१।२४५) य० → ज० । बहुलाधिकारात् त्० → म्० । अनेन अनुस्वारः **जं** ।

**[ तं ]** [2]तत् । बाहुलकात् त्० → म्० । अनेन अनुस्वारः **तं** ।

**[ वीसुं ]** विष्वक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'ध्वनि-विष्वचोरुः' (१।५२) ष० → षु० । 'श-षोः सः' (१।२६०) षु० → सु० । 'लुप्तय-र-व-श-ष-सां श-ष-सां दीर्घः' (१।४३) वि० → वी० । बाहुलकात् क्० → म्० । अनेन अनुस्वारः **वीसुं** ।

**[ पिहं ]** पृथक् । 'इदुतौ वृष्ट-वृष्टि-पृथक्-मृदङ्ग-नप्तृके' (१।१३७) पृ० → पि० । 'पृथकि धो वा' (१।१८८) इति विकल्पेन थस्य धप्राप्तौ पक्षे 'ख-घ-थ-ध०' (१।१८७) धस्य हः । बाहुलकात् क्० → म्० । अनेन अनुस्वारः **पिहं** ।

**[ सम्मं ]** सम्यक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) मस्य द्वित्वम् । बाहुलकात् क्० → म्० । अनेन अनुस्वारः **सम्मं** ।

**[ इहं ]** इह । सप्तमी ङि । अत्र अव्ययत्वाल्लुकि(पि) प्राप्ते अनेन ङिस्थाने म्० । अनेन अनुस्वारः **इहं** ।

अथवा प्रकारान्तरेण ऋधक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'इत्कृपादौ' (१।१२८) ऋ० → इ० । 'ख-घ-थ-ध-भाम्' (१।१८७) धस्य हः । अनेन क्० → म्० । अनेन अनुस्वारः **इहं** ।

**[ इहयं ]** इहक । सप्तमी ङि । अत्र अव्ययत्वाल्लुकि(पि) प्राप्ते अनेन ङिस्थाने म्० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो०' (१।१८०) अस्य यः । अनेन अनुस्वारः **इहयं** ।

अथवा प्रकारान्तरेण ऋधकद् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'इत्कृपादौ' (१।१२८) ऋ० → इ० । 'ख-घ-थ०' (१।१८७) धस्य हः । अनेन कदो दस्य म्० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो०' (१।१८०) अस्य यः । अनेन अनुस्वारः **इहयं** ।

**[ आलेट्ठुअं ]** आङ्पूर्व० श्लिषंच् आलिङ्गने' (१२१०) श्लिष् । आश्लेषना(णा)य = आश्लेष्टुम् । 'शक-धृष-ज्ञा-रभ-लभ०' (५।४।९०) तुम्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गुणः - श्लि० → श्ले० । 'तवर्गस्य०' (१।३।६०) त० → ट० । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) द्वित्वं प्राप्ते 'न दीर्घानुस्वारात्' (२।९२) इति निषेधे 'तैलादौ' (२।९८) द्वित्वप्राप्तौ 'द्वितीय - तुर्ययो०' (२।९०) ठ० → ट० । 'विंशत्यादेर्लुक्' (१।२८) अनुस्वारस्य लुक् । 'स्वार्थे कश्च वा' (२।१६४) कप्र० । प्रथमा सि । अनेन म्० - अनुस्वारश्च । 'क-ग-ट-ड०' (२।७७) श्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् **आलेट्ठुअं** ॥२४॥

---

१. D. यद् । सि । 'अनतो लुप्' (१।४।५९) सेर्लुप् । अव्यये वा संस्कृतसिद्धे अनेन बाहुलकात् दस्य म्० । 'आदेर्यो जः' (१।२४५) य० → ज० । २. D. तद् । सि । 'अनतो लुप्' (१।४।५९) सेर्लुप् । अव्यये वा संस्कृतसिद्धे अनेन बाहुलकात् दस्य म्० ।

## ङ-ञ-ण-नो व्यञ्जने ॥ ८।१।२५ ॥

ङ-ञ-ण-न इत्येतेषां स्थाने व्यञ्जने परे अनुस्वारो भवति ॥

ङ - पङ्क्तिः → पंती । पराङ्मुखः → परंमुहो । ञ-कञ्चुकः → कंचुओ । लाञ्छनम् → लंछणं । ण - षण्मुखः → छंमुहो । उत्कण्ठा → उक्कंठा । न - सन्ध्या → संझा । विन्ध्यः → विंझो ॥

**[ ङञणनः ]** ङश्च ञश्च णश्च न् च = ङञणन्, तस्य = ङञणनः । षष्ठी ङस् ।

**[ व्यञ्जने ]** व्यञ्जन सप्तमी ङि ।

**[ पंती ]** 'पचुङ् व्यक्तीकरणे' (६५७) पच् । 'उदितः स्वरा०' (४।४।९८) नोऽन्तः - पञ्च् । पञ्चनम् । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'च-जः क-गम्' (२।१।८६) च्० → क्० । 'म्नां धुड्वर्गे०' (१।३।३९) न्० → ङ्० । अनेन ङस्य अनुस्वारः । 'क-ग-ट-ड०' (२।७७) क्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - ति० → ती० । 'अन्त्य०' (१।११) स्लुक् **पंती** ।

**[ परंमुहो ]** पराङ्मुख । 'ह्रस्वः संयोगे' (१।८४) ह्रस्वः - रा० → र० । अनेन ङस्य अनुस्वारः । 'ख-घ-थ०' (१।१८७) खस्य हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **परंमुहो** ।

**[ कंचुओ ]** कञ्चुक । अनेन ञस्य अनुस्वारः । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **कंचुओ** ।

**[ लंछणं ]** लाञ्छन । 'ह्रस्वः संयोगे' (१।८४) ह्रस्वः - ला० → ल० । अनेन ञस्य अनुस्वारः । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **लंछणं** ।

**[ छंमुहो ]** षण्मुख । 'षट्-शमी-शाव-सुधा-सप्त०' (१।२६५) षस्य छः । अनेन णस्य अनुस्वारः । 'ख-घ-थ०' (१।१८७) खस्य हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **छंमुहो** ।

**[ उक्कंठा ]** उत्कण्ठा । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । अनेन णस्य अनुस्वारः **उक्कंठा** ।

**[ संझा ]** सन्ध्या । अनेन नस्य अनुस्वारः । 'साध्वस-ध्य०' (२।२६) ध्या० → झा० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **संझा** ।

**[ विंझो ]** विन्ध्य । प्रथमा सि । अनेन नस्य अनुस्वारः । 'साध्वस-ध्य०' (२।२६) ध्य० → झ० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विंझो** ॥२५॥

## वक्रादावन्तः ॥ ८।१।२६ ॥

वक्रादिषु यथादर्शनं प्रथमादेः स्वरस्य अन्त आगमरूपोऽनुस्वारो भवति ॥

वंकं । तंसं । अंसु । मंसू । पुंछं । गुंछं । मुंढा । पंसू । बुंधं । कंकोडो । कुंपलं । दंसणं । विंछिओ । गिंठी । मंजारो । एष्वाद्यस्य ॥

वयंसो । मणंसी । मणंसिणी । मणंसिला । पडंसुआ । एषु द्वितीयस्य ॥

अवरिं । अणिउँतयं । अइमुंतयं । अनयोस्तृतीयस्य ॥

वक्र । त्र्यस्र । अश्रु । श्मश्रु । पुच्छ । गुच्छ । मूर्धन् । पर्शु । बुध्न । कर्कोट । कुड्मल । दर्शन । वृश्चिक । गृष्टि । मार्जार । वयस्य । मनस्विन् । मनस्विनी ॥ मनःशिला । प्रतिश्रुत् । उपरि । अतिमुक्तक इत्यादि ॥

क्वचिच्छन्दःपूरणेऽपि[1]-देवं-नाग-सुवण्ण ॥

क्वचिन्न भवति - गिट्ठी । मज्जारो । मणसिला । मणासिला ॥

आर्षे - मणोसिला । अइमुत्तयं ॥

**[ वक्रादावन्तः ]** वक्र आदिर्यस्य सः = वक्रादिस्तस्मिन् = वक्रादौ । अन्त प्रथमा सि ।

**[ वंकं ]** वक्र । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन अनुस्वारः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वंकं** ।

**[ तंसं ]** त्र्यस्र । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अधो म-न-याम्' (२।७८) य्लुक् । अनेन अनुस्वारः । प्रथमा सि । 'क्लीबे स्वरा०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तंसं** ।

**[ अंसुं ]** अश्रु । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शु० → सु० । अनेन अनुस्वारः । प्रथमा सि । 'क्लीबे स्वरा०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अंसुं** ।

**[ मंसू ]** श्मश्रु । 'आदेः श्मश्रु-श्मशाने' (२।८६) श्लुक् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शु० → सु० । अनेन अनुस्वारः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - सु० → सू० । 'अन्त्य०' (१।११) स्लुक् **मंसू** ।.

**[ पुंछं ]** पुच्छ । 'क-ग-च०' (१।१७७) च्लुक् । अनेन अनुस्वारः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पुंछं** ।

**[ गुंछं ]** गुच्छ । 'क-ग-च०' (१।१७७) च्लुक् । अनेन अनुस्वारः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **गुंछं** ।

**[ मुंढा ]** मूर्धन् । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) ह्रस्वः - मू० → मु० । 'श्रद्धर्द्धि - मूर्धा-ऽर्धेऽन्ते वा' (२।४१) र्धस्य ढः । 'पुंस्यन आणो०' (३।५६) इत्यतिदेशात् 'राज्ञः' (३।४९) आत्वम् । अनेन अनुस्वारः । 'अन्त्य०' (१।११) स्लुक् **मुंढा** ।

**[ पंसू ]** पर्शु । 'सर्वत्र०' (२।७६) र्लुक् । 'श-षोः सः' (१।२६०) शु० → सु० । अनेन अनुस्वारः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - सु० → सू० । 'अन्त्य०' (१।११) स्लुक् **पंसू** ।

**[ बुंधं ]** बुध्न । 'अधो म-न-याम्' (२।७८) न्लुक् । अनेन अनुस्वारः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **बुंधं** ।

**[ कंकोडो ]** कर्कोट । अनेन अनुस्वारः । 'सर्वत्र०' (२।७९) र्लुक् । 'टो डः' (१।१९५) ट० → ड० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **कंकोडो** ।

---

१. सिद्धे भो ! पयओ णमो जिणमए नंदी सया संजमे । **देवंनागसुवन्न**किन्नरगणस्सब्भूअभावच्चिए ॥
लोगो जत्थ पइट्ठिओ जगमिणं तेलुक्कमच्चासुरं । धम्मो वड्ढउ सासओ विजयओ धम्मुत्तरं वड्ढउ ॥
[आवश्यकसूत्रे पुक्खरवरदीवड्ढे सूत्रे गा० ४]
सिद्धाय भोः ! प्रयतो नमो जिनमताय नन्दिः सदा संयमे । देवनागसुवर्णकिन्नरगणसद्भूतभावाऽर्चिते ॥
लोको यत्र प्रतिष्ठितो जगदिदं त्रैलोक्यमर्त्याऽसुरम् । धर्मो वर्धतां शाश्वतो विजयतो धर्मोत्तरं वर्धताम् ॥

**[ कुंपलं ]** कुड्मल । 'ड्म - क्मोः' (२।५२) ड्मस्य पः । अनेन अनुस्वारः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कुंपलं** ।

**[ दंसणं ]** दर्शन । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) श० → स० । अस्य कार्यम् । 'नो णः' (१।२२८) न० → ण० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दंसणं** ।

**[ विंछिओ ]** वृश्चिक । प्रथमा सि । 'इत्कृपादौ' (१।१२८) वृ० → वि० । 'ह्रस्वात् थ्य-श्च०' (२।२१) श्चस्य छः । अस्य कार्यम् । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विंछिओ** ।

**[ गिंठी ]** गृष्टि । 'इत्कृपादौ' (१।१२८) गृ० → गि० । अनेन अनुस्वारः । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - ठि० → ठी० । 'अन्त्यव्य०' (१।११) स्लुक् **गिंठी** ।

**[ मंजारो ]** मार्जार । 'ह्रस्वः संयोगे' (१।८४) ह्रस्वः - मा० → म० । अनेन अनुस्वारः । 'सर्वत्र०' (२।७९) र्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मंजारो** ।

**[ वयंसो ]** वयस्य । अनेन द्वितीयस्य अनुस्वारः । 'अधो म-न-याम्' (२।७८) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वयंसो** ।

**[ मणंसी ]** मनस्विन् । अनेन द्वितीयस्य अनुस्वारः । 'सर्वत्र०' (२।७९) व्लुक् । प्रथमा सि । 'अन्त्य०' (१।११) न्लुक् । 'अक्लीबे सौ' (३।१९) दीर्घः - सि० → सी० । 'अन्त्य०' (१।११) स्लुक् । 'नो णः' (१।२२८) नं० → णं० **मणंसी** ।

**[ मणंसिणी ]** मनस्विनी । अनेन द्वितीयस्य अनुस्वारः । 'सर्वत्र०' (२।७९) व्लुक् । प्रथमा सि । 'नो णः' (१।२२८) नं० → णं० - नी० → णी० **मणंसिणी** ।

**[ मणंसिला ]** मनस्-शिला । 'अन्त्यव्य०' (१।११) स्लुक् । अनेन द्वितीयस्य अनुस्वारः । 'श-षोः सः' (१।२६०) शि० → सि० । 'नो णः' (१।२२८) नं० → णं० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **मणंसिला** ।

**[ पडंसुआ ]** प्रतिश्रुत् । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'पथि-पृथिवी - प्रतिश्रुन्मूषिक०' (१।८८) ति० → त० । 'प्रत्यादौ डः' (१।२०६) तस्य डः । अनेन द्वितीयस्य अनुस्वारः । 'श-षोः सः' (१।२६०) शु० → सु० । 'स्त्रियामाद०' (१।१५) त्० → आ० । 'अन्त्यव्य०' (१।११) स्लुक् **पडंसुआ** ।

**[ अवरिं ]** उपरि । प्रथमा सि । 'वोपरौ' (१।१०८) उ० → अ० । अनेन तृतीयस्य अनुस्वारः । 'पो वः' (१।२३१) प० → व० । 'अव्ययस्य' (३।२।७) सिलुप् **अवरिं** ।

**[ अणिउँतयं ]** अतिमुक्तक । 'गर्भिता-ऽतिमुक्तके णः' (१।२०८) ति० → णि० । 'यमुना - चामुण्डा - कामुका - ऽतिमुक्तके०' (१।१७८) म्लोपः - अनुनासिकश्च । 'क-ग-ट-ड०' (२।७७) क्लुक् । अनेन तृतीयस्य अनुस्वारः । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो०' (१।१८०) अस्य यः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अणिउँतयं** ।

द्वितीयोऽपि प्रकारो यथा –

**[ अइमुंतयं ]** अतिमुक्तक । 'क-ग-च-ज०' (१।१७७) त-कयोर्लुक् । 'अवर्णो०' (१।१८०) अस्य यः । 'क-ग-ट-ड०' (२।७७) क्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अइमुंतयं** ।

क्वचिच्छन्दःपूरणेऽप्यनुस्वारः –

**[ देवं-नाग-सुवण्ण ]** देव-नाग-सुवर्ण । अनेन अनुस्वारः देवं । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) णस्य द्वित्वम् **देवं-नाग-सुवण्ण** ।

क्वचिदनुस्वारो न भवति –

**[ गिद्धी मज्जारो मणसिला मणासिला मणोसिला ]** अत्र अनुस्वारं मुक्त्वा शेषं पूर्ववत् । 'सो रुः' (२।१।७२) र० । 'क-ग-ट-ड०' (२।७७) श्लुक् । 'लुप्तय-र-व०' (१।४३) दीर्घत्वम् । 'रः पदान्ते०' (१।३।५३) विसर्गः । 'अतो डो विसर्गस्य' (१।३७) विसर्गस्य डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'श-षोः सः' (१।२६०) शि० → सि० । 'नो णः' (१।२२८) न० → ण० ॥२६॥

## क्त्वा-स्यादेर्ण-स्वोर्वा ॥ ८।१।२७ ॥

क्त्वायाः स्यादीनां च यौ ण-सू तयोऽरनुस्वारोऽन्तो वा भवति ॥

क्त्वा - काऊणं काऊण । काउआणं काउआण ॥ स्यादि-वच्छेणं वच्छेण ॥ वच्छेसुं वच्छेसु ॥ ण-स्वोरिति किम् ? करिअ । अग्गिणो ॥

**[ क्त्वास्यादेर्णस्वोर्वा ]** क्त्वा च स्यादिश्च = क्त्वास्यादि, तस्य = क्त्वास्यादेः । षष्ठी ङस् । णश्च सुश्च = णसू, तयोः = णस्वोः । षष्ठी ओस् । वा प्रथमा सि ।

**[ काऊणं काऊण ]** 'डुकृंग् करणे' (८८८) कृ । करणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'क्त्वस्तुमत्तूण-तुआणाः' (२।१४६) क्त्वा० → तूण० । 'आः कृगो भूत०' (४।२१४) कृ० → का० । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन वा णस्य अन्ते अनुस्वारः **काऊणं काऊण** ।

**[ काउआणं काउआण ]** कृ । करणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'क्त्वस्तुमत्तूण-तुआणाः' (२।१४६) क्त्वा० → तुआण० । 'आः कृगो भूत०' (४।२१४) कृ० → का० । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन वा णस्य अन्ते अनुस्वारः **काउआणं काउआण** ।

**[ वच्छेणं वच्छेण ]** वृक्ष (२) । तृतीया टा । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'छोऽक्ष्यादौ' (२।१७) क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वछस्य चः । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्वं-च्छ० → च्छे० । अनेन वा णस्य अन्ते अनुस्वारः **वच्छेणं वच्छेण** ।

**[ वच्छेसुं वच्छेसु ]** वृक्ष (२) । सप्तमी सुप् । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'छोऽक्ष्यादौ' (२।१७) क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय तुर्य०' (२।९०) पूर्वछस्य चः । 'भिस्भ्यस्सुपि' (३।१५) एत्वं - च्छ० → च्छे० । अनेन वा सुबन्ते अनुस्वारः **वच्छेसुं वच्छेसु** ।

ण-स्वोरिति किम् ?

**[ करिअ ]** 'डुकृंग् करणे' (८८८) कृ । करणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'क्त्वस्तुम०' (२।१४६) क्त्वा० → अत्० । 'ऋवर्णस्या०' (४।२३४) कृ० → कर० । 'व्यञ्जनाददन्ते' (४।२३८) अत् । 'एच्च क्त्वा०' (३।१५७) **इत्वं करिअ** ।

**[ अग्गिणो ]** अग्नि । प्रथमा जस् । 'जस्-शसोर्णो वा' (३।२२) जस्० → णो० । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वं **अग्गिणो** ॥२७॥

## विंशत्यादेर्लुक् ॥ ८।१।२८ ॥

विंशत्यादीनामनुस्वारस्य लुग् भवति ॥

विंशतिः → वीसा । त्रिंशत् → तीसा । संस्कृतं → सक्कयं । संस्कारः → सक्कारो इत्यादि ॥

**[ विंशत्यादेर्लुक् ]** विंशतिरादिर्यस्याऽसौ विंशत्यादिः, तस्य = विंशत्यादेः । षष्ठी ङस् । लुक् प्रथमा सि ।

**[ वीसा ]** विंशति । प्रथमा सि । अनेन अनुस्वारलुक् । 'श-षोः सः' (१।२६०) शं० → स० । 'ईर्जिह्वा-सिंह-त्रिंशद्विंशतौ त्या' (१।९२) त्या सह विं० → वी० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अन्त्यव्य०' (१।११) स्लुक् **वीसा** ।

**[ तीसा ]** त्रिंशत् । प्रथमा सि । 'अन्त्यव्य०' (१।११) त्लुक् । अनेन अनुस्वारलुक् । 'सर्वत्र०' (२।७९) र्लुक् । 'ईर्जिह्वा-सिंह-त्रिंश०' (१।९२) ति० → ती० । 'श-षोः सः' (१।२६०) श० → स० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अन्त्य०' (१।११) स्लुक् **तीसा** ।

**[ सक्कयं ]** संस्कृत । प्रथमा सि । अनेन अनुस्वारलुक् । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'ऋतोऽत्' (१।१२६) कृ० → क० । 'अनादौ०' (२।८९) **कस्य द्वित्वम्** । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अस्य यः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सक्कयं** ।

**[ सक्कारो ]** संस्कार । प्रथमा सि । अनेन अनुस्वारलुक् । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सक्कारो** ॥२८॥

## मांसाऽऽदेर्वा ॥ ८।१।२९ ॥

मांसाऽऽदीनामनुस्वारस्य लुग् वा भवति ॥

मासं मंसं । मासलं मंसलं । कासं कंसं । पासू पंसू । कह कहं । एव एवं । नूण नूणं । इआणि इआणिं । दाणि दाणिं । कि करेमि किं करेमि । समुहं संमुहं । केसुअं किंसुअं । सीहो सिंघो ॥

मांस । मांसल । कांस्य । पांसु । कथम् । एवम् । नूनम् । इदानीम् । संमुख । किंशुक । सिंह इत्यादि ॥

**[ मांसाऽऽदेर्वा ]** मांसाऽऽदि षष्ठी ङस् । वा प्रथमा सि ।

**[ मासं मंसं ]** मांस (२) । प्रथमा सि । अनेन वा अनुस्वारलुक् । द्वितीये 'मांसाऽऽदिष्वनुस्वारे' (१।७०) ह्रस्वत्वम्- मां० → मं० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **मासं मंसं** ।

**[ मासलं मंसलं ]** मांसल (२) । प्रथमा सि । अनेन वा अनुस्वारलुक् । द्वितीये 'मांसाऽऽदि०' (१।७०) ह्रस्वत्वम् - मां० → मं० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मासलं मंसलं** ।

**[ कासं कंसं ]** कांस्य (२) । प्रथमा सि । अनेन वा अनुस्वारलुक् । 'अधो म-न-याम्' (२।७८) य्लुक् । 'मांसाऽऽदि०' (१।७०) कां० → कं० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कासं कंसं** ।

**[ पासू पंसू ]** पांशु (२) । प्रथमा सि । अनेन वा अनुस्वारलुक् । 'मांसाऽऽदि०' (१।७०) ह्रस्वत्वम्-पां० → पं० । 'श-षोः सः' (१।२६०) शु० → सु० । 'अक्लीबे सौ' (३।१९) दीर्घः - सु० → सू० । 'अन्त्यव्य०' (१।११) स्लुक् **पासू पंसू** ।

**[ कह कहं ]** कथम् (२) । प्रथमा सि । 'मोऽनु०' (१।२३) अनुस्वारः । अनेन वा अनुस्वारलुक् । 'ख-घ-थ०' (१।१८७) थस्य हः । 'अव्ययस्य' (३।२।७) सिलुप् **कह कहं** ।

**[ एव एवं ]** एवम् (२) । प्रथमा सि । 'मोऽनु०' (१।२३) अनुस्वारः । अनेन वा अनुस्वारलुक् । 'अव्ययस्य' (३।२।७) सिलुप् **एव एवम्** ।

**[ नूण नूणम् ]** नूनम् (२) । प्रथमा सि । 'मोऽनु०' (१।२३) अनुस्वारः । अनेन वा अनुस्वारलुक् । 'नो णः' (१।२२८) न० → ण० । 'अव्ययस्य' (३।२।७) सिलुप् **नूण नूणम्** ।

**[ इआणि इआणिं ]** इदानीम् (२) । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'पानीयादिष्वित्' (१।१०१) नी० → नि० । प्रथमा सि । 'मोऽनु०' (१।२३) अनुस्वारः । अनेन वा अनुस्वारलुक् । 'नो णः' (१।२२८) नि० → णि० । 'अव्ययस्य' (३।२।७) सिलुप् **इआणि इआणिं** ।

**[ दाणि दाणिं ]** इदानीम् (२) । प्रथमा सि । 'इदानीमो दाणिं' (४।२७७) इदानीम्० → दाणिम्० । 'मोऽनु०' (१।२३) अनुस्वारः । अनेन वा अनुस्वारलुक् । 'अव्ययस्य' (३।२।७) सिलुप् **दाणि दाणिं** ।

**[ कि करेमि किं करेमि ]** किम् (२) । द्वितीया अम् । 'किमः किं' (३।८०) किमः अमा सह किमादेशः । 'मोऽनु०' (१।२३) अनुस्वारः । अनेन वा अनुस्वारलुक् । 'डुकृंग् करणे' (८८८) कृ (२) । वर्त्त० मिव् । 'ऋवर्णस्या०' (४।२३४) कृ० → कर० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) कर० । 'वर्तमाना-पञ्चमी०' (३।१५८) र० → रे० । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । **कि करेमि किं करेमि** ।

**[ समुहं संमुहं ]** [1]सन्मुख (२) । 'ङ-ञ-ण-नो०' (१।२५) नस्य अनुस्वारः । अनेन वा अनुस्वारलुक् । 'ख-घ-थ०' (१।१८७) खस्य हः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **समुहं संमुहं**।

**[ केसुअं किंसुअं ]** किंशुक (२) । 'किंशुके वा' (१।८६) वा एत्वम् । अनेन वा अनुस्वारलुक् । 'श-षोः सः' (१।२६०) शु० → सु० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **केसुअं किंसुअं** ।

**[ सीहो सिंघो ]** सिंह (२) । प्रथमा सि । 'हो घोऽनुस्वारात्' (१।२६४) हस्य घः । 'ईर्जिह्वा-सिंह०' (१।९२) सिं० → सीं० । अनेन वा अनुस्वारलुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सीहो सिंघो** ॥२९॥

## वर्गेऽन्त्यो वा ॥ ८।१।३० ॥

अनुस्वारस्य वर्गे परे प्रत्यासत्तेस्तस्यैव वर्गस्य अन्त्यो वा भवति ॥

पङ्को पंको । सङ्खो संखो । अङ्गणं अंगणं । लङ्घणं लंघणं । कञ्चुओ कंचुओ । लञ्छणं लंछणं । अञ्जिअं अंजिअं । सञ्झा संझा । कण्टओ कंटओ । उक्कण्ठा उक्कंठा । कण्डं कंडं । सण्ढो संढो । अन्तरं अंतरं । पन्थो पंथो । चन्दो चंदो । बन्धवो बंधवो । कम्पइ कंपइ । वम्फइ वंफइ । कलम्बो कलंबो । आरम्भो आरंभो ॥

वर्ग इति किम् ? संसओ । संहरइ । नित्यमिच्छन्त्यन्ये ॥

**[ वर्गेऽन्त्यो वा ]** वर्ग सप्तमी ङि । अन्त्य प्रथमा सि । वा प्रथमा सि ।

**[ पङ्को पंको ]** पंक (२) । अनेन वा अनुस्वारस्य ङकारः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पङ्को पंको** ।

**[ सङ्खो संखो ]** शंख (२) । अनेन वा अनुस्वारस्य ङकारः । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सङ्खो संखो** ।

---

१. G. पा० म० - संमुख ।

**[ अङ्गणं अंगणं ]** अंगण (२) । अनेन वा अनुस्वारस्य ङकारः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अङ्गणं अंगणं** ।

**[ लङ्घणं लंघणं ]** लंघन (२) । अनेन वा अनुस्वारस्य ङकारः । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **लङ्घणं लंघणं** ।

**[ कञ्चुओ कंचुओ ]** कंचुक (२) । अनेन वा अनुस्वारस्य ञकारः । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कञ्चुओ कंचुओ** ।

**[ लञ्छणं लंछणं ]** लांछन (२) । अनेन वा अनुस्वारस्य ञकारः । 'ह्रस्वः संयोगे' (१।८४) ह्रस्वः - ला० → ल० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० म्० । 'मोऽनु०' (१।२३) अनुस्वारः **लञ्छणं लंछणं** ।

**[ अञ्जिअं अंजिअं ]** अंजित (२) । अनेन वा अनुस्वारस्य ञकारः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि। 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अञ्जिअं अंजिअं** ।

**[ सञ्झा संझा ]** संध्या (२) । अनेन वा अनुस्वारस्य ञकारः । प्रथमा सि । 'साध्वस-ध्य०' (२।२६) ध्या० → झा० । 'अन्त्य०' (१।११) स्लुक् **सञ्झा संझा** ।

**[ कण्टओ कंटओ ]** कंटक (२) । अनेन वा अनुस्वारस्य णकारः । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि। 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कण्टओ कंटओ** ।

**[ उक्कण्ठा उक्कंठा ]** उत्कंठा (२) । अनेन वा अनुस्वारस्य णकारः । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **उक्कण्ठा उक्कंठा** ।

**[ कण्डं कंडं ]** कांड (२) । अनेन वा अनुस्वारस्य णकारः । 'ह्रस्वः संयोगे' (१।८४) ह्रस्वः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽमु०' (१।२३) अनुस्वारः **कण्डं कंडं** ।

**[ सण्ढो संढो ]** षंढ (२) । अनेन वा अनुस्वारस्य णकारः । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा सि। 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सण्ढो संढो** ।

**[ अन्तरं अंतरं ]** अंतर (२) । अनेन वा अनुस्वारस्य नकारः । प्रथमा सि । 'क्लीबे०' (३।२) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अन्तरं अंतरं** ।

**[ पन्थो पंथो ]** पथिन् । नित्यं पन्थानं चरति-याति । 'नित्यं णः पन्थश्च' (६।४।८९) णप्र० - पन्थ् आदेशश्च । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'ह्रस्वः संयोगे' (१।८४) ह्रस्वः । 'ङ-ञ-ण०' (१।२५) अनुस्वारः । अनेन वा अनुस्वारस्य नकारः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पन्थो पंथो** ।

**[ चन्दो चंदो ]** चंद्र (२) । अनेन वा अनुस्वारस्य नकारः । 'द्रे रो नवा' (२।८०) र्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **चन्दो चंदो** ।

**[ बन्धवो बंधवो ]** बांधव (२) । अनेन वा अनुस्वारस्य नकारः । 'ह्रस्वः संयोगे' (१।८४) बा० → ब० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **बन्धवो बंधवो** ।

**[ कम्पइ कंपइ ]** टुवेपृङ् (७५४) - केपृङ् (७५५) - गेपृङ् (७५६) - कपुङ् चलने' (७५७) कप् । 'उदितः स्वरा०' (४।४।९८) नोऽन्तः - कंप् (२) । वर्त्त० ते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) कंपइ । अनेन वा अनुस्वारस्य मकारः **कम्पइ कंपइ** ।

**[ वम्फइ वंफइ ]** 'काक्षु काङ्क्षायाम्' (५८०) काक्ष् । 'उदितः स्वरा०' (४।४।९८) नोऽन्तः - कांक्ष् (२) । वर्तमाना तिव् । 'व्यञ्जनाद०' (४।२३९) अत् । 'लोकात्' (१।१।३) कांक्षति । 'काङ्क्षेराहा-ऽहिलङ्घा-ऽहिलङ्खु-वच्च-वंफ०' (४।१९२) कांक्ष० → वंफादेशः । 'त्यादीना०' (३।१३९) तिव्० → इ० । अनेन वा अनुस्वारस्य मकारः **वम्फइ वंफइ** ।

**[ कलम्बो कलंबो ]** कदंब (२) । 'कदम्बे वा' (१।२२२) दस्य लः । यदा करंब इति प्रकृतिस्तदा 'हरिद्रादौ लः' (१।२५४) र० → ल० । अनेन वा अनुस्वारस्य मकारः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कलम्बो कलंबो** ।

**[ आरम्भो आरंभो ]** आरंभ (२) । अनेन वा अनुस्वारस्य मकारः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आरम्भो आरंभो** ।

**[ संसओ ]** संशय । प्रथमा सि । 'श-षोः सः' (१।२६०) श० → स० । 'क-ग-च-ज०' (१।१७७) यूलुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **संसओ** ।

**[ संहरइ ]** संपूर्व० 'हृंग् हरणे' (८८५) हृ । वर्त्त० तिव् । 'ऋवर्णस्या०' (४।२३८) हृ० → हर० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) संहरति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **संहरइ** ॥३०॥

## प्रावृट्-शरत्तरणयः पुंसि ॥ ८।१।३१ ॥

प्रावृट्-शरत्-तरणि इत्येते शब्दाः पुंसि-पुल्लिङ्गे प्रयोक्तव्याः ॥

पाउसो । सरओ । एस तरणी ॥ तरणिशब्दस्य पुं-स्त्रीलिङ्गत्वेन नियमार्थमुपादानम् ॥

**[ प्रावृट्शरत्तरणयः ]** प्रावृट् च शरच्च तरणिश्च = प्रावृट्शरत्तरणयः ।

**[ पुंसि ]** पुम्स् । सप्तमी ङि । 'शिड्-हे०' (१।३।४०) पुम्० → पुं० ।

**[ पाउसो ]** प्रावृष् । 'दिक्-प्रावृषोः सः' (१।१९) ष० → स० । 'उदृत्वादौ' (१।१३१) वृ० → वु० । 'क-ग-च-ज०' (१।१७७) व्लुक् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । प्रथमा सि । अनेन पुंस्त्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पाउसो** ।

**[ सरओ ]** शरत्(द्) । 'शरदा०' (७।३।९२) अकारागमः । 'लोकात्' (१।१।३) शरद० । 'श-षोः सः' (१।२६०) श० → स० । 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमा सि । अनेन पुंस्त्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सरओ** ।

**[ एस तरणी ]** एतद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । 'तदश्च तः सोऽक्लीबे' (३।८६) तस्य सः । 'अन्त्यव्य०' (१।११) स्लुक् । अथवा 'वैसेणमिणमो सिना' (३।८५) सिना सह एस आदेशः एस । तरणि । प्रथमा सि । अनेन पुंस्त्वम् । 'अक्लीबे सौ' (३।१९) दीर्घः - णि० → णी० । 'अन्त्यव्य०' (१।११) स्लुक् **तरणी** ॥३१॥

## स्नमदाम-शिरो-नभः ॥ ८।१।३२ ॥

दामन्-शिरस्-नभस्वर्जितं सकारान्तं नकारान्तं च शब्दरूपं पुंसि प्रयोक्तव्यम् ॥

सान्तम् - जसो । पओ । तमो । तेओ । [1]वओ । उरो ॥

नान्तम् - जम्मो । नम्मो । मम्मो ॥

---

१. A. वओ उदाहरणम् ।

अदाम-शिरो-नभ इति किम् ? दामं । सिरं । नहं ॥

यच्च सेयं वयं सुमणं सम्मं चम्ममिति दृश्यते तद् बहुलाधिकारात् ॥

**[ स्नमदामशिरोनभः ]** स् च न् च = स्नम् । दाम च शिरश्च नभश्च = दामशिरोनभः । न दामशिरोनभः = अदामशिरोनभः । प्रथमा सि ।

**[ जसो ]** यशस् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् । 'आदेर्यो जः' (१।२४५) य० → ज० । 'श-षोः सः' (१।२६०) श० → स० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **जसो** ।

**[ पओ ]** पयस् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **पओ** ।

**[ तमो ]** तमस् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **तमो** ।

**[ तेओ ]** तेजस् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **तेओ** ।

**[ वओ ]** वचस् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **वओ** ।

**[ उरो ]** उरस् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **उरो** ।

**[ जम्मो ]** जन्मन् । प्रथमा सि । 'अन्त्य०' (१।११) न्लुक् । 'न्मो मः' (२।६१) न्मस्य मः । 'अनादौ०' (२।८९) मस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **जम्मो** ।

**[ नम्मो ]** नर्मन् । प्रथमा सि । 'अन्त्य०' (१।११) न्लुक् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) मस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **नम्मो** ।

**[ मम्मो ]** मर्मन् । प्रथमा सि । 'अन्त्य०' (१।११) न्लुक् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) मस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **मम्मो** ।

**[ दामं ]** दामन् । प्रथमा सि । 'अन्त्य०' (१।११) न्लुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दामं** ।

**[ सिरं ]** शिरस् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् । 'श-षोः सः' (१।२६०) शि० → सि० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सिरं** ।

**[ नहं ]** नभस् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् । 'ख-घ-थ-ध०' (१।१८७) भस्य हः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **नहं** ।

**[ सेयं ]** श्रेयस् । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शे० → से० । 'अन्त्य०' (१।११) स्लुक् । बहुलाधिकारात् 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सेयं** ।

**[ वयं ]** वयस् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् । बहुलाधिकारात् 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वयं** ।

**[ सुमणं ]** सुमनस् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् । 'नो णः' (१।२२८) न० → ण० । बहुलाधिकारात् 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुमणं** ।

**[ सम्मं ]** शर्मन् । प्रथमा सि । 'अन्त्य०' (१।११) न्लुक् । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) मस्य द्वित्वम् । 'श-षोः सः' (१।२६०) श० → स० । बहुलाधिकारात् 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सम्मं** ।

**[ चम्मं ]** चर्मन् । प्रथमा सि । 'अन्त्य०' (१।११) न्लुक् । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) मस्य द्वित्वम् । बहुलाधिकारात् 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **चम्मं** ॥३२॥

## वाऽक्ष्यर्थ-वचनाद्याः ॥ ८।१।३३ ॥

अक्षिपर्याया वचनादयश्च शब्दाः पुंसि वा प्रयोक्तव्याः ॥

अक्ष्यर्थाः - अज्ज वि सा सवइ ते अच्छी । [1]नच्चावियाइं तेणम्ह अच्छीइं ॥

अञ्जल्यादिपाठादक्षिशब्दः स्त्रीलिङ्गेऽपि-एसा अच्छी । चक्खू चक्खूइं । नयणा नयणाइं । लोअणा लोअणाइं ॥

वचनादि - वयणा वयणाइं । विज्जुणा विज्जूए । कुलो कुलं । छन्दो छन्दं । माहप्पो माहप्पं । दुक्खा दुक्खाइं । भायणा भायणाइं इत्यादि ॥ इति वचनादयः ॥

नेत्ता नेत्ताइं । कमला कमलाइं इत्यादि तु संस्कृतवदेव सिद्धम् ॥

**[ वाऽक्ष्यर्थवचनाद्याः ]** वा प्रथमा सि । [2]अक्षिरर्थो येषां ते = अक्ष्यर्थाः । वचन(नं) आद्यो येषां ते = वचनाद्याः । अक्ष्यर्थाश्च वचनाद्याश्च = अक्ष्यर्थवचनाद्याः । प्रथमा जस् ।

**[ अज्ज वि सा सवइ ते अच्छी ]** अद्याऽपि । 'द्य-य्य-र्यां जः' (२।२४) द्य० → ज० । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'पदादपेर्वा' (१।४१) अलुक् । ' पो वः' (१।२३१) पि० → वि० **अज्ज वि** ।

तद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । 'तदश्च तः' सोऽक्लीबे' (३।८६) तस्य सः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अन्त्य०' (१।११) स्लुक् **सा** ।

'शर्पी आक्रोशे' (९९६) शप् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'त्यादीना०' (३।१३९) तिव्० → इ० । 'लोकात्' (१।१।३) शपइ । 'श-षोः सः' (१।२६०) श० → स० । 'पो वः' (१।२३१) प० → व० **सवइ** ।

तद् । द्वितीया औ । 'द्विवचनस्य बहुवचनम्' (३।१३०) द्वितीया शस् । 'अन्त्य०' (१।११) द्लुक् । 'जस्-शसोर्लुक्' (३।४) शस्लुक् । 'टाण-शस्येत्' (३।१४) एत्वं - त० → ते० **ते** ।

---

१. धावंति तम्मुहं धारिया वि वलियाइ तम्मि वलमाणे । जणसंकुले वि **नच्चावियाइ तेणम्ह नयणाइं** ॥
[व० ल० - नयणवज्जा १०।३००]

धावतस्तन्मुखं धारिते अपि वलिते तस्मिन् वलति । जनसङ्कुलेऽपि नर्तिते तेन मम नयने ॥

२. A. अक्षेरर्थो ।

अक्षि । द्वितीया औ । 'छोऽक्ष्यादौ' (२।१७) क्षस्य छः । 'अनादौ शेषा०' (२।८९) छस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वछस्य चः । 'द्विवचनस्य०' (३।१३०) औ० → शस्० । 'जस्-शसोर्लुक्' (३।४) शस्लुक् । 'लुप्ते शसि' (३।१८) दीर्घः - च्छि० → च्छी० **अच्छी** ।

सा स्त्री अद्याऽपि ते अक्षिणी शपतीत्यर्थः । अत्र अनेन वा अक्षिशब्दस्य पुंस्त्वम् ।

अथ नपुंसकत्वम् —

**[ नच्चाविआइं तेणम्ह अच्छीइं ]** [1]तेन मम अक्षिणी नर्तिते । 'नृतैच् नर्तने' (११५२) नृत् । नृत्यतोऽक्षिणी, ते नृत्यतोऽन्यः प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । गुणः नर् । नृत्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । नर्त इति जाते 'व्रज-नृत-मदां च्चः' (४।२२५) तस्य [2]चः(च्चः) । 'लुगावी क्त-भाव-कर्मसु' (३।१५२) णिग्० → आवि० । प्रथमा औ । 'द्विवचनस्य०' (३।१३०) औ० → जस्० । 'जस्-शस इँ-इं०' (३।२६) जस्० → इं० - पूर्वस्य च दीर्घः - तस्य ता । 'क-ग-च-ज०' (१।१७७) त्लुक् **नच्चाविआइं** ।

तद् । तृतीया टा । 'अन्त्य०' (१।११) द्लुक् । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्वं-त० → ते० तेण । अस्मद् । षष्ठी ङस् । 'मे-मइ-मम-मह-महं-मज्झ-मज्झं-अम्ह-अम्हं ङसा' (३।११३) अस्मदो ङसा सह अम्ह आदेशः । 'त्यदाद्यव्ययात् तत्स्वरस्य लुक्' (१।४०) अलुक् **तेणम्ह** ।

अक्षि । प्रथमा औ । 'द्विवचनस्य०' (३।१३०) औ० → जस्० । 'छोऽक्ष्यादौ' (२।१७) क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वछस्य चः । 'जस्-शस इँ०' (३।२६) जस्० → इं० - पूर्वस्य च दीर्घः - च्छि० → च्छी० **अच्छीइं** ।

**[ एसा अच्छी ]** एतद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । 'तदश्च तः सो०' (३।८६) त० → स० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अन्त्य०' (१।११) स्लुक् **एसा** ।

अक्षि । प्रथमा सि । 'छोऽक्ष्यादौ' (२।१७) क्षस्य छः । 'अनादौ शेषा०' (२।८६) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'अक्लीबे सौ' (३।१९) दीर्घः - च्छि० → च्छी० । 'अन्त्य०' (१।११) स्लुक् **अच्छी** ।

वाक्यर्था:- **[ चक्खू चक्खूइं ]** चक्षुस् (२) । 'अन्त्य०' (१।११) स्लुक् । 'क्षः खः क्वचित्तु०' (२।३) क्षस्य खः । 'अनादौ०' (२।८९) खस्य दित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । प्रथमा जस् । अनेन वा पुंस्त्वम् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - खु० → खू० । 'जस्-शस इँ इं०' (३।२६) जस्० → इं० - पूर्वस्य च दीर्घः **चक्खू चक्खूइं** ।

**[ नयणा नयणाइं ]** नयन (२) । प्रथमा जस् । 'नो णः' (१।२२८) न० → ण० । अनेन वा पुंस्त्वम् । शेषं पूर्ववत् । **नयणा नयणाइं** ।

**[ लोअणा लोअणाइं ]** लोचन (२) । प्रथमा जस् । 'नो णः' (१।२२८) न० → ण० । 'क-ग-च-ज०' (१।१७७) च्लुक् । अनेन वा पुंस्त्वम् । शेषं पूर्ववत् । **लोअणा लोअणाइं** ।

**[ वयणा वयणाइं ]** वचन (२) । प्रथमा जस् । 'नो णः' (१।२२८) न० → ण० । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अस्य यः । अनेन वा पुंस्त्वम् । शेषं पूर्ववत् । **वयणा वयणाइं** ।

---

१. M. नर्तितानि तेन अस्माकं अक्षीणि । २. A. C. D. F. च । 'अनादौ०' (२।८९) च० → च्च० ।

**[ विज्जुणा विज्जूए ]** विद्युत् (२) । 'द्य-य्य-र्यां जः' (२।२४) द्यस्य जः । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'अन्त्य०' (१।११) त्लुक् । तृतीया टा । पुंसि-'टो णा' (३।२४) टा० → णा० । अन्यत्र स्त्रियां - 'टा- ङस्-ङेरदादि०' (३।२९) टा० → ए० -पूर्वस्य च दीर्घः - ज्जु० → ज्जू० **विज्जुणा विज्जूए** ।

**[ कुलो कुलं ]** कुल (२) । प्रथमा सि । अनेन वा पुंस्त्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कुलो कुलं** ।

**[ छन्दो छन्दं ]** छन्दस् (२) । प्रथमा सि । अनेन वा पुंस्त्वम् । 'अन्त्य०' (१।११) स्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **छन्दो छन्दं** ।

**[ माहप्पो माहप्पं ]** माहात्म्य (२) । 'ह्रस्वः संयोगे' (१।८४) हा० → ह० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'भस्मा-ऽऽत्मनोः पो वा' (२।५१) त्मस्य पः । 'अनादौ०' (२।८९) पस्य द्वित्वम् । प्रथमा सि । अनेन वा पुंस्त्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **माहप्पो माहप्पं** ।

**[ दुक्खा दुक्खाइं ]** दुःख (२) । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः । 'जस्-शस इँ-इं०' (३।२६) जस्० → इं० - पूर्वस्य च दीर्घः । 'निर्दुरोर्वा' (१।१३) र्लुक् । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्य०' (२।९०) पूर्वखस्य कः **दुक्खा दुक्खाइं** ।

**[ भायणा भायणाइं ]** भाजन (२) । प्रथमा जस् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अस्य यः । 'नो णः' (१।२२८) न० → ण० । अनेन वा पुंस्त्वम् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस इँ - इं०' (३।२६) जस्० → इं० -पूर्वस्य च दीर्घः - ण० → णा० **भायणा भायणाइं** ।

नेत्र-कमलयोस्तु पुं-नपुंसकत्वं संस्कृतेऽप्यस्ति ॥३३॥

## गुणाद्याः क्लीबे वा ॥ ८।१।३४ ॥

गुणादयः क्लीबे वा प्रयोक्तव्याः ॥

गुणाइं गुणा ॥

[१]एगे लहुअसहावा **गुणेहिँ** लहिउं महंति धणरिद्धिं ।

अन्ने विउलसहावा विहवेहिँ **गुणाइं** मग्गंति ॥१॥

देवाणि देवा । बिन्दूइं बिन्दुणो । खग्गं खग्गो ।

मण्डलग्गं मण्डलग्गो । कररुहं कररुहो । रुक्खाइं रुक्खा इत्यादि ॥ इति गुणादयः ॥

**[ गुणाद्याः क्लीबे वा ]** गुण आद्यो येषां ते = गुणाद्याः । प्रथमा जस् । क्लीब सप्तमी ङि । वा प्रथमा सि ।

**[ गुणाइं गुणा ]** गुण (२) । प्रथमा जस् । अनेन वा क्लीबत्वम् । 'जस्-शसोर्लुक् (३।४) जस्लुक् । 'जस्-शस इँ - इं०' (३।२६) जस्० → इं० -पूर्वस्य च दीर्घः । 'जस्-शस्-ङसि०' (३।१२) दीर्घः **गुणाइं गुणा** ।

**[ एगे लहुअसहावा.......... ]**

---

१. एक्के लहुअ-सहावा **गुणेहिँ** लहिउं महंति धण-रिद्धिं । अण्णे विसुद्ध-चरिआ विहवाहि **गुणे** विमग्गंति ॥

[ग० व० ८६६]

एके लघुकस्वभावा गुणैर्लब्धुमिच्छन्ति धनऋद्धिम् । अन्ये विशुद्धचरिता विभवाद् गुणान् विमृग्यन्ति(न्ते) ॥

अस्यार्थः- एके लघुकस्वभावा गुणान् लब्ध्वा धनऋद्धिं महन्ति-वाञ्छन्ति । अन्ये विपुलस्वभावा विभवैर्गुणान् मागर्यन्तीत्यर्थः ।

**[ विहवेहिं ]** विभव । तृतीया भिस् । 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः । 'भिस्भ्यस्सुपि' (३।१५) एत्वं-व० → वे० । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं० **विहवेहिं** ।

**[ मग्गंति ]** 'मार्गण् अन्वेषणे' (१९५०) मार्ग । वर्त० अन्ति । 'चुरादि०' (३।४।१७) णिच्प्र० । 'बहुष्वाद्यस्य न्ति-न्ते-इरे' (३।१४२) अन्ति० → न्ति० । 'णेरदेदावावे' (३।१४९) णिच्० → अत्० । 'ह्रस्वः संयोगे' (१।८४) मा० → म० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वं **मग्गंति** ।

यदा तु 'मृगणि अन्वेषणे' (१९३०) मृग । 'चुरादि०' (३।४।१७) णिच्प्र० । वर्त० अन्ते । 'अतः' (४।३।८२) अलोपः । 'बहुष्वाद्य०' (३।१४२) न्ति० । 'ऋतोऽत्' (१।१२६) मृ० → म० । 'शकादीनां द्वित्वम्' (४।२३०) गस्य द्वित्वं **मग्गंति** ।

**[ देवाणि देवा ]** देव (२) । प्रथमा जस् । 'जस्-शस इँ - इं०' (३।२६) जस्० → णि० -पूर्वस्य च दीर्घः । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः **देवाणि देवा** ।

**[ बिन्दूइं बिन्दुणो ]** बिन्दु (२) । प्रथमा जस् । 'जस्-शस इँ-इं०' (३।२६) जस्० → इं० - पूर्वस्य च दीर्घः । द्वितीये 'जस्-शसो०' (३।२२) जस्० → णो० **बिन्दूइं बिन्दुणो** ।

**[ खग्गं खग्गो ]** खड्ग (२) । 'क-ग-ट-ड०' (२।७७) ड्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । प्रथमा सि । अनेन वा क्लीबत्वम् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः । द्वितीये 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खग्गं खग्गो** ।

**[ मण्डलग्गं मण्डलग्गो ]** मण्डलाग्र (२) । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) ला० → ल० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः । द्वितीये 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मण्डलग्गं मण्डलग्गो** ।

**[ कररुहं कररुहो ]** कररुह (२) । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः । द्वितीये 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **कररुहं कररुहो** ।

**[ रुक्खाइं रुक्खा ]** वृक्ष (२) । 'वृक्ष-क्षिप्तयो रुक्ख-छूढौ' (२।१२७) वृक्षस्य रुक्ख आदेशः । प्रथमा जस् । अनेन वा क्लीबत्वम् । यत्र क्लीबत्वं तत्र 'जस्-शस इँ-इं०' (३।२६) जस्० → इं -पूर्वस्य च दीर्घः । अन्यत्र पुंसि । जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः **रुक्खाइं रुक्खा** ।

इति गुणादयः समाप्ताः ॥३४॥

## वेमाञ्जल्याद्याः स्त्रियाम् ॥ ८।१।३५ ॥

इमान्ता अञ्जल्यादयश्च शब्दाः स्त्रियां वा प्रयोक्तव्याः ॥

एसा गरिमा एस गरिमा । एसा महिमा एस महिमा । एसा निल्लज्जिमा एस निल्लज्जिमा । एसा धुत्तिमा एस धुत्तिमा ।

अञ्जल्यादि - एसा अञ्जली एस अञ्जली । पिट्ठी पिट्ठं । पृष्ठमित्वे कृते स्त्रियामेवेत्यन्ये । अच्छी अच्छिं । पण्हा पण्हो । चोरिआ चोरिअं ॥

एवं कुच्छी । बली । निही । विही । रस्सी । गण्ठी इत्यञ्जल्यादयः ॥

गड्डा गड्डो इति तु संस्कृतवदेव सिद्धम् । इमेति तन्त्रेण त्वादेशस्य डिमा इत्यस्य पृथ्वादीम्नश्च सङ्ग्रहः । त्वादेशस्य स्त्रीत्वमेवेच्छन्त्येके ॥

**[ वेमाञ्जल्याद्याः स्त्रियाम् ]** वा प्रथमा सि । अञ्जलिराद्यो येषां ते = अञ्जल्याद्याः । इमाश्च अञ्जल्याद्याश्च = इमाञ्जल्याद्याः । प्रथमा जस् । स्त्री सप्तमी ङि ।

**[ एसा गरिमा एस गरिमा ]** एतद् । 'अन्त्य०' (१।११) द्लुक् । 'तदश्च तः सो०' (३।८६) त० → स० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ **एसा** । गुरु । गुरोर्भावः । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । 'प्रिय-स्थिर-स्फिरोरु०' (७।४।३८) गरादेशः । 'स्त्रियामा०' (१।१५) न्० → आ० । अत्र अनेन वा स्त्रीत्वं **गरिमा** । पक्षे-एतद् । प्रथमा सि । 'अन्त्य०' (१।११) द्लुक् । 'तदश्च तः०' (३।८६) त० → स० **एस** । गरिमन् । प्रथमा सि । 'पुंस्यन आणो०' (३।५६) इत्यतिदेशात् 'राज्ञः' (३।४९) आ० । 'अन्त्य०' (१।११) स्लुक् **गरिमा** ।

**[ एसा महिमा एस महिमा ] एसा-एस** पूर्ववत् । महतो भावः = महिमा । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । अनेन वा स्त्रीत्वम् । 'स्त्रियामाद०' (१।१५) न्० → आ० । पक्षे- 'पुंस्यन आणो०' (३।५६) इत्यतिदेशात् 'राज्ञः' (३।४९) आ० **महिमा** ।

**[ एसा निल्लज्जिमा एस निल्लज्जिमा ] एसा-एस** पूर्ववत् । निर्लज्जस्य भावः = निर्लज्जत्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० । 'त्वस्य डिमा-त्तणौ वा' (२।१५४) त्वस्य डिमा० → इमा० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) निर्लज्जिमा । अनेन वा स्त्रीत्वम् । शेषं पूर्ववत् । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) लस्य द्वित्वं **निल्लज्जिमा** । पक्षे- 'पुंस्यन आणो०' (३।५६) इत्यतिदेशात् 'राज्ञः' (३।४९) आ **निल्लज्जिमा** ।

**[ एसा धुत्तिमा एस धुत्तिमा ] एसा-एस** पूर्ववत् । धूर्त्तस्य भावः = धूर्त्तत्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० । 'ह्रस्वः संयोगे' (१।८४) धू० → धु० । 'सर्वत्र०' (२।७९) र्लुक् । 'त्वस्य डिमा०' (२।१५४) त्वस्य डिमा० → इमा० । 'डित्यन्त्य०' (२।१।११४) अलुक् **धुत्तिमा** । पक्षे- 'पृथ्वादेरि०' (७।१।५८) इमन्प्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरलुक् । 'लोकात्' (१।१।३) धुत्तिमन् । 'पुंस्यन आणो०' (३।५६) इत्यतिदेशात् 'राज्ञः' (३।४९) आ० **धुत्तिमा** ।

**[ एसा अञ्जली एस अञ्जली ] एसा-एस** पूर्ववत् । अञ्जलि (२) । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - **अञ्जली** ।

**[ पिट्ठी पिट्ठं ]** पृष्ठ (२) । 'पृष्ठे वाऽनुत्तरपदे' (१।१२९) पृ० → पि० । 'इः स्वप्नादौ' (१।४६) इकारः - ष्ठ० → ष्ठि० । 'ष्टस्या०' (२।३४) ष्टस्य ठः । 'अनादौ शेषा०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्य०' (२।९०) पूर्वठस्य टः । प्रथमा सि । अनेन वा स्त्रीत्वम् । 'अक्लीबे सौ' (३।१९) दीर्घः - ट्ठि० → ट्ठी० । पक्षे - न ईकारः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पिट्ठी पिट्ठं** ।

**[ अच्छी अच्छिं ]** अक्षि (२) । 'छोऽक्ष्यादौ' (२।१७) क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - च्छि० → च्छी० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अच्छी अच्छिं** ।

**[ पण्हा पण्हो ]** प्रश्न (२) । 'सर्वत्र०' (२।७९) र्लुक् । 'सूक्ष्म-श्न-ष्ण-स्न-ह्न-ह्ण-क्ष्णां ण्हः' (२।७५) स्नस्य ण्हः । प्रथमे 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमा सि । द्वितीये 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पण्हा पण्हो** ।

[1] **[ चोरिआ चोरिया चोरिअं चोरियं ]** चौर्य (४) । 'स्याद्-भव्य-चैत्य-चौर्यसमेषु यात्' (२।१०७) यात् पूर्वं इः । 'लोकात्' (१।१।३) चौरिय । 'औत ओत्' (१।१५९) चौ० → चो० । प्रथमे 'आत्' (२।४।१८) आप्प्र० → आ० । द्वितीये प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **चोरिआ चोरिया चोरिअं चोरियं** ।

**[ कुच्छी ]** कुक्षि । प्रथमा सि । 'छोऽक्ष्यादौ' (२।१७) क्षि० → छि० । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वछस्य चः । 'अक्लीबे सौ' (३।१९) दीर्घः - च्छि० → च्छी० **कुच्छी** ।

**[ रस्सी ]** रश्मि । प्रथमा सि । 'अधो म-न-याम्' (२।७८) म्लुक् । 'श-षोः सः' (१।२६०) शि० → सि० । 'अनादौ०' (२।८९) द्वित्वं- सि० → स्सि० । 'अक्लीबे सौ' (३।१९) दीर्घः - स्सि० → स्सी० **रस्सी** ।

**[ गण्ठी ]** ग्रन्थि । [2]"ग्रन्थो गण्ठिः' (४।१२०) गण्ठि आदेशः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - ण्ठि० → ण्ठी० **गण्ठी** ।

**[ गड्डा गड्डो ]** गर्त्ताशब्दस्तु पुं-स्त्रीलिङ्गे उक्तः । गर्त्त -गर्त्ता (२) । 'गर्त्ते डः' (२।३५) र्त्तस्य डः । 'अनादौ०' (२।८९) डस्य द्वित्वम् । अत्र संस्कृते जातिद्वारकं ङी बाधित्वा [3]"अजादेः' (२।४।१६) आप्प्र० → आ । प्राकृते तु 'स्वस्त्रादेर्डा' (३।३५) डा० → आ० **गड्डा गड्डो** ॥३५॥

## बाहोरात् ॥ ८।१।३६ ॥

बाहुशब्दस्य स्त्रियामाकारोऽन्तादेशो भवति ॥

बाहाए जेण धरिओ एक्काए ॥ स्त्रियामित्येव - वामेअरो बाहू ॥

**[ बाहोरात् ]** बाहु षष्ठी ङस् । आत् प्रथमा सि ।

**[ बाहाए जेण धरिओ एक्काए ]** बाहु । तृतीया टा । 'टा-ङस्-ङे०' (३।२९) टा० → ए० । अनेन हु० → हा० **बाहाए** । यद् । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । 'आदेर्यो जः' (१।२४५) य० → ज० । 'अन्त्य०' (१।११) द्लुक् । 'टाण-शस्येत्' (३।१४) ज० → जे० **जेण** । धृ । ध्रियते स्म । क्तप्र० → त । 'ऋवर्णस्या०' (४।२३४) धर० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) धरत । 'क्ते' (३।१५६) र० → रि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **धरिओ** । एका । तृतीया टा । 'टा-ङस्-ङे०' (३।२९) टा० → ए० । 'सेवादौ वा' (२।९९) द्वित्वं-का० → क्का० **एक्काए** ।

**[ वामेअरो बाहू ]** वामेतर । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वामेअरो** । बाहु । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - हु० → हू० **बाहू** ॥३६॥

## अतो डो विसर्गस्य ॥ ८।१।३७ ॥

संस्कृतलक्षणोत्पन्नस्याऽतः परस्य विसर्गस्य स्थाने डो इत्यादेशो भवति ॥

सर्वतः → सव्वओ । पुरतः → पुरओ । अग्रतः → अग्गओ । मार्गतः → मग्गओ । एवं सिद्धावस्थापेक्षया - भवतः → भवओ । भवन्तः → भवन्तो । सन्तः → सन्तो । कुतः → कुदो ॥

**[ अतो डो विसर्गस्य ]** अत् पञ्चमी ङसि । डो प्रथमा सि । विसर्ग षष्ठी ङस् ।

**[ सव्वओ ]** सर्व । सर्वस्मात् । 'किमद्व्यादिसर्वाद्य०' (७।२।८९) तसूप्र० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः । 'सर्वत्र ल-व०' (२।७९) र्लुक् ।

---

१. मु० चोरिआ चोरिअं । २. D. K. ग्रन्थो गण्ठः । I. M. ग्रन्थेर्गण्ठः । ३. G. 'आत्' (२।४।१८) ।

'अनादौ०' (२।८९) वस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) तलुक् । अनेन विसर्गस्य डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **सव्वओ** ।

**[ पुरओ ]** पुरतः । 'क-ग-च-ज०' (१।१७७) तलुक् । अनेन विसर्गस्य डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **पुरओ** ।

**[ अग्गओ ]** अग्रतः । 'सर्वत्र ल०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) तलुक् । अनेन विसर्गस्य डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **अग्गओ** ।

**[ मग्गओ ]** मार्गतः । 'ह्रस्वः संयोगे' (१।८४) मा० → म० । 'सर्वत्र ल०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) तलुक् । अनेन विसर्गस्य डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **मग्गओ** ।

**[ भवओ ]** भवतः - षष्ठ्यन्तरूपसिद्धिः । अनेन विसर्गस्य डो० → ओ० । 'क-ग-च-ज०' (१।१७७) तलुक् । 'डित्यन्त्य०' (२।१।११४) अलुक् **भवओ** ।

**[ भवन्तो ]** भवन्तः - प्रथमा जस् । अनेन विसर्गस्य डो० → ओ० **भवन्तो** ।

**[ सन्तो ]** सन्तः - प्रथमा जस् । अनेन विसर्गस्य डो० → ओ० **सन्तो** ।

**[ कुदो ]** कुतस् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'तो दोऽनादौ शौरसेन्यामयुक्तस्य' (४।२६०) तस्य दः । अनेन विसर्गस्य डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **कुदो** ॥३७॥

## निष्प्रती ओत्परी माल्य-स्थोर्वा ॥ ८।१।३८ ॥

निर्-प्रति इत्येतौ माल्यशब्दे स्थाधातौ च परे यथासंख्यं ओत्-परि इत्येवंरूपौ वा भवतः ॥

अभेदनिर्देशः सर्वादेशार्थः ॥ ओमालं निम्मल्लं । ओमालयं वहइ । परिट्ठा पइट्ठा । परिट्ठिअं पइट्ठिअं ॥

**[ निष्प्रती ओत्परी ]** निश्च प्रतिश्च = निष्प्रती । प्रथमा औ । ओच्च परिश्च = ओत्परी । प्रथमा औ ।

**[ माल्यस्थोर्वा ]** माल्यश्च स्थाश्च = माल्यस्थौ, तयोः = माल्यस्थोः । 'लुगाऽऽतो०' (२।१।१०७) आलुक् । वा प्रथमा सि ।

**[ ओमालं निम्मल्लं ]** निर्-माल्य । निर्गतं माल्यं [1]यस्मात् । प्रथमा सि । 'क्लीबे स्वरा०' (३।२५) सि० → म्० । 'अधो म-न-याम्' (२।७८) य्लुक् । अनेन वा निर्० → ओ० । 'मोऽनु०' (१।२३) अनुस्वारः । पक्षे- 'ह्रस्वः संयोगे' (१।८४) मा० → म० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वम् । 'अधो म०' (२।७८) य्लुक् । 'सेवादौ वा' (२।९९) द्वित्वं **निम्मल्लं** ।

[2]सा प(त)इ सहत्थदिन्नं अज्ज वि उव्वै[3]हइ गंधरहियं पि ।

उव्वसियनयरघरदेवै[4]य इव ओमौ[5]लयं वहइ ॥

---

१. K. येषाम् । २. [व० ल० - ओलुग्गाविया वज्जा - ४३२ । गा० को० - १।३० । गा० स० - २।९४] ३. पाठां० - गा० को० - रे सुहय । व० ल० - ओ सुहय । ४. गा० स० - देवदे व्व० । ५. गा० को० - गा० स० - ओमालिअं ।

सा त्वया स्वहस्तदत्तामद्यापि रे सु[1]भग गन्धरहितामपि । उद्वसितनगरगृहदेवतेवावमालिकां वहति ॥

१. पाठां - व० ल० - अहो सुभग ।

अस्यार्थः - [1]हे सुभग ! त्वया स्वहस्तदत्तं निर्माल्यं सा स्त्री अद्यापि उद्वहति । किंविशिष्टं निर्माल्यम् ? गन्धरहितमपि । उद्वसितनगरगृहदेवतेव इत्यर्थः ।

निर्माल्यमेव = निर्माल्यकम् । 'स्वार्थे कश्च वा' (२।१६४) कप्र० । अन्यत् पूर्ववत् । **ओमालयं** ।

**[ परिट्ठा पइट्ठा ]** प्रति-स्था (२) । 'स्थष्ठा-थक्क०' (४।१६) स्था० → ठा० । 'समासे वा' (२।९७) द्वित्वम् । अनेन वा प्रति० → परि० । पक्षे- 'सर्वत्र ल०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् **परिट्ठा पइट्ठा** ।

**[ परिट्ठिअं पइट्ठिअं ]** परिट्ठा पइट्ठा पूर्ववत् । क्तप्र० → त । 'स्वरादनतो वा' (४।२४०) अत् । 'लुक्' (१।१०) आकारलुक् । 'क्ते' (३।१५६) इ० । यद्वा 'स्वराणां स्वराः' (४।२३८) आ० → इ० । 'क-ग-च-ज०' (१।१७७) त्लुक् **परिट्ठिअं पइट्ठिअं** ॥३८॥

## आदेः ॥ ८।१।३९ ॥

आदेरित्यधिकारः 'क-ग-च-ज०' (१।१७७) इत्यादिसूत्रात् प्रागविशेषे वेदितव्यः ॥

**[ आदेः ]** आदि षष्ठी ङस् ॥३९॥

## त्यदाद्यव्ययात् तत्स्वरस्य लुक् ॥ ८।१।४० ॥

त्यदादेरव्ययाच्च परस्य तयोरेव त्यदाद्यव्यययोरादेः स्वरस्य बहुलं लुग् भवति ॥

अम्हेत्थ अम्हे एत्थ । जइमा जइ इमा । जइहं जइ अहं ॥

**[ त्यदाद्यव्ययात् ]** त्यदादयश्च अव्ययं च = त्यदाद्यव्ययम्, तस्मात् = त्यदाद्यव्ययात् ।

**[ तत्स्वरस्य लुक् ]** [3]तयोः स्वरस्तत्स्वरस्तस्य = तत्स्वरस्य । लुक् प्रथमा सि ।

**[ अम्हेत्थ अम्हे एत्थ ]** अस्मद् (२) । प्रथमा जस् । 'अम्ह-अम्हे-अम्हो-मो-वयं-भे जसा' (३।१०६) अस्मद्० → अम्हे० । एतद् । सप्तमी ङि । 'अन्त्य०' (१।११) द्लुक् । 'ङेः स्सि-म्मि-त्थाः' (३।५९) ङि० → त्थ० । 'त्थे च तस्य लुक्' (३।८३) उभयत्र तलोपः । अनेन वा एकारलुक् **अम्हेत्थ अम्हे एत्थ** । यदि वाऽत्र 'त्रपो हि-ह-त्थाः' (२।१६१) त्र० → त्थ० । 'एच्छय्यादौ' (१।५७) अ० → ए० ।

**[ जइमा जइ इमा ]** यदि (२) । 'आदेर्यो जः' (१।२४५) य० → ज० । 'क-ग-च-ज०' (१।१७७) द्लुक् जइ । इदम् (२) । प्रथमा सि । 'इदम इमः' (३।७२) सिना सह इदम्० → इम० । 'आत्' (२।४।१८) आप्प्र० → आ० । अनेन वा इलुक् **जइमा जइ इमा** ।

**[ जइहं जइ अहं ]** जइ प्राग्वत् । अस्मद् (२) । प्रथमा सि । 'अस्मदो म्मि-अम्मि-अम्हि-हं-अहं-अहयं सिना' (३।१०५) सिना सह अस्मद्० → अहं । अनेन वा अलुक् **जइहं जइ अहं** ॥४०॥

## पदादपेर्वा ॥ ८।१।४१ ॥

पदात् परस्य अपेरव्ययस्य आदेर्लुग्वा भवति ॥

तं पि तमवि । किं पि किमवि । केण वि केणावि । कहं पि कहमवि ॥

**[ पदादपेर्वा ]** पद पञ्चमी ङसि । अपि षष्ठी ङस् । वा प्रथमा सि ।

---

१. B. ओ सुहय ! । K. हे भगवन् ! । २. D. ओमालमेव । ३. D. तस्य स्वरं = तत्स्वरम् ।

**[ तं पि तमवि ]** तद् (२) । प्रथमा सि । 'अन्त्य०' (१।११) द्लुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः । अन्यत्र 'वा स्वरे०' (१।२४) म० । अपि । अनेन वा अलुक् । द्वितीये 'लोकात्' (१।१।३) तमपि। 'पो वः' (१।२३१) पि० → वि० **तं पि तमवि** ।

**[ किं पि किमवि ]** किम् (२) । द्वि० अम् । 'किमः किम्' (३।८०) अमा सह किम्० → किम्० । अन्यत् पूर्ववत्। **किं पि किमवि** ।

**[ केण वि केणावि ]** किम् (२) । तृतीया टा । 'किमः कस्त्र-तसोश्च' (३।७१) किमः स्थाने क० । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) क० → के० । शेषं पूर्ववत् । **केण वि केणावि** ।

**[ कहं पि कहमवि ]** कथम्-अपि (२) । 'ख-घ-थ-ध-भाम्' (१।१८७) थस्य हः । अनेन वा अलुक् । द्वितीये 'पो वः' (१।२३१) पि० → वि० **कहं पि कहमवि** ॥४१॥

## इतेः स्वरात् तश्च द्विः ॥ ८।१।४२ ॥

पदात् परस्य इतेरादेर्लुग् भवति, स्वरात् परश्च तकारो द्विर्भवति ॥

किं ति । जं ति । [१]तं ति । दिट्ठं ति । न जुत्तं ति ॥

स्वरात् - तह त्ति । झ त्ति । पिओ त्ति । पुरिसो त्ति ॥

पदादित्येव - इअ विञ्झ-गुहा-निलयाए ॥

**[ इतेः स्वरात् तश्च द्विः ]** इति षष्ठी ङस् । स्वर पञ्चमी ङसि । त् षष्ठी ङस् । च प्रथमा सि । द्वि प्रथमा सि ।

**[ किं ति ]** किम् । द्वितीया अम् । इति । 'अन्त्यव्यञ्जनस्य' (१।११) म्लुक् । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनुस्वारः' (१।२३) अनुस्वारः । अनेन इलुक् **किं ति** ।

**[ जं ति ]** यद् । द्वितीया अम् । इति । 'अन्त्यव्य०' (१।११) द्लुक् । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनुस्वारः' (१।२३) अनुस्वारः । 'आदेर्यो जः' (१।२४५) य० → ज० । अनेन इलुक् **जं ति** ।

[२]**[ तं ति ]** तद् । द्वितीया अम् । इति । 'अन्त्यव्य०' (१।११) द्लुक् । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनु०' (१।२३) अनुस्वारः । अनेन इलुक् **तं ति** ।

**[ दिट्ठं ति ]** दृष्ट । द्वि० अम् । इति । 'इत्कृपादौ' (१।१२८) दृ० → दि० । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनु०' (१।२३) अनुस्वारः । अनेन इलुक् **दिट्ठं ति** ।

**[ न जुत्तं ति ]** न युक्तं इति । 'आदेर्यो जः' (१।२४५) यु० → जु० । 'क-ग-ट-ड०' (२।७७) इति क्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । अनेन इलुक् **न जुत्तं ति** ।

**[ तह त्ति ]** तथा इति । 'ख-घ-थ०' (१।१८७) थस्य हः । अनेन इलुक्-तस्य द्वित्वं → त्ति० । 'ह्रस्वः संयोगे' (१।८४) हा० → ह० **तह त्ति** ।

**[ झ त्ति ]** झग् इति । अनेन इलुक्-तस्य द्वित्वं → त्ति० । 'अन्त्यव्य०' (१।११) ग्लुक् **झ त्ति** ।

१-२. A. तं ति उदाहरणम् ।

**[ पिओ त्ति ]** प्रिय । प्रथमा सि । इति । 'सर्वत्र ल०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) यूलुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् । अनेन इलुक्-तस्य द्वित्वं → त्ति० **पिओ त्ति** ।

**[ पुरिसो त्ति ]** पुरुष । प्रथमा सि । इति । 'पुरुषे रोः' (१।११) रु० → रि० । 'श-षोः सः' (१।२६०) षस्य सः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् । अनेन इलुक् - तस्य द्वित्वं → त्ति० **पुरिसो त्ति** ।

[1][इअ विज्झ[2]-गुहा-निलयाए तम्मि-दल-सबर-सिट्ठ-मग्गाए ।
पहुणा सपरिअरं भयवईए विहिओ नमोक्कारो[3] ॥१॥]

अस्यार्थः - इति-अमुना प्रकारेण । प्रभुणा-नृपेण । भगवत्या-पार्वत्याः । नमस्कारो विहितः सपरिकरमिति । किंविशिष्टायाः पार्वत्याः ? विन्ध्यगुहैव निलयो गृहं यस्याः सा = विन्ध्यगुहानिलया, तस्याः । क्व ? तस्मिन्-पर्वते । पुनः किंविशिष्टायाः ? दलं- सैन्यं, तस्य ये शबराः - भिल्लास्तैः शिष्टः कथितो मार्गो यस्याः सा इत्यर्थः । इति 'इतौ तो वाक्यादौ' (१।९१) ति० → त० । 'क-ग-च-ज०' (१।१७७) इति तूलुक् **इअ** । विन्ध्यगुफानिलया । षष्ठी ङस् । 'साध्वस-ध्य-ह्यां झः' (२।२६) ध्यस्य झः । 'फो भ-हौ' (१।२३६) फा० → हा० । 'टा-ङस्-ङेरदादि०' (३।२९) ङस्० → ए० **विज्झगुहानिलयाए** ॥४२॥

## लुप्तय-र-व-श-ष-सां श-ष-सां दीर्घः ॥ ८।१।४३ ॥

प्राकृतलक्षणवशाल्लुप्ता याऽऽद्या उपरि अधो वा येषां शकार-षकार-सकाराणां तेषामादेः स्वरस्य दीर्घो भवति ॥

श्यस्य यलोपे-पश्यति → पासइ । कश्यपः → कासवो । आवश्यकं → आवासयं ॥

श्रस्य रलोपे - विश्राम्यति → वीसमइ । विश्रामः → वीसामो । मिश्रम् → मीसं । संस्पर्शः → संफासं ॥

श्वस्य वलोपे-अश्वः → आसो । विश्वसिति → वीससइ । विश्वासः → वीसासो ॥

श्शस्य शलोपे-दुश्शासनः → दूसासणो । मनश्शिला → मणासिला ॥

ष्यस्य यलोपे-शिष्यः → सीसो । पुष्यः → पूसो । मनुष्यः → मणूसो ॥

र्षस्य रलोपे-कर्षकः → कासओ । वर्षः → वासो । वर्षाः → वासा ॥

ष्वस्य वलोपे-विष्वाणः → वीसाणो । विष्वक् → वीसुं ॥

ष्षस्य षलोपे-निष्षिक्तः → नीसित्तो ॥

स्यस्य यलोपे-सस्यम् → सासं । कस्यचित् → कासइ ॥

स्रस्य रलोपे-उस्रः → ऊसो । विस्रम्भः → वीसम्भो ॥

स्वस्य वलोपे-विकस्वरः → [4]विकासरो । [5]निस्वः → नीसो ॥

स्सस्य सलोपे-निस्सहः → नीसहो ॥

---

१. [ग० व० - ३३८] २. पाठां- विंज्झ । ३. णमक्कारो ।
इति विन्ध्यगुहानिलयायाः वस्त्रदलशबरशिष्टमार्गायाः । प्रभुणा सपरिकरं भगवत्यै विहितो नमस्कारः ॥
४. I. वीकासरो । ५. G. K. निःस्वः ।

'न दीर्घानुस्वारात्' (२।९२) इति प्रतिषेधात् सर्वत्र 'अनादौ शेषाऽऽदेशयोर्द्वित्वम्' (२।८९) इति द्वित्वाऽभावः ॥

**[ लुप्तयरवशषसाम् ]** यश्च रश्च वश्च शश्च षश्च स् च = यरवशषसः, लुप्ता यरवशषसो येषां ते = लुप्तयरवशषसः, तेषाम् = लुप्तयरवशषसाम् । षष्ठी आम् ।

**[ शषसां दीर्घः ]** शश्च षश्च स् च = शषसस्तेषाम् = शषसाम् । षष्ठी आम् । दीर्घ प्रथमा सि ।

**[ पासइ ]** पश्यति संस्कृतसिद्धः । 'अधो म-न-याम्' (२।७८) य्लुक् । अनेन दीर्घः- प० → पा० । 'श-षोः सः' (१।२६०) श० → स० । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) ति० → इ० **पासइ** ।

**[ कासवो ]** कश्यप । प्रथमा सि । 'अधो म-न-याम्' (२।७८) य्लुक् । अनेन दीर्घः -क० → का० । 'श-षोः सः' (१।२६०) श० → स० । 'पो वः' (१।२३१) प० → व० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कासवो** ।

**[ आवासयं ]** आवश्यक । 'अधो म-न-याम्' (२।७८) य्लुक् । 'श-षोः सः' (१।२६०) श० → स० । अनेन दीर्घः - व० → वा० । 'क-ग-च-ज०' (१।१७७) इति क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अस्य यः **आवासयं** ।

**[ वीसमइ ]** विश्राम्यति । 'सर्वत्र०' (२।७९) र्लुक् । अनेन दीर्घः -वि० → वी० । 'ह्रस्वः संयोगे' (१।८४) शा० → श० । 'श-षोः सः' (१।२६०) श० → स० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) ति० → इ० **वीसमइ** ।

**[ वीसामो ]** विश्राम । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । अनेन दीर्घः - वि० → वी० । 'श-षोः सः' (१।२६०) शा० → सा० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वीसामो** ।

**[ मीसं ]** मिश्र । 'सर्वत्र०' (२।७९) र्लुक् । अनेन दीर्घः- मि० → मी० । 'श-षोः सः' (१।२६०) श० → स० **मीसं** ।

**[ संफासं ]** संस्पर्श । 'ष्प-स्पयोः फः' (२।५३) स्पस्य फः । 'सर्वत्र०' (२।७६) र्लुक् । 'श-षोः सः' (१।२६०) श० → स० । अनेन दीर्घः - फ० → फा० । प्रथमा सि । 'गुणाद्याः क्लीबे वा' (१।३४) इति क्लीबत्वे 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **संफासं** ।

**[ आसो ]** अश्व । प्रथमा सि । 'सर्वत्र०' (२।७९) व्लुक् । 'श-षोः सः' (१।२६०) श० → स० । अनेन दीर्घः - अ० → आ० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आसो** ।

[१]**[ वीसो ]** विश्व । प्रथमा सि । 'सर्वत्र०' (२।७९) व्लुक् । 'श-षोः सः' (१।२६०) श० → स० । अनेन दीर्घः - वि० → वी० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वीसो** ।

**[ वीससइ ]** विपूर्वः अन(१०८९)-'श्वसक् प्राणने' (१०९०) श्वस् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) विश्वसति । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) तिव्० → इ० । 'सर्वत्र०' (२।७९) व्लुक् । अनेन दीर्घः - वि० → वी० । 'श-षोः सः' (१।२६०) श० → स० **वीससइ** ।

**[ वीसासो ]** विश्वास । प्रथमा सि । 'सर्वत्र०' (२।७९) व्लुक् । अनेन दीर्घः - वि० → वी० । 'श-षोः सः' (१।२६०) शा० → सा० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वीसासो** ।

---

१. A. वीसो उदाहरणम् ।

**[ दूसासणो ]** दुश्शासन । प्रथमा सि । 'क-ग-ट-ड-त-द-प-श-ष-स०' (२।७७) श्लुक् । अनेन दीर्घः - दु० → दू० । 'श-षोः सः' (१।२६०) शा० → सा० । 'नो णः' (१।२२८) न० → ण० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दूसासणो** ।

**[ मणासिला ]** मनश्शिला । प्रथमा सि । 'क-ग-ट-ड-त-द-प-श-ष-स०' (२।७७) श्लुक् । अनेन दीर्घः - न० → ना० । 'श-षोः सः' (१।२६०) शि० → सि० । 'नो णः' (१।२२८) ना० → णा० । 'अन्त्यव्य०' (१।११) स्लुक् **मणासिला** ।

**[ सीसो ]** शिष्य । प्रथमा सि । 'अधो म-न-याम्' (२।७८) य्लोपः । 'श-षोः सः' (१।२६०) शि० → सि० - ष० → स० । अनेन पूर्वस्य दीर्घः - सि० → सी० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सीसो** ।

**[ पूसो ]** पुष्य । प्रथमा सि । 'अधो म-न-याम्' (२।७८) य्लोपः । 'श-षोः सः' (१।२६०) ष० → स० । अनेन पूर्वस्य दीर्घः - पु० → पू० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पूसो** ।

**[ मणूसो ]** मनुष्य । प्रथमा सि । 'अधो म-न-याम्' (२।७८) य्लोपः । 'श-षोः सः' (१।२६०) ष० → स० । अनेन पूर्वस्य दीर्घः - नु० → नू० । 'नो णः' (१।२२८) नू० → णू० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मणूसो** ।

**[ कासओ ]** कर्षक । प्रथमा सि । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) ष० → स० । अनेन पूर्वस्य दीर्घः - क० → का० । 'क-ग-च०' (१।१७७) क्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कासओ** ।

**[ वासो ]** वर्ष । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । पूर्वस्य दीर्घः - व० → वा० । 'श-षोः सः' (१।२६०) ष० → स० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वासो** ।

**[ वासा ]** वर्षा । प्रथमा जस् । 'सर्वत्र०' (२।७९) र्लुक् । पूर्वस्य दीर्घः - व० → वा० । 'श-षोः सः' (१।२६०) षा० → सा० । 'जस्-शसोर्लुक्' (३।४) जस्लोपः **वासा** ।

**[ वीसाणो ]** विष्वाण । प्रथमा सि । 'सर्वत्र०' (२।७९) व्लुक् । अनेन दीर्घः - वि० → वी- । 'श-षोः सः' (१।२६०) षा० → सा० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वीसाणो भोजनम्** ।

**[ वीसुं ]** विष्वक् । प्रथमा सि । 'सर्वत्र०' (२।७९) व्लुक् । अनेन दीर्घः - वि० → वी० । 'श-षोः सः' (१।२६०) ष० → स० । 'ध्वनि-विष्वचोरुः' (१।५२) स० → सु० । बाहुलकादन्यस्याऽपि व्यञ्जनस्य मकारः । 'वा स्वरे मश्च' (१।२४) क्० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः । 'अन्त्यव्य०' (१।११) स्लुक् **वीसुं** ।

[1]**[ नीसित्तो ]** नितरां सिक्तः = निष्षिक्तः । 'क-ग-ट-ड०' (२।७७) इत्यादिना ष-कयोर्लुक् । अनेन दीर्घः - नि० → नी० । 'श-षोः सः' (१।२६०) षि० → सि० । 'अनादौ०' (२।८९) तस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नीसित्तो** ।

**[ सासं ]** सस्य । 'अधो म-न-याम्' (२।७८) यलोपः । अनेन दीर्घः - स० → सा० **सासं** ।

**[ कासइ ]** कस्यचित् । 'अधो म-न-याम्' (२।७८) य्लुक् । अनेन दीर्घः - क० → का० । बाहुलकादादेरपि चकारस्य 'क-ग-च-ज०' (१।१७७) इति लुक् । 'अन्त्य०' (१।११) त्लुक् **कासइ** ।

---

१. G. निस्सित्तो ।

**[ ऊसो ]** उस्र । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । अनेन दीर्घः - उ० → ऊ० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **ऊसो** ।

**[ वीसम्भो ]** विस्रम्भ । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । अनेन दीर्घः - वि० → वी० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वीसम्भो** ।

**[ विकासरो ]** विकस्वर । प्रथमा सि । 'सर्वत्र' (२।७९) व्लुक् । अनेन दीर्घः - क० → का० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विकासरो** ।

**[ नीसो ]** निस्व । प्रथमा सि । 'सर्वत्र०' (२।७९) व्लुक् । अनेन दीर्घः - नि० → नी० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नीसो** ।

**[ नीसहो ]** निस्सह । प्रथमा सि । 'क-ग-ट-ड०' (२।७७) इति स्लुक् । अनेन दीर्घः - नि० → नी० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नीसहो** ॥४३॥

### अतः समृद्ध्यादौ वा ॥ ८।१।४४ ॥

समृद्धि इत्येवमादिषु शब्देषु आदेरकारस्य दीर्घो वा भवति ॥

सामिद्धी समिद्धी । पासिद्धी पसिद्धी । पायडं पयडं । [१]पाडिवया पडिवया । पासुत्तो पसुत्तो । पाडिसिद्धी पडिसिद्धी । सारिच्छो सरिच्छो । माणंसी मणंसी । माणंसिणी मणंसिणी । आहिआई अहिआई । पारोहो परोहो । पावासू पवासू । पाडिप्फद्धी पडिप्फद्धी ॥

समृद्धि । प्रसिद्धि । प्रकट । प्रतिपत् । प्रसुप्त । प्रतिसिद्धि । सदृक्ष । मनस्विन् । मनस्विनी । [२]अभिजाति । प्ररोह । प्रवासिन् । प्रतिस्पर्द्धिन् ॥

आकृतिगणोऽयम्, तेन-अस्पर्शः → आफंसो । परकीयम् → पारकेरं पारक्कं । प्रवचनम् → पावयणं । चतुरन्तम् → चाउरन्तं इत्याद्यपि भवति ॥

**[ अतः समृद्ध्यादौ वा ]** अत् षष्ठी ङस् । [३]समृद्धिरादिर्यस्याऽसौ समृद्ध्यादिस्तस्मिन् = समृद्ध्यादौ । सप्तमी ङि । वा प्रथमा सि ।

**[ सामिद्धी समिद्धी ]** समृद्धि (२) । 'इत्कृपादौ' (१।१२८) मृ० → मि० । अनेन वा दीर्घः - स० → सा० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **सामिद्धी समिद्धी** ।

**[ पासिद्धी पसिद्धी ]** प्रसिद्धि (२) । 'सर्वत्र०' (२।७९) र्लुक् । अनेन वा दीर्घः - प० → पा० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **पासिद्धी पसिद्धी** ।

**[ पायडं पयडं ]** प्रकट (२) । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । अनेन वा दीर्घः - प० → पा० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अस्य यः । 'टो डः' (१।१९५) ट० → ड० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **पायडं पयडं** ।

**[ पाडिवया पडिवया ]** प्रतिपत् (२) । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । अनेन वा दीर्घः - प० → पा० । 'प्रत्यादौ डः' (१।२०६) तस्य डः । 'पो वः' (१।२३१) प० → व० । 'स्त्रियामादविद्युतः' (१।१५) त्० → आ० । 'अवर्णो यश्रुतिः' (१।१८०) अस्य यः । 'अन्त्यव्य०' (१।११) स्लुक् **पाडिवया पडिवया** ।

---

१. सर्वमुद्रितेषु पाडिवआ पडिवआ । २. G. अभियाती । M. अभियाति । ३. B. समृद्धिरादौ ।

**[ पासुत्तो पसुत्तो ]** प्रसुप्त (२) । 'सर्वत्र०' (२।७९) र्लुक् । अनेन वा दीर्घः - प० → पा० । 'क-ग-ट-ड-त-द-प०' (२।७७) प्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पासुत्तो पसुत्तो** ।

**[ पाडिसिद्धी पडिसिद्धी ]** प्रतिसिद्धि (२) । 'सर्वत्र०' (२।७९) र्लुक् । अनेन वा दीर्घः - प० → पा० । 'प्रत्यादौ डः' (१।२०६) तस्य डः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **पाडिसिद्धी पडिसिद्धी** ।

**[ सारिच्छो सरिच्छो ]** सदृक्ष (२) । 'दृशः क्विप्-टक्-सकः' (१।१४२) रि० । अनेन वा दीर्घः - स० → सा० । 'क्षः खः क्वचित्तु०' (२।३) ('छोऽक्ष्यादौ' (२।१७)) क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्य०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सारिच्छो सरिच्छो** ।

**[ माणंसी मणंसी ]** मनस्विन् (२) । अनेन वा दीर्घः - म० → मा० । 'वक्रादावन्तः' (१।२६) अनुस्वारः । 'नो णः' (१।२२८) नं० → णं० । 'अन्त्यव्य०' (१।११) न्लुक् । 'सर्वत्र०' (२।७९) व्लुक् । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **माणंसी मणंसी** ।

**[ माणंसिणी मणंसिणी ]** मनस्विनी (२) । अनेन वा दीर्घः - म० → मा० । 'वक्रादावन्तः' (१।२६) अनुस्वारः । 'नो णः' (१।२२८) नं० → णं० - नी० → णी० । 'सर्वत्र०' (२।७९) व्लुक् । 'अन्त्यव्य०' (१।११) स्लुक् **माणंसिणी मणंसिणी** ।

**[ आहिआई अहिआई ]** अभिजाति (२) । अनेन वा दीर्घः - अ० → आ० । 'ख-घ-थ-ध-भाम्' (१।१८७) भि० → हि० । 'क-ग-च-ज०' (१।१७७) ज-तयोर्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **आहिआई अहिआई** ।

**[ पारोहो परोहो ]** प्ररोह (२) । 'सर्वत्र०' (२।७९) र्लुक् । अनेन वा दीर्घः - प० → पा० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पारोहो परोहो** ।

**[ पावासू पवासू ]** प्रवासिन् (२) । 'सर्वत्र०' (२।७९) र्लुक् । अनेन वा दीर्घः - प० → पा० । 'प्रवासीक्षौ' (१।९५) सि० → सु० । 'अन्त्यव्य०' (१।११) न्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **पावासू पवासू** ।

**[ पाडिप्फद्धी पडिप्फद्धी ]** प्रतिस्पर्द्धिन् (२) । 'सर्वत्र०' (२।७९) र्लुक् । अनेन वा दीर्घः - प० → पा० । 'प्रत्यादौ डः' (१।२०६) तस्य डः । 'ष्प-स्पयोः फः' (२।५३) स्प० → फ० । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्य०' (२।९०) पूर्वफस्य पः । 'सर्वत्र०' (२।७९) र्लुक् । 'अन्त्यव्य०' (१।११) न्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **पाडिप्फद्धी पडिप्फद्धी** ।

**[ आफंसो अफंसो ]** अस्पर्श (२) । प्रथमा सि । अनेन वा दीर्घः - अ० → आ० । 'स्पृशः फास-फंस-फरिस-छिव-छिहा-ऽऽलुङ्ख-ऽऽलिहाः' (४।१८२) स्पृशस्थाने फंस० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आफंसो अफंसो** ।

**[ पारकेरं पारक्कं ]** परस्येदम् । 'पर-जन०' (६।३।३१) कीयप्र० । 'पर-राजभ्यां क्क०' (२।१४८) केर-क्क० । अनेन। प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **पारकेरं पारक्कं** ।

**[ पावयणं पवयणं ]** प्रवचन (२) । 'सर्वत्र०' (२।७९) र्लुक् । अनेन वा दीर्घः - प० → पा० । 'क-ग-च-ज०' (१।१७७) इति च्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अस्य यः । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **पावयणं पवयणं** ।

**[ चाउरन्तं चउरन्तं ]** चतुरन्त (२) । अनेन वा च० → चा० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **चाउरन्तं चउरन्तं** ॥४४॥

## दक्षिणे हे ॥ ८।१।४५ ॥

दक्षिणशब्दे आदेरतो हे परे दीर्घो भवति ॥ दाहिणो ॥ हे इति किम् ? दक्खिणो ॥

**[ दक्षिणे हे ]** दक्षिण सप्तमी ङि । ह सप्तमी ङि ।

**[ दाहिणो ]** दक्षिण । प्रथमा सि । 'दुःख-दक्षिण-तीर्थे वा' (२।७२) वा क्षि० → हि० । अनेन दीर्घः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दाहिणो** ।

**[ दक्खिणो ]** दक्षिण । प्रथमा सि । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्ष० → ख० । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्य०' (२।९०) पूर्वखस्य कः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दक्खिणो** ॥४५॥

## इः स्वप्नादौ ॥ ८।१।४६ ॥

स्वप्न इत्येवमादिषु आदेरस्य इत्वं भवति ॥

सिविणो सिमिणो । आर्षे उकारोऽपि-[१]सुविणो सुमिणो । ईसि । वेडिसो । विलिअं । विअणं । मुइंगो । किविणो । उत्तिमो । मिरिअं । दिण्णं ॥

बहुलाधिकाराण्णत्वाऽभावे न भवति - दत्तं । देवदत्तो ॥

स्वप्न । ईषत् । वेतस । व्यलीक । व्यजन । मृदङ्ग । कृपण । उत्तम । मरिच । दत्त इत्यादि ॥

**[ इः स्वप्नादौ ]** इ प्रथमा सि । स्वप्नादि सप्तमी ङि ।

**[ सिविणो सिमिणो ]** स्वप्न । प्रथमा सि । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) व्लुक् । अनेन अस्य इः - स० → सि० । 'स्वप्ने नात्' (२।१०८) नात् प्रागिकारः । प्रथमे 'पो वः' (१।२३१) पि० → वि० । द्वितीये 'स्वप्न-नीव्योर्वा' (१।२५९) वस्य मः **सिविणो सिमिणो** ।

**[ सुविणो सुमिणो ]** स्वप्न । प्रथमा सि । आर्षत्वादुकारः । शेषं पूर्ववत् । **सुविणो सुमिणो** ।

**[ ईसि ]** ईषत् । 'श-षोः सः' (१।२६०) ष० → स० । 'अन्त्य०' (१।११) त्लुक् । अनेन स० → सि० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **ईसि** ।

**[ वेडिसो ]** वेतस । प्रथमा सि । अनेन त० → ति० । 'इत्वे वेतसे' (१।२०७) ति० → डि० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वेडिसो** ।

**[ विलिअं ]** व्यलीक । प्रथमा सि । 'अधो म-न-याम्' (२।७८) य्लुक् । अनेन व० → वि० । 'पानीयादिष्वित्' (१।१०१) ली० → लि० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **विलिअं** ।

---

१. A. सुविणो उदाहरणम् ।

**[ विअणं ]** व्यजन । प्रथमा सि । 'अधो म-न-याम्' (२।७८) य्लुक् । अनेन व० → वि० । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'नो णः' (१।२२८) न० → ण० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **विअणं** ।

**[ मुइंगो ]** मृदङ्ग । प्रथमा सि । 'इदुतौ वृष्ट-वृष्टि-पृथक्-मृदङ्ग-नप्तृके' (१।१३७) मृ० → मु० । 'क-ग-च-ज०' (१।१७७) इति द्लुक् । अनेन अ० → इ० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मुइंगो** ।

**[ किविणो ]** कृपण । प्रथमा सि । 'इत्कृपादौ' (१।१२८) कृ० → कि० । 'पो वः' (१।२३१) प० → व० । अनेन व० → वि० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **किविणो** ।

**[ उत्तिमो ]** उत्तम । अनेन त्त० → त्ति० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **उत्तिमो** ।

**[ मिरिअं ]** मरिच । प्रथमा सि । अनेन म० → मि० । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **मिरिअं** ।

**[ दिण्णं ]** दत्त । प्रथमा सि । अनेन इत्वं- द० → दि० । 'पञ्चाशत्-पञ्चदश-दत्ते' (२।४३) त्तस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **दिण्णं** ।

**[ दत्तं, देवदत्तो ]** बहुलाधिकाराद् यत्र णो न भवति तत्र इकारोऽपि न भवति । **दत्तं देवदत्तो** इत्यादि ॥४६॥

## पक्वा-ऽङ्गार-ललाटे वा ॥ ८।१।४७ ॥

एष्वादेरत इत्वं वा भवति ॥ पिक्कं पक्कं । इंगालो अंगारो । णिडालं णडालं ॥

**[ पक्वाऽङ्गारललाटे वा ]** पक्वश्च अङ्गारश्च ललाटं च = पक्वाऽङ्गारललाटम्, तस्मिन् = पक्वाऽङ्गारललाटे । सप्तमी ङि । वा प्रथमा सि ।

**[ पिक्कं पक्कं ]** पक्व (२) । प्रथमा सि । अनेन वा इत्वम् । 'सर्वत्र०' (२।७९) व्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः (१।२३) अनुस्वारः **पिक्कं पक्कं** ।

**[ इंगालो अंगारो ]** अंगार (२) । प्रथमा सि । अनेन वा इकारः - अं० → इं० । 'हरिद्रादौ लः' (१।२५४) रस्य लः । द्वितीये बाहुलकान्न लत्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **इंगालो अंगारो** ।

**[ णिडालं णडालं ]** ललाट (२) । प्रथमा सि । 'ललाटे च' (१।२५७) आदेर्लस्य णः । अनेन वा इकारः - ण० → णि० । 'टो डः' (१।१९५) टस्य डः । 'ललाटे ल-डोः (२।१२३) ल-डयोर्व्यत्ययः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **णिडालं णडालं** ॥४७॥

## मध्यम-कतमे द्वितीयस्य ॥ ८।१।४८ ॥

मध्यमशब्दे कतमशब्दे च द्वितीयस्याऽत इत्वं भवति ॥ मज्झिमो । कइमो ॥

**[ मध्यमकतमे ]** मध्यमश्च कतमश्च = मध्यमकतमम्, तस्मिन् = मध्यमकतमे । सप्तमी ङि ।

**[ द्वितीयस्य ]** द्वितीय षष्ठी ङस् ।

**[ मज्झिमो ]** मध्यम । प्रथमा सि । 'साध्वस-ध्य-ह्यां झः' (२।२६) ध्यस्य झः । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय-तुर्ययोरुपरि पूर्वः' (२।९०) पूर्वझस्य जः । अनेन अस्य इः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **मज्झिमो** ।

**[ कइमो ]** कतम । प्रथमा सि । 'क-ग-च-ज-त-द-प-य-वां प्रायो लुक्' (१।१७७) त्लुक् । अनेन अस्य इः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कइमो** ॥४८॥

## सप्तपर्णे वा ॥ ८।१।४९ ॥

सप्तपर्णे द्वितीयस्याऽत इत्वं [१]भवति वा ॥ छत्तिवण्णो छत्तवण्णो ॥

**[ सप्तपर्णे वा ]** सप्तपर्ण सप्तमी ङि । वा प्रथमा सि ।

**[ छत्तिवण्णो छत्तवण्णो ]** सप्तपर्ण (२) । 'षट्-शमी-शाव-सुधा-सप्तपर्णेष्वादेश्छः' (१।२६५) सस्य छः । 'क-ग-ट-ड-त-द-प०' (२।७७) प्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । अनेन वा त्त० → त्ति० । 'पो वः' (१।२३१) प० → व० । 'सर्वत्र ल०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) णस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **छत्तिवण्णो छत्तवण्णो** ॥४९॥

## मयट्यइर्वा ॥ ८।१।५० ॥

मयट्प्रत्यये आदेरतः स्थाने अइ इत्यादेशो [२]भवति वा ॥ विषमयः → विसमइओ[३] विसमओ ॥

**[ मयट्यइर्वा ]** मयट् सप्तमी ङि । अइ प्रथमा सि । वा प्रथमा सि ।

**[ विसमइओ विसमओ ]** विष । विषं प्रकृतमत्र । 'प्रकृते मयट्' (७।३।१) मयट्प्र० → मय- विषमय (२) । 'श-षोः सः' (१।२६०) ष० → स० । अनेन वा मस्य मध्ये योऽकारस्तस्य अइ इत्यादेशः । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **विसमइओ विसमओ** ॥५०॥

## ईर्हरे वा ॥ ८।१।५१ ॥

हरशब्दे आदेरत ईर्वा भवति ॥ हीरो हरो ॥

**[ ईर्हरे वा ]** ई प्रथमा सि । हर सप्तमी ङि । वा प्रथमा सि ।

**[ हीरो हरो ]** हर (२) । अनेन वा हस्य ही० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् **हीरो हरो** ॥५१॥

## ध्वनि-विष्वचोरुः ॥ ८।१।५२ ॥

अनयोरादेरस्य उत्वं भवति ॥

झुणी । वीसुं ॥ कथं सुणओ ? । शुनक इति प्रकृत्यन्तरस्य । श्वन्शब्दस्य तु **सा साणो** इति प्रयोगौ भवतः ॥

**[ ध्वनिविष्वचोरुः ]** ध्वनिश्च विष्वक् च = ध्वनिविष्वचौ, तयोः = ध्वनिविष्वचोः । षष्ठी ओस् । उ प्रथमा सि ।

**[ झुणी ]** ध्वनि । प्रथमा सि । 'त्व-थ्व-द्व-ध्वां च-छ-ज-झाः क्वचित्' (२।१५) ध्वस्य झः । अनेन झस्य झुः । 'नो णः' (१।२२८) नि० → णि० । 'अक्लीबे सौ' (३।१९) दीर्घः णि० → णी० । 'अन्त्यव्य०' (१।११) स्लुक् **झुणी** ।

---

१. H. L. M. वा भवति । २. L. वा भवति ।

३. **विसमइओ** च्चिअ काण वि काण वि वोलेइ अभिअणिम्माओ । काण वि विसामिअमओ काण वि अविसामओ कालो ॥
[ध्व० लो० तृतीयोद्योतः]

विषमय इव केषामपि केषामपि प्रयात्यमृतनिर्माणः । केषामपि विषामृतमयः केषामप्यविषामृतः कालः ॥

**[ वीसुं ]** विष्वक् । 'सर्वत्र०' (२।७९) व्लुक् । 'लुप्तय-र-व-श-ष-सां श-ष-सां दीर्घः' (१।८३) वि० → वी० । 'श-षोः सः' (१।२६०) ष० → स० । बहुलाधिकारात् 'वा स्वरे मश्च' (१।२४) इत्यनेन अन्यस्यापि व्यञ्जनस्य म०-क्० → म्० । अनेन अ० → उ० । 'अव्ययस्य' (३।२।७) सिलुप् **वीसुं** ।

**[ सुणओ ]** शुनक । प्रथमा सि । 'श-षोः सः' (१।२६०) शु० → सु० । 'नो णः' (१।२२८) न० → ण० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक्, **सुणओ** ।

**[ सा साणो ]** श्वन् । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'श-षोः सः' (१।२६०) श० → स० । 'अन्त्यव्य०' (१।११) न्लुक् - स्लुक् च । 'राज्ञः' (३।४९) इति आत्वं **सा** । 'पुंस्यन आणो राजवच्च' (३।५६) आन्स्थाने आण । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **साणो** ॥५२॥

## वन्द्र-खण्डिते णा वा ८।१।५३॥

अनयोरादेरस्य णकारेण सहितस्य उत्वं वा भवति ॥ वुन्द्रं वन्द्रं । खुडिओ खण्डिओ ॥

**[ वन्द्रखण्डिते ]** वन्द्रश्च खण्डितश्च = वन्द्रखण्डितम्, तस्मिन् = वन्द्रखण्डिते । सप्तमी ङि ।

**[ णा वा ]** ण् तृतीया टा । वा प्रथमा सि ।

**[ वुन्द्रं वन्द्रं ]** वन्द्र (२) । अनेन वा अस्य उ० - वु० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः (१।२३) अनुस्वारः **वुन्द्रं वन्द्रं** ।

अत्र रलोपो न भवति 'सर्वत्र ल-व-रा०' (२।७९) इत्यत्र वन्द्रवर्जनात् ।

**[ खुडिओ खण्डिओ ]** खंडित । 'वर्गेऽन्त्यो वा' (१।३०) ण० । खण्डित (२) । अनेन वा णेण सह खस्य खु० । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) इति त्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । डित्त्वात् खुडिओ **खण्डिओ** ॥५३॥

## गवये वः ॥ ८।१।५४ ॥

गवयशब्दे वकाराऽकारस्य उत्वं भवति ॥ गउओ । गउआ ॥

**[ गवये वः ]** गवय सप्तमी ङि । व् षष्ठी ङस् ।

**[ गउओ ]** गवय । प्रथमा सि । अनेन वस्य वु० । 'क-ग-च-ज०' (१।१७७) इति व-ययोर्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् **गउओ** ।

**[ गउआ ]** गवय । प्रथमा सि । अनेन वस्य वु० । 'क-ग-च-ज०' (१।१७७) इति व-ययोर्लुक् । गौरादि० ङीबाधकः 'स्वस्रादेर्डा' (३।२५) डाप्र० → आ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'लोकात्' (१।१।३) गउआ । 'अन्त्यव्य०' (१।११) स्लुक् **गउआ** ॥५४॥

## प्रथमे प-थोर्वा ॥ ८।१।५५ ॥

प्रथमशब्दे पकार-थकारयोरकारस्य युगपत् क्रमेण च उकारो वा भवति ॥ पुढुमं पुढमं पढुमं पढमं ॥

**[ प्रथमे पथोर्वा ]** प्रथम सप्तमी ङि । पश्च थ् च = पथौ, तयोः = पथोः । षष्ठी ओस् । वा प्रथमा सि ।

**[ पुढुमं पुढमं पढुमं पढमं ]** प्रथम (४) । 'सर्वत्र०' (२।७९) र्लुक् । 'मेथी-शिथिर-शिथिल-प्रथमे थस्य ढः' (१।२१५) चतुर्ष्वपि थस्य ढः । अनेन प्रथमे उभयोरुकारः । द्वितीये प्रथमस्य उकारः । तृतीये द्वितीयस्य उकारः । चतुर्थे न एकस्याऽपि उकारः । प्रथमा सि । 'क्लीबे स्वरा०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **पुढुमं पुढमं पढुमं पढमं** ॥५५॥

## ज्ञो णत्वेऽभिज्ञाऽऽदौ ॥ ८।१।५६ ॥

अभिज्ञ एवंप्रकारेषु ज्ञस्य णत्वे कृते ज्ञस्यैव अत उत्वं भवति ॥ अहिण्णू । सव्वण्णू । कयण्णू । आगमण्णू ॥

णत्व इति किम् ? अहिज्जो । सव्वज्जो ॥ अभिज्ञाऽऽदाविति किम् ? प्राज्ञः → पण्णो ॥

येषां ज्ञस्य णत्वे कृते उत्वं दृश्यते ते अभिज्ञाऽऽदयः ॥

**[ ज्ञो णत्वेऽभिज्ञाऽऽदौ ]** ज्ञ् षष्ठी ङस् । णत्व सप्तमी ङि । अभिज्ञाऽऽदि सप्तमी ङि ।

**[ अहिण्णू ]** अभिज्ञ । प्रथमा सि । 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । अनेन णस्य णु० । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **अहिण्णू** ।

**[ सव्वण्णू ]** सर्वज्ञ । प्रथमा सि । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । अनेन णस्य णु० । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **सव्वण्णू** ।

**[ कयण्णू ]** कृतज्ञ । प्रथमा सि । 'ऋतोऽत्' (१।१२६) कृ → क० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अस्य यः । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । अनेन णस्य णु० । 'अक्लीबे सौ' (३।१२) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **कयण्णू** ।

**[ आगमण्णू ]** आगमज्ञ । प्रथमा सि । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । अनेन णस्य णु० । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **आगमण्णू** ।

पक्षे-**आयमण्णू** । 'क-ग-च-ज०' (१।१७७) ग्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अस्य यः । शेषं प्राग्वत् ।

**[ अहिज्जो ]** अभिज्ञ । प्रथमा सि । 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः । 'ज्ञो ञः' (२।८३) इति ञ्लुक् । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **अहिज्जो** ।

**[ सव्वज्जो ]** सर्वज्ञ । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । 'ज्ञो ञः' (२।८३) इति ञ्लुक् । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सव्वज्जो** ।

**[ पण्णो ]** प्राज्ञ । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'ह्रस्वः संयोगे' (१।८४) पा० → प० । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पण्णो** ॥५६॥

## एच्छय्यादौ ॥ ८।१।५७ ॥

शय्याऽऽदिषु आदेरस्य एत्वं भवति ॥ सेज्जा । सुंदेरं । गेंदुअं । एत्थ ॥

शय्या । सौंदर्य । कन्दुक । अत्र ॥ आर्षे - पुरेकम्मं ॥

**[ एच्छय्याऽऽदौ ]** एत् प्रथमा सि । शय्याऽऽदि सप्तमी ङि ।

**[ सेज्जा ]** शय्या । प्रथमा सि । 'श-षोः सः' (१।२६०) श० → स० । 'द्य-य्य-र्यां जः' (२।२४) य्यस्य जः । [1]'अनादौ०' (२।८९) जस्य द्वित्वम् । अनेन आदेरस्य एत्वम् । 'अन्त्य०' (१।११) स्लुक् **सेज्जा** ।

**[ सुंदेरं ]** सौन्दर्य । 'उत्सौन्दर्याऽऽदौ' (१।१६०) सौ० → सु० । अनेन एत्वम् । 'ब्रह्मचर्य-तूर्य-सौन्दर्य-शौण्डीर्ये र्यो रः' (२।६३) र्य० → र० । प्रथमा सि । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **सुंदेरं** ।

**[ गेंदुअं ]** कन्दुक । प्रथमा सि । 'मरकत-मदकले गः कन्दुके त्वादेः' (१।१८२) कस्य गः । अनेन एकारः । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) । अनुस्वारः **गेंदुअं** ।

**[ एत्थ ]** अत्र । अनेन अ० → ए० । 'त्रपो हि-ह-त्थाः' (२।१६१) त्रस्य त्थ० **एत्थ** ।

**[ पुरेकम्मं ]** पुराकर्म । आर्षत्वादाकारस्य एत्वम् । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) मस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) । अनुस्वारः **पुरेकम्मं** ॥५७॥

## वल्ल्युत्कर-पर्यन्ता-ऽऽश्चर्ये वा ॥ ८।१।५८ ॥

एषु आदेरस्य एत्वं वा भवति ॥

वेल्ली वल्ली । उक्केरो उक्करो । पेरन्तो पज्जन्तो । अच्छेरं अच्छरिअं अच्छअरं अच्छरिज्जं अच्छरीअं ॥

**[ वल्ल्युत्करपर्यन्ताऽऽश्चर्ये ]** वल्ली च उत्करश्च पर्यन्तश्च आश्चर्यं च = वल्ल्युत्करपर्यन्ताऽऽश्चर्यम्, तस्मिन् = वल्ल्युत्करपर्यन्ताऽऽश्चर्ये । सप्तमी ङि ।

**[ वा ]** वा प्रथमा सि ।

**[ वेल्ली वल्ली ]** वल्ली (२) । अनेन वा एत्वम् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **वेल्ली वल्ली** ।

**[ उक्केरो उक्करो ]** उत्कर (२) । 'क-ग-ट-ड-त-द-प०' (२।७७) त्लुक् । [2]'अनादौ०' (२।८९) कस्य द्वित्वम् । अनेन एकारः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **उक्केरो उक्करो** ।

**[ पेरन्तो पज्जन्तो ]** पर्यन्त (२) । अनेन वा एकारः । यत्र एत्वं तत्र 'एतः पर्यन्ते' (२।६५) र्यस्य रः । द्वितीये 'द्य-य्य-र्यां जः' (२।२४) र्यस्य जः । 'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पेरन्तो पज्जन्तो** ।

**[ अच्छेरं अच्छरिअं अच्छअरं अच्छरिज्जं अच्छरीअं ]** आश्चर्य (१) । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'ह्रस्वात् थ्य-श्च-त्स-प्सामनिश्चले' (२।२१) श्चस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्य०' (२।९०) पूर्वछस्य चः । अनेन वा एत्वं-च्छे० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **अच्छेरं** । पक्षे-आश्चर्य (४) । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'ह्रस्वात् थ्य-श्च०' (२।२१) श्चस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'अतो रिआ-ऽर-रिज्ज-रीअं' (२।६७) र्यस्य स्थाने रिअ-अर-रिज्ज-रीअ । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **अच्छरिअं अच्छअरं अच्छरिज्जं अच्छरीअं** ॥५८॥

---

१. F. G. 'तैलादौ' (२।९८) । २. D. 'सेवादौ वा' (२।९९) ।

## ब्रह्मचर्ये चः ॥ ८।१।५९ ॥

ब्रह्मचर्यशब्दे चस्य अत एत्वं भवति ॥ बम्हचेरं ॥

**[ ब्रह्मचर्ये चः ]** ब्रह्मचर्य सप्तमी ङि । च् षष्ठी ङस् ।

**[ बम्हचेरं ]** ब्रह्मचर्य । 'सर्वत्र०' (२।७९) र्लुक् । 'पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः' (२।७४) ह्मस्य म्हः । अनेन अस्य ए० → चे० । 'ब्रह्मचर्य-तूर्य-सौन्दर्य-शौण्डीर्ये र्यो रः' (२।६३) र्यस्य रः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **बम्हचेरं** ॥५९॥

## तोऽन्तरि ॥ ८।१।६० ॥

अन्तर्शब्दे तस्य अत एत्वं भवति ॥

अन्तःपुरम् → अंतेउरं । अन्तश्चारी → अंतेचारी ॥ क्वचिन्न भवति - अंतगयं । अंतो-वीसंभ-निवेसिआणं ॥

**[ तोऽन्तरि ]** त् षष्ठी ङस् । अन्तर् सप्तमी ङि ।

**[ अंतेउरं ]** अन्तर्-पुर । अन्तर्-मध्ये पुरम् । 'अन्त्यव्यञ्जनस्य' (१।११) र्लुक् । अनेन एकारः - त० → ते० । 'क-ग-च-ज०' (१।१७७) प्लुक् । प्रथमा सि । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **अंतेउरं** । 'तो दोऽनादौ शौरसेन्यामयुक्तस्य' (४।२६०) इति त० → द० **अंदेउरं** । शेषं पूर्ववत् ।

**[ अंतेआरी ]** अन्तर्-चारिन् । 'अन्त्य०' (१।११) र्-न्लुक् । अनेन एकारः - त० → ते० । 'क-ग-च-ज०' (१।१७७) च्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **अंतेआरी** ।

**[ अंतग्गयं ]** अन्तर्गत । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अस्य यः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **अंतग्गयं** ।

**[ अंतो-वीसंभ-निवेसिआणं ]** अन्तर् । 'रः पदान्ते०' (१।३।५३) रस्य विसर्गः । 'अतो डो विसर्गस्य' (१।३७) विसर्गस्य डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **अंतो** । विश्रम्भनिवेशित । 'सर्वत्र०' (२।७९) र्लुक् । 'लुप्तय-र-व-श-ष-सां०' (१।४३) वि० → वी० । 'श-षोः सः' (१।२६०) शस्य सः । 'क-ग-च-ज०' (१।१७७) इति त्लुक् । षष्ठी आम् । 'जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः' (३।१२) दीर्घः- अ० → आ० । 'टा-आमोर्णः (३।६) आम्स्थाने णः । 'क्त्वा-स्यादेर्ण-स्वोर्वा' (१।२७) अनुस्वारः **वीसंभ-निवेसिआणं** ॥६०॥

## ओत् पद्मे ॥ ८।१।६१ ॥

पद्मशब्दे आदेरत ओत्वं भवति ॥ पोम्मं ॥

'पद्म-छद्म०' (२।११२) इति विश्लेषे न भवति ॥ पउमं ॥

**[ ओत् पद्मे ]** ओत् प्रथमा सि । पद्म सप्तमी ङि ।

**[ पोम्मं ]** पद्म । अनेन अकारस्य ओकारः । 'क-ग-ट-ड०' (२।७७) द्लुक् । [१]'अनादौ०' (२।८९) मस्य द्वित्वम्। प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **पोम्मं** ।

१. B. F. G. 'तैलादौ' (२।९८) ।

**[ पउमं ]** पद्म । 'पद्म-छद्म-मूर्ख-द्वारे वा' (२।११२) मात् प्राग् उकारः । 'लोकात्' (१।१।३) पदुम । 'क-ग०' (१।१७७) द्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **पउमं** ॥६१॥

## नमस्कार-परस्परे द्वितीयस्य ॥ ८।१।६२ ॥

अनयोर्द्वितीयस्य अत ओत्वं भवति ॥ नमोक्कारो । परोप्परं ॥

**[ नमस्कारपरस्परे ]** नमस्कारश्च परस्परं च = नमस्कारपरस्परम्, तस्मिन् = नमस्कारपरस्परे । सप्तमी ङि ।

**[ द्वितीयस्य ]** द्वितीय षष्ठी ङस् ।

**[ नमोक्कारो ]** नमस्कार । 'क-ग-ट-ड-त-द-प०' (२।७७) स्लुक् । अनेन ओत्वं - म० → मो० । [१]'अनादौ०' (२।८९) द्वित्वं-का० → क्का० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नमोक्कारो** ।

**[ परोप्परं ]** परस्पर । 'क-ग-ट-ड-त-द-प०' (२।७७) स्लुक् । अनेन रस्य रो० । 'अनादौ०' (२।८९) द्वित्वं-पस्य प्प० । प्रथमा सि । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **परोप्परं** ॥६२॥

## वाऽर्पौ ॥ ८।१।६३ ॥

अपर्यतौ धातौ आदेरस्य ओत्वं वा भवति ॥ ओप्पेइ अप्पेइ । ओप्पिअं अप्पिअं ॥

**[ वाऽर्पौ ]** वा प्रथमा सि । अर्पि सप्तमी ङि ।

**[ ओप्पेइ अप्पेइ ]** 'ॠंक् गतौ' (११३५) ऋ । इयर्ति कश्चित् तं इयृतं अन्यः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ० । 'अर्त्ति-री-व्ली-ह्री०' (४।२।२१) पोऽन्तः । 'पुस्-पौ' (४।३।३) ऋस्थाने अर्० । द्वित्वे 'लोकात्' (१।१।३) अर्प्पि इति स्थिते वर्त्त० तिव् । 'त्यादीनामाद्यत्रय०' (३।१३९) इति तिव्स्थाने इ० । 'णेरदेदावावे' (३।१४९) र्पि० → र्पे० । 'सर्वत्र०' (२।७९) र्लुक् । [२]'अनादौ०' (२।८९) द्वित्वं - पे० → प्पे० । अनेन अस्य वा ओ० **ओप्पेइ** । पक्षे-**अप्पेइ** ।

**[ ओप्पिअं अप्पिअं ]** अर्प्पि पूर्ववत् । अर्प्यते स्म = अर्प्पितम् । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'लुगावी क्त-भाव-कर्मसु' (३।१५२) इति णिग्लोपः । 'व्यञ्जनाददन्ते' (४।२३९) प् अग्रे अत् । 'क्ते' (३।१५६) इति अ० → इ० । 'लोकात्' (१।१।३) पि० । 'अनादौ०' (२।८९) द्वित्वं-प्पि० । अनेन वा अस्य ओ० । 'क-ग-च-ज०' (१।१७७) इति त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **ओप्पिअं** । पक्षे-**अप्पिअं** ॥६३॥

## स्वपावुच्च ॥ ८।१।६४ ॥

स्वपितौ धातौ आदेरस्य ओत्-उत् च भवति ॥ सोवइ सुवइ ॥

**[ स्वपावुच्च ]** स्वपि सप्तमी ङि । उत् प्रथमा सि । च प्रथमा सि ।

**[ सोवइ सुवइ ]** 'ञिष्वपंक् शये' (१०८८) ष्वप् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्वप् । वर्त्त० तिव् । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) तिव्० → इ० । 'सर्वत्र०' (२।७९) व्लुक् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) सपइ इति स्थिते 'पो वः' (१।२३१) प० → व० । अनेन प्रथमे सस्थाने सो-**सोवइ** । द्वितीये सु- **सुवइ** ॥६४॥

---

१. F. G. 'तैलादौ' (२।९८) । २. G. 'तैलादौ' (२।९८) ।

## [1]नात्पुनर्यादाइर्वा ॥ ८।१।६५ ॥

नञः परे पुनःशब्दे आदेरस्य आ-आइ इत्यादेशौ वा भवतः ॥

न उणा न उणाइ । पक्षे-न उण न उणो ॥ केवलस्यापि दृश्यते । पुणाइ ॥

[ **नात्पुनर्यादाइर्वा** ] न पञ्चमी ङसि । पुनर् सप्तमी ङि । आत्-आइ प्रथमा सि । वा प्रथमा सि ।

[ **न उणा न उणाइ, न उण न उणो** ] न पुनर् । 'अन्त्यव्यञ्जनस्य' (१।११) र्लुक् । 'क-ग-च-ज०' (१।१७७) इति प्लुक् । 'नो णः' (१।२२८) न० → ण० । अनेन आ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । **न उणा** इति जातम् । यत्र अनेन आइ तत्र **न उणाइ** । पक्षे-न पुनर् । 'अन्त्यव्य०' (१।११) र्लुक् । 'क-ग-च-ज०' (१।१७७) इति प्लुक् । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **न उण** - **न उणो** इति जातम् ।

[ **पुणाइ** ] पुनर् । 'अन्त्यव्य०' (१।११) र्लुक् । 'नो णः' (१।२२८) न० → ण० । अनेन आइ आदेशः **पुणाइ** ॥६५॥

## वाऽलाब्वरण्ये लुक् ॥ ८।१।६६ ॥

अलाब्वरण्यशब्दयोरादेरस्य लुग् वा भवति ॥

लाउं अलाउं । लाऊ अलाऊ । रण्णं अरण्णं ॥ अत इत्येव - आर[2]ण्ण - कुंजरो व्व वेल्लंतो ॥

[ **वाऽलाब्वरण्ये** ] वा प्रथमा सि । अलाबु च अरण्यं च = अलाब्वरण्यम्, तस्मिन् = अलाब्वरण्ये । सप्तमी ङि ।

[ **लुक्** ] लुक् प्रथमा सि ।

[ **लाउं अलाउं** ] अलाबु । [3]'सर्वत्र०' (२।७९) ब्लुक् । प्रथमा सि । अनेन वा अलुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **लाउं अलाउं** ।

स्त्रीलिङ्गेऽपि अलाबु शब्दः । तत्र दर्शयति -

[ **लाऊ अलाऊ** ] अलाबु । 'सर्वत्र०' (२।७९) ब्लुक् । अनेन वा अलुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः- उ० → ऊ० । 'अन्त्य०' (१।११) स्लुक् **लाऊ अलाऊ** इति सिद्धम् ।

[ **रण्णं अरण्णं** ] अरण्य । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ण्ण० । अनेन वा अलुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **रण्णं अरण्णं** इति जातम् ।

[ **आरण्ण-कुंजरो व्व वेल्लंतो** ] अरण्ये भवः = आरण्यः । 'रूप्योत्तरपदारण्याण्णः' (६।३।२२) णप्र० → अ० । 'वृद्धिः स्वरेष्वा०' (७।४।१) वृद्धिः-अ० → आ० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ण्ण० **आरण्ण-कुंजरो** ।

---

१. मु० नात्पुनर्यादाई वा ।

२. वेलालाण-णिअलिओ रसिउण रसाअलट्ठिअं पि समुद्दो । वालेइ सेउबंधं खम्भं **आरण्णकुञ्जरो व्व वेल्लन्तो** ॥

[से० ब० - आश्वासः ८ गा० ५९]

वेलालाननिगलितो रसित्वा रसातलस्थितमपि समुद्रः । चालयति सेतुबन्धं स्तम्भमारण्यकुञ्जर इव रममाणः ॥

३. L. 'बो वः' (१।२३७) बु० → वु० । 'सर्वत्र ल०' (२।७९) व्लुक् ।

**[ व्व ]** 'मिव-पिव-विव-व्व-व-विअ इवार्थे वा' (२।१८२) **व्व०** ।

**[ वेल्लंतो ]** 'रमिं क्रीडायाम्' (९८९) रम् । रमते । शतृप्र० । 'रमेः संखुड्ड-खेड्डोब्भाव-किलिकिञ्च-कोट्टुम-मोट्टाय-णीसर-वेल्लाः' (४।१६८) वेल्लादेशः । 'शत्रानशः' (३।१८१) न्त० । 'व्यञ्जना०' (४।२३९) अत् । अथवा पेलृ (४३२)-फेलृ (४३३)-शेलृ (४३४) - षेलृ (४३५) - सेलृ (४३६) - वेह्ल (४३७) - सल (४३८) - तिल (४३९) - तिल्ल (४४०) - पल्ल (४४१) - 'वेल्ल गतौ' (४४२) वेल्ल् । वेल्लतीति । शतृप्र० । 'शत्रानशः' (३।१८१) न्त० । 'व्यञ्जना०' (४।२३९) अत् **वेल्लंतो** ॥६६॥

## वाऽव्ययोत्खातादावदातः ॥ ८।१।६७ ॥

अव्ययेषु उत्खातादिषु च शब्देषु आदेराकारस्य अद् वा भवति ॥

अव्ययम् - जह जहा । तह तहा । अहव अहवा । व वा । ह हा । इत्यादि ॥

उत्खातादि - उक्खयं उक्खायं । चमरो चामरो । कलओ कालओ । ठविओ ठाविओ । परिट्ठविओ परिट्ठाविओ । संठविओ संठाविओ । पययं पाययं । तलवेण्टं तालवेण्टं । तलवोण्टं तालवोण्टं । हलिओ हालिओ । नराओ नाराओ । बलया बलाया । कुमरो कुमारो । खइरं खाइरं ॥

उत्खात । चामर । कालक । स्थापित । प्राकृत । तालवृन्त । हालिक । नाराच । बलाका । कुमार । खादिर इत्यादि ॥

केचिद् ब्राह्मण-पूर्वाह्णयोरपीच्छन्ति ॥ बम्हणो बाम्हणो । पुव्वण्हो पुव्वाण्हो ॥

दवग्गी दावग्गी । चडू चाडू इति शब्दभेदात् सिद्धम् ॥

**[ वाऽव्ययोत्खातादावदातः ]** वा प्रथमा सि । अव्यय-उत्खातादि । उत्खात आदौ यस्य स उत्खातादिः । अव्ययं च उत्खातादिश्च = अव्ययोत्खातादिस्तस्मिन् = अव्ययोत्खातादौ । सप्तमी ङि । अत् प्रथमा सि । आत् षष्ठी ङस् ।

**[ जह जहा ]** यथा । 'आदेर्यो जः' (१।२४५) यस्य जः । 'ख-घ-थ-ध-भाम्' (१।१८७) थस्य हः । अनेन वा आ० → अ० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **जह जहा** ।

**[ तह तहा ]** तथा । 'ख-घ-थ०' (१।१८७) थस्य हः । अनेन वा आ० → अ० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **तह तहा** ।

**[ अहव अहवा ]** अथवा । 'ख-घ-थ०' (१।१८७) थस्य हः । अनेन वा आ० → अ० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **अहव अहवा** । एवम्-**व वा** । **ह हा** इत्यादि ।

**[ उक्खयं उक्खायं ]** उत्खात । अनेन वा आ० → अ० । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अस्य यः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **उक्खयं उक्खायं** ।

**[ चमरो चामरो ]** चामर (२) । अनेन वा आ० → अ० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **चमरो चामरो** ।

**[ कलओ कालओ ]** कालक (२) । अनेन वा आ० → अ० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कलओ कालओ** ।

**[ ठविओ ठाविओ ]** स्थापित । 'स्थष्ठा-थक्क-चिट्ठ-निरप्पाः' (४।१६) स्था० → ठा० । 'पो वः' (१।२३१) पि० → वि० । 'क-ग-च-ज०' (१।१७७) इति त्लुक् । अनेन वा आ० → अ० **ठविओ ठाविओ** ।

**[ परिट्ठविओ परिट्ठाविओ ]** प्रति-ष्ठा (२) । प्रतितिष्ठन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'अर्त्ति-री-व्ली०' (४।२।२१) पोऽन्तः । प्रतिस्थाप्यते स्म । क्तप्र० । 'लुगावी क्त-भाव-कर्मसु' (३।१५२) णिग्लोपः । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'क्ते' (३।१५६) अ० → इ० । 'स्थष्ठा०' (४।१६) स्था० → ठा० । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठकारस्य टकारः । 'निष्प्रती ओत्परी माल्य-स्थोर्वा' (१।३८) प्रतिस्थाने परि० । 'पो वः' (१।२३१) पि० → वि० । अनेन वा आ० → अ० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **परिट्ठविओ परिट्ठाविओ** ।

**[ संठविओ संठाविओ ]** सम्पूर्वकः स्था(२) । ठविओ पूर्ववत् । **संठविओ संठाविओ** ।

**[ पययं पाययं ]** प्राकृत । 'सर्वत्र०' (२।७९) र्लुक् । 'ऋतोऽत्' (१।१२६) कृ० → क० । 'क-ग-च-ज०' (१।१७७) इति क-तयोर्लुक् । 'अवर्णो०' (१।१८०) अस्य यः । अनेन वा आ० → अ० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **पययं पाययं** ।

[1]**[ तलविण्टं तालविण्टं तलवेण्टं तालवेण्टं तलवोण्टं तालवोण्टं ]** तालवृन्त (६) । 'इदेदोद् वृन्ते' (१।१३९) ऋस्थाने इत्-एत्-ओत् । 'वृन्ते ण्टः' (२।३१) न्तस्य ण्ट आदेशः । अनेन वा आ० → अ० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **तलविण्टं तालविण्टं तलवेण्टं तालवेण्टं तलवोण्टं तालवोण्टं** ।

**[ हलिओ हालिओ ]** हालिक (२) । अनेन वा हा० → ह० । 'क-ग-च-ज०' (१।१७७) इति क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **हलिओ हालिओ** ।

**[ नराओ नाराओ ]** नाराच (२) । अनेन वा ना० → न० । 'क-ग-च-ज०' (१।१७७) इति च्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नराओ नाराओ** ।

**[ बलया बलाया ]** बलाका (२) । अनेन वा ला० → ल० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अस्य यः **बलया बलाया** ।

**[ कुमरो कुमारो ]** कुमार (२) । अनेन वा मा० → म० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कुमरो कुमारो** ।

**[ खइरं खाइरं ]** खादिर (२) । अनेन वा आ० → अ० । 'क-ग-च-ज०' (१।१७७) इति द्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **खइरं खाइरं** ।

**[ बम्हणो बाम्हणो ]** ब्राह्मण (२) । 'सर्वत्र०' (२।७९) र्लुक् । 'पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः' (२।७४) ह्म० → म्ह आदेशः । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । अनेन वा आ० → अ० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **बम्हणो बाम्हणो** ।

**[ पुव्वण्हो पुव्वाण्हो ]** पूर्वाह्ण (२) । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । अनेन वा आ० → अ० । 'सूक्ष्म-श्न-ष्ण-स्न-ह्न-ह्ण-क्ष्णां ण्हः' (२।७५) ह्ण० → ण्ह आदेशः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पुव्वण्हो पुव्वाण्हो** ।

---

१. A. तलविण्टं तालविण्टं........ ।

**[ दवग्गी दावग्गी ]** दवाग्नि-दावाग्नि । 'ह्रस्वः संयोगे' (१।८४) वा० → व० । 'अधो म-न-याम्' (२।७८) न्लुक्। 'अनादौ०' (२।८९) गस्य द्वित्वम् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **दवग्गी दावग्गी**।

**[ चडू ]** चटु । प्रथमा सि । 'टो डः' (१।१९५) टु० → डु० । 'अक्लीबे सौ' (३।१९) दीर्घः **चडू** ।

**[ चडू चाडू ]** चाटु (२) । अनेन वा आ० → अ० । 'टो डः' (१।१९५) टु० → डु० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः **चडू चाडू** ॥६७॥

## घञ्वृद्धेर्वा ॥ ८।१।६८ ॥

घञ्निमित्तो यो वृद्धिरूप आकारस्तस्याऽऽदिभूतस्य अद् वा भवति ॥

पवहो पवाहो । पहरो पहारो । पयरो पयारो प्रकारः प्रचारो वा । पत्थवो पत्थावो ॥ क्वचिन्न भवति - रागः → राओ ॥

**[ घञ्वृद्धेर्वा ]** घञ् प्रथमा सि । वृद्धि षष्ठी ङस् । वा प्रथमा सि । घञ्निमित्ता वृद्धिः = घञ्वृद्धिस्तस्याः ।

**[ पवहो पवाहो ]** प्रपूर्वकः 'वहीं प्रापणे' (९९६) वह् । प्रवहणं = प्रवाहः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः व० → वा० । 'सर्वत्र०' (२।७९) र्लुक् । अनेन वा वा० → व० । प्रथमा सि। 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पवहो पवाहो** ।

**[ पहरो पहारो ]** प्रपूर्वकः 'हृंग् हरणे' (८८५) हृ । प्रहरणं = प्रहारः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः हृ० → हार० । अनेन वा हा० → ह० । 'सर्वत्र०' (२।७९) र्लुक् । प्रथमा सि। 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पहरो पहारो** ।

**[ पयरो पयारो ]** प्रपूर्वकः 'डुकृंग् करणे' (८८८) कृ । प्रपूर्वकः 'चर भक्षणे च' (४१०) चर् । प्रकरणं = प्रकारः । प्रचरणं = प्रचारः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः - कृ० → कार० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः-चर्० → चार्० । अनेन वा का० → क० - चा० → च० । 'क-ग-च-ज०' (१।१७७) इति कस्य चस्य च लुक् । 'अवर्णो०' (१।१८०) अ० → य० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पयरो पयारो** ।

**[ पत्थवो पत्थावो ]** प्रपूर्वकः 'ष्टुंगक् स्तुतौ' (११२४) ष्टु । 'षः सोऽष्ट्यै०' (२।३।९८) स्तु । 'निमित्ताभावे०' (न्या० वक्ष० १।सूत्र २९) स्तु । प्रस्तवनं = प्रस्तावः । 'प्रात् स्नु-द्रु-स्तोः' (५।३।६७) घञ्प्र० → अ० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः । 'सर्वत्र०' (२।७९) र्लुक् । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्तस्य थ० । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय०' (२।९०) पूर्वथस्य तः । अनेन वा आ० → अ० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पत्थवो पत्थावो** ।

**[ राओ ]** 'रञ्जीं रागे' (८९६) रञ्ज् । रजनं = रागः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ० । 'घञि भाव-करणे' (४।२।५२) न्लुक् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः र० → रा० । 'क्तेऽनिटश्च०' (४।१।१११) ज० → ग० । 'लोकात्' (१।१।३) राग इति जातं ततः 'क-ग-च-ज०' (१।१७७) इति ग्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **राओ** ॥६८॥

## महाराष्ट्रे ॥ ८।१।६९ ॥

महाराष्ट्रशब्दे आदेराकारस्य अद् भवति ॥ मरहट्ठं मरहट्ठो ॥

**[ महाराष्ट्रे ]** महाराष्ट्र सप्तमी ङि ।

**[ मरहट्ठं मरहट्ठो ]** महाराष्ट्र । 'महाराष्ट्रे ह-रोः' (२।११९) इति ह-रोर्व्यत्ययः । अनेन रा० → र० । 'ह्रस्वः संयोगे' (१।८४) हा० → ह० । 'सर्वत्र ल०' (२।७९) र्लोपः । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । पुं-नपुंसकत्वात् 'क्लीबे०' (३।२५) सि० → म्० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मरहट्ठं मरहट्ठो** ॥६९॥

## मांसादिष्वनुस्वारे ॥ ८।१।७० ॥

मांसप्रकारेषु अनुस्वारे सति आदेरातः अद् भवति ॥

मंसं । पंसू । पंसणो । कंसं । कंसिओ । वंसिओ । पंडवो । संसिद्धिओ । संजत्तिओ ॥ अनुस्वार इति किम् ? मासं । पासू ॥

मांस । पांशु । पांसन । कांस्य । कांसिक । वांशिक । पाण्डव । सांसिद्धिक । सांयात्रिक इत्यादि ॥

**[ मांसादिष्वनुस्वारे ]** मांस आदिर्येषां ते = मांसादयस्तेषु = मांसादिषु । सप्तमी सुप् । अनुस्वार सप्तमी ङि ।

**[ मंसं ]** मांस । अनेन मां० → मं० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मंसं** ।

**[ पंसू ]** पांशु । अनेन पां० → पं० । 'श-षोः सः' (१।२६०) शु० → सु० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - सु० → सू० । 'अन्त्य०' (१।११) स्लुक् **पंसू** ।

**[ पंसणो ]** पांशुना अवकिरति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) उलुक् । पांशयतीति । 'नन्द्यादि०' (५।१।५२) अनप्र० । 'णेरनिटि' (४।३।८३) णिलुक् । अनेन पां० → पं० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पंसणो** ।

**[ कंसं ]** कांस्य । अनेन कां० → कं० । 'अधो म-न-याम्' (२।७८) यलुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कंसं** ।

**[ कंसिओ ]** कंसं पण्यमस्य । 'तदस्य पण्यम्' (६।४।५४) इकणप्र० → इक० । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । अनेन कां० → कं० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कंसिओ** ।

**[ वंसिओ ]** वंशवादनं शिल्पमस्य । 'शिल्पम्' (६।४।५७) इकणप्र० → इक० । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । अनेन वां० → वं० । 'श-षोः सः' (१।२६०) शि० → सि० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वंसिओ** ।

**[ पंडवो ]** पाण्डोरपत्यम् । 'शिवादेरण्' (६।१।६०) अण्प्र० → अ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । अनेन पां० → पं० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पंडवो** ।

**[ संसिद्धिओ ]** संसिद्धिः प्रयोजनमस्य । 'प्रयोजनम्' (६।४।११७) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः सं० → सां० । अनेन सां० → सं० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **संसिद्धिओ** ।

**[ संजत्तिओ ]** सङ्गतानां यात्रा = संयात्रा । संयात्रा प्रयोजनमस्य । 'प्रयोजनम्' (६।४।११७) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः- सं० → सां० । अनेन सां० → सं० । 'ह्रस्वः संयोगे' (१।८४) या० → य० । 'आदेर्यो जः' (१।२४५) य० → ज० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं- ति० → त्ति० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **संजत्तिओ** ।

**[ मासं ]** मांस । 'मांसाऽऽदेर्वा' (१।२९) अनुस्वारलुक् । अनेन मा० → म० न स्यात् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मासं** ।

**[ पासू ]** पांशु । 'मांसाऽऽदेर्वा' (१।२९) अनुस्वारलुक् । अनेन पा० → प० न स्यात् । 'श-षोः सः' (१।२६०) शु० → सु० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - सु० → सू० । 'अन्त्य०' (१।११) स्लुक् **पासू** ॥७०॥

## श्यामाके मः ॥ ८।१।७१ ॥

श्यामाके मस्य आतोऽद् भवति ॥ सामओ ॥

**[ श्यामाके मः ]** श्यामाक सप्तमी ङि । म् षष्ठी ङस् ।

**[ सामओ ]** श्यामाक । प्रथमा सि । 'अधो म-न-याम्' (२।७८) यलोपः । 'श-षोः सः' (१।२६०) शा० → सा० । 'क-ग-च-ज०' (१।१७७) इति क्लुक् । अनेन मा० → म० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सामओ** ॥७१॥

## इः सदाऽऽदौ वा ॥ ८।१।७२ ॥

सदाऽऽदिषु शब्देषु आत इत्वं वा भवति ॥ सइ सया । निसिअरो निसायरो । कुप्पिसो कुप्पासो ॥

**[ इः सदाऽऽदौ वा ]** इ प्रथमा सि । सदा आदिर्यस्याऽसौ सदाऽऽदिस्तस्मिन् = सदाऽऽदौ । सप्तमी ङि । वा प्रथमा सि ।

**[ सइ सया ]** सदा । अनेन दा० → दि० । 'क-ग-च-ज०' (१।१७७) इति द्लुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । **सइ** । द्वितीये 'अवर्णो यश्रुतिः' (१।१८०) अवर्णस्य आ० → या० **सया** ।

**[ निसिअरो [1]निसायरो ]** निशाकर । अनेन वा आ० → इ० -शा० → शि० । 'श-षोः सः' (१।२६०) शि० → सि० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निसिअरो** । द्वितीये 'अवर्णो०' (१।१८०) अस्य यः **निसायरो** ।

**[ कुप्पिसो कुप्पासो ]** कूर्पास । 'ह्रस्वः संयोगे' (१।८४) कू० → कु० । अनेन आ० → इ० -प्पा० → प्पि० । 'सर्वत्र०' (२।७९) र्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कुप्पिसो कुप्पासो** ॥७२॥

## आचार्ये चोऽच्च ॥ ८।१।७३ ॥

आचार्यशब्दे चस्य आत इत्वं अत्वं च भवति ॥ आइरिओ आयरिओ ॥

---

१. L. निसाअरो ।

**[ आचार्ये चोऽच्च ]** आचार्य सप्तमी ङि । च् षष्ठी ङस् । अत् च प्रथमा सि ।

**[ आइरिओ आयरिओ ]** आचार्य (२) । अनेन चस्य आत इत्वं अत्वं च । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'स्याद्-भव्य-चैत्य-चौर्यसमेषु यात्' (२।१०७) यात् प्राग् इकारः । 'क-ग-च-ज०' (१।१७७) च-ययोर्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आइरिओ आयरिओ** ॥७३॥

## ईः स्त्यान-खल्वाटे ॥ ८।१।७४ ॥

स्त्यान-खल्वाटयोरादेरात ईर्भवति ॥

ठीणं । थीणं । थिण्णं । खल्लीडो ॥ संखायं इति तु 'समः स्त्यः खाः' (४।१५) इति खाऽऽदेशे सिद्धम् ॥

**[ ईः स्त्यानखल्वाटे ]** ई प्रथमा सि । स्त्यानश्च खल्वाटश्च = स्त्यानखल्वाटम्, तस्मिन् = स्त्यानखल्वाटे । सप्तमी ङि ।

**[ ठीणं थीणं थिण्णं ]** स्त्यान । 'अधो म-न-याम्' (२।७८) य्लुक् । 'स्त्यान-चतुर्था-ऽर्थे वा' (२।३३) स्ता० → ठा० । अनेन आ० → ई० -ठा० → ठी० । 'नो णः' (१।२२८) न० → ण० **ठीणं** । द्वितीये 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्ता० → था० । अनेन आ० → ई० - था० → थी० । 'नो णः' (१।२२८) न० → ण० **थीणं** । तृतीये 'सेवादौ वा' (२।९९) णस्य द्वित्वम् । अनेन आ० → ई० । 'ह्रस्वः संयोगे' (१।८४) थी० → थि० **थिण्णं** ।

**[ खल्लीडो ]** खल्वाट । 'सर्वत्र०' (२।७९) व्लुक् । 'अनादौ०' (२।८९) लस्य द्वित्वं-ला० → ल्ला० । अनेन आ० → ई० -ल्ला० → ल्ली० । 'टो डः' (१।१९५) ट० → ड० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खल्लीडो** ।

**[ संखायं ]** सम्-ष्ट्यैं(३९)'स्त्यैं सङ्घाते च'(४०) स्त्यै । 'आत् सन्ध्यक्षरस्य' (४।२।१) स्त्या । संस्त्यायते स्म इति संस्त्यानं = संस्त्या । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'समः स्त्यः खाः' (४।१५) इति स्त्या० → खा० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० **संखाय**मिति सिद्धम् ॥७४॥

## उः सास्ना-स्तावके ॥ ८।१।७५ ॥

अनयोरादेरात उत्वं भवति ॥ सुण्हा । थुवओ ॥

**[ उः सास्नास्तावके ]** उ प्रथमा सि । सास्ना च स्तावकश्च = सास्नास्तावकम्, तस्मिन् = सास्नास्तावके । सप्तमी ङि।

**[ सुण्हा ]** सास्ना । प्रथमा सि । 'सूक्ष्म-श्न-ष्ण-स्न-ह्न-ह्ण-क्ष्णां ण्हः' (२।७५) इति स्ना० → ण्हा० । अनेन सा० → सु० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सुण्हा** ।

**[ थुवओ ]** स्तावक । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्ता० → था० । अनेन आ० → उ० -था० → थु० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **थुवओ** ॥७५॥

## ऊद्वाऽऽसारे ॥ ८।१।७६ ॥

आसारे आदेरात ऊद् वा भवति ॥ ऊसारो आसारो ॥

**[ ऊद्वाऽऽसारे ]** ऊत् प्रथमा सि । वा प्रथमा सि । आसार सप्तमी ङि ।

**[ ऊसारो आसारो ]** आसार । अनेन वा आ० → ऊ० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **ऊसारो आसारो** ॥७६॥

## आर्यायां र्यः श्वश्र्वाम् ॥ ८।१।७७ ॥

आर्याशब्दे श्वश्र्वां वाच्यायां र्यस्याऽऽत ऊर्भवति ॥ अज्जू ॥ श्वश्र्वामिति किम् ? अज्जा ॥

**[ आर्यायां र्यः श्वश्र्वाम् ]** आर्या सप्तमी ङि । र्य् षष्ठी ङस् । श्वश्रू सप्तमी ङि ।

**[ अज्जू ]** आर्या । 'द्य-य्य-र्यां जः' (२।२४) र्या० → जा० । 'अनादौ०' (२।८९) जस्य द्वित्वं-जा० → ज्जा० । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । अनेन ज्जा० → ज्जू० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **अज्जू** ।

**[ अज्जा ]** आ० → ऊ० मुक्त्वा शेषं तथैव - **अज्जा** ॥७७॥

## एद् ग्राह्ये ॥ ८।१।७८ ॥

ग्राह्यशब्दे आदेरात एद् भवति ॥ गेज्झं ॥

**[ एद् ग्राह्ये ]** एत् प्रथमा सि । ग्राह्य सप्तमी ङि ।

**[ गेज्झं ]** ग्राह्य । 'सर्वत्र०' (२।७९) र्लुक् । 'साध्वस-ध्य-ह्यां झः' (२।२६) ह्यस्य झः । [1]'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वझस्य जः । अनेन गा० → गे० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **गेज्झं** ॥७८॥

## द्वारे वा ॥ ८।१।७९ ॥

द्वारशब्दे आत एद् वा भवति ॥

देरं । पक्षे-दुआरं । वारं । दारं ॥ कथं नेरइओ नारइओ ? । नैरयिक-[2]नारकिकशब्दयोर्भविष्यति । आर्षे अन्यत्राऽपि -पच्छेकम्मं । असहेज्ज [3]देवासुरा ॥

**[ द्वारे वा ]** द्वार सप्तमी ङि । वा प्रथमा सि ।

**[ देरं ]** द्वार । 'सर्वत्र ल०' (२।७९) व्लुक् । अनेन वा आ० → ए० - दा० → दे० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **देरं** । पक्षे-

**[ दुआरं ]** द्वार । 'पद्म-छद्म-मूर्ख-द्वारे वा' (२।११२) इति व् प्राग् उकारः - दुवार इति स्थिते 'क-ग-च-ज-त-द-प-य-वां प्रायो लुक्' (१।१७७) व्लोपः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **दुआरं** इति सिद्धम् ।

**[ वारं ]** द्वार । 'क-ग-ट-ड-त-द-प-श-ष०' (२।७७) इति द्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **वारं** इति जातम् ।

**[ दारं ]** द्वार । 'सर्वत्र ल-व०' (२।७९) व्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **दारं** इति सिद्धम् ।

**[ नेरइओ नारइओ ]** निरये भवः = नैरयिकः । नरके भवः = नारकिकः । 'अध्यात्मादिभ्य इकण्' (६।३।७८) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः - नि० → नै० - न० → ना० । नैरयिक - नारकिक **मण्डनिका**।

---

१. G. तैलादौ प्रसङ्गे । २. M. नारयिक । ३. J. L. M. देवासुरी ।

'ऐत एत्' (१।१४८) नै० → ने० । 'क-ग-च-ज-त-द-प-य-वां प्रायो लुक्' (१।१७७) यलोपः - कुलोपश्च । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । **नेरइओ नारइओ** इति सिद्धम् ।

**[ पच्छेकम्मं ]** पश्चात्-कर्मन् । 'अन्त्यव्य०' (१।११) त्-न्लुक् । 'ह्रस्वात् थ्य-श्च-त्स-प्सामनिश्चले' (२।२१) श्चस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । आर्षत्वात् अत्रापि अनेन च्छे० । 'सर्वत्र' (२।७९) र्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । मोऽनुस्वारः' (१।२३) अनुस्वारः **पच्छेकम्मं** इति सिद्धम् ।

**[ असहेज्ज देवासुरा ]** [1]असाहाय्य । 'वाऽव्ययोत्खातादावदातः' (१।६७) इति सा० → स० । 'द्य-य्य-र्यां जः' (२।२४) इति य्यस्थाने जः । आर्षे अनेन हा० → हे० । [2]'अनादौ०' (२।८९) जस्य द्वित्वं -ज० → ज्ज० **असहेज्ज** इति सिद्धम् ॥७९॥

## पारापते रो वा ॥ ८।१।८० ॥

पारापतशब्दे रस्थस्याऽऽत एद् वा भवति ॥ पारेवओ पारावओ ॥

**[ पारापते रो वा ]** पारापत सप्तमी ङि । र् षष्ठी ङस् । वा प्रथमा सि ।

**[ पारेवओ पारावओ ]** पारापत (२) । अनेन वा रा० → रे० । 'पो वः' (१।२३१) प० → व० । 'क-ग-च-त-द-प-य-वां०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पारेवओ पारावओ** ॥८०॥

## मात्रटि वा ॥ ८।१।८१ ॥

मात्रट्प्रत्यये आत एद् वा भवति ॥ एत्तिअमेत्तं एतिअमत्तं ॥

बहुलाधिकारात् क्वचिन्मात्रशब्देऽपि - भोअण-मेत्तं ॥

**[ मात्रटि वा ]** मात्रट् सप्तमी ङि । वा प्रथमा सि ।

**[ एत्तिअमेत्तं एत्तिअमत्तं ]** एतद् । एषा संख्यामानमस्य । 'यत्-तदेतदो०' (७।१।१४९) डावतुप्र० → आवत्० । 'डित्यन्त्य०' (२।१।११४) अल्लुक् । एतावदेव । मात्रट्प्र० → मात्र० । 'यत्तदेतदोऽतोरित्तिअ एतल्लुक् च' (२।१५६) (?) (इदं - किमश्च डेत्तिअ-डेत्तिल-डेद्दहाः' (२।१५७) एतावत्स्थाने एत्तिअ आदेशः) । अनेन वा एत्वं - मा० → मे० । 'सर्वत्र ल०' (२।७९) र्लुक् । [3]'अनादौ०' (२।८९) तस्य द्वित्वं-त० → त्त० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **एत्तिअमेत्तं** । यत्र न एकारस्तत्र **एत्तिअमत्तं** । 'ह्रस्वः संयोगे' (१।८४) मा० → म० । शेषं पूर्ववत् ।

**[ भोय( अ )णमेत्तं ]** भोजन-मात्र । भोजनं च तन्मात्रं च । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो०' (१।१८०) अ० → य० ? । 'नो णः' (१।२२८) न० → ण० । अनेन मात्रशब्दस्याऽपि आकारस्य एकारः । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वं- त० → त्त० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **भोय( अ )णमेत्तं** ॥८१॥

---

१. G. असहाय । K. असहाय्य । २. G. 'तैलादौ' (२।९८) । ३. G. तैलादौ' (२।९८) ।

## उदोद्वाऽऽर्द्रे ॥ ८।१।८२ ॥

आर्द्रशब्दे आदेरात उद् ओच्च वा भवतः ॥

उल्लं । ओल्लं ॥ पक्षे-अल्लं । अद्दं । बाह-सलिल-पवहेण उल्लेइ ॥

**[ उदोद्वाऽऽर्द्रे ]** उच्च ओच्च = उदोत् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । वा प्रथमा सि । आर्द्र सप्तमी ङि ।

**[ उल्लं ओल्लं ]** आर्द्र । 'सर्वत्र०' (२।७९) ऊर्ध्व-र्लोपः । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'हरिद्रादौ लः' (१।२५४) रस्य लः । [1]'अनादौ०' (२।८९) लस्य द्वित्वं-ल० → ल्ल० । अनेन आ० → उ० – ओ० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **उल्लं ओल्लं** । पक्षे-

**[ अल्लं अद्दं ]** आर्द्र । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'सर्वत्र०' (२।७९) र्लुक् । 'हरिद्रादौ लः' (१।२५४) इति लत्वम् । 'अनादौ०' (२।८९) लस्य दस्य च द्वित्वं - ल० → ल्ल० - द० → द्द० । प्रथमा सि । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **अल्लं अद्दं** ।

**[ बाह-सलिल-पवहेण उल्लेइ ]** बाष्प । 'बाष्पे होऽश्रुणि' (२।७०) ष्प० → ह० **बाह** । प्रवाह । 'घञ्वृद्धेर्वा' (१।६८) वा० → व० । 'सर्वत्र०' (२।७९) र्लुक् । तृतीया टा । 'टा-आमोर्णः' (३।६) इति टास्थाने णः । 'टाण-शस्येत्' (३।१४) इति अ० → ए० - ह० → हे० **पवहेण** । आर्द्र । आर्द्रं करोति = आर्द्रयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० → इ० । 'त्रन्त्यस्वरादेः' (७।४।४३) रमध्यादकारलुक् । वर्त्त० तिव् । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) तिव्० → इ० । 'णेरदेदावावे' (३।१४९) द्रि० → द्रे० । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'हरिद्रादौ लः' (१।२५४) र० → ल० । 'अनादौ०' (२।८९) लस्य द्वित्वं-ले० → ल्ले० । अनेन उत्वं **उल्लेइ** ॥८२॥

## ओदाल्यां पङ्क्तौ ॥ ८।१।८३ ॥

आलीशब्दे पङ्क्तिवाचिनि आत ओत्वं भवति ॥ ओली ॥ पङ्क्ताविति किम् ? [2]आली सखी ॥

**[ ओदाल्यां पङ्क्तौ ]** ओत् प्रथमा सि । आली सप्तमी ङि । पङ्क्ति सप्तमी ङि ।

**[ ओली ]** आली । प्रथमा सि । अनेन आ० → ओ० । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **ओली** ॥८३॥

## ह्रस्वः संयोगे ॥ ८।१।८४ ॥

दीर्घस्य यथादर्शनं संयोगे परे ह्रस्वो भवति ॥

आत् - आम्रम् → अम्बं । ताम्रम् → तम्बं । विरहाग्निः → विरहग्गी । आस्यम् → अस्सं ॥

ईत्-मुनीन्द्रः → मुणिन्दो । तीर्थम् → तित्थं ॥

ऊत् - गुरूल्लापाः → गुरुल्लावा । चूर्णः → चुण्णो ॥

एत् - नरेन्द्रः → नरिंदो । म्लेच्छः → मिलिच्छो । दिट्ठिक्क-थण-वट्टं ॥

ओत्-अधरोष्ठः → अहरुट्ठं । नीलोत्पलम् → नीलुप्पलं ॥

संयोग इति किम् ? आयासं । ईसरो । ऊसवो ॥

---

१. F. G. 'तैलादौ' (२।९८) । २. 'आलिः सखी वयस्याऽथ' अ० को० -१०९७ । 'आली सख्यावली अपि' अ० को० -२७३१ ।

**[ ह्रस्वः संयोगे ]** ह्रस्व प्रथमा सि । संयोग सप्तमी ङि ।

**[ अम्बं ]** आम्र । अनेन आ० → अ० । 'ताम्रा-ऽऽम्रे म्बः' (२।५६) म्र० → म्ब० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **अम्बं** ।

**[ तम्बं ]** ताम्र । अनेन ता० → त० । 'ताम्रा-ऽऽम्रे म्बः' (२।५६) म्र० → म्ब० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **तम्बं** ।

**[ विरहग्गी ]** विरह एव अग्निः = विरहाग्निः । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वं-गि० → ग्गि० । अनेन ह्रस्वः-हा० → ह० । 'अक्लीबे सौ' (३।१९) दीर्घः-ग्गि० → ग्गी० । 'अन्त्यव्य०' (१।११) स्लुक् **विरहग्गी** ।

**[ अस्सं ]** आस्य । प्रथमा सि । 'अधो म-न-याम्' (२।७८) य्लोपः । 'अनादौ०' (२।८९) सस्य द्वित्वं-स० → स्स० । अनेन आ० → अ० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **अस्सं** ।

**[ मुणिंदो ]** मुनीन्द्र । 'द्रे रो नवा' (२।८०) र्लुक् । अनेन ई० → इ० । 'नो णः' (१।२२८) नि० → णि० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **मुणिंदो** ।

**[ तित्थं ]** तीर्थ । अनेन ती० → ति० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **तित्थं** ।

**[ गुरुल्लावा ]** गुरु-उल्लाप । गुरूणां उल्लापाः-वचनानि = गुरूल्लापाः । अनेन रू० → रु० । 'पो वः' (१।२३१) प० → व० । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्०' (३।१२) दीर्घः **गुरुल्लावा** ।

**[ चुण्णो ]** चूर्ण । अनेन चू० → चु० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) णस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **चुण्णो** ।

**[ नरिंदो ]** नरेन्द्र । अनेन रे० → रि० । 'द्रे रो नवा' (२।८०) र्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नरिंदो** ।

**[ मिलिच्छो ]** म्लेच्छ । 'लात्' (२।१०६) इति लपूर्वं इ० । अनेन ले० → लि० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मिलिच्छो** ।

[1]**[ दिट्ठिक्क-थण-[2]वट्ठं ]** [3]दृष्टैकस्तनपृष्ट । दृष्टं एकं स्तनपृष्टं यत्र कञ्चुकोत्तो(त्ता)रणे तत् = दृष्टैकस्तनपृष्टम् । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः ।

---

१. आमूल-वलिअ-वामोरु-वल्लरी-लंघिए अरोरु-लअं । तंस-ट्ठिअ-दर-परिअत्तिअंग-**दिट्ठेक्क-थण-वट्ठं** ॥
[ग० व० - २०२ । अनु० अङ्कः - ६६]
आमूलवलितवामोरुवल्लरीलङ्घितेतरोरुलतम् । त्र्यस्रस्थितेषत्परिवर्तिताङ्गदृष्टैकस्तनपृष्ठम् ॥

२. G. J. L. दिट्ठिक्कथणवट्टं - एकश्चासौ स्तनः = एकस्तनः, तस्य वृत्तं-वृत्तान्तः । दृष्टं-ज्ञानं एकस्तनवृत्तं येन तं = दृष्टैकस्तनवृत्तम् । द्वि० अम् । 'इत्कृपादौ' (१।१२८) दृ० → दि० । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'ऐत एत्' (१।१४८) ठै० → ठे० । 'अनादौ०' (२।८९) कस्य द्वित्वम् । 'ह्रस्वः संयोगे' (१।८४) ठे० → ठि० । 'स्तस्य०' (२।४५) स्त० → थ० । 'नो णः' (१।२२८) न० → ण० । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'वृत्त-प्रवृत्त०' (२।२९) त्त० → ट० । आदौ टकारस्य द्वित्वे । 'अमोऽस्य' (३।५) अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः दिट्ठिक्कथण-वट्टं । ३. I. दृष्टैकस्तनपट्ट । J. L. दृष्टैकस्तनवृत्त ।

'इत्कृपादौ' (१।१२८) दृ० → दि० । एक इत्यत्र 'सेवादौ वा' (२।९९) क० → क्क० । अनेन ऐ० → इ० । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्त० → थ० । 'नो णः' (१।२२८) न० → ण० । पृष्ट इत्यत्र 'ऋतोऽत्' (१।१२६) पृ० → प० । 'पो वः' (१।२३१) प० → व० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **दिद्विक्क-थण-वड्डं** ।

**[ अहरुट्ठं ]** अधरोष्ठ । 'ख-घ-थ-ध-भाम्' (१।१८७) ध० → ह० । अनेन रो० → रु० । 'ष्टस्याऽनुष्ट्रे०' (२।३४) ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **अहरुट्ठं** ।

**[ नीलुप्पलं ]** नीलोत्पल । अनेन लो० → लु० । 'क-ग-ट-ड०' (२।७७) इति त्लुक् । 'अनादौ०' (२।८९) पस्य द्वित्वं-प० → प्प० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **नीलुप्पलं** ।

[1]**[ आयासं ]** आकाश । 'क-ग-च-ज-त-द-प-य-वां प्रायो लुक्' (१।१७७) क्लुक् । 'अवर्णो०' (१।१८०) आ० → या० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **आयासं** ।

**[ ईसरो ]** ईश्वर । 'सर्वत्र०' (२।७९) व्लुक् । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **ईसरो** ।

**[ ऊसवो ]** उत्सव । 'अनुत्साहो०' (१।११४) उ० → ऊ० । 'क-ग-ट-ड०' (२।७७) इति त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **ऊसवो** ॥८४॥

## इत एद्वा ॥ ८।१।८५ ॥

संयोग इति वर्त्तते । आदेरिकारस्य संयोगे परे एकारो वा भवति ॥

पेण्डं पिण्डं । धम्मेल्लं धम्मिल्लं । सेन्दूरं सिन्दूरं । वेण्हू विण्हू । [2]जेण्हू जिण्हू । पेट्ठं पिट्ठं । बेल्लं बिल्लं ॥ क्वचिन्न भवति-चिन्ता ॥

**[ इत एद्वा ]** इत् षष्ठी ङस् । एत् प्रथमा सि । वा प्रथमा सि ।

**[ पेण्डं पिण्डं ]** पिंड (२) । अनेन वा इ० → ए० । 'वर्गेऽन्त्यो वा' (१।३०) अनुस्वारस्य ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **पेण्डं पिण्डं** ।

**[ धम्मेल्लं धम्मिल्लं ]** धम्मिल्ल (२) । अनेन् वा इ० → ए० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **धम्मेल्लं धम्मिल्लं** ।

**[ सेन्दूरं सिन्दूरं ]** सिंदूर (२) । अनेन वा इ० → ए० । 'वर्गेऽन्त्यो वा' (१।३०) अनुस्वारस्य न० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **सेन्दूरं सिन्दूरं** ।

**[ वेण्हू विण्हू ]** विष्णु (२) । अनेन वा वि० → वे० । 'सूक्ष्म-श्न-ष्ण-स्न-ह्न-ह्ण-क्ष्णां ण्हः' (२।७५) ष्णु० → ण्हु० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः -ण्हु० → ण्हू० । 'अन्त्यव्य०' (१।११) स्लुक् **वेण्हू विण्हू** ।

---

१. I. आकासं । २. A. जेण्हू जिण्हू उदाहरणम् ।

[1]**[ जेण्हू जिण्हू ]** जिष्णु (२) । अनेन वा जि० → जे० । 'सूक्ष्म-श्न-ष्ण०' (२।७५) ष्णु० → ण्हु० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः -ण्हु० → ण्हू० । 'अन्त्यव्य०' (१।११) स्लुक् **जेण्हू जिण्हू** ।

**[ पेट्ठं पिट्ठं ]** [2]पृष्ठ (२) । 'पृष्ठे वाऽनुत्तरपदे' (१।१२९) पृ० → पि० । अनेन वा पि० → पे० । 'ष्टस्याऽनुष्ट्रे०' (२।३४) ष्ठस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **पेट्ठं पिट्ठं** ।

**[ बेल्लं बिल्लं ]** बिल्व (२) । अनेन वा बि० → बे० । 'सर्वत्र०' (२।७९) व्लुक् । 'अनादौ०' (२।८९) लस्य द्वित्वं-ल० → ल्ल० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **बेल्लं बिल्लं** ।

**[ चिन्ता ]** चिन्ता ॥८५॥

## किंशुके वा ॥ ८।१।८६ ॥

किंशुकशब्दे आदेरित एकारो वा भवति ॥ केसुअं किंसुअं ॥

**[ किंशुके वा ]** किंशुक सप्तमी ङि । वा प्रथमा सि ।

**[ केसुअं किंसुअं ]** किंशुक (२) । 'मांसाऽऽदेर्वा' (१।२९) वाऽनुस्वारलुक् । अनेन वा एत्वं-कि० → के० । 'श-षोः सः' (१।२६०) शु० → सु० । 'क-ग-च-ज०' (१।१७७) इति क्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **केसुअं किंसुअं** ॥८६॥

## मिरायाम् ॥ ८।१।८७ ॥

मिराशब्दे इत एकारो भवति ॥ मेरा ॥

**[ मिरायाम् ]** मिरा सप्तमी ङि ।

**[ मेरा ]** मिरा । प्रथमा सि । अनेन मि० → मे० । 'अन्त्यव्य०' (१।११) स्लुक् **मेरा** ॥८७॥

## [3]पथि-पृथिवी-प्रतिश्रुन्मूषिक-हरिद्रा-बिभीतकेष्वत् ॥ ८।१।८८ ॥

एषु आदेरितोऽकारो भवति ॥

पहो । पुहई । पुढवी । पडंसुआ । मूसओ । हलद्दी । हलद्दा । बहेडओ ॥

[4]पंथं किर देसित्तेति तु पथिशब्दसमानार्थस्य पन्थशब्दस्य भविष्यति ॥

हरिद्रायां विकल्प इत्यन्ये । हलिद्दी हलिद्दा ॥

**[ पथिपृथिवीप्रतिश्रुन्मूषिकहरिद्राबिभीतकेषु ]** पन्थाश्च पृथिवी च प्रतिश्रुच्च मूषिकश्च हरिद्रा च बिभीतकश्च = पथिपृथिवीप्रतिश्रुन्मूषिकहरिद्राबिभीतकास्तेषु = पथिपृथिवीप्रतिश्रुन्मूषिकहरिद्राबिभीतकेषु ।

**[ अत् ]** अत् प्रथमा सि ।

---

१. A. जेण्हू जिण्हू उदाहरणम् । २. J. L. पिष्ट ।

३. A. सूत्रे पथि-मथि-पृथिवी... । सूत्रोदाहरणे पहो-महो-पुहई... । विग्रहे पन्थाश्च मन्थाश्च पृथिवी च... ।

४. **पंथं किर देसित्ता** साहूणं अडविविप्पणट्ठाणं । सम्मत्तपढमलंभो बोद्धव्वो वद्धमाणस्स ॥ [आव० नि० गाथा-१४६] पन्थानं किल देशयित्वा साधूनां अटवीविप्रनष्टानाम् । सम्यक्त्वप्रथमलाभो बोद्धव्यो वर्धमानस्य ॥

**[ पहो ]** पथिन् । प्रथमा सि । 'अन्त्य०' (१।११) न्लुक् । अनेन थि० → थ० । 'ख-घ-थ-ध-भाम्' (१।१८७) थ० → ह० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पहो** ।

**[ पुहई पुढवी ]** पृथिवी (२) । 'उदृत्वादौ' (१।१३१) पृ० → पु० । 'ख-घ-थ-ध-भाम्' (१।१८७) थि० → हि० । अनेन हि० → ह० । 'क-ग-च-ज०' (१।१७७) इति व्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **पुहई** । द्वितीये 'निशीथ-पृथिव्योर्वा' (१।२१६) थस्य ढः । शेषं तद्वत् । **पुढवी** ।

**[ पडंसुआ ]** प्रतिश्रुत् । 'सर्वत्र०' (२।७९) प्रमध्यस्य-श्रुमध्यस्य-उभयोः र्लुक् । 'प्रत्यादौ डः' (१।२०६) ति० → डि० । अनेन डि० → ड० । 'वक्रादावन्तः' (१।२६) अनुस्वारः । 'स्त्रियामादविद्युतः' (१।१५) अन्त्यतस्य आ०' । 'श-षोः सः' (१।२६०) शु० → सु० । प्रथमा सि० । 'अन्त्यव्य०' (१।११) स्लुक् **पडंसुआ** ।

**[ मूसओ ]** मूषिक । अनेन षि० → ष० । 'श-षोः सः' (१।२६०) ष० → स० । 'क-ग-च-ज०' (१।१७७) इति क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् **मूसओ** ।

**[ हलद्दी हलद्दा ]** हरिद्रा । अनेन रि० → र० । 'हरिद्रादौ लः' (१।२५४) र० → ल० । 'द्रे रो नवा' (२।८०) इति द्रस्य रकारस्य लुक् । 'अनादौ०' (२।८९) दस्य द्वित्वं-दा० → द्दा० । 'छाया-हरिद्रयोः' (३।३४) इति ङीप्र० → ई इति हलद्दी तत्र 'अस्य ड्यां लुक्' (२।४।८६) ('लुक्' (१।१०) ) अस्य लुक् **हलद्दी** । द्वितीये-हलद्दा । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **हलद्दा** ।

**[ बहेडओ ]** बिभीतक । अनेन बि० → ब० । 'ख-घ-थ-ध-भाम्' (१।१८७) भी० → ही० । 'एत्पीयूषाऽऽपीड-बिभीतक-कीदृशेदृशे' (१।१०५) ही० → हे० । 'प्रत्यादौ डः' (१।२०६) त० → ड० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **बहेडओ** ।

**[ पंथं किर देसित्ता ]** स्वर्त (१६५०) - 'पथुण् गतौ' (१६५१) पथ् । 'उदितः०' (४।४।९८) नोऽन्तः । 'चुरादि०' (३।४।४२) णिच्प्र० । पथ्यतेऽनेनेति । 'युवर्ण-वृ-दृ-वश-रण०' (५।३।२८) अल्प्र० → अ । 'णेरनिटि' (४।३।८३) णिलोपः । द्वितीया अम् । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **पंथं** ।

'किरेर-हिर किलार्थे वा' (२।१८६) किर ।

'दिशीं् अतिसर्जने' (१३१८) दिश् । क्त्वाप्र० → त्वा । 'व्यञ्जनाददः०' (४।२३९) अत् । 'युवर्णस्य गुणः' (४।२३७) गुणः । 'एच्च क्त्वा-तुम्-तव्य०' (३।१५७) इ० । 'श-षोः सः' (१।२६०) शि० → सि० । 'सर्वत्र ल०' (२।७९) व्लोपः । 'अनादौ०' (२।८९) तस्य द्वित्वं **देसित्ता** ।

[1]**[ हलिद्दी हलद्दा ]** हलिद्दी हलद्दा इति विकल्पेन इकारस्य अकारो वदन्ति । साधनिका पूर्ववत् ॥८८॥

## शिथिलेङ्गुदे वा ॥ ८।१।८९ ॥

अनयोरादेरितोऽद् वा भवति ॥ सढिलं सिढिलं । पसढिलं पसिढिलं । अंगुअं इंगुअं ॥

निर्मितशब्दे तु वा आत्वं न विधेयं, निर्मात-निर्मितशब्दाभ्यामेव सिद्धेः ॥

**[ शिथिलेङ्गुदे वा ]** शिथिलश्च इङ्गुदं च = शिथिलेङ्गुदम्, तस्मिन् = शिथिलेङ्गुदे । सप्तमी ङि । वा प्रथमा सि ।

---

१. I. हलद्दी हलिद्दी ।

**[ सढिलं सिढिलं पसढिलं पसिढिलं ]** शिथिल (२) - प्रशिथिल (२) । अनेन वा इ० → अ० - शि० → श० । 'श-षोः सः' (१।२६०) श० → स० -शि० → सि० । 'मेथी-शिथिर-शिथिल-प्रथमे थस्य ढः' (१।२१५) थस्य ढः । 'सर्वत्र०' (२।७९) उभयत्र प्रस्य र्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **सढिलं सिढिलं पसढिलं पसिढिलं ।**

**[ अंगुअं इंगुअं ]** इङ्गुद (२) । अनेन वा इ० → अ० । 'क-ग-च-ज०' (१।१७७) इति द्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **अंगुअं इंगुअं** । ॥८९॥

## तित्तिरौ रः ॥ ८।१।९० ॥

तित्तिरिशब्दे रस्येतोऽद् भवति ॥ तित्तिरो ॥

**[ तित्तिरौ रः ]** तित्तिरि सप्तमी ङि । र् षष्ठी ङस् ।

**[ तित्तिरो ]** तित्तिरि । प्रथमा सि । अनेन रि० → र० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तित्तिरो** ॥९०॥

## इतौ तो वाक्याऽऽदौ ॥ ८।१।९१ ॥

वाक्याऽऽदिभूते इतिशब्दे यस्तस्तत्सम्बन्धिन इकारस्य अकारो भवति ॥

इअ जंपिआवसाणे ॥ वाक्याऽऽदाविति किम् ? पिओ त्ति । पुरिसो त्ति ॥

**[ इतौ तो वाक्याऽऽदौ ]** इति सप्तमी ङि । त् षष्ठी ङस् । वाक्याऽऽदि सप्तमी ङि ।

**[ इअ जंपिआवसाणे ]** इति । प्रथमा सि । अनेन ति० → त० । 'क-ग-च-ज०' (१।१७७) इति त्लुक् । 'अव्ययस्य' (३।२।७) सिलुप् **इअ** । 'कथण् वाक्यप्रबन्धे' (१८८०) कथ । 'कथेर्वज्जर०' (४।२) कथ० → जम्प० । 'व्यञ्जना०' (४।२३९) अत् । क्तप्र० → त । 'क्ते' (३।१५६) इ । 'क-ग०' (१।१७७) त्लुक् **जम्पिअ** ।

**[ पिओ त्ति ]** प्रिय इति । 'सर्वत्र ल०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । इतेः स्वरात् तश्च द्विः' (१।४२) इतेः इलोपस्तस्य द्वित्वं च -ति० → त्ति० । **पिओ त्ति** ।

**[ पुरिसो त्ति ]** पुरुष इति । 'पुरुषे रोः' (१।१११) रु० → रि० । 'श-षोः सः' (१।२६०) ष० → स० । 'इतेः स्वरात् तश्च द्विः' (१।४२) इतेः इलोपस्तस्य द्वित्वं च-ति० → त्ति० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पुरिसो त्ति** ॥९१॥

## [1]ईर्जिह्वा-सिंह-त्रिंशद्विंशतौ त्या ॥ ८।१।९२ ॥

जिह्वादिषु इकारस्य ति-शब्देन सह ईर्भवति ॥

जीहा । सीहो । तीसा । वीसा ॥ बहुलाधिकारात् क्वचिन्न भवति - सिंहदत्तो । सिंहराओ ॥

**[ ईर्जिह्वासिंहत्रिंशद्विंशतौ त्या ]** ई प्रथमा सि । जिह्वा च सिंहश्च त्रिंशच्च विंशतिश्च = जिह्वासिंहत्रिंशद्विंशति, तस्मिन् = जिह्वासिंहत्रिंशद्विंशतौ । सप्तमी ङि । ति तृतीया टा ।

१. G. ईज्जिह्वा० ।

**[ जीहा ]** जिह्वा । 'सर्वत्र०' (२।७९) इति व्लोपः । अनेन जि० → जी० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **जीहा** ।

**[ सीहो ]** सिंह । 'मांसाऽऽदेर्वा' (१।२९) अनुस्वारलोपः । अनेन सि० → सी० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **सीहो** ।

**[ तीसा ]** त्रिंशत् । 'विंशत्यादेर्लुक्' (१।२८) अनुस्वारलुक् । 'सर्वत्र ल०' (२।७९) इति र्लुक् । अनेन ति० → ती० । 'श-षोः सः' (१।२६०) श० → स० । [1]'अन्त्यव्य०' (१।११) त्लुक् । प्रथमा सि । 'आत्' (२।४।१८) आप्प्र० → आ । 'अन्त्यव्य०' (१।११) स्लुक् **तीसा** ।

**[ वीसा ]** विंशति । 'विंशत्यादेर्लुक्' (१।२८) अनुस्वारलोपः । अनेन त्या सह इ० → ई० -वि० → वी० । 'श-षोः सः' (१।२६०) श० → स० । [2]'स्त्रियामादविद्युतः' (१।१५) स० → सा० ।('आत्' (२।४।१८) आप्प्र० → आ) । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **वीसा** ।

**[ सिंहदत्तो ]** सिंहदत्त । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सिंहदत्तो** ।

**[ सिंहराओ ]** सिंहराज । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सिंहराओ** ॥९२॥

## र्लुकि निरः ॥ ८।१।९३ ॥

निर् उपसर्गस्य रेफलोपे सति इत ईकारो भवति ॥

नीसरइ । नीसासो ॥ र्लुकीति किम् ? निण्णओ । निस्सहाइं अंगाइं ॥

**[ र्लुकि निरः ]** रो लुक् = र्लुक्, तस्मिन् = र्लुकि । सप्तमी ङि । निर् षष्ठी ङस् ।

**[ नीसरइ ]** निर्-सरति । [3]'सर्वत्र०' (२।७९) र्लुक् । अनेन नि० → नी० । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) ति० → इ० **नीसरइ** ।

**[ नीसासो ]** निर्-श्वास । [4]'सर्वत्र०' (२।७९) र्-व्लुक् । अनेन नि० → नी० । 'श-षोः सः' (१।२६०) शा० → सा० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नीसासो** ।

[5]**[ निन्नओ ]** निर्-नय । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) इति य्लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निन्नओ** ।

**[ निस्सहाइं अंगाइं ]** [6]निर्-सह । प्रथमा जस् । 'जस्-शस इँ-इं-णयः०' (३।२६) जस्स्थाने इं -दीर्घश्च । 'श-ष-से श-ष-सं वा' (१।३।६) र्० → स० **निस्सहाइं** ॥९३॥

## द्विन्योरुत् ॥ ८।१।९४ ॥

द्विशब्दे नावुपसर्गे च इत उद् भवति ॥

---

१. D. L. 'स्त्रियामादविद्युतः' (१।१५) अन्त्यतकारस्य आकारे । २. G. विद्युद्वर्जनादसंख्याशब्दस्य प्रायो विधिरिति 'स्त्रियामाद०' (१।१५) इति नाऽऽत्वं, किन्तु 'आत्' (२।४।१८) इत्याप् । ३. J. 'निर्दुरोर्वा' (१।१३) र्लुक् । ४. J. 'निर्दुरोर्वा' (१।१३) र्लुक् । ५. H. K. M. निण्णओ - निर्-णय । ६. J. निर्-सह । 'सर्वत्र ल०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) सस्य द्वित्वम् ।

द्वि-दुमत्तो । दुआई । दुविहो । दुरेहो । दुवयणं ॥

बहुलाधिकारात् क्वचिद्विकल्पः - दुउणो बिउणो । दुइओ बिइओ ॥

क्वचिन्न भवति - द्विजः → दिओ । द्विरदः → दिरओ ॥ क्वचिद् ओत्वमपि - दोवयणं ॥

नि - णुमज्जइ । णुमण्णो ॥ क्वचिन्न भवति - निवडइ ॥

**[ द्विन्योरुत् ]** द्विश्च निश्च = द्विनी, तयोः = द्विन्योः । उत् प्रथमा सि ।

**[ दुमत्तो ]** द्वे मात्रे यत्र सः = द्विमात्रः । 'सर्वत्र०' (२।७९) इति व्-र्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वं-त० → त्त० । 'ह्रस्वः संयोगे' (१।८४) मा० → म० । अनेन इ० → उ० - दि० → दु० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दुमत्तो** ।

**[ दुआई ]** द्विजाति । 'सर्वत्र०' (२।७९) व्लुक् । 'क-ग-च-ज०' (१।१७७) इति ज्लुक् । अनेन इ० → उ० - दि० → दु० । 'क-ग-च-ज०' (१।१७७) इति त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः -इ० → ई० । 'अन्त्यव्य०' (१।११) स्लुक् **दुआई** ।

**[ दुविहो ]** द्विविध । 'सर्वत्र०' (२।७९) व्लुक् । अनेन इ० → उ० -दि० → दु० । 'ख-घ-थ-ध-भाम्' (१।१८७) ध० → ह० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **दुविहो** ।

**[ दुरेहो ]** द्विरेफ । 'सर्वत्र०' (२।७९) व्लुक् । अनेन इ० → उ० -दि० → दु० । 'फो भ-हौ' (१।२३६) फ० → ह० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दुरेहो** ।

**[ दुवयणं ]** द्विवचन । 'सर्वत्र०' (२।७९) व्लुक् । अनेन इ० → उ० -दि० → दु० । 'क-ग-च-ज०' (१।१७७) इति च्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **दुवयणं** ।

**[ दुउणो बिउणो ]** द्विगुण (२) । 'सर्वत्र०' (२।७९) व्लुक् । अनेन इ० → उ० -दि० → दु० । 'क-ग-च-ज०' (१।१७७) इति ग्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दुउणो** । [1]द्वितीये० 'क-ग-ट-ड०' (२।७७) इति द्लुक् । विकल्पत्वान्न इकारस्य उकारः **बिउणो** ।

**[ दुइओ बिइओ ]** द्वितीय । 'सर्वत्र०' (२।७९) व्लुक् । 'पानीयादिष्वित्' (१।१०१) ई० → इ० । अनेन इ० → उ० - दि० → दु० । 'क-ग-च-ज०' (१।१७७) त्-य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दुइओ** । द्वितीये [2]'क-ग-ट-ड-त-द०' (२।७७) द्लुक् **बिइओ** ।

**[ दिओ ]** द्विज । 'सर्वत्र०' (२।७९) व्लुक् । 'क-ग-च-ज०' (१।१७७) इति ज्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दिओ** ।

**[ दिरओ ]** द्विरद । 'सर्वत्र०' (२।७९) व्लुक् । 'क-ग-च-ज-त-द०' (१।१७७) द्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दिरओ** ।

१. K. L. 'क-ग-च-ज०' (१।१७७) द्लुक् । २. K. 'क-ग-च-ज०' (१।१७७) द्लुक् ।

क्वचिद् ओत्वमपि- **[ दोवयणं ]** द्विवचन । 'सर्वत्र०' (२।७९) व्लुक् । 'क-ग-च-ज०' (१।१७७) च्लुक् । प्रथमा सि । 'अवर्णो०' (१।१८०) अ० → य० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । अनेन ओ० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **दोवयणं** ।

**[ णुमज्जइ ]** निपूर्व० षद्० । 'नेः सदो मज्जः' (४।१२३) षद्० → मज्ज आदेशः । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'वाऽऽदौ' (१।२२९) नस्य णः । 'त्यादीनामा०' (३।१३९) ति० → इ० । अनेन उत्वं **णुमज्जइ** ।

[1]**[ णुमण्णो ]** निमग्न । उत्वम् । 'क-ग-ट-ड०' (२।७७) इति ग्लुक् । 'वाऽऽदौ' (१।२२९) नु० → णु० । 'नो णः' (१।२२८) न० → ण० । 'अनादौ०' (२।८९) णस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **णुमण्णो** ।

**[ निवडइ ]** निपतति । 'पो वः' (१।२३१) प० → व० । 'सद-पतोर्डः' (४।२१९) त० → ड० । वर्त्त० तिव् । 'त्यादीनामा०' (३।१३९) ति० → इ० **निवडइ** ॥९४॥

## प्रवासीक्षौ ॥ ८।१।९५ ॥

अनयोरादेरित उत्वं भवति ॥ पावासुओ । उच्छू ॥

**[ प्रवासीक्षौ ]** प्रवासी च इक्षुश्च = प्रवासीक्षुस्तस्मिन् = प्रवासीक्षौ । सप्तमी ङि ।

**[ पावासुओ ]** प्रवासिन् । 'अन्त्यव्य०' (१।११) न्लुक् । 'सर्वत्र०' (२।७९) र्लुक् । 'अतः समृद्ध्यादौ वा' (१।४४) प० → पा० । अनेन सि० → सु० । 'स्वार्थे कश्च वा' (२।१६४) कप्र० । 'क-ग-च०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **पावासुओ** ।

**[ उच्छू ]** इक्षु । अनेन इ० → उ० । 'छोऽक्ष्यादौ' (२।१७) क्षस्य छः । प्रथमा सि । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'अक्लीबे सौ' (३।१९) दीर्घः - छु० → छू० । 'अन्त्यव्य०' (१।११) स्लुक् **उच्छू** ॥९५॥

## युधिष्ठिरे वा ॥ ८।१।९६ ॥

युधिष्ठिरशब्दे आदेरित उत्वं वा भवति ॥ जहुट्ठिलो जहिट्ठिलो ॥

**[ युधिष्ठिरे वा ]** युधिष्ठिर सप्तमी ङि । वा प्रथमा सि ।

**[ जहुट्ठिलो जहिट्ठिलो ]** युधिष्ठिर । 'आदेर्यो जः' (१।२४५) यु० → जु० । 'ख-घ-थ-ध-भाम्' (१।१८७) धि० → हि० । अनेन इ० → उ० -हि० → हु० । 'क-ग-ट-ड०' (२।७७) इति ष्लुक् । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'हरिद्रादो०' (१।२५४) र० → ल० । 'उतो मुकुलादिष्वत्' (१।१०७) जु० → ज० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जहुट्ठिलो** । द्वितीये उत्वं विना तथैव - **जहिट्ठिलो** ॥९६॥

## ओच्च द्विधाकृगः ॥ ८।१।९७ ॥

द्विधाशब्दे कृग्धातोः प्रयोगे इत ओत्वं चकारादुत्वं च भवति ॥

दोहा-किज्जइ दुहा-किज्जइ । दोहा-इअं दुहा-इअं ॥ कृग इति किम् ? दिहा-गयं ॥ क्वचित् केवलस्याऽपि-दुहा वि सो सुर-वहू-सत्थो ।

---

१. H. I. K. L. M. णुमन्नो ।

**[ ओच्च द्विधाकृगः ]** ओत् प्रथमा सि । च प्रथमा सि । द्विधा प्रथमा सि । कृग् षष्ठी ङस् ।

**[ दोहा-किज्जइ दुहा-किज्जइ ]** द्विधा-क्रियते । 'त्यादीनामा०' (३।१३९) ते० → इ० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्यस्य इज्ज० । [१]कृलुक् । प्रत्ययलोपे प्रत्ययलक्षणे क्रिस्थाने कृ एव । 'लोकात्' (१।१।३) कि० । 'सर्वत्र०' (२।७९) व्लुक् । 'ख-घ-थ-ध-भाम्' (१।१८७) धा० → हा० । अनेन दि० → दो० **दोहा-किज्जइ** । द्वितीये उत्वं - **दुहा-किज्जइ** ।

**[ दोहा-इअं दुहा-इअं ]** द्विधा-कृता । 'सर्वत्र०' (२।७९) व्लुक् । 'इत्कृपादौ' (१।१२८) कृ → कि० । 'क-ग-च-ज०' (१।१७७) इति क्लुक् - त्लुक् च । अनेन इ० → ओ० -दि० → दो० । 'ख-घ-थ०' (१।१८७) धा० → हा० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दोहा-इअं** । द्वितीये उत्वं-**दुहा-इअं** ।

**[ दिहा-गयं ]** द्विधा-गत । 'सर्वत्र०' (२।७९) व्लुक् । 'ख-घ-थ०' (१।१८७) धा० → हा० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दिहा-गयं** ।

**[ दुहां वि सो सुर-वहू-सत्थो ]** द्विधा-अपि । 'सर्वत्र०' (२।७९) व्लुक् । अनेन केवलस्याऽपि इ० → उ० -दि० → दु० । 'ख-घ-थ०' (१।१८७) धा० → हा० । 'पदादपेर्वा' (१।४१) अलुक् । 'पो वः' (१।२३१) पि० → वि० **दुहा वि** ।

तद् । 'अन्त्यव्य०' (१।११) द्लुक् । प्रथमा सि । 'तदश्च तः सोऽक्लीबे' (३।८६) त० → स० । 'वैतत्तदः' (३।२) सि० → डो० → ओ० **सो** ।

सुर-वधू-सार्थः' । 'ख-घ-थ०' (१।१८७) धू० → हू० । 'ह्रस्वः संयोगे' (१।८४) सा० → स० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः - त्थ । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सुर-वहू-सत्थो** ॥९७॥

## वा निर्झरे ना ॥ ८।१।९८ ॥

निर्झरशब्दे नकारेण सह इत ओकारो वा भवति ॥ ओज्झरो निज्झरो ॥

**[ वा निर्झरे ना ]** वा प्रथमा सि । निर्झर सप्तमी ङि । न् तृतीया टा ।

**[ ओज्झरो निज्झरो ]** निर्झर । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वझस्य ज० । अनेन नि० → ओ० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **ओज्झरो**। द्वितीये - **निज्झरो** ॥९८॥

## हरीतक्यामीतोऽत् ॥ ८।१।९९ ॥

हरीतकीशब्दे आदेरीकारस्य अद् भवति ॥ हरडई ॥

**[ हरीतक्यामीतोऽत् ]** हरीतकी सप्तमी ङि । ईत् षष्ठी ङस् । अत् प्रथमा सि ।

**[ हरडई ]** हरीतकी । अनेन री० → र० । 'प्रत्यादौ डः' (१।२०६) त० → ड० । 'क-ग-च-ज०' (१।१७७) इति क्लुक् । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **हरडई** ॥९९॥

---

१. G. 'लुक्' (१।१०) ऋलुक् ।

## आत्कश्मीरे ॥ ८।१।१०० ॥

कश्मीरशब्दे ईत आद् भवति ॥ कम्हारा ॥

**[ आत्कश्मीरे ]** आत् प्रथमा सि । कश्मीर सप्तमी ङि ।

**[ कम्हारा ]** कश्मीर । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) र० → रा० । अनेन श्मी० → श्मा० । 'पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः' (२।७४) श्मा० → म्हा० **कम्हारा** ॥१००॥

## पानीयाऽऽदिष्वित् ८।१।१०१॥

पानीयाऽऽदिषु शब्देषु ईत इद् भवति ॥

पाणिअं । अलिअं । जिअइ । जिअउ । विलिअं । करिसो । सिरिसो । दुइअं । तइअं । गहिरं । उवणिअं । आणिअं । [1]पलिविओ । ओसिअन्तं । पसिअ । गहिअं । वम्मिओ । तयाणिं ॥

पानीय । अलीक । जीवति । जीवतु । व्रीडित । करीष । शिरीष । द्वितीय । तृतीय । गभीर । उपनीत । आनीत । प्रदीपित । अवसीदत् । प्रसीद । गृहीत । वल्मीक । तदानीम् इति पानीयाऽऽदयः ॥

बहुलाधिकारादेषु क्वचिन्नित्यं क्वचिद्विकल्पः - तेन पाणीअं । अलीअं । जीअइ । करीसो । उवणीओ इत्यादि सिद्धम् ॥

**[ पानीयाऽऽदिष्वित् ]** पानीयाऽऽदि सप्तमी सुप् । इत् प्रथमा सि ।

**[ पाणिअं ]** पानीय । अनेन नी० → नि० । 'नो णः' (१।२२८) नि० → णि० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **पाणिअं** ।

**[ अलिअं ]** अलीक । अनेन ली० → लि० । 'क-ग-च-ज०' (१।१७७) इति क्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अलिअं** ।

**[ जिअइ ]** [2]जीवति । अनेन जी० → जि० । 'सर्वत्र०' (२।७९) व्लुक् । 'क-ग-च-ज०' (१।१७७) इति त्लुक् **जिअइ** ।

**[ जिअउ ]** [3]जीवतु । अनेन जी० → जि० । 'सर्वत्र०' (२।७९) व्लुक् । ('क-ग०' (१।१७७) व्लुक्) । 'क-ग-च-ज०' (१।१७७) इति त्लुक् **जिअउ** ।

**[ विलिअं ]** व्रीडित । 'सर्वत्र०' (२।७९) र्लुक् । अनेन वी० → वि० । 'डो लः' (१।२०२) डि० → लि० । 'क-ग-च-ज०' (१।१७७) इति त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **विलिअं** ।

**[ करिसो ]** करीष । अनेन री० → रि० । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **करिसो** ।

**[ सिरिसो ]** शिरीष । अनेन री० → रि० । 'श-षोः सः' (१।२६०) शि-ष० → सि-स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सिरिसो** ।

---

१. सर्वमुद्रितेषु पलिविअं । २. L. जीव्+अ+तिव् । ईकारस्य इकारे 'क-ग-च-ज०' (१।१७७) वकारलोपे 'त्यादी०' (३।१३९) तिव्० → इ० जिअइ । ३. L. जीव्+अ+तुव् । ईकारस्य इकारे 'क-ग-च-ज०' (१।१७७) वकारलोपे 'दु-सु-मु०' (३।१७३) तुव्० → दु० । 'क-ग-च-ज०' (१।१७७) दकारलोपे जिअउ ।

**[ दुइअं ]** द्वितीय । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) व्लुक् । 'द्विन्योरुत्' (१।९४) दि० → दु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन ई० → इ० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दुइअं** ।

**[ तइअं ]** तृतीय । 'ऋतोऽत्' (१।१२६) तृ० → त० । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन ई० → इ० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तइअं** ।

**[ गहिरं ]** गभीर । 'ख-घ-थ-ध-भाम्' (१।१८७) भी० → ही० । अनेन ई० → इ० -ही० → हि० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **गहिरं** ।

**[ उवणिअं ]** उपनीत । 'पो वः' (१।२३१) प० → व० । 'नो णः' (१।२२८) नी० → णी० । अनेन णी० → णि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **उवणिअं** ।

**[ आणिअं ]** आनीत । 'नो णः' (१।२२८) नी० → णी० । अनेन णी० → णि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **आणिअं** ।

[1]**[ पलिविओ ]** प्रदीपित । 'सर्वत्र०' (२।७९) र्लुक् । 'प्रदीपि-दोहदे लः' (१।२२१) दस्य लः । अनेन ई० → इ० -ली० → लि० । 'पो वः' (१।२३१) पि० → वि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **पलिविओ** ।

**[ ओसिअन्तं ]** 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै-ष्ठिव०' (२।३।९८) सद्, अवपूर्व० । अवसीदतीति अवसीदत् । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । अलोपः । 'श्रौति-कृवु-धिवु०' (४।२।१०८) इत्यादिना सीद आदेशः । 'शत्रानशः' (३।१८१) न्त० । 'अवाऽपोते' (१।१७२) अवस्य ओ० । अनेन सी० → सि० । 'क-ग-च-ज०' (१।१७७) इति द्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **ओसिअन्तं** ।

**[ पसिअ ]** प्रसीद । 'सर्वत्र०' (२।७९) र्लुक् । अनेन सी० → सि० । 'क-ग-च-ज०' (१।१७७) इति द्लुक् । प्रथमा सि । **पसिअ** ।

**[ गहिअं ]** गृहीत । 'ऋतोऽत्' (१।१२६) गृ० → ग० । अनेन ही० → हि० । 'क-ग-च-ज०' (१।१७७) इति त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **गहिअं** ।

**[ वम्मिओ ]** वल्मीक । 'सर्वत्र०' (२।७९) ल्लुक् । 'अनादौ०' (२।८९) मस्य द्वित्वम् । अनेन म्मी० → म्मि० । 'क-ग-च-ज०' (१।१७७) इति क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **वम्मिओ** ।

**[ तयाणिं ]** तदानीम् । 'क-ग-च-ज०' (१।१७७) इति द्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० । अनेन ई० → इ० -नी० → नि० । 'नो णः' (१।२२८) नि० → णि० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **तयाणिं** ॥१०१॥

---

१. सर्वमुद्रितेषु पलिविअं ।

## उज्जीर्णे ॥ ८।१।१०२ ॥

जीर्णशब्दे ईत उद् भवति ॥ जुण्ण-सुरा ॥ क्वचिन्न भवति - जिण्णे भोअणमत्तेओ[1] ॥

**[ उज्जीर्णे ]** उत् प्रथमा सि । जीर्ण सप्तमी ङि ।

**[ जुण्ण-सुरा ]** जीर्ण-सुरा । अनेन जी० → जु० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) णस्य द्वित्वं-ण० → ण्ण० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **जुण्णसुरा** ।

पउर[2]-जुआणो गामो महुमासो जोव्वणं पई थेरो ।

**जुण्णसुरा** साहीणा असई मा होउ किं मरउ ? ॥

**[ जिण्णे भोअणमत्तेओ ]** जिण्णे इत्यत्र इकारस्य उकारो न जातः ॥१०२॥

## ऊर्हीन-विहीने वा ॥ ८।१।१०३ ॥

अनयोरीत ऊत्वं वा भवति ॥ हूणो हीणो । विहूणो विहीणो ॥ विहीन इति किम् ? [3]पहीणजरमरणा ॥

**[ ऊर्हीनविहीने वा ]** ऊ प्रथमा सि । हीनश्च विहीनश्च = हीनविहीनम्, तस्मिन् = हीनविहीने । सप्तमी ङि । वा प्रथमा सि ।

**[ हूणो हीणो ]** हीन (२) । अनेन ही० → हू० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **हूणो हीणो** ।

**[ विहूणो विहीणो ]** विहीन (२) । अनेन ही० → हू० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विहूणो विहीणो** ।

**[ पहीणजरमरणा ]** जरा च मरणं च = जरामरणे, प्रहीणे जरामरणे येषां ते = पहीणजरमरणा । 'दीर्घ-ह्रस्वौ मिथो वृत्तौ' (१।४) इति ह्रस्वः- रा० → र० । 'सर्वत्र०' (२।७९) र्लुक् । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः-ण० → णा० **पहीणजरमरणा** ॥१०३॥

## तीर्थे हे ॥ ८।१।१०४ ॥

तीर्थशब्दे हे सति ईत ऊत्वं भवति ॥ तूहं ॥ ह इति किम् ? तित्थं ॥

**[ तीर्थे हे ]** तीर्थ सप्तमी ङि । ह सप्तमी ङि ।

---

१. J. K. L. M. भोअणमत्ते । **जिण्णे भोअणमत्तेओ** कविलो पाणिणं दया । [आव० चू०]

२. [गा० को० - २१४२ । गा० स० - २१९७ । शृ० प्र० - १०।४५३- २३।१०२ । स्व० छं० - ५।१ । स० कं० - ४।१५४]
प्रचुरयुवा[2] ग्रामो मधुमासौ यौवनं पतिः स्थविरः । जीर्णसुरा स्वाधीना असती मा भवतु किं म्रियताम् ॥

२. पाठां० - स्व० छं० - प्रचुरयुवको ।

३. एवं मए अभिथुआ विहुअरयमला **पहीणजरमरणा** । चउवीसं पि जिणवरा तित्थयरा मे पसीयन्तु ॥
[आवश्यकसूत्रे चतुर्विंशतिस्तवे गा०-५]

एवं मयाऽभिष्टुता विधूतरजोमलाः प्रहीणजरामरणाः ।
चतुर्विंशतिरपि जिनवरास्तीर्थकरा मे प्रसीदन्तु ॥

**[ तूहं ]** तीर्थ । 'सर्वत्र०' (२।७९) रलुक् । [१]'दुःख-दक्षिण-तीर्थे वा' (२।७२) थस्य हः । अनेन ती० → तू० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तूहं** ।

**[ तित्थं ]** तीर्थ । 'सर्वत्र०' (२।७९) रलुक् । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । 'ह्रस्वः संयोगे' (१।८४) ती० → ति० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तित्थं** ॥१०४॥

## एत्पीयूषाऽऽपीड-बिभीतक-कीदृशेदृशे ॥ ८।१।१०५ ॥

एषु ईत एत्वं भवति ॥ पेऊसं । आमेलो । बहेडओ । केरिसो । एरिसो ॥

**[ एत्पीयूषाऽऽपीडबिभीतककीदृशेदृशे ]** एत् प्रथमा सि । पीयूषं च [२]आपीडं च बिभीतकश्च कीदृशश्च ईदृशश्च = पीयूषाऽऽपीडबिभीतककीदृशेदृशम्, तस्मिन् = पीयूषाऽऽपीडबिभीतककीदृशेदृशे ।

**[ पेऊसं ]** पीयूष । अनेन पी० → पे० । 'क-ग-च-ज०' (१।१७७) यलुक् । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पेऊसं** ।

**[ आमेलो ]** आपीड । 'नीपा-ऽऽपीडे मो वा' (१।२३४) इति पस्य मः । 'डो लः' (१।२०२) ड० → ल० । अनेन मी० → मे० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आमेलो** ।

**[ बहेडओ ]** बिभीतक । 'पथि-पृथिवी-प्रतिश्रुन्मूषिक०' (१।१८८) बि० → ब० । 'ख-घ-थ-ध-भाम्' (१।१८७) भी० → ही० । 'प्रत्यादौ डः' (१।२०६) त० → ड० । अनेन ही० → हे० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **बहेडओ** ।

**[ केरिसो ]** कीदृश । 'दृशः क्विप्-टक्-सकः' (१।१४२) रि० । अनेन की० → के० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **केरिसो** ।

**[ एरिसो ]** ईदृश । 'दृशः क्विप्-टक्-सकः' (१।१४२) रि० । अनेन ई० → ए० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **एरिसो** ॥१०५॥

## नीड-पीठे वा ॥ ८।१।१०६ ॥

अनयोरीत एत्वं वा भवति ॥ [३]नेड्डं नीडं । पेढं पीढं ॥

**[ नीडपीठे वा ]** नीडं च पीठं च = नीडपीठम्, तस्मिन् = नीडपीठे । सप्तमी ङि । वा प्रथमा सि ।

**[ नेड्डं नीडं ]** नीड (२) । अनेन वा ई० → ए० । 'सेवाऽऽदौ वा' (२।९९) डस्य द्वित्वं-ड० → ड्ड० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **नेड्डं नीडं** ।

**[ पेढं पीढं ]** पीठ । अनेन पी० → पे० । 'ठो ढः' (१।१९९) ठ० → ढ० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पेढं पीढं** ॥१०६॥

## उतो मुकुलाऽऽदिष्वत् ॥ ८।१।१०७ ॥

मुकुल इत्येवमादिषु शब्देषु आदेरुतोऽत्वं भवति ॥

---

१. A. 'दुःख-दक्षिण-तीर्थे हे' । २. K. आपीडश्च । ३. B. C. नेड्डं नीड्डं । I. J. L. M. नेडं नीडं ।

मउलं । मउलो । मउरं । मउडं । अगरुं । गरुई । जहुट्ठिलो । जहिट्ठिलो । सोअमल्लं । गलोई ॥

मुकुल । मुकुर । मुकुट । अगुरु । गुर्वी । युधिष्ठिर । सौकुमार्य । गुडूची इति मुकुलाऽऽदयः ॥

क्वचिदाकारोऽपि - विद्रुतः → विद्दाओ ॥

**[ उतो मुकुलाऽऽदिष्वत् ]** उत् षष्ठी ङस् । मुकुल आदौ येषां ते = मुकुलाऽऽदयस्तेषु = मुकुलादिषु । सप्तमी सुप् । अत् प्रथमा सि ।

**[ मउलं मउलो ]** मुकुल उभयलिङ्गः । अनेन मु० → म० । 'क-ग-च-ज०' (१।१७७) इति क्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मउलं** । पुल्लिङ्गे - 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मउलो** ।

**[ मउरं ]** मुकुर । अनेन मु० → म० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मउरं** ।

**[ मउडं ]** मुकुट । अनेन मु० → म० । 'क-ग-च-ज०' (१।१७७) इति क्लुक् । 'टो डः' (१।१९५) ट० → ड० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मउडं** ।

**[ अगरुं ]** अगुरु । अनेन गु० → ग० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अगरुं** ।

**[ गरुई ]** गुर्वी । अनेन गु० → ग० । 'तन्वीतुल्येषु' (२।११३) वात् प्राग् उकारः । 'क-ग-च-ज०' (१।१७७) इति व्लुक् । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **गरुई** ।

**[ जहुट्ठिलो जहिट्ठिलो ]** युधिष्ठिर । 'आदेर्यो जः' (१।२४५) यु० → जु० । अनेन जु० → ज० । 'युधिष्ठिरे वा' (१।९६) वा धि० → धु० । 'ख-घ-थ-ध-भाम्' (१।१८७) धु० → हु० -धि० → हि० । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः (?) । 'क-ग-ट-ड०' (२।७७) ष्लुक् । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'हरिद्रादौ लः' (१।२५४) र० → ल० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जहुट्ठिलो जहिट्ठिलो** ।

**[ सोअमल्लं ]** सौकुमार्य । 'औत ओत्' (१।१५९) सौ० → सो० । अनेन कु० → क० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'ह्रस्वः संयोगे' (१।८४) मा० → म० । 'पर्यस्त-पर्याण-सौकुमार्ये ल्लः' (२।६८) र्यस्य ल्लः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सोअमल्लं** ।

**[ गलोई ]** गुडूची । 'ओत्कूष्माण्डी-तूणीर-कूर्पर-स्थूल-ताम्बूल-गुडूची-मूल्ये' (१।१२४) डू० → डो० । 'डो लः' (१।२०२) डो० → लो० । अनेन गु० → ग० । 'क-ग-च-ज०' (१।१७७) च्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **गलोई** ।

**[ विद्दाओ ]** विद्रुतः । 'सर्वत्र०' (२।७९) र्लुक् । क्वचिदाकारोऽपि दु० → दा० । 'अनादौ०' (२।८९) दस्य द्वित्वं-दा० → द्दा० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (१।१।११४) अलुक् **विद्दाओ** ॥१०७॥

**वोपरौ ॥ ८।१।१०८ ॥**

उपरावुतोऽद् वा भवति ॥ अवरिं उवरिं ॥

**[ वोपरौ ]** वा प्रथमा सि । उपरि सप्तमी ङि ।

**[ अवरिं उवरिं ]** उपरि । अनेन वा उ० → अ० । 'पो वः' (१।२३१) प० → व० । 'वक्रादावन्तः' (१।२६) अनुस्वारः अवरिं उवरिं ॥१०८॥

## गुरौ के वा ॥ ८।१।१०९ ॥

गुरौ स्वार्थे के सति आदेरुतोऽद् वा भवति ॥ गरुओ गुरुओ ॥ क इति किम् ? गुरू ॥

**[ गुरौ के वा ]** गुरु सप्तमी ङि । क सप्तमी ङि । वा प्रथमा सि ।

**[ गरुओ गुरुओ ]** गुरुक । गुरुरेव = गुरुकः । स्वार्थे कप्र० । अनेन वा गु० → ग० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **गरुओ गुरुओ**।

**[ गुरू ]** गुरु । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **गुरू** ॥१०९॥

## इर्भ्रुकुटौ ॥ ८।१।११० ॥

भ्रुकुटावादेरुत इर्भवति ॥ भिउडी ॥

**[ इर्भ्रुकुटौ ]** इ प्रथमा सि । भ्रुकुटी(टि) सप्तमी ङि ।

**[ भिउडी ]** [1]भ्रुकुटी(टि) । 'सर्वत्र०' (२।७९) र्लुक् । अनेन उ० → इ० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'टो डः' (१।१९५) ट० → ड० । प्रथमा सि । ['अक्लीबे सौ' (३।१९) दीर्घः - डि० → डी०] । 'अन्त्य०' (१।११) स्लुक् **भिउडी** ॥११०॥

## पुरुषे रोः ॥ ८।१।१११ ॥

पुरुषशब्दे रोरुत इत्वं भवति ॥ पुरिसो । पउरिसं ॥

**[ पुरुषे रोः ]** पुरुष सप्तमी ङि । रु षष्ठी ङस् ।

**[ पुरिसो ]** पुरुष । अनेन रु० → रि० । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **पुरिसो** ।

**[ पउरिसं ]** पौरुष । 'अउः पौराऽऽदौ च' (१।१६२) पौ० → पउ० । अनेन रु० → रि० । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पउरिसं** ॥१११॥

## [2]ईः क्षुते ॥ ८।१।११२ ॥

क्षुतशब्दे आदेरुत ईत्वं भवति ॥ छीअं ॥

**[ ईः क्षुते ]** ई प्रथमा सि । क्षुत सप्तमी ङि ।

**[ छीअं ]** क्षुत । 'छोऽक्ष्यादौ' (२।१७) क्षु० → छु० । अनेन छु० → छी० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **छीअं** ॥११२॥

## ऊत्सुभग-मुसले वा ॥ ८।१।११३ ॥

अनयोरादेरुत ऊद् वा भवति ॥ सूहवो सुहओ ॥ मूसलं मुसलं ॥

---

१. पा० म० - भृकुटि → भिउडि - भिउडी । २. D. G. ई क्षुते ।

**[ ऊत्सुभगमुसले ]** ऊत् प्रथमा सि । सुभगश्च मुसलं च = सुभगमुसलम्, तस्मिन् = सुभगमुसले । सप्तमी ङि ।

**[ वा ]** वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ सूहवो सुहओ ]** सुभग (२) । अनेन वा सु० → सू० । 'ख-घ-थ-ध-भाम्' (१।१८७) भ० → ह० । प्रथमे 'ऊत्वे दुर्भग-सुभगे वः' (१।१९२) ग० → व० । द्वितीये 'क-ग-च-ज०' (१।१७७) इति ग्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सूहवो सुहओ** ।

**[ मूसलं मुसलं ]** मुसल (२) । अनेन वा उ० → ऊ० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **मूसलं मुसलं** ॥११३॥

## अनुत्साहोच्छन्ने त्स-च्छे ॥ ८।१।११४ ॥

उत्साहोच्छन्नवर्जिते शब्दे यौ त्स-च्छौ तयोः परयोरादेरुत ऊद् भवति ॥

त्स-ऊसुओ । ऊसवो । ऊसित्तो । ऊसरइ ॥ च्छ-उद्गताः शुका यस्मात् सः ऊसुओ । ऊससइ ॥ अनुत्साहोच्छन्न इति किम् ? उच्छाहो । उच्छन्नो ॥

**[ अनुत्साहोच्छन्ने ]** उत्साहश्च उच्छन्नं च = उत्साहोच्छन्नम्, न उत्साहोच्छन्नम् = अनुत्साहोच्छन्नम्, तस्मिन् = अनुत्साहोच्छन्ने । सप्तमी ङि ।

**[ ऊसुओ ]** उत्सुक । अनेन उ० → ऊ० । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **ऊसुओ** ।

**[ ऊसवो ]** उत्सव । अनेन उ० → ऊ० । 'क-ग-ट-ड०' (२।७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **ऊसवो** ।

**[ ऊसित्तो ]** उत्सिक्त । अनेन उ० → ऊ० । 'क-ग-ट-ड०' (२।७७) इति त्लुक्-क्लुक् च । 'अनादौ०' (२।८९) तस्य द्वित्वं - त० → त्त० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् **ऊसित्तो** ।

**[ ऊसरइ ]** उत्सरति । 'क-ग-ट-ड०' (२।७७) त्लुक् । अनेन उ० → ऊ० । 'त्यादीनामाद्यत्रयस्याऽऽद्यस्येचेचौ' (३।१३९) ति० → इ० **ऊसरइ** ।

**[ ऊसुओ ]** उद्-शुक । उद्गताः शुका यस्मात् सः । 'अन्त्यव्य०' (१।११) द्लुक् । संस्कृते छस्य सिद्धत्वात् अनेन उ० → ऊ० । 'श-षोः सः' (१।२६०) शु० → सु० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **ऊसुओ** ।

**[ ऊससइ ]** उद्-श्वस्-ति । 'अन्त्यव्य०' (१।११) द्लुक् । 'सर्वत्र०' (२।७९) व्लुक् । अनेन उ० → ऊ० । 'श-षोः सः' (१।२६०) श० → स० । 'व्यञ्जनाद०' (४।२३९) अत् । 'त्यादीनामाद्यत्र०' (३।१३९) ति० → इ० **ऊससइ** ।

**[ उच्छाहो ]** उत्साह । 'ह्रस्वात् थ्य-श्च-त्स-प्सामनिश्चले' (२।२१) त्स० → छ० । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्य०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **उच्छाहो** ।

**[ उच्छन्नो ]** उत्सन्न । 'ह्रस्वात् थ्य-श्च०' (२।२१) त्स० → छ० । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **उच्छन्नो** ॥११४॥

## लुंकि दुरो वा ॥ ८।१।११५ ॥

दुर् उपसर्गस्य रेफस्य लोपे सति उत ऊत्वं वा भवति ॥

दूसहो दुसहो । दूहवो दुहवो ॥ लुंकीति किम् ? दुस्सहो विरहो ॥

**[ लुंकि दुरो वा ]** रस्य लुक् = र्लुक्, तस्मिन् = लुंकि । दुर् षष्ठी ङस् । वा प्रथमा सि ।

**[ दूसहो दुसहो ]** दुर्-सह । 'निर्दुरोर्वा' (१।१३) र्लुक् । अनेन उ० → ऊ० -दु० → दू० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **दूसहो** । द्वितीये उकार एव- **दुसहो** ।

**[ दूहवो दुहवो ]** दुर्भग । 'निर्दुरोर्वा' (१।१३) र्लुक् । अनेन उ० → ऊ० - दु० → दू० । 'ख-घ-थ-ध-भाम्' (१।१८७) भ० → ह० । 'ऊत्वे दुर्भग-सुभगे वः' (१।१९२) गस्य वः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **दूहवो** । पक्षे-उकार एव-**दुहवो** ।

**[ दुस्सहो विरहो ]** दुर्-सह । 'श-ष-से श-ष-सं वा' (१।३।६) र्० → स्० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **दुस्सहो** ॥११५॥

## ओत्संयोगे ॥ ८।१।११६ ॥

संयोगे परे आदेरुत ओत्वं भवति ॥

तोण्डं । मोण्डं । पोक्खरं । कोट्टिमं । पोत्थओ । लोद्धओ । मोत्था । मोग्गरो । पोग्गलं । कोण्ढो । कोन्तो । वोक्कन्तं ॥

**[ ओत्संयोगे ]** ओत् प्रथमा सि । संयोग सप्तमी ङि ।

**[ तोण्डं ]** तुंड । 'वर्गेऽन्त्यो वा' (१।३०) तुण्ड । अनेन तु० → तो० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **तोण्डं** ।

**[ मोण्डं ]** मुंड । 'वर्गेऽन्त्यो वा' (१।३०) मुण्ड । अनेन मु० → मो० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **मोण्डं** ।

**[ पोक्खरं ]** [1]पुष्कर । 'ष्क-स्कयोर्नाम्नि' (२।४) ष्क० → ख० । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । अनेन पु० → पो० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पोक्खरं** ।

**[ कोट्टिमं ]** कुट्टिम । अनेन कु० → को० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **कोट्टिमं** ।

**[ पोत्थओ ]** पुस्तक । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्तस्य थः । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । अनेन पु० → पो० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **पोत्थओ** ।

---

१. G. पुष्करादिषु द्वित्वप्रसङ्गे 'अनादौ०' (२।८९) सूत्रस्थाने 'तैलादौ' (२।९८) सूत्रेण द्वित्वं कृतम् ।

**[ लोद्धओ ]** लुब्धक । 'सर्वत्र ल०' (२।७९) बूलुक् । 'अनादौ०' (२।८९) धस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वधस्य दः । अनेन लु० → लो० । 'क-ग-च-ज०' (१।१७७) कूलुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **लोद्धओ** ।

**[ मोत्था ]** मुस्ता । 'स्तस्य थोऽसमस्त०' (२।४५) स्ता० → था० । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययोरुपरि पूर्वः' (२।९०) पूर्वथस्य तः । अनेन मु० → मो० । प्रथमा सि । 'अन्त्यव्य०' (१।११) सूलुक् **मोत्था** ।

**[ मोग्गरो ]** मुद्गर । 'क-ग-ट-ड०' (२।७७) दूलुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । अनेन मु० → मो० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **मोग्गरो** ।

**[ पोग्गलं ]** पुद्गल । 'क-ग-ट-ड०' (२।७७) दूलुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । अनेन पु० → पो० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **पोग्गलं** ।

**[ कोण्ढो ]** कुण्ठ । अनेन कु० → को० । 'ठो ढः' (१।१९९) ठ० → ढ० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **कोण्ढो** ।

**[ कोन्तो ]** कुन्त । अनेन कु० → को० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **कोन्तो** ।

**[ वोक्कन्तं ]** व्युत्क्रान्त । 'अधो म-न-याम्' (२।७८) यूलुक् । 'क-ग-ट०' (२।७७) तूलुक् । अनेन वु० → वो० । 'सर्वत्र०' (२।७९) रूलुक् । 'ह्रस्वः संयोगे' (१।८४) ह्रस्वः -का० → क० । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **वोक्कन्तं** ॥११६॥

## कुतूहले वा ह्रस्वश्च ॥ ८।१।११७ ॥

कुतूहलशब्दे उत ओद् वा भवति, तत्संनियोगे ह्रस्वश्च वा ॥ कोउहलं कुऊहलं कोउहल्लं ॥

**[ कुतूहले वा ह्रस्वश्च ]** कुतूहल सप्तमी ङि । वा प्रथमा सि । ह्रस्व प्रथमा सि । च प्रथमा सि ।

**[ कोउहलं कुऊहलं कोउहल्लं ]** कुतूहल । अनेन कु० → को० - तू० → तु० । 'क-ग-च-ज०' (१।१७७) तूलुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कोउहलं** । द्वितीये 'क-ग-च-ज०' (१।१७७) तूलुक् **कुऊहलं** । तृतीये अनेन कु० → को० - तू० → तु० । 'क-ग-च-ज०' (१।१७७) तूलुक् । 'सेवाऽऽदौ वा' (२।९९) लस्य द्वित्वं- ल० → ल्ल० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **कोउहल्लं** ॥११७॥

## अदूतः सूक्ष्मे वा ॥ ८।१।११८ ॥

सूक्ष्मशब्दे ऊतोऽद् वा भवति ॥ सण्हं सुण्हं ॥ आर्षे- सुहुमं ॥

**[ अदूतः सूक्ष्मे वा ]** अत् प्रथमा सि । ऊत् षष्ठी ङस् । सूक्ष्म सप्तमी ङि । वा प्रथमा सि ।

**[ सण्हं सुण्हं ]** सूक्ष्म (२) । 'सूक्ष्म-श्न-ष्ण-स्न-ह्न-ह्ण-क्ष्णां ण्हः' (२।७५) क्ष्म० → ण्ह० । अनेन वा ऊ० → अ० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **सण्हं** । द्वितीये 'ह्रस्वः संयोगे' (१।८४) सू० → सु० **सुण्हं** । आर्षे-

**[ सुहुमं ]** सूक्ष्म । 'तन्वीतुल्येषु' (२।११३) मात् प्राग् उकारः । 'ह्रस्वः संयोगे' (१।८४) सू० → सु० । 'क्षः खः क्वचित्तु०' (२।३) क्षु० → खु० । 'ख-घ-थ-ध-भाम्' (१।१८७) खु० → हु० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **सुहुमं** ॥११८॥

## दुकूले वा लश्च द्विः ॥ ८।१।११९ ॥

दुकूलशब्दे ऊकारस्य अत्वं वा भवति, तत्संनियोगे च लकारो द्विर्भवति ॥ दुअल्लं दुऊलं ॥ आर्षे-दुगुल्लं ॥

**[ दुकूले वा लश्च द्विः ]** दुकूल सप्तमी ङि । वा प्रथमा सि । ल प्रथमा सि । च प्रथमा सि । द्वि प्रथमा सि ।

**[ दुअल्लं दुऊलं ]** दुकूल । अनेन वा कू० → क० -लस्य द्वित्वं च । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **दुअल्लं** । द्वितीये 'क-ग-च-ज०' (१।१७७) क्लुक् **दुऊलं** ।

**[ दुगुल्लं ]** दुकूल । आर्षत्वादुत्वम् । 'अनादौ०' (२।८९) लस्य द्वित्वं - ल्ल० । 'अनादौ स्वरादसंयुक्तानां क-ख-त-थ-प-फां ग-घ-द-ध-ब-भाः' (४।३९६) कस्य गः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः (१।२३) अनुस्वारः **दुगुल्लं** ॥११९॥

## ईर्वोद्व्यूढे ॥ ८।१।१२० ॥

[1]उद्व्यूढशब्दस्य ऊत ईत्वं वा भवति ॥ उव्वीढं उव्वूढं ॥

**[ ईर्वोद्व्यूढे ]** ई प्रथमा सि । वा प्रथमा सि । उद्व्यूढ सप्तमी ङि ।

**[ उव्वीढं उव्वूढं ]** उद्व्यूढ (२) । 'अधो-म-न-याम्' (२।७८) यलुक् । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वं - वू० → व्वू० । अनेन वा ऊ० → ई० -व्वू० → व्वी० । प्र० सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **उव्वीढं उव्वूढं** ॥१२०॥

## उर्भ्रू-हनूमत्कण्डूय-वातूले ॥ ८।१।१२१ ॥

एषु ऊत उत्वं भवति ॥ भुमया । हणुमन्तो । कण्डुअइ । वाउलो ॥

**[ उर्भ्रूहनूमत्कण्डूयवातूले ]** उ प्रथमा सि । भ्रूश्च हनूमांश्च कण्डूयश्च वातूलश्च = भ्रूहनूमत्कण्डूयवातूलम्, तस्मिन् = भ्रूहनूमत्कण्डूयवातूले । सप्तमी ङि ।

**[ भुमया ]** भ्रू । 'भ्रुवो मया डमया' (२।१६७) मयाप्रत्ययः । 'सर्वत्र०' (२।७९) र्लुक् । अनेन भू० → भु० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **भुमया** ।

**[ हणुमन्तो ]** हनूमत् । 'आल्विल्लोल्लाल-वन्त-मन्तेत्तेर-मणा-मतोः' (२।१५९) मन्ताऽऽदेशः । 'नो णः' (१।२२८) नू० → णू० । अनेन णू० → णु० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **हणुमन्तो** ।

**[ कण्डुअइ ]** 'कण्डूग् गात्रविनामे' कण्डू । 'धातोः कण्ड्वादेर्यक्' (३।४।८) यक्प्र० → य । कण्डूयति । अनेन डू० → डु० । 'क-ग-च-ज०' (१।१७७) यलुक् । 'त्यादीनामाद्य०' (३।१३९) ति० → इ० **कण्डुअइ** ।

---

१. H. I. K. M. उद्व्यूढशब्दे ।

**[ वाउलो ]** वातूल । अनेन तू० → तु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वाउलो** ॥१२१॥

## मधूके वा ॥ ८।१।१२२ ॥

मधूकशब्दे ऊत उद् वा भवति ॥ महुयं(अं) महूयं(अं) ॥

**[ मधूके वा ]** मधूक सप्तमी ङि । वा प्रथमा सि ।

**[ महुअं महूअं ]** मधूक (२) । अनेन वा धू० → धु० । 'ख-घ-थ-ध-भाम्' (१।१८७) धु० → हु० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य०? । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **महुयं( अं ) महूयं( अं )** ॥१२२॥

## इदेतौ नूपुरे वा ॥ ८।१।१२३ ॥

नूपुरशब्दे ऊत इत् एत् इत्येतौ वा भवतः ॥ निउरं नेउरं । पक्षे-नूउरं ॥

**[ इदेतौ नूपुरे वा ]** इच्च एच्च = इदेतौ । प्रथमा औ । नूपुर सप्तमी ङि । वा प्रथमा सि ।

**[ निउरं नेउरं नूउरं ]** नूपुर (२) । अनेन प्रथमे ऊ० → इ०-नू० → नि० । द्वितीये ऊ० → ए० -नू० → ने० । 'क-ग-च-ज-त-द-प-य-वां प्रायो लुक्' (१।१७७) प्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **निउरं नेउरं** । पक्षे-**नूउरं** ॥१२३॥

## ओत्कूष्माण्डी-तूणीर-कूर्पर-स्थूल-ताम्बूल-गुडूची-मूल्ये ॥ ८।१।१२४ ॥

एषु ऊत ओद् भवति ॥ कोहण्डी कोहली । तोणीरं । कोप्परं । थोरं । तम्बोलं । गलोई । मोल्लं ॥

**[ ओत्कूष्माण्डीतूणीरकूर्परस्थूलताम्बूलगुडूचीमूल्ये ]** ओत् प्रथमा सि । कूष्माण्डी च तूणीरश्च कूर्परं च स्थूलं च ताम्बूलं च गुडूची च मूल्यं च = कूष्माण्डीतूणीरकूर्परस्थूलताम्बूलगुडूचीमूल्यम्, तस्मिन् = कूष्माण्डीतूणीरकूर्परस्थूलताम्बूलगुडूचीमूल्ये । सप्तमी ङि ।

**[ कोहण्डी कोहली ]** कूष्माण्डी (२) । 'कूष्माण्ड्यां ष्मो लस्तु ण्डो वा' (२।७३) ष्मा० → ह० - ण्ड० → ल० वा । अनेन उभयत्र ऊ० → ओ० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **कोहण्डी कोहली** ।

**[ तोणीरं ]** तूणीर । अनेन तू० → तो० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **तोणीरं** ।

**[ कोप्परं ]** कूर्पर । अनेन कू० → को० । 'सर्वत्र०' (२।७९) र्लुक् । [1]'अनादौ०' (२।८९) पस्य द्वित्वं- प० → प्प० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **कोप्परं** ।

**[ थोरं ]** स्थूल । 'क-ग-ट-ड०' (२।७७) स्लुक् । अनेन थू० → थो० । 'स्थूले लो रः' (१।२५५) ल० → र० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **थोरं** ।

**[ तम्बोलं ]** ताम्बूल । 'ह्रस्वः संयोगे' (१।८४) ता० → त० । अनेन बू० → बो० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **तम्बोलं** ।

---

१. G. 'तैलादौ' (२।९८) ।

**[ गलोई ]** गुडूची । 'उतो मुकुलाऽऽदिष्वत्' (१।१०७) गु० → ग० । 'डो लः' (१।२०२) डस्य लः । अनेन लू० → लो० । 'क-ग-च-ज०' (१।१७७) च्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **गलोई** ।

**[ मोल्लं ]** मूल्य । अनेन मू० → मो० । 'अधो म-न-याम्' (२।७८) य्लुक् । [1]'अनादौ०' (२।८९) लस्य द्वित्वं - ल० → ल्ल० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मोल्लं** ॥१२४॥

## स्थूणा-तूणे वा ॥ ८।१।१२५ ॥

अनयोरूत ओत्वं वा भवति ॥ थोणा थूणा । तोणं तूणं ॥

**[ स्थूणातूणे वा ]** स्थूणा च तूणश्च = स्थूणातूणम्, तस्मिन् = स्थूणातूणे । सप्तमी ङि । वा प्रथमा सि ।

**[ थोणा थूणा ]** स्थूणा (२) । 'क-ग-ट-ड०' (२।७७) स्लुक् । अनेन वा ऊ० → ओ० - थू० → थो० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **थोणा थूणा** ।

**[ तोणं तूणं ]** तूण । अनेन वा तू० → तो० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तोणं तूणं** ॥१२५॥

## ऋतोऽत् ॥ ८।१।१२६ ॥

आदेर्ऋकारस्य अत्वं भवति ॥

घृतम् → घयं । तृणम् → तणं । कृतम् → कयं । वृषभः → वसहो । मृगः → मओ । घृष्टः → घट्ठो । दुहाईअमिति कृपादिपाठात् ॥

**[ ऋतोऽत् ]** ऋत् षष्ठी ङस् । अत् प्रथमा सि ।

**[ घयं ]** घृत । अनेन घृ० → घ० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **घयं** ।

**[ तणं ]** तृण । अनेन तृ० → त० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तणं** ।

**[ कयं ]** कृत । अनेन कृ० → क० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **कयं** ।

**[ वसहो ]** वृषभ । अनेन वृ० → व० । 'श-षोः सः' (१।२६०) ष० → स० । 'ख-घ-थ-ध-भाम्' (१।१८७) भ० → ह० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **वसहो** ।

**[ मओ ]** मृग । अनेन मृ० → म० । 'क-ग-च-ज०' (१।१७७) ग्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **मओ** ।

**[ घट्ठो ]** घृष्ट । अनेन घृ० → घ० । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **घट्ठो** ।

---

१. G. 'सेवादौ वा' (२।९९) ।

**[ दुहाइअं ]** द्विधाकृत । 'सर्वत्र०' (२।७९) व्लुक् । 'ओच्च द्विधाकृगः' (१।९७) दि० → दु० । 'ख-घ-थ-ध-भाम्' (१।१८७) धा० → हा० । 'इत्कृपाऽऽदौ' (१।१२८) कृ० → कि० । 'क-ग-च-ज-त-द-प-य-वां०' (१।१७७) क्लुक्-त्लुक् च । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दुहाइअं** ॥१२६॥

## आत्कृशा-मृदुक-मृदुत्वे वा ॥ ८।१।१२७ ॥

एषु आदेर्ऋत आद् वा भवति ॥ कासा किसा । माउक्कं मउअं । माउक्कं मउत्तणं ॥

**[ आत्कृशामृदुकमृदुत्वे वा ]** आत् प्रथमा सि । कृशा च मृदुकं च मृदुत्वं च = कृशामृदुकमृदुत्वम्, तस्मिन् = कृशामृदुकमृदुत्वे । सप्तमी ङि । वा प्रथमा सि ।

**[ कासा किसा ]** कृशा (२) । अनेन वा कृ० → का० । 'श-षोः सः' (१।२६०) शा० → सा० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **कासा** । द्वितीये 'इत्कृपाऽऽदौ' (१।१२८) कृ० → कि० । 'श-षोः सः' (१।२६०) शा० → सा० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **किसा** ।

**[ माउक्कं मउअं ]** मृदुक (२) । अनेन वा मृ० → मा० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'सेवाऽऽदौ वा' (२।९९) कस्य द्वित्वं-क० → क्क० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **माउक्कं** । द्वितीये 'ऋतोऽत्' (१।१२६) मृ० → म० । 'क-ग-च-ज०' (१।१७७) द्लुक् - क्लुक् च । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मउअं** ।

**[ माउक्कं मउत्तणं ]** मृदुत्व (२) । अनेन वा मृ० → मा० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'शक्त-मुक्त-दष्ट-रुग्ण-मृदुत्वे को वा' (२।२) त्वस्य क० । 'अनादौ०' (२।८९) कस्य द्वित्वं- क० → क्क० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **माउक्कं** । द्वितीये 'ऋतोऽत्' (१।१२६) मृ० → म० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'त्वस्य डिमा-त्तणौ वा' (२।१५४) इति त्वस्य त्तणाऽऽदेशः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मउत्तणं** ॥१२७॥

## इत्कृपाऽऽदौ ॥ ८।१।१२८ ॥

कृपा इत्यादिषु शब्देषु आदेर्ऋत इत्वं भवति ॥

किवा । [1]हिअयं । मिट्ठं रसे एव, अन्यत्र-मट्ठं । दिट्ठं । दिट्ठी । सिट्ठं । सिट्ठी ॥ गिंठी । पिच्छी । भिऊ । भिङ्गो । भिङ्गारो । सिङ्गारो । सिआलो । घिणा । घुसिणं । विद्धकई । समिद्धी । [2]इड्ढी । गिद्धी । [3]विद्धी । किसो । किसाणू । किसरा । किच्छं । तिप्पं । किसिओ । निवो । किच्चा । किई । धिई । किवो । [4]किवणो । किवाणं । विञ्चुओ । वित्तं । वित्ती । हिअं । वाहित्तं । बिंहिओ । विसी । इसी । विइण्हो । छिहा । सइ । उक्किट्ठं ॥ क्वचिन्न भवति - रिद्धी ॥

कृपा । हृदय । मृष्ट । दृष्ट । दृष्टि । सृष्ट । सृष्टि । गृष्टि । पृथ्वी । भृगु । भृङ्ग । भृङ्गार । शृङ्गार । शृगाल । घृणा । घुसृण । वृद्धकवि । समृद्धि । ऋद्धि । गृद्धि । वृद्धि । कृश । कृशानु । कृसरा । कृच्छ्र । तृप्र । कृषित । नृप । कृत्या । कृति । धृति । कृप । कृपण । कृपाण । वृश्चिक । वृत्त । वृत्ति । हृत । व्याहृत । बृंहित । वृसी । ऋषि । वितृष्ण । स्पृहा । सकृत् । उत्कृष्ट ॥

**[ इत्कृपाऽऽदौ ]** इत् प्रथमा सि । कृपाऽऽदि सप्तमी ङि ।

---

१. I. J. M. हिययं २. H. L. M. इद्धी । पा० म० - ऋद्धि → इड्ढी - रिद्धी - इद्धी । ३. A. विद्धी उदाहरणम् । ४. H. I. J. L. M. किविणो । पा० म० - कृपण → किवण - किविण ।

**[ किवा ]** कृपा । अनेन कृ० → कि० । 'पो वः' (१।२३१) पस्य वः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **किवा** ।

**[ हिअयं ]** हृदय । अनेन हृ० → हि० । 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **हिअयं** ।

**[ मिट्ठं रसे एव, अन्यत्र मट्ठं ]** मृष्ट । अनेन मृ० → मि० । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **मिट्ठं** । मृष्ट । 'ऋतोऽत्' (१।१२६) मृ० → म० । शेषं पूर्ववत् । **मट्ठं** ।

**[ दिट्ठं ]** दृष्ट । अनेन दृ० → दि० । 'ष्टस्याऽनुष्ट्रेष्टा०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दिट्ठं** ।

**[ दिट्ठी ]** दृष्टि । अनेन दृ० → दि० । 'ष्टस्याऽनुष्ट्रेष्टा०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **दिट्ठी** ।

**[ सिट्ठं ]** सृष्ट । अनेन सृ० → सि० । शेषं 'दिट्ठं' वत् ।

**[ सिट्ठी ]** सृष्टि । अनेन सृ० → सि० । शेषं 'दिट्ठी' वत् ।

**[ गिंठी ]** गृष्टि । अनेन गृ० → गि० । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् । 'वक्रादावन्तः' (१।२६) अनुस्वारः **गिंठी** ।

**[ पिच्छी ]** पृथ्वी । अनेन पृ० → पि० । 'त्व-थ्व-द्व-ध्वां च-छ-ज-झाः क्वचित्' (२।१५) इति थ्वीस्थाने छी० । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **पिच्छी** ।

**[ भिऊ ]** भृगु । अनेन भृ० → भि० । 'क-ग-च-ज०' (१।१७७) ग्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **भिऊ** ।

**[ भिङ्गो ]** भृङ्ग । अनेन भृ० → भि० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भिङ्गो** ।

**[ भिङ्गारो ]** भृङ्गार । अनेन भृ० → भि० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भिङ्गारो**।

**[ सिङ्गारो ]** शृङ्गार । अनेन शृ० → शि० । 'श-षोः सः' (१।२६०) शि० → सि० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **सिङ्गारो** ।

**[ सिआलो ]** शृगाल । अनेन शृ० → शि० । 'श-षोः सः' (१।२६०) शि० → सि० । 'क-ग-च-ज०' (१।१७७) ग्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सिआलो** ।

**[ घिणा ]** घृणा । अनेन घृ० → घि० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **घिणा** ।

**[ घुसिणं ]** घुसृण । अनेन सृ० → सि० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **घुसिणं** ।

**[ विद्धकई ]** वृद्धकवि । अनेन वृ० → वि० । 'क-ग-च-ज०' (१।१७७) व्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - इ० → ई० । 'अन्त्यव्य०' (१।११) स्लुक् **विद्धकई** ।

**[ समिद्धी ]** समृद्धि । अनेन मृ० → मि० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **समिद्धी** ।

**[ इड्ढी ]** ऋद्धि । अनेन ऋ० → इ० । 'श्रद्धर्द्धि-मूर्धा-ऽर्धेऽन्ते वा' (२।४१) द्धि० → ढि० । 'अनादौ०' (२।८९) ढस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वढस्य डः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **इड्ढी** ।

**[ गिद्धी ]** गृद्धि । अनेन गृ० → गि० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **गिद्धी** ।

**[ विद्धी ]** वृद्धि । अनेन वृ० → वि० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **विद्धी** ।

**[ किसो ]** कृश । अनेन कृ० → कि० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **किसो** ।

**[ किसाणू ]** कृशानु । अनेन कृ० → कि० । 'श-षोः सः' (१।२६०) शा० → सा० । 'नो णः' (१।२२८) नु० → णु० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः-णु० → णू० । 'अन्त्यव्य०' (१।११) स्लुक् **किसाणू** ।

**[ किसरा ]** कृशरा । अनेन कृ० → कि० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **किसरा** ।

**[ किच्छं ]** कृच्छ्र । अनेन कृ० → कि० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **किच्छं**।

**[ तिप्पं ]** तृप्र । अनेन तृ० → ति० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) पस्य द्वित्वं-प० → प्प० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तिप्पं** ।

**[ किसिओ ]** कृषित । अनेन कृ० → कि० । 'श-षोः सः' (१।२६०) षि० → सि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **किसिओ** ।

**[ निवो ]** नृप । अनेन नृ० → नि० । 'पो वः' (१।२३१) प० → व० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निवो** ।

**[ किच्चा ]** कृत्या । अनेन कृ० → कि० । 'त्योऽचैत्ये' (२।१३) त्यस्य चः । 'अनादौ०' (२।८९) चस्य द्वित्वम् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **किच्चा** ।

**[ किई ]** कृति । अनेन कृ० → कि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः -इ० → ई० । 'अन्त्यव्य०' (१।११) स्लुक् **किई** ।

**[ धिई ]** धृति । अनेन धृ० → धि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः -इ० → ई० । 'अन्त्यव्य०' (१।११) स्लुक् **धिई** ।

**[ किवो ]** कृप । अनेन कृ० → कि० । 'पो वः' (१।२३१) प० → व० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **किवो** ।

**[ किवणो ]** कृपण । अनेन कृ० → कि० । 'पो वः' (१।२३१) प० → व० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **किवणो** ।

**[ किवाणं ]** कृपाण । अनेन कृ० → कि० । 'पो वः' (१।२३१) पा० → वा० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **किवाणं** ।

**[ विञ्चुओ ]** वृश्चिक । अनेन वृ० → वि० । 'वृश्चिके श्चेर्ञ्चुर्वा' (२।१६) श्चि० → ञ्चु० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **विञ्चुओ** ।

**[ वित्तं ]** वृत्त । अनेन वृ० → वि० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **वित्तं** ।

**[ वित्ती ]** वृत्ति । अनेन वृ० → वि० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - त्ति० → त्ती० । 'अन्त्यव्य०' (१।११) स्लुक् **वित्ती** ।

**[ हिअं ]** हृत । अनेन हृ० → हि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः (१।२३) अनुस्वारः **हिअं** ।

**[ वाहित्तं ]** व्याहृत । 'अधो म-न-याम्' (२।७८) य्लुक् । अनेन हृ० → हि० । प्रथमा सि । 'सेवादौ वा' (२।९९) तस्य द्वित्वम् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वाहित्तं** ।

**[ बिंहिओ ]** बृंहित । अनेन बृं० → बिं० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **बिंहिओ** ।

**[ विसी ]** वृसी । अनेन वृ० → वि० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **विसी** ।

**[ इसी ]** ऋषि । अनेन ऋ० → इ० । 'श-षोः सः' (१।२६०) षि० → सि० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः-सि० → सी० । 'अन्त्यव्य०' (१।११) स्लुक् **इसी** ।

**[ विइण्हो ]** वितृष्ण । अनेन तृ० → ति० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'सूक्ष्म-श्न-ष्ण-स्न-ह्न-ह्ण-क्ष्णां ण्हः' (२।७५) ष्ण० → ण्ह० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **विइण्हो** ।

**[ छिहा ]** स्पृहा । अनेन स्पृ० → स्पि० । 'स्पृहायाम्' (२।२३) स्पि० → छि० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **छिहा** ।

**[ सइ ]** सकृत् । अनेन कृ० → कि० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अन्त्यव्य०' (१।११) त्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सइ** ।

**[ उक्किट्ठं ]** उत्कृष्ट । अनेन कृ० → कि० । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वं-कि० → क्कि० । 'ष्टस्या०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययोरुपरि पूर्वः' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **उक्किट्ठं** ।

**[ रिद्धी ]** ऋद्धि । 'रिः केवलस्य' (१।१४०) ऋ० → रि० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - द्धि० → द्धी० । 'अन्त्यव्य०' (१।११) स्लुक् **रिद्धी** ॥१२८॥

## पृष्ठे वाऽनुत्तरपदे ॥ ८।१।१२९ ॥

पृष्ठशब्देऽनुत्तरपदे ऋत इद् भवति वा ॥

पिट्ठी पट्ठी ॥ पिट्ठिपरिट्ठविअं ॥ अनुत्तरपद इति किम् ? महिवट्ठं ॥

**[ पृष्ठे वाऽनुत्तरपदे ]** पृष्ठ सप्तमी ङि । वा प्रथमा सि । उत्तरं च तत् पदं च = उत्तरपदम् । न उत्तरपदम् = अनुत्तरपदम्, तस्मिन् = अनुत्तरपदे । सप्तमी ङि ।

**[ पिट्ठी पट्ठी ]** पृष्ठ (२) । अनेन वा पृ० → पि० । द्वितीये 'ऋतोऽत्' (१।१२६) पृ० → प० । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'इः स्वप्नादौ' (१।४६) ट्ठ० → ट्ठि० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः -ट्ठि० → ट्ठी० । 'अन्त्य०' (१।११) स्लुक् **पिट्ठी पट्ठी** ।

**[ पिट्ठिपरिट्ठविअं ]** पृष्ठपरिस्थापित । 'स्थष्ठा०' (४।१६) स्था० → ठा० । 'वाऽव्ययो०' (१।६७) ठा० → ठ० । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्य०' (२।९०) पूर्वठस्य टः । 'पो वः' (१।२३१) पि० → वि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पिट्ठिपरिट्ठविअं** ।

**[ महिवट्ठं ]** मही-पृष्ठ । 'दीर्घ-ह्रस्वौ०' (१।४) ही० → हि० । 'ऋतोऽत्' (१।१२६) पृ० → प० । 'पो वः' (१।२३१) प० → व० । 'ष्टस्या०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **महिवट्ठं** ॥१२९॥

## मसृण-मृगाङ्क-मृत्यु-शृङ्ग-धृष्टे वा ॥ ८।१।१३० ॥

एषु ऋत इद् वा भवति ॥ मसिणं मसणं । मिअङ्को मयङ्को । मिच्चू मच्चू । सिङ्गं सङ्गं । धिट्ठो धट्ठो ॥

**[ मसृणमृगाङ्कमृत्युशृङ्गधृष्टे ]** मसृणं च मृगाङ्कश्च मृत्युश्च शृङ्गश्च धृष्टश्च = मसृणमृगाङ्कमृत्युशृङ्गधृष्टम्, तस्मिन् = मसृणमृगाङ्कमृत्युशृङ्गधृष्टे । सप्तमी ङि ।

**[ मसिणं मसणं ]** मसृण (२) । अनेन सृ० → सि० । द्वितीये 'ऋतोऽत्' (१।१२६) सृ० → स० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **मसिणं मसणं** ।

**[ मिअङ्को मयङ्को ]** मृगाङ्क (२) । अनेन वा मृ० → मि० । 'ह्रस्वः संयोगे' (१।८४) गा० → ग० । 'क-ग-च-ज०' (१।१७७) ग्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **मिअङ्को** । द्वितीये 'ऋतोऽत्' (१।१२६) मृ० → म० । 'ह्रस्वः संयोगे' (१।८४) गा० → ग० । 'क-ग-च-ज०' (१।१७७) ग्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **मयङ्को** ।

**[ मिच्चू मच्चू ]** मृत्यु (२) । अनेन वा मृ० → मि० । द्वितीये 'ऋतोऽत्' (१।१२६) मृ० → म० । 'त्योऽचैत्ये' (२।१३) त्यस्य च० । 'अनादौ०' (२।८९) चस्य द्वित्वम् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः-च्चु० → च्चू० । 'अन्त्यव्य०' (१।११) स्लुक् **मिच्चू मच्चू** ।

**[ सिङ्गं सङ्गं ]** शृङ्ग (२)। अनेन वा शृ० → शि०। द्वितीये 'ऋतोऽत्' (१।१२६) शृ० → श०। 'श-षोः सः' (१।२६०) शि० → सि० - श० → स०। प्रथमा सि। 'क्लीबे०' (३।२५) सि० → म्०। 'मोऽनुस्वारः' (१।२३) अनुस्वारः **सिङ्गं सङ्गं**।

**[ धिट्ठो धट्ठो ]** धृष्ट। अनेन वा धृ० → धि०। द्वितीये 'ऋतोऽत्' (१।१२६) धृ० → ध०। 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः। 'अनादौ०' (२।८९) ठस्य द्वित्वम्। 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः। प्रथमा सि। 'अतः सेर्डोः' (३।२) सि० → डो० → ओ०। 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् **धिट्ठो धट्ठो** ॥१३०॥

## उदृत्वादौ ॥ ८।१।१३१ ॥

ऋतु इत्यादिषु शब्देषु आदेर्ऋत उद् भवति ॥

उऊ। परामुट्ठो। पुट्ठो। पउट्ठो। पुहई। पउत्ती। पाउसो। पाउओ। भुई। पहुडि। पाहुडं। परहुओ। निहुअं। निउअं। विउअं। संवुअं। वुत्तन्तो। निव्वुअं। निव्वुई। वुन्दं। वुन्दावणो। वुड्ढो। वुड्ढी। उसहो। मुणालं। उज्जू। जामाउओ। माउओ। माउआ। भाउओ। पिउओ। पुहुवी ॥

ऋतु। परामृष्ट। स्पृष्ट। प्रवृष्ट। पृथिवी। प्रवृत्ति। प्रावृष्। प्रावृत। भृति। प्रभृति। प्राभृत। परभृत। निभृत। निवृत। विवृत। संवृत। वृत्तान्त। निर्वृत। निर्वृति। वृन्द। वृन्दावन। वृद्ध। वृद्धि। ऋषभ। मृणाल। ऋजु। जामातृक। मातृक। मातृका। भ्रातृक। पितृक। पृथ्वी ॥

**[ उदृत्वादौ ]** उत् प्रथमा सि। ऋत्वादि सप्तमी ङि।

**[ उऊ ]** ऋतु। प्रथमा सि। अनेन ऋ० → उ०। 'क-ग-च-ज०' (१।१७७) त्लुक्। 'अक्लीबे सौ' (३।१९) दीर्घः - उ० → ऊ०। 'अन्त्यव्य०' (१।११) स्लुक् **उऊ**।

**[ परामुट्ठो ]** परामृष्ट। अनेन मृ० → मु०। 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः। 'अनादौ०' (२।८९) ठस्य द्वित्वम्। 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः। प्रथमा सि। 'अतः सेर्डोः' (३।२) सि० → डो० → ओ०। 'डित्यन्त्य०'(२।१।११४) अलुक् **परामुट्ठो**।

**[ पुट्ठो ]** स्पृष्ट। अनेन स्पृ० → स्पु०। 'क-ग-ट-ड०' (२।७७) स्लुक्। 'ष्टस्याऽनुष्ट्रेष्टा०' (२।३४) ष्टस्य ठः। 'अनादौ०' (२।८९) ठस्य द्वित्वम्। 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः। प्रथमा सि। 'अतः सेर्डोः' (३।२) सि० → डो० → ओ०। 'डित्यन्त्य०' (२।१।११४) अलुक् **पुट्ठो**।

**[ पउट्ठो ]** प्रवृष्ट। अनेन वृ० → वु०। 'सर्वत्र०' (२।७९) र्लुक्। 'क-ग-च-ज०' (१।१७७) व्लुक्। 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः। 'अनादौ०' (२।८९) ठस्य द्वित्वम्। 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः। प्रथमा सि। 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पउट्ठो**।

**[ पुहई ]** पृथिवी। अनेन पृ० → पु०। 'पथि-पृथिवी-प्रतिश्रुन्मूषिक-हरिद्रा-बिभीतकेष्वत्' (१।८८) थि० → थ०। 'ख-घ-थ-ध-भाम्' (१।१८७) थ० → ह०। 'क-ग-च-ज०' (१।१७७) व्लुक्। प्रथमा सि। 'अन्त्यव्य०' (१।११) स्लुक् **पुहई**।

**[ पउत्ती ]** प्रवृत्ति। अनेन वृ० → वु०। 'क-ग-च-ज०' (१।१७७) व्लुक्। 'सर्वत्र०' (२।७९) र्लुक्। प्रथमा सि। 'अक्लीबे सौ' (३।१९) दीर्घः- त्ति० → त्ती०। 'अन्त्यव्य०' (१।११) स्लुक् **पउत्ती**।

**[ पाउसो ]** प्रावृष् । अनेन वृ० → वु० । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) व्लुक् । 'दिक्-प्रावृषोः सः' (१।१९) ष० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **पाउसो** ।

**[ पाउओ ]** प्रावृत । अनेन वृ० → वु० । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) व्लुक् - त्लुक् च । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **पाउओ** ।

**[ भुई ]** भृति । प्रथमा सि । अनेन भृ० → भु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अक्लीबे सौ' (३।१९) दीर्घः - इ० → ई० । 'अन्त्यव्य०' (१।११) स्लुक् **भुई** ।

**[ पहुडि ]** प्रभृति । अनेन भृ० → भु० । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'ख-घ-थ०' (१।१८७) भु० → हु० । 'प्रत्यादौ डः' (१।२०६) ति० → डि० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **पहुडि** ।

**[ पाहुडं ]** प्राभृत । 'सर्वत्र ल०' (२।७९) र्लुक् । अनेन भृ० → भु० । 'ख-घ-थ०' (१।१८७) भु० → हु० । 'प्रत्यादौ डः' (१।२०६) त० → ड० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **पाहुडं** ।

**[ परहुओ ]** परभृत । अनेन भृ० → भु० । 'ख-घ-थ०' (१।१८७) भु० → हु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० -> डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **परहुओ** ।

**[ निहुअं ]** निभृत । अनेन भृ० → भु० । 'ख-घ-थ०' (१।१८७) भु० → हु० । 'क-ग-च-ज०' (१।१७७) त्लुक्। प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **निहुअं** ।

**[ निउअं ]** निवृत । अनेन वृ० → वु० । 'क-ग-च-ज०' (१।१७७) व-तयोर्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **निउअं** ।

**[ विउअं ]** विवृत । अनेन वृ० → वु० । 'क-ग-च-ज०' (१।१७७) व-तयोर्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **विउअं** ।

**[ संवुअं ]** संवृत । अनेन वृ० → वु० । 'क-ग-च-ज०' (१।१७७) व-तयोर्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **संवुअं** ।

**[ वुत्तन्तो ]** वृत्तान्त । अनेन वृ० → वु० । 'ह्रस्वः संयोगे' (१।८४) त्ता० → त्त० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **वुत्तन्तो** ।

**[ निव्वुअं ]** निर्वृत । अनेन वृ० → वु० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वुस्य द्वित्वं-वु० → व्वु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **निव्वुअं** ।

**[ निव्वुई ]** निर्वृति । अनेन वृ० → वु० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वुस्य द्वित्वं-वु० → व्वु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः-इ० → ई० । 'अन्त्यव्य०' (१।११) स्लुक् **निव्वुई** ।

**[ वुन्दं ]** वृन्द । अनेन वृ० → वु० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **वुन्दं** ।

**[ वुन्दावणो ]** वृन्दावन । अनेन वृ० → वु० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् **वुन्दावणो** ।

**[ वुड्ढो ]** वृद्ध । अनेन वृ० → वु० । 'दग्ध-विदग्ध-वृद्धि-वृद्धे ढः' (२।४०) द्धस्य ढः । 'अनादौ०' (२।८९) ढस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वढस्य डः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **वुड्ढो** ।

**[ वुड्ढी ]** वृद्धि । अनेन वृ० → वु० । 'दग्ध-विदग्ध-वृद्धि-वृद्धे ढः' (२।४०) द्धस्य ढः । 'अनादौ०' (२।८९) ढस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वढस्य डः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - ढि० → ढी० । 'अन्त्यव्य०' (१।११) स्लुक् **वुड्ढी** ।

**[ उसहो ]** वृषभ । अनेन वृ० → वु० । 'क-ग-च-ज०' (१।१७७) व्लुक् । 'श-षोः सः' (१।२६०) ष० → स० । 'ख-घ-थ-ध-भाम्' (१।१८७) भ० → ह० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **उसहो** ।

**[ मुणालं ]** मृणाल । अनेन मृ० → मु० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **मुणालं** ।

**[ उज्जू ]** ऋजु । अनेन ऋ० → उ० । [1]'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः -ज्जु० → ज्जू० । 'अन्त्यव्य०' (१।११) स्लुक् **उज्जू** ।

**[ जामाउओ ]** जामातृक । अनेन तृ० → तु० । 'क-ग-च-ज०' (१।१७७) त-कयोर्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **जामाउओ** ।

**[ माउओ ]** मातृक । अनेन तृ० → तु० । 'क-ग-च-ज०' (१।१७७) त-कयोर्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **माउओ** ।

**[ माउआ ]** मातृका । अनेन तृ० → तु० । 'क-ग-च-ज०' (१।१७७) त-कयोर्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **माउआ** ।

**[ भाउओ ]** भ्रातृक । 'सर्वत्र०' (२।७९) र्लुक् । अनेन तृ० → तु० । 'क-ग-च-ज०' (१।१७७) त-कयोर्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **भाउओ** ।

**[ पिउओ ]** पितृक । अनेन तृ० → तु० । 'क-ग-च-ज०' (१।१७७) त-कयोर्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **पिउओ** ।

**[ पुहुवी ]** पृथ्वी । अनेन पृ० → पु० । 'तन्वीतुल्येषु' (२।११३) इति वात् प्राग् उकारः । 'ख-घ-थ-ध-भाम्' (१।१८७) थु० → हु० । प्रथमा सि । 'अन्त्यव्यञ्ज०' (१।११) स्लुक् **पुहुवी** ॥१३१॥

## निवृत्त-वृन्दारके वा ॥ ८।१।१३२ ॥

अनयोर्ऋत उद् वा भवति ॥ निवुत्तं निअत्तं । वुन्दारया वन्दारया ॥

**[ निवृत्तवृन्दारके वा ]** निवृत्तं च [2]वृन्दारकश्च = निवृत्तवृन्दारकम्, तस्मिन् = निवृत्तवृन्दारके । सप्तमी ङि । वा प्रथमा सि ।

---

१. G. 'तैलादौ' (२।९८) । २. A. वृन्दारकं च ।

**[ निवुत्तं निअत्तं ]** निवृत्त । अनेन वा वृ० → वु० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **निवुत्तं** । द्वितीये । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'क-ग-च-ज०' (१।१७७) वृलुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **निअत्तं** ।

**[ वुन्दारया वन्दारया ]** वृन्दारक (२) । अनेन वा वृ० → वु० । 'ऋतोऽत्' (१।१२६) वृ० → व० इति द्वितीये । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः- य० → या० **वुन्दारया वन्दारया** ॥१३२॥

## वृषभे वा वा ॥ ८।१।१३३ ॥

वृषभे ऋतो वेन सह उद् वा भवति ॥ उसहो वसहो ॥

**[ वृषभे वा वा ]** वृषभ सप्तमी ङि । व् तृतीया टा । वा प्रथमा सि ।

**[ उसहो वसहो ]** वृषभ । अनेन वा वकारेण सह ऋ० → उ० । 'श-षोः सः' (१।२६०) ष० → स० । 'ख-घ०' (१।१८७) भ० → ह० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् उसहो । द्वितीये 'ऋतोऽत्' (१।१२६) वृ० → व० । शेषं पूर्ववत् । **वसहो** ॥१३३॥

## गौणाऽन्त्यस्य ॥ ८।१।१३४ ॥

गौणपद(शब्द)स्य योऽन्त्य ऋत् तस्य उद् भवति ॥

माउमण्डलं । माउहरं । पिउहरं । माउसिआ । पिउसिआ । पिउवणं । पिउवई ॥

**[ गौणाऽन्त्यस्य ]** गौणस्य अन्त्यः = गौणाऽन्त्यस्तस्य = गौणाऽन्त्यस्य । षष्ठी ङस् ।

**[ माउमण्डलं ]** मातृ-मण्डल । मातृणां मण्डलं = मातृमण्डलम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन ऋ० → उ० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **माउमण्डलं** ।

**[ माउहरं ]** मातृ-गृह । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन ऋ० → उ० । 'गृहस्य घरोऽपतौ' (२।१४४) इति गृह० → घर० आदेशः । 'ख-घ-थ-ध-भाम्' (१।१८७) घ० → ह० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **माउहरं** ।

**[ पिउहरं ]** पितृ-गृह । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन ऋ० → उ० । 'गृहस्य घरोऽपतौ' (२।१४४) इति गृह० → घर० आदेशः । 'ख-घ-थ०' (१।१८७) घ० → ह० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **पिउहरं** ।

**[ माउसिआ ]** मातृ-स्वसृ । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन ऋ० → उ० । 'मातृ-पितुः स्वसुः सिआ-छौ' (२।१४२) इति स्वसृ० → सिआ० आदेशः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **माउसिआ** ।

**[ पिउसिआ ]** पितृ-स्वसृ । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन ऋ० → उ० । 'मातृ-पितुः०' (२।१४२) इति स्वसृ० → सिआ० आदेशः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **पिउसिआ** ।

**[ पिउवणं ]** पितृ-वन । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन ऋ० → उ० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **पिउवणं** ।

**[ पिउवई ]** पितृ-पति । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन ऋ० → उ० । 'पो वः' (१।२३१) पस्य वः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - इ० → ई० । 'अन्त्यव्य०' (१।११) स्लुक् **पिउवई** ॥१३४॥

## मातुरिद्वा ॥ ८।१।१३५ ॥

मातृशब्दस्य गौणस्य योऽन्त्य ऋतः तस्य इद् वा भवति ॥ माइहरं । माउहरं ॥ क्वचिदगौणस्यापि-माईण ॥

**[ मातुरिद्वा ]** मातृ षष्ठी ङस् । इत् प्रथमा सि । वा प्रथमा सि ।

**[ माइहरं माउहरं ]** मातृ-गृह (२) । अनेन वा ऋ० → इ० । पक्षे-'गौणाऽन्त्य०' (१।१३४) ऋ० → उ० । 'गृहस्य घरोऽपतौ' (२।१४४) गृहस्य घर० । 'ख-घ-थ-ध-भाम्' (१।१८७) घ० → ह० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **माइहरं माउहरं** ।

**[ माईण ]** मातृ । षष्ठी आम् । 'क-ग-ट-ड०' (२।७७) त्लुक् । ('क-ग-च-ज०' (१।१७७) त्लुक्) । अनेन ऋ० → इ० । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि-त्तो-दो-द्वामि-दीर्घः' (३।१२) इ० → ई० **माईण** ॥१३५॥

## उदूदोन्मृषि ॥ ८।१।१३६ ॥

मृषाशब्दे ऋत उत्-ऊत्-ओच्च भवन्ति ॥ मुसा । मूसा । मोसा । मुसावाओ । मूसावाओ । मोसावाओ ॥

**[ उदूदोन्मृषि ]** उच्च ऊच्च ओच्च = उदूदोत् । प्रथमा जस् । 'अव्ययस्य' (३।२।७) जस्लुप् । मृष् सप्तमी ङि ।

**[ मुसा मूसा मोसा ]** मृषा (३) । अनेन प्रथमे ऋ० → उ० । द्वितीये ऋ० → ऊ० । तृतीये ऋ० → ओ० । 'श-षोः सः' (१।२६०) षा० → सा० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **मुसा मूसा मोसा** ।

**[ मुसावाओ मूसावाओ मोसावाओ ]** मृषावाद । अनेन प्रथमे ऋ० → उ० । द्वितीये ऋ० → ऊ० । तृतीये ऋ० → ओ० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'श-षोः सः' (१।२६०) षा० → सा० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **मुसावाओ मूसावाओ मोसावाओ** ॥१३६॥

## इदुतौ वृष्ट-वृष्टि-पृथक्-मृदङ्ग-नप्तृके ॥ ८।१।१३७ ॥

एषु ऋत इकारोकारौ भवतः ॥ विट्ठो वुट्ठो । विट्ठी वुट्ठी । पिहं पुहं । मिइङ्गो मुइङ्गो । नत्तिओ नत्तुओ ॥

**[ इदुतौ ]** इच्च उच्च = इदुतौ । प्रथमा औ ।

**[ वृष्टवृष्टिपृथक्मृदङ्गनप्तृके ]** वृष्टश्च वृष्टिश्च पृथक् च मृदङ्गश्च नप्तृकश्च = वृष्टवृष्टिपृथक्मृदङ्गनप्तृकम्, तस्मिन् = वृष्टवृष्टिपृथक्मृदङ्गनप्तृके । सप्तमी ङि ।

**[ विट्ठो वुट्ठो ]** वृष्ट (२) । अनेन प्रथमे वृ० → वि० । द्वितीये वृ० → वु० । 'ष्टस्याऽनुष्ट्रेष्टा०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **विट्ठो वुट्ठो** ।

**[ विट्ठी वुट्ठी ]** वृष्टि (२) । अनेन प्रथमे वृ० → वि० । द्वितीये वृ० → वु० । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः-ट्ठि० → ट्ठी० । 'अन्त्यव्य०' (१।११) स्लुक् **विट्ठी वुट्ठी** ।

**[ पिहं पुहं ]** पृथक् (२) । अनेन प्रथमे पृ० → पि० । द्वितीये पृ० → पु० । 'ख-घ-थ०' (१।१८७) थ० → ह० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'वा स्वरे मश्च' (१।२४) क्० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **पिहं पुहं** ।

**[ मिइङ्गो मुइङ्गो ]** मृदङ्ग (२) । अनेन प्रथमे मृ० → मि० । द्वितीये मृ० → मु० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'इः स्वप्नादौ' (१।४६) अस्य इ० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **मिइङ्गो मुइङ्गो** ।

**[ नत्तिओ नत्तुओ ]** नप्तृक (२) । 'क-ग-ट-ड०' (२।७७) प्लुक् । अनेन प्रथमे तृ० → ति० । द्वितीये तृ० → तु० । 'अनादौ०' (२।८९) तस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **नत्तिओ नत्तुओ** ॥१३७॥

## वा बृहस्पतौ ॥ ८।१।१३८ ॥

बृहस्पतिशब्दे ऋत इदुतौ वा भवतः ॥ बिहप्फई । बुहप्फई । पक्षे - बहप्फई ॥

**[ वा बृहस्पतौ ]** वा प्रथमा सि । बृहस्पति सप्तमी ङि ।

**[ बिहप्फई बुहप्फई बहप्फई ]** बृहस्पति (२) । अनेन प्रथमे बृ० → बि० । द्वितीये बृ० → बु० । 'ष्प-स्पयोः फः' (२।५३) स्पस्य फः । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः-इ० → ई० । 'अन्त्यव्य०' (१।११) स्लुक् **बिहप्फई बुहप्फई** । यत्र इदुतौ न स्यातां तत्र 'ऋतोऽत्' (१।१२६) बृ० → ब० । **बहप्फई** तद्वदेव ॥१३८॥

## इदेदोद् वृन्ते ॥ ८।१।१३९ ॥

वृन्तशब्दे ऋत इत्-एत्-ओच्च भवन्ति ॥ विण्टं । वेण्टं । वोण्टं ॥

**[ इदेदोद् वृन्ते ]** इच्च एच्च ओच्च = इदेदोत् । प्रथमा सि । वृन्त सप्तमी ङि ।

**[ विण्टं वेण्टं वोण्टं ]** वृन्त (३) । अनेन प्रथमे वृ० → वि० । द्वितीये वृ० → वे० । तृतीये वृ० → वो० । 'वृन्ते ण्टः' (२।३१) न्त० → ण्ट० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **विण्टं वेण्टं वोण्टं** ॥१३९॥

## रिः केवलस्य ॥ ८।१।१४० ॥

केवलस्य व्यञ्जनेनाऽसंपृक्तस्य ऋतो रिरादेशो भवति ॥ रिद्धी । रिच्छो ॥

**[ रिः केवलस्य ]** रि प्रथमा सि । केवल षष्ठी ङस् ।

**[ रिद्धी ]** ऋद्धि । प्रथमा सि । अनेन ऋ० → रि० । 'अक्लीबे सौ' (३।१९) दीर्घः-द्धि० → द्धी० । 'अन्त्यव्य०' (१।११) स्लुक् **रिद्धी** ।

**[ रिच्छो ]** ऋक्ष । अनेन ऋ० → रि० । 'ऋक्षे वा' (२।१९) क्ष० → छ० । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **रिच्छो** ॥१४०॥

## ऋणर्ज्वृषभर्त्वृषौ वा ॥ ८।१।१४१ ॥

ऋण-ऋजु-ऋषभ-ऋतु-ऋषिषु ऋतो रिर्वा भवति ॥

रिणं अणं । रिज्जू उज्जू । रिसहो उसहो । रिऊ उऊ । रिसी इसी ॥

**[ ऋणर्ज्वृषभर्त्वृषौ वा ]** ऋणं च ऋजुश्च ऋषभश्च ऋतुश्च ऋषिश्च = ऋणर्ज्वृषभर्त्वृषि, तस्मिन् = ऋणर्ज्वृषभर्त्वृषौ । वा प्रथमा सि ।

**[ रिणं अणं ]** ऋण (२) । अनेन वा ऋ० → रि० । द्वितीये 'ऋतोऽत्' (१।१२६) ऋ० → अ० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **रिणं अणं** ।

[1]**[ रिज्जू उज्जू ]** ऋजु (२) । अनेन वा ऋ० → रि० । द्वितीये 'उदृत्वादौ' (१।१३१) ऋ० → उ० । 'तैलादौ' (२।९८) जस्य द्वित्वम् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः- ज्जु० → ज्जू० । 'अन्त्यव्य०' (१।११) स्लुक् **रिज्जू उज्जू** ।

**[ रिसहो उसहो ]** ऋषभ (२) । अनेन वा ऋ० → रि० । द्वितीये 'उदृत्वादौ' (१।१३१) ऋ० → उ० । 'श-षोः सः' (१।२६०) ष० → स० । 'ख-घ-थ-ध-भाम्' (१।१८७) भ० → ह० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **रिसहो उसहो** ।

**[ रिऊ उऊ ]** ऋतु (२) । अनेन वा ऋ० → रि० । द्वितीये 'उदृत्वादौ' (१।१३१) ऋ० → उ० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः- उ० → ऊ० । अन्त्यव्य०' (१।११) स्लुक् **रिऊ उऊ** ।

**[ रिसी इसी ]** ऋषि (२) । अनेन वा ऋ० → रि० । 'श-षोः सः' (१।२६०) षि० → सि० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः- सि० → सी० । 'अन्त्यव्य०' (१।११) स्लुक् **रिसी** । द्वितीये 'इत् कृपादौ' (१।१२८) ऋ० → इ० । शेषं तद्वत्-**इसी** ॥१४१॥

## दृशः क्विप्-टक्-सकः ॥ ८।१।१४२ ॥

क्विप्-टक्-सक् इत्येतदन्तस्य दृशेर्धातोर्ऋतो रिरादेशो भवति ॥

सदृक् → सरिवण्णो । सरिरूवो । सरि[2]बन्दीणं । सदृशः → सरिसो । सदृक्षः → सरिच्छो । एतादृशः → एआरिसो ॥

एवम् - भवारिसो । जारिसो । तारिसो । केरिसो । एरिसो । अन्नारिसो । अम्हारिसो । तुम्हारिसो ॥

टक्-सक्साहचर्यात् 'त्यदाद्यन्यादि०' (५।१।१५२) सूत्रविहितः क्विबिह गृह्यते ॥

**[ दृशः क्विप्टक्सकः ]** दृश् षष्ठी ङस् । क्विप्टक्सक् षष्ठी ङस् ।

**[ सरिवण्णो ]** सदृश्-वर्ण । सदृग्वर्णो यस्य सः । 'अन्त्यव्य०' (१।११) ग्लुक् । 'क-ग-च०' (१।१७७) द्लुक् । अनेन ऋ० → रि० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) णस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **सरिवण्णो** ।

---

१. A. **रिज्जू अज्जू उज्जू** । ऋजु (३) । अनेन वा ऋ० → रि० । द्वितीये 'ऋतोऽत्' (१।१२६) ऋ० → अ० । तृतीये 'उदृत्वादौ' (१।१३१) ऋ० → उ० । द्वित्वम् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः-ज्जु० → ज्जू० । 'अन्त्य०' (१।११) स्लुक् रिज्जू अज्जू उज्जू ।

२. वज्जवडणाइरिक्कं पइणो सोऊण सिञ्जिणीघोसं । पुसिआइं करिमरिएँ **सरिसबन्दीणं** पि णअणाइं ॥

[गा० स० - १।५४]

वज्रपतनातिरिक्तं पत्युः श्रुत्वा शिञ्जिनीघोषम् । प्रोञ्छितानि वन्द्या सदृशबन्दीनामपि नयनानि ॥

**[ सरिरूवो ]** सदृश्-रूप । सदृग् रूपं यस्य सः । 'अन्त्यव्य०' (१।११) ग्लुक् । 'क-ग-च-ज०' (१।१७७) द्लुक् । अनेन ऋ० → रि० । 'पो वः' (१।२३१) प० → व० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **सरिरूवो** ।

**[ सरिबु( ब )न्दीणं ]** सदृग्-बु(ब)न्दि । 'अन्त्यव्य०' (१।११) ग्लुक् । 'क-ग-च-ज०' (१।१७७) द्लुक् । अनेन ऋ० → रि० । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि०' (३।२) दि० → दी० **सरिबु( ब )न्दीणं** ।

**[ सरिसो ]** सदृश । अनेन ऋ० → रि० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **सरिसो** ।

**[ सरिच्छो ]** सदृक्ष । 'क-ग-च-ज०' (१।१७७) द्लुक् । अनेन ऋ० → रि० । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्षस्य छः । ('छोऽक्ष्यादौ' (२।१७) क्ष० → छ०) । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **सरिच्छो** ।

**[ एआरिसो ]** एतद्-दृश् । एष इव दृश्यते । 'त्यदाद्यन्य०' (५।१।१५२) टक्प्र० । 'अन्य०' (३।२।१५२) आ० । 'क-ग-च-ज०' (१।१७७) त्लुक्-द्लुक् च । अनेन ऋ० → रि० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **एआरिसो** ।

**[ भवारिसो ]** भवादृश । 'क-ग-च-ज०' (१।१७७) द्लुक् । अनेन ऋ० → रि० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **भवारिसो** ।

**[ जारिसो ]** य इव दृश्यते = यादृश । 'आदेर्यो जः' (१।२४५) या० → जा० । 'क-ग-च-ज०' (१।१७७) द्लुक् । अनेन ऋ० → रि० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **जारिसो** ।

**[ तारिसो ]** तादृश । 'क-ग-च-ज०' (१।१७७) द्लुक् । अनेन ऋ० → रि० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **तारिसो** ।

**[ केरिसो ]** कीदृश । 'एत् पीयूषा-ऽऽपीड-बिभीतक-कीदृशेदृशे' (१।१०५) की० → के० । शेषं पूर्ववत् । केरिसो ।

**[ एरिसो ]** ईदृश । 'एत् पीयूषा-ऽऽपीड०' (१।१०५) ई० → ए० । शेषं पूर्ववत् । **एरिसो** ।

**[ अन्नारिसो ]** अन्यादृश । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वं-ना० → न्ना० । शेषं पूर्ववत् । **अन्नारिसो** ।

**[ अम्हारिसो ]** अस्मादृश । 'पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः' (२।७४) स्मा० → म्हा० । शेषं पूर्ववत् । **अम्हारिसो** ।

**[ तुम्हारिसो ]** युष्मादृश । 'पक्ष्म-श्म-ष्म०' (२।७४) स्मा० → म्हा० । 'युष्मद्यर्थपरे तः' (१।२४६) यु० → तु० । शेषं तद्वत् । **तुम्हारिसो** ॥१४२॥

## आदृते ढिः ॥ ८।१।१४३ ॥

आदृतशब्दे ऋतो ढिरादेशो भवति ॥ आढिओ ॥

**[ आदृते ढिः ]** आदृत सप्तमी ङि । ढि प्रथमा सि ।

**[ आढिओ ]** आदृत । 'क-ग-च-ज०' (१।१७७) द्लुक् । अनेन ऋ० → ढि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **आढिओ** ॥१४३॥

## अरिर्दृप्ते ॥ ८।१।१४४ ॥

दृप्तशब्दे ऋतोऽरिरादेशो भवति ॥ दरिओ । दरिअसीहेण[1] ॥

**[ अरिर्दृप्ते ]** अरि प्रथमा सि । दृप्त सप्तमी ङि ।

**[ दरिओ ]** दृप्त । अनेन ऋ० → अरि० - दरि० । 'क-ग-ट-ड०' (२।७७) प्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **दरिओ** ।

**[ दरिअसीहेण ]** दृप्तसिंह । अनेन ऋ० → अरि० - दरि० । 'क-ग-ट-ड०' (२।७७) प्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । सिंह । तृतीया टा । 'ईर्जिह्वा-सिंह-त्रिंशद्विंशतौ त्या' (१।९२) सिं० → सीं० । 'मांसाऽऽदेर्वा' (१।२९) अनुस्वारलुक् । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) ह० → हे० **दरिअसीहेण** ॥१४४॥

## लृत इलिः क्लृप्त-क्लृन्ने ॥ ८।१।१४५ ॥

अनयोर्लृत इलिरादेशो भवति ॥ किलित्त-कुसुमोवयारेसु । धारा-किलिन्न[2]-वत्तं ॥

**[ लृत इलिः ]** लृत् षष्ठी ङस् । इलि प्रथमा सि ।

**[ क्लृप्तक्लृन्ने ]** क्लृप्तं च क्लृन्नं च = क्लृप्तक्लृन्नम्, तस्मिन् = क्लृप्तक्लृन्ने ।

**[ किलित्त-कुसुमोवयारेसु ]** क्लृप्त-कुसुमोपचार । अनेन क्लृ० → किलि० । 'क-ग-ट-ड०' (२।७७) प्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वं-त० → त्त० । 'पो वः' (१।२३१) प० → व० । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० । सप्तमी सुप् । 'भिस्-भ्यस्-सुपि' (३।१५) इति एकारः **किलित्त-कुसुमोवयारेसु** ।

**[ धारा-किलिन्न-वत्तं ]** [3]धारा-क्लृन्न-पात्रम् । धाराभिः क्लृन्नं पात्रं यस्य तत् । अनेन क्लृ० → किलि० । 'पो वः' (१।२३१) पा० → वा० । 'ह्रस्वः संयोगे' (१।८४) वा० → व० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वं - त० → त्त० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **धारा-किलिन्न-वत्तं** ॥१४५॥

## एत इद्वा वेदना-चपेटा-देवर-केसरे ॥ ८।१।१४६ ॥

वेदनादिषु एत इत्त्वं वा भवति ॥

विअणा वेअणा । चविडा । विअड-चवेडा-विणोअ(आ) । दिअरो देवरो । महमहिअ-दसण-किसरं । केसरं ॥

---

१. भम धम्मिअ वीसद्धो/विसत्थो सो सुणओ अज्ज मारिओ तेण । [1]गोलाणईकच्छकुडंगवासिणा **दरिअसीहेण** ॥

[शृ० प्र० - ७।१६७ । ध्व० - प्रथमोद्योतः । गा० स० - २।७५] १. पाठां० - गा० स० - गोलाअडविअड० = गोदातटविकट० । भ्रम धार्मिक ! विस्रब्धः / विश्वस्तः स शुनकोऽद्य मारितस्तेन । गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन ॥

२. धारा-किलिण्ण-वत्तं आसुरहि-कसाय-केसरद्धंतं । परिणमइ बंधणे च्चिअ परिसिढिलं जूहिआ-कुसुमं ॥ [ग० व० -४१०] धाराक्लिन्नपत्रमासुरभिकषायकेसरार्धान्तम् । परिणमति बन्धन एव परिशिथिलं यूथिकाकुसुमम् ॥

३. H. M. धारा-क्लृन्न-पत्रम् ।

महिला महेला इति तु महिला-महेलाशब्दाभ्यां सिद्धम् ॥

**[ एत इद्वा ]** एत् षष्ठी ङस् । इत् प्रथमा सि । वा प्रथमा सि ।

**[ वेदनाचपेटादेवरकेसरे ]** वेदना च चपेटा च देवरश्च केसरं च = वेदनाचपेटादेवरकेसरम्, तस्मिन् = वेदना-चपेटादेवरकेसरे । सप्तमी ङि ।

**[ विअणा वेअणा ]** वेदना (२) । अनेन वा वे० → वि० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'नो णः' (१।२२८) ना० → णा० । प्रथमा सि । । 'अन्त्यव्य०' (१।११) स्लुक् **विअणा वेअणा** ।

**[ चविडा, विअड-चवेडा-विणोअ( आ ) ]** चपेटा (२) । अनेन वा पे० → पि० । 'पो वः' (१।२३१) पि० → वि० । 'टो डः' (१।१९५) टा० → डा० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् चविडा चवेडा । विकट-चपेटा-विनोद । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'टो डः' (१।१९५) ट० → ड० । चवेडा पूर्ववत् । 'नो णः' (१।२२८) नो० → णो० । 'क-ग-च-ज०' (१।१७७) द्लुक् **विअड-चवेडा-विणोअ( आ )** ।

**[ दिअरो देवरो ]** देवर (२) । अनेन वा दे० → दि० । 'क-ग-च-ज-त-द-प-य-वां०' (१।१७७) व्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **दिअरो देअ( व )रो** ।

**[ महमहिअ-दसण-किसरं, केसरं ]** महमहितदशनकेसर । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'श-षोः सः' (१।२६०) श० → स० । 'नो णः' (१।२२८) न० → ण० । अनेन वा के० → कि० । प्रथमा सि । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **किसरं केसरं** ॥१४६॥

## ऊः स्तेने वा ॥ ८।१।१४७ ॥

स्तेने एत ऊद् वा भवति ॥ थूणो थेणो ॥

**[ ऊः स्तेने वा ]** ऊ प्रथमा सि । स्तेन सप्तमी ङि । वा प्रथमा सि ।

**[ थूणो थेणो ]** स्तेन (२) । प्रथमा सि । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्तस्य थः । अनेन वा ए० → ऊ० - थे० → थू० । 'नो णः' (१।२२८) न० → ण० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **थूणो थेणो** ॥१४७॥

## ऐत एत् ॥ ८।१।१४८ ॥

ऐकारस्याऽऽदौ वर्तमानस्य एत्वं भवति ॥

सेला । सेन्नं । तेलुक्कं । एरावणो । केलासो । वेज्जो । केढवो । वेहव्वं ॥

**[ ऐत एत् ]** ऐत् षष्ठी ङस् । एत् प्रथमा सि ।

**[ सेला ]** [1]शैल(लाः) । अनेन शै० → शे० । 'श-षोः सः' (१।२६०) शे० → से० । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः **सेला** ।

[2]**[ सेन्नं ]** सैन्य । अनेन सै० → से० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वं - न० → न्न० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **सेन्नं** ।

---

१. B. C. शैला । २. A. सेन्नं उदाहरणम् ।

[1][ **तेलुक्कं** ] त्रैलोक्य । अनेन ऐ० → ए० । 'सर्वत्र०' (२।७९) र्लुक् । 'ह्रस्वः संयोगे' (१।८४) लो० → लु० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वं- क० → क्क० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः (१।२३) अनुस्वारः **तेलुक्कं** ।

[ **एरावणो** ] ऐरावण । अनेन ऐ० → ए० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **एरावणो** ।

[ **केलासो** ] [2]कैलाश । अनेन कै० → के० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **केलासो** ।

[ **वेज्जो** ] वैद्य । अनेन वै० → वे० । 'द्य-य्य-र्यां जः' (२।२४) द्य० → ज० । [3]'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **वेज्जो** ।

[ **केढवो** ] कैटभ । अनेन कै० → के० । 'सटा-शकट-कैटभे ढः' (१।१९६) टस्य ढः । 'कैटभे भो वः' (१।२४०) भस्य वः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **केढवो** ।

[ **वेहव्वं** ] वैधव्य । अनेन वै० → वे० । 'ख-घ-थ-ध-भाम्' (१।१८७) धस्य हः । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वं- व० → व्व० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **वेहव्वं** ॥१४८॥

## इत् सैन्धव-शनैश्चरे ॥ ८।१।१४९ ॥

एतयोरैत इत्त्वं भवति ॥ सिन्धवं । सणिच्छरो ॥

[ **इत् सैन्धवशनैश्चरे** ] इत् प्रथमा सि । सैन्धवं च शनैश्चरश्च = सैन्धवशनैश्चरम्, तस्मिन् = सैन्धवशनैश्चरे । सप्तमी ङि ।

[4][ **सिन्धवं** ] सैन्धव । अनेन सै० → सि० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **सिन्धवं** ।

[ **सणिच्छरो** ] शनैश्चर । अनेन नै० → नि० । 'श-षोः सः' (१।२६०) श० → स० । 'नो णः' (१।२२८) नि० → णि० । 'ह्रस्वात् थ्य-श्च-त्स-प्सामनिश्चले' (२।२१) श्चस्थाने छ० । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **सणिच्छरो** ॥१४९॥

## सैन्ये वा ॥ ८।१।१५० ॥

सैन्यशब्दे ऐत इद् वा भवति ॥ सिन्नं सेन्नं ॥

[ **सैन्ये वा** ] सैन्य सप्तमी ङि । वा प्रथमा सि ।

---

१. G. H. I. L. M. तेलोक्कं । २. G. H. I. L. M. कैलास । ३. G. 'तैलादौ' (२।९८) । ४. A. [सिंहवं] सैन्धव । प्रथमा सि । अनेन सै० → सि० । 'ख-घ-थ०' (१।१८७) ध० → ह० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः सिंहवं ।

**[ सिन्नं सेन्नं ]** सैन्य । अनेन वा सै० → सि० । द्वितीये 'ऐत एत्' (१।१४८) सै० → से० । 'अधो म-न-याम्' (२।७८) य्लुक् । [१]''अनादौ०' (२।८९) नस्य द्वित्वं- न० → न्न० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **सिन्नं सेन्नं** ॥१५०॥

## अइर्दैत्यादौ च ॥ ८।१।१५१ ॥

सैन्यशब्दे दैत्य इत्येवमादिषु च ऐतो अइ इत्यादेशो भवति ॥ एत्वाऽपवादः ॥

सैन्य → सइन्नं । दैत्य → दइच्चो । दैन्य → दइन्नं । ऐश्वर्य → अइसरिअं । भैरव → भइरवो । वैजवन → वइजवणो । दैवत → दइवयं । वैतालीय → वइआलीअं । वैदेश → वइएसो । वैदेह → वइएहो । वैदर्भ → वइदब्भो । वैश्वानर → वइस्साणरो । कैतव → कइअवं । वैशाख → वइसाहो । वैशाल → वइसालो । स्वैर → सइरं । चैत्य → चइत्तं इत्यादि ॥

विश्लेषे न भवति - चैत्यम् → चेइअं ॥ आर्षे-चैत्य-वन्दनम् → ची-वन्दणं ॥

**[ अइर्दैत्यादौ च ]** अइ प्रथमा सि । दैत्यादि सप्तमी ङि । च प्रथमा सि ।

**[ सइन्नं ]** सैन्य । अनेन सै० → सइ० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वं - न० → न्न० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **सइन्नं** ।

**[ दइच्चो ]** दैत्य । अनेन दै० → दइ० । 'त्योऽचैत्ये' (२।१३) त्यस्य च० । 'अनादौ०' (२।८९) चस्य द्वित्वं - च० → च्च० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **दइच्चो** ।

**[ दइन्नं ]** दैन्य । अनेन दै० → दइ० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वं - न० → न्न० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **दइन्नं** ।

**[ अइसरिअं ]** ऐश्वर्य । अनेन ऐ० → अइ० । 'सर्वत्र०' (२।७९) व्लुक् । 'श-षोः सः' (१।२६०) श० → स० । 'स्याद्-भव्य-चैत्य-चौर्यसमेषु यात्' (२।१०७) यात् प्राग् इकारः । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **अइसरिअं** ।

**[ भइरवो ]** भैरव । अनेन भै० → भइ० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **भइरवो** ।

**[ वइजवणो ]** वैजवन । अनेन वै० → वइ० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **वइजवणो** ।

**[ दइवयं ]** दैवत । अनेन दै० → दइ० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **दइवयं** ।

**[ वइआलीअं ]** वैतालीय । अनेन वै० → वइ० । 'क-ग-च-ज०' (१।१७७) त्लुक् - य्लुक् च । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **वइआलीअं** ।

**[ वइएसो ]** वैदेश । अनेन वै० → वइ० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **वइएसो** ।

१. G. 'तैलादौ' (२।९८) ।

**[ वइएहो ]** वैदेह । अनेन वै० → वइ० । 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमा सि । 'अत: सेर्डो:' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **वइएहो** ।

**[ वइदब्भो ]** वैदर्भ । अनेन वै० → वइ० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) भस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वभस्य ब: । प्रथमा सि । 'अत: सेर्डो:' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' अलुक् **वइदब्भो** ।

**[ वइस्साणरो ]** वैश्वानर । अनेन वै० → वइ० । 'सर्वत्र०' (२।७९) व्लुक् । 'श-षो: स:' (१।२६०) शा० → सा० । 'अनादौ०' (२।८९) सस्य द्वित्वम् । 'नो ण:' (१।२२८) न० → ण० । प्रथमा सि । 'अत: सेर्डो:' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **वइस्साणरो** ।

**[ कइअवं ]** कैतव । अनेन कै० → कइ० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वार:' (१।२३) अनुस्वार: **कइअवं** ।

**[ वइसाहो ]** वैशाख । अनेन वै० → वइ० । 'श-षो: स:' (१।२६०) शा० → सा० । 'ख-घ-थ-ध-भाम्' (१।१८७) ख० → ह० । प्रथमा सि । 'अत: सेर्डो:' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **वइसाहो** ।

**[ वइसालो ]** वैशाल । अनेन वै० → वइ० । 'श-षो: स:' (१।२६०) शा० → सा० । प्रथमा सि । 'अत: सेर्डो:' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **वइसालो** ।

**[ सइरं ]** स्वैर । अनेन स्वै० → स्वइ० । 'सर्वत्र०' (२।७९) व्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वार:' (१।२३) अनुस्वार: **सइरं** ।

**[ चइत्तं ]** चैत्य । अनेन चै० → चइ० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वं - त० → त्त० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वार: **चइत्तं** ।

**[ चेइअं ]** चैत्य । 'ऐत एत्' (१।१४८) चै० → चे० । 'स्याद्-भव्य-चैत्य०' (२।१०७) यात् प्राग् इकार: । 'क-ग-च-ज०' (१।१७७) त्लुक्-य्लुक् च । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वार:' (१।२३) अनुस्वार: **चेइअं** ।

**[ ची-वन्दणं ]** आर्षे-चैत्यवन्दन । आर्षत्वात् चैत्यस्थाने ची० । 'नो ण:' (१।२२८) न० → ण० **ची-वन्दणं** ॥१५१॥

## वैरादौ वा ॥ ८।१।१५२ ॥

वैरादिषु ऐतो अइरादेशो वा भवति ॥

वइरं वेरं । कइलासो केलासो । भइरवो भेरवो । कइरवं केरवं । वइसवणो वेसवणो । वइसम्पायणो वेसम्पायणो । वइसालिओ वेआलिओ । वइसिअं वेसिअं । चइत्तो चेत्तो इत्यादि ॥

वैर । कैलास(श) । भैरव । कैरव । वैश्रवण । वैशम्पायन । वैतालिक । वैशिक । चैत्र इत्यादि ॥

**[ वैरादौ वा ]** वैरादि सप्तमी ङि । वा प्रथमा सि ।

**[ वइरं वेरं ]** वैर (२) । अनेन वा वै० → वइ० । द्वितीये 'ऐत एत्' (१।१४८) वै० → वे० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वार: **वइरं वेरं** ।

**[ कइलासो केलासो ]** कैलाश (२) । अनेन वा कै० → कइ० । द्वितीये 'ऐत एत्' (१।१४८) कै० → के० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **कइलासो केलासो** ।

[1]**[ भइरवो भेरवो ]** भैरव (२) । अनेन वा भै० → भइ० । द्वितीये 'ऐत एत्' (१।१४८) भै० → भे० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **भइरवो भेरवो** ।

**[ कइरवं केरवं ]** कैरव (२) । अनेन वा कै० → कइ० । द्वितीये 'ऐत एत्' (१।१४८) कै० → के० । प्रथमा सि। 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **कइरवं केरवं** ।

**[ वइसवणो वेसवणो ]** वैश्रवण (२) । अनेन वा वै० → वइ० । द्वितीये 'ऐत एत्' (१।१४८) वै० → वे० । 'सर्वत्र०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **वइसवणो वेसवणो** ।

**[ वइसम्पायणो वेसम्पायणो ]** विशम्पस्यापत्यं = वैशम्पायनः । 'नडादि०' (६।१।५३) आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः - वै० । 'अवर्णेव०' (७।४।६८) अलुक् । वैशम्पायन (२) । अनेन वा वै० → वइ० । द्वितीये 'ऐत एत्' (१।१४८) वै० → वे० । 'श-षोः सः' (१।२६०) श० → स० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **वइसम्पायणो वेसम्पायणो** ।

**[ वइआलिओ वेआलिओ ]** वैतालिक (२) । अनेन वा वै० → वइ० । द्वितीये 'ऐत एत्' (१।१४८) वै० → वे० । 'क-ग-च-ज०' (१।१७७) त-कयोर्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **वइआलिओ वेआलिओ** ।

**[ वइसिअं वेसिअं ]** वैशिक । अनेन वा वै० → वइ० । द्वितीये 'ऐत एत्' (१।१४८) वै० → वे० । 'श-षोः सः' (१।२६०) शि० → सि० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वइसिअं वेसिअं** ।

**[ चइत्तो चेत्तो ]** चैत्र (२) । अनेन वा चै० → चइ० । द्वितीये 'ऐत एत्' (१।१४८) चै० → चे० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वं - त० → त्त० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **चइत्तो चेत्तो** ॥१५२॥

## एच्च दैवे ॥ ८।१।१५३ ॥

दैवशब्दे ऐत एत् [2]अइश्चादेशो भवति ॥ देव्वं दइव्वं दइवं ॥

**[ एच्च दैवे ]** एत् प्रथमा सि । च प्रथमा सि । दैव सप्तमी ङि ।

**[ देव्वं ]** दैव । अनेन दै० → दे० । 'सेवादौ वा' (२।९९) द्वित्वं- व० → व्व० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **देव्वं** ।

**[ दइव्वं ]** दैव । अनेन दै० → दइ० । 'सेवादौ वा' (२।९९) द्वित्वं - व० → व्व० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दइव्वं** ।

१. पा० म० - भइरव वि० । भेरव नपुंसकलिङ्गः । २. C. अइश्चादेशौ भवतः ।

**[ दइवं ]** दैव । अनेन दै० → दइ० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दइवं** ॥१५३॥

## उच्चैर्नीचैस्यअः ॥ ८।१।१५४ ॥

अनयोरैतो अअ इत्यादेशो भवति ॥

उच्चअं । नीचअं ॥ उच्च-नीचाभ्यां के सिद्धम्, उच्चैर्नीचैसोस्तु रूपान्तरनिवृत्त्यर्थं वचनम् ॥

**[ उच्चैर्नीचैस्यअः ]** उच्चैश्च नीचैश्च = उच्चैर्नीचैस् । सप्तमी ङि । अअ प्रथमा सि ।

**[ उच्चअं ]** उच्चैस् । 'वा स्वरे मश्च' (१।२४) बाहुलकात् स्० → म्० । अनेन ऐ० → अअ० -च्चै० → च्चअ० । 'लोकात्' (१।१।३) उच्चअम् । 'मोऽनु०' (१।२३) अनुस्वारः **उच्चअं** ।

**[ नीचअं ]** नीचैस् । 'वा स्वरे मश्च' (१।२४) बाहुलकात् स्० → म्० । अनेन ऐ० → अअ० - चै० → चअ० । 'लोकात्' (१।१।३) नीचअम् । 'मोऽनु०' (१।२३) अनुस्वारः **नीचअं** ॥१५४॥

## ईद्धैर्ये ॥ ८।१।१५५ ॥

धैर्यशब्दे ऐत ईद् भवति ॥ [१]धीरं हरइ विसाओ ॥

**[ ईद्धैर्ये ]** ईत् प्रथमा सि । धैर्य सप्तमी ङि ।

**[ धीरं हरइ विसाओ ]** धैर्य । अनेन धै० → धी० । 'धैर्ये वा' (२।६४) र्यस्य र० । द्वितीया अम् । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **धीरं** । हरति- 'त्यादीनामाद्यत्रयस्याद्यस्येचेचौ' (३।१३९) ति० → इ० **हरइ** । विषाद । 'श-षोः सः' (१।२६०) षा० → सा० । 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **विसाओ** ॥१५५॥

## ओतोऽद्वा-ऽन्योन्य-प्रकोष्ठा-ऽऽतोद्य-शिरोवेदना-मनोहर-सरोरुहे क्तोश्च वः ॥ ८।१।१५६ ॥

एषु ओतोऽत्त्वं वा भवति, तत्संनियोगे च [२]यथादर्शनं ककार-तकारयोर्वादेशः ॥

अन्नन्नं अन्नुन्नं । पवट्ठो पउट्ठो । आवज्जं आउज्जं । सिरविअणा [३]सिरोवेअणा । मणहरं मणोहरं । सररुहं सरोरुहं ॥

**[ ओतोऽद्वा ]** ओत् षष्ठी ङस् । अत् प्रथमा सि । वा प्रथमा सि ।

**[ अन्योन्यप्रकोष्ठाऽऽतोद्यशिरोवेदनामनोहरसरोरुहे ]** अन्योन्यं च प्रकोष्ठश्च आतोद्यं च शिरोवेदना च मनोहरं च सरोरुहं च = अन्योन्यप्रकोष्ठाऽऽतोद्यशिरोवेदनामनोहरसरोरुहम्, तस्मिन् = अन्योन्यप्रकोष्ठाऽऽतोद्यशिरोवेदनामनोहर-सरोरुहे। सप्तमी ङि ।

**[ क्तोश्च वः ]** क्त् षष्ठी ओस् । च प्रथमा सि । व प्रथमा सि ।

---

१. **धीरं हरइ विसाओ** विणअं जोव्वणमओ अणंगो लज्जं । एक्कन्तगहिअवक्खो किं सीअउ जं ठवेइ वअपरिणामो ॥
[से० ब० - ४।२३ । स० क० - ४।१७४]
धैर्यं हरति विषादो विनयं यौवनमदोऽनङ्गो लज्जाम् । एकान्तगृहीतपक्षः किं शिष्यतां यत् स्थापयति वयःपरिणामः ॥
२. H. J. L. M. यथासम्भवं । ३. G. H. I. J. L. M. पा० म० - सिरोविअणा ।

**[ अन्नन्नं अन्नुन्नं ]** अन्योन्य (२) । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वं - न० → न्न० । अनेन वा ओकारस्य अ० । द्वितीये 'ह्रस्वः संयोगे' (१।८४) ओ० → उ० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अन्नन्नं अन्नुन्नं** ।

**[ पवट्ठो पउट्ठो ]** प्रकोष्ठ (२) । 'सर्वत्र०' (२।७९) र्लुक् । अनेन वा को० → क० - कस्य च व० । 'ष्टस्या०' (२।३४) ष्ठस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **पवट्ठो** । द्वितीये प्रकोष्ठ । 'सर्वत्र०' (२।७९) र्लुक् । 'ह्रस्वः संयोगे' (१।८४) को० → कु० । 'क-ग-च-ज०' (१।१७७) क्लुक् । शेषं पूर्ववत् । **पउट्ठो** ।

**[ आवज्जं आउज्जं ]** आतोद्य (२) । अनेन तो० → त० - तस्य वश्च । 'द्य-य्य-र्यां जः' (२।२४) द्य० → ज० । 'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **आवज्जं** । द्वितीये आतोद्य । 'ह्रस्वः संयोगे०' (१।८४) तो० → तु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'द्य-य्य-र्यां जः' (२।२४) द्य० → ज० । शेषं तथैव । **आउज्जं** ।

**[ सिरविअणा सिरोवेअणा ]** शिरोवेदना (२) । 'श-षोः सः' (१।२६०) शि० → सि० । अनेन रो० → र० । 'एत इद्वा वेदना-चपेटा-देवर-केसरे' (१।१४६) वे० → वि० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'नो णः' (१।२२८) ना० → णा० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सिरविअणा** । द्वितीये शिरोवेदना । 'श-षोः सः' (१।२६०) शि० → सि० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'नो णः' (१।२२८) ना० → णा० । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **सिरोवेअणा** ।

**[ मणहरं मणोहरं ]** मनोहर (२) । अनेन वा नो० → न० । 'नो णः' (१।२२८) न०-नो० → ण०-णो० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मणहरं मणोहरं** ।

**[ सररुहं सरोरुहं ]** सरोरुह (२) । अनेन वा रो० → र० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सररुहं सरोरुहं** ॥१५६॥

## ऊत् सोच्छ्वासे ॥ ८।१।१५७ ॥

सोच्छ्वासशब्दे ओत ऊद् भवति ॥ सोच्छ्वासः → सूसासो ॥

**[ ऊत् सोच्छ्वासे ]** ऊत् प्रथमा सि । सोच्छ्वास सप्तमी ङि ।

**[ सूसासो ]** [1]स-उद्-श्वास । 'अन्त्यव्य०' (१।११) द्लुक् । 'सर्वत्र०' (२।७९) व्लुक् । 'लुक्' (१।१०) इति लोपमकृत्वा 'अवर्णस्ये' (१।२।६) ओत्वम् । इदं सूत्रं 'लुक्' (१।१०) इत्यस्य प्रायिकत्वमाचष्टे । अनेन सो० → सू० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **सूसासो** ॥१५७॥

## गव्यउ-आअः ॥ ८।१।१५८ ॥

गोशब्दे ओतोऽउ-आअ इत्यादेशौ भवतः ॥ गउओ गउआ गाओ । हरस्स एसा गाई ॥

१. B. C. K. सोच्छ्वास ।

**[ गव्यउ-आअः ]** गो सप्तमी ङि । अउ-आअ प्रथमा सि ।

**[ गउओ ]** गो । अनेन गो० → गउ० । स्वार्थे कप्र० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **गउओ** ।

**[ गउआ ]** गो । अनेन गो० → गउ० । स्वार्थे कप्र० । 'स्वस्रादेर्डा' (३।३५) डाप्र० → आ० । 'डित्यन्त्य०' (२।१।११४) अलुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **गउआ** ।

**[ गाओ ]** गो । अनेन आअ० । 'लोकात्' (१।१।३) गाअ० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **गाओ** ।

**[ हरस्स एसा गाई ]** हर । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **हरस्स** । एतद् । प्रथमा सि । 'अन्त्य०' (१।११) द्लुक् । 'तदश्च तः सोऽक्लीबे' (३।८६) त० → स० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अन्त्य०' (१।११) स्लुक् **एसा** । गो । अनेन आअ० → गाअ० । 'जातेरयान्त- नित्यस्त्री-शूद्रात्' (२।४।५४) ङी । लुक् (१।१०) अलोपः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **गाई** ॥१५८॥

## औत ओत् ॥ ८।१।१५९ ॥

औकारस्यादेरोद् भवति ॥

कौमुदी → कोमुई । यौवनम् → जोव्वणं । कौस्तुभः → कोत्थुहो । कौशाम्बी → कोसम्बी । क्रौञ्चः → कोञ्चो । कौशिकः → कोसिओ ॥

**[ औत ओत् ]** औत् षष्ठी ङस् । ओत् प्रथमा सि ।

**[ कोमुई ]** कौमुदी । अनेन कौ० → को० । 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **कोमुई** ।

[1]**[ जोव्वणं ]** यौवन । अनेन यौ० → यो० । 'आदेर्यो जः' (१।२४५) यो० → जो० । [2]'तैलादौ' (२।९८) द्वित्वं-व० → व्व० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जोव्वणं** ।

**[ कोत्थुहो ]** कौस्तुभ । अनेन कौ० → को० । 'स्तस्य थोऽसम०' (२।४५) स्तस्य थः । [3]'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । 'ख-घ-थ-ध-भाम्' (१।१८७) भ० → ह० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **कोत्थुहो** ।

**[ कोसम्बी ]** कौशाम्बी । अनेन कौ० → को० । 'ह्रस्वः संयोगे' (१।८४) शा० → श० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **कोसम्बी** ।

**[ कोञ्चो ]** क्रौञ्च । 'सर्वत्र०' (२।७९) र्लुक् । अनेन कौ० → को० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **कोञ्चो** ।

**[ कोसिओ ]** कौशिक । अनेन कौ० → को० । 'श-षोः सः' (१।२६०) शि० → सि० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **कोसिओ** ॥१५९॥

---

१. M. जुव्वणं । २. J. 'अनादौ०' (२।८९) । ३. D. G. 'तैलादौ' (२।९८) ।

## उत् सौन्दर्यादौ ॥ ८।१।१६० ॥

सौन्दर्यादिषु शब्देषु औत उद् भवति ॥

सौन्दर्य → सुन्देरं - सुन्दरिअं । मौञ्जायन → मुञ्जायणो । शौण्ड → सुण्डो । शौद्धोदनि → सुद्धोअणी । दौवारिक → दुवारिओ । सौगन्ध्य → सुगन्धत्तणं । पौलोमी → पुलोमी । सौवर्णिक → सुवण्णिओ ॥

**[ उत् सौन्दर्यादौ ]** उत् प्रथमा सि । सौन्दर्य आदौ यस्य सः = सौन्दर्यादिः, तस्मिन् = सौन्दर्यादौ । सप्तमी ङि ।

**[ सुन्देरं ]** सौन्दर्य । अनेन सौ० → सु० । 'एच्छय्यादौ' (१।५७) द० → दे० । 'ब्रह्मचर्य-तूर्य-सौन्दर्य-शौण्डीर्ये र्यो रः' (२।६३) र्यस्य रः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः सुन्देरं ।

[1]**[ सुन्दरिअं ]** सौन्दर्य । अनेन सौ० → सु० । 'स्याद्-भव्य-चैत्य-चौर्यसमेषु यात्' (२।१०७) यात् प्राग् इकारः । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुन्दरिअं** ।

**[ मुञ्जायणो ]** मौञ्जायन । अनेन मौ० → मु० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **मुञ्जायणो** ।

**[ सुण्डो ]** शौण्ड । अनेन शौ० → शु० । 'श-षोः सः' (१।२६०) शु० → सु० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **सुण्डो** ।

**[ सुद्धोअणी ]** शौद्धोदनि । अनेन शौ० → शु० । 'श-षोः सः' (१।२६०) शु० → सु० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'नो णः' (१।२२८) नि० → णि० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः- णि० → णी० । 'अन्त्यव्य०' (१।११) स्लुक् **सुद्धोअणी** ।

**[ दुवारिओ ]** दौवारिक । अनेन दौ० → दु० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **दुवारिओ** ।

**[ सुगन्धत्तणं ]** सौगन्ध्य । अनेन सौ० → **सु०** । त्वस्योपलक्षणात् 'त्वस्य डिमा-त्तणौ वा' (३।१५४) इति यस्यापि त्तण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुगन्धत्तणं** ।

**[ पुलोमी ]** पौलोमी । अनेन पौ० → पु० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् पुलोमी ।

**[ सुवण्णिओ ]** सौवर्णिक । अनेन सौ० → सु० । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अनादौ०' (२।८९) णस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **सुवण्णिओ** ॥१६०॥

## कौक्षेयके वा ॥ ८।१।१६१ ॥

कौक्षेयकशब्दे औत उद् वा भवति ॥ कुच्छेअयं कोच्छेअयं ॥

**[ कौक्षेयके वा ]** कौक्षेयक सप्तमी ङि । वा प्रथमा सि ।

---

१. G. सुंदरियं ।

**[ कुच्छेअयं कोच्छेअयं ]** कौक्षेयक (२) । अनेन कौ० → कु० । द्वितीये 'औत ओत्' (१।१५९) कौ० → को० । 'छोऽक्ष्यादौ' (२।१७) क्ष० → छ० । [१]'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'क-ग-च-ज०' (१।१७७) य-कयोर्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कुच्छेअयं कोच्छेअयं** ॥१६१॥

## अउः पौरादौ च ॥ ८।१।१६२ ॥

कौक्षेयके पौरादिषु च औतः अउरादेशो भवति ॥

कौक्षेयकः → कउच्छेअयं । पौरः → पउरो । पौरजनः → पउरजणो । कौरवः → कउरवो । कौशलम् → कउसलं । पौरुषम् → पउरिसं । सौधम् → सउहं । गौडः → गउडो । मौलिः → मउली । मौनम् → मउणं । सौराः → सउरा । कौलाः → कउला ॥

**[ अउः पौरादौ च ]** अउ प्रथमा सि । पौरादि सप्तमी ङि । च प्रथमा सि ।

**[ कउच्छेअयं ]** कौक्षेयक । अनेन कौ० → कउ० । च्छेअयं पूर्ववत् (१।१६१) । **कउच्छेअयं** ।

**[ पउरो ]** पौर । अनेन पौ० → पउ० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **पउरो** ।

**[ पउरजणो ]** पौरजन । अनेन पौ० → पउ० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **पउरजणो** ।

**[ कउरवो ]** कौरव । अनेन कौ० → कउ० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **कउरवो** ।

**[ कउसलं ]** कौशल । अनेन कौ० → कउ० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कउसलं** ।

**[ पउरिसं ]** पौरुष । अनेन पौ० → पउ० । 'पुरुषे रोः' (१।१११) रु० → रि० । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पउरिसं** ।

**[ सउहं ]** सौध । अनेन सौ० → सउ० । 'ख-घ-थ-ध-भाम्' (१।१८७) ध० → ह० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सउहं** ।

**[ गउडो ]** गौड । अनेन गौ० → गउ० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **गउडो** ।

**[ मउली ]** मौलि । अनेन मौ० → मउ० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः- लि० → ली० । 'अन्त्यव्य०' (१।११) सलुक् **मउली** ।

**[ मउणं ]** मौन । अनेन मौ० → मउ० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मउणं** ।

---

१. G. 'सेवादौ वा' (२।९९) प्राप्ते । G. टिप्पनकं - प्रायोऽत्र 'तैलादौ' इत्यनेन भाव्यम् ।

**[ सउरा ]** सौर । अनेन सौ० → सउ० । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः- र० → रा० **सउरा** ।

**[ कउला ]** कौल । अनेन कौ० → कउ० । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः-ल० → ला० **कउला** ॥१६२॥

## आच्च गौरवे ॥ ८।१।१६३ ॥

गौरवशब्दे औत आत्वं अउश्च भवति ॥ गारवं गउरवं ॥

**[ आच्च गौरवे ]** आत् प्रथमा सि । च प्रथमा सि । गौरव सप्तमी ङि ।

**[ गारवं गउरवं ]** गौरव । प्रथमा सि । अनेन गौ० → गा० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **गारवं** । द्वितीये चकारात् गौ० → गउ० । शेषं पूर्ववत् । **गउरवं** ॥१६३॥

## नाव्यावः ॥ ८।१।१६४ ॥

नौशब्दे औत आवादेशो भवति ॥ नावा ॥

**[ नाव्यावः ]** नावि(नौ) । सप्तमी ङि । आव प्रथमा सि ।

**[ नावा ]** नौ । अनेन आव० । 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **नावा** ॥१६४॥

## एत् त्रयोदशादौ स्वरस्य सस्वरव्यञ्जनेन ॥ ८।१।१६५ ॥

त्रयोदशन् इत्येवंप्रकारेषु संख्याशब्देषु आदेः स्वरस्य परेण सस्वरेण व्यञ्जनेन सह एद् भवति ॥

तेरह । तेवीसा । तेत्तीसा ॥

**[ एत् त्रयोदशादौ ]** एत् प्रथमा सि । त्रयोदश आदौ यस्य सः = त्रयोदशादिस्तस्मिन् = त्रयोदशादौ । सप्तमी ङि ।

**[ स्वरस्य ]** स्वर षष्ठी ङस् ।

**[ सस्वरव्यञ्जनेन ]** सस्वरव्यञ्जन तृतीया टा ।

**[ तेरह ]** त्रयोदश । अनेन त्रयो० → ते० । 'संख्या-गद्गदे रः' (१।२१९) दस्य र० । 'दश-पाषाणे हः' (१।२६२) शस्य ह० **तेरह** ।

**[ तेवीसा ]** त्रयोविंशति । अनेन त्रयो० → ते० । 'ईर्जिह्वा-सिंह-त्रिंशद्विंशतौ त्या' (१।९२) विं० → वीं० - तिलोपश्च । 'विंशत्यादेर्लुक्' (१।२८) अनुस्वारलुक् । 'श-षोः सः' (१।२६०) श० → स० । **प्रथमा जस्** । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्०' (३।१२) दीर्घः- स० → सा० **तेवीसा** ।

**[ तेत्तीसा ]** त्रयस्त्रिंशत् । अनेन त्रय० → ते० । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'सर्वत्र०' (२।७९) र्लुक् । 'ईर्जिह्वा-सिंह०' (१।९२) तिं० → तीं० । 'विंशत्यादेर्लुक्' (१।२८) अनुस्वारलुक् । [1]'तैलादौ' (२।९८) द्वित्वं-ती० → त्ती० । 'श-षोः सः' (१।२६०) श० → स० । 'अन्त्यव्य०' (१।११) त्लुक् । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - स० → सा० **तेत्तीसा** ॥१६५॥

---

१. J. 'अनादौ०' (२।८९) ।

## स्थविर-विचकिला-ऽयस्कारे ॥ ८।१।१६६ ॥

एषु आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह एद् भवति ॥

थेरो । वेइल्लं । [१]मुद्ध-विअइल्ल-पसूणपुञ्जा इत्यपि दृश्यते । एक्कारो ॥

**[ स्थविरविचकिलाऽयस्कारे ]** स्थविरश्च विचकिलं च (लश्च) अयस्कारश्च = स्थविरविचकिलाऽयस्कारम्, तस्मिन् = स्थविरविचकिलाऽयस्कारे । सप्तमी ङि ।

**[ थेरो ]** स्थविर । अनेन स्थवि० → स्थे० । 'क-ग-ट-ड०' (२।७७) स्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **थेरो** ।

**[ वेइल्लं ]** विचकिल । अनेन विच० → वे० । 'क-ग-च-ज०' (२।७७) क्लुक् । 'तैलादौ' (२।९८) द्वित्वं - ल० → ल्ल० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वेइल्लं** ।

**[ एक्कारो ]** अयस्कार । अनेन अय० → ए० । 'क-ग-ट-ड०' (१।१७७) स्लुक् । 'अनादौ०' (२।८९) द्वित्वं - का० → क्का० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **एक्कारो** ॥१६६॥

## वा कदले ॥ ८।१।१६७ ॥

कदलशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह एद् वा भवति ॥

केलं कयलं । केली कयली ॥

**[ वा कदले ]** वा प्रथमा सि । कदल सप्तमी ङि ।

**[ केलं कयलं ]** कदल । अनेन कद० → वा एकारः-के० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **केलं** ।

द्वितीये कदल । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कयलं** ।

**[ केली कयली ]** [२]कदली । अनेन वा कद० → के० । द्वितीये 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **केली कयली** ॥१६७॥

## वेतः कर्णिकारे ॥ ८।१।१६८ ॥

कर्णिकारे इतः सस्वरव्यञ्जनेन सह एद् वा भवति ॥ कणेरो कणिआरो ॥

**[ वेतः कर्णिकारे ]** वा प्रथमा सि । इत् षष्ठी ङस् । कर्णिकार सप्तमी ङि ।

---

१. फुल्लुक्करं कलमकूरसमं वहन्ति, जे सिंदूवार-विडवा मह वल्लहा ते ।
जे गालिअस्स महिसीदहिणो सरिच्छा, ते किं च **मुद्ध-विअइल्ल-पसूणपुञ्जा** ॥ [क० म० १।१९]
पुष्पोत्करं कमलकूरसमं वहन्ति, ये सिन्दुवारविटपा मम वल्लभास्ते ।
ये गालितस्य महिषीदध्नः सदृक्षाः, ते किं च मुग्ध-विचकिल-प्रसूनपुञ्जाः ॥

२. D. G. टिप्पनकं-केचित् कदलीवाचकं कदलशब्दमाहुः । कदलप्रकृतिः । 'जातेरयान्त०' (२।४।५४) ङीप्र० ।

**[ कणेरो कणिआरो ]** कर्णिकार । अनेन र्णे० । 'सर्वत्र०' (२।७९) र्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **कणेरो** ।

कर्णिकार । 'सर्वत्र ल०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **कणिआरो** ॥१६८॥

## अयौ वैत् ॥ ८।१।१६९ ॥

अयिशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह [1]ऐद् वा भवति ॥

ऐ बीहेमि । अइ उम्मत्तिए ॥ वचनादैकारस्यापि प्राकृते प्रयोगः ॥

**[ अयौ वैत् ]** अयि सप्तमी ङि । वा प्रथमा सि । ऐत् प्रथमा सि ।

**[ ऐ बीहेमि ]** अयि । अनेन अयि० → ऐ० । 'ञिभींक् भये' (११३२) भी । 'भियो भा-बीहौ' (४।५३) भी० → बीह० । वर्त्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'वर्त्तमाना-पञ्चमी-शतृषु वा' (३।१५८) इति हे० । **ऐ बीहेमि** ।

**[ अइ उम्मत्तिए ! ]** अयि उन्मत्तिके ! । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । **अइ** । अज्ञाता उन्मत्ता । 'कुत्सिता०' (७।३।३३) कप्प्र० → क । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ० । 'न्मो मः' (२।६१) न्म० → म० । 'अनादौ०' (२।८९) द्वित्वम् । आम० सि । 'वाप ए' (३।४१) एत्वम् । 'क-ग०' (१।१७७) क्लुक् । 'अन्त्य०' (१।११) स्लुक् **उम्मत्तिए !** ॥१६९॥

## ओत् पूतर-बदर-नवमालिका-नवफलिका-पूगफले ॥ ८।१।१७० ॥

पूतरादिषु आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ओद् भवति ॥

पोरो । बोरं । बोरी । नोमालिआ । नोहलिआ । पोप्फलं पोप्फली ॥

**[ ओत् ]** ओत् प्रथमा सि ।

**[ पूतरबदरनवमालिकानवफलिकापूगफले ]** पूतरश्च बदरं च नवमालिका च नवफलिका च पूगफलं च = पूतरबदरनवमालिकानवफलिकापूगफलम्, तस्मिन् = पूतरबदरनवमालिकानवफलिकापूगफले । सप्तमी ङि ।

**[ पोरो ]** पूतर । अनेन पूतस्य पो० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **पोरो** ।

**[ बोरं ]** बदर । अनेन बदस्य बो० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **बोरं** ।

**[ बोरी ]** बदर । गौरादित्वात् ङी-बदरी । अनेन बदस्य बो० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **बोरी** ।

**[ नोमालिआ ]** नवमालिका । अनेन नवस्य नो० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **नोमालिआ** ।

---

१. B.C. वा एत् ।

**[ नोहलिआ ]** नवफलिका । अनेन नवस्य नो० । 'फो भ-हौ' (१।२३६) फ० → ह० । 'क-ग-च-ज०' (१।१७७) क्लुक् **नोहलिआ** ।

**[ पोप्फलं पोप्फली ]** पूगशब्दोऽनेकार्थो वृक्षे-फले च वर्त्तते । पूगफल (२) । पूगस्य फलम् । अनेन पूगस्य पो० । [१]'सेवादौ वा' (२।९९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य प० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पोप्फलं** । द्वितीये गौरादित्वात् ङी । 'अन्त्यव्य०' (१।११) स्लुक् **पोप्फली** ॥१७०॥

## नवा मयूख-लवण-चतुर्गुण-चतुर्थ-चतुर्दश-चतुर्वार-सुकुमार-कुतूहलोदूखलोलूखले ॥ ८।१।१७१ ॥

मयूखादिषु आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ओद् वा भवति ॥

मोहो मऊहो । लोणं । इअ लवणुग्गम । चोग्गुणो चउग्गुणो । चोत्थो चउत्थो । चोत्थी चउत्थी । चोद्दह चउद्दह । चोद्दसी चउद्दसी । चोव्वारो चउवारो । सोमालो सुउमालो । कोहलं कोउहल्लं । [२]तह मन्ने कोहलिए ! । ओहलो उऊहलो । ओक्खलं उलूहलं ॥ मोरो मऊरो इति तु मोर-मयूरशब्दाभ्यां सिद्धम् ॥

**[ नवा मयूखलवणचतुर्गुणचतुर्थचतुर्दशचतुर्वारसुकुमारकुतूहलोदूखलोलूखले ]** नवा प्रथमा सि । मयूखश्च लवणं च चतुर्गुणश्च चतुर्थश्च चतुर्दश च चतुर्वारश्च सुकुमारश्च कुतूहलं च उदूखलश्च उलूखलं च = मयूखलवणचतुर्गुणचतुर्थचतुर्दश-चतुर्वारसुकुमारकुतूहलोदूखलोलूखले । सप्तमी ङि ।

**[ मोहो मऊहो ]** मयूख । अनेन मयूस्थाने मो० । 'ख-घ-थ-ध-भाम्' (१।१८७) ख० → ह० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **मोहो** । पक्षे-'क-ग-च-ज०' (१।१७७) य्लुक् । शेषं पूर्ववत् । **मऊहो** ।

**[ लोणं इअ लवणुग्गम ]** लवण । अनेन लवस्य लो० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **लोणं** । इति लवणोद्गम । 'इतौ तो वाक्यादौ' (१।९१) ति० → त० । 'क-ग-च-ज०' (१।१७७) त्लुक् **इअ** । 'ह्रस्वः संयोगे' (१।८४) णो० → णु० । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् **लवणुग्गम** ।

**[ चोग्गुणो चउग्गुणो ]** चतुर्गुण । अनेन चतुस्थाने चो० । 'सर्वत्र०' (२।७९) र्लुक् । [३]'अनादौ०' (२।८९) गस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **चोग्गुणो** । द्वितीये 'क-ग-च-ज०' (१।१७७) त्लुक् । शेषं तद्वत् । **चउग्गुणो** ।

**[ चोत्थो चउत्थो ]** चतुर्थ । अनेन चतुस्थाने चो० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।८९) पूर्वथस्य तः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **चोत्थो** । द्वितीये 'क-ग-च-ज०' (१।१७७) त्लुक् । शेषं पूर्ववत् । **चउत्थो** ।

**[ चोत्थी चउत्थी ]** चतुर्थी । अनेन चतुस्थाने चो० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **चोत्थी** । द्वितीये 'क-ग-च-ज०' (१।१७७) त्लुक् । 'सर्वत्र०' (२।७९) र्लुक् । शेषं पूर्ववत् । **चउत्थी** ।

---

१. D. G. L. 'समासे वा' (२।९७) । J. 'अनादौ०' (२।८९) ।

२. जह लंघेसि परवइं निययवइं भरसहं पि मोत्तूण । **तह मन्ने कोहलिए !** अज्जं कल्लं व फुट्टिहिसि ॥ [गा० को० ७।१६]
यथा लङ्घयसि परवृत्तिं(परपतिं) निजवृत्तिं भरसहां(निजपतिं भरसहं) अपि मुक्त्वा ।
तथा मन्ये कूष्माण्डि ! (कुतूहलिनि !) अद्य श्वो वा विकसिष्यसि (प्रकटीभविष्यसि) ॥ ३. B.G. 'तैलादौ०' (२।८९) ।

**[ चोद्दह चउद्दह ]** चतुर्दश । अनेन चतुस्थाने चो० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) दस्य द्वित्वम् । 'दश-पाषाणे हः' (१।२६२) श० → ह० **चोद्दह** । द्वितीये 'क-ग-च-ज०' (१।१७७) त्लुक् । शेषं पूर्ववत् । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **चउद्दह** ।

**[ चोद्दसी चउद्दसी ]** चतुर्दशी । अनेन चतुस्थाने चो० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) दस्य द्वित्वम् । 'श-षोः सः' (१।२६०) शी० → सी० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **चोद्दसी** । द्वितीये 'क-ग-च-ज०' (१।१७७) त्लुक् । शेषं तद्वत् । **चउद्दसी** ।

**[ चोव्वारो चउव्वारो ]** चतुर्वार । अनेन चतुस्थाने चो० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **चोव्वारो** । द्वितीये 'क-ग-च-ज०' (१।१७७) त्लुक् । शेषं तद्वत् । **चउव्वारो** ।

**[ सोमालो [1]सुउमालो ]** सुकुमार । अनेन वा सुकुस्थाने सो० । 'हरिद्रादौ लः' (१।२५४) रस्य लः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **सोमालो** । द्वितीये 'क-ग-च-ज०' (१।१७७) क्लुक् **सुउमालो** ।

**[ कोहलं कोउहल्लं ]** कुतूहल । अनेन वा कुतूस्थाने को० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कोहलं** । द्वितीये **'कुतूहले वा ह्रस्वश्च'** (१।११७) कु० → को० – तू० → तु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'सेवादौ वा' (२।९९) लस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कोउहल्लं** ।

**[ तह मन्ने कोहलिए ! ]** तथा । 'ख-घ-थ-ध-भाम्' (१।१८७) था० → हा० । 'वाऽव्ययोत्खातादावदातः' (१।६७) हा० → ह० **तह** । मन्ये । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वं **मन्ने** । कोहल पूर्ववत् । कौ(कु)तूहलमस्यास्तीति । 'अतोऽनेकस्व०' (७।२।६) इकप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । आमन्त्रणे प्रथमा सि । 'वाप ए' (३।४१) एकारः **कोहलिए !** ।

**[ ओहलो उऊहलो ]** उदूखल । अनेन उदूस्थाने ओ० । 'ख-घ-थ-ध-भाम्' (१।१८७) ख० → ह० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **ओहलो** । द्वितीये 'क-ग-च-ज०' (१।१७७) द्लुक् । शेषं पूर्ववत् । **उऊहलो** ।

**[ ओक्खलं उलूहलं ]** उलूखल । अनेन उलूस्थाने ओ० । [2]'सेवादौ वा' (२।९९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **ओक्खलं** । पक्षे- 'ख-घ-थ-ध-भाम्' (१।१८७) ख० → ह० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **उलूहलं** ।

**[ मोरो मऊरो ]** मोर । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **मोरो** । मयूर । 'क-ग-च-ज-त-द-प-य०' (१।१७७) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **मऊरो** ॥१७१॥

---

१. G. I. J. L. M. सुकुमालो । २. J. L. 'अनादौ०' (२।८९) ।

## अवापोते ॥ ८।१।१७२ ॥

अवापयोरुपसर्गयोरुत इति विकल्पार्थनिपाते च आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ओद् वा भवति ॥

अव - ओअरइ अवयरइ । ओआसो अवयासो ॥

अप - ओसरइ अवसरइ । ओसारिअं अवसारिअं ॥

उत - ओ वणं उअ वणं । ओ घणो उअ घणो ॥

क्वचिन्न भवति - अवगयं । अवसद्दो । उअ रवी ॥

**[ अवापोते ]** अव-अप-उत सप्तमी ङि ।

**[ ओअरइ अवयरइ ]** अवतरति । अनेन वा अवस्य ओ० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'त्यादीनामाद्यत्रयस्याद्यस्येचेचौ' (३।१३९) ति० → इ० **ओअरइ** । पक्षे-**अवयरइ** ।

**[ ओआसो अवयासो ]** अवकाश । अनेन वा अवस्य ओ० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **ओआसो** । पक्षे-'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० **अवयासो** ।

**[ ओसरइ अवसरइ ]** अपसरति । अनेन वा अपस्य ओ० । 'त्यादीना०' (३।१३९) ति० → इ० **ओसरइ** । पक्षे-'पो वः' (१।२३१) प० → व० **अवसरइ** ।

**[ ओसारिअं अवसारिअं ]** अपसारित । अनेन अपस्य ओ० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **ओसारिअं** । पक्षे- 'पो वः' (१।२३१) प० → व० । शेषं पूर्ववत् । **अवसारिअं** ।

**[ ओ वणं उअ वणं ]** उत-वन । अनेन वा उतस्य ओ० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **ओ वणं** । पक्षे- 'क-ग-च-ज०' (१।१७७) त्लुक् **उअ वणं** ।

**[ ओ घणो उअ घणो ]** उत-घन । अनेन वा उतस्य ओ० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **ओ घणो** । पक्षे- 'क-ग-च-ज०' (१।१७७) त्लुक् **उअ घणो** ।

क्वचिन्न स्यात्- **[ अवगयं ]** अव-गत । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अवगयं** ।

**[ अवसद्दो ]** अप-शब्द । 'पो वः' (१।२३१) पस्य वः । 'श-षोः सः' (१।२६०) श० → स० । 'सर्वत्र०' (२।७९) ब्लुक् । 'अनादौ०' (२।८९) दस्य द्वित्वम् **अवसद्दो** ।

**[ उअ रवी ]** उत-रवि । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः- वि० → वी० । 'अन्त्यव्य०' (१।११) स्लुक् **उअ रवी** ॥१७२॥

## ऊच्चोपे ॥ ८।१।१७३ ॥

उपशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ऊत्-ओच्चादेशौ वा भवतः ॥

ऊहसिअं ओहसिअं उवहसिअं । उज्झाओ ओज्झाओ उवज्झाओ । ऊआसो ओआसो उववासो ॥

**[ ऊच्चोपे ]** ऊत् प्रथमा सि । च प्रथमा सि । उप सप्तमी ङि ।

**[ ऊहसिअं ओहसिअं उवहसिअं ]** उप-हसित । अनेन वा उपस्य ऊ० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **ऊहसिअं** । द्वितीये अनेन उपस्य ओ० । शेषं तद्वत् । **ओहसिअं** । तृतीये 'पो वः' (१।२३१) प० → व० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **उवहसिअं** ।

**[ ऊज्झाओ ओज्झाओ उवज्झाओ ]** उप-अध्याय । अनेन प्रथमे उपस्य ऊ० । द्वितीये उपस्य ओ० । तृतीये 'पो वः' (१।२३१) प० → व० । 'ह्रस्वः संयोगे' (१।८४) पा० → प० । 'साध्वस-ध्य-ह्यां झः' (२।२६) ध्यस्य झः । [१]'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वझस्य ज० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **ऊज्झाओ ओज्झाओ उवज्झाओ** ।

**[ ऊआसो ओआसो उववासो ]** उप-वास । अनेन वा उपस्य ऊ० । 'क-ग-च-ज०' (१।१७७) व्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **ऊआसो** । पक्षे - उपस्य ओ० । शेषं पूर्ववत् । **ओआसो** । तृतीये 'पो वः' (१।२३१) पस्य वः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **उववासो** ॥१७३॥

## उमो निषण्णे ॥ ८।१।१७४ ॥

निषण्णशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह उम आदेशो वा भवति ॥ णुमण्णो णिसण्णो ॥

**[ उमो निषण्णे ]** उम प्रथमा सि । निषण्ण सप्तमी ङि ।

**[ णुमण्णो ]** निषण्ण । अनेन वा निषस्थाने उमादेशः । 'वाऽऽदौ' (१।२२९) आदेर्नकारस्य वा णत्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **णुमण्णो** ।

**[ णिसण्णो ]** निषण्ण । 'वाऽऽदौ' (१।२२९) न० → ण० । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **णिसण्णो** ॥१७४॥

## प्रावरणे अङ्ग्वाऊ ॥ ८।१।१७५ ॥

प्रावरणशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह अङ्गु-आउ इत्येतावादेशौ वा भवतः ॥

पङ्गुरणं पाउरणं पावरणं ॥

**[ प्रावरणे अङ्ग्वाऊ ]** प्रावरण सप्तमी ङि । अङ्गु-आउ प्रथमा औ ।

**[ पङ्गुरणं पाउरणं पावरणं ]** प्रावरण । 'सर्वत्र०' (२।७९) र्लुक् । अनेन वा पावस्य पङ्गु-द्वितीये पावस्य पाउ० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पङ्गुरणं पाउरणं** । तृतीये 'सर्वत्र०' (२।७९) र्लुक् **पावरणं** ॥१७५॥

---

१. G. 'तैलादौ' (२।९८) ।

## स्वरादसंयुक्तस्याऽनादेः ॥ ८।१।१७६ ॥

अधिकारोऽयम् । यदित ऊर्ध्वमनुक्रमिष्यामस्तत्स्वरात्परस्याऽसंयुक्तस्याऽनादेर्भवतीति वेदितव्यम् ॥१७६॥

## क-ग-च-ज-त-द-प-य-वां प्रायो लुक् ॥ ८।१।१७७ ॥

स्वरात्परेषामनादिभूतानामसंयुक्तानां कगचजतदपयवानां प्रायो लुग् भवति ॥

क - तित्थयरो । लोओ । सयढं । ग - नओ । नयरं । मयङ्को । च - सई । कयग्गहो । ज - रययं । पयावई । गओ । त - [1]वियाणं । रसायलं । जई । द - गया । मयणो । प - रिऊ । सुउरिसो । य - दयालू । नयणं । विओओ । व - लायण्णं । विउहो । वलयाणलो ॥

प्रायो ग्रहणात्क्वचिन्न भवति - सुकुसुमं । पयागजलं । सुगओ । अगरू । सचावं । विजणं । सुतारं । विदुरो । सपावं । समवायो । देवो । दाणवो ॥

स्वरादित्येव - संकरो । संगमो [2]नत्तंचरो । धणंजओ । विसंतवो । पुरंदरो । संवुडो । संवरो ॥

असंयुक्तस्येत्येव - अक्को । वग्गो । अच्चो । वज्जं । धुत्तो । उद्दामो । विप्पो । कज्जं । सव्वं ॥

क्वचित्संयुक्तस्यापि - नक्तंचरः → नक्कंचरो ॥

अनादेरित्येव - कालो । गंधो । चोरो । जारो । तरू । दवो । पावं । वणो ॥

यकारस्य तु जत्वमादौ वक्ष्यते । समासे तु वाक्यविभक्त्यपेक्षया भिन्नपदत्वमपि विवक्ष्यते, तेन तत्र यथादर्शनमुभयमपि भवति - सुहकरो सुहयरो । आगमिओ आयमिओ । जलचरो जलयरो । बहुतरो बहुअरो । सुहदो सुहओ इत्यादि ॥

क्वचिदादेरपि - स पुनः → स उण । स च → सो अ । चिह्नं → इन्धं ॥

क्वचिच्चस्य जः - पिशाची → पिसाजी ॥

एकत्वम् → एगत्तं । एकः → एगो । अमुकः → अमुगो । असुकः → असुगो । श्रावकः → सावगो । आकारः → आगारो । तीर्थकरः → तित्थगरो । आकर्षः → आगरिसो । [3]लोगस्सुज्जोअगरा इत्यादिषु तु 'व्यत्ययश्च' (४।४४७) इत्येव कस्य गत्वम् ॥

आर्षे अन्यदपि दृश्यते - आकुञ्चनं → आउण्टणं । अत्र चस्य टत्वम् ॥

**[कगचजतदपयवाम्]** कश्च गश्च चश्च जश्च तश्च दश्च पश्च यश्च व् च = कगचजतदपयवस्तेषाम् = कगचजतदपयवाम्। षष्ठी आम् ।

**[प्रायो लुक्]** प्राय प्रथमा सि । लुक् प्रथमा सि ।

**[तित्थयरो]** तीर्थकर । 'ह्रस्वः संयोगे' (१।८४) ती० → ति० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । अनेन क्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । प्रथमा सि। 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **तित्थयरो** ।

---

१. D. H. I. L. M. पा० म०-विआणं । २. J. H. I. G. L. M. नक्कंचरो । G. क्वचित् संयुक्तस्याऽपि लोप इत्यनेन अधस्तनस्य तकारस्य लोपः ।

३. **लोगस्स उज्जोअगरे,** धम्मतित्थयरे जिणे । अरिहंते कित्तइस्सं, चउवीसं पि केवली ॥ [आवश्यकसूत्रे चतुर्विंशतिस्तवे गा० १] लोकस्य उद्योतकरान्, धर्मतीर्थकरान् जिनान् । अर्हतः कीर्तयिष्यामि, चतुर्विंशतिमपि केवलिनः ॥

**[ लोओ ]** लोक । प्रथमा सि । अनेन क्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **लोओ** ।

**[ सयढं ]** शकट । 'श-षोः सः' (१।२६०) श० → स० । अनेन क्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'सटा-शकट-कैटभे ढः' (१।१९६) टस्य ढः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **सयढं** ।

**[ नओ ]** नग । प्रथमा सि । अनेन ग्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **नओ** ।

**[ नयरं ]** नगर । अनेन ग्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **नयरं** । 'नो णः' (१।२२८) [वाऽऽदौ (१।२२९)] **णयरं** वा ।

**[ मयङ्को ]** मृगाङ्क । 'ऋतोऽत्' (१।१२६) मृ० → म० । 'ह्रस्वः संयोगे' (१।८४) गा० → ग० । अनेन ग्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **मयङ्को** ।

**[ सई ]** शची । 'श-षोः सः' (१।२६०) श० → स० । अनेन च्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सई** ।

**[ कयग्गहो ]** कचग्रह । अनेन च्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वं-ग० → ग्ग० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **कयग्गहो** ।

**[ रययं ]** रजत । अनेन ज्लुक्-त्लुक् च । 'अवर्णो०' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **रययं** ।

**[ पयावई ]** प्रजापति । 'सर्वत्र०' (२।७९) र्लुक् । अनेन ज्लुक्-त्लुक् च । 'अवर्णो०' (१।१८०) अ० → य० । 'पो वः' (१।२३१) प० → व० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः- इ० → ई० । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **पयावई** ।

**[ गओ ]** गज । अनेन ज्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **गओ** ।

**[ वियाणं ]** वितान । अनेन त्लुक् । 'अवर्णो०' (१।१८०) आ० → या० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वियाणं** ।

**[ रसायलं ]** रसातल । प्रथमा सि । अनेन त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **रसायलं** ।

**[ जई ]** यति । प्रथमा सि । 'आदेर्यो जः' (१।२४५) य० → ज० । अनेन त्लुक् । 'अक्लीबे सौ' (३।१९) दीर्घः - इ० → ई० । 'अन्त्य०' (१।११) स्लुक् **जई** ।

**[ गया ]** गदा । प्रथमा सि । अनेन द्लुक् । 'अवर्णो०' (१।१८०) आ० → या० । 'अन्त्यव्य०' (१।११) स्लुक् **गया** ।

**[ मयणो ]** मदन । प्रथमा सि । अनेन द्लुक् । 'अवर्णो॰' (१।१८०) अ॰ → य॰ । 'नो णः' (१।२२८) न॰ → ण॰ । 'अतः सेर्डोः' (३।२) सि॰ → डो॰ → ओ॰ । 'डित्यन्त्य॰' (२।१।११४) अलुक् **मयणो** ।

**[ रिऊ ]** रिपु । प्रथमा सि । अनेन प्लुक् । 'अक्लीबे सौ' (३।१९) दीर्घः- उ॰ → ऊ॰ । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **रिऊ** ।

**[ सुउरिसो ]** सुपुरुष । अनेन प्लुक् । 'पुरुषे रोः' (१।१११) रु॰ → रि॰ । 'श-षोः सः' (१।२६०) ष॰ → स॰ । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि॰ → डो॰ → ओ॰ । 'डित्यन्त्य॰' (२।१।११४) अलुक् **सुउरिसो** ।

**[ दयालू ]** दयालु । प्रथमा सि । अनेन य्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ॰ → या॰ । 'अक्लीबे सौ' (३।१९) दीर्घः - लु॰ → लू॰ । 'अन्त्य॰' (१।११) स्लुक् **दयालू** ।

**[ नयणं ]** नयन । अनेन य्लुक् । 'अवर्णो॰' (१।१८०) अ॰ → य॰ । 'नो णः' (१।२२८) न॰ → ण॰ । प्रथमा सि । 'क्लीबे॰' (३।२५) सि॰ → म्॰ । 'मोऽनु॰' (१।२३) अनुस्वारः **नयणं** ।

**[ विउओ ]** वियुत । प्रथमा सि । अनेन य्लुक् - त्लुक् च । 'अतः सेर्डोः' (३।२) सि॰ → डो॰ → ओ॰ । 'डित्यन्त्य॰' (२।१।११४) अलुक् **विउओ** ।

**[ लायण्णं ]** लावण्य । अनेन व्लुक् । 'अवर्णो॰' (१।१८०) अ॰ → य॰ । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ॰' (२।८९) द्वित्वं - ण्ण॰ । प्रथमा सि । 'क्लीबे॰' (३।२५) सि॰ → म्॰ । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **लायण्णं** ।

**[ विउहो ]** विबुध । प्रथमा सि । अनेन ब्लुक् । 'ख-घ-थ-ध-भाम्' (१।१८७) ध॰ → ह॰ । 'अतः सेर्डोः' (३।२) सि॰ → डो॰ → ओ॰ । 'डित्यन्त्य॰' (२।१।११४) अलुक् **विउहो** ।

**[ वलयाणलो ]** वडवानल । 'डो लः' (१।२०२) डस्य लः । अनेन व्लुक् । 'अवर्णो॰' (१।१८०) आ॰ → या॰ । 'नो णः' (१।२२८) न॰ → ण॰ । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि॰ → डो॰ → ओ॰ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् **वलयाणलो** ।

**[ सुकुसुमं ]** सुकुसुम । प्रथमा सि । 'क्लीबे॰' (३।२५) सि॰ → म्॰ । 'मोऽनु॰' (१।२३) अनुस्वारः सुकुसुमं । अत्र कलोपो न जातः ।

**[ पयागजलं ]** प्रयागजल । प्रथमा सि । 'सर्वत्र॰' (२।७९) र्लुक् । 'क्लीबे॰' (३।२५) सि॰ → म्॰ । 'मोऽनु॰' (१।२३) अनुस्वारः **पयागजलं** । अत्र गलोपो न जातः ।

**[ सुगओ ]** सुगत । 'क-ग-च-ज॰' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि॰ → डो॰ → ओ॰ । 'डित्यन्त्य॰' (२।१।११४) अलुक् **सुगओ** ।

**[ अगरू ]** अगुरु । प्रथमा सि । 'उतो मुकुलादिष्वत्' (१।१०७) गु॰ → ग॰ । 'अक्लीबे सौ' (३।१९) दीर्घः - रु॰ → रू॰ । 'अन्त्यव्य॰' (१।११) स्लुक् **अगरू** ।

**[ सचावं ]** सचाप । प्रथमा सि । 'पो वः' (१।२३१) प॰ → व॰ । 'क्लीबे॰' (३।२५) सि॰ → म्॰ । 'मोऽनु॰' (१।२३) अनुस्वारः **सचावं** ।

**[ विजणं ]** व्यजन । 'अधो म-न-याम्' (२।७८) य्लुक् । 'इः स्वप्नादौ' (१।४६) व॰ → वि॰ । 'नो णः' (१।२२८) न॰ → ण॰ । प्रथमा सि । 'क्लीबे॰' (३।२५) सि॰ → म्॰ । 'मोऽनु॰' (१।२३) अनुस्वारः **विजणं** ।

**[ सुतारं ]** सुतार । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुतारं** ।

**[ विदुरो ]** विदुर । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **विदुरो** ।

**[ सपावं ]** सपाप । प्रथमा सि । 'पो वः' (१।२३१) प० → व० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सपावं** ।

**[ समवाओ ]** समवाय । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **समवाओ** ।

**[ देवो ]** देव । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **देवो** ।

**[ दाणवो ]** दानव । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **दाणवो** ।

**[ संकरो ]** शंकर । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **संकरो** ।

**[ संगमो ]** संगम । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **संगमो** ।

**[ नत्तंचरो ]** नक्तंचर । 'क-ग-ट-ड०' (२।७७) क्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वं- तं० → त्तं० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नत्तंचरो** ।

**[ धणंजओ ]** धनंजय । 'नो णः' (१।२२८) न० → ण० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **धणंजओ** ।

**[ विसंतवो ]** द्विषंतप । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'श-षोः सः' (१।२६०) ष० → स० । 'पो वः' (१।२३१) प० → व० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विसंतवो** ।

**[ पुरंदरो ]** पुरंदर । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पुरंदरो** ।

**[ संवुडो ]** संवृत । 'उद्वृत्वादौ' (१।१३१) वृ० → वु० । 'प्रत्यादौ डः' (१।२०६) तस्य डः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **संवुडो** ।

**[ संवरो ]** संवर । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **संवरो** ।

**[ अक्को ]** अर्क । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वं -क० → क्क० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **अक्को** ।

**[ वग्गो ]** वर्ग । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वं- ग० → ग्ग० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **वग्गो** ।

**[ अच्चो ]** [1]अर्च । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) चस्य द्वित्वं- च० → च्च० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **अच्चो** ।

---

१. M. अर्च्य ।

**[ वज्जं ]** [१]वर्य । 'सर्वत्र०' (२।७९) र्लुक् । 'द्य-य्य-र्यां जः' (२।२४) र्य० → ज० । 'अनादौ०' (२।८९) जस्य द्वित्वं -ज० → ज्ज० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वज्जं** ।

**[ धुत्तो ]** धूर्त । 'ह्रस्वः संयोगे' (१।८४) धू० → धु० । 'सर्वत्र०' (२।७९) र्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **धुत्तो** ।

**[ उद्दामो ]** उद्दाम । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **उद्दामो** ।

**[ विप्पो ]** विप्र । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) पस्य द्वित्वं - प० → प्प० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **विप्पो** ।

**[ कज्जं ]** कार्य । 'ह्रस्वः संयोगे' (१।८४) का० → क० । 'द्य-य्य-र्यां जः' (२।२४) र्य० → ज० । 'अनादौ०' (२।८९) जस्य द्वित्वं- ज० → ज्ज० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **कज्जं** ।

**[ सव्वं ]** सर्व । प्रथमा सि । 'सर्वत्र ल०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वं - व० → व्व० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।११) अनुस्वारः **सव्वं** ।

**[ नक्कंचरो ]** नक्तंचर । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) तूलोपः । 'अनादौ०' (२।८९) कस्य द्वित्वं - कं० → क्कं० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नक्कंचरो नक्कंचरी** ।

**[ कालो ]** काल । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कालो** ।

**[ गंधो ]** गंध । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **गंधो** ।

**[ चोरो ]** चौर । प्रथमा सि । 'औत ओत्' (१।१५९) चौ० → चो० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **चोरो** ।

**[ जारो ]** जार । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जारो** ।

**[ तरू ]** तरु । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः- रु० → रू० । 'अन्त्यव्य०' (१।११) स्लुक् **तरू** ।

[२]**[ दवो ]** दव । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दवो** ।

**[ पावं ]** पाप । 'पो वः' (१।२३१) प० → व० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पावं** ।

[३]**[ वणो ]** व्रण । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वण्णो( णो )** ।

**[ सुहकरो सुहयरो ]** सुखकर । सुखं करोतीति । प्रथमा सि । 'ख-घ-थ-ध-भाम्' (१।१८७) ख० → ह० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सुहकरो** । द्वितीये अनेन कलोपो जातः **सुहअ( य )रो** ।

**[ आगमिओ आयमिओ ]** [४]आगमित । प्रथमा सि । आ-समन्तात् गमितः = आगमितः । 'क-ग-च-ज०' (१।१७७) तूलुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **आगमिओ** । द्वितीये अनेन गलोपो जातः । 'अवर्णो०' (१।१८०) अ० → य० **आयमिओ** ।

---

१. M. वर्ज्य । L. वज्र । २. K. देवो । ३. H. I. J. L. M. वण्णो । ४. M. आगमिक ।

**[ जलचरो जलयरो ] जलचरो** । द्वितीये च्लुक् - **जलयरो** ।

**[ बहुतरो बहुअरो ] बहुतरो** । द्वितीये त्लुक् - **बहुअरो** ।

**[ सुहदो सुहओ ]** सुखद । 'ख-घ-थ-ध-भाम्' (१।१८७) ख० → ह० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सुहदो** । द्वितीये द्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सुहओ** ।

**[ स उण ]** स पुनः । प्लुक् । 'नो णः' (१।२२८) न० → ण० । 'अन्त्यव्य०' (१।११) र्लुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **स उण** ।

**[ सो अ ]** स च । 'क-ग-च-ज०' (१।१७७) च्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **सो अ** ।

**[ इन्धं ]** चिह्न । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'चिह्ने न्धो वा' (२।५०) न्ध० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **इन्धं** ।

**[ पिसाजी ]** पिशाची । 'श-षोः सः' (१।२६०) शा० → सा० । चस्य जः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **पिसाजी** ।

**[ एगत्तं ]** एकत्व । कस्य गः । 'सर्वत्र०' (२।७९) व्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वं- त० → त्त० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **एगत्तं** ।

**[ एगो ]** एक । प्रथमा सि । कस्य गः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **एगो** ।

**[ अमुगो ]** अमुक । प्रथमा सि । कस्य गः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अमुगो** ।

**[ असुगो ]** असुक । प्रथमा सि । कस्य गः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **असुगो** ।

**[ सावगो सावओ ]** श्रावक । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शा० → सा० । कस्य गः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सावगो** । पक्षे - 'क-ग-च-ज०' (१।१७७) क्लुक् । शेषं तद्वत् । **सावओ** ।

**[ आगारो ]** आकार । प्रथमा सि । कस्य गः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आगारो** ।

**[ तित्थगरो ]** तीर्थकर । 'ह्रस्वः संयोगे' (१।८४) ती० → ति० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । कस्य गः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तित्थगरो** । पक्षे - 'क-ग-च-ज०' (१।१७७) क्लुक् **तित्थयरो** ।

**[ आगरिसो ]** आकर्ष । कस्य गः । 'र्श-र्ष-तप्त-वज्रे वा' (२।१०५) षात् प्राग् इकारः । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आगरिसो** ।

**[ लोगस्सुज्जोअगरा ]** लोकस्य उद्योतकराः । 'व्यत्ययश्च' (४।४४७) कस्य गः । 'ङसः स्सः' (३।१०) लोगस्स । 'द्य-य्य-र्यां जः' (२।२४) द्यस्य जः । 'अनादौ०' (२।८९) जस्य द्वित्वं-ज० → ज्ज० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्०' (३।१२) दीर्घः-र० → रा० । **लोगस्स उज्जोअगरा** ।

आर्षे अन्यदपि दृश्यते-

**[ आउण्टणं ]** आकुञ्चन । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'नो णः' (१।२२८) न० → ण० । चस्य टः **आउण्टणं** ॥१७७॥

## यमुना-चामुण्डा-कामुका-ऽतिमुक्तके मोऽनुनासिकश्च ॥ ८।१।१७८ ॥

एषु मस्य लुग् भवति, लुकि च सति मस्य स्थाने अनुनासिको भवति ॥

जउँणा । चाउँण्डा । काउँओ । अणिउँतयं ॥ क्वचिन्न भवति- अइमुंतयं अइमुत्तयं ॥

**[ यमुनाचामुण्डाकामुकाऽतिमुक्तके ]** यमुना च चामुण्डा च कामुकश्च अतिमुक्तकं च = यमुनाचामुण्डाकामुकाऽतिमुक्तकम्, तस्मिन् = यमुनाचामुण्डाकामुकाऽतिमुक्तके । सप्तमी ङि ।

**[ मोऽनुनासिकश्च ]** म् षष्ठी ङस् । अनुनासिक प्रथमा सि । च प्रथमा सि ।

**[ जउँणा ]** यमुना । 'आदेर्यो जः' (१।२४५) यस्य जः । अनेन म्लुक्-अनुनासिकश्च । 'नो णः' (१।२२८) ना० → णा० । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **जउँणा** ।

**[ चाउँण्डा ]** चामुण्डा । प्रथमा सि । अनेन म्लुक्-अनुस्वारश्च (अनुनासिकश्च) । 'अन्त्यव्य०' (१।११) स्लुक् **चाउँण्डा** ।

**[ काउँओ ]** कामुक । अनेन म्लुक् - मस्य स्थाने अनुस्वारश्च (अनुनासिकश्च) । 'क-ग-च-ज०' (१।१७७) क्लुक्। प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **काउँओ** ।

**[ अणिउँतयं ]** अतिमुक्तक । अनेन म्लुक्-अनुस्वारश्च (अनुनासिकश्च) । 'गर्भिता-ऽतिमुक्तके णः' (१।२०८) तस्य णः। 'क-ग-ट-ड०' (२।७७) क्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । प्रथमा सि। 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अणिउँतयं** ।

**[ अइमुंतयं अइमुत्तयं ]** अतिमुक्तक । 'क-ग-च-ज०' (१।१७७) त्लुक् - क्लुक् च । 'वक्रादावन्तः' (१।२६) अनुस्वारः । 'क-ग-ट-ड०' (२।७७) क्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अइमुंतयं** । 'अनादौ०' (२।८९) तस्य द्वित्वं- त० → त्त० **अइमुत्तयं** ॥१७८॥

## नाऽवर्णात् पः ॥ ८।१।१७९ ॥

अवर्णात् परस्य अनादेः पस्य लुग् न भवति ॥ सवहो ॥ सावो ॥ अनादेरित्येव - परउट्ठो ॥

**[ नाऽवर्णात् पः ]** न प्रथमा सि । अवर्ण पञ्चमी ङसि । प् षष्ठी ङस् ।

**[ सवहो ]** शपथ । 'श-षोः सः' (१।२६०) श० → स० । 'पो वः' (१।२३१) प० → व० । 'ख-घ-थ-ध-भाम्' (१।१८७) थ० → ह० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सवहो** ।

**[ सावो ]** शाप । 'श-षोः सः' (१।२६०) शा० → सा० । 'पो वः' (१।२३१) प० → व० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सावो** ।

**[ परउट्ठो ]** परपुष्ट । 'क-ग-च-ज०' (१।१७७) प्लुक् । 'ष्टस्याऽनुष्ट्रेष्टा०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **परउट्ठो** ॥१७९॥

## अवर्णो यश्रुतिः ॥ ८।१।१८० ॥

क-ग-च-जेत्यादिना लुकि सति शेषोऽवर्णोऽवर्णात् परो लघुप्रयत्नतरयकारश्रुतिर्भवति ॥

तित्थयरो । सयढं । नयरं । मयङ्को । कयग्गहो । कायमणी । रययं । पयावई । रसायलं । पायालं । मयणो । गया। नयणं । दयालू । लायण्णं ॥

अवर्ण इति किम् ? सउणो । पउणो । पउरं । राईवं । [1]निहओ । निनओ । वाऊ । कई ॥

अवर्णादित्येव- लोअस्स । देअरो ॥ क्वचिद् भवति - पियइ ॥

**[ अवर्णो यश्रुतिः ]** अवर्ण प्रथमा सि । यश्रुति प्रथमा सि ।

**[ तित्थयरो ]** तीर्थकर । 'ह्रस्वः संयोगे' (१।८४) ती० → ति० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । 'क-ग-च-ज०' (१।१७७) क्लुक् । अनेन अ० → य० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **तित्थयरो** ।

**[ सयढं ]** शकट । 'श-षोः सः' (१।२६०) श० → स० । 'क-ग-च-ज०' (१।१७७) क्लुक् । अनेन अ० → य० । 'सटा-शकट-कैटभे ढः' (१।१९६) टस्य ढः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सयढं** ।

**[ नयरं ]** नगर । 'क-ग-च-ज०' (१।१७७) ग्लुक् । अनेन अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **नयरं** ।

**[ मयङ्को ]** मृगाङ्क । 'ऋतोऽत्' (१।१२६) मृ० → म० । 'ह्रस्वः संयोगे' (१।८४) गा० → ग० । 'क-ग-च-ज०' (१।१७७) ग्लुक् । अनेन अ० → य० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मयङ्को** ।

**[ कयग्गहो ]** कचग्रह । 'क-ग-च-ज०' (१।१७७) च्लुक् । अनेन अ० → य० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वं -ग० → ग्ग० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कयग्गहो** ।

**[ कायमणी ]** काचमणि । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) च्लुक् । अनेन अ० → य० । 'अक्लीबे सौ' (३।१९) दीर्घः - णि० → णी० । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **कायमणी** ।

**[ रययं ]** रजत । 'क-ग-च-ज०' (१।१७७) ज्लुक्-त्लुक् च । अनेन अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **रययं** ।

**[ पयावई ]** प्रजापति । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् - त्लुक् च । अनेन आ० → या० । 'पो वः' (१।२३१) प० → व० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - इ० → ई० । 'अन्त्य०' (१।११) स्लुक् **पयावई** ।

**[ रसायलं ]** रसातल । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **रसायलं** ।

---

१. K. निहिओ ।

**[ पायालं ]** पाताल । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन आ० → या० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पायालं** ।

**[ मयणो ]** मदन । 'क-ग-च-ज०' (१।१७७) द्लुक् । अनेन अ० → य० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मयणो** ।

**[ गया ]** गदा । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) द्लुक् । अनेन आ० → या० । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **गया** ।

**[ नयणं ]** नयन । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) य्लुक् । अनेन अ० → य० । 'नो णः' (१।२२८) न० → ण० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **नयणं** ।

**[ दयालू ]** दयालु । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) य्लुक् । अनेन आ० → या० । 'अक्लीबे सौ' (३।१९) दीर्घः - लु० → लू० । 'अन्त्यव्य०' (१।११) स्लुक् **दयालू** ।

**[ लायण्णं ]** लावण्य । 'क-ग-च-ज०' (१।१७७) व्लुक् । अनेन अ० → य० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) णस्य द्वित्वं - ण० → ण्ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **लायण्णं** ।

**[ सउणो ]** शकुन । 'श-षोः सः' (१।२६०) श० → स० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सउणो** ।

**[ पउणो ]** प्रगुण । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) ग्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पउणो** ।

**[ पउरं ]** प्रचुर । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) च्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पउरं** ।

**[ राईवं ]** राजीव । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **राईवं** ।

**[ निहओ ]** निहत । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निहओ** ।

**[ निनओ ]** निनद । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निनओ** ।

**[ वाऊ ]** वायु । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'अक्लीबे सौ' (३।१९) दीर्घः -उ० → ऊ० । 'अन्त्यव्य०' (१।११) स्लुक् **वाऊ** ।

**[ कई ]** कवि । 'क-ग-च-ज०' (१।१७७) व्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - इ० → ई० । 'अन्त्य०' (१।११) स्लुक् **कई** ।

**[ लोअस्स ]** लोकस्य । 'क-ग-च-ज०' (१।१७७) क्लुक् । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **लोअस्स** ।

**[ देअरो ]** देवर । 'क-ग-च-ज०' (१।१७७) व्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **देअरो** ।

**[ पियइ ]** पिबति । ब्लुक् । 'त्यादीनामाद्य०' (३।१३९) ति० → इ० । अनेन अ० → य० **पियइ** ॥१८०॥

## कुब्ज-कर्पर-कीले कः खोऽपुष्पे ॥ ८।१।१८१ ॥

एषु कस्य खो भवति, पुष्पं चेत् कुब्जाभिधेयं न भवति ॥

खुज्जो । खप्परं । खीलओ ॥ अपुष्प इति किम् ? बंधेउं कुज्जय-पसूणं ॥ आर्षेऽन्यत्रापि-कासितं → खासिअं । कसितं → खसिअं ॥

**[ कुब्जकर्परकीले ]** कुब्जश्च कर्परश्च कीलक(कील)श्च = कुब्जकर्परकीलक(कील)म्, तस्मिन् = कुब्जकर्परकीलके(कीले) । सप्तमी ङि ।

**[ कः खोऽपुष्पे ]** क् षष्ठी ङस् । ख प्रथमा सि । अपुष्प सप्तमी ङि ।

**[ खुज्जो ]** कुब्ज । अनेन क० → ख० । 'सर्वत्र०' (२।७९) ब्लुक् । 'अनादौ०' (२।८९) जस्य द्वित्वं- ज० → ज्ज० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खुज्जो** ।

**[ खप्परं ]** कर्पर । अनेन क० → ख० । 'गुणाद्याः क्लीबे वा' (१।३४) वा क्लीबत्वम् । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) पस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **खप्परं** ।

**[ खीलओ ]** कीलक । अनेन की० → खी० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खीलओ** ।

**[ बंधेउं कुज्जय-पसूणं ]** 'बन्धंश् बन्धने' (१५५२) बन्ध् । बन्धनं पूर्वम् । क्त्वाप्र० → त्वा । 'क्त्वस्तुमत्तूण - तुआणाः' (२।१४६) तुम् आदेशः । 'व्यञ्ज०' (४।२३९) अत् । बंधतुं । 'एच्च क्त्वा-तुम्-तव्य-भविष्यत्सु (३।१५७) ध० → धे० । 'क-ग-च-ज०' (१।१७७) त्लुक् **बंधेउं** । कुब्जकप्रसून । 'सर्वत्र०' (२।७९) ब्लुक् । 'अनादौ०' (२।८९) जस्य द्वित्वं - ज० → ज्ज० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो०' (१।१८०) अ० → य० **कुज्जय** । 'सर्वत्र०' (२।७९) र्लुक् । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पसूणं** ।

**[ खासिअं ]** कासित । अनेन का० → खा० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **खासिअं** ।

**[ खसिअं ]** कसित । अनेन क० → ख० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **खसिअं** ॥१८१॥

## मरकत-मदकले गः कन्दुके त्वादेः ॥ ८।१।१८२ ॥

अनयोः कस्य गो भवति, कन्दुके त्वाद्यस्य कस्य ॥ मरगयं । मयगलो । गेन्दुअं ॥

**[ मरकतमदकले ]** मरकतं च [1]मदकलश्च = मरकतमदकलम्, तस्मिन् = मरकतमदकले । सप्तमी ङि ।

---

१. K. मदकलं च ।

**[ ग: कन्दुके त्वादे: ]** ग प्रथमा सि । कन्दुक सप्तमी ङि । तु प्रथमा सि । आदि षष्ठी ङस् ।

**[ मरगयं ]** मरकत । अनेन क० → ग० । 'क-ग-च-ज०' (१।१७७) तूलुक् । 'अवर्णो यश्रुति:' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वार: **मरगयं** ।

**[ मयगलो ]** मदकल । 'क-ग-च-ज०' (१।१७७) दूलुक् । 'अवर्णो यश्रुति:' (१।१८०) अ० → य० । अनेन क० → ग० । प्रथमा सि । 'अत: सेर्डो:' (३।२) सि० → डो० → ओ० **मयगलो** ।

**[ गेन्दुअं ]** कन्दुक । अनेन क० → ग० । 'एच्छय्यादौ' (१।५७) ग० → गे० । 'क-ग-च-ज०' (१।१७७) कूलुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वार: **गेन्दुअं** ॥१८२॥

## किराते च: ॥ ८।१।१८३ ॥

किराते कस्य चो भवति ॥

चिलाओ ॥ पुलिन्द एवायं विधि: ॥ कामरूपिणि तु नेष्यते ॥ [१]नमिमो हरकिरायं ॥

**[ किराते च: ]** किरात सप्तमी ङि । च प्रथमा सि ।

**[ चिलाओ ]** किरात । प्रथमा सि । अनेन कि० → चि० । 'हरिद्रादौ ल:' (१।२५४) रा० → ला० । 'क-ग-च-ज०' (१।१७७) तूलुक् । 'अत: सेर्डो:' (३।२) सि० → डो० → ओ० **चिलाओ** ।

**[ नमिमो हरकिरायं ]** 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो न:' (२।३।९७) नम् । वर्त्त० मस् । 'तृतीयस्य मो-मु-मा:' (३।१४४) मस्० → मो० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'इच्च मो-मु-मे वा' (३।१५५) म० → मि० **नमिमो** । हरकिरात । 'क-ग-च-ज०' (१।१७७) तूलुक् । 'अवर्णो यश्रुति:' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वार:' (१।२३) अनुस्वार: **हरकिरायं** ॥१८३॥

## शीकरे भ-हौ वा ॥ ८।१।१८४ ॥

शीकरे कस्य भ-हौ वा भवत: ॥ सीभरो सीहरो । पक्षे-सीअरो ॥

**[ शीकरे भहौ वा ]** शीकर सप्तमी ङि । भ-ह- प्रथमा औ । वा प्रथमा सि ।

**[ सीभरो सीहरो सीअरो ]** शीकर । 'श-षो: स:' (१।२६०) शी० → सी० । अनेन प्रथमे कस्य भ: । द्वितीये कस्य ह: । प्रथमा सि । 'अत: सेर्डो:' (३।२) सि० → डो० → ओ० **सीभरो सीहरो** । पक्षे-शीकर । प्रथमा सि । 'श-षो: स:' (१।२६०) शी० → सी० । 'क-ग-च-ज०' (१।१७७) कूलुक् । 'अत: सेर्डो:' (३।२) सि० → डो० → ओ० **सीअरो** ॥१८४॥

## चन्द्रिकायां म: ॥ ८।१।१८५ ॥

चन्द्रिकाशब्दे कस्य मो भवति ॥ चन्दिमा ॥

**[ चन्द्रिकायां म: ]** चन्द्रिका सप्तमी ङि । म प्रथमा सि ।

**[ चन्दिमा ]** चन्द्रिका । अनेन का० → मा० । 'सर्वत्र०' (२।७९) रूलुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) सूलुक् **चन्दिमा** ॥१८५॥

---

१. पत्थारोसण-तरलिअ-करंगुली-मलिअ-तंबिर-णडालं । पडिसिद्ध-तइअ-णअणुग्गमं व **णमिमो हर-किराअं** ॥[ग० व० -३५] पार्थारोषणतरलितकराङ्गुलिमर्दितताम्रललाटम् । प्रतिषिद्धतृतीयनयनोद्गममिव नमामो हरकिरातम् ॥

## निकष-स्फटिक-चिकुरे हः ॥ ८।१।१८६ ॥

एषु कस्य हो भवति ॥

निहसो । फलिहो । चिहुरो ॥ चिहुरशब्दः संस्कृतेऽपीति दुर्गः ॥

**[ निकषस्फटिकचिकुरे हः ]** निकषश्च स्फटिकश्च चिकुरश्च = निकषस्फटिकचिकुरम्, तस्मिन् = निकषस्फटिकचिकुरे । सप्तमी ङि । ह प्रथमा सि ।

**[ निहसो ]** निकष । अनेन क० → ह० । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निहसो** ।

**[ फलिहो ]** स्फटिक । प्रथमा सि । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'स्फटिके लः' (१।१९७) टस्य लः । अनेन क० → ह० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **फलिहो** ।

**[ चिहुरो ]** चिकुर । प्रथमा सि । अनेन कु० → हु० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **चिहुरो** ॥१८६॥

## ख-घ-थ-ध-भां हः ॥ ८।१।१८७ ॥

स्वरात् परेषामसंयुक्तानामनादिभूतानां ख-घ-थ-ध-भ इत्येतेषां वर्णानां प्रायो हो भवति ॥

ख - साहा । मुहं । मेहला । लिहइ ॥ घ - मेहो । जहणं । माहो । लाहइ ॥ थ - नाहो । आवसहो । मिहुणं । कहइ ॥ ध - साहू । वाहो । बहिरो । बाहइ । इन्दहणू ॥ भ-सहा । सहावो । नहं । थणहरो । सोहइ ॥

स्वरादित्येव - संखो । संघो । कंथा । बंधो । खंभो ॥

असंयुक्तस्येत्येव - अक्खइ । अग्घइ । कत्थइ । सिद्धओ । लब्भइ ॥

अनादेरित्येव - गज्जन्ते खे मेहा । गच्छइ घणो ॥

प्राय इत्येव - सरिसवखलो । पलयघणो । अथिरो । जिणधम्मो । पणट्ठभओ । नभं ॥

**[ खघथधभाम् ]** खश्च घश्च थश्च धश्च भ् च = खघथधभस्तेषाम् = खघथधभाम् । षष्ठी आम् ।

**[ हः ]** ह प्रथमा सि ।

**[ साहा ]** शाखा । 'श-षोः सः' (१।२६०) शा० → सा० । अनेन खा० → हा० । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **साहा** ।

**[ मुहं ]** मुख । अनेन ख० → ह० । प्रथमा सि । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **मुहं** ।

**[ मेहला ]** मेखला । अनेन ख० → ह० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **मेहला** ।

**[ लिहइ ]** लिखति । अनेन ख० → ह० । 'त्यादीनामाद्यत्रय०' (३।१३९) ति० → इ० **लिहइ** ।

**[ मेहो ]** मेघ । अनेन घ० → ह० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मेहो** ।

**[ जहणं ]** जघन । अनेन घ० → ह० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जहणं** ।

**[ माहो ]** माघ । अनेन घ० → ह० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **माहो** ।

**[ लाहइ ]** [१]"लाघृङ् सामर्थ्ये' (६४३) लाघ् । लाघते । अनेन घ० → ह० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० ।

**[ नाहो ]** नाथ । अनेन थ० → ह० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नाहो** ।

**[ आवसहो ]** आवसथ । अनेन थ० → ह० **आवसहो** ।

**[ मिहुणं ]** मिथुन । अनेन थु० → हु० । 'नो णः' (१।२२८) न० → ण० **मिहुणं** ।

**[ कहइ ]** 'कथण् वाक्यप्रबन्धे' (१८८०) कथ । वर्त्त० तिव् । 'त्यादीना०' (३।१३९) तिव्० → इ० । 'व्यञ्जनाददन्ते' (४।२३९) अत्(?) । अनेन थ० → ह० **कहइ** ।

**[ साहू ]** साधु । प्रथमा सि । अनेन धु० → हु० । 'अक्लीबे सौ' (३।१९) दीर्घः हु० → हू० । 'अन्त्यव्य०' (१।११) स्लुक् **साहू** ।

**[ वाहो ]** व्याध । प्रथमा सि । अनेन ध० → ह० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वाहो** ।

**[ बहिरो ]** बधिर । प्रथमा सि । अनेन धि० → हि० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **बहिरो** ।

**[ बाहइ ]** 'बाधृङ् रोटने' (७४४) बाध् । बाधते । अनेन ध० → ह० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **बाहइ** ।

**[ इन्दहणू ]** इन्द्रधनुस् । 'सर्वत्र०' (२।७९) ('द्रे रो नवा' (२।८०)) र्लुक् । अनेन ध० → ह० । 'नो णः' (१।२२८) नु० → णु० । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - णु० → णू० । 'अन्त्यव्य०' (१।११) स्लुक् **इन्दहणू** । 'गुणाद्याः क्लीबे वा' (१।३४) इति पुंस्त्वम् ।

**[ सहा ]** सभा । अनेन भा० → हा० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सहा** ।

**[ सहावो ]** स्वभाव । प्रथमा सि । 'सर्वत्र०' (२।७९) व्लुक् । अनेन भा० → हा० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सहावो** ।

**[ नहं ]** नभस् । अनेन भ० → ह० । 'अन्त्यव्य०' (१।११) स्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **नहं** ।

**[ थणहरो ]** स्तनभर । प्रथमा सि । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्तस्य थः । 'नो णः' (१।२२८) न० → ण० । अनेन भ० → ह० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **थणहरो** ।

**[ सोहइ ]** शोभते । 'श-षोः सः' (१।२६०) शो० → सो० । अनेन भ० → ह० । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) ते० → इ० **सोहइ** ।

**[ संखो ]** शंख । प्रथमा सि । 'श-षोः सः' (१।२६०) श० → स० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **संखो** ।

**[ संघो ]** संघ । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **संघो** ।

---

१. L. 'श्लाघृ श्लाघायाम्' । G. पा० म०- 'श्लाघृङ कत्थने' । K. 'श्लाघृङ् सामर्थ्ये' । श्लाघते । श्लाहइ ।

**[ कंथा ]** कंथा । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **कंथा** ।

**[ बंधो ]** बंध । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **बंधो** ।

**[ खंभो ]** स्तम्भ । 'स्तम्भे स्तो वा' (२।८) स्त० → ख० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खंभो** ।

**[ अक्खइ ]** आख्याति । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'स्वराणां स्वराः' (४।२३८) खा० → ख० । 'अनादौ०' (२।८९) खस्य द्विः । 'द्वितीय-तुर्ययोरुपरि पूर्वः' (२।९०) पूर्वखस्य कः । 'त्यादीनामाद्य०' (३।१३९) ति० → इ० **अक्खइ** ।

**[ अग्घइ ]** 'राजृग् दीप्तौ' (८९३) राज् । राजति । 'राजेरग्घ-छज्ज-सह-रीर-रेहाः' (४।१००) राज्० → अग्घ० । वर्त्त० तिव् । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) ति० → इ० **अग्घइ** ।

**[ कत्थइ ]** 'कत्थि श्लाघायाम्' (७१९) कत्थ् । वर्त्त० तिव्(ते) । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) ति०(ते०) → इ० **कत्थइ** ।

**[ सिद्धओ ]** सिध्रक । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) धस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वधस्य दः । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सिद्धओ**।

**[ लब्भइ ]** 'डुलभिंष् प्राप्तौ' (७८६) लभ् । लभते । 'त्यादीनामा०' (४।२३९) ते० → इ० । 'गमादीनां द्वित्वम्' (४।२४९) भस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वभस्य बः **लब्भइ** ।

**[ गज्जन्ते खे मेहा ]** 'गर्ज शब्दे' (१६३) गर्ज् । वर्त्त० अन्ति । 'बहुष्वाद्यस्य न्ति-न्ते-इरे' (३।१४२) अन्ति० → न्ते० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं- ज० → ज्ज० **गज्जन्ते**। ख । सप्तमी ङि । 'ङे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् **खे** ।

मेघ । प्रथमा जस् । 'ख-घ-थ-ध०' (१।१८७) घ० → ह० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्०' (३।१२) दीर्घः **मेहा** ।

[1]गज्जन्ते खे मेहा फुल्ला नीवा पणच्चिंआ[2] मोरा ।
नट्ठो चंदुज्जोओ वासा[3]रत्तो हला ! पत्तो ॥

**[ गच्छइ घणो ]** गच्छति । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) ति० → इ० **गच्छइ** । घन । प्रथमा सि । 'नो णः' (१।२२८) न० → ण० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **घणो** ।

**[ सरिसवखलो ]** सर्षपखल । 'र्श-र्ष-तप्त-वज्रे वा' (२।१०५) षात् प्राग् इकारः । 'श-षोः सः' (१।२६०) ष० → स० । 'पो वः' (१।२३१) प० → व० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सरिसवखलो**।

**[ पलयघणो ]** प्रलयघन । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'नो णः' (१।२२८) न० → ण० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पलयघणो** ।

---

१. [शृ० प्र० - १०।२२६ । स० क० - ३।१५३ । क० द० - २।३६] २. पाठां० - स० क० - पणद्दिआ । ३. स० क० - वासीरन्तो ।

गर्जन्ति खे मेघाः फुल्ला नीपाः प्रनर्तिता मयूराः । नष्टश्चं[1]न्द्रोद्योतो [2]वर्षर्तुः सखि ! [3]प्राप्तः ॥

१. पाठां० - क० द० - चन्द्रालोकः । २. क० द० - वर्षारात्रिः । ३. क० द० - प्राप्ता ।

**[ अथिरो ]** अस्थिर । 'क-ग-ट-ड०' (२।७७) स्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अथिरो** ।

**[ जिणधम्मो ]** जिनधर्म । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-म० → म्म० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जिणधम्मो** ।

**[ पणट्ठभओ ]** प्रनष्टभय । 'सर्वत्र०' (२।७९) र्लुक् । 'नो णः' (१।२२८) न० → ण० । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पणट्ठभओ** ।

**[ नभं ]** नभस् । 'अन्त्यव्य०' (१।११) स्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **नभं** ॥१८७॥

## पृथकि धो वा ॥ ८।१।१८८ ॥

पृथक्शब्दे थस्य धो वा भवति ॥ पिधं पुधं । पिहं पुहं ॥

**[ पृथकि धो वा ]** पृथक् सप्तमी ङि । ध प्रथमा सि । वा प्रथमा सि ।

**[ पिधं पुधं पिहं पुहं ]** पृथक् (२) । 'इदुतौ वृष्ट-वृष्टि-पृथक्-मृदङ्ग-नप्तृके' (१।१३७) इत्वं-उत्वं च । अनेन थस्य धः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् । बहुलाधिकारात् 'वा स्वरे मश्च' (१।२४) कस्य म्० **पिधं पुधं** । पक्षे-'ख-घ-थ-ध-भाम्' (१।१८७) थ० → ह० । शेषं पूर्ववत् । **पिहं पुहं** ॥१८८॥

## शृङ्खले खः कः ॥ ८।१।१८९ ॥

शृङ्खले खस्य को भवति ॥ संकलं ॥

**[ शृङ्खले खः कः ]** शृङ्खल सप्तमी ङि । ख् षष्ठी ङस् । क प्रथमा सि ।

**[ संकलं ]** शृङ्खल । 'ऋतोऽत्' (१।१२६) शृ० → श० । 'श-षोः सः' (१।२६०) श० → स० । अनेन खस्य कः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **संकलं** ॥१८९॥

## पुन्नाग-भागिन्योर्गो मः ॥ ८।१।१९० ॥

अनयोर्गस्य मो भवति ॥ पुन्नामाइं वसन्ते । भामिणी ॥

**[ पुन्नागभागिन्योर्गो मः ]** पुन्नागश्च भागिनी च = पुन्नागभागिन्यौ, तयोः = पुन्नागभागिन्योः । षष्ठी ओस् । ग् षष्ठी ङस् । म प्रथमा सि ।

[1]**[ पुन्नामाइं वसन्ते ]** पुन्नागस्य पुष्पाणि = पुन्नागानि । प्रथमा जस् । 'जस्-शस इँ-इं-णयः सप्राग्दीर्घाः' (३।२६) जस्स्थाने इं-पूर्वस्य च दीर्घः- ग० → गा० । अनेन गा० → मा० **पुन्नामाइं** ।

वसन्त । सप्तमी ङि । 'ङे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'ङित्यन्त्य०' (२।१।११४) अलुक् **वसन्ते** ।

**[ भामिणी ]** भागिनी । प्रथमा सि । अनेन गि० → मि० । 'नो णः' (१।२२८) नी० → णी० । 'अन्त्यव्य०' (१।११) स्लुक् **भामिणी** ॥१९०॥

---

१. G. J. L. M. पुन्नामाइँ ।

## छागे लः ॥ ८।१।१९१ ॥

छागे गस्य लो भवति ॥ छालो । छाली ॥

**[ छागे लः ]** छाग सप्तमी ङि । ल प्रथमा सि ।

**[ छालो ]** छाग । प्रथमा सि । अनेन गस्य लः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **छालो** ।

**[ छाली ]** छाग । अनेन गस्य लः । 'जातेरयान्त-नित्यस्त्री-शूद्रात्' (२।४।५४) ङी० → ई० । 'लुक्' (१।१०) अलोपः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **छाली** ॥१९१॥

## ऊत्वे दुर्भग-सुभगे वः ॥ ८।१।१९२ ॥

अनयोरूत्वे गस्य वो भवति ॥ दूहवो । सूहवो ॥ ऊत्व इति किम् ? दुहओ । सुहओ ॥

**[ ऊत्वे दुर्भगसुभगे वः ]** ऊत्व सप्तमी ङि । दुर्भगश्च सुभगश्च = दुर्भगसुभगम्, तस्मिन् = दुर्भगसुभगे । सप्तमी ङि। व प्रथमा सि ।

**[ दूहवो ]** दुर्भग । 'अन्त्यव्य०' (१।११) र्लुक् ('निर्दुरोर्वा' (१।१३) र्लुक् ) । 'लुंकि दुरो वा' (१।११५) दु० → दू० । 'ख-घ-थ-ध-भाम्' (१।१८७) भ० → ह० । अनेन गस्य वः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **दूहवो** ।

**[ सूहवो ]** सुभग । 'ऊत् सुभग-मुसले वा' (१।११३) सु० → सू० । 'ख-घ-थ०' (१।१८७) भ० → ह० । अनेन गस्य वः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सूहवो** ।

**[ दुहओ ]** दुर्भग । 'अन्त्यव्य०' (१।११) र्लुक् ('निर्दुरोर्वा' (१।१३) र्लुक्) । 'ख-घ-थ-ध-भाम्' (१।१८७) भ० → ह० । 'क-ग-च-ज-त-द-प-य-वां०' (१।१७७) ग्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **दुहओ** ।

**[ सुहओ ]** सुभग । 'ख-घ-थ०' (१।१८७) भ० → ह० । 'क-ग-च-ज-त-द-प-य-वां०' (१।१७७) ग्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **सुहओ** ॥१९२॥

## खचित-पिशाचयोश्चः स-ल्लौ वा ॥ ८।१।१९३ ॥

अनयोश्चस्य यथासंख्यं स-ल्ल इत्यादेशौ वा भवतः ॥ खसिओ खइओ । पिसल्लो पिसाओ ॥

**[ खचितपिशाचयोः ]** खचितश्च पिशाचश्च = खचितपिशाचौ, तयोः = खचितपिशाचयोः । षष्ठी ओस् ।

**[ चः सल्लौ वा ]** च् षष्ठी ङस् । स-ल्ल प्रथमा औ । वा प्रथमा सि ।

**[ खसिओ खइओ ]** खचित । अनेन चस्य सः । 'क-ग-च-ज०' (१।१७७) तुलुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **खसिओ** । पक्षे-खचित । 'क-ग-च-ज०' (१।१७७) च-तयोर्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **खइओ** ।

**[ पिसल्लो पिसाओ ]** पिशाच । अनेन च० → ल्ल० । 'ह्रस्वः संयोगे' (१।८४) शा० → श० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पिसल्लो** । पक्षे-पिशाच । प्रथमा सि । 'श-षोः सः' (१।२६०) शा० → सा० । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पिसाओ** ॥१९३॥

## जटिले जो झो वा ॥ ८।१।१९४ ॥

जटिले जस्य झो वा भवति ॥ झडिलो जडिलो ॥

**[ जटिले जो झो वा ]** जटिल सप्तमी ङि । ज् षष्ठी ङस् । झ प्रथमा सि । वा प्रथमा सि ।

**[ झडिलो जडिलो ]** जटिल (२) । 'टो डः' (१।१९५) टस्य डः । अनेन वा जस्य झः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **झडिलो जडिलो** ॥१९४॥

## टो डः ॥ ८।१।१९५ ॥

स्वरात् परस्य असंयुक्तस्य अनादेष्टस्य डो भवति ॥

नडो । भडो । घडो । वडो । घडइ ॥ स्वरादित्येव - घंटा ॥ असंयुक्तस्येत्येव-खट्टा ॥ अनादेरित्येव - टक्को ॥ क्वचिन्न भवति - अटति → अटइ ॥

**[ टो डः ]** ट् षष्ठी ङस् । ड प्रथमा सि ।

**[ नडो ]** नट । प्रथमा सि । अनेन टस्य डः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नडो** ।

**[ भडो ]** भट । प्रथमा सि । अनेन टस्य डः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भडो** ।

**[ घडो ]** घट । प्रथमा सि । अनेन टस्य डः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **घडो** ।

[1]**[ वडो ]** पट । प्रथमा सि । अनेन टस्य डः । 'पो वः' (१।२३१) प० → व० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वडो** ।

**[ घडइ ]** 'घटिष् चेष्टायाम्' (१०००) घट् । घटते । अनेन टस्य डः । 'त्यादीनामाद्यत्रय०' (३।१३९) ते० → इ० **घडइ** ।

**[ घंटा ]** घंटा । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **घंटा** ।

**[ खट्टा ]** खट्वा । प्रथमा सि । 'सर्वत्र०' (२।७९) व्लुक् । 'अनादौ०' (२।८९) द्वित्वं-टा० → ट्टा० । 'अन्त्यव्य०' (१।११) स्लुक् **खट्टा** ।

**[ टक्को ]** टक्क । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **टक्को** ।

**[ अटइ ]** 'अट गतौ' (१९४) अट् । अटति । 'त्यादीनामाद्य०' (३।१३९) ति० → इ० **अटइ** ॥१९५॥

## सटा-शकट-कैटभे ढः ॥ ८।१।१९६ ॥

एषु टस्य ढो भवति ॥ सढा । सयढो । केढवो ॥

**[ सटाशकटकैटभे ढः ]** सटा च शकटं च कैटभश्च = सटाशकटकैटभम्, तस्मिन् = सटाशकटकैटभे । सप्तमी ङि। ढ प्रथमा सि ।

**[ सढा ]** [2]श(स)टा । प्रथमा सि । 'श-षोः सः' (१।२६०) श० → स० । अनेन टस्य ढः । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **सढा** ।

---

१. A. वडो. उदाहरणम् । २. I. J. L. M. पा० म०-सटा ।

**[ सयढो ]** शैकट । प्रथमा सि । 'श-षोः सः' (१।२६०) श० → स० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । अनेन टस्य ढः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'गुणाद्याः क्लीबे वा' (१।३४) इति पुंस्त्वम् **सयढो** ।

**[ केढवो ]** कैटभ । प्रथमा सि । 'ऐत् एत्' (१।१४८) कै० → के० । अनेन टस्य ढः । 'कैटभे भो वः' (१।२४०) भ० → व० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **केढवो** ॥१९६॥

## स्फटिके लः ॥ ८।१।१९७ ॥

स्फटिके टस्य लो भवति ॥ फलिहो ॥

**[ स्फटिके लः ]** स्फटिक सप्तमी ङि । ल प्रथमा सि ।

**[ फलिहो ]** स्फटिक । 'क-ग-ट-ड-त-द-प०' (२।७७) स्लुक् । अनेन टस्य लः । 'निकष-स्फटिक-चिकुरे हः' (१।१८६) कस्य हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **फलिहो** ॥१९७॥

## चपेटा-पाटौ वा ॥ ८।१।१९८ ॥

चपेटाशब्दे ण्यन्ते च [2]पाटौ धातौ टस्य लो वा भवति ॥ चविला चविडा ॥ फालेइ फाडेइ ॥

**[ चपेटापाटौ वा ]** चपेटा च पाटिश्च = चपेटापाटि, तस्मिन् = चपेटापाटौ । सप्तमी ङि । वा प्रथमा सि ।

**[ चविला चविडा ]** चपेटा । 'एत इद्वा वेदना-चपेटा-देवर-केसरे' (१।१४६) पे० → पि० । 'पो वः' (१।२३१) पि० → वि० । अनेन वा टस्य लः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **चविला** । पक्षे-चपेटा । 'एत इद्वा०' (१।१४६) पे० → पि० । 'पो वः' (१।२३१) पि० → वि० । 'टो डः' (१।१९५) टस्य डः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **चविडा** ।

**[ फालेइ फाडेइ ]** अट-(१९४) 'पट गतौ' (१९५) पट् । पटन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ० । 'ञ्णिति' (४।३।५०) उपान्त्यस्वरवृद्धिः-प० → पा० । 'लोकात्' (१।१।३) पाटि इति स्थिते वर्त्त० तिव् । 'णेरदेदावावे' (३।१४९) टि० → टे० । अनेन टस्य लः । 'पाटि-परुष-परिघ-परिखा-पनस-पारिभद्रे फः' (१।२३२) पस्य फः - पा० → फा० । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) तिव्० → इ० **फालेइ** । पक्षे-फाडेइ । 'टो डः' (१।१९५) टे० → डे० । शेषं पूर्ववत् । **फाडेइ** ॥१९८॥

## ठो ढः ॥ ८।१।१९९ ॥

स्वरात् परस्य असंयुक्तस्य अनादेष्ठस्य ढो भवति ॥

मढो । सढो । कमढो । कुढारो । पढइ ॥ स्वरादित्येव-वेकुंठो ॥ असंयुक्तस्येत्येव - चिट्ठइ ॥ अनादेरित्येव - हिअए ठाइ ॥

**[ ठो ढः ]** ठ् षष्ठी ङस् । ढ प्रथमा सि ।

**[ मढो ]** मठ । प्रथमा सि । अनेन ठस्य ढः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मढो** ।

**[ सढो ]** शठ । प्रथमा सि । अनेन ठस्य ढः । 'श-षोः सः' (१।२६०) श० → स० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सढो** ।

---

१. पा० म० - शकट → सयड पुं-नपुं० । २. E. पटौ । H. J. K. L. M. पटि ।

**[ कमढो ]** कमठ । प्रथमा सि । अनेन ठस्य ढः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कमढो** ।

**[ कुढारो ]** कुठार । प्रथमा सि । अनेन ठस्य ढः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कुढारो** ।

**[ पढइ ]** 'पठ व्यक्तायां वाचि' (२१३) पठ् । पठति । अनेन ठस्य ढः । 'त्यादीनामाद्य०' (३।१३९) ति० → इ० **पढइ** ।

**[ वेकुंठो ]** वैकुंठ । प्रथमा सि । 'ऐत एत्' (१।१४८) वै० → वे० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वेकुंठो** ।

**[ चिट्ठइ ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव०' (२।३।९८) स्था । 'निमित्ताभावे०' (न्या० वक्ष० (१) - सूत्र (२९) ) स्था । वर्त्त० तिव् । 'स्थष्ठा-थक्क-चिट्ठ-निरप्पाः' (४।१६) स्थास्थाने चिट्ठ आदेशः । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) चिट्ठति । 'त्यादीनामाद्य०' (३।१३९) ति० → इ० **चिट्ठइ** ।

**[ हिअए ठाइ ]** हृदय । 'इत् कृपादौ' (१।१२८) हृ० → हि० । 'क-ग-च-ज०' (१।१७७) द-ययोर्लुक् । सप्तमी ङि । 'डे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् **हिअए** । स्था । वर्त्त० तिव् । 'स्थष्ठा०' (४।१६) स्था० → ठा० । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) तिव्० → इ० **ठाइ** ॥१९९॥

## अङ्कोठे ल्लः ॥ ८।१।२०० ॥

अङ्कोठे ठस्य द्विरुक्तो लो भवति ॥ अङ्कोल्लतेल्लतुप्पं ॥

**[ अङ्कोठे ल्लः ]** अङ्कोठ सप्तमी ङि । ल्ल प्रथमा सि ।

**[ अङ्कोल्लतेल्लतुप्पं ]** [१]अङ्कोठतैलेन तुप्पं- म्रक्षितं अङ्कोठ(ल्ल)तेल्लतुप्पं । देश्योऽयम् अनेन ठस्य ल्ल० । तै(ते)ल्ल इत्यत्र 'ऐत एत्' (१।१४८) तै० → ते० । 'तैलादो' (२।९८) द्वित्वं-ल० → ल्ल० । प्रथमा सि । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अङ्कोल्लतेल्लतुप्पं** ॥२००॥

## पिठरे हो वा, रश्च डः ॥ ८।१।२०१ ॥

पिठरे ठस्य हो वा भवति, तत्संनियोगे च रस्य डो भवति ॥ पिहडो पिढरो ॥

**[ पिठरे हो वा रश्च डः ]** पिठर सप्तमी ङि । ह प्रथमा सि । वा प्रथमा सि । र् षष्ठी ङस् । च प्रथमा सि । ड प्रथमा सि ।

**[ पिहडो पिढरो ]** पिठर । अनेन वा ठस्य हः -रस्य च डः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पिहडो** । द्वितीये पिठर । प्रथमा सि । 'ठो ढः' (१।१९९) ठस्य ढः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पिढरो** ॥२०१॥

## डो लः ॥ ८।१।२०२ ॥

स्वरात् परस्य असंयुक्तस्य अनादेर्डस्य प्रायो लो भवति ॥

---

१. L. अङ्कोठ-तैल-कुतुपम् । कुतुपं-चर्मपात्रम् । कुतुपाऽर्थे तुप्प इति देश्यशब्दे प्रयुङ्क्ते । M. अङ्कोठ-तैल-घृतम् ।

वडवामुखम् → वलयामुहं । गरुलो । तलायं । कीलइ ॥ स्वरादित्येव-मोण्डं । [1]कोण्डं । तोण्डं ॥ असंयुक्तस्येत्येव - खग्गो ॥ अनादेरित्येव-रमइ डिम्भो ॥ प्रायोग्रहणात् क्वचिद् विकल्पः - बलिसं बडिसं । दालिमं दाडिमं । गुलो गुडो। णाली णाडी । णलं णडं । आमेलो आवेडो ॥ क्वचिन्न भवत्येव - निबिडं । गउडो । पीडिअं । नीडं । उडू । तडी ॥

**[ डो लः ]** ड् षष्ठी ङस् । ल प्रथमा सि ।

**[ वलयामुहं ]** वडवामुख । अनेन डस्य लः । 'क-ग-च-ज-त-द-प-य-वां प्रायो लुक्' (१।१७७) व्लुक् । 'अवर्णो यश्रुतिः (१।१८०) आ० → या० । 'ख-घ-थ०' (१।१८७) खस्य हः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वलयामुहं** ।

**[ गरुलो ]** गरुड । प्रथमा सि । अनेन डस्य लः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **गरुलो** ।

**[ तलायं ]** तडाग । अनेन डस्य लः । 'क-ग-च-ज०' (१।१७७) ग्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तलायं** ।

**[ कीलइ ]** 'क्रीडृ विहारे' (२४३) क्रीड् । क्रीडति । 'सर्वत्र०' (२।७९) र्लुक् । अनेन डस्य लः । 'त्यादीनामाद्य०' (३।१३९) ति० → इ० **कीलइ** ।

**[ मोण्डं ]** मुण्ड । प्रथमा सि । 'ओत् संयोगे' (१।११६) ओत्वम् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मोण्डं** ।

**[ कोण्डं ]** कुण्ड । प्रथमा सि । 'ओत् संयोगे' (१।११६) ओत्वम् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कोण्डं** ।

[2]**[ तोण्डं ]** तुण्ड । प्रथमा सि । 'ओत् संयोगे' (१।११६) ओत्वम् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तोण्डं** ।

**[ खग्गो ]** खड्ग । प्रथमा सि । 'क-ग-ट-ड०' (२।७७) ड्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वं-ग० → ग्ग० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खग्गो** ।

**[ रमइ डिम्भो ]** 'रमिं क्रीडायाम्' (९८९) रम् । रमते । 'त्यादीनामा०' (३।१३९) ते० → इ० **रमइ** । डिम्भ । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **डिम्भो** ।

**[ बलिसं बडिसं ]** बडिश (२) । प्रायोग्रहणात् क्वचिद् वा डस्य लः । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **बलिसं बडिसं** ।

**[ दालिमं दाडिमं ]** दाडिम (२) । वा डस्य लः । पक्षे न भवति । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दालिमं दाडिमं** ।

**[ गुलो गुडो ]** गुड (२) । वा डस्य लः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **गुलो गुडो**।

**[ णाली णाडी ]** नाडी (२) । वा डस्य लः । 'वाऽऽदौ' (१।२२९) नस्य णः । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **णाली णाडी** ।

---

१. I. कोदण्डम् । पा० म०-कोदण्ड पुल्लिङ्गः । २. A. तोण्डं उदाहरणम् ।

**[ णलं णडं ]** नड (२) । वा डस्य लः । 'वाऽऽदौ' (१।२२९) नस्य णः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **णलं णडं** ।

**[ आमेलो आवेडो ]** आपीड (२) । 'नीपा-ऽऽपीडे मो वा' (१।२३४) वा पस्य मः । 'एत् पीयूषा-ऽऽपीड-बिभीतक - कीदृशेदृशे' (१।१०५) मी० → मे० । वा डस्य लः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आमेलो** । पक्षे- 'पो वः' (१।२३२) पस्य वः - पी० → वी० । 'एत् पीयूषा-ऽऽपीड०' (१।१०५) एत्वं - वी० → वे० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आवेडो** ।

**[ निबिडं ]** निबिड । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **निबिडं** ।

**[ गउडो ]** गौड । 'अउः पौरादौ च' (१।१६२) गौ० → गउ० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **गउडो** ।

**[ पीडिअं ]** पीडित । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पीडिअं** ।

**[ नीडं ]** नीड । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **नीडं** ।

**[ उडू ]** उडु । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः- डु० → डू० । 'अन्त्य०' (१।११) स्लुक् **उडू** ।

**[ तडी ]** तडित् । प्रथमा सि । 'अन्त्यव्य०' (१।११) त्लुक् । 'अक्लीबे सौ' (३।१९) दीर्घः - डि० → डी० । 'अन्त्यव्य०' (१।११) स्लुक् **तडी** ॥२०२॥

## वेणौ णो वा ॥ ८।१।२०३ ॥

वेणौ णस्य लो वा भवति ॥ वेलू वेणू ॥

**[ वेणौ णो वा ]** वेणु सप्तमी ङि । ण् षष्ठी ङस् । वा प्रथमा सि ॥

**[ वेलू वेणू ]** वेणु (२) । अनेन वा णस्य लः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घ -लु० → लू० - णु० → णू० । 'अन्त्यव्य०' (१।११) स्लुक् **वेलू वेणू** ॥२०३॥

## तुच्छे तश्च-छौ वा ॥ ८।१।२०४ ॥

तुच्छशब्दे तस्य च-छ इत्यादेशौ वा भवतः ॥ चुच्छं छुच्छं तुच्छं ॥

**[ तुच्छे तश्च-छौ वा ]** तुच्छ सप्तमी ङि । त् षष्ठी ङस् । च-छ प्रथमा औ । वा प्रथमा सि ।

**[ चुच्छं छुच्छं तुच्छं ]** तुच्छ (२) । अनेन वा तस्य चत्वं-छत्वं च । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **चुच्छं छुच्छं** । तृतीये प्रकृतिरेव-**तुच्छं** ॥२०४॥

## तगर-त्रसर-तूवरे टः ॥ ८।१।२०५ ॥

एषु तस्य टो भवति ॥ टगरो । टसरो । [1]टूवरो ॥

**[ तगरत्रसरतूवरे टः ]** तगरश्च त्रसरश्च तूवरश्च = तगरत्रसरतूवरम्, तस्मिन् = तगरत्रसरतूवरे । सप्तमी ङि । ट प्रथमा सि ।

---

१. K. टूबरो ।

**[ टगरो ]** तगर । प्रथमा सि । अनेन तस्य टः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **टगरो** ।

**[ टसरो ]** त्रसर । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । अनेन तस्य टः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **टसरो** ।

**[ टूवरो ]** तूवर । प्रथमा सि । अनेन तस्य टः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **टूवरो** ॥२०५॥

## प्रत्यादौ डः ॥ ८।१।२०६ ॥

प्रत्यादिषु तस्य डो भवति ॥

पडिवन्नं । पडिहासो । पडिहारो । पाडिप्फद्धी । पडिसारो । पडिनिअत्तं । पडिमा । पडिवया । पडंसुआ । पडिकरइ । पहुडि । पाहुडं । वावडो । पडाया । बहेडओ । हरडई । मडयं ॥

आर्षे - दुष्कृतम् → दुक्कडं । सुकृतम् → सुकडं । आहृतम् → आहडं । अवहृतम् → अवहडं इत्यादि ॥

प्राय इत्येव - प्रतिसमयम् → पइसमयं । प्रतीपम् → पईवं । संप्रति → संपइ । प्रतिष्ठानम् → पइट्ठाणं । प्रतिष्ठा → पइट्ठा । प्रतिज्ञा → पइण्णा ॥

**[ प्रत्यादौ डः ]** प्रत्यादि सप्तमी ङि । ड प्रथमा सि ।

**[ पडिवन्नं ]** प्रतिपन्न । अनेन तस्य डः । 'पो वः' (१।२३१) प० → व० । 'सर्वत्र०' (२।७९) र्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पडिवन्नं** ।

**[ पडिहासो ]** प्रतिभास । 'सर्वत्र०' (२।७९) र्लुक् । 'ख-घ-थ-ध-भाम्' (१।१८७) भा० → हा० । अनेन तस्य डः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पडिहासो** ।

**[ पडिहारो ]** प्रतिहार । 'सर्वत्र०' (२।७९) र्लुक् । अनेन तस्य डः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पडिहारो** ।

**[ पाडिप्फद्धी ]** प्रतिस्पर्द्धिन् । 'सर्वत्र०' (२।७९) र्लुक् । 'अतः समृद्ध्यादौ वा' (१।४४) प० → पा० । अनेन ति० → डि० । 'ष्प-स्पयोः फः' (२।५३) स्प० → फ० । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । 'अन्त्य०' (१।११) न्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - द्धि० → द्धी० । 'अन्त्य०' (१।११) स्लुक् **पाडिप्फद्धी** ।

**[ पडिसारो ]** प्रतिसार । 'सर्वत्र०' (२।७९) र्लुक् । अनेन ति० → डि० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पडिसारो** ।

**[ पडिनिअत्तं ]** प्रतिनिवृत्त । 'सर्वत्र०' (२।७९) र्लुक् । अनेन तस्य डः । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'क-ग-च-ज०' (१।१७७) व्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पडिनिअत्तं** ।

**[ पडिमा ]** प्रतिमा । 'सर्वत्र०' (२।७९) र्लुक् । अनेन ति० → डि० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **पडिमा** ।

**[ पडिवया ]** प्रतिपत् । 'सर्वत्र०' (२।७९) र्लुक् । अनेन ति० → डि० । 'पो वः' (१।२३१) प० → व० । 'स्त्रियामादविद्युतः' (१।१५) त्० → आ० । 'अवर्णो०' (१।१८०) आ० → या० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **पडिवया** ।

**[ पडंसुआ ]** प्रतिश्रुत् । 'सर्वत्र०' (२।७९) र्लुक् । अनेन तस्य डः । 'पथि-पृथिवी - प्रतिश्रुन्मूषिक - हरिद्रा - बिभीतकेष्वत्' (१।८८) इकारस्य अत्वम् । 'वक्रादावन्तः' (१।२६) अनुस्वारः । 'सर्वत्र०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शु० → सु० । 'स्त्रियामादविद्युतः' (१।१५) त्० → आ० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **पडंसुआ** ।

**[ पडिकरइ ]** प्रति 'डुकृंग् करणे' (८८८) कृ । वर्त्त० तिव् । 'ऋवर्णo' (४।२३४) कर्० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) प्रतिकरति । 'सर्वत्र०' (२।७९) प्रमध्याद् र्लोपः । अनेन ति० → डि० । 'त्यादी०' (३।१३९) तिव्० → इ० **पडिकरइ** ।

**[ पहुडि ]** प्रभृति । 'सर्वत्र०' (२।७९) र्लुक् । 'उदृत्वादौ' (१।१३१) भृ० → भु० । 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः । अनेन तस्य डः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **पहुडि** ।

**[ पाहुडं ]** प्राभृत । 'सर्वत्र०' (२।७९) र्लुक् । 'उदृत्वादौ' (१।१३१) भृ० → भु० । 'ख-घ-थ०' (१।१८७) भु० → हु० । अनेन तस्य डः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पाहुडं** ।

**[ वावडो ]** व्यापृत । 'अधो म-न-याम्' (२।७८) य्लुक् । 'ऋतोऽत्' (१।१२६) पृ० → प० । 'पो वः' (१।२३१) प० → व० । अनेन तस्य डः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वावडो** ।

**[ पडाया ]** पताका । अनेन तस्य डः । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **पडाया** ।

**[ बहेडओ ]** बिभीतक । 'पथि-पृथिवी-प्रतिश्रुन्मूषिक०' (१।८८) इकारस्य अत्वं - बि० → ब० । 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः । 'एत् पीयूषा-ऽऽपीड-बिभीतक०' (१।१०५) एत्वम् । अनेन तस्य डत्वम् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **बहेडओ** ।

**[ हरडई ]** हरीतकी । 'हरीतक्यामीतोऽत्' (१।९९) री० → र० । अनेन तस्य डः । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **हरडई** ।

**[ मडयं ]** मृतक । 'ऋतोऽत्' (१।१२६) मृ० → म० । अनेन तस्य डः । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मडयं** ।

**[ दुक्कडं ]** दुष्कृत । 'क-ग-ट-ड०' (२।७७) ष्लुक् । 'ऋतोऽत्' (१।१२६) कृ० → क० । 'अनादौ०' (२।८९) कस्य द्वित्वं - क० → क्क० । आर्षत्वात् तस्य डः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दुक्कडं** ।

**[ सुकडं ]** सुकृत । 'ऋतोऽत्' (१।१२६) कृ० → क० । आर्षे तस्य डः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुकडं** ।

**[ आहडं ]** आहृत । 'ऋतोऽत्' (१।१२६) हृ० → ह० । आर्षे तस्य डः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **आहडं** ।

**[ अवहडं ]** अवहृत । 'ऋतोऽत्' (१।१२६) हृ० → ह० । आर्षे तस्य डः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अवहडं** ।

**[ पइसमयं ]** प्रतिसमय । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पइसमयं** ।

**[ पईवं ]** प्रतीप । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'पो वः' (१।२३१) प० → व० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पईवं** ।

**[ संपइ ]** सम्प्रति । 'सर्वत्र०' (२।७९) र्लुक् । 'त्यादीनामा०' (३।१३९) इ० (?) ('क-ग-च-ज०' (१।१७७) त्लुक्) । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **संपइ** ।

**[ पइट्ठाणं ]** प्रतिष्ठान । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'ष्टस्या०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पइट्ठाणं** ।

**[ पइण्णा ]** प्रतिज्ञा । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वं-ण० → ण्ण० । 'अन्त्यव्य०' (१।११) स्लुक् **पइण्णा** ॥२०६॥

## इत्वे वेतसे ॥ ८।१।२०७ ॥

वेतसे तस्य डो भवति, इत्वे सति ॥ वेडिसो ॥ इत्व इति किम् ? वेअसो ॥

'इः स्वप्नादौ' (१।४६) इति इकारो [विकल्पे ?] न भवति, इत्व इति व्यावृत्तिबलात् ॥

**[ इत्वे वेतसे ]** इत्व सप्तमी ङि। वेतस सप्तमी ङि।

**[ वेडिसो ]** वेतस । 'इः स्वप्नादौ' (१।४६) त० → ति० । अनेन तस्य डः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वेडिसो** ।

**[ वेअसो ]** वेतस । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वेअसो** ॥२०७॥

## गर्भिता-ऽतिमुक्तके णः ॥ ८।१।२०८ ॥

अनयोस्तस्य णो भवति ॥

गब्भिणो । अणिउँतयं ॥ क्वचिन्न भवत्यपि - अइमुत्तयं ॥ कथम् एरावणो ? ऐरावणशब्दस्य ॥ एरावओ इति तु ऐरावतस्य ॥

**[ गर्भिताऽतिमुक्तके णः ]** गर्भितश्च अतिमुक्तकं च = गर्भिताऽतिमुक्तकम्, तस्मिन् = गर्भिताऽतिमुक्तके । सप्तमी ङि। ण प्रथमा सि ।

**[ गब्भिणो ]** गर्भित । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) भस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वभस्य बः । अनेन तस्य णः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **गब्भिणो** ।

**[ अणिउँतयं ]** अतिमुक्तक । अनेन तस्य णः । 'यमुना-चामुण्डा-कामुका-ऽतिमुक्तके मोऽनुनासिकश्च' (१।१७८) म्लोपस्तस्य स्थाने अनुनासिकश्च । 'क-ग-ट-ड-त-द०' (२।७७) क्लुक् । 'क-ग-च-ज-त-द०' (१।१७७) क्लुक् ।

'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अणिउँतयं** ।

**[ अइमुत्तयं ]** अतिमुक्तक । 'क-ग-च-ज-त-द०' (१।१७७) त्लुक् । 'क-ग-ट-ड०' (२।७७) क्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वं - त० → त्त० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अइमुत्तयं** ॥२०८॥

## रुदिते दिना ण्णः ॥ ८।१।२०९ ॥

रुदिते दिना सह तस्य द्विरुक्तो णो भवति ॥ रुण्णं ॥

अत्र केचिद् ऋत्वादिषु द इत्यारब्धवन्तः स तु शौरसेनी-मागधी विषय एव दृश्यते इति नोच्यते ॥

प्राकृते हि ऋतुः → रिऊ-उऊ । रजतम् → रययं । एतद् → एअं । गतः → गओ । आगतः → आगओ । साम्प्रतम् → संपयं । यतः → जओ । ततः → तओ । कृतम् → कयं । हतम् → हयं । हताशः → हयासो । श्रुतः → सुओ । आकृतिः → आकिई । निर्वृतः → निव्वुओ । तातः → ताओ । कतरः → कयरो । द्वितीयः → दुइओ इत्यादयः प्रयोगा भवन्ति । न पुनः उदू । रयदं इत्यादि ॥

क्वचिद् भावेऽपि 'व्यत्ययश्च' (४।४४७) इत्येव सिद्धम् । दिही इत्येतदर्थं तु 'धृतेर्दिहिः' (२।१३१) इति वक्ष्यामः ॥

**[ रुदिते दिना ण्णः ]** रुदित सप्तमी ङि । दि तृतीया टा । ण्ण प्रथमा सि ।

**[ रुण्णं ]** रुदित । अनेन दिना सह तस्य ण्ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **रुण्णं** ।

**[ रिऊ उऊ ]** ऋतु । 'ऋणर्ज्वृषभर्त्वृषौ वा' (१।१४१) ऋ० → रि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः-उ० → ऊ० । 'अन्त्यव्य०' (१।११) स्लुक् **रिऊ** । पक्षे- ऋतु । 'उदृत्वादौ' (१।१३१) ऋकारस्य उत्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः- उ० → ऊ० । 'अन्त्यव्य०' (१।११) स्लुक् **उऊ** ।

**[ रययं ]** रजत । प्रथमा सि । 'क-ग-च-ज-त-द०' (१।१७७) ज-तयोर्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **रययं** ।

**[ एअं ]** एतद् । 'अन्त्यव्य०' (१।११) द्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **एअं** ।

**[ गओ ]** गत । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **गओ** ।

**[ आगओ ]** आगत । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् **आगओ** ।

**[ संपयं ]** साम्प्रतम् । 'ह्रस्वः संयोगे' (१।८४) सां० → सं० । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **संपयं** ।

**[ जओ ]** यतः । 'आदेर्यो जः' (१।२४५) यस्य जः । 'अतो डो विसर्गस्य' (१।३७) विसर्गस्य डो० → ओ० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'डित्यन्त्य०' (२।१।११४) अलुक् **जओ** ।

**[ तओ ]** ततः । 'अतो डो विसर्गस्य' (१।३७) विसर्गस्य डो० → ओ० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'डित्यन्त्य०' (२।१।११४) अलुक् **तओ** ।

**[ कयं ]** कृत । 'ऋतोऽत्' (१।१२६) कृ० → क० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कयं** ।

**[ हयं ]** हृत । 'ऋतोऽत्' (१।१२६) हृ० → ह० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **हयं** ।

**[ हयासो ]** हताश । 'क-ग-च-ज-त-द०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) आ० → या० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **हयासो** ।

**[ सुओ ]** श्रुत । 'सर्वत्र०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शु० → सु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **सुओ** ।

**[ आकिई ]** आकृति । 'इत् कृपादौ' (१।१२८) कृ० → कि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः- इ० → ई० । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **आकिई** ।

**[ निव्वुओ ]** निर्वृत । 'सर्वत्र०' (२।७९) र्लुक् । 'उद्वृत्वादौ' (१।१३१) वृ० → वु० । 'अनादौ०' (२।८९) वुस्य द्वित्वं - वु० → व्वु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **निव्वुओ** ।

**[ ताओ ]** तात । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **ताओ** ।

**[ कयरो ]** कतर । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **कयरो** ।

**[ दुइओ ]** द्वितीय । 'सर्वत्र०' (२।७९) व्लुक् । 'द्विन्योरुत्' (१।९४) दि० → दु० । 'पानीयादिष्वित्' (१।१०१) ती० → ति० । 'क-ग-च-ज०' (१।१७७) त्लुक् - य्लुक् च । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **दुइओ** ॥२०९॥

### सप्ततौ रः ॥ ८।१।२१० ॥

सप्ततौ तस्य रो भवति ॥ सत्तरी ॥

**[ सप्ततौ रः ]** सप्तति सप्तमी ङि । र प्रथमा सि ।

**[ सत्तरी ]** सप्तति । 'क-ग-ट-ड०' (२।७७) प्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वं - त० → त्त० । अनेन ति० → रि० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः- रि० → री० । 'अन्त्यव्य०' (१।११) स्लुक् **सत्तरी** ॥२१०॥

## अतसी - सातवाहने लः ॥ ८।१।२११ ॥

अनयोस्तस्य लो भवति ॥ अलसी । सालाहणो सालवाहणो । सालाहणी भासा ॥

**[ अतसीसातवाहने लः ]** अतसी च सातवाहनश्च = अतसीसातवाहनः, तस्मिन् = अतसीसातवाहने । ल प्रथमा सि।

**[ अलसी ]** अतसी । प्रथमा सि । अनेन तस्य लः । 'अन्त्यव्य०' (१।११) स्लुक् **अलसी** ।

**[ सालाहणो सालवाहणो ]** सातवाहन । अनेन तस्य लः । 'क-ग-च-ज०' (१।१७७) वा व्लुक् । 'स्वरस्योद्वृत्ते' (१।८) इति निषेधप्राप्तावपि बाहुलकात् सन्धिर्भवति तस्मात् 'समानानां०' (१।२।१) दीर्घः । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सालाहणो** । यत्र व्लुक् न तत्र **सालवाहणो** पूर्ववत्।

**[ सालाहणी भासा ]** सातवाहनो देवताऽस्येति सालाहणी । 'देवता' (६।२।१०१) अण्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'लोकात्' (१।१।३) सातवाहन । 'प्रत्यये ङीर्नवा' (३।३१) इति ङीप्रत्ययः । 'लुक्' (१।१०) अलोपः । 'क-ग-च-ज०' (१।१७७) व्लुक् । अनेन तस्य लः । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । 'नो णः' (१।२२८) नी० → णी० । 'अन्त्यव्य०' (१।११) स्लुक् **सालाहणी** । भाषा । प्रथमा सि । 'श-षोः सः' (१।२६०) षा० → सा० । 'अन्त्यव्य०' (१।११) स्लुक् **भासा** ॥२११॥

## पलिते वा ॥ ८।१।२१२ ॥

पलिते तस्य लो वा भवति ॥ पलिलं पलिअं ॥

**[ पलिते वा ]** पलित सप्तमी ङि । वा प्रथमा सि ।

**[ पलिलं पलिअं ]** पलित (२) । अनेन वा तस्य लः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पलिलं** । द्वितीये 'क-ग-च-ज०' (१।१७७) त्लुक् । शेष पूर्ववत् । **पलिअं** ॥२१२॥

## पीते वो ले वा ॥ ८।१।२१३ ॥

पीते तस्य वो वा भवति, स्वार्थलकारे परे ॥ पीवलं पीअलं ॥ ल इति किम् ? पीअं ॥

**[ पीते वो ले वा ]** पीत सप्तमी ङि । व प्रथमा सि । ल सप्तमी ङि । वा प्रथमा सि ।

**[ पीवलं पीअलं ]** पीत । स्वार्थे 'विद्युत्-पत्र-पीतान्धाल्लः' (२।१७३) इति लप्र० । अनेन वा तस्य वः । प्रथमा सि। 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पीवलं** । पक्षे- पीत। 'विद्युत्-पत्र-पीतान्धाल्लः' (२।१७३) लप्र० । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पीअलं** ।

**[ पीअं ]** पीत । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पीअं** ॥२१३॥

## वितस्ति-वसति-भरत-कातर-मातुलिङ्गे हः ॥ ८।१।२१४ ॥

एषु तस्य हो भवति ॥

विहत्थी । वसही । बहुलाधिकारात् क्वचिन्न भवति - वसई । भरहो । काहलो । माहुलिंगं । मातुलुङ्गशब्दस्य तु माउलुङ्गं ॥

**[ वितस्तिवसतिभरतकातरमातुलिङ्गे ]** वितस्तिश्च वसतिश्च भरतश्च कातरश्च मातुलिङ्गं च = वितस्तिवसतिभरतकातर-मातुलिङ्गम्, तस्मिन् = वितस्तिवसतिभरतकातरमातुलिङ्गे । सप्तमी ङि ।

**[ हः ]** ह प्रथमा सि ।

**[ विहत्थी ]** वितस्ति । अनेन तस्य हः । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्तस्य थः । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः-त्थि० → त्थी० । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **विहत्थी** ।

**[ वसही ]** वसति । प्रथमा सि । अनेन तस्य हः । 'अक्लीबे सौ' (३।१९) दीर्घः - हि० → ही० । 'अन्त्य०' (१।११) स्लुक् **वसही** ।

बहुलाधिकारात् क्वचिन्न स्यात्-

**[ वसई ]** वसति । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अक्लीबे सौ' (३।१९) दीर्घः- इ० → ई० । 'अन्त्यव्य०' (१।११) स्लुक् **वसई** ।

**[ भरहो ]** भरत । प्रथमा सि । अनेन तस्य हः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भरहो** ।

**[ काहलो ]** कातर । अनेन तस्य हः । 'हरिद्रादौ लः' (१।२५४) रस्य लः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **काहलो** ।

**[ माहुलिंगं ]** मातुलिंग । प्रथमा सि । अनेन तस्य हः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **माहुलिंगं** ।

**[ माउलुङ्गं ]** [1]मातुलुङ्ग शब्दस्य तु 'क-ग-च-ज०' (१।१७७) त्लुक् **माउलुङ्गं** ॥२१४॥

### मेथि-शिथिर-शिथिल-प्रथमे थस्य ढः ॥ ८।१।२१५ ॥

एषु थस्य ढो भवति ॥ हापवादः ॥ मेढी । सिढिलो । सढिलो । पढमो ॥

**[ मेथिशिथिरशिथिलप्रथमे ]** मेथिश्च शिथिरश्च शिथिलश्च प्रथमश्च = मेथिशिथिरशिथिलप्रथमम्, तस्मिन् = मेथिशिथिरशिथिलप्रथमे । सप्तमी ङि ।

**[ थस्य ढः ]** थ षष्ठी ङस् । ढ प्रथमा सि ।

**[ मेढी ]** मेथि । प्रथमा सि । अनेन थस्य ढः । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् मेढी ।

**[ सिढिलो ]** शिथिर । अनेन थस्य ढः । 'हरिद्रादौ लः' (१।२५४) रस्य लः । 'श-षोः सः' (१।२६०) शि० → सि० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सिढिलो** ।

[2]**[ सढिलो ]** शिथिल । प्रथमा सि । 'श-षोः सः' (१।२६०) शि० → सि० । 'शिथिलेङ्गुदे वा' (१।८९) सि० → स० । अनेन थस्य ढः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सढिलो** ।

---

१. B. C. मातुलिङ्ग शब्दस्य तु 'क-ग-च-ज०' (१।१७७) माउलुङ्गं । पा० म०-मातुलिङ्ग शब्दस्य माहुलिङ्ग । माउलुङ्ग देखो माहुलिङ्ग । २. सर्वमुद्रितेषु सिढिलो । G. सढिलो ।

**[ पढमो ]** प्रथम । प्रथमा सि । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । अनेन थस्य ढः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पढमो** इति जातम् ॥२[ १५॥

## निशीथ-पृथिव्योर्वा ॥ ८।१।२१६ ॥

अनयोस्थस्य ढो वा भवति ॥ निसीढो निसीहो । पुढवी पुहवी ॥

**[ निशीथपृथिव्योर्वा ]** निशीथश्च पृथिवी च = निशीथपृथिव्यौ, तयोः = निशीथपृथिव्योः । षष्ठी ओस् । वा प्रथमा सि।

**[ निसीढो निसीहो ]** निशीथ । 'श-षोः सः' (१।२६०) शी० → सी० । अनेन थस्य ढः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निसीढो** । पक्षे- निशीथ । 'श-षोः सः' (१।२६०) शी० → सी० । 'ख-घ-थ-ध-भाम्' (१।१८७) थस्य हः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निसीहो** ।

**[ पुढवी पुहवी ]** पृथिवी । 'पथि-पृथिवी-प्रतिश्रुन्मूषिक-हरिद्रा-बिभीतकेष्वत्' (१।८८) थि० → थ० । 'उदृत्वादौ' (१।१३१) पृ० → पु० । अनेन थस्य ढः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **पुढवी** । पक्षे-पृथिवी । 'पथि-पृथिवी-प्रतिश्रुन्मूषिक०' (१।८८) थि० → थ० । 'उदृत्वादौ' (१।१३१) पृ० → पु० । 'ख-घ-थ-ध-भाम्' (१।१८७) थस्य हः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **पुहवी** ॥२१६॥

## दशन-दष्ट-दग्ध-दोला-दण्ड-दर-दाह-दम्भ-दर्भ-कदन-दोहदे दो वा डः ॥ ८।१।२१७ ॥

एषु दस्य डो वा भवति ॥

डसणं दसणं । डट्ठो दट्ठो । डड्ढो दड्ढो । डोला दोला । डण्डो दण्डो । डरो दरो । डाहो दाहो । डम्भो दम्भो । डब्भो दब्भो । कडणं कयणं । डोहलो दोहलो ॥ दरशब्दस्य च भयार्थवृत्तेरेव भवति । अन्यत्र-दरदलिअं ॥

**[ दशनदष्टदग्धदोलादण्डदरदाहदम्भदर्भकदनदोहदे ]** दशनं च दष्टश्च दग्धश्च दोला च दण्डश्च दरश्च दाहश्च दम्भश्च दर्भश्च कदनं च दोहदश्च = दशनदष्टदग्धदोलादण्डदरदाहदम्भदर्भकदनदोहदम्, तस्मिन् = दशनदष्टदग्धदोलादण्डदरदाह-दम्भदर्भकदनदोहदे । सप्तमी ङि ।

**[ दो वा डः ]** द् षष्ठी ङस् । वा प्रथमा सि । ड प्रथमा सि ।

**[ डसणं दसणं ]** दशन (२) । अनेन वा दस्य डः । 'श-षोः सः' (१।२६०) श० → स० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **डसणं दसणं** ।

**[ डट्ठो दट्ठो ]** दष्ट (२) । अनेन वा दस्य डः । 'शक्त-मुक्त-दष्ट-रुग्ण-मृदुत्वे को वा' (२।२) ष्टस्य कः । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **डक्को डट्ठो** । पक्षे-दष्ट । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दट्ठो** ।

**[ डड्ढो दड्ढो ]** दग्ध (२) । अनेन वा दस्य डः । 'दग्ध-विदग्ध-वृद्धि-वृद्धे ढः' (२।४०) ग्धस्य ढः । 'अनादौ०' (२।८९) ढस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वढस्य डः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **डड्ढो दड्ढो** ।

**[ डोला दोला ]** दोला (२) । अनेन विकल्पेन दस्य डः । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **डोला दोला**।

**[ डण्डो दण्डो ]** दण्ड (२) । अनेन विकल्पेन दस्य डः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **डण्डो दण्डो** ।

**[ डरो दरो ]** दर (२) । अनेन विकल्पेन दस्य डः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **डरो दरो** ।

**[ डाहो दाहो ]** दाह (२) । अनेन विकल्पेन दस्य डः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **डाहो दाहो** ।

**[ डम्भो दम्भो ]** दम्भ (२) । अनेन विकल्पेन दस्य डः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **डम्भो दम्भो** ।

**[ डब्भो दब्भो ]** दर्भ (२) । अनेन वा दस्य डः । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) भस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वभस्य बः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **डब्भो दब्भो**।

**[ कडणं कयणं ]** कदन (२) । अनेन वा दस्य डः । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कडणं** । पक्षे-कदन । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कयणं** ।

**[ डोहलो दोहलो ]** दोहद (२) । अनेन वा दस्य डः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'प्रदीपि-दोहदे लः' (१।२२१) दस्य लः । 'डित्यन्त्य०' (२।१।११४) अलुक् **डोहलो** । पक्षे डो न । शेषं पूर्ववत् । **दोहलो** ।

**[ दरदलिअं ]** दरदलित । 'क-ग-च-ज०' (१।१७७) त्लुक् **दरदलिअं** ॥२१७॥

## दंश-दहोः ॥ ८।१।२१८ ॥

अनयोर्धात्वोर्दस्य डो भवति ॥ डसइ । डहइ ॥

**[ दंशदहोः ]** दंशश्च दह् च = दंशदहौ, तयोः = दंशदहोः । षष्ठी ओस् ।

**[ डसइ ]** 'दंशं दशने' (४९६) दश् । दशति । अनेन दस्य डः । 'श-षोः सः' (१।२६०) श० → स० । 'त्यादीनामाद्य०' (३।१३९) ति० → इ० डसइ ।

**[ डहइ ]** 'दहं भस्मीकरणे' (५५२) दह् । दहति । अनेन दस्य डः । 'त्यादीनामाद्य०' (३।१३९) ति० → इ० **डहइ** ॥२१८॥

## संख्या-गद्गदे रः ॥ ८।१।२१९ ॥

संख्यावाचिनि गद्गदशब्दे च दस्य रो भवति ॥

एआरह । बारह । तेरह । गग्गरं ॥ अनादेरित्येव-ते दस ॥ असंयुक्तस्येत्येव - चउद्दह ॥

**[ संख्यागद्गदे रः ]** संख्या च गद्गदं च = संख्यागद्गदम्, तस्मिन् = संख्यागद्गदे । सप्तमी ङि । र प्रथमा सि ।

**[ एआरह ]** एकादश । 'क-ग-च-ज०' (१।१७७) क्लुक् । अनेन दस्य रः । 'दश-पाषाणे हः' (१।२६२) शस्य हः । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **एआरह** ।

**[ बारह ]** द्वादश । 'क-ग-ट-ड०' (२।७७) द्लुक् । अनेन दस्य रः । 'दश-पाषाणे हः' (१।२६२) शस्य हः । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **बारह** ।

**[ तेरह ]** त्रयोदश । 'एत् त्रयोदशादौ स्वरस्य सस्वरव्यञ्जनेन' (१।१६५) त्रयोस्थाने ते० । अनेन दस्य रः । 'दश-पाषाणे हः' (१।२६२) शस्य हः । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **तेरह** ।

**[ गग्गरं ]** गद्गद । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वं-ग० → ग्ग० । अनेन दस्य रः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **गग्गरं** ।

**[ ते दस ]** दश । 'श-षोः सः' (१।२६०) श० → स० **दस** ।

**[ चउद्दह ]** चतुर्द(र्द)श । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) दस्य द्वित्वम् । 'दश-पाषाणे हः' (१।२६२) शस्य हः **चउद्दह** ॥२१९॥

## कदल्यामद्रुमे ॥ ८।१।२२० ॥

कदलीशब्दे अद्रुमवाचिनि दस्य रो भवति ॥ करली । अद्रुम इति किम् ? कयली केली ॥

**[ कदल्यामद्रुमे ]** कदली सप्तमी ङि । अद्रुम सप्तमी ङि ।

**[ करली ]** कदली । प्रथमा सि । अनेन दस्य रः । 'अन्त्यव्य०' (१।११) स्लुक् **करली** मृगविशेषः ।

**[ कयली ]** कदली । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **कयली** ।

**[ केली ]** कदली । 'वा कदले' (१।१६७) दकारेण सह कस्य के । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **केली** ॥२२०॥

## प्रदीपि-दोहदे लः ॥ ८।१।२२१ ॥

प्रपूर्वे दीप्यतौ धातौ दोहदशब्दे च दस्य लो भवति ॥ पलीवेइ । पलित्तं । दोहलो ॥

**[ प्रदीपिदोहदे लः ]** प्रदीपिश्च दोहदश्च = प्रदीपिदोहदम्, तस्मिन् = प्रदीपिदोहदे । सप्तमी ङि । ल प्रथमा सि ।

**[ पलीवेइ ]** प्रपूर्व० 'दीपैचि दीप्तौ' (१२६६) दीप् । प्रदीप्यन्तं(मानं) प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ० । वर्त्त० तिव् । 'णेरदेदावावे' (३।१४९) एत्त्वम् । अनेन दस्य लः । 'सर्वत्र०' (२।७९) र्लुक् । 'पो वः' (१।२३१) पे० → वे० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पलीवेइ** ।

**[ पलित्तं ]** प्रदीप्त । अनेन दस्य लः । 'सर्वत्र०' (२।७९) र्लुक् । 'ह्रस्वः संयोगे' (१।८४) ली० → लि० । 'क-ग-ट-ड०' (२।७७) प्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वं - त० → त्त० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पलित्तं** ।

**[ दोहलो ]** दोहद । अनेन दस्य लः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दोहलो** ॥२२१॥

## कदम्बे वा ॥ ८।१।२२२ ॥

कदम्बशब्दे दस्य लो वा भवति ॥ कलम्बो । कयम्बो ॥

**[ कदम्बे वा ]** कदम्ब सप्तमी ङि । वा प्रथमा सि ।

**[ कलम्बो कयम्बो ]** कदम्ब । अनेन वा दस्य लः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कलम्बो** । पक्षे-कदम्ब । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कयम्बो** ॥२२२॥

## दीपौ धो वा ॥ ८।१।२२३ ॥

दीप्यतौ धातौ दस्य धो वा भवति ॥ धिप्पइ । दिप्पइ ॥

**[ दीपौ धो वा ]** दीपि सप्तमी ङि । ध प्रथमा सि । वा प्रथमा सि ।

**[ धिप्पइ दिप्पइ ]** 'दीपैचि दीप्तौ' (१२६६) दीप् । दीप्यते । अनेन वा दस्य धः । 'ह्रस्वः संयोगे' (१।८४) धि० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'शकादीनां द्वित्वम्' (४।२३०) प० → प्प० । 'त्यादीनामाद्य०' (३।१३९) ति०-(ते०) → इ० **धिप्पइ** । [1]पक्षे-दीप्यते । 'ह्रस्वः संयोगे' (१।८४) दी० → दि० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'शकादीनां०' (४।२३०) द्वित्वं-प० → प्प० । त्यादीनामाद्य०' (३।१३९) ति०(ते०) → इ० **दिप्पइ** ॥२२३॥

## कदर्थिते वः ॥ ८।१।२२४ ॥

कदर्थिते दस्य वो भवति ॥ कवट्टिओ ॥

**[ कदर्थिते वः ]** कदर्थित सप्तमी ङि । व प्रथमा सि ।

**[ कवट्टिओ ]** कदर्थित । प्रथमा सि । अनेन दस्य वः । 'वृत्त-प्रवृत्त-मृत्तिका-पत्तन-कदर्थिते टः' (२।२९) थस्य टः । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) टस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कवट्टिओ** ॥२२४॥

## ककुदे हः ॥ ८।१।२२५ ॥

ककुदे दस्य हो भवति ॥ कउहं ॥

**[ ककुदे हः ]** ककुद सप्तमी ङि । ह प्रथमा सि ।

**[ कउहं ]** ककुद । 'क-ग-च-ज०' (१।१७७) क्लुक् । अनेन दस्य हः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **कउहं** ॥२२५॥

## निषधे धो ढः ॥ ८।१।२२६ ॥

निषधे धस्य ढो भवति ॥ निसढो ॥

**[ निषधे धो ढः ]** निषध सप्तमी ङि । ध् षष्ठी ङस् । ढ प्रथमा सि ।

**[ निसढो ]** निषध । 'श-षोः सः' (१।२६०) ष० → स० । अनेन धस्य ढः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निसढो** ॥२२६॥

## वौषधे ॥ ८।१।२२७ ॥

औषधे धस्य ढो वा भवति ॥ ओसढं । ओसहं ॥

---

१. G. पाठां० शकादीनां द्वित्वं साध्यावस्थायाम् । दीप्यते वा प्रकृतिः । तदा 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) द्वित्वम् । 'स्वराणां स्वराः' (४।२३८) ह्रस्वः ताटि० ।

**[ वौषधे ]** वा प्रथमा सि । औषध सप्तमी ङि ।

**[ ओसढं ओसहं ]** औषध (२) । 'औत ओत्' (१।१५९) औ० → ओ० । 'श-षोः सः' (१।२६०) ष० → स० । अनेन वा धस्य ढः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **ओसढं** । पक्षे-**ओसहं** ॥२२७॥

## नो णः ॥ ८।१।२२८ ॥

स्वरात् परस्य असंयुक्तस्य अनादेर्नस्य णो भवति ॥

कणयं । मयणो । वयणं । नयणं । माणइ ॥ आर्षे-आरनालं । अनिलो । अनलो इत्याद्यपि ॥

**[ नो णः ]** न् षष्ठी ङस् । ण प्रथमा सि ।

**[ कणयं ]** कनक । प्रथमा सि । अनेन न० → ण० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कणयं** ।

**[ मयणो ]** मदन । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । अनेन न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मयणो** ।

**[ वयणं ]** [1]वदन । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । अनेन न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वयणं** ।

**[ नयणं ]** नयन । 'क-ग-च-ज-त-द-प-य-वां प्रायो लुक्' (१।१७७) य्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । अनेन न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **नयणं**।

**[ माणइ ]** 'मानि पूजायाम्' (७४९) मान् । वर्त्त० तिव् (ते) । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) मानति(ते) । 'त्यादीनामा०' (३।१३९) ति०(ते०) → इ० । अनेन नस्य णः **माणइ** ।

**[ आरनालं ]** आरनाल । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **आरनालं** ।

**[ अनिलो ]** अनिल । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अनिलो** ।

**[ अनलो ]** अनल । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अनलो** ॥२२८॥

## वाऽऽदौ ॥ ८।१।२२९ ॥

असंयुक्तस्याऽऽदौ वर्त्तमानस्य नस्य णो वा भवति ॥

णरो नरो । णई नई । णेइ नेइ ॥ असंयुक्तस्येत्येव-न्यायः → नाओ ॥

**[ वाऽऽदौ ]** वा प्रथमा सि । आदि सप्तमी ङि ।

**[ णरो नरो ]** नर (२) । अनेन वा नस्य णः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **णरो**। पक्षे-**नरो** ।

---

१. J. K. L. वचन । I. वचन-वदन ।

**[ णई नई ]** नदी (२) । अनेन वा न० → ण० । 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **णई नई** ।

**[ णेइ नेइ ]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) णी० → नी० । वर्त्त० तिव् । 'युवर्णस्य गुणः' (४।२३७) नी० → ने० । 'त्यादीनामाद्यत्रय०' (३।१३९) ति० → इ० । अनेन वा न० → ण० **णेइ** । पक्षे-**नेइ**।

**[ नाओ( यो ) ]** न्याय । प्रथमा सि । 'अधो म-न-याम्' (२।७८) य्लुक् । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नायो** ॥२२९॥

## निम्ब-नापिते ल-ण्हं वा ॥ ८।१।२३० ॥

अनयोर्नस्य ल-ण्ह इत्येतौ वा भवतः ॥ लिम्बो निम्बो । ण्हाविओ नाविओ ॥

**[ निम्बनापिते ]** निम्बश्च नापितश्च = निम्बनापितम्, तस्मिन् = निम्बनापिते । सप्तमी ङि ।

**[ लण्हं वा ]** लश्च ण्हश्च = लण्हम् । प्रथमा सि । वा प्रथमा सि ।

**[ लिम्बो निम्बो ]** निम्ब (२) । अनेन वा नस्य लः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **लिम्बो निम्बो** ।

**[ ण्हाविओ नाविओ ]** नापित (२) । अनेन वा नस्य ण्हः । 'पो वः' (१।२३१) पस्य वः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **ण्हाविओ नाविओ** ॥२३०॥

## पो वः ॥ ८।१।२३१ ॥

स्वरात् परस्य असंयुक्तस्य अनादेः पस्य प्रायो वो भवति ॥

सवहो । सावो । उवसग्गो । पईवो । कासवो । पावं । उवमा । कविलं । कुणवं । कलावो । कवालं । महिवालो । गोवइ । तवइ ॥ स्वरादित्येव-कम्पइ ॥ असंयुक्तस्येत्येव-अप्पमत्तो ॥ अनादेरित्येव-सुहेण पढइ ॥ प्राय इत्येव - कई । रिऊ । एतेन पकारस्य प्राप्तयोर्लोपवकारयोर्यस्मिन् कृते श्रुतिसुखमुत्पद्यते स तत्र कार्यः ॥

**[ पो वः ]** प् षष्ठी ङस् । व प्रथमा सि ।

**[ सवहो ]** शपथ । प्रथमा सि । 'श-षोः सः' (१।२६०) श० → स० । अनेन पस्य वः । 'ख-घ-थ-ध-भाम्' (१।१८७) थस्य हः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सवहो** ।

**[ सावो ]** शाप । प्रथमा सि । 'श-षोः सः' (१।२६०) शा० → सा० । अनेन पस्य वः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सावो** ।

**[ उवसग्गो ]** उपसर्ग । अनेन पस्य वः । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । प्रथमा सि। 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **उवसग्गो** ।

**[ पईवो ]** प्रदीप । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) द्लुक् । अनेन पस्य वः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पईवो** ।

**[ कासवो ]** कश्यप । 'अधो म-न-याम्' (२।७८) य्लुक् । 'लुप्तय-र-व०' (१।४३) क० → का० । 'श-षोः सः' (१।२६०) श० → स० । अनेन पस्य वः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कासवो** ।

**[ पावं ]** पाप । प्रथमा सि । अनेन पस्य वः । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **पावं** ।

**[ उवमा ]** उपमा । प्रथमा सि । अनेन पस्य वः । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **उवमा** ।

[1]**[ कविलं ]** कपिल । प्रथमा सि । अनेन पस्य वः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कविलं** ।

**[ कुणवं ]** कुणप । प्रथमा सि । अनेन पस्य वः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कुणवं** ।

**[ कलावो ]** कलाप । प्रथमा सि । अनेन पस्य वः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कलावो** ।

**[ कवालं ]** कपाल । प्रथमा सि । अनेन पस्य वः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कवालं** ।

**[ महिवालो ]** महीपाल । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) ही० → हि० (?) ('दीर्घ-ह्रस्वौ०' (१।४) ह्रस्वः-ही० → हि०) । अनेन पस्य वः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **महिवालो** ।

**[ गोवइ ]** [2]'गुपि गोपन-कुत्सनयोः' (७६३) गुप् । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'युवर्णस्य गुणः' (४।२३७) गु० → गो० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) गोपइ । अनेन पस्य वः **गोवइ** ।

**[ तवइ ]** 'तपं संतापे' (३३३) तप् । तपति । अनेन पस्य वः । 'त्यादीनामाद्य०' (३।१३९) ति० → इ० **तवइ** ।

**[ कम्पइ ]** 'कपुङ् चलने' (७५७) कप् । 'उदितः स्वरान्नो०' (४।४।९८) कम्प् । कम्पते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **कम्पइ** ।

**[ अप्पमत्तो ]** अप्रमत्त । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) पस्य द्वित्वं-प० → प्प० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अप्पमत्तो** ।

**[ सुहेण पढइ ]** सुख । तृतीया टा । 'ख-घ-थ-ध-भाम्' (१।१८७) ख० → ह० । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्वम्-**सुहेण** । 'पठ व्यक्तायां वाचि' (२१३) पठ् । पठति । 'ठो ढः' (१।१९९) ठ० → ढ० । 'त्यादीनामाद्य०' (३।१३९) ति० → इ० **पढइ** ।

**[ कई ]** कपि । 'क-ग-च-ज०' (१।१७७) प्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः-इ० → ई० । 'अन्त्यव्य०' (१।११) स्लुक् **कई** ।

**[ रिऊ ]** रिपु । 'क-ग-च-ज०' (१।१७७) प्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः-उ → ऊ० । 'अन्त्यव्य०' (१।११) स्लुक् **रिऊ** ॥२३१॥

## पाटि-परुष-परिघ-परिखा-पनस-पारिभद्रे फः ॥ ८।१।२३२ ॥

ण्यन्ते पटिधातौ परुषादिषु च पस्य फो भवति ॥ फालेइ । फाडेइ । फरुसो । फलिहो । फलिहा । फणसो । फालिहद्दो ॥

---

१. पा० म०-कविल पुल्लिङ्गः । २. J. गुपौ रक्षणे । ।. गोपतिः ।

**[ पाटिपरुषपरिघपरिखापनसपारिभद्रे फः ]** पाटिश्च परुषश्च परिघश्च परिखा च पनसश्च [1]पारिभद्रं च = पाटिपरुषपरिघपरिखापनसपारिभद्रम्, तस्मिन् = पाटिपरुषपरिघपरिखापनसपारिभद्रे । सप्तमी ङि । फ प्रथमा सि ।

**[ फालेइ ]** अट(१९४)- 'पट गतौ' (१९५) पट् । पटन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ० । 'अदेल्लुक्यादेरत आः' (३।१५३) प० → पा० । 'लोकात्' (१।१।३) पाटि । वर्त्त० तिव् । 'णेरदेदावावे' (३।१४९) टि० → टे० । 'चपेटा-पाटौ वा' (१।१९८) टस्य लः । अनेन पा० → फा० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **फालेइ** ।

**[ फाडेइ ]** अट(१९४)- 'पट गतौ' (१९५) पट् । पटन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ० । 'अदेल्लुक्यादेरत आः' (३।१५३) प० → पा० । वर्त्त० तिव् । 'णेरदेदावावे' (३।१४९) टि० → टे० । 'टो डः' (१।१९५) टे० → डे० । अनेन पा० → फा० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **फाडेइ** ।

**[ फरुसो ]** परुष । अनेन प० → फ० । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **फरुसो** ।

**[ फलिहो ]** परिघ । अनेन प० → फ० । 'हरिद्रादौ लः' (१।२५४) रस्य लः । 'ख-घ-थ०' (१।१८७) घस्य हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **फलिहो** ।

**[ फलिहा ]** परिखा । प्रथमा सि । अनेन प० → फ० । 'हरिद्रादौ लः' (१।२५४) रस्य लः । 'ख-घ-थ-ध-भाम्' (१।१८७) खस्य हः । 'अन्त्य०' (१।११) स्लुक् **फलिहा** ।

**[ फणसो ]** पनस । अनेन प० → फ० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **फणसो** ।

**[ फालिहद्दो ]** पारिभद्र । अनेन प० → फ० । 'हरिद्रादौ लः' (१।२५४) रस्य लः । 'ख-घ-थ०' (१।१८७) भस्य हः । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) दस्य द्वित्वं - द० → द्द० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **फालिहद्दो** ॥२३२॥

## प्रभूते बः ॥ ८।१।२३३ ॥

प्रभूते पस्य बो भवति ॥ बहुत्तं ॥

**[ प्रभूते बः ]** प्रभूत सप्तमी ङि । ब प्रथमा सि ।

[2]**[ बहुत्तं ]** प्रभूत । 'सर्वत्र०' (२।७९) र्लुक् । अनेन पस्य बः । 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः । 'तैलादौ' (२।९८) तस्य द्वित्वं- त० → त्त० । 'ह्रस्वः संयोगे' (१।८४) ह्रस्वः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **बहुत्तं** ॥२३३॥

## नीपा-ऽऽपीडे मो वा ॥ ८।१।२३४ ॥

अनयोः पस्य मो वा भवति ॥ नीमो नीवो । आमेलो आवेडो ॥

**[ नीपाऽऽपीडे मो वा ]** नीपश्च आपीडश्च = नीपाऽऽपीडम्, तस्मिन् = नीपाऽऽपीडे । सप्तमी ङि । म प्रथमा सि । वा प्रथमा सि ।

---

१. K. पारिभद्रश्च । २. H. I. J. L. M. वहुत्तं ।

**[ नीमो नीवो ]** नीप (२) । अनेन वा पस्य मः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० नीमो। पक्षे- 'पो वः' (१।२३१) प० → व० **नीवो** ।

**[ आमेलो आवेडो ]** आपीड (२) । अनेम वा पस्य मः । 'एत् पीयूषा-ऽऽपीड०' (१।१०५) एत्वम् । 'डो लः' (१।२०२) ड० → ल० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आमेलो** । पक्षे-आपीड । 'पो वः' (१।२३१) पी० → वी० । 'एत् पीयूषा-ऽऽपीड०' (१।१०५) एत्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आवेडो** ॥२३४॥

## पापर्द्धौ रः ॥ ८।१।२३५ ॥

पापर्द्धावपदादौ पकारस्य रो भवति ॥ पारद्धी ॥

**[ पापर्द्धौ रः ]** पापर्द्धि सप्तमी ङि । र प्रथमा सि ।

**[ पारद्धी ]** पापर्द्धि । अनेन पस्य रः । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वम् (?) । प्रथमा सि। 'अक्लीबे सौ' (३।१९) दीर्घः- द्धि० → द्धी० । 'अन्त्यव्य०' (१।११) स्लुक् **पारद्धी** ॥२३५॥

## फो भ-हौ ॥ ८।१।२३६ ॥

स्वरात् परस्य असंयुक्तस्य अनादेः फस्य भ-हौ भवतः ॥

क्वचिद् भः - रेफः → रेभो । शिफा → सिभा ॥ क्वचित्तु हः - मुत्ताहलं ॥ क्वचिदुभावपि-सभलं सहलं । सेभालिआ सेहालिआ । सभरी सहरी । गुभइ गुहइ ॥ स्वरादित्येव - गुंफइ ॥ असंयुक्तस्येत्येव - पुप्फं ॥ अनादेरित्येव-चिट्ठइ फणी ॥ प्राय इत्येव - कसणफणी ॥

**[ फो भहौ ]** फ् षष्ठी ङस् । भ-ह प्रथमा ओ ।

**[ रेभो ]** रेफ । अनेन फस्य भः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **रेभो** ।

**[ सिभा ]** शिफा । 'श-षोः सः' (१।२६०) शि० → सि० । अनेन फस्य भः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सिभा** ।

**[ मुत्ताहलं ]** मुक्ताफल । 'क-ग-ट-ड०' (२।७७) क्लुक् । 'अनादौ०' (२।९८) तस्य द्वित्वं-ता० → त्ता० । अनेन फस्य हः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । मोऽनु०' (१।२३) अनुस्वारः **मुत्ताहलं** ।

**[ सभलं सहलं ]** सफल (२) । अनेन फ० → भ० - हश्च । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सभलं सहलं** ।

**[ सेभालिआ सेहालिआ ]** से(शे)फालिका (२) । अनेन फ० → भ०-हश्च । ['श-षोः सः' (१।२६०) शे० → से०]। 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **सेभालिआ सेहालिआ** ।

**[ सभरी सहरी ]** शफरी (२) । 'श-षोः सः' (१।२६०) श० → स० । अनेन फस्य भ-हश्च । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सभरी सहरी** ।

**[ गुभइ गुहइ ]** गुफ (१३८३)-'गुम्फत् ग्रन्थने' (१३८४) गुफ् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । अनेन फस्य भ-हश्च । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **गुभइ गुहइ** ।

**[ गुंफइ ]** 'गुफ ग्रन्थने (१३८३) गुम्फ् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **गुंफइ** ।

**[ पुप्फं ]** पुष्प । प्रथमा सि । 'ष्प-स्पयोः फः' (२।५३) ष्प० → फ० । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पुप्फं** ।

**[ चिट्ठइ फणी ]** स्था । वर्त्त० तिव् । 'स्थष्ठा-थक्क-चिट्ठ-निरप्पाः' (४।१६) स्था० → चिट्ठ० । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) तिव्० → इ० । 'व्यञ्जनाददन्ते' (४।२३९) अत् **चिट्ठइ** ।

**[ कसणफणी ]** कृष्ण-फणिन् । कृष्णश्चासौ फणी च = कृष्णफणी । 'ऋतोऽत्' (१।१२६) कृ० → क० । 'कृष्णे वर्णे वा' (२।११०) णात् प्राग् अ० । 'लोकात्' (१।१।३) कषण । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) न्लुक् । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **कसणफणी** ॥२३६॥

## बो वः ॥ ८।१।२३७ ॥

स्वरात् परस्य असंयुक्तस्य अनादेर्बस्य वो भवति ॥ अलाबूः → अलावू - अलाऊ । शबलः → सवलो ॥

**[ बो वः ]** ब् षष्ठी ङस् । व प्रथमा सि ।

**[ अलावू ]** अलाबु(बू) । प्रथमा सि । अनेन बस्य वः । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **अलावू** ।

**[ अलाऊ ]** अलाबु(बू) । अनेन बस्य वः । 'क-ग-च-ज०' (१।१७७) व्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **अलाऊ** ।

**[ सवलो ]** सबल । प्रथमा सि । 'श-षोः सः' (१।२६०) श० → स० । अनेन बस्य वः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सवलो** ॥२३७॥

## बिसिन्यां भः ॥ ८।१।२३८ ॥

बिसिन्यां बस्य भो भवति ॥ भिसिणी ॥ स्त्रीलिङ्गनिर्देशादिह न भवति । बिसतन्तुपेलवाणं ॥

**[ बिसिन्यां भः ]** बिसिनी सप्तमी ङि । भ प्रथमा सि ।

**[ भिसिणी ]** बिसिनी । अनेन बस्य भः । 'नो णः' (१।२२८) नी० → णी० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **भिसिणी** ।

**[ बिसतन्तुपेलवाणं ]** बिसतन्तुपेलव । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आमो णत्वम् । 'जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः' (३।१२) व० → वा० । 'क्त्वा-स्यादेर्ण-स्वोर्वा' (१।२७) अनुस्वारः **बिसतन्तुपेलवाणं** ॥२३८॥

## कबन्धे म-यौ ॥ ८।१।२३९ ॥

कबन्धे बस्य म-यौ भवतः ॥ कमन्धो । कयन्धो ॥

**[ कबन्धे मयौ ]** कबन्ध सप्तमी ङि । मश्च यश्च = मयौ । प्रथमा औ ।

**[ कमन्धो ]** कबन्ध । प्रथमा सि । अनेन बस्य मः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कमन्धो** ।

**[ कयन्धो ]** कबन्ध । प्रथमा सि । अनेन बस्य यः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कयन्धो** ॥२३९॥

## कैटभे भो वः ॥ ८।१।२४० ॥

कैटभे भस्य वो भवति ॥ केढवो ॥

**[ कैटभे भो वः ]** कैटभ सप्तमी ङि । भ् षष्ठी ङस् । व प्रथमा सि ।

**[ केढवो ]** कैटभ । प्रथमा सि । 'ऐत एत्' (१।१४८) कै० → के० । 'सटा-शकट-कैटभे ढः' (१।१९६) टस्य ढः । अनेन भस्य वः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **केढवो** ॥२४०॥

## विषमे मो ढो वा ॥ ८।१।२४१ ॥

विषमे मस्य ढो वा भवति ॥ विसढो । विसमो ॥

**[ विषमे मो ढो वा ]** विषम सप्तमी ङि । म् षष्ठी ङस् । ढ प्रथमा सि । वा प्रथमा सि ।

**[ विसढो ]** विषम । प्रथमा सि । 'श-षोः सः' (१।२६०) ष० → स० । अनेन वा मस्य ढः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विसढो** ।

**[ विसमो ]** विषम । प्रथमा सि । 'श-षोः सः' (१।२६०) ष० → स० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विसमो** ॥२४१॥

## मन्मथे वः ॥ ८।१।२४२ ॥

मन्मथे मस्य वो भवति ॥ वम्महो ॥

**[ मन्मथे वः ]** मन्मथ सप्तमी ङि । व प्रथमा सि ।

**[ वम्महो ]** मन्मथ । प्रथमा सि । अनेन मस्य वः । 'न्मो मः' (२।६१) न्मस्य मः । 'अनादौ०' (२।८९) मस्य द्वित्वं-म० → म्म० । 'ख-घ-थ-ध-भाम्' (१।१८७) थस्य हः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वम्महो** ॥२४२॥

## वाऽभिमन्यौ ॥ ८।१।२४३ ॥

अभिमन्युशब्दे मो वो वा भवति ॥ अहिवन्नू अहिमन्नू ॥

**[ वाऽभिमन्यौ ]** वा प्रथमा सि । अभिमन्यु सप्तमी ङि ।

**[ अहिवन्नू अहिमन्नू ]** अभिमन्यु । 'ख-घ-थ०' (१।१८७) भस्य हः । अनेन वा मस्य वः । 'अधो म-न-याम्' (२।७८) यलुक् । 'अनादौ०' (२।८९) नस्य द्वित्वं - नु० → न्नु० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः अहिवन्नू । पक्षे-अहिमन्नू । मस्य वकारमुक्त्वा शेषं पूर्ववत् । **अहिमन्नू** ॥२४३॥

## भ्रमरे सो वा ॥ ८।१।२४४ ॥

भ्रमरे मस्य सो वा भवति ॥ भसलो भमरो ॥

**[ भ्रमरे सो वा ]** भ्रमर सप्तमी ङि । स प्रथमा सि । वा प्रथमा सि ।

**[ भसलो भमरो ]** भ्रमर । 'सर्वत्र०' (२।७९) रलुक् । अनेन वा मस्य सः । 'हरिद्रादौ लः' (१।२५४) रस्य लः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् **भसलो** । पक्षे - भ्रमर । प्रथमा सि । 'सर्वत्र०' (२।७९) रलुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भमरो** ॥२४४॥

## आदेर्यो जः ॥ ८।१।२४५ ॥

पदादेर्यस्य जो भवति ॥

जसो । जमो । जाइ ॥ आदेरिति किम् ? अवयवो । विणओ ॥ बहुलाधिकारात् सोपसर्गस्य अनादेरपि - संजमो । संजोगो । अवजसो ॥ क्वचिन्न भवति - [1]पउओ ॥ आर्षे लोपोऽपि - यथाख्यातम् → अहक्खायं । यथाजातम् → अहाजायं ॥

**[ आदेर्यो जः ]** आदि षष्ठी ङस् । य् षष्ठी ङस् । ज प्रथमा सि ।

**[ जसो ]** यशस् । प्रथमा सि । अनेन यस्य जः । 'श-षोः सः' (१।२६०) श० → स० । 'अन्त्यव्य०' (१।११) स्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जसो** । 'स्नमदाम-शिरो-नभः' (१।३२) पुंस्त्वम् ।

**[ जमो ]** यम । प्रथमा सि । अनेन यस्य जः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जमो** ।

**[ जाइ ]** याति । अनेन यस्य जः । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) ति० → इ० **जाइ** ।

**[ अवयवो ]** अवयव । 'क-ग-च-ज०' (१।१७७) यलुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अवयवो** ।

**[ विणओ ]** विनय । 'नो णः' (१।२२८) न० → ण० । 'क-ग-च-ज०' (१।१७७) यलुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विणओ** ।

**[ संजमो ]** संयम । प्रथमा सि । बहुलाधिकारात् अनेन य० → ज० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **संजमो** ।

**[ संजोगो ]** संयोग । प्रथमा सि । बहुलाधिकारात् अनेन य० → ज० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **संजोगो** ।

**[ अवजसो ]** अप-विरुद्धं यशः = अपयशः । 'पो वः' (१।२३१) प० → व० । अनेन य० → ज० । 'श-षोः सः' (१।२६०) श० → स० । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् । 'स्नमदाम-शिरो-नभः' (१।३२) पुंस्त्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अवजसो** ।

**[ पउओ ]** प्रयुत । 'सर्वत्र०' (२।७९) रलुक् । 'क-ग-च-ज०' (१।१७७) यलुक् - तलुक् च । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पउओ** ।

**[ अहक्खायं ]** यथाख्यात । आर्षे यलोपः । 'ह्रस्वः संयोगे' (१।८४) था० → थ० । 'ख-घ-थ-ध-भाम्' (१।१८७) थस्य हः । 'अधो म-न-याम्' (२।७८) यलुक् । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । 'क-ग-च-ज०' (१।१७७) तलुक् । 'अवर्णो०' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अहक्खायं** ।

---

१. I. J. L. पयोओ । H. M. पओओ ।

**[ अहाजायं ]** यथाजात । आर्षे यलुक् । 'ख-घ-थ-ध-भाम्' (१।१८७) था० → हा० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अहाजायं** ॥२४५॥

## युष्मद्यर्थपरे तः ॥ ८।१।२४६ ॥

युष्मच्छब्देऽर्थपरे यस्य तो भवति ॥ तुम्हारिसो । तुम्हकेरो ॥ अर्थपर इति किम् ? जुम्हदम्हपयरणं ।

**[ युष्मद्यर्थपरे तः ]** युष्मद् सप्तमी ङि । अर्थपर सप्तमी ङि । त प्रथमा सि ।

**[ तुम्हारिसो ]** युष्मादृशः । अनेन यस्य तः । 'पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः' (२।७४) ष्म० → म्ह० । 'दृशः क्विप्-टक्-सकः' (१।१४२) ऋ० → रि० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तुम्हारिसो** ।

**[ तुम्हकेरो ]** युष्मद् । युष्माकमयं = युष्मदीयः । 'दोरीयः' (६।३।३२) ईयप्र० । 'इदमर्थस्य केरः' (२।१४७) ईयस्य केरः । अनेन यस्य तः । 'पक्ष्म-श्म-ष्म०' (२।७४) ष्म० → म्ह० । 'अन्त्यव्य०' (१।११) द्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तुम्हकेरो** ।

**[ जुम्हदम्हपयरणं ]** युष्मदस्मद्(त्)प्रकरण । 'आदेर्यो जः' (१।२४५) यस्य जः । 'पक्ष्म-श्म-ष्म०' (२।७४) ष्म०-स्म० → म्ह० । 'लोकात्' (१।१।३) जुम्हदम्हद् । 'अन्त्यव्य०' (१।११) द्लुक् । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जुम्हदम्हपयरणं** ॥२४६॥

## यष्ट्यां लः ॥ ८।१।२४७ ॥

यष्ट्यां यस्य लो भवति ॥ लट्ठी । वेणुलट्ठी । उच्छुलट्ठी । महुलट्ठी ॥

**[ यष्ट्यां लः ]** यष्टि सप्तमी ङि । ल प्रथमा सि ।

**[ लट्ठी ]** यष्टि । अनेन यस्य लः । 'ष्टस्या०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **लट्ठी** ।

**[ वेणुलट्ठी ]** वेणुयष्टि । अनेन यस्य लः । 'ष्टस्या०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **वेणुलट्ठी** ।

**[ उच्छुलट्ठी ]** इक्षुयष्टि । 'प्रवासीक्षौ' (१।९५) इकारस्य उकारः । 'छोऽक्ष्यादौ' (२।१७) क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । अनेन यस्य लः । 'ष्टस्या०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **उच्छुलट्ठी** ।

**[ महुलट्ठी ]** मधुयष्टि । प्रथमा सि । 'ख-घ-थ-ध-भाम्' (१।१८७) धस्य हः । अनेन यस्य लः । 'ष्टस्या०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **महुलट्ठी** ॥२४७॥

## वोत्तरीया-ऽनीय-तीय-कृद्ये ज्जः ॥ ८।१।२४८ ॥

उत्तरीयशब्दे अनीय-तीय-कृद्यप्रत्ययेषु च यस्य द्विरुक्तो जो वा भवति ॥

उत्तरिज्जं उत्तरीअं ॥ अनीय-करणिज्जं करणीअं । विम्हयणिज्जं विम्हयणीअं । जवणिज्जं जवणीअं ॥ तीय-बिइज्जो बीओ ॥ कृद्य - पेज्जा पेआ ॥

**[ वोत्तरीयाऽनीयतीयकृद्ये ]** वा प्रथमा सि । उत्तरीयं च अनीयश्च तीयश्च कृद्यश्च = उत्तरीयाऽनीयतीयकृद्यः, तस्मिन् = उत्तरीयाऽनीयतीयकृद्ये । सप्तमी ङि ।

**[ ज्जः ]** ज्ज प्रथमा सि ।

**[ उत्तरिज्जं उत्तरीअं ]** उत्तरीय । अनेन वा यस्य ज्ज० । 'ह्रस्वः संयोगे' (१।८४) री० → रि० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **उत्तरिज्जं** । पक्षे - उत्तरीय । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **उत्तरीअं** ।

अनीयो दर्शयति-

**[ करणिज्जं करणीअं ]** करणीय । अनेन वा यस्य ज्ज० । 'ह्रस्वः संयोगे' (१।८४) ह्रस्वः-णी० → णि० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **करणिज्जं** । पक्षे-करणीय । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **करणीअं** ।

**[ विम्हयणिज्जं विम्हयणीअं ]** विस्मयनीय । 'पक्ष्म-श्म-ष्म-स्म०' (२।७४) स्मस्य म्हः । अनेन वा यस्य ज्ज० । 'ह्रस्वः संयोगे' (१।८४) नी० → नि० । 'नो णः' (१।२२८) नि० → णि० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **विम्हयणिज्जं** । पक्षे-विस्मयनीय । 'पक्ष्म-श्म-ष्म-स्म०' (२।७४) स्मस्य म्हः । 'नो णः' (१।२२८) नी० → णी० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **विम्हयणीअं** ।

**[ जवणिज्जं जवणीअं ]** यापनीय । 'यापेर्जवः' (४।४०) याप० → जव० । 'लुक्' (१।१०) वमध्यादकारलुक् । 'लोकात्' (१।१।३) जवनीय । अनेन वा यस्य ज्ज० । 'ह्रस्वः संयोगे' (१।८४) नी० → नि० । 'नो णः' (१।२२८) नि० → णि० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जवणिज्जं** । पक्षे-यापनीय । प्रथमा सि । 'यापेर्जवः' (४।४०) याप० → जवः । 'लुक्' (१।१०) वमध्यादकारलुक् । 'लोकात्' (१।१।३) जवनीय । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'नो णः' (१।२२८) नी० → णी० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जवणीअं** ।

तीयो दर्शयति -

**[ बिइज्जो बीओ ]** द्वितीय । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन वा यस्य ज्ज० । 'ह्रस्वः संयोगे' (१।८४) ई० → इ० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **बिइज्जो** । पक्षे-द्वितीय । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् - य्लुक् च । बाहुलकात् 'समानानां०' (१।२।१) दीर्घः - बी० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **बीओ** ।

---

१. जत्ता भे ? जवणिज्जं च भे ? । [आवश्यकसूत्रे सुगुरुवंदनसूत्रे] । यात्रा भवतां ? यापनीयं च भवतां ? ।

कृतो यः = कृद्यः, तद् दर्शयति -

**[ पेज्जा ]** पेया । अनेन वा यस्य ज्ज० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **पेज्जा** ।

**[ पेआ ]** पेया । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **पेआ** ॥२४८॥

## छायायां होऽकान्तौ वा ॥ ८।१।२४९ ॥

अकान्तौ वर्तमाने छायाशब्दे यस्य हो वा भवति ॥

वच्छस्स च्छाही वच्छस्स च्छाया । आतपाभावः । सच्छाहं सच्छायं ॥

अकान्ताविति किम् ? मुहच्छाया । कान्तिरित्यर्थः ॥

**[ छायायां होऽकान्तौ वा ]** छाया सप्तमी ङि । ह प्रथमा सि । अकान्ति सप्तमी ङि । वा प्रथमा सि ।

**[ वच्छस्स च्छाही वच्छस्स च्छाया ]** वृक्षस्य । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'छोऽक्ष्यादौ' (२।१७) क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **वच्छस्स** । छाया । अनेन वा यस्य हः । 'छाया-हरिद्रयोः' (३।३४) ङीप्रत्ययः । 'लुक्' (१।१०) आलोपः । 'लोकात्' (१।१।३) **छाही** । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् छाही । पक्षे-**वच्छस्स छाया** । पूर्ववत् ।

**[ सच्छाहं सच्छायं ]** स-छाया । सह छायया वर्त्तते यत् तत् = सच्छायम् । अनेन वा यस्य हः । 'स्वरेभ्यः' (१।३।३०) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सच्छाहं** । पक्षे-सच्छायं । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सच्छायं** ।

**[ मुहच्छाया ]** मुख-छाया । मुखस्य छाया । 'स्वरेभ्यः' (१।३।३०) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'ख-घ-थ-ध-भाम्' (१।१८७) ख० → ह० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **मुहच्छाया** ॥२४९॥

## डाह-वौ कतिपये ॥ ८।१।२५० ॥

कतिपये यस्य डाह - व इत्येतौ पर्यायेण भवतः ॥ कइवाहं । कइअवं ॥

**[ डाहवौ कतिपये ]** डाहश्च वश्च = डाहवौ । प्रथमा औ । कतिपय सप्तमी ङि ।

**[ कइवाहं कइअवं ]** कतिपय । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'पो वः' (१।२३१) पस्य वः । अनेन यस्य डाह० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) कइवाह । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कइवाहं** । पक्षे-कतिपय । 'क-ग-च-ज०' (१।१७७) त-पयोर्लुक् । अनेन यस्य व० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कइअवं** ॥२५०॥

## किरि - भेरे रो डः ॥ ८।१।२५१ ॥

अनयो रस्य डो भवति ॥ किडी । भेडो ॥

**[ किरिभेरे ]** किरिश्च भेरश्च = किरिभेरम्, तस्मिन् = किरिभेरे । सप्तमी ङि ।

**[ रो डः ]** र् षष्ठी ङस् । ड प्रथमा सि ।

**[ किडी ]** किरि । प्रथमा सि । अनेन रस्य डः । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **किडी** ।

**[ भेडो ]** भेर । प्रथमा सि । अनेन रस्य डः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भेडो** ॥२५१॥

## पर्याणे डा वा ॥ ८।१।२५२ ॥

पर्याणे रस्य डा इत्यादेशो वा भवति ॥ पडायाणं । पल्लाणं ॥

**[ पर्याणे डा वा ]** पर्याण सप्तमी ङि । डा प्रथमा सि । वा प्रथमा सि ।

**[ पडायाणं पल्लाणं ]** पर्याण । रकार-यकारयोर्विश्लेषं कृत्वा अनेन वा र० → डा० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पडायाणं** । पक्षे-पर्याण । 'पर्यस्त-पर्याण-सौकुमार्ये ल्लः' (२।६८) र्या० → ल्ला० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पल्लाणं** ॥२५२॥

## करवीरे णः ॥ ८।१।२५३ ॥

करवीरे प्रथमस्य रस्य णो भवति ॥ कणवीरो ॥

**[ करवीरे णः ]** करवीर सप्तमी ङि । ण प्रथमा सि ।

**[ कणवीरो ]** करवीर । अनेन प्रथमस्य रस्य णः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कणवीरो** ॥२५३॥

## हरिद्रादौ लः ॥ ८।१।२५४ ॥

हरिद्रादिषु शब्देषु असंयुक्तस्य रस्य लो भवति ॥

[१]हलद्दी । दलिद्दाइ । दालिद्दो । दलिद्दं । हलिद्दो । जहुट्ठिलो । सिढिलो । मुहलो । चलणो । वलुणो । कलुणो । इङ्गालो । सक्कालो । सोमालो । चिलाओ । फलिहा । फलिहो । फालिहद्दो । काहलो । लुक्को । अवद्दालं । भसलो । जढलं । वढलो । निट्ठुलो ॥

बहुलाधिकाराच्चरणशब्दस्य पादार्थवृत्तेरेव । अन्यत्र - चरणकरणं ॥ भ्रमरे ससंनियोगे एव । अन्यत्र - भमरो । तथा जढरं । बढरो । निट्ठुरो इत्याद्यपि ॥

हरिद्रा । दरिद्राति । दरिद्र । दारिद्र्य । हरिद्र । युधिष्ठिर । शिथिर । मुखर । चरण । वरुण । करुण । अङ्गार । सत्कार । सुकुमार । किरात । परिखा । परिघ । पारिभद्र । कातर । रुग्ण । अपद्वार । भ्रमर । जठर । बठर । निष्ठुर इत्यादि ॥

आर्षे-दुवालसंगे इत्याद्यपि ॥

**[ हरिद्रादौ लः ]** हरिद्रादि सप्तमी ङि । ल प्रथमा सि ।

**[ हलद्दी ]** हरिद्रा । पथि-पृथिवी-प्रतिश्रुन्मूषिक-हरिद्रा-बिभीतकेष्वत्' (१।८८) रि० → र० । अनेन रस्य लः । 'द्रे रो नवा' (२।८०) द्रमध्याद् रकारलोपः । 'अनादौ०' (२।८९) दस्य द्वित्वम् । 'छाया-हरिद्रयोः' (३।३४) ङीप्रत्ययः । 'लुक्' (१।१०) आलोपः । 'लोकात्' (१।१।३) हलद्दी । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **हलद्दी** ।

१. I. J. L. M. हल्दिी ।

**[ दलिद्दाइ ]** 'दरिद्राक् दुर्गतौ' (१०९२) दरिद्रा । वर्त्त० तिव् । अनेन रस्य लः । 'द्रे रो नवा' (२।८०) द्रमध्याद् रकारलोपः । 'अनादौ०' (२।८९) दस्य द्वित्वम् । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) तिव्० → इ० **दलिद्दाइ** ।

**[ दलिद्दो ]** 'दरिद्राक् दुर्गतौ' (१०९२) दरिद्रा । दरिद्रातीति । अच्प्र० । 'अशित्यस्सन्-णकज्-णका-ऽनटि' (४।३।७७) आलोपः । अनेन रस्य लः । 'द्रे रो नवा' (२।८०) द्रमध्याद् रकारलोपः । 'अनादौ०' (२।८९) दस्य द्वित्वम्। प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दलिद्दो** ।

**[ दालिद्दं ]** दरिद्रस्य भावः । 'पतिराजान्त०' (७।१।६०) ट्यणप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । अनेन रस्य लः । 'अधो म-न-याम्' (२।७८) य्लुक् । 'द्रे रो नवा' (२।८०) द्रमध्याद् रकारलोपः । 'अनादौ०' (२।८९) दस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दालिद्दं** ।

**[ हलिद्दो ]** हारिद्र । 'वाऽव्ययोत्खातादावदातः' (१।६७) हा० → ह० । अनेन रस्य लः । 'द्रे रो नवा' (२।८०) द्रमध्याद् रकारलोपः । 'अनादौ०' (२।८९) दस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **हलिद्दो** ।

**[ जहुट्ठिलो ]** युधिष्ठिर । 'आदेर्यो जः' (१।२४५) यस्य जः । 'उतो मुकुलादिष्वत्' (१।१०७) जु० → ज० । 'युधिष्ठिरे वा' (१।९६) धि० → धु० । 'ख-घ-थ-ध-भाम्' (१।१८७) धस्य हः । 'ष्टस्या०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । अनेन रस्य लः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जहुट्ठिलो** ।

**[ सिढिलो ]** शिथिर । 'श-षोः सः' (१।२६०) शि० → सि० । 'मेथि-शिथिर-शिथिल-प्रथमे थस्य ढः' (१।२१५) थि० → ढि० । अनेन रस्य लः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सिढिलो** ।

**[ मुहलो ]** मुखर । 'ख-घ-थ-ध-भाम्' (१।१८७) खस्य हः । अनेन रस्य लः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् **मुहलो** ।

**[ चलणो ]** चरण । अनेन रस्य लः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । डित्यन्त्य०' (२।१।११४) अलुक् **चलणो** ।

**[ वलुणो ]** वरुण । अनेन रस्य लः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वलुणो** ।

**[ कलुणो ]** करुण । अनेन रस्य लः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कलुणो** ।

**[ इङ्गालो ]** अङ्गार । 'पक्वा-ऽङ्गार-ललाटे वा' (१।४७) अ० → इ० । अनेन रस्य लः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **इङ्गालो** ।

**[ सक्कालो ]** सत्कार । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । अनेन रस्य लः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सक्कालो** ।

**[ सोमालो ]** सुकुमार । 'नवा मयूख-लवण-चतुर्गुण-चतुर्थ-चतुर्दश-चतुर्वार-सुकुमार-कुतूहलोदूखलोलूखले' (१।१७१) कुशब्देन सह ओत्वं- सुकु० → सो० । अनेन रस्य लः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सोमालो** ।

**[ चिलाओ ]** किरात । 'किराते चः' (१।१८३) कस्य चः । अनेन रस्य लः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **चिलाओ** ।

**[ फलिहा ]** परिखा । 'पाटि-परुष-परिघ-परिखा-पनस-पारिभद्रे फः' (१।२३२) पस्य फः । अनेन रस्य लः । 'ख-घ-थ०' (१।१८७) खस्य हः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **फलिहा** ।

**[ फलिहो ]** परिघ । 'पाटि-परुष-परिघ०' (१।२३२) पस्य फः । अनेन रस्य लः । 'ख-घ-थ०' (१।१८७) घस्य हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **फलिहो** ।

**[ फालिहद्दो ]** पारिभद्र । 'पाटि-परुष-परिघ-परिखा-पनस-पारिभद्रे फः' (१।२३२) पस्य फः । अनेन रस्य लः । 'ख-घ-थ०' (१।१८७) भस्य हः । 'द्रे रो नवा' (२।८०) र्लुक् । 'अनादौ०' (२।८९) दस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **फालिहद्दो** ।

**[ काहलो ]** कातर । 'वितस्ति-वसति-भरत-कातर-मातुलिङ्गे हः' (१।२१४) तस्य हः । अनेन रस्य लः । प्रथमा सि। 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **काहलो** ।

**[ लुक्को ]** रुग्ण । अनेन रस्य लः । 'शक्त-मुक्त-दष्ट-रुग्ण-मृदुत्वे को वा' (२।२) ग्णस्य क० । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **लुक्को** ।

**[ अवद्दालं ]** अपद्वार । 'पो वः' (१।२३१) पस्य वः । 'सर्वत्र०' (२।७९) व्लुक् । 'अनादौ०' (२।८९) दस्य द्वित्वम् । अनेन रस्य लः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अवद्दालं** ।

**[ भसलो ]** भ्रमर । 'सर्वत्र०' (२।७९) र्लुक् । 'भ्रमरे सो वा' (१।२४४) मस्य सः । अनेन रस्य लः । प्रथमा सि। 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भसलो** ।

**[ जढलं ]** जठर । 'ठो ढः' (१।१९९) ठस्य ढः । अनेन रस्य लः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जढलं** ।

**[ वढलो ]** बठर । 'बो वः' (१।२३७) ब० → व० । 'ठो ढः' (१।१९९) ठस्य ढः । अनेन रस्य लः । प्रथमा सि। 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वढलो** ।

**[ निट्ठुलो ]** निष्ठुर । 'ष्टस्या०' (२।३४) ष्ठस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । अनेन रस्य लः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निट्ठुलो** ।

**[ चरणकरणं ]** चरणकरण । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **चरणकरणं** ।

**[ भमरो ]** भ्रमर । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् **भमरो** ।

बहुलाधिकारात् -

**[ जढरं ]** जठर । प्रथमा सि । 'ठो ढः' (१।१९९) ठस्य ढः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जढरं** ।

**[ बढरो ]** बठर । 'ठो ढः' (१।१९९) ठस्य ढः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **बढरो** ।

**[ निट्ठुरो ]** निष्ठुर । प्रथमा सि । 'ष्टस्याऽनुष्ट्रेष्टा०' (२।३४) ष्ठस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **निट्ठुरो** ।

**आर्षे-[ दुवालसंगे ]** द्वादशाङ्ग । 'पद्म-छद्म-मूर्ख-द्वारे वा' (२।११२) इति द-वयोर्विश्लेषं कृत्वा वात् प्राग् उकारः । 'लोकात्' (१।१।३) दुवादशाङ्ग । आर्षत्वात् दस्य लः । 'श-षोः सः' (१।२६०) शा० → सा० । 'ह्रस्वः संयोगे' (१।८४) सा० → स० । 'ङ-ञ-ण०' (१।२३) अनुस्वारः । प्रथमा सि । 'अत एत्सौ पुंसि मागध्याम् (४।२८७) सिना सह एकारः ग० → गे० **दुवालसंगे** ॥२५४॥

## स्थूले लो रः ॥ ८।१।२५५ ॥

स्थूले लस्य रो भवति ॥ थोरं ॥ कथं थूलभद्दो ? स्थूरस्य हरिद्रादिलत्वे भविष्यति ॥

**[ स्थूले लो रः ]** स्थूल सप्तमी ङि । ल् षष्ठी ङस् । र प्रथमा सि ।

**[ थोरं ]** स्थूल । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'ओत् कूष्माण्डी-तूणीर-कूर्पर-स्थूल-ताम्बूल-गुडूची-मूल्ये' (१।१२४) थू० → थो० । अनेन लस्य र० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **थोरं** ।

**[ थूलभद्दो ]** स्थूरभद्र । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'हरिद्रादौ लः' (१।२५४) रस्य लः । 'द्रे रो नवा' (२।८०) र्लुक् । 'अनादौ०' (२।८९) दस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **थूलभद्दो** ॥२५५॥

## लाहल-लाङ्गल-लाङ्गूले वाऽऽदेर्णः ॥ ८।१।२५६ ॥

एषु आदेर्लस्य णो वा भवति ॥ णाहलो लाहलो । णङ्गलं लङ्गलं । णङ्गूलं लङ्गूलं ॥

**[ लाहललाङ्गललाङ्गूले ]** लाहलश्च लाङ्गलं च लाङ्गूलं च = लाहललाङ्गललाङ्गूलम्, तस्मिन् = लाहललाङ्गललाङ्गूले । सप्तमी ङि ।

**[ वाऽऽदेर्णः ]** वा प्रथमा सि । आदि षष्ठी ङस् । ण प्रथमा सि ।

**[ णाहलो लाहलो ]** लाहल (२) । अनेन वा लस्य णः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **णाहलो लाहलो** ।

**[ णङ्गलं लङ्गलं ]** लाङ्गल (२) । अनेन वा लस्य णः । 'ह्रस्वः संयोगे' (१।८४) णा० → ण० - ला० → ल० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **णङ्गलं लङ्गलं** ।

**[ णङ्गूलं लङ्गूलं ]** लाङ्गूल (२) । अनेन वा लस्य णः । 'ह्रस्वः संयोगे' (१।८४) णा० → ण० - ला० → ल० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **णङ्गूलं लङ्गूलं** ॥२५६॥

## ललाटे च ॥ ८।१।२५७ ॥

ललाटे च आदेर्लस्य णो भवति ॥ चकार आदेरनुवृत्त्यर्थः । णिडालं णडालं ॥

**[ ललाटे च ]** ललाट सप्तमी ङि । च प्रथमा सि ।

**[ णिडालं णडालं ]** ललाट (२) । अनेन लस्य णः । 'पक्वा-ऽङ्गार-ललाटे वा' (१।४७) अतो वा इत्त्वम् । 'ललाटे ल-डोः' (२।१२३) इति व्यत्ययः । णिटाल इति स्थिते 'टो डः' (१।१९५) टस्य डः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **णिडालं णडालं** ॥२५७॥

## [1]शबरे वो मः ॥ ८।१।२५८ ॥

शबरे ब(व)स्य मो भवति ॥ समरो ॥

**[ शबरे वो मः ]** शबर सप्तमी ङि । व् षष्ठी ङस् । म प्रथमा सि ।

**[ समरो ]** शबर । 'श-षोः सः' (१।२६०) श० → स० । अनेन ब(व)स्य मः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **समरो** ॥२५८॥

## स्वप्न-नीव्योर्वा ॥ ८।१।२५९ ॥

अनयोर्वस्य मो वा भवति ॥ सिमिणो सिविणो । नीमी नीवी ॥

**[ स्वप्ननीव्योर्वा ]** स्वप्नश्च नीवी च = स्वप्ननीव्यौ, तयोः = स्वप्ननीव्योः । वा प्रथमा सि ।

**[ सिमिणो सिविणो ]** स्वप्न । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) व्लुक् । 'इः स्वप्नादौ' (१।४६) स० → सि० । प-नयोर्विश्लेषं कृत्वा 'पो वः' (१।२३१) पस्य वः । 'स्वप्ने नात्' (२।१०८) इकारागमः । 'लोकात्' (१।१।३) वि० । अनेन वा वस्य मः । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सिमिणो** । पक्षे-**सिविणो** ।

**[ नीमी नीवी ]** नीवी (२) । अनेन वा वस्य मः । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **नीमी नीवी** ॥२५९॥

## श-षोः सः ॥ ८।१।२६० ॥

शकार-षकारयोः सो भवति ॥

श-सद्दो । कुसो । निसंसो । वंसो । सामा । सुद्धं । दस । सोहइ । विसइ ।

ष-सण्डो । निहसो । कसाओ । घोसइ ॥ उभयोरपि - सेसो । विसेसो ॥

**[ शषोः सः ]** शश्च ष् च = शषौ, तयोः = शषोः । षष्ठी ओस् । स प्रथमा सि ।

**[ सद्दो ]** शब्द । अनेन श० → स० । 'सर्वत्र०' (२।७९) ब्लुक् । 'अनादौ०' (२।८९) दस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सद्दो** ।

**[ कुसो ]** कुश । प्रथमा सि । अनेन श० → स० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कुसो** ।

**[ निसंसो ]** नृशंस । 'ऋतोऽत्' (१।१२६) नृ० → न० ('इत् कृपादौ' (१।१२८) नृ० → नि०) । अनेन शं० → सं० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निसंसो** ।

**[ वंसो ]** वंश । प्रथमा सि । अनेन श० → स० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वंसो** ।

---

१. G. पाठां० शबरे वो मः - दी० । ता० प्रतौ अत्र 'समरो' इत्युदाहरणस्योपरि 'बो वः' इति टिप्पितं वर्तते, तेन 'शबरे वो मः' इति पाठः सम्यक् प्रतिभाति ।

**[ सामा ]** श्यामा । प्रथमा सि । 'अधो म-न-याम्' (२।७८) य्लुक् । अनेन शा० → सा० । 'अन्त्यव्य०' (१।११) स्लुक् **सामा** ।

**[ सुद्धं ]** शुद्ध । प्रथमा सि । अनेन शु० → सु० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुद्धं** ।

**[ दस ]** दश । अनेन श० → स० । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **दस** ।

**[ सोहइ ]** 'शुभि दीप्तौ' (९४७) शुभ् । शोभते । अनेन शस्य स० । 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **सोहइ** ।

**[ विसइ ]** विशति । अनेन श० → स० । 'त्यादीनामाद्य०' (३।१३९) ति० → इ० **विसइ** ।

**[ सण्डो ]** षण्ड । अनेन षस्य सः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सण्डो** ।

**[ निहसो ]** निकष । प्रथमा सि । 'निकष-स्फटिक-चिकुरे हः' (१।१८६) कस्य हः । अनेन षस्य सः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निहसो** ।

**[ कसाओ ]** कषाय । अनेन षा० → सा० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कसाओ** ।

**[ घोसइ ]** 'घुषृ शब्दे' (४९७) घुष् । घोषति । अनेन षस्य सः । 'त्यादीनामाद्यत्रय०' (३।१३९) ति० → इ० **घोसइ** ।

**[ सेसो ]** शेष । प्रथमा सि । अनेन श-षोः सः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सेसो** ।

**[ विसेसो ]** विशेष । प्रथमा सि । अनेन श-षोः सः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विसेसो** ॥२६०॥

### स्नुषायां ण्हो नवा ॥ ८।१।२६१ ॥

स्नुषाशब्दे षस्य ण्हः णकाराक्रान्तो हो वा भवति ॥ सुण्हा सुसा ॥

**[ स्नुषायां ण्हो नवा ]** स्नुषा सप्तमी ङि । ण्ह प्रथमा सि । नवा प्रथमा सि ।

**[ सुण्हा सुसा ]** स्नुषा । 'अधो म-न-याम्' (२।७८) न्लोपः । अनेन वा षस्य ण्हः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सुण्हा** । पक्षे-स्नुषा । 'अधो म-न-याम्' (२।७८) न्लोपः । 'श-षोः सः' (१।२६०) षस्य सः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सुसा** ॥२६१॥

### दश-पाषाणे हः ॥ ८।१।२६२ ॥

दशन्शब्दे पाषाणशब्दे च श-षोर्यथादर्शनं हो वा भवति ॥

दहमुहो दसमुहो । दहबलो दसबलो । दहरहो दसरहो । दह दस । एआरह । बारह । तेरह । पाहाणो पासाणो ॥

**[ दशपाषाणे हः ]** दश च पाषाणश्च = दशपाषाणम्, तस्मिन् = दशपाषाणे । सप्तमी ङि । ह प्रथमा सि ।

**[ दहमुहो दसमुहो ]** दशमुख । अनेन वा शस्य हः । 'ख-घ-थ-ध-भाम्' (१।१८७) खस्य हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दहमुहो** । पक्षे - दशमुख । 'श-षोः सः' (१।२६०) श० → स० । 'ख-घ-थ०' (१।१८७) खस्य हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दसमुहो** ।

**[ दहब( व )लो दसब( व )लो ]** दशबल । दशबलानि आगमप्रसिद्धानि क्षान्त्यादीनि अस्य सः = दशबलः । अनेन वा शस्य हः । 'बो वः' (१।२३७) बस्य वः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दहवलो** । पक्षे-दशबल । 'श-षोः सः' (१।२६०) शस्य सः । 'बो वः' (१।२३७) बस्य वः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दसवलो** ।

**[ दहरहो दसरहो ]** दशरथ । अनेन शस्य हः । 'ख-घ-थ-ध-भाम्' (१।१८७) थस्य हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दहरहो** । पक्षे-दशरथ । 'श-षोः सः' (१।२६०) श० → स० । 'ख-घ-थ०' (१।१८७) थस्य हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दसरहो** ।

**[ दह दस ]** दश । अनेन वा शस्य हः । पक्षे-दश । 'श-षोः सः' (१।२६०) श० → स० **दस** ।

**[ एआरह ]** एकादश । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'संख्या-गद्गदे रः' (१।२१९) दस्य रः । अनेन शस्य हः **एआरह** ।

**[ बारह ]** द्वादश । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'संख्या-गद्गदे रः' (१।२१९) दस्य रः । अनेन शस्य हः **बारह** ।

**[ तेरह ]** त्रयोदश । 'एत् त्रयोदशादौ स्वरस्य सस्वरव्यञ्जनेन' (१।१६५) त्रयो० → ते० । 'संख्या-गद्गदे रः' (१।२१९) दस्य रः । अनेन शस्य हः **तेरह** ।

दशादयः शब्दाः संस्कृतसिद्धा ज्ञातव्याः । अन्यथा 'जस्-शस्-ङसि-त्तो-दो-द्वामि०' (३।१२) दीर्घः स्यात् ।

**[ पाहाणो पासाणो ]** पाषाण । अनेन वा षस्य हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पाहाणो** । पक्षे-पाषाण । 'श-षोः सः' (१।२६०) षा० → सा० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पासाणो** ॥२६२॥

## दिवसे सः ॥ ८।१।२६३ ॥

दिवसे सस्य हो वा भवति ॥ दिवहो । दिवसो ॥

**[ दिवसे सः ]** दिवस सप्तमी ङि । स् षष्ठी ङस् ।

**[ दिवहो दिवसो ]** दिवस । अनेन वा सस्य हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दिवहो** । पक्षे-दिवस । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दिवसो** ॥२६३॥

## हो घोऽनुस्वारात् ॥ ८।१। २६४ ॥

अनुस्वारात् परस्य हस्य घो वा भवति ॥ सिंघो सीहो । संघारो संहारो ॥ क्वचिदननुस्वारादपि-दाहो दाघो ॥

**[ हो घोऽनुस्वारात् ]** ह् षष्ठी ङस् । घ प्रथमा सि । अनुस्वार पञ्चमी ङसि ।

**[ सिंघो सीहो ]** सिंह । अनेन वा हस्य घः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सिंघो** । पक्षे-सिंह । 'मांसाऽऽदेर्वा' (१।२९) अनुस्वारलोपः । 'ईर्जिह्वा-सिंह-त्रिंशद्विंशतौ त्या' (१।९२) सि० → सी० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सीहो** ।

**[ संघारो संहारो ]** संहार (२) । अनेन वा हस्य घः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **संघारो** । पक्षे-**संहारो** ।

क्वचिदननुस्वारादपि हस्य घत्वम् । यथा –

**[ दाहो दाघो ]** दाह । अनेन वा हस्य घः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दाघो** । पक्षे-**दाहो** ॥२६४॥

## षट्-शमी-शाव-सुधा-सप्तपर्णेष्वादेश्छः ॥ ८।१।२६५ ॥

एषु आदेर्वर्णस्य छो भवति ॥

छट्ठो । छट्ठी । छप्पओ । छम्मुहो । छमी । छावो । छुहा । छत्तिवण्णो ॥

**[ षट्शमीशावसुधासप्तपर्णेषु ]** षट् च शमी च शावश्च सुधा च सप्तपर्णश्च = षट्शमीशावसुधासप्तपर्णाः, तेषु = षट्शमीशावसुधासप्तपर्णेषु । सप्तमी सुप् । बहुवचनं षट्शब्दस्य प्रत्ययान्तस्यापि ग्रहणार्थम् ।

**[ आदेश्छः ]** आदि षष्ठी ङस् । छ प्रथमा सि ।

**[ छट्ठो ]** षट् । षण्णां पूरणः = षष्टः । 'षट्-कति-कतिपयात् थट्' (७।१।१६२) थट्प्र० → थ० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) थस्य ठः । षट्संयोगे ष्टः षष्टः । अनेन षस्य छः । 'ष्टस्याऽनुष्ट्रेष्टा०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **छट्ठो** ।

**[ छट्ठी ]** छट्ठ पूर्ववत् । प्रथमा सि । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङीप्रत्ययः । 'लुक्' (१।१०) ठमध्याद् अस्य लुक् । 'लोकात्' (१।१।३) छट्ठी । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **छट्ठी** ।

**[ छप्पओ ]** षट्पद । अनेन षस्य छः । 'क-ग-ट-ड०' (२।७७) ट्लुक् । 'अनादौ०' (२।८९) पस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **छप्पओ** ।

**[ छंमुहो ]** षण्मुख । अनेन षस्य छः । 'ङ-ञ-ण-नो व्यञ्जने' (१।२५) अनुस्वारः । 'ख-घ-थ-ध-भाम्' (१।१८७) खस्य हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **छंमुहो** ।

**[ छमी ]** शमी । प्रथमा सि । अनेन शस्य छः । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **छमी** ।

**[ छावो ]** शाव । प्रथमा सि । अनेन शस्य छः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **छावो** ।

**[ छुहा ]** सुधा । प्रथमा सि । अनेन सस्य छः । 'ख-घ-थ०' (१।१८७) धस्य हः । 'अन्त्यव्य०' (१।११) स्लुक् **छुहा** ।

**[ छत्तिवण्णो ]** सप्तपर्ण । प्रथमा सि । अनेन सस्य छः । 'क-ग-ट-ड०' (२।७७) प्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । 'सप्तपर्णे वा' (१।४९) त्त० → त्ति० । 'पो वः' (१।२३१) पस्य वः । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) णस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **छत्तिवण्णो** ॥२६५॥

## [१]सिरायां वा ॥ ८।१।२६६ ॥

सिराशब्दे आदेश्छो वा भवति ॥ छिरा सिरा ॥

**[ सिरायां वा ]** सिरा सप्तमी ङि । वा प्रथमा सि ।

**[ छिरा सिरा ]** [२]सिरा (२) । प्रथमा सि । अनेन वा सस्य छः । 'अन्त्य०' (१।११) स्लुक् **छिरा सिरा** ॥२६६॥

## लुग् भाजन-दनुज-राजकुले जः सस्वरस्य नवा ॥ ८।१।२६७ ॥

एषु सस्वरजकारस्य लुग् वा भवति ॥ भाणं भायणं । दणु-वहो दणुअ-वहो । रा-उलं राय-उलं ॥

**[ लुग् भाजनदनुजराजकुले ]** लुग् प्रथमा सि । भाजनं च दनुजश्च राजकुलं च = भाजनदनुजराजकुलम्, तस्मिन् = भाजनदनुजराजकुले । सप्तमी ङि ।

**[ जः सस्वरस्य नवा ]** ज् षष्ठी ङस् । सस्वर षष्ठी ङस् । नवा प्रथमा सि ।

**[ भाणं भायणं ]** भाजन (२) । अनेन वा जलुक् । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **भाणं** । पक्षे-भाजन । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **भायणं** ।

**[ दणुवहो दणुअवहो ]** दनुजवध (२) । अनेन वा जस्य लुक् । पक्षे- 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'ख-घ-थ०' (१।१८७) धस्य हः । 'नो णः' (१।२२८) नु० → णु० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दणुवहो दणुअवहो** ।

**[ राउलं रायउलं ]** राजकुल (२) । अनेन वा जस्य लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **राउलं** । पक्षे-राजकुल । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) ज-कयोर्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **रायउलं** ॥२६७॥

## व्याकरण-प्राकारा-ऽऽगते क-गोः ॥ ८।१।२६८ ॥

एषु को गश्च सस्वरस्य लुग् वा भवति ॥ वारणं वायरणं । पारो पायारो । आओ आगओ ॥

**[ व्याकरणप्राकाराऽऽगते ]** व्याकरणं च प्राकारश्च आगतश्च = व्याकरणप्राकाराऽऽगतम्, तस्मिन् = व्याकरणप्राकाराऽऽगते । सप्तमी ङि ।

**[ कगोः ]** कश्च ग् च = कगौ, तयोः = कगोः । षष्ठी ओस् ।

**[ वारणं वायरणं ]** व्याकरण (२) । 'अधो म-न-याम्' (२।७८) य्लुक् । अनेन वा कस्य लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वारणं** । पक्षे-व्याकरण । 'अधो म-न-याम्' (२।७८) य्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वायरणं** ।

---

१. H. I. J. K. L. M. शिरायां वा । २. पा० म०-शिरा० → छिरा० ।

**[ पारो पायारो ]** प्राकार (२) । 'सर्वत्र०' (२।७७) र्लुक् । अनेन वा कस्य लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पारो** । पक्षे-प्राकार । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो०' (१।१८०) आ० → या० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पायारो** ।

**[ आओ आगओ ]** आगत (२) । अनेन वा गस्य लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आओ** । पक्षे-आगत । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आगओ** ॥२६८॥

## किसलय-कालायस-हृदये यः ॥ ८।१।२६९ ॥

एषु सस्वरयकारस्य लुग् वा भवति ॥

किसलं किसलयं । कालासं कालायसं । महण्णवसमा सहिआ । [१]जाला ते सहिअएहिं घेप्पन्ति । निसमणुप्पिअ-हिअस्स हिअयं ।

**[ किसलयकालायसहृदये यः ]** किसलयं च कालायसं च हृदयं च = किसलयकालायसहृदयम्, तस्मिन् = किसलयकालायसहृदये । सप्तमी ङि । य् षष्ठी ङस् ।

**[ किसलं किसलयं ]** किसलय (२) । अनेन वा यस्य लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **किसलं किसलयं** ।

**[ कालासं कालायसं ]** कालायस (२) । अनेन वा यस्य लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कालासं कालायसं** ।

**[ महण्णवसमा सहिआ ]** महार्णवसम । प्रथमा जस् । 'ह्रस्वः संयोगे' (१।८४) ह्रस्वः - हा० → ह० । 'सर्वत्र०' (२।७९) र्लुक् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्०' (३।१२) दीर्घः **महण्णवसमा** । सहृदय । अनेन यलुक्। 'इत् कृपादौ' (१।१२८) हृ० → हि० । 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्०' (३।१२) दीर्घः **सहिआ** । सहृदया महार्णवसमाः सन्ति इत्यर्थः ।

**[ जाला ते सहिअएहिं घेप्पन्ति ]** यद् । सप्तमी ङि । 'आदेर्यो जः' (१।२४५) यस्य जः । 'अन्त्यव्य०' (१।११) द्लुक् । 'ङेर्डाहे-डाला- इआ काले' (३।६५) ङिस्थाने डाला० → आला० इति । 'डित्यन्त्य०' (२।१।११४) जकारमध्याद् अकारलोपः । 'लोकात्' (१।१।३) **जाला** ।

तद् । प्रथमा जस् । 'अन्त्यव्य०' (१।११) द्लुक् । 'अतः सर्वादेर्डेर्जसः' (३।५८) जस्० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) तमध्याद् अकारलोपः । 'लोकात्' (१।१।३) **ते** ।

सहृदय । तृतीया भिस् । 'इत् कृपादौ' (१।१२८) हृ० → हि० । 'क-ग-च-ज०' (१।१७७) द-ययोर्लुक् । 'भिस्भ्यस्सुपि' (३।१५) यस्य अकारस्य ए० । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं० **सहिअएहिं** ।

---

१. ताला जाअन्ति गुणा **जाला दे सहिअएहिं घेप्पन्ति** । रइकिरणाणुग्गहिआइं होंति कमलाइं कमलाइं ॥
[ध्व० लो० - द्वितीयोद्योतः । स० क० - द्वितीयः परिच्छेदः । का० प्र० - ७।३५ । शृ० प्र० - ७।३७]
तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते । रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि ॥

'ग्रहीश् उपादाने' (१५१७) ग्रह् । वर्त्त० अन्ते । 'बहुष्वाद्यस्य न्ति-न्ते-इरे' (३।१४२) अन्ते० → न्ति० । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ग्रहेर्घेप्पः' (४।२५६) । ग्रहस्थाने घेप्प इत्यादेशे क्यलुक् च घेप्पन्ति । यदा सहृदयैस्ते गुणा गृह्यन्ते इत्यर्थः । जाला ते सहिअएहिं **घेप्पन्ति** ।

**[ निसमणुप्पिअ-हिअस्स हिअयं ]** निशमने - श्रवणे अर्पितं हृदयं येन सः = निशमनार्पितहृदयस्तस्य । 'श-षोः सः' (१।२६०) श० → स० । 'नो णः' (१।२२८) न० → ण० । 'वाऽपौ' (१।६३) अर्पेरकारस्य उ(ओ)त्वम् । ['ह्रस्वः संयोगे' (१।८४) ओ० → उ०] । 'लुक्' (१।१०) णस्य अस्य लुक् । 'लोकात्' (१।१।३) निसमणुर्पित । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । हृदय । 'इत्कृपादौ' (१।१२८) हृ० → हि० । 'क-ग-च-ज०' (१।१७७) द्लुक् । अनेन यलुक् । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्स्थाने स्स० **निसमणुप्पिअ-हिअस्स** । हृदय । 'इत्कृपादौ' (१।१२८) हृ० → हि० । 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **हिअयं** ॥२६९॥

## दुर्गादेव्युदुम्बर-पादपतन-पादपीठेऽन्तर्दः ॥ ८।१।२७० ॥

एषु सस्वरस्य दकारस्य अन्तर्मध्ये वर्तमानस्य लुग् वा भवति ॥

दुग्गा-वी दुग्गा-एवी । उम्बरो उउम्बरो । पा-वडणं पाय-वडणं । पा-वीढं पाय-वीढं ॥ अन्तरिति किम् ? दुर्गादेव्या[1]मादेर्मा भूत् ॥

**[ दुर्गादेव्युदुम्बरपादपतनपादपीठे ]** दुर्गादेवी च उदुम्बरश्च पादपतनं च पादपीठं च = दुर्गादेव्युदुम्बरपादपतनपादपीठम्, तस्मिन् = दुर्गादेव्युदुम्बरपादपतनपादपीठे । सप्तमी ङि ।

**[ अन्तर्दः ]** अन्तर् सप्तमी ङि । द् षष्ठी ङस् ।

**[ दुग्गावी दुग्गाएवी ]** दुर्गादेवी । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । अनेन वा देलुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **दुग्गावी** । पक्षे-दुर्गादेवी । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) द्लुक् **दुग्गाएवी** ।

**[ उम्बरो उउम्बरो ]** उदुम्बर । अनेन वा दुलुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **उम्बरो** । पक्षे- उदुम्बर । 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **उउम्बरो** ।

**[ पावडणं पायवडणं ]** पादपतन । अनेन वा सस्वरस्य दस्य लुक् । 'पो वः' (१।२३१) प० → व० । 'सद-पतोर्डः' (४।२१९) तस्य डः । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **पावडणं** । पक्षे-पादपतन । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'पो वः' (१।२३१) प० → व० । 'सद-पतोर्डः' (४।२१९) तस्य डः । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पायवडणं** ।

**[ पावीढं पायवीढं ]** पादपीठ । अनेन वा दस्य लुक् । 'पो वः' (१।२३१) पी० → वी० । 'ठो ढः' (१।१९९) ठ० → ढ० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पावीढं** । पक्षे-पादपीठ । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'पो वः' (१।२३१) पी० →

---

१. H. K. L. M. मादौ मा० ।

वी० । 'ठो ढः' (१।१९९) ठ० → ढ० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पायवीढं** ॥२७०॥

**यावत्तावज्जीविता-ऽऽवर्त्तमाना-ऽवट-प्रावारक-देवकुलैवमेवे वः ॥ ८।१।२७१ ॥**

यावदादिषु सस्वरवकारस्य अन्तर्वर्तमानस्य लुग् वा भवति ॥

जा जाव । ता ताव । जीअं जीविअं । अत्तमाणो आवत्तमाणो । अडो अवडो । पारओ पावारओ । देउलं देवउलं । एमेव एवमेव ॥ अन्तरित्येव - एवमेवेऽन्त्यस्य न भवति ।

॥ इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौ अष्टमस्याऽध्यायस्य प्रथमः पादः ॥

यद् दोर्मण्डलकुण्डलीकृतधनुर्दण्डेन सिद्धाधिप ! ।
क्रीतं वैरीकुलात् त्वया किल दलत्कुन्दावदातं यशः ।
भ्रान्त्वा त्रीणि जगन्ति खेदविवशं तन्मालवीनां व्यधा-
दापाण्डौ स्तनमण्डले च धवले गण्डस्थले च स्थितम् ॥१॥

**[ यावत्तावज्जीविताऽऽवर्त्तमानाऽवटप्रावारकदेवकुलैवमेवे ]** यावच्च तावच्च जीवितं च आवर्त्तमानश्च अवटश्च प्रावारकश्च देवकुलं च एवमेवश्च = यावत्तावज्जीविताऽऽवर्त्तमानाऽवटप्रावारकदेवकुलैवमेवम्, तस्मिन् = यावत्तावज्जीविताऽऽवर्त्तमानाऽवटप्रावारकदेवकुलैवमेवे । सप्तमी ङि ।

**[ वः ]** व् षष्ठी ङस् ।

**[ जा जाव ]** यावत् । 'आदेर्यो जः' (१।२४५) यस्य जः । अनेन वा सस्वरस्य वस्य लुक् । 'अन्त्यव्य०' (१।११) त्लुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **जा** । पक्षे-यावत् । 'आदेर्यो जः' (१।२४५) यस्य जः । 'अन्त्यव्य०' (१।११) त्लुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **जाव** ।

**[ ता ताव ]** तावत् । अनेन वा सस्वरस्य वस्य लुक् । 'अन्त्यव्य०' (१।११) त्लुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **ता** । पक्षे-तावत् । 'अन्त्यव्य०' (१।११) त्लुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **ताव** ।

**[ जीअं जीविअं ]** जीवित । प्रथमा सि । अनेन वा सस्वरस्य वस्य लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जीअं** । पक्षे-जीवित । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जीविअं** ।

**[ अत्तमाणो आवत्तमाणो ]** आवर्त्तमान । अनेन वा सस्वरस्य वस्य लुक् । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'सर्वत्र०' (२।७९) र्लुक् । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अत्तमाणो** । पक्षे - आवर्त्तमान । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'नो णः' (१।२२८) न० → ण० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आवत्तमाणो** ।

**[ अडो अवडो ]** अवट । अनेन वा सस्वरस्य वस्य लुक् । 'टो डः' (१।१९५) टस्य डः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अडो** । पक्षे-अवट । 'टो डः' (१।१९६) टस्य डः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अवडो** ।

**[ पारओ पावारओ ]** प्रावारक । अनेन वा सस्वरस्य वस्य लुक् । 'सर्वत्र०' (२।७९) प्रमध्याद् रस्य लोपः । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पारओ** । पक्षे-प्रावारक ।

'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पावारओ** ।

**[ देउलं देवउलं ]** देवकुल । अनेन वा सस्वरस्य वस्य लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **देउलं** । पक्षे-देवकुल । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **देवउलं** ।

**[ एमेव एवमेव ]** एवमेव । अनेन वा सस्वरस्य वस्य लुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **एमेव** । पक्षे-एवमेव । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **एवमेव** ।

इति बृहत्तपागच्छे श्रीसौभाग्यसागरसूरिशिष्येण पण्डितश्रीहर्षकुलगणीन्द्रवचःप्राप्तप्रयोगरहस्येन उदयसौभाग्यगणिना लिखिताऽयं हैमप्राकृतवृत्तिढुण्ढिकायां व्युत्पत्तिदीपिकाभिधानायां सर्वप्रयोगविशेषव्युत्पत्तिप्रकाशिकायां प्रथमः पादः समर्थितः ।

यद् दोर्मण्डल० इति काव्यम् ।

॥ अर्हम् ॥

॥ नमो नमः श्रीगुरुनेमिसूरये ॥

# बृहत्तपागच्छीय-श्रीउदयसौभाग्यगणिविरचितया व्युत्पत्तिदीपिकाभिधान-ढुण्ढिकया समर्थितं सिद्धहेमप्राकृतव्याकरणम् ॥

## ॥ अथ अष्टमाध्यायस्य द्वितीयः पादः ॥

### संयुक्तस्य ॥ ८।२।१ ॥

अधिकारोयं 'ज्यायामीत्' (२।११५) इति यावत् । यदित ऊर्ध्वमनुक्रमिष्यामस्तत् संयुक्तस्येति वेदितव्यम् ॥

**[ संयुक्तस्य ]** संयुक्त षष्ठी ङस् ॥१॥

### शक्त-मुक्त-दष्ट-रुग्ण-मृदुत्वे को वा ॥ ८।२।२ ॥

एषु संयुक्तस्य को वा भवति ॥

सक्को सत्तो । मुक्को मुत्तो । डक्को दट्ठो । लुक्को लुग्गो । माउक्कं मा(म)उत्तणं ॥

**[ शक्तमुक्तदष्टरुग्णमृदुत्वे ]** शक्तश्च मुक्तश्च दष्टश्च रुग्णश्च मृदुत्वं च = शक्तमुक्तदष्टरुग्णमृदुत्वम्, तस्मिन् = शक्तमुक्तदष्टरुग्णमृदुत्वे । सप्तमी ङि ।

**[ को वा ]** क प्रथमा सि । वा प्रथमा सि ।

**[ सक्को सत्तो ]** शक्त । 'श-षोः सः' (१।२६०) श० → स० । अनेन वा क्तस्य क० । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सक्को** । पक्षे-शक्त । 'श-षोः सः' (१।२६०) श० → स० । 'क-ग-ट-ड०' (२।७७) क्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सत्तो** ।

**[ मुक्को मुत्तो ]** मुक्त । अनेन वा क्तस्य क० । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मुक्को** । पक्षे-मुक्त । 'क-ग-ट-ड०' (२।७७) क्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम्। प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मुत्तो** ।

**[ डक्को दट्ठो ]** दष्ट । अनेन वा ष्टस्य क० । 'दशन-दष्ट-दग्ध-दोला-दण्ड-दर-दाह-दम्भ-दर्भ-कदन-दोहदे दो वा डः' (१।२१७) दस्य डः । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **डक्को** । पक्षे-दष्ट । 'ष्टस्याऽनुष्ट्रेष्टा०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दट्ठो** ।

**[ लुक्को लुग्गो ]** रुग्ण । 'हरिद्रादौ लः' (१।२५४) रस्य लः । अनेन वा ग्णस्य कः । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **लुक्को मन्दः** । पक्षे-रुग्ण । 'हरिद्रादौ लः' (१।२५४) रस्य लः । 'क्तेनाप्फुण्णादयः' (४।२५८) णलुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **लुग्गो** ।

**[ माउक्कं मा( म )उत्तणं ]** मृदुत्व । 'आत् कृशा-मृदुक-मृदुत्वे वा' (१।१२७) मृस्थाने मा० । 'क-ग-च-ज०' (१।१७७) द्लुक् । अनेन वा त्वस्य क० । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **माउक्कं** । पक्षे-मृदुत्व । [१]'आत् कृशा-मृदुक-मृदुत्वे वा' (१।१२७) मृस्थाने मा० । ('ऋतोऽत्' (१।१२६) मृ० → म०) । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'त्वस्य डिमा-त्तणौ वा' (२।१५४) त्वस्य त्तणादेशः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मा( म )उत्तणं** ॥२॥

## क्षः खः क्वचित्तु छ - झौ ॥ ८।२।३ ॥

क्षस्य खो भवति, क्वचितु छ-झावपि ॥ खओ । लक्खणं । खीणं । छीणं । झीणं । झिज्जइ ॥

**[ क्षः खः क्वचित्तु छ-झौ ]** क्ष् षष्ठी ङस् । ख प्रथमा सि । क्वचित् सप्तमी ङि । तु प्रथमा सि । छश्च झश्च = छझौ । प्रथमा औ ।

**[ खओ ]** क्षय । अनेन क्षस्य खः । 'क-ग-च-ज-त-द-प-य-वां प्रायो लुक्' (१।१७७) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खओ** ।

**[ लक्खणं ]** लक्षण । प्रथमा सि । अनेन क्षस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य क० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **लक्खणं** ।

क्वचित्तु क्षस्य छ-झावपि स्याताम् । यथा -

**[ छीणं ]** क्षीण । अनेन क्षस्य छः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **छीणं** ।

**[ झीणं ]** क्षीण । अनेन क्षस्य झः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **झीणं** ।

**[ झिज्जइ ]** 'क्षि क्षये' (१०) क्षि । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) ते० → इ० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्यस्य इज्जादेशः । अनेन क्षस्य झः । 'लुक्' (१।१०) इलुक् **झिज्जइ** ॥३॥

## ष्क-स्कयोर्नाम्नि ॥ ८।२।४ ॥

अनयोर्नाम्नि संज्ञायां खो भवति ॥

ष्क-पोक्खरं । पोक्खरिणी । निक्खं ॥ स्क-खन्धो । खन्धावारो । अवक्खन्दो ॥

नाम्नीति किम् ? दुक्करं । निक्कम्पं । निक्कओ । नमोक्कारो । सक्कयं । सक्कारो । तक्कारो ॥

**[ ष्कस्कयोर्नाम्नि ]** ष्कश्च स्कश्च = ष्कस्कौ, तयोः ष्कस्कयोः । षष्ठी ओस् । नामन् सप्तमी ङि ।

ष्को दर्शयति-

---

१. G. पाठां० -मृदुक-मृदुत्वे वा आकारः । पक्षे त्वस्य० दी० । (तेन त्वस्य ककाराभावे आत्कृशेति सूत्रं न लगतीति फलितं भवति) । L. आकारान्ताऽभावे 'ऋतोऽत्' (१।१२६) अकारे मउत्तणं इत्यपि भवति ।

**[ पोक्खरं ]** पुष्कर । 'ओत् संयोगे' (१।११६) पु० → पो० । अनेन ष्कस्य खः । [1]'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पोक्खरं** ।

**[ पोक्खरिणी ]** पुष्करिणी । 'ओत् संयोगे' (१।११६) पु० → पो० । अनेन ष्कस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुययोरुपरि पूर्वः' (२।९०) पूर्वखस्य कः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **पोक्खरिणी** ।

**[ निक्खं ]** निष्क । प्रथमा सि । अनेन ष्कस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **निक्खं सुवर्णम्** ।

**[ खन्धो ]** स्कन्ध । प्रथमा सि । अनेन स्कस्य खः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खन्धो** ।

**[ खन्धावारो ]** स्कन्धावार । प्रथमा सि । अनेन स्कस्य खः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खन्धावारो** ।

**[ अवक्खन्दो ]** अवस्कन्द । प्रथमा सि । अनेन स्कस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अवक्खन्दो घाटी** ।

**[ दुक्करं ]** दुष्कर । 'क-ग-ट-ड०' (२।७७) ष्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दुक्करं** ।

**[ निक्कम्पं ]** निष्कम्प । 'क-ग-ट-ड०' (२।७७) ष्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **निक्कम्पं** ।

**[ निक्कओ ]** निष्क्रय-न विद्यते क्रयो यस्य । 'क-ग-ट-ड०' (२।७७) ष्लुक् । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निक्कओ** ।

**[ नमोक्कारो ]** नमस्कार । 'नमस्कार-परस्परे द्वितीयस्य' (१।६२) मस्य मो० । 'क-ग-ट-ड-त-द-प-श-ष-स०' (२।७७) स्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **नमोक्कारो** ।

**[ सक्कयं ]** संस्कृत । 'विंशत्यादेर्लुक्' (१।२८) अनुस्वारलुक् । [2]'क-ग-ट-ड०' (२।७७) स्लुक् । 'ऋतोऽत्' (१।१२६) कृ० → क० । 'अनादौ०' (२।८९) कस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सक्कयं** ।

**[ सक्कारो ]** [3]सत्कार । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सक्कारो** ।

**[ तक्कारो ]** तस्कर । प्रथमा सि । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **तक्कारो** । पूर्वखस्य तथैव ॥४॥

---

१. G. पाठां - 'तैलादौ' (२।९८) द्वित्वप्रसङ्गे । २. G. पाठां०- अनुस्वारस्य व्यञ्जनत्वाश्रयणाद् 'धुटो धुटि स्वे वा' (१।३।४८) इति स्लुक् । ३. सत्कारशब्दस्थाने संस्कारशब्दः सम्यक् प्रतिभाति, सूत्रे स्कसम्बन्धिकार्यस्योक्तत्वात् ।

## शुष्क-स्कन्दे वा ॥ ८।२।५ ॥

अनयोः ष्क-स्कयोः खो वा भवति ॥ सुक्खं सुक्कं । खन्दो कन्दो ॥

**[ शुष्कस्कन्दे वा ]** शुष्कं च स्कन्दश्च = शुष्कस्कन्दम्, तस्मिन् = शुष्कस्कन्दे । सप्तमी ङि । वा प्रथमा सि ।

**[ सुक्खं सुक्कं ]** शुष्क । प्रथमा सि । 'श-षोः सः' (१।२६०) शस्य सः । अनेन वा ष्कस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुक्खं** । पक्षे-शुष्क । 'श-षोः सः' (१।२६०) शस्य सः । 'क-ग-ट-ड०' (२।७७) षलुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुक्कं** ।

**[ खन्दो कन्दो ]** स्कन्द । अनेन वा स्कस्य खः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खन्दो** । पक्षे-स्कन्द । 'क-ग-ट-ड०' (२।७७) सलुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कन्दो** ॥५॥

## क्ष्वेटकाऽऽदौ ॥ ८।२।६ ॥

क्ष्वेटकाऽऽदिषु संयुक्तस्य खो भवति ॥

खेडओ ॥ क्ष्वेटकशब्दो विषपर्यायः ॥ क्ष्वोटकः → खोडओ । स्फोटकः → खोडओ । स्फेटकः → खेडओ । स्फेटिकः → खेडिओ ॥

**[ क्ष्वेटकाऽऽदौ ]** क्ष्वेटक आदौ यस्य सः = क्ष्वेटकाऽऽदिस्तस्मिन् = क्ष्वेटकाऽऽदौ । सप्तमी ङि ।

**[ खेडओ ]** क्ष्वेटक । अनेन क्ष्वस्य खः । 'टो डः' (१।१९५) टस्य डः । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खेडओ** ।

**[ खोडओ ]** क्ष्वोटक । अनेन क्ष्वो० → खो० । 'टो डः' (१।१९५) टस्य डः । 'क-ग-च-ज०' (२।७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खोडओ** ।

**[ खोडओ ]** स्फोटक । अनेन स्फो० → खो० । 'टो डः' (१।१९५) टस्य डः । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् **खोडओ** ।

**[ खेडओ ]** स्फेटक । अनेन स्फे० → खे० । 'टो डः' (१।१९५) टस्य डः । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **खेडओ** ।

**[ खेडिओ ]** स्फेटिक । अनेन स्फे० → खे० । 'टो डः' (१।१९५) टस्य डः । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **खेडिओ** ॥६॥

## स्थाणावहरे ॥ ८।२।७ ॥

स्थाणौ संयुक्तस्य खो भवति, हरश्चेद् वाच्यो न भवति ॥ खाणू ॥ अहर इति किम् ? [१]थाणुणो रेहा ॥

**[ स्थाणावहरे ]** स्थाणु सप्तमी ङि । अहर सप्तमी ङि ।

**[ खाणू ]** स्थाणु । प्रथमा सि । अनेन स्था० → खा० । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) सलुक् **खाणू** ।

**[ थाणुणो रेहा ]** स्थाणु । षष्ठी ङस् । 'क-ग-ट-ड०' (२।७७) सलुक् । 'ङसि-ङसोः पुं-क्लीबे वा' (३।२३) इत्यनेन ङस्स्थाने णो० । **थाणुणो** इति जातम् । रेखा । प्रथमा सि । 'ख-घ-थ-ध-भाम्' (१।१८७) खस्य हः । 'अन्त्यव्य०' (१।११) सलुक् **रेहा** इति सिद्धम् ॥७॥

---

१. उवरि-द्विअ-चंदालोअ-पुंजिआ जअइ कंठ-मूलम्मि । सीस-च्छाय व्व विस-प्पहामई **थाणुणो रेहा** ॥ [ग० व० - ३८]
उपरिस्थितचन्द्रालोकपुञ्जिता जयति कण्ठमूले । शीर्षच्छायेव विषप्रभामयी स्थाणो रेखा ॥

## स्तम्भे स्तो वा ॥ ८।२।८ ॥

स्तम्भशब्दे स्तस्य खो वा भवति ॥ खम्भो थम्भो काष्ठादिमयः ॥

**[स्तम्भे स्तो वा]** स्तम्भ सप्तमी ङि । स्त् षष्ठी ङस् । वा प्रथमा सि ।

**[खम्भो थम्भो]** स्तम्भ । अनेन वा स्तस्य ख० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खम्भो** । पक्षे-स्तम्भ । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्तस्य थः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **थम्भो** ॥८॥

## थ-ठावस्पन्दे ॥ ८।२।९ ॥

स्पन्दाभाववृत्तौ स्तम्भे स्तस्य थ-ठौ भवतः ॥ थम्भो । ठम्भो । स्तम्भ्यते → थम्भिज्जइ । ठम्भिज्जइ ॥

**[थठावस्पन्दे]** थश्च ठश्च = थठौ । प्रथमा औ । अस्पन्द सप्तमी ङि ।

**[थम्भो ठम्भो]** स्तम्भ । अनेन प्रथमे स्तस्य थः । द्वितीये स्तस्य ठः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **थम्भो ठम्भो** ।

**[थम्भिज्जइ ठम्भिज्जइ]** 'स्तम्भू स्तम्भे' स्तम्भ इति सौत्रो धातुः । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'लोकात्' (१।१।३) स्तम्भ्यते इति स्थिते अनेन स्तस्य थः । 'ईअ-इज्जौ क्यस्य' (३।१६०) इत्यनेन क्यस्य इज्ज० । 'लोकात्' (१।१।३) थम्भिज्ज । 'त्यादीनामा०' (३।१३९) ते० → इ० **थम्भिज्जइ** । द्वितीये स्तम्भ्यते पूर्ववत् । ततोऽनेन स्तस्य ठः । शेषं तथैव । **ठम्भिज्जइ** ॥९॥

## रक्ते गो वा ॥ ८।२।१० ॥

रक्तशब्दे संयुक्तस्य गो वा भवति ॥ रग्गो रत्तो ॥

**[रक्ते गो वा]** रक्त सप्तमी ङि । ग प्रथमा सि । वा प्रथमा सि ।

**[रग्गो रत्तो]** रक्त । अनेन वा क्तस्य गः । 'अनादौ०' (२।८९) गस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **रग्गो** । पक्षे-रक्त । प्रथमा सि । 'क-ग-ट-ड०' (२।७७) क्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **रत्तो** ॥१०॥

## शुल्के ङ्गो वा ॥ ८।२।११ ॥

शुल्कशब्दे संयुक्तस्य ङ्गो वा भवति ॥ सुङ्गं सुक्कं ॥

**[शुल्के ङ्गो वा]** शुल्क सप्तमी ङि । ङ्ग प्रथमा सि । वा प्रथमा सि ।

**[सुङ्गं सुक्कं]** शुल्क । अनेन वा ल्कस्य ङ्गः । 'श-षोः सः' (१।२६०) शस्य सः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुङ्गं** । पक्षे - शुल्क । 'श-षोः सः' (१।२६०) शस्य सः । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) ल्लोपः । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुक्कं** ॥११॥

## कृत्ति-चत्वरे चः ॥ ८।२।१२ ॥

अनयोः संयुक्तस्य चो भवति ॥ किच्ची । चच्चरं ॥

**[ कृत्तिचत्वरे चः ]** कृत्तिश्च चत्वरं च = कृत्तिचत्वरम्, तस्मिन् = कृत्तिचत्वरे । सप्तमी ङि । च प्रथमा सि ।

**[ किच्ची ]** कृत्ति । 'इत् कृपादौ' (१।१२८) कृ० → कि० । अनेन त्तस्य चः । 'अनादौ०' (२।८९) चस्य द्वित्वम्। प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **किच्ची** ।

**[ चच्चरं ]** चत्वर । अनेन त्वस्य च० । 'अनादौ०' (२।८९) चस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **चच्चरं** ॥१२॥

## त्योऽचैत्ये ॥ ८।२।१३ ॥

चैत्यवर्जिते त्यस्य चो भवति ॥ सच्चं । पच्चओ ॥ अचैत्य इति किम् ? चइत्तं ॥

**[ त्योऽचैत्ये ]** त्य् षष्ठी ङस् । न चैत्यम् = अचैत्यम्, तस्मिन् = अचैत्ये । सप्तमी ङि ।

**[ सच्चं ]** सत्य । प्रथमा सि । अनेन त्यस्य चः । 'अनादौ०' (२।८९) चस्य द्वित्वम् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सच्चं** ।

**[ पच्चओ ]** प्रत्यय । 'सर्वत्र०' (२।७९) र्लुक् । अनेन त्यस्य चः । 'अनादौ०' (२।८९) चस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पच्चओ** ।

**[ चइत्तं ]** चैत्य । 'अइर्दैत्यादौ च' (१।१५१) चै० → चइ० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **चइत्तं** ॥१३॥

## प्रत्यूषे षश्च हो वा ॥ ८।२।१४ ॥

प्रत्यूषे त्यस्य चो भवति, तत्संनियोगे च षस्य हो वा भवति ॥ पच्चूहो पच्चूसो ॥

**[ प्रत्यूषे षश्च हो वा ]** प्रत्यूष सप्तमी ङि । ष् षष्ठी ङस् । च प्रथमा सि । ह प्रथमा सि । वा प्रथमा सि ।

**[ पच्चूहो पच्चूसो ]** प्रत्यूष । 'सर्वत्र०' (२।७९) र्लुक् । अनेन त्यस्य चः । 'अनादौ०' (२।८९) चस्य द्वित्वम् । अनेन वा षस्य हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पच्चूहो** । यत्र हकारो न स्यात् तत्र- प्रत्यूष । 'सर्वत्र०' (२।७९) र्लुक् । अनेन त्यस्य चः । 'अनादौ०' (२।८९) चस्य द्वित्वम् । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पच्चूसो** ॥१४॥

## त्व-थ्व-द्व-ध्वां च-छ-ज-झाः क्वचित् ॥ ८।२।१५ ॥

एषां यथासंख्यमेते क्वचिद् भवन्ति ॥

भुक्त्वा → भोच्चा । ज्ञात्वा → णच्चा । श्रुत्वा → सोच्चा । पृथ्वी → पिच्छी । विद्वान् → विज्जं । बुद्ध्वा → बुज्झा ॥

[1]भोच्चा सयलं पिच्छि विज्जं बुज्झा अणण्णयग्गामि ।
चइऊण तवं काउं संती पत्तो सिवं परमं ॥

---

१. [आ. श्रीदेवचन्द्रसूरिकृत-शान्तिनाथचरित्रे]
भुक्त्वा सकलां पृथ्वीं विद्वान् बुद्ध्वा अनन्यकगामी । त्यक्त्वा तपः कृत्वा शान्तिः प्राप्तः शिवं परमम् ॥

**[ त्वथ्वद्वध्वाम् ]** त्वश्च थ्वश्च द्वश्च ध्व् च = त्वथ्वद्वध्वः, तेषाम् = त्वथ्वद्वध्वाम् । षष्ठी आम् ।

**[ चछजझाः ]** चश्च छश्च जश्च झश्च = चछजझाः । प्रथमा जस् ।

**[ क्वचित् ]** क्वचित् प्रथमा सि ।

**[ भोच्चा ]** भुक्त्वा । 'ओत् संयोगे' (१।११६) भु० → भो० । 'क-ग-ट-ड०' (२।७७) क्लुक् । अनेन त्वा० → चा० । 'अनादौ०' (२।८९) चस्य द्वित्वम् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **भोच्चा** ।

**[ णच्चा ]** ज्ञात्वा । 'हृस्वः संयोगे' (१।८४) ज्ञा० → ज्ञ० । 'म्न-ज्ञोर्णः' (२।४२) ज्ञ० → ण० । अनेन त्वा० → चा० । 'अनादौ०' (२।८९) चस्य द्वित्वम् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **णच्चा** ।

**[ सोच्चा ]** श्रुत्वा । 'ओत् संयोगे' (१।११६) श्रु० → श्रो० । 'सर्वत्र०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शो० → सो० । अनेन त्वा० → चा० । 'अनादौ०' (२।८९) चस्य द्वित्वम् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **सोच्चा** ।

**[ पिच्छी ]** पृथ्वी । 'इत् कृपादौ' (१।१२८) पृ० → पि० । अनेन थ्वस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (४।२३९) पूर्वछस्य चः । प्रथमा सि । 'अन्त्य०' (३।२।७) स्लुक् **पिच्छी** ।

**[ विज्जं ]** विद्वान् । 'अन्त्यव्य०' (१।११) न्लुक् । अनेन द्वस्य जंः । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'वाऽव्ययोत्खातादावदातः' (१।६७) आकारस्य अत्वम् । प्रथमा सि । 'क्लीबे०' (३।२) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **विज्जं** ।

**[ बुज्झा ]** बुद्ध्वा । 'क-ग-ट०' (२।७७) द्लुक् । अनेन ध्वस्य झः । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वझस्य जः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **बुज्झा** ।

**[ भोच्चा ]** भुक्त्वा । 'ओत् संयोगे' (१।११६) भु० → भो० । 'क-ग-ट०' (२।७७) क्लुक् । अनेन त्वा० → चा० । 'अनादौ०' (२।८९) चस्य द्वित्वम् । प्रथमा सि । 'अव्ययस्य' (१।११) सिलुप् **भोच्चा** ।

**[ सयलं ]** सकला । द्वितीया अम् । 'शेषेऽदन्तवत्' (३।१२४) इति न्यायात् 'हृस्वोऽमि' (३।३६) इत्यनेन हृस्वः- ला० → ल० । 'अमोऽस्य' (३।५) अलोपः । 'मोऽनु०' (१।२३) अनुस्वारः **सयलं** ।

**[ पिच्छिं ]** पृथ्वी । 'इत् कृपादौ' (१।१२८) पृ० → पि० । अनेन थ्वस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । द्वितीया अम् । 'शेषेऽदन्तवत्' (३।१२४) इति न्यायात् 'हृस्वोऽमि' (३।३६) च्छी० → च्छि० । 'अमोऽस्य' (३।५) अलोपः **पिच्छिं** ।

**[ विज्जं ]** विद्वस् । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् । अनेन द्वस्य जः । 'अनादौ०' (२।८९) जस्य द्वित्वम् । बाहुलकात् 'वा स्वरे मश्च' (१।२४) इत्यनेन म्० । 'मोऽनु०' (१।२३) अनुस्वारः **विज्जं** ।

**[ बुज्झा ]** बुद्ध्वा । 'क-ग-ट०' (२।७७) द्लुक् । अनेन ध्वस्य झः । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वझस्य जः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **बुज्झा** ।

सयलं पिच्छिं विज्जं बुज्झा अणण्णयग्गामि ! ।
चइऊण तवं काउं संती पत्तो सिवं परमं ॥१॥

हे अनन्यकगामिन् ! न विद्यते अन्यकगामित्वं यस्य सः = अनन्यकगामी, तस्य सम्बोधनम् । भवान् शान्तिः, परमं शिवं प्राप्तः । किंकृत्वा ? सकलां पृथ्वीं भुक्त्वा-ततस्त्यक्त्वा । पुनः किंकृत्वा ? बुद्ध्वा-प्रतिबोधं प्राप्य । पुनः किंकृत्वा ? तपः कृत्वा । किंभवान् ? विद्वान् इति गाथार्थः ।

**[ अणण्णयग्गामि ! ]** अनन्यकगामिन् ! । 'नो णः' (१।२२८) न० → ण० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'नो णः' (१।२२८) न० → ण० । 'अनादौ०' (२।८९) णस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अस्य यः । 'सेवादौ वा' (२।९९) ('समासे वा' (२।९७) ) गस्य द्वित्वम् । 'अन्त्यव्य०' (१।११) न्लुक् । 'स्यम्-जस्-शसां लुक्' (४।३४४) स्लोपः **अणण्णयग्गामि !** ।

**[ चइऊण ]** 'त्यजं हानौ' (१७२) त्यज् । त्यजनं पूर्वं = त्यक्त्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा० । 'त्योऽचैत्ये' (२।१३) त्यस्य चः । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) चज इति स्थिते 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'एच्च क्त्वा-तुम्-तव्य-भविष्यत्सु' (३।१५७) अ० → इ० । 'क्त्वस्तुमत्तूण-तुआणाः' (२।१४६) क्त्वाप्रत्ययस्य तूणादेशः । 'क-ग-च-ज०' (१।१७७) त्लुक् **चइऊण** ।

**[ तवं ]** तपस् । द्वितीया अम् । 'अन्त्यव्य०' (१।११) स्लुक् । 'पो वः' (१।२३१) पस्य वः । 'अमोऽस्य' (३।२) अमोऽकारलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **तवं** ।

**[ काउं ]** 'डुकृंग् करणे' (८८८) कृ । करणं पूर्वं = कृत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा० । 'क्त्वस्तुमत्तूण-तुआणाः' (२।१४६) क्त्वाप्रत्ययस्य तुमादेशः । 'आः कृगो भूत-भविष्यतोश्च' (४।२१४) कृ० → का० । 'क-ग-च-ज०' (१।१७७) तलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **काउं** ।

**[ सन्ती ]** शान्ति । प्रथमा सि । 'श-षोः सः' (१।२६०) शा० → सा० । 'ह्रस्वः संयोगे' (१।८४) सा० → स० । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **सन्ती** ।

**[ पत्तो ]** प्राप्त । 'सर्वत्र०' (२।७९) र्लुक् । 'ह्रस्वः संयोगे' (१।८४) पा० → प० । 'क-ग-ट-ड०' (२।७७) प्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पत्तो** ।

**[ सिवं ]** शिव । [1]प्रथमा सि । 'श-षोः सः' (१।२६०) शस्य सः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सिवं** ।

**[ परमं ]** परम । [2]प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **परमं** ॥१५॥

## वृश्चिके श्चेर्ञ्चुर्वा ॥ ८।२।१६ ॥

वृश्चिके श्चेः स्वरस्य स्थाने ञ्चुरादेशो वा भवति ॥ छापवादः ॥ विञ्चुओ विंचुओ ॥ पक्षे - विंछिओ ॥

**[ वृश्चिके श्चेर्ञ्चुर्वा ]** वृश्चिक सप्तमी ङि । श्चि षष्ठी ङस् । ञ्चु प्रथमा सि । वा प्रथमा सि ।

**[ विञ्चुओ विंचुओ ]** वृश्चिक । 'इत् कृपादौ' (१।१२८) वृ० → वि० । अनेन वा श्चि० → ञ्चुः । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विञ्चुओ** । 'ङ-ञ-ण-नो व्यञ्जने' (१।२५) इत्यनेन ञस्य अनुस्वारोऽपि भवति, तेन रूपद्वयम्, **विंचुओ** ।

१. J. L. द्वि० अम् । २. J. L. द्वि० अम् ।

**[ विंछिओ ]** वृश्चिक । 'इत् कृपादौ' (१।१२८) वृ० → वि० । 'ह्रस्वात् थ्य-श्च०' (२।२१) श्चस्य छः । 'वक्रादावन्तः' (१।२६) अनुस्वारः । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० डो० ओ० **विंछिओ** ॥१६॥

## छोऽक्ष्यादौ ॥ ८।२।१७ ॥

अक्ष्यादिषु संयुक्तस्य छो भवति ॥ खस्यापवादः ॥

अच्छिं । उच्छू । लच्छी । कच्छो । छीअं । छीरं । सरिच्छो । वच्छो । मच्छिआ । छेत्तं । छुहा । दच्छो । कुच्छी । वच्छं । छुण्णो । कच्छा । छारो । कुच्छेअयं । छुरो । उच्छा । छयं । सारिच्छं ॥

अक्षि । इक्षु । लक्ष्मी । कक्ष । क्षुत । क्षीर । सदृक्ष । वृक्ष । मक्षिका । क्षेत्र । क्षुध् । दक्ष । कुक्षि । वक्षस् । क्षुण्ण । कक्षा । क्षार । कौक्षेयक । क्षुर । उक्षन् । क्षत । सादृक्ष्य ॥

क्वचित् स्थगितशब्देऽपि - छइअं । आर्षे - इक्खू । खीरं । सारिक्खमित्याद्यपि दृश्यते ॥

**[ छोऽक्ष्यादौ ]** छ प्रथमा सि । [१]अक्षिरादौ यस्य सः = अक्ष्यादिः, तस्मिन् = अक्ष्यादौ । सप्तमी ङि ।

**[ अच्छिं ]** अक्षि । अनेन क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अच्छिं** ।

**[ उच्छू ]** इक्षु । 'प्रवासीक्षौ' (१।९५) इ० → उ० । अनेन क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **उच्छू** ।

**[ लच्छी ]** लक्ष्मी । प्रथमा सि । 'अधो म-न-याम्' (२।७८) म्लुक् । अनेन क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **लच्छी** ।

**[ कच्छो ]** कक्ष । प्रथमा सि । अनेन क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कच्छो** ।

**[ छीअं ]** क्षुत । 'ईः क्षुते' (१।११२) क्षु० → क्षी० । अनेन क्षस्य छः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **छीअं** ।

**[ छीरं ]** क्षीर । प्रथमा सि । अनेन क्षस्य छः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **छीरं** ।

**[ सरिच्छो ]** सदृक्ष । 'दृशः क्विप्-टक्-सकः' (१।१४२) ऋ० → रि० । अनेन क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सरिच्छो** ।

**[ वच्छो ]** वृक्ष । 'ऋतोऽत्' (१।१२६) वृ० → व० । अनेन क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वच्छो** ।

**[ मच्छिआ ]** मक्षिका । अनेन क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **मच्छिआ** ।

---

१. K. अक्षि आदौ० ।

**[ छेत्तं ]** क्षेत्र । अनेन क्षस्य छः । 'सर्वत्र' ल-व-रामवन्द्रे' (२।७९) र्लुक् । [१]'अनादौ०' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **छेत्तं** ।

**[ छुहा ]** 'क्षुधंच् बुभुक्षायाम्' (११८२) क्षुध् । क्षोधनं = क्षुध् । 'क्रुत्संपदा०' (५।३।११४) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लुक् । प्रथमा सि । अनेन क्षस्य छः । 'क्षुधो हा' (१।१७) ध० → हा० । 'अन्त्य०' (१।११) स्लुक् **छुहा** ।

**[ दच्छो ]** दक्ष । प्रथमा सि । अनेन क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दच्छो** ।

**[ कुच्छी ]** कुक्षि । प्रथमा सि । अनेन क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **कुच्छी** ।

**[ वच्छं ]** वक्षस् । प्रथमा सि । अनेन क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । बाहुलकात् 'स्नमदाम-शिरो-नभः' (१।३२) इति पुंस्त्वं न भवति । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वच्छं** ।

**[ छुण्णो ]** क्षुण्ण । प्रथमा सि । अनेन क्षस्य छः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **छुण्णो** ।

**[ कच्छा ]** कक्षा । प्रथमा सि । अनेन क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'अन्त्यव्य०' (१।११) स्लुक् **कच्छा** ।

**[ छारो ]** क्षार । प्रथमा सि । अनेन क्षस्य छः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० छारो ।

**[ कुच्छेअयं ]** कौक्षेयक । प्रथमा सि । 'कौक्षेयके वा' (१।१६१) कौ० → कु० । अनेन क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'गुणाद्याः क्लीबे वा' (१।३४) क्लीबत्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कुच्छेअयं** ।

**[ छुरो ]** क्षुर । प्रथमा सि । अनेन क्षस्य छः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **छुरो** ।

**[ उच्छा ]** उक्षन् । अनेन क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'पुंस्यन आणो राजवच्च' (३।५६) इत्यादेशात् 'राज्ञः' (३।४९) इत्यनेन आत्वम् । 'समानानां०' (१।२।१) दीर्घः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **उच्छा** ।

**[ छयं ]** क्षत । अनेन क्षस्य छः । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **छयं** ।

**[ सारिच्छं ]** सादृक्ष्य । 'दृशः क्विप्-टक्०' (१।१४२) ऋ० → रि० । अनेन क्ष्यस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सारिच्छं** ।

क्वचित् स्थगितशब्देऽपि छो भवति ।

---

१. B. 'तैलादौ' (२।९८) ।

**[ छइअं ]** स्थगित । अनेन स्थस्य छः । 'क-ग-च-ज०' (१।१७७) ग्लुक् - त्लुक् च । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **छइअं** ।

**आर्षे - [ इक्खू ]** इक्षु । प्रथमा सि । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्षस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **इक्खू** ।

**[ खीरं ]** क्षीर । प्रथमा सि । आर्षत्वात् क्षस्य खः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **खीरं** ।

**[ सारिक्खं ]** सादृक्ष्य । 'दृशः क्विप्-टक्-सकः' (१।१४२) ऋ० → रि० । आर्षत्वात् क्ष्यस्य खः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सारिक्खं** ॥१७॥

## क्षमायां कौ ॥ ८।२।१८ ॥

कौ पृथिव्यां वर्तमाने क्षमाशब्दे संयुक्तस्य छो भवति ॥

छमा पृथिवी ॥ लाक्षणिकस्यापि क्ष्मादेशस्य भवति । क्ष्मा → छमा ॥

काविति किम् ? खमा क्षान्तिः ॥

**[ क्षमायां कौ ]** क्षमा सप्तमी ङि । कु सप्तमी ङि ।

**[ छमा पृथिवी ]** क्षमा । प्रथमा सि । अनेन क्षस्य छः । 'अन्त्यव्य०' (१।११) स्लुक् **छमा** ।

**[ छमा ]** क्ष्मा । 'क्ष्मा-श्लाघा-रत्नेऽन्त्यव्यञ्जनात्' (२।१०१) इति क्ष्-मयोर्विश्लेषं कृत्वा मात् प्राक् अकारः । अनेन क्षस्य छः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **छमा** ।

**[ खमा क्षान्तिः ]** क्षमा । प्रथमा सि । 'क्षः खः क्वचित्तु०' (२।३) क्षस्य खः । 'अन्त्यव्य०' (१।११) स्लुक् **खमा** ॥१८॥

## ऋक्षे वा ॥ ८।२।१९ ॥

ऋक्षशब्दे संयुक्तस्य छो वा भवति ॥

रिच्छं रिक्खं । रिच्छो रिक्खो ॥ कथं छूढं क्षिप्तं ? 'वृक्ष-क्षिप्तयो रुक्ख-छूढौ' (२।१२७) इति भविष्याति ॥

**[ ऋक्षे वा ]** ऋक्ष सप्तमी ङि । वा प्रथमा सि ।

**[ रिच्छं रिक्खं ]** ऋक्ष । प्रथमा सि । 'रिः केवलस्य' (१।१४०) ऋ० → रि० । अनेन क्षस्य विकल्पेन छकारः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चकारः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **रिच्छं** । पक्षे-ऋक्ष । प्रथमा सि । 'रिः केवलस्य' (१।१४०) ऋ० → रि० । 'क्षः खः क्वचित्तु०' (२।३) क्षस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **रिक्खं** ।

'गुणाद्याः क्लीबे वा' (१।३४) इति पुंस्त्वमपि भवति, तत्र **रिच्छो रिक्खो** पूर्ववत् ।

**[ छूढं ]** क्षिप्त । प्रथमा सि । 'वृक्ष-क्षिप्तयो रुक्ख - छूढौ' (२।१२७) क्षिप्त० → छूढः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **छूढं** ॥१९॥

## क्षण उत्सवे ॥ ८।२।२० ॥

क्षणशब्दे उत्सवाभिधायिनि संयुक्तस्य छो भवति ॥ छणो ॥ उत्सव इति किम् ? खणो ॥

**[ क्षण उत्सवे ]** क्षण सप्तमी ङि । उत्सव सप्तमी ङि ।

**[ छणो ]** क्षण । प्रथमा सि । अनेन क्षस्य छः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **छणो** ।

**[ खणो ]** क्षण । प्रथमा सि । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्षस्य खः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खणो** ॥२०॥

## ह्रस्वात् थ्य-श्च-त्स-प्सामनिश्चले ॥ ८।२।२१ ॥

ह्रस्वात् परेषां थ्य-श्च-त्स-प्सां छो भवति, निश्चले तु न भवति ॥

थ्य - पच्छं । पच्छा । मिच्छा ॥ श्च - पच्छिमं । अच्छेरं । पच्छा ॥ त्स-उच्छाहो । मच्छलो । मच्छरो । संवच्छलो ॥ संवच्छरो । चिइच्छइ ॥ प्स - लिच्छइ । जुगुच्छइ । अच्छरा ॥ ह्रस्वादिति किम् ? ऊसारिओ ॥ अनिश्चल इति किम् ? निच्चलो ॥ आर्षे तथ्ये चोऽपि - तच्चं ॥

**[ ह्रस्वात् थ्यश्चत्सप्सामनिश्चले ]** ह्रस्व पञ्चमी ङसि । थ्यश्च श्चश्च त्सश्च प्स् च = थ्यश्चत्सप्सः, तेषाम् = थ्यश्चत्सप्साम् । षष्ठी आम् । अनिश्चल सप्तमी ङि ।

**[ पच्छं ]** पथ्य । अनेन थ्यस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पच्छं** ।

**[ पच्छा ]** पथ्या । अनेन थ्यस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययोरुपरि पूर्वः' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **पच्छा** ।

**[ मिच्छा ]** मिथ्या । अनेन थ्यस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **मिच्छा** ।

**[ पच्छिमं ]** पश्चिम । अनेन श्चस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पच्छिमं** ।

**[ अच्छेरं ]** आश्चर्य । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । अनेन श्चस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'वल्ल्युत्कर - पर्यन्ता-ऽऽश्चर्ये वा' (१।५८) च्छ० → च्छे० । 'आश्चर्ये' (२।६६) र्यस्य रः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अच्छेरं** ।

**[ पच्छा ]** पश्चात् । अनेन श्चस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'अन्त्यव्यञ्जनस्य' (१।११) त्लुक् **पच्छा** ।

**[ उच्छाहो ]** उत्साह । अनेन त्सस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **उच्छाहो** ।

**[ मच्छलो मच्छरो ]** मत्सर (२) । अनेन त्सस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'हरिद्रादौ लः' (१।२५४) इति बाहुलकाद् वा लत्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मच्छलो मच्छरो** ।

**[ संवच्छलो संवच्छरो ]** संवत्सर (२) । अनेन त्सस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'हरिद्रादौ लः' (१।२५४) इति बाहुलकाद् वा लत्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **संवच्छलो संवच्छरो** ।

**[ चिइच्छइ ]** चिकित्सति । 'क-ग-च-ज०' (१।१७७) क्लुक् । अनेन त्सस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'त्यादीनामाद्यत्रय०' (३।१३९) ति० → इ० **चिइच्छइ** ।

**[ लिच्छइ ]** लिप्सते । अनेन प्सस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **लिच्छइ** ।

**[ जुगुच्छइ ]** जुगुप्सते । अनेन प्सस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'त्यादीनामा०' (३।१३९) ते० → इ० **जुगुच्छइ** ।

**[ अच्छरा ]** [१]अप्सरा । प्रथमा सि । अनेन प्सस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'अन्त्यव्य०' (१।११) स्लुक् **अच्छरा** ।

**[ ऊसारिओ ]** उत्सारित । 'अनुत्साहोत्सन्ने त्स-च्छे' (१।११४) उ० → ऊ । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **ऊसारिओ** ।

**[ निच्चलो ]** निश्चल । 'क-ग-ट-ड०' (२।७७) श्लुक् । 'अनादौ०' (२।८९) चस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निच्चलो** ।

**[ तच्चं ]** तथ्य । प्रथमा सि । आर्षत्वात् थ्यस्य चः । 'अनादौ०' (२।८९) चस्य द्वित्वम् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तच्चं** ॥२१॥

## सामर्थ्योत्सुकोत्सवे वा ॥ ८।२।२२ ॥

एषु संयुक्तस्य छो वा भवति ॥ सामच्छं सामत्थं । उच्छुओ ऊसुओ । उच्छवो ऊसवो ॥

**[ सामर्थ्योत्सुकोत्सवे वा ]** सामर्थ्यं च उत्सुकश्च उत्सवश्च = सामर्थ्योत्सुकोत्सवम्, तस्मिन् = सामर्थ्योत्सुकोत्सवे । सप्तमी ङि । वा प्रथमा सि ।

**[ सामच्छं सामत्थं ]** सामर्थ्य । 'सर्वत्र०' (२।७९)रलुक् । अनेन वा थ्यस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सामच्छं** । पक्षे - सामर्थ्य । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वथस्य तः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सामत्थं** ।

**[ उच्छुओ ऊसुओ ]** उत्सुक । अनेन वा त्सस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वछस्य चः । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ०

---

१. B. G. I. J. L. M. अप्सरस् । 'स्त्रियामाद०' (१।१५) आत्वम् । पा० म०- अप्सरस्-अप्सरा → अच्छरा ।

**उच्छुओ** । पक्षे - उत्सुक । 'अनुत्साहोत्सन्ने त्स-च्छे' (१।११४) उ० → ऊ० । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **ऊसुओ** ।

**[ उच्छवो ऊसवो ]** उत्सव । अनेन वा त्सस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । ' द्वितीय - तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **उच्छवो** । पक्षे - उत्सव । 'अनुत्साहोत्सन्ने०' (१।११४) उ० → ऊ० । 'क-ग-ट-ड०' (२।७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः (३।२) सि० → डो० → ओ० **ऊसवो** ॥२२॥

## स्पृहायाम् ॥ ८।२।२३ ॥

स्पृहाशब्दे संयुक्तस्य छो भवति ॥ फस्यापवादः ॥ छिहा ॥ बहुलाधिकारात् क्वचिदन्यदपि - निप्पिहो ॥

**[ स्पृहायाम् ]** स्पृहा सप्तमी ङि ।

**[ छिहा ]** स्पृहा । अनेन स्पृ० → छ० । 'इत् कृपादौ' (१।१२८) छ० → छि० । प्रथमा सि । ' अन्त्यव्य०' (१।११) स्लुक् **छिहा** ।

**[ निप्पिहो ]**[1] निर् - स्पृह । प्रथमा सि । 'अन्त्यव्य०' (१।११) रलुक् । ('निर्दुरोर्वा' (१।१३) रलुक्) । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'इत् कृपादो' (१।१२८) पृ० → पि० । 'अनादौ०' (२।८९) पस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निप्पिहो** ॥२३॥

## द्य-य्य-र्यां जः ॥ ८।२।२४ ॥

एषां संयुक्तानां जो भवति ॥

द्य-मज्जं । अवज्जं । वेज्जो । जुई । जोओ ॥ य्य-जज्जो । सेज्जा ॥ र्य-मज्जा । चौर्यसमत्वात् भारिआ । कज्जं । वज्जं । पज्जाओ । पज्जत्तं । मज्जाया ॥

**[ द्यय्यर्याम् ]** द्यश्च य्यश्च र्य् च = द्यय्यर्यः, तेषाम् = द्यय्यर्याम् । षष्ठी आम् ।

**[ जः ]** ज प्रथमा सि ।

**[ मज्जं ]** मद्य । प्रथमा सि । अनेन द्यस्य जः । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मज्जं** ।

**[ अवज्जं ]** अवद्य । प्रथमा सि । अनेन द्यस्य जः । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अवज्जं** ।

**[ वेज्जो ]** वैद्य । 'ऐत एत्' (१।१४८) वै० → वे० । अनेन द्यस्य जः । [2]'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वेज्जो** ।

**[ जुई ]** द्युति । प्रथमा सि । अनेन द्यु० → जु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **जुई** ।

**[ जोओ ]** द्योत । प्रथमा सि । अनेन द्यस्य जः । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जोओ** ।

---

१. I. J. L. निस्पृह । पा० म० - निःस्पृह । २. G. 'तैलादौ' (२।९८) ।

**[ जज्जो ]** 'जि अभिभवे' (८) जि । जेतुं शक्यः । ' शक्तार्हे०' (५।४।३५) यप्र० । 'क्षय्य-जय्यौ शक्तौ' (४।३।९०) जय्यो निपात्यते । अनेन य्यस्य जः । 'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जज्जो** ।

**[ सेज्जा ]** शय्या । 'श-षोः सः' (१।२६०) श० → स० । 'एच्छय्यादौ' (१।५७) । एत्वम् । अनेन य्यस्य जः । 'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सेज्जा** ।

**[ भज्जा ]** भार्या । 'ह्रस्वः संयोगे' (१।८४) भा० → भ० । अनेन र्यस्य जः । 'अनादौ०' (२।८९) जस्य द्वित्वम्। प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **भज्जा** ।

**[ भारिआ ]** भार्या । 'स्याद्-भव्य-चैत्य-चौर्यसमेषु यात्' (२।१०७) र-ययोर्विश्लेषं कृत्वा यात् प्राग् इकारः । 'लोकात्' (१।१।३) रि० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **भारिआ**।

**[ कज्जं ]** कार्य । 'ह्रस्वः संयोगे' (१।८४) का० → क० । अनेन र्यस्य जः । 'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कज्जं** ।

**[ वज्जं ]** वर्य । अनेन र्यस्य जः । 'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । ' क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वज्जं** ।

**[ पज्जाओ ]** पर्याय । अनेन र्यस्य जः । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पज्जाओ** ।

**[ पज्जत्तं ]** पर्याप्त । अनेन र्यस्य जः । 'ह्रस्वः संयोगे' (१।८४) । जा० → ज० । 'अनादौ०' (२।८९) जस्य द्वित्वम्। 'क-ग-ट-ड०' (२।७७) प्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० 1 'मोऽनु०' (१।२३) अनुस्वारः **पज्जत्तं** ।

**[ मज्जाया ]** मर्यादा । प्रथमा सि । अनेन र्यस्य जः । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अवर्णो०' (१।१८०) आ० → या० । 'अन्त्यव्य०' (१।११) स्लुक् **मज्जाया** ॥२४॥

### अभिमन्यौ ज-ञ्जौ वा ॥ ८।२।२५ ॥

अभिमन्यौ संयुक्तस्य जो ञ्जश्च वा भवति ॥

अहिमज्जू । अहिमञ्जू । पक्षे-अहिमन्नू ॥ अभिग्रहणादिह न भवति - मन्नू ॥

**[ अभिमन्यौ जञ्जौ वा ]** अभिमन्यु सप्तमी ङि । जश्च ञ्जश्च = जञ्जौ । वा प्रथमा सि ।

**[ अहिमज्जू अहिमञ्जू अहिमन्नू ]** अभिमन्यु । प्रथमा सि । 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः । अनेन वा न्यु० → जु० । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **अहिमज्जू**। द्वितीये-अभिमन्यु । प्रथमा सि । 'ख-घ०' (१।१८७) भस्य हः । अनेन वा न्यु० → ञ्जु० । 'अक्लीबे सौ' (३।१९) दीर्घः। 'अन्त्यव्य०' (१।११) स्लुक् **अहिमञ्जू** । पक्षे-अभिमन्यु । 'ख-घ-थ०' (१।१८७) भस्य हः । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वम् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **अहिमन्नू** ।

**[ मन्नू ]** मन्यु । प्रथमा सि । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वम् । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **मन्नू** ॥२५॥

## साध्वस-ध्य-ह्यां झः ॥ ८।२।२६ ॥

साध्वसे संयुक्तस्य ध्य-ह्ययोश्च झो भवति ॥

सज्झसं । ध्य-बज्झए । झाणं । उवज्झाओ । सज्झाओ । सज्झं । विंज्झो ॥ ह्य - सज्झो । मज्झं । गुज्झं। णज्झइ ॥

**[ साध्वसध्यह्यां झः ]** साध्वसं च ध्यश्च ह्य् च = साध्वसध्यह्यः , तेषाम् = साध्वसध्यह्याम् । षष्ठी आम् । झ प्रथमा सि ।

**[ सज्झसं ]** साध्वस । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) सा० → स० । अनेन ध्वस्य झः । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वझस्य जः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सज्झसं** ।

**[ बज्झए ]** [1]बध्यते । अनेन ध्यस्य झः । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वझस्य जः । 'त्यादीनामा०' (३।१३९) ते० → इ० **बज्झए** ।

**[ झाणं ]** ध्यान । प्रथमा सि । अनेन ध्यस्य झः । 'नो णः' (१।२२८) न० → ण० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **झाणं** ।

**[ उवज्झाओ ]** उपाध्याय । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) पा० → प० । 'पो वः' (१।२३१) प० → व० । अनेन ध्यस्य झः । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वझस्य जः । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **उवज्झाओ** ।

**[ सज्झाओ ]** स्वाध्याय । प्रथमा सि । 'सर्वत्र०' (२।७९) व्लुक् । 'ह्रस्वः संयोगे' (१।८४) सा० → स० । अनेन ध्यस्य झः । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वझस्य जः । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सज्झाओ** ।

**[ सज्झं ]** साध्य । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) सा० → स० । अनेन ध्यस्य झः । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वझस्य जः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सज्झं** ।

[2]**[ विंज्झो ]** विन्ध्य । प्रथमा सि । अनेन ध्यस्य झः । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वझस्य जः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विंज्झो** ।

**[ सज्झो ]** सह्य । प्रथमा सि । अनेन ह्यस्य झः । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वझस्य जः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सज्झो** ।

**[ मज्झं ]** मह्य । प्रथमा सि । अनेन ह्यस्य झः । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वझस्य जः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मज्झं** । मह्यं चतुर्थ्यन्तः संस्कृतसिद्धः ।

**[ गुज्झं ]** गुह्य । प्रथमा सि । अनेन ह्यस्य झः । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वझस्य जः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **गुज्झं** ।

---

१. J. वध्यते । L. हन्+स्य+ते । संस्कृते वध्यते इति जाते । २. सर्वमुद्रितेषु विंझो ।

**[ णज्झइ ]** 'णहींच् बन्धने' (१२८५) णह् । 'पाठे धात्वा०' (२।३।९७) नह् । वर्त्त० तिव् । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'नो णः' (१।२२८) न० → ण० । अनेन ह्यस्य झः । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वझस्य जः । 'त्यादीनामाद्य०' (३।१।३९) तिव्० → इ० **णज्झइ** । बध्नातीत्यर्थः ॥२६॥

## ध्वजे वा ॥ ८।२।२७ ॥

ध्वजशब्दे संयुक्तस्य झो वा भवति ॥ झओ धओ ॥

**[ ध्वजे वा ]** ध्वज सप्तमी ङि । वा प्रथमा सि ।

**[ झओ धओ ]** ध्वज । प्रथमा सि । अनेन विकल्पेन ध्वस्य झः । 'क-ग-च-ज-त-द०' (१।१७७) ज्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **झओ** । पक्षे - ध्वज । प्रथमा सि । 'सर्वत्र-ल-व-रामवन्द्रे' (२।७९) व्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **धओ** ॥२७॥

## इन्धौ झा ॥ ८।२।२८ ॥

इन्धौ धातौ संयुक्तस्य झा इत्यादेशो भवति ॥ समिज्झाइ । विज्झाइ ॥

**[ इन्धौ झा ]** इन्धि सप्तमी ङि । झा प्रथमा सि ।

**[ समिज्झाइ ]** 'ञिइन्धैपि दीप्तौ' (१४९८) इन्धू, सम्पूर्व० । वर्त्त० ते । अनेन न्धस्य झा० । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वझस्य जः । 'त्यादीनामा०' (३।१३९) ते० → इ० **समिज्झाइ** ।

**[ विज्झाइ ]** 'ञिइन्धैपि दीप्तौ' (१४९८) इन्धू, विपूर्व० । वर्त्त० ते । 'लुक्' (१।१०) इलोपः । अनेन न्धस्य झा० । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वझस्य जः । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **विज्झाइ** ॥२८॥

## वृत्त-प्रवृत्त-मृत्तिका-पत्तन-कदर्थिते टः ॥ ८।२।२९ ॥

एषु संयुक्तस्य टो भवति ॥ वट्टो । पवट्टो[१] । मट्टिआ । पट्टणं । कवट्टिओ ॥

**[ वृत्तप्रवृत्तमृत्तिकापत्तनकदर्थिते ]** वृत्तश्च प्रवृत्तश्च मृत्तिका च पत्तनं च कदर्थितश्च = वृत्तप्रवृत्तमृत्तिकापत्तन-कदर्थितम्, तस्मिन् = वृत्तप्रवृत्तमृत्तिकापत्तनकदर्थिते । सप्तमी ङि ।

**[ टः ]** ट प्रथमा सि ।

**[ वट्टो ]** वृत्त । प्रथमा सि । 'ऋतोऽत्' (१।१२६) वृ० → व० । अनेन त्तस्य टः । 'अनादौ०' (२।८९) टस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वट्टो** ।

**[ पवट्टो ]** प्रवृत्त । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'ऋतोऽत्' (१।१२६) वृ० → व० । अनेन त्तस्य टः । 'अनादौ०' (२।८९) टस्य द्वित्वम् । 'अतः सेर्डोः' (२।३) सि० → डो० → ओ० **पवट्टो** ।

**[ मट्टिआ ]** मृत्तिका । प्रथमा सि । 'ऋतोऽत्' (१।१२६) मृ० → म० । अनेन त्तस्य टः । 'अनादौ०' (२।८९) टस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अन्त्यव्य०' (१।११) स्लुक् **मट्टिआ** ।

---

१. G. H. I. K. L. M. पयट्टो । पा० म० - पवट्टो पयट्टो ।

**[ पट्टणं ]** पत्तन । प्रथमा सि । अनेन त्तस्य टः । 'अनादौ०' (२।८९) टस्य द्वित्वम् । 'नो णः' (१।२२८) न० → ण० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पट्टणं** ।

**[ कवट्टिओ ]** कदर्थित । प्रथमा सि । 'कदर्थिते वः' (१।२२४) दस्य वः । अनेन र्थस्य टः । 'अनादौ०' (२।८९) टस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कवट्टिओ** ॥२९॥

## र्त्तस्याऽधूर्त्तादौ ॥ ८।२।३० ॥

र्त्तस्य टो भवति, धूर्त्तादीन् वर्जयित्वा ॥

केवट्टो । वट्टी । जट्टो । [1]पवट्टइ । वट्टुलं । रायवट्टओ(यं) । नट्टई । संवट्टिअं ॥

अधूर्त्तादाविति किम् ? धुत्तो । कित्ती । वत्ता । आवत्तणं । निवत्तणं । पवत्तणं । संवत्तणं । आवत्तओ । निवत्तओ । निव्वत्तिओ । पवत्तओ । संवत्तओ । वत्तिआ । वत्तिओ । कत्तिओ । उक्कत्तिओ । कत्तरी । मुत्ती । मुत्तो । मुहुत्तो ॥ बहुलाधिकारात् - वट्टा ॥

धूर्त्त । कीर्त्ति । वार्त्ता । आवर्त्तन । निवर्त्तन । प्रवर्त्तन । संवर्त्तन । आवर्त्तक । निवर्त्तक । प्रवर्त्तक । संवर्त्तक । वर्त्तिका । वार्त्तिक । कार्त्तिक । उत्कर्त्तित । कर्त्तरी । मूर्त्ति । मूर्त्त । मुहूर्त्त इत्यादि ॥

**[ र्त्तस्याऽधूर्त्तादौ ]** र्त्त षष्ठी ङस् । न धूर्त्तादिः = अधूर्त्तादिस्तस्मिन् = अधूर्त्तादौ । सप्तमी ङि ।

**[ केवट्टो ]** कैवर्त्त । प्रथमा सि । 'ऐत एत्' (१।१४८) कै० → के० । अनेन र्त्तस्य टः । 'अनादौ०' (२।८९) टस्य द्वित्वम् । 'अतः सेर्डोः' (३।२।) सि० → डो० → ओ० **केवट्टो** ।

**[ वट्टी ]** वर्त्ति । प्रथमा सि । अनेन र्त्तस्य टः । 'अनादौ०' (२।८९) टस्य द्वित्वम् । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **वट्टी** ।

**[ जट्टो ]** जर्त्त । प्रथमा सि । अनेन र्त्तस्य टः । 'अनादौ०' (२।८९) टस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जट्टो** ।

**[ पवट्टइ ]** 'वृतूङ् वर्तने' (९५५) वृत्, प्रपूर्वइ० । वर्त्त० ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'सर्वत्र०' (२।७९) र्लुक् । 'ऋवर्णे०' (४।२३४) वृ० → वर्० । प्रवर्त्तते इति जाते अनेन र्त्तस्य टः । 'अनादौ०' (२।८९) टस्य द्वित्वम् । 'त्यादी०' (३।१३९) ते० → इ० **पवट्टइ** ।

**[ वट्टुलं ]** वर्त्तुल । प्रथमा सि । अनेन र्त्तस्य टः । 'अनादौ०' (२।८९) टस्य द्वित्वम् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वट्टुलं** ।

**[ रायवट्टओ( यं ) ]** [2]राजावर्त्तक । प्रथमा सि । 'स्वराणां स्वराः' (४।२३८) जा० → ज० । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । अनेन र्त्तस्य टः । 'अनादौ०' (२।८९) टस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । ('क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः) । **रायवट्टओ( यं )** । **रत्नविशेषः** ।

**[ नट्टई ]** नर्त्तकी । अनेन र्त्तस्य टः । 'अनादौ०' (२।८९) टस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **नट्टई** ।

---

१. सर्वमुद्रितेषु पयट्टइ । २. L. राजवार्तिक । M. राजवार्तिका । पा० म० - राजवार्तक ।

**[ संवट्टिअं ]** संवर्त्तित । प्रथमा सि । अनेन र्त्तस्य टः । 'अनादौ०' (२।८९) टस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **संवट्टिअं** ।

**[ धुत्तो ]** धूर्त्त । 'ह्रस्वः संयोगे' (१।८४) धू० → धु० । 'सर्वत्र०' (२।७९) र्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **धुत्तो** ।

**[ कित्ती ]** कीर्त्ति । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) की० → कि० । 'सर्वत्र०' (२।७९) र्लुक् । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **कित्ती** ।

**[ वत्ता ]** वार्त्ता । 'ह्रस्वः संयोगे' (१।८४) वा० → व० । 'सर्वत्र०' (२।७९) र्लुक् । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **वत्ता** ।

**[ आवत्तणं ]** आवर्त्तन । 'सर्वत्र०' (२।७९) र्लुक् । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **आवत्तणं** ।

**[ निवत्तणं ]** निवर्त्तन । 'सर्वत्र०' (२।७९) र्लुक् । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **निवत्तणं** ।

[1]**[ विवत्तणं ]** विवर्त्तन । 'सर्वत्र०' (२।७९) र्लुक् । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **विवत्तणं** ।

**[ पवत्तणं ]** प्रवर्त्तन । 'सर्वत्र०' (२।७९) द्वय-र्लुक् । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पवत्तणं** ।

**[ संवत्तणं ]** संवर्त्तन । 'सर्वत्र०' (२।७९) र्लुक् । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **संवत्तणं** ।

**[ आवत्तओ ]** आवर्त्तक । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आवत्तओ** ।

**[ निवत्तओ ]** [2]निवर्त्तक । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निवत्तओ** ।

**[ निव्वत्तिओ ]** निर्वर्त्तित । 'सर्वत्र०' (२।७९) द्वयोरपि रयोर्लोपः । 'क-ग-च-ज०' (१।१७७) त्लोपः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निव्वत्तिओ** ।

**[ पवत्तओ ]** प्रवर्त्तक । 'सर्वत्र०' (२।७९) र्लुक् । द्वितीयोऽपि र्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पवत्तओ** ।

**[ संवत्तओ ]** संवर्त्तक । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **संवत्तओ** ।

**[ वत्तिआ ]** वर्त्तिका । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अन्त्यव्य०' (१।११) स्लुक् **वत्तिआ** ।

---

१. A. विवत्तणं उदाहरणम् । २. L. M. निर्वर्तक → निव्वत्तओ । G. निर्वर्त्तक → निव्वत्तओ ।

**[ वत्तिओ ]** वार्त्तिक । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । **'ह्रस्वः संयोगे'** (१।८४) वा० → व० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वत्तिओ** ।

**[ कत्तिओ ]** कार्त्तिक । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'ह्रस्वः संयोगे' (१।८४) का० → क० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कत्तिओ** ।

**[ उक्कत्तिओ ]** उत्कर्त्तित । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **उक्कत्तिओ** ।

**[ कत्तरी ]** [१]कर्त्तरी । 'सर्वत्र०' (२।७९) र्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **कत्तरी** ।

**[ मुत्ती ]** मूर्त्ति । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) मू० → मु० । 'सर्वत्र०' (२।७९) र्लुक् । **'अक्लीबे सौ'** (३।१९) दीर्घः **मुत्ती** ।

**[ मुत्तो ]** मूर्त्त । 'ह्रस्वः संयोगे' (१।८४) मू० → मु० । 'सर्वत्र०' (२।७९) र्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मुत्तो** ।

**[ मुहुत्तो ]** मुहूर्त्त । 'ह्रस्वः संयोगे' (१।८४) हू० → हु० । 'सर्वत्र०' (२।७९) र्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मुहुत्तो** ।

बहुलाधिकारात् क्वचिद् धूर्त्तादौ भवति -

**[ वट्टा ]** वार्त्ता । 'ह्रस्वः संयोगे' (१।८४) वा० → व० । 'सर्वत्र०' (२।७९) र्लुक् । अनेन र्त्तस्य टः । 'अनादौ०' (२।८९) टस्य द्वित्वम् । प्रथमा सि । अन्त्य०' (१।११) स्लुक् **वट्टा ॥३०॥**

## वृन्ते ण्टः ॥ ८।२।३१ ॥

वृन्ते संयुक्तस्य ण्टो भवति ॥ वेण्टं । तालवेण्टं ॥

**[ वृन्ते ण्टः ]** वृन्त सप्तमी ङि । ण्ट प्रथमा सि ।

**[ वेण्टं ]** वृन्त । 'इदेदोद् वृन्ते' (१।१३९) वृ० → वे० । अनेन न्तस्य ण्टः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वेण्टं** ।

**[ तालवेण्टं ]** तालवृन्त । 'इदेदोद् वृन्ते' (१।१३९) । वृ० → वे० । अनेन न्तस्य ण्टः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तालवेण्टं ॥३१॥**

## ठोऽस्थि - विसंस्थुले ॥ ८।२।३२ ॥

अनयोः संयुक्तस्य ठो भवति ॥ अट्ठी । विसंठुलं ।

**[ ठोऽस्थिविसंस्थुले ]** ठ प्रथमा सि । अस्थि च विसंस्थुलं च = अस्थिविसंस्थुलम्, तस्मिन् = अस्थिविसंस्थुले । सप्तमी ङि ।

---

१. M. कर्त्तरि ।

**[ अट्ठी ]** अस्थि । प्रथमा सि । अनेन स्थि० → ठि० । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वठस्य टः । 'स्नमदाम - शिरो - नभः' (१।३२) इति पुंस्त्वम् । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **अट्ठी** ।

**[ विसंठुलं ]** विसंस्थुल । अनेन स्थस्य ठः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **विसंठुलं** ॥३२॥

## स्त्यान - चतुर्था-ऽर्थे वा ॥ ८।२।३३ ॥

एषु संयुक्तस्य ठो वा भवति ॥

ठीणं थीणं । चउट्ठो चउत्थो । अट्ठो प्रयोजनम् । अत्थो धनम् ॥

**[ स्त्यानचतुर्थाऽर्थे वा ]** स्त्यानं च चतुर्थं च अर्थश्च = स्त्यानचतुर्थाऽर्थम्, तस्मिन् = स्त्यानचतुर्थाऽर्थे । सप्तमी ङि । वा प्रथमा सि ।

**[ ठीणं थीणं ]** स्त्यान । 'ई: स्त्यान - खल्वाटे' (१।७४) स्त्या० → स्त्यी० । अनेन वा स्त्यी० → ठी० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **ठीणं** । पक्षे-स्त्यान । 'ई: स्त्यान०' (१।७४) स्त्या० → स्त्यी० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्ती० → थी० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **थीणं** ।

**[ चउट्ठो चउत्थो ]** चतुर्थ । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन वा र्थस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **चउट्ठो** । पक्षे - चतुर्थ । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।७९) थस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वथस्य तः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **चउत्थो** ।

**[ अट्ठो प्रयोजनम्, अत्थो धनम् ]** अर्थ । प्रथमा सि । अनेन वा र्थस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अट्ठो** । अत्रार्थशब्देन प्रयोजनम् । यदा धनमुच्यते तदा ठो न स्यात् । अर्थ । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वथस्य तः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अत्थो** ॥३३॥

## ष्टस्याऽनुष्ट्रेष्टा[1]संदष्टे ॥ ८।२।३४ ॥

उष्ट्रादिवर्जिते ष्टस्य ठो भवति ॥

लट्ठी । मुट्ठी । दिट्ठी । सिट्ठी । पुट्ठो । कट्ठं । सुरट्ठा । इट्ठो । अणिट्ठं ॥ अनुष्ट्रेष्टासंदष्ट इति किम् ? उट्टो । [2]इट्टाचुण्णं व्व[3] । संदट्टो ॥

---

१. G. सन्दिष्टे ।

२. **इट्टा-चुण्णं व** किरंतमुद्धमरुणाअवं परिप्फुरइ । रविणो गअणासि-णिसाण-चक्क-वलओवमं बिंबं ॥ [ग० व० - ११८२] इष्टकाचूर्णमिव किरदूर्ध्वमरुणातपं परिस्फुरति । रवेर्गगनासिनिशानचक्रवलयोपमं बिम्बम् ॥

३. I. M. व ।

**[ ष्टस्याऽनुष्ट्रेष्टासंदष्टे ]** ष्ट षष्ठी ङस् । उष्ट्रश्च इष्टा च संदष्टश्च = उष्ट्रेष्टासंदष्टम्, न उष्ट्रेष्टासंदष्टम् = अनुष्ट्रेष्टासंदष्टम्, तस्मिन् = अनुष्ट्रेष्टासंदष्टे । सप्तमी ङि ।

**[ लट्ठी ]** यष्टि । प्रथमा सि । 'यष्ट्यां लः' (१।२४७) यस्य लः । अनेन ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वठस्य टः । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **लट्ठी** ।

**[ मुट्ठी ]** मुष्टि । प्रथमा सि । अनेन ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वठस्य टः । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **मुट्ठी** ।

**[ दिट्ठी ]** दृष्टि । प्रथमा सि । 'इत् कृपादौ' (१।१२८) दृ० → दि० । अनेन ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वठस्य टः । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **दिट्ठी** ।

**[ सिट्ठी ]** सृष्टि । प्रथमा सि । 'इत् कृपादौ' (१।१२८) सृ० → सि० । अनेन ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वठस्य टः । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **सिट्ठी** ।

[1]**[ गिट्ठी ]** गृष्टि । प्रथमा सि । 'इत् कृपादौ' (१।१२८) गृ० → गि० । अनेन ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वठस्य टः । 'अक्लीबे सौ' (३।१९) दीर्घः । अन्त्यव्य०' (१।११) स्लुक् **गिट्ठी** ।

**[ पुट्ठो ]** पुष्ट । प्रथमा सि । अनेन ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वठस्य टः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पुट्ठो** ।

**[ कट्ठं ]** कष्ट । प्रथमा सि । अनेन ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वठस्य टः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कट्ठं** ।

**[ सुरट्ठा ]** सुराष्ट्र । प्रथमा जस् । 'ह्रस्वः संयोगे' (१।८४) रा० → र० । 'सर्वत्र०' (२।७९) र्लुक् । अनेन ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वठस्य टः । 'जस्-शसो०' (३।४) जस्लुक् । 'जस्-शस्०' (३।१२) दीर्घः **सुरट्ठा** ।

**[ इट्ठो ]** इष्ट । प्रथमा सि । अनेन ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वठस्य टः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **इट्ठो** ।

**[ अणिट्ठं ]** अनिष्ट । प्रथमा सि । 'नो णः' (१।२२८) न० → ण० । अनेन ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वठस्य टः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अणिट्ठं** ।

**[ उट्टो ]** उष्ट्र । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-ट-ड-त-द-प०' (२।७७) ष्लुक् । 'अनादौ०' (२।८९) टस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **उट्टो** ।

---

१. A. गिट्टी उदाहरणम् ।

**[ इट्ठाचुण्णं व्व[१] ]** इष्टा । 'क-ग-ट-ड०' (२।७७) ष्लुक् । 'अनादौ०' (२।८९) टस्य द्वित्वम् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **इट्ठा** । चूर्ण । 'ह्रस्वः संयोगे' (१।८४) चू० → चु० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) णस्य द्वित्वम् **चुण्णं** । इव । मिव - पिव - विव-व्व-व-विअ इवार्थे वा' (२।१८२) इवस्थाने **व्व०** ।

**[ संदट्ठो ]** [२]संदष्ट । प्रथमा सि । 'क-ग-ट-ड-त-द०' (२।७७) ष्लुक् । 'अनादौ०' (२।८९) टस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **संदट्ठो** ॥३४॥

## गर्ते डः ॥ ८।२।३५ ॥

गर्तशब्दे संयुक्तस्य डो भवति ॥ टापवादः ॥ गड्डो । गड्डा ॥

**[ गर्ते डः ]** गर्त सप्तमी ङि । ड प्रथमा सि ।

**[ गड्डो ]** गर्त । प्रथमा सि । अनेन र्तस्य डः । 'अनादौ०' (२।८९) डस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **गड्डो** ।

**[ गड्डा ]** गर्त । अनेन र्तस्य डः । 'अनादौ०' (२।८९) डस्य द्वित्वम् । 'स्वस्रादेर्डा' (३।३५) डा० । 'डित्यन्त्य०' (२।१।११४) डमध्याद् अलोपः । 'लोकात्' (१।१।३) गड्डा । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **गड्डा** ॥३५॥

## संमर्द-वितर्दि-विच्छर्द-च्छर्दि-कपर्द-मर्दिते र्दस्य ॥ ८।२।३६ ॥

एषु र्दस्य डत्वं भवति ॥

समड्डो । विअड्डी । विच्छड्डो । छड्डइ । छड्डी । कवड्डो । मड्डिओ । संमड्डिओ ॥

**[ संमर्दवितर्दिविच्छर्दच्छर्दिकपर्दमर्दिते ]** संमर्दश्च वितर्दिश्च विच्छर्दश्च च्छर्दिश्च कपर्दश्च मर्दितश्च = संमर्दवितर्दिविच्छ-र्दच्छर्दिकपर्दमर्दितम्, तस्मिन् = संमर्दवितर्दिविच्छर्दच्छर्दिकपर्दमर्दिते । सप्तमी ङि ।

**[ र्दस्य ]** र्द षष्ठी ङस् ।

**[ संमड्डो ]** संमर्द । अनेन र्दस्य डः । 'अनादौ०' (२।८९) डस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **संमड्डो** ।

**[ विअड्डी ]** वितर्दि । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन र्दस्य डः । 'अनादौ०' (२।८९) डस्य द्वित्वम् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्यञ्ज०' (१।११) स्लुक् **विअड्डी** ।

**[ विच्छड्डो ]** विच्छर्द । अनेन र्दस्य डः । 'अनादौ०' (२।८९) डस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विच्छड्डो** ।

**[ छड्डइ ]** [३]छर्दति । अनेन र्दस्य डः । 'अनादौ०' (२।८९) डस्य द्वित्वम् । 'त्यादीनामाद्य०' (३।१३९) ति० → इ० **छड्डइ** ।

**[ छड्डी ]** छर्दि । अनेन र्दस्य डः । 'अनादौ०' (२।८९) डस्य द्वित्वम् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **छड्डी** - वान्ति ।

---

१. I. M. व । २. पा० म० - संदष्ट → संदष्ट । सन्दिष्ट → संदिट्ठ । ३. L. छर्द+णिग्+तिव् । 'णेरदेदा०' (३।१४९) णिगः अकारे । धा० पा० - धा० र० - क्रि० स० - पा० म० - छर्दयति ।

**[ कवड्डो ]** कपर्द । 'पो वः' (१।२३१) पस्य वः । अनेन र्दस्य डः । 'अनादौ०' (२।८९) डस्य द्वित्वम्। प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कवड्डो** ।

**[ मड्डिओ ]** मर्दित । प्रथमा सि । अनेन र्दि० → डि० । 'अनादौ०' (२।८९) डस्य द्वित्वम् । 'क-ग-च०' (१।१७७) त्लुक्। 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मड्डिओ** ।

**[ संमड्डिओ ]** संमर्दित । प्रथमा सि । अनेन र्दि० → डि० । 'अनादौ०' (२।८९) डस्य द्वित्वम् । 'क-ग-च०' (१।१७७) त्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **संमड्डिओ** ॥३६॥

## गर्दभे वा ॥ ८।२।३७ ॥

गर्दभे र्दस्य डो वा भवति ॥ गड्डहो । गद्दहो ॥

**[ गर्दभे वा ]** गर्दभ सप्तमी ङि । वा प्रथमा सि ।

**[ गड्डहो गद्दहो ]** गर्दभ । प्रथमा सि । अनेन वा र्दस्य डः । 'अनादौ०' (२।८९) डस्य द्वित्वम् । 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **गड्डहो** । पक्षे-गर्दभ । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) दस्य द्वित्वम् । 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **गद्दहो** ॥३७॥

## कन्दरिका-भिन्दिपाले ण्डः ॥ ८।२।३८ ॥

अनयोः संयुक्तस्य ण्डो भवति ॥ कण्डलिआ । भिण्डिवालो ॥

**[ कन्दरिकाभिन्दिपाले ण्डः ]** कन्दरिका च भिन्दिपालश्च = कन्दरिकाभिन्दिपालम्, तस्मिन् = कन्दरिकाभिन्दिपाले । सप्तमी ङि । ण्ड प्रथमा सि ।

**[ कण्डलिआ ]** कन्दरिका । प्रथमा सि । अनेन न्दस्य ण्डः । 'हरिद्रादौ लः' (१।२५४) रस्य लः । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अन्त्यव्य०' (१।११) स्लुक् **कण्डलिआ** ।

**[ भिण्डिवालो ]** भिन्दिपाल । प्रथमा सि । अनेन न्दस्य ण्डः । 'पो वः' (१।२३१) पा० → वा० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भिण्डिवालो** ॥३८॥

## स्तब्धे ठ-ढौ ॥ ८।२।३९ ॥

स्तब्धे संयुक्तयोर्यथाक्रमं ठ-ढौ भवतः ॥ ठड्ढो ॥

**[ स्तब्धे ठढौ ]** स्तब्ध सप्तमी ङि । ठश्च ढश्च = ठढौ । प्रथमा औ ।

**[ ठड्ढो ]** स्तब्ध । अनेन स्तस्य ठः - ब्धस्य च ढः । 'अनादौ०' (२।८९) ढस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' पूर्वढस्य डः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **ठड्ढो** ॥३९॥

## दग्ध-विदग्ध-वृद्धि-वृद्धे ढः ॥ ८।२।४० ॥

एषु संयुक्तस्य ढो भवति ॥

दड्ढो । विअड्ढो । वुड्ढी । वुड्ढो ॥ क्वचिन्न भवति - विद्ध[1]-कइ-निरूविअं ॥

**[ दग्धविदग्धवृद्धिवृद्धे ढः ]** दग्धश्च विदग्धश्च वृद्धिश्च वृद्धश्च = दग्धविदग्धवृद्धिवृद्धम्, तस्मिन् = दग्धविदग्धवृद्धि-वृद्धे । सप्तमी ङि । ढ प्रथमा सि ।

**[ दड्ढो ]** दग्ध । प्रथमा सि । अनेन ग्धस्य ढः । 'अनादौ०' (२।८९) ढस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वढस्य डः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दड्ढो** ।

[2]**[ विदड्ढो ]** विदग्ध । प्रथमा सि । अनेन ग्धस्य ढः । 'अनादौ०' (२।८९) ढस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वढस्य डः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विदड्ढो** ।

**[ वुड्ढी ]** वृद्धि । 'उदृत्वादौ' (१।१३१) वृ० → वु० । अनेन द्धस्य ढः । 'अनादौ०' (२।८९) ढस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वढस्य डः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **वुड्ढी** ।

**[ वुड्ढो ]** वृद्ध । प्रथमा सि । उदृत्वादौ' (१।१३१) वृ० → वु० । अनेन द्धस्य ढः । 'अनादौ०' (२।८९) ढस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वढस्य डः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वुड्ढो** ।

**[ विद्ध-कइ-निरूविअं ]** वृद्धकविनिरूपित । 'इत् कृपादौ' (१।१२८) वृ० → वि० । 'क-ग-च-ज०' (१।१७७) व्लुक् । 'पो वः' (१।२३१) प० → व० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **विद्धकइनिरूविअं** ॥४०॥

## श्रद्धर्द्धि - मूर्धा-ऽर्धेऽन्ते वा ॥ ८।२।४१ ॥

एषु अन्ते वर्तमानस्य संयुक्तस्य ढो वा भवति ॥

सड्ढा सद्धा । इड्ढी रिद्धी । मुंढा मुद्धा । अड्ढं अद्धं ॥

**[ श्रद्धर्द्धिमूर्धाऽर्धेऽन्ते वा ]** श्रद्धा च ऋद्धिश्च मूर्धा च अर्धं च = श्रद्धर्द्धिमूर्धाऽर्धम्, तस्मिन् = श्रद्धर्द्धिमूर्धाऽर्धे । सप्तमी ङि । अन्त सप्तमी ङि । वा प्रथमा सि ।

**[ सड्ढा सद्धा ]** श्रद्धा । 'सर्वत्र०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) श० → स० । अनेन वा द्धस्य ढः । 'अनादौ०' (२।८९) ढस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वढस्य डः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सड्ढा** । पक्षे-श्रद्धा । 'सर्वत्र०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सद्धा** ।

**[ इड्ढी रिद्धी ]** ऋद्धि । प्रथमा सि । 'इत् कृपादौ' (१।१२८) ऋ० → इ० । अनेन वा द्धस्य ढः । 'अनादौ०' (२।८९) ढस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वढस्य डः । 'अक्लीबे सो' (३।१९) दीर्घः । 'अन्त्य०' (१।११)

---

१. भुअआहिवसालाहण**वुड्ढकइनिरूविअं** इमं दइए ।
णिहणणिरूविअधुवअम्मि वत्थुए गीइआ णत्थि ॥ [वृ० स० २/८]

भुजगाधिपसातवाहनवृद्धकविनिरूपितं इमं दयिते ।
निधननिरूपितध्रुवके वस्तुनि गीतिका नास्ति ॥

२. पा० म० - विदग्ध → विअड्ढो-विदड्ढो । अत्र विअड्ढो सम्यक् प्रतिभाति ।

स्लुक् **इड्ढी** । पक्षे-ऋद्धि । 'रिः केवलस्य' (१।१४०) ऋ० → रि० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **रिद्धी** ।

**[ मुंढा मुद्धा ]** मूर्धन् । 'ह्रस्वः संयोगे' (१।८४) मू० → मु० । 'वक्रादावन्तः' (१।२६) अनुस्वारः । अनेन वा र्धस्य ढः । 'अन्त्य०' (१।११) न्लोपः । प्रथमा सि । 'पुंस्यन०' (३।५६) इत्यतिदेशात् 'राज्ञः' (३।४९) आत्वम् । 'अन्त्य०' (१।११) स्लुक् **मुंढा** ।

पक्षे-मूर्धन् । 'ह्रस्वः संयोगे' (१।८४) मू० → मु० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) धस्य द्वित्वम् । 'द्वितीय०' (२।९०) पूर्वधस्य दः । 'अन्त्य०' (१।११) न्लुक् । प्रथमा सि । 'पुंस्यन०' (३।५६) इत्यतिदेशात् 'राज्ञः' (३।४९) आत्वम् । 'अन्त्य०' (१।११) स्लुक् **मुद्धा** ।

**[ अड्ढं अद्धं ]** अर्ध । अनेन र्धस्य ढः । 'अनादौ०' (२।८९) ढस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वढस्य डः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अड्ढं** । पक्षे-अर्ध । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) धस्य द्वित्वम् । 'द्वितीय०' (२।९०) पूर्वधस्य दः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अद्धं** ॥४१॥

**म्न-ज्ञोर्णः ॥ ८।२।४२ ॥**

अनयोर्णो भवति ॥ म्न-निण्णं । पज्जुण्णो ॥ ज्ञ-णाणं । सण्णा । पण्णा । विण्णाणं ॥

**[ म्नज्ञोर्णः ]** म्नश्च ज्ञ् च = म्नज्ञौ, तयोः = म्नज्ञोः । षष्ठी ओस् । ण प्रथमा सि ।

**[ निण्णं ]** निम्न । प्रथमा सि । अनेन म्नस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **निण्णं** ।

**[ पज्जुण्णो ]** प्रद्युम्न । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'द्य-य्य-र्यां जः' (२।२४) द्यस्य जः । 'अनादौ०' (२।८९) जस्य द्वित्वम् । अनेन म्नस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पज्जुण्णो** ।

**[ णाणं ]** ज्ञान । प्रथमा सि । अनेन ज्ञस्य णः । 'नो णः' (१।२२८) न० → ण० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **णाणं** ।

**[ सण्णा ]** संज्ञा । अनेन ज्ञस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सण्णा** ।

**[ पण्णा ]** प्रज्ञा । 'सर्वत्र०' (२।७९) र्लुक् । अनेन ज्ञस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । 'अन्त्य०' (१।११) स्लुक् **पण्णा** ।

[1]**[ पण्णो ]** प्रज्ञ । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । अनेन ज्ञस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पण्णो** ।

**[ विण्णाणं ]** विज्ञान । प्रथमा सि । अनेन ज्ञस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । 'नो णः' (१।२२८) नस्य णः । 'क्लीबे०' (३।२५) सि० → म्० । मोऽनु०' (१।२३) अनुस्वारः **विण्णाणं** ॥४२॥

१. A. पण्णो उदाहरणम् ।

## पञ्चाशत्-पञ्चदश-दत्ते ॥ ८।२।४३ ॥

एषु संयुक्तस्य णो भवति । पण्णासा । पण्णरह । दिण्णं ॥

**[ पञ्चाशत्पञ्चदशदत्ते ]** पञ्चाशच्च पञ्चदश च दत्तश्च = पञ्चाशत्पञ्चदशदत्तम्, तस्मिन् = पञ्चाशत्पञ्चदशदत्ते । सप्तमी ङि ।

**[ पण्णासा ]** पञ्चाशत् । प्रथमा सि । अनेन ञ्चस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । 'श-षोः सः' (१।२६०) श० → स० । 'स्त्रियामादविद्युतः' (१।१५) त्० → आ० । 'अन्त्यव्य०' (१।११) स्लुक् **पण्णासा** ।

**[ पण्णरह ]** पञ्चदश । अनेन ञ्चस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । 'संख्या - गद्गदे रः' (१।२१९) दस्य रः । 'दश - पाषाणे हः' (१।२६२) शस्य हः । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस् लुक् **पण्णरह** ।

**[ दिण्णं ]** दत्त । 'इः स्वप्नादौ' (१।४६) द० → दि० । अनेन त्तस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दिण्णं** ॥४३॥

## मन्यौ न्तो वा ॥ ८।२।४४ ॥

मन्युशब्दे संयुक्तस्य न्तो वा भवति ॥ मन्तू मन्नू ॥

**[ मन्यौ न्तो वा ]** मन्यु सप्तमी ङि । न्त प्रथमा सि । वा प्रथमा सि ।

**[ मन्तू मन्नू ]** मन्यु । प्रथमा सि । अनेन न्यस्य न्तः । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **मन्तू** । पक्षे-मन्यु । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ शेषाऽऽदेशयोर्द्वित्वम्' (२।८९) नस्य द्वित्वम् । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **मन्नू** इति सिद्धम् ॥४४॥

## स्तस्य थोऽसमस्त-स्तम्बे ॥ ८।२।४५ ॥

समस्त-स्तम्बवर्जिते स्तस्य थो भवति ॥

हत्थो । थुई । थोत्तं । थोअं । पत्थरो । पसत्थो । अत्थि । सत्थि ॥ असमस्तस्तम्ब इति किम् ? समत्तो । तम्बो ॥

**[ स्तस्य ]** स्त षष्ठी ङस् ।

**[ थोऽसमस्तस्तम्बे ]** थ प्रथमा सि । समस्तश्च स्तम्बश्च = समस्तस्तम्बम्, न समस्तस्तम्बम् = असमस्तस्तम्बम्, तस्मिन् = असमस्तस्तम्बे । सप्तमी ङि ।

**[ हत्थो ]** हस्त । अनेन स्तस्य थः । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वथस्य तः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **हत्थो** ।

**[ थुई ]** स्तुति । अनेन स्तस्य थः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **थुई** ।

**[ थोत्तं ]** स्तोत्र । अनेन स्तस्य थः । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **थोत्तं** ।

**[ थोअं ]** स्तोक । अनेन स्तस्य थः । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **थोअं** ।

**[ पत्थरो ]** प्रस्तर । 'सर्वत्र०' (२।७९) र्लुक् । अनेन स्तस्य थः । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वथस्य तः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पत्थरो** ।

**[ पसत्थो ]** प्रशस्त । 'सर्वत्र०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) श० → स० । अनेन स्तस्य थः । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वथस्य तः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पसत्थो** ।

**[ अत्थि ]** अस्ति । अनेन स्तस्य थः । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वथस्य तः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **अत्थि** ।

**[ सत्थि ]** स्वस्ति । प्रथमा सि । 'सर्वत्र०' (२।७९) व्लुक् । अनेन स्तस्य थः । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वथस्य तः । 'अव्ययस्य' (३।२।७) सिलुप् **सत्थि** ।

**[ समत्तो ]** समस्त । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **समत्तो** ।

**[ तम्बो ]** स्तम्ब । प्रथमा सि । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तम्बो** ॥४५॥

## स्तवे वा ॥ ८।२।४६ ॥

स्तवशब्दे स्तस्य थो वा भवति ॥ थवो तवो ॥

**[ स्तवे वा ]** स्तव सप्तमी ङि । वा प्रथमा सि ।

**[ थवो तवो ]** स्तव । प्रथमा सि । अनेन वा स्तस्य थः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **थवो** । पक्षे-स्तव । प्रथमा सि । 'क-ग-ट-ड०' (२।७७) स्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तवो** ॥४६॥

## पर्यस्ते थ-टौ ॥ ८।२।४७ ॥

पर्यस्ते स्तस्य पर्यायेण थ-टौ भवतः ॥ पल्लत्थो पल्लट्टो ॥

**[ पर्यस्ते थटौ ]** पर्यस्त सप्तमी ङि । थश्च टश्च = थटौ । प्रथमा औ ।

**[ पल्लत्थो ]** पर्यस्त । 'पर्यस्त-पर्याण-सौकुमार्ये ल्लः' (२।६८) र्यस्य ल्लः । अनेन स्तस्य थः । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वथस्य तः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पल्लत्थो** ।

**[ पल्लट्टो ]** पर्यस्त । 'पर्यस्त-पर्याण-सौकुमार्ये ल्लः' (२।६८) र्यस्य ल्लः । अनेन स्तस्य टः । 'अनादौ०' (२।८९) टस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पल्लट्टो** ॥४७॥

## वोत्साहे थो हश्च रः ॥ ८।२।४८ ॥

उत्साहशब्दे संयुक्तस्य थो वा भवति, तत्संनियोगे च हस्य रः ॥ उत्थारो । उच्छाहो ॥

**[ वोत्साहे थो हश्च रः ]** वा प्रथमा सि । उत्साह सप्तमी ङि । थ प्रथमा सि । ह् षष्ठी ङस् । च प्रथमा सि । र प्रथमा सि ।

**[ उत्थारो उच्छाहो ]** उत्साह । प्रथमा सि । अनेन वा त्सस्य थः - हस्य च रः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **उत्थारो** । पक्षे - उत्साह । प्रथमा सि । 'ह्रस्वात् थ्य-श्च-त्स-प्सामनिश्चले' (२।२१) त्सस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वछस्य चः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **उच्छाहो** ॥४८॥

## आश्लिष्टे ल-धौ ॥ ८।२।४९ ॥

आश्लिष्टे संयुक्तयोर्यथासंख्यं ल - ध इत्येतौ भवतः ॥ आलिद्धो ॥

**[ आश्लिष्टे लधौ ]** आश्लिष्ट सप्तमी ङि । लश्च धश्च = लधौ । प्रथमा औ ।

**[ आलिद्धो ]** आश्लिष्ट । प्रथमा सि । अनेन श्लिस्य लिः - ष्टस्य च धः । 'अनादौ०' (२।८९) धस्य द्वित्वम् । 'द्वितीय - तुर्ययो०' (२।९०) पूर्वधस्य दः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आलिद्धो** ॥४९॥

## चिह्ने न्धो वा ॥ ८।२।५० ॥

चिह्ने संयुक्तस्य न्धो वा भवति ॥ ण्हापवादः ॥ पक्षे- सोऽपि ॥

चिन्धं इन्धं चिण्हं ॥

**[ चिह्ने न्धो वा ]** चिह्न सप्तमी ङि । न्ध प्रथमा सि । वा प्रथमा सि ।

**[ चिन्धं इन्धं चिण्हं ]** चिह्न । प्रथमा सि । अनेन वा ह्नस्य न्ध आदेशः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **चिन्धं** । चिह्न । प्रथमा सि । प्रायोग्रहणात् 'क-ग-च-ज०' (१।१७७) आदेरपि चलुक् । अनेन ह्नस्य न्धः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **इन्धं** । पक्षे-चिह्न । प्रथमा सि । 'सूक्ष्म-श्न-ष्ण-स्न-ह्न-ह्ण-क्ष्णां ण्हः' (२।७५) ह्नस्य ण्हः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **चिण्हं** ॥५०॥

## भस्मा-ऽऽत्मनोः पो वा ॥ ८।२।५१ ॥

अनयोः संयुक्तस्य पो वा भवति ॥ भप्पो भप्पा । अप्पा अप्पाणो । पक्षे-अत्ता ॥

**[ भस्माऽऽत्मनोः पो वा ]** भस्म च आत्मा च = भस्माऽऽत्मानौ, तयोः = भस्माऽऽत्मनोः । षष्ठी ओस् । प प्रथमा सि । वा प्रथमा सि ।

**[ भप्पो भस्सो ]** भस्मन् । 'अन्त्यव्य०' (१।११) न्लुक् । अनेन वा स्मस्य पः । 'अनादौ०' (२।८९) पस्य द्वित्वम्। 'स्नमदाम-शिरो-नभः' (१।३२) पुंस्त्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भप्पो** । पक्षे - भस्मन् । 'अधो म-न-याम्' (२।७८) म्लोपः । 'अनादौ०' (२।८९) सस्य द्वित्वम् । 'अन्त्यव्य०' (१।११) न्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भस्सो** ।

**[ अप्पा अप्पाणो अत्ता ]** आत्मन् । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । अनेन वा त्मस्य पः । 'अनादौ०' (२।८९) पस्य द्वित्वम् । 'पुंस्यन आणो राजवच्च' (३।५६) इत्यतिदेशात् 'राज्ञः' (३।४९) इति आत्वम् । 'अन्त्यव्य०' (१।११) स्लुक् **अप्पा** । अन्यत्र कथितं अन्यत्र ज्ञाप्यते स अतिदेशः । पक्षे - आत्मन् । प्रथमा सि । 'ह्रस्वः

संयोगे' (१।८४) आ० → अ० । अनेन त्मस्य पः । 'अनादौ०' (२।८९) पस्य द्वित्वम् । 'पुंस्यन आणो राजवच्च' (३।५६) नकारस्य आण० । 'समानानां०' (१।२।१) दीर्घः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अप्पाणो** । पक्षे-आत्मन् । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'अधो म-न-याम्' (२।७८) म्लोपः । 'अनादौ०' (२।८९) तस्य द्वित्वम् । आत्वम् । 'अन्त्यव्य०' (१।११) सूलोपः **अत्ता** ॥५१॥

## ड्म-क्मोः ॥ ८।२।५२ ॥

ड्म-क्मोः पो भवति ॥ कुड्मलम् → कुंपलं । रुक्मिणी → रुप्पिणी । क्वचित् च्मोपि - रुच्मी रुप्पी ॥

**[ ड्मक्मोः ]** ड्मश्च क्मश्च(क्म् च) = ड्मक्मौ, तयोः = ड्मक्मोः । षष्ठी ओस् ।

**[ कुंपलं ]** कुड्मल । प्रथमा सि । अनेन ड्मस्य पः । 'वक्रादावन्तः' (१।२६) अनुस्वारः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः कुंपलं ।

**[ रुप्पिणी ]** रुक्मिणी । अनेन क्मस्य पः । 'अनादौ०' (२।८९) पस्य द्वित्वम् । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) सूलोपः **रुप्पिणी** ।

क्वचित् क्मस्य च्मोपि भवति -

**[ रुच्मी रुप्पी ]** रुक्मी । क्मस्य च्मो भविष्यति तदा **रुच्मी** । क्मस्य पः । 'अनादौ०' (२।८९) पस्य द्वित्वम् । प्रथमा सि । 'अन्त्यव्य०' (१।११) सूलुक् **रुप्पी** ॥५२॥

## ष्प-स्पयोः फः ॥ ८।२।५३ ॥

ष्प-स्पयोः फो भवति ॥

पुष्पम् → पुप्फं । शष्पम् → सप्फं । निष्पेषः → निप्फेसो । निष्पावः → निप्फावो । स्पन्दनम् → फन्दणं । प्रतिस्पर्धिन् → पाडिप्फद्धी ॥ बहुलाधिकारात् क्वचिद् विकल्पः - बुहप्फई बुहप्पई ॥ क्वचिन्न भवति - निप्पहो । निप्पुंसणं । परोप्परम् ॥

**[ ष्पस्पयोः फः ]** ष्पश्च स्पश्च = ष्पस्पौ, तयोः = ष्पस्पयोः । षष्ठी ओस् । फ प्रथमा सि ।

**[ पुप्फं ]** पुष्प । अनेन ष्पस्य फः । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) **पूर्वफस्य पः** । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पुप्फं** ।

**[ सप्फं ]** शष्प । प्रथमा सि । 'श-षोः सः' (१।२६०) शस्य सः । अनेन ष्पस्य फः । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सप्फं** ।

**[ निप्फेसो ]** निष्पेष । प्रथमा सि । अनेन ष्पस्य फः । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । 'श-षोः सः' (१।२६०) षस्य सः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निप्फेसो** ।

**[ निप्फावो ]** निष्पाव । प्रथमा सि । अनेन ष्पस्य फः । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निप्फावो** ।

**[ फन्दणं ]** स्पन्दन । प्रथमा सि । अनेन स्पस्य फः । 'नो णः' (१।२२८) न० → ण० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **फन्दणं** ।

**[ पाडिप्फद्धी ]** प्रतिस्पर्द्धिन् । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'अतः समृद्ध्यादौ वा' (१।४४) प० → पा० । 'प्रत्यादौ डः' (१।२०६) तस्य डः । अनेन स्पस्य फः । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । 'अन्त्यव्य०' (१।११) न्लुक् । 'अक्लीबे सौ' (३।१९) दीर्घः **पाडिप्फद्धी** ।

**[ बुहप्फई बुहप्पई ]** बृहस्पति । 'वा बृहस्पतौ' (१।१३८) बृ० → बु० । बहुलाधिकारात् विकल्पेन स्पस्य फः । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **बुहप्फई** । पक्षे-बृहस्पति । 'वा बृहस्पतौ' (१।१३८) बृ० → बु० । 'क-ग-ट-ड-त-द०' (२।७७) स्लुक् । 'अनादौ०' (२।८९) पस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **बुहप्पई** ।

**[ निप्पहो ]** [1]निष्प्रभ । निर्गता प्रभा यस्य सः । 'क-ग-ट-ड०' (२।७७) ष्लुक् । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) पस्य द्वित्वम् । 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निप्पहो** ।

**[ निप्पुंसणं ]** निष्पुंसन । 'क-ग-ट-ड०' (२।७७) ष्लुक् । 'अनादौ०' (२।८९) पस्य द्वित्वम् । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **निप्पुंसणं** - स्फेटनम् ।

**[ परोप्परम् ]** परस्पर । 'नमस्कार-परस्परे द्वितीयस्य' (२।६२) र० → रो० । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'अनादौ०' (२।८९) पस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **परोप्परम्** ॥५३॥

## भीष्मे ष्मः ॥ ८।२।५४ ॥

भीष्मे ष्मस्य फो भवति ॥ भिप्फो ॥

**[ भीष्मे ष्मः ]** भीष्म सप्तमी ङि । ष्म् षष्ठी ङस् ।

**[ भिप्फो ]** भीष्म । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) भी० → भि० । अनेन ष्मस्य फः । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भिप्फो** ॥५४॥

## श्लेष्मणि वा ॥ ८।२।५५ ॥

श्लेष्मशब्दे ष्मस्य फो वा भवति ॥ सेफो सिलिम्हो ॥

**[ श्लेष्मणि वा ]** श्लेष्मन् सप्तमी ङि । वा प्रथमा सि ।

**[ सेफो सिलिम्हो ]** श्लेष्मन् । 'सर्वत्र०' (२।७९) ल्लुक् । 'श-षोः सः' (१।२६०) शस्य सः । अनेन वा ष्मस्य फः । 'अन्त्यव्य०' (१।११) न्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० सेफो । पक्षे-श्लेष्मन् । 'ह्रस्वः संयोगे' (१।८४) श्ले० → श्लि० । 'लात्' (२।१०६) श्-लियोर्विश्लेषं कृत्वा लात् प्राग् इ० । 'श-षोः सः' (१।२६०) शस्य सः । 'पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः' (२।७४) ष्मस्य म्हः । 'अन्त्यव्य०' (१।११) न्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सिलिम्हो** ॥५५॥

---

१. G. निःप्रभ । G. पाठां०- निष्प्रभ - क० ख० दी० ।

## ताम्रा-ऽऽम्रे म्बः ॥ ८।२।५६ ॥

अनयोः संयुक्तस्य मयुक्तो बो भवति ॥ तम्बं । अम्बं । अम्बिर तम्बिर इति देश्यौ ॥

**[ ताम्राऽऽम्रे म्बः ]** ताम्रं च आम्रं च = ताम्राऽऽम्रम्, तस्मिन् = ताम्राऽऽम्रे । सप्तमी ङि । म्ब प्रथमा सि ।

**[ तम्बं ]** ताम्र । 'ह्रस्वः संयोगे' (१।८४) ता० → त० । अनेन म्रस्य म्बः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तम्बं** ।

**[ अम्बं ]** आम्र । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । अनेन म्रस्य म्बः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अम्बं** ।

अम्बिर-तम्बिराविति देश्यौ आम्र-ताम्रवाचकौ द्वौ शब्दौ ॥५६॥

## ह्वो भो वा ॥ ८।२।५७ ॥

ह्वस्य भो वा भवति ॥ जिब्भा जीहा ॥

**[ ह्वो भो वा ]** ह्व्(ह्वा) षष्ठी ङस् । भ प्रथमा सि । वा प्रथमा सि ।

**[ जिब्भा जीहा ]** जिह्वा । अनेन वा ह्वस्य भः । 'अनादौ०' (२।८९) भस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वभस्य बः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **जिब्भा** । पक्षे-जिह्वा । 'ईर्जिह्वा-सिंह-त्रिंशद्विंशतौ त्या' (१।९२) जि० → जी० । 'सर्वत्र०' (२।७९) व्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **जीहा** ॥५७॥

## वा विह्वले वौ वश्च ॥ ८।२।५८ ॥

विह्वले ह्वस्य भो वा भवति, तत्संनियोगे च विशब्दे वस्य वा भो भवति ॥ भिब्भलो विब्भलो विहलो ॥

**[ वा विह्वले वौ वश्च ]** वा प्रथमा सि । विह्वल सप्तमी ङि । वि सप्तमी ङि । व् षष्ठी ङस् । च प्रथमा सि ।

**[ भिब्भलो विब्भलो विहलो ]** विह्वल । अनेन ह्वस्य भः । 'अनादौ०' (२।८९) भस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वभस्य बः । अनेन वा विशब्दस्य भि० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भिब्भलो** ।

यत्र वेर्भो न स्यात् तत्र-विह्वल । अनेन ह्वस्य भः । 'अनादौ०' (२।८९) भस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वभस्य बः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विब्भलो** ।

यत्र किमपि न स्यात् तत्र-विह्वल । 'सर्वत्र०' (२।७९) व्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विहलो** ॥५८॥

## वोर्ध्वे ॥ ८।२।५९ ॥

ऊर्ध्वशब्दे संयुक्तस्य भो वा भवति ॥ उब्भं उद्धं ॥

**[ वोर्ध्वे ]** वा प्रथमा सि । ऊर्ध्व सप्तमी ङि ।

**[ उब्भं उद्धं ]** ऊर्ध्व । 'ह्रस्वः संयोगे' (१।८४) ऊ० → उ० । अनेन वा र्ध्वस्य भः । 'अनादौ०' (२।८९) भस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वभस्य बः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **उब्भो** । ('क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **उब्भं**) ।

पक्षे-ऊर्ध्व । 'ह्रस्वः संयोगे' (१।८४) ऊ० → उ० । 'सर्वत्र०' (२।७९) र-वयोर्लुक् । 'अनादौ०' (२।८९) धस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वधस्य दः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **उद्धं** ॥५९॥

## कश्मीरे म्भो वा ॥ ८।२।६० ॥

कश्मीरशब्दे संयुक्तस्य म्भो वा भवति ॥ कम्भारा कम्हारा ॥

**[ कश्मीरे म्भो वा ]** कश्मीर सप्तमी ङि । म्भ प्रथमा सि । वा प्रथमा सि ।

**[ कम्भारा कम्हारा ]** कश्मीर । अनेन वा श्मस्य म्भः । 'आत् कश्मीरे' (१।१००) आत्वम् । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः' (३।१२) र० → रा० **कम्भारा** ।

पक्षे-कश्मीर । 'आत् कश्मीरे' (१।१००) श्मी० → श्मा० । 'पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः' (२।७४) श्म० → म्हः । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) र० → रा० **कम्हारा** ॥६०॥

## न्मो मः ॥ ८।२।६१ ॥

न्मस्य मो भवति ॥ अधोलोपाऽपवादः ॥ जम्मो । वम्महो । मम्मणं ॥

**[ न्मो मः ]** न्म् षष्ठी ङस् । म प्रथमा सि ।

**[ जम्मो ]** जन्मन् । अनेन न्मस्य मः । 'अनादौ०' (२।८९) मस्य द्वित्वम् । 'अन्त्यव्यञ्जनस्य' (१।११) न्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जम्मो** ।

**[ वम्महो ]** मन्मथ । 'मन्मथे वः' (१।२४२) मस्य वः । अनेन न्मस्य मः । 'अनादौ०' (२।८९) मस्य द्वित्वम् । 'ख-घ-थ-ध-भाम्' (१।१८७) थस्य हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वम्महो** ।

**[ मम्मणं ]** मन्मन । अनेन न्मस्य मः । 'अनादौ०' (२।८९) मस्य द्वित्वम् । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मम्मणं** । अस्पष्टलपनम् ॥६१॥

## ग्मो वा ॥ ८।२।६२ ॥

ग्मस्य मो वा भवति ॥ युग्मम् → जुम्मं जुग्गं । तिग्मम् → तिम्मं तिग्गं ॥

**[ ग्मो वा ]** ग्म् षष्ठी ङस् । वा प्रथमा सि ।

**[ जुम्मं जुग्गं ]** युग्म । 'आदेर्यो जः' (१।२४५) यस्य जः । अनेन वा ग्मस्य मः । 'अनादौ०' (२।८९) मस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जुम्मं** ।

पक्षे-युग्म । 'अधो म-न-याम्' (२।७८) म्लोपः । 'अनादौ०' (२।८९) गस्य द्वित्वम् । 'आदेर्यो जः' (१।२४५) यस्य जः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जुग्गं** ।

**[ तिम्मं तिग्गं ]** तिग्म । अनेन वा ग्मस्य मः । 'अनादौ०' (२।८९) मस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तिम्मं** ।

पक्षे-तिग्म । 'अधो म-न-याम्' (२।७८) म्लोपः । 'अनादौ०' (२।८९) गस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तिग्गं** ॥६२॥

## ब्रह्मचर्य-तूर्य-सौन्दर्य-शौण्डीर्ये र्यो रः ॥ ८।२।६३ ॥

एषु र्यस्य रो भवति ॥ जापवादः ॥ बम्भचेरं । चौर्यसमत्वाद् बम्हचरिअं । तूरं । सुन्देरं । सोण्डीरं ॥

**[ ब्रह्मचर्यतूर्यसौन्दर्यशौण्डीर्ये ]** ब्रह्मचर्यं च तूर्यं च सौन्दर्यं च शौण्डीर्यं च = ब्रह्मचर्यतूर्यसौन्दर्यशौण्डीर्यम्, तस्मिन्, = ब्रह्मचर्यतूर्यसौन्दर्यशौण्डीर्ये । सप्तमी ङि ।

**[ र्यो रः ]** र्य् षष्ठी ङस् । र प्रथमा ङि ।

[1]**[ बम्भचेरं ]** ब्रह्मचर्य । 'सर्वत्र०' (२।७९) र्लुक् । 'पक्ष्म-श्म-ष्म०' (२।७४) इत्यत्र क्वचिन्म्भोऽपि दृश्यते, ततो म्हस्थाने म्भः । 'ब्रह्मचर्ये चः' (१।५९) च० → चे० । अनेन र्यस्य रः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **बम्भचेरं** ।

**[ बम्हचरिअं ]** ब्रह्मचर्य । 'सर्वत्र०' (२।७९) र्लुक् । 'पक्ष्म-श्म-ष्म०' (२।७४) म्हः । 'स्याद्-भव्य-चैत्य-चौर्यसमेषु यात्' (२।१०७) र-ययोर्विश्लेषं कृत्वा यात् प्राग् इकारः । 'लोकात्' (१।१।३) बम्हचरिय । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **बम्हचरिअं** ।

**[ तूरं ]** तूर्य । अनेन र्यस्य रः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः तूरं ।

**[ सुन्देरं ]** सौन्दर्य । 'उत् सौन्दर्यादौ' (१।१६०) सौ० → सु० । 'एच्छय्यादौ' (१।५७) द० → दे० । अनेन र्यस्य रः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुन्देरं** ।

**[ सोण्डीरं ]** शौण्डीर्य । 'औत ओत्' (१।१५९) शौ० → शो० । 'श-षोः सः' (१।२६०) शो० → सो० । अनेन र्यस्य रः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सोण्डीरं** ॥६३॥

## धैर्ये वा ॥ ८।२।६४ ॥

धैर्ये र्यस्य रो वा भवति ॥ धीरं धिज्जं ॥ सूरो सुज्जो इति तु सूर-सूर्यप्रकृतिभेदात् ॥

**[ धैर्ये वा ]** धैर्य सप्तमी ङि । वा प्रथमा सि ।

**[ धीरं धिज्जं ]** धैर्य । 'ऐत एत्' (१।१४८) धै० → धे० । 'ईद्धैर्ये' (१।१५५) धी० । अनेन वा र्यस्य रः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **धीरं** ।

पक्षे-धैर्य । 'ह्रस्वः संयोगे' (१।८४) धै० → धि० । 'द्य-य्य-र्यां जः' (२।२४) र्यस्य जः । **'अनादौ०'** (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **धिज्जं** ।

**[ सूरो ]** सूर । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सूरो** ।

**[ सुज्जो ]** सूर्य । 'ह्रस्वः संयोगे' (१।८४) सू० → सु० । 'द्य-य्य-र्यां जः' (२।२४) र्यस्य जः । 'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सुज्जो** ॥६४॥

## एतः पर्यन्ते ॥ ८।२।६५ ॥

पर्यन्ते एकारात् परस्य र्यस्य रो भवति ॥ पेरन्तो ॥ एत इति किम् ? पज्जन्तो ॥

**[ एतः पर्यन्ते ]** एत् पञ्चमी ङसि । पर्यन्त सप्तमी ङि ।

---

१. E .G. H. J. K. L. बम्हचेरं ।

**[ पेरन्तो ]** पर्यन्त । 'वल्ल्युत्कर-पर्यन्ता-ऽऽश्चर्ये वा' (१।५८) प० → पे० । अनेन र्यस्य रः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पेरन्तो** ।

**[ पज्जन्तो ]** पर्यन्त । 'द्य-य्य-र्यां जः' (२।२४) र्यस्य जः । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पज्जन्तो** ॥६५॥

## आश्चर्ये ॥ ८।२।६६ ॥

आश्चर्ये एतः परस्य र्यस्य रो भवति ॥ अच्छेरं ॥ एत इत्येव - अच्छरिअं ॥

**[ आश्चर्ये ]** आश्चर्य सप्तमी ङि ।

**[ अच्छेरं ]** आश्चर्य । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'वल्ल्युत्कर-पर्यन्ता-ऽऽश्चर्ये वा' (१।५८) श्च० → श्चे० । 'ह्रस्वात् थ्य०' (२।२१) श्चस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । अनेन र्यस्य रः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अच्छेरं** ।

**[ अच्छरिअं ]** आश्चर्य । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'ह्रस्वात् थ्य-श्च०' (२।२१) श्चस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'अतो रिआ-ऽर-रिज्ज-रीअं' (२।६७) र्यस्य रिअ आदेशः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अच्छरिअं** ॥६६॥

## अतो रिआ-ऽर-रिज्ज-रीअं ॥ ८।२।६७ ॥

आश्चर्ये अकारात् परस्य र्यस्य रिअ-अर-रिज्ज-रीअ इत्येते आदेशा भवन्ति ॥

अच्छरिअं अच्छअरं अच्छरिज्जं अच्छरीअं ॥ अत इति किम् ? अच्छेरं ॥

**[ अतो रिआऽररिज्जरीअं ]** अत् पञ्चमी ङसि । रिअश्च अरश्च रिज्जश्च रीअश्च = रिआऽररिज्जरीअम् ।

**[ अच्छरिअं अच्छअरं अच्छरिज्जं अच्छरीअं ]** आश्चर्य (४) । 'ह्रस्वः संयोगे' (१।८४) आ०(४) → अ०(४) । 'ह्रस्वात् थ्य-श्च०' (२।२१) श्च०(४) → छ०(४) । 'अनादौ०' (२।८९) छस्य(४) द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य (४) चः(४) । अनेन प्रथमे र्यस्थाने रिअ० । द्वितीये र्यस्थाने अर० । तृतीये र्यस्थाने रिज्ज० । चतुर्थे र्यस्थाने रीअ० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अच्छरिअं अच्छअरं अच्छरिज्जं अच्छरीअं** ।

**[ अच्छेरं ]** आश्चर्य । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'वल्ल्युत्कर०' (१।५८) श्च० → श्चे० । 'ह्रस्वात् थ्य-श्च०' (२।२१) श्चस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'आश्चर्ये' (२।६६) र्यस्य रः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अच्छेरं** ॥६७॥

## पर्यस्त-पर्याण-सौकुमार्ये ल्लः ॥ ८।२।६८ ॥

पर्यस्त-पर्याण-सौकुमार्येषु र्यस्य ल्लो भवति ॥

पर्यस्तं → पल्लट्टं - पल्लत्थं । पल्लाणं । सोअमल्लं ॥ पल्लङ्को इति च पल्यङ्कशब्दस्य यलोपे द्वित्वे च ॥ पलिअङ्को इत्यपि चौर्यसमत्वात् ॥

**[ पर्यस्तपर्याणसौकुमार्ये ]** पर्यस्तं च पर्याणं च सौकुमार्यं च = पर्यस्तपर्याणसौकुमार्यम्, तस्मिन् = पर्यस्तपर्याणसौकुमार्ये । सप्तमी ङि ।

**[ ल्ल: ]** ल्ल प्रथमा सि ।

**[ पल्लट्टं ]** पर्यस्त । अनेन र्यस्य ल्लः । 'पर्यस्ते थ-टौ' (२।४७) स्तस्य टः । 'अनादौ०' (२।८९) टस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पल्लट्टं** ।

**[ पल्लत्थं ]** पर्यस्त । अनेन र्यस्य ल्लः । 'पर्यस्ते थ-टौ' (२।४७) स्तस्य थः । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पल्लत्थं** ।

**[ पल्लाणं ]** पर्याण । अनेन र्यस्य ल्लः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पल्लाणं** ।

**[ सोअमल्लं ]** सौकुमार्य । 'औत ओत्' (१।१५९) सौ० → सो० । 'उतो मुकुलादिष्वत्' (१।१०७) कु० → क० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'ह्रस्वः संयोगे' (१।८४) मा० → म० । अनेन र्यस्य ल्लः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सोअमल्लं** ।

**[ पल्लङ्को ]** पल्यङ्क । 'अधो म-न-याम्' (२।७८) यलोपः । 'अनादौ०' (२।८९) लस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पल्लङ्को** ।

**[ पलिअङ्को ]** पर्यङ्क । चौर्यसमत्वात् । स्याद्-भव्य-चैत्य-चौर्यसमेषु यात्' (२।१०७) इत्यनेन र-ययोर्विश्लेषं कृत्वा यात् प्राग् इः । 'हरिद्रादौ लः' (१।२५४) रस्य लः । 'क-ग-च-ज-त-द-प-य-वां प्रायो लुक्' (१।१७७) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पलिअङ्को** ॥६८॥

## बृहस्पति - वनस्पत्योः सो वा ॥ ८।२।६९ ॥

अनयोः संयुक्तस्य सो वा भवति ॥ बहस्सई बहप्फई । भयस्सई भयप्फई । वणस्सई वणप्फई ॥

**[ बृहस्पतिवनस्पत्योः ]** बृहस्पतिश्च वनस्पतिश्च = बृहस्पतिवनस्पती, तयोः = बृहस्पतिवनस्पत्योः । षष्ठी ओस् ।

**[ सो वा ]** स प्रथमा सि । वा प्रथमा सि ।

**[ बहस्सई बहप्फई ]** बृहस्पति । 'ऋतोऽत्' (१।१२६) बृ० → ब० । अनेन वा स्पस्य सः । 'अनादौ०' (२।८९) सस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **बहस्सई** ।

पक्षे-बृहस्पति । 'ऋतोऽत्' (१।१२६) बृ० → ब० । 'ष्प-स्पयोः फः' (२।५३) स्पस्य फः । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **बहप्फई** ।

**[ भयस्सई भयप्फई ]** बृहस्पति । 'ऋतोऽत्' (१।१२६) बृ० → ब० । 'बृहस्पतौ बहो भयः' (२।१३७) बह० → भयः । अनेन वा स्पस्य सः । 'अनादौ०' (२।८९) सस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **भयस्सई** ।

पक्षे-बृहस्पति । 'ऋतोऽत्' (१।१२६) बृ० → ब० । 'बृहस्पतौ बहो भयः' (२।१३७) बह० → भयः । 'ष्प-स्पयोः फः' (२।५३) स्पस्य फः । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **भयप्फई** ।

**[ वणस्सई वणप्फई ]** वनस्पति । 'नो णः' (१।२२८) नस्य णः । अनेन वा स्पस्य सः । 'अनादौ०' (२।८९) सस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) तुलुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **वणस्सई** ।

पक्षे-वनस्पति । 'नो णः' (१।२२८) नस्य णः । 'ष्प-स्पयोः फः' (२।५३) स्पस्य फः । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । 'क-ग-च-ज०' (१।१७७) तुलुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०'(१।११) स्लुक् **वणप्फई** ॥६९॥

## बाष्पे होऽश्रुणि ॥ ८।२।७० ॥

बाष्पशब्दे संयुक्तस्य हो भवति, अश्रुण्यभिधेये ॥ बाहो नेत्रजलम् ॥ अश्रुणीति किम् ? बप्फो ऊष्मा ॥

**[ बाष्पे होऽश्रुणि ]** बाष्प सप्तमी ङि । ह प्रथमा सि । अश्रु सप्तमी ङि ।

**[ बाहो नेत्रजलम् ]** बाष्प । अनेन ष्पस्य हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० बाहो **नेत्रजलम्** ।

**[ बप्फो ऊष्मा ]** बाष्प । 'ह्रस्वः संयोगे' (१।८४) बा० → ब० । 'ष्प-स्पयोः फः' (२।५३) ष्पस्य फः । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **बप्फो ऊष्मा** ॥७०॥

## कार्षापणे ॥ ८।२।७१ ॥

कार्षापणे संयुक्तस्य हो भवति ॥

काहावणो ॥ कथं कहावणो ? 'ह्रस्वः संयोगे' (१।८४) इति पूर्वमेव ह्रस्वत्वे पश्चादादेशे । कर्षापणशब्दस्य वा भविष्यति ॥

**[ कार्षापणे ]** कार्षापण सप्तमी ङि ।

**[ काहावणो ]** कार्षापण । अनेन र्षस्य हः । 'पो वः' (१।२३१) पस्य वः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **काहावणो** ।

**[ कहावणो ]** कार्षापण । 'ह्रस्वः संयोगे' (१।८४) का० → क० । अनेन र्षस्य हः । 'पो वः' (१।२३१) पस्य वः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कहावणो** ।

अथवा कर्षापणशब्दस्य कहावणो इति रूपं भवति ॥७१॥

## दुःख-दक्षिण-तीर्थे वा ॥ ८।२।७२ ॥

एषु संयुक्तस्य हो वा भवति ॥ दुहं दुक्खं । [१]परदुक्खे दुक्खिआ विरला । दाहिणो दक्खिणो । तूहं तित्थं ॥

**[ दुःखदक्षिणतीर्थे वा ]** दुःखं च दक्षिणश्च तीर्थं च = दुःखदक्षिणतीर्थम्, तस्मिन् = दुःखदक्षिणतीर्थे । सप्तमी ङि । वा प्रथमा सि ।

---

१. विरला जाणन्ति गुणे, विरला जाणन्ति ललियकव्वाइं । सामन्नधणा विरला, **परदुक्खे दुक्खिआ विरला** ॥ [प्रा० भा०]

**[ दुहं दुक्खं ]** दुःख । अनेन वा :खस्य हः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दुहं** ।

पक्षे-दुःख । 'क-ग-ट-ड०' (२।७७) इति जिह्वामूलीयस्य लुक् । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दुक्खं**।

**[ परदुक्खे दुक्खिआ विरला ]** परदुक्ख(:ख) । सप्तमी ङि । 'डे-म्मि डेः' (३।११) ङि० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अकारस्य लुक् । 'क-ग-ट-ड०' (२।७७) : लुक् । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः **परदुक्खे** ।

दुःखित । 'क-ग-ट-ड०' (२।७७) जिह्वामूलीयलुक् । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लोपः । 'जस्-शस्०' (३।१२) दीर्घः अ० → आ० **दुक्खिआ** ।

विरल । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्०' (३।१२) दीर्घः - ल० → ला० विरला ।

**[ दाहिणो दक्खिणो ]** दक्षिण । अनेन वा क्षस्य हः । 'दक्षिणे हे' (१।४५) द० → दा० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दाहिणो** ।

पक्षे-दक्षिण । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्षस्य खः - छ-झावपि । 'अनादौ०' (२।८९) खस्य-छस्य-झस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः - पूर्वछस्य चः - पूर्वझस्य जः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दक्खिणो दच्छिणो दज्झिणो**।

**[ तूहं तित्थं ]** तीर्थ । अनेन वा र्थस्य हः । 'तीर्थे हे' (१।१०४) ती० → तू० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तूहं** ।

पक्षे-तीर्थ । 'ह्रस्वः संयोगे' (१।८४) ती० → ति० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) थस्य द्वित्वम्। 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । मोऽनु०' (१।२३) अनुस्वारः **तित्थं** ॥७२॥

## कूष्माण्ड्यां ष्मो लस्तु ण्डो वा ॥ ८।२।७३ ॥

कूष्माण्ड्यां ष्मा इत्येतस्य हो भवति, ण्ड इत्यस्य तु वा लो भवति ॥ कोहली । कोहण्डी ॥

**[ कूष्माण्ड्यां ष्मो लस्तु ण्डो वा ]** कूष्माण्डी सप्तमी ङि । ष्मा षष्ठी ङस् । ल प्रथमा सि । तु प्रथमा सि । ण्ड् षष्ठी ङस् । वा प्रथमा सि ।

**[ कोहली कोहण्डी ]** कूष्माण्डी । अनेन ष्मा० → हः । 'ओत् कूष्माण्डी - तूणीर-कूर्पर-स्थूल-ताम्बूल-गुडूची-मूल्ये' (१।१२४) कू० → को० - ततोऽनेनैव वा ण्डस्य लः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **कोहली** । लकारविकल्पपक्षे कूष्माण्डी । 'ओत् कूष्माण्डी०' (१।१२४) कू० → को० । अनेन ष्मा० → हः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **कोहण्डी** ॥७३॥

## पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः ॥ ८।२।७४ ॥

पक्ष्मशब्दसम्बन्धिनः संयुक्तस्य श्म-ष्म-स्म-ह्मां च मकाराक्रान्तो हकार आदेशो भवति ॥

पक्ष्मन् → पम्हाइं । पम्हललोअणा । श्म-कुश्मानः → कुम्हाणो । कश्मीराः → कम्हारा । ष्म-ग्रीष्मः → गिम्हो । ऊष्मा → उम्हा । स्म-अस्मादृशः → अम्हारिसो । विस्मयः → विम्हओ । ह्म-ब्रह्मा → बम्हा । सुह्मः → सुम्हा । बम्हणो । बम्हचेरं । क्वचिन्न भवति - रश्मिः → रस्सी । स्मरः → सरो ॥

**[ पक्ष्मश्मष्मस्मह्माम् ]** पक्ष्म च श्मश्च ष्मश्च स्मश्च ह्म् च = पक्ष्मश्मष्मस्मह्मः, तेषाम् = पक्ष्मश्मष्मस्मह्माम् । षष्ठी आम् ।

**[ म्हः ]** म्ह प्रथमा सि ।

**[ पम्हाइं ]** पक्ष्मन् । अनेन क्ष्मस्य म्हः । प्रथमा जस् । 'अन्त्यव्यञ्जनस्य' (१।११) न्लुक् । 'जस्-शस इँ-इं०' (३।२६) जस्स्थाने इं - पूर्वस्य च दीर्घः - म्हा० **पम्हाइं** ।

**[ पम्हललोअणा ]** पक्ष्मललोचना । अनेन क्ष्मस्य म्हः । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'नो णः' (१।२२८) ना० → णा० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **पम्हललोअणा** ।

**[ कुम्हाणो ]** कुश्मान । प्रथमा सि । अनेन श्मस्य म्हः । 'नो णः' (१।२२८) न० → ण० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कुम्हाणो** ।

**[ कम्हारा ]** कश्मीर । 'आत् कश्मीरे' (१।१००) श्मी० → श्मा० । अनेन श्मा० → म्हा० । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्०' (३।१२) दीर्घः **कम्हारा** ।

**[ गिम्हो ]** ग्रीष्म । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'ह्रस्वः संयोगे' (१।८४) गी० → गि० । अनेन ष्मस्य म्हः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **गिम्हो** ।

**[ उम्हा ]** ऊष्मन् । 'ह्रस्वः संयोगे' (१।८४) ऊ० → उ० । अनेन ष्मस्य म्हः । 'पुंस्यन आणो राजवच्च' (३।५६) इत्यतिदेशात् 'राज्ञः' (३।४९) आ० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **उम्हा** ।

**[ अम्हारिसो ]** अस्मादृश । अनेन स्मस्य म्हः । 'दृशः क्विप्-टक्-सकः' (१।१४२) रि० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अम्हारिसो** ।

**[ विम्हओ ]** विस्मय । अनेन स्मस्य म्हः । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विम्हओ** ।

**[ बम्हा ]** ब्रह्मन् । 'सर्वत्र०' (२।७९) र्लुक् । अनेन ह्मस्य म्हः । 'पुंस्यन आणो राजवच्च' (३।५६) इत्यतिदेशात् 'राज्ञः' (३।४९) आ० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **बम्हा** ।

**[ सुम्हा ]** सुह्मन् । अनेन ह्मस्य म्हः । 'पुंस्यन आणो राजवच्च' (३।५६) इत्यतिदेशात् 'राज्ञः' (३।४९) आ० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सुम्हा** ।

**[ बम्हणो ]** ब्राह्मण । 'सर्वत्र०' (२।७९) र्लुक् । 'ह्रस्वः संयोगे' (१।८४) बा० → ब० । अनेन ह्मस्य म्हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **बम्हणो** ।

**[ बम्हचेरं ]** ब्रह्मचर्य । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । अनेन ह्मस्य म्हः । 'ब्रह्मचर्ये चः' (१।५९) च० → चे० । ब्रह्मचर्य-तूर्य-सौन्दर्य-शौण्डीर्ये र्यो रः' (२।६३) र्यस्य रः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **बम्हचेरं** ।

क्वचिद् एतेषां म्भोऽपि भवति -

**[ बम्भणो ]** ब्राह्मण । 'सर्वत्र०' (२।७९) र्लुक् । 'ह्रस्वः संयोगे' (१।८४) बा० → ब० । अनेन ह्मस्य म्भः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **बम्भणो** ।

**[ बम्भचेरं ]** ब्रह्मचर्य । 'सर्वत्र०' (२।७९) र्लुक् । अनेन ह्मस्य म्भः । 'ब्रह्मचर्ये चः' (१।५९) च० → चे० । 'ब्रह्मचर्य-तूर्य-सौन्दर्य०' (२।६३) र्यस्य रः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **बम्भचेरं** ।

**[ सिम्भो ]** श्लेष्मन् । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) ल्लुक् । 'ह्रस्वः संयोगे' (१।८४) शे० → शि० । 'श-षोः सः' (१।२६०) शि० → सि० । अनेन ष्मस्य म्भः । 'अन्त्यव्य०' (१।११) न्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सिम्भो** ।

**[ रस्सी ]** रश्मि । प्रथमा सि । 'अधो म-न-याम्' (२।७८) म्लोपः । 'श-षोः सः' (१।२६०) शस्य सः । 'अनादौ०' (२।८९) सस्य द्वित्वम् । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **रस्सी** ।

**[ सरो ]** स्मर । 'अधो म-न-याम्' (२।७८) म्लोपः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सरो** ॥७४॥

## सूक्ष्म-श्न-ष्ण-स्न-ह्न-ह्ण-क्ष्णां ण्हः ॥ ८।२।७५ ॥

सूक्ष्मशब्दसम्बन्धिनः संयुक्तस्य श्न-ष्ण-स्न-ह्न-ह्ण-क्ष्णां च णकाराक्रान्तो हकारो भवति ॥

सूक्ष्मम् → सण्हं । श्न- पण्हो । सिण्हो । ष्ण-विण्हू । कण्हो । उण्हीसं । स्न- जोण्हा । ण्हाओ । पण्हुओ । ह्न- वण्ही । जण्हू । ह्ण- पुव्वण्हो । अवरण्हो । क्ष्ण- सण्हं । तिण्हं ॥ विप्रकर्षे तु कृष्ण-कृत्स्नशब्दयोः कसणो । कसिणो ॥

**[ सूक्ष्मश्नष्णस्नह्नह्णक्ष्णाम् ]** सूक्ष्मं च श्नश्च ष्णश्च स्नश्च ह्नश्च ह्णश्च क्ष्ण् च = सूक्ष्मश्नष्णस्नह्नह्णक्ष्णः, तेषाम् = सूक्ष्मश्नष्णस्नह्नह्णक्ष्णाम् । षष्ठी आम् ।

**[ ण्हः ]** ण्ह प्रथमा सि ।

**[ सण्हं ]** सूक्ष्म । 'अदूतः सूक्ष्मे वा' (१।११८) सू० → स० । अनेन क्ष्मस्य ण्हः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सण्हं** ।

**[ पण्हो ]** प्रश्न । 'सर्वत्र०' (२।७९) र्लुक् । अनेन श्नस्य ण्हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पण्हो** ।

**[ सिण्हो ]** शिश्न । 'श-षोः सः' (१।२६०) शस्य सः । अनेन श्नस्य ण्हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सिण्हो** ।

**[ विण्हू ]** विष्णु । प्रथमा सि । अनेन ष्णस्य ण्हः । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् [१] **विण्हू** ।

**[ कण्हो ]** कृष्ण । प्रथमा सि । 'ऋतोऽत्' (१।१२६) कृ० → क० । अनेन ष्णस्य ण्हः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कण्हो** ।

---

१. सर्वमुद्रितेषु विण्हू उदाहरणमनन्तरं जिण्हू इत्येवमुदाहरणं विद्यते ।

**[ उण्हीसं ]** उष्णीष । अनेन ष्णस्य ण्हः । 'श-षोः सः' (१।२६०) षस्य सः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **उण्हीसं** ।

**[ जोण्हा ]** ज्योत्स्ना । 'अधो म-न-याम्' (२।७८) य्लुक् । अनेन स्ना० → ण्हा० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **जोण्हा** ।

**[ ण्हाओ ]** स्नात । अनेन स्ना० → ण्हा० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **ण्हाओ** ।

**[ पण्हुओ ]** प्रस्नुत । 'सर्वत्र०' (२।७९) र्लुक् । अनेन स्नु० → ण्हु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पण्हुओ** ।

**[ वण्ही ]** वह्नि । प्रथमा सि । अनेन ह्नस्य ण्हः । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **वण्ही** ।

**[ जण्हू ]** जह्नु । अनेन ह्नस्य ण्हः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **जण्हू**।

**[ पुव्वण्हो ]** पूर्वाह्ण । 'ह्रस्वः संयोगे' (१।८४) पू० → पु० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । 'ह्रस्वः संयोगे' (१।८४) व्वा० → व्व० । अनेन ह्णस्य ण्हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पुव्वण्हो** ।

**[ अवरण्हो ]** अपराह्ण । 'पो वः' (१।२३१) पस्य वः । 'ह्रस्वः संयोगे' (१।८४) रा० → र० । अनेन ह्णस्य ण्हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अवरण्हो** ।

**[ सण्हं ]** श्लक्ष्ण । 'सर्वत्र०' (२।७९) ल्लुक् । 'श-षोः सः' (१।२६०) शस्य सः । अनेन क्ष्णस्य ण्हः । प्रथमा सि। 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सण्हं** ।

**[ तिण्हं ]** तीक्ष्ण । 'ह्रस्वः संयोगे' (१।८४) ती० → ति० । अनेन क्ष्णस्य ण्हः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तिण्हं** ।

**[ कसणो ]** कृष्ण । 'ऋतोऽत्' (१।१२६) कृ० → क० । 'कृष्णे वर्णे वा' (२।११०) ष्-णयोर्विश्लेषं कृत्वा णात् प्राग् अः । 'लोकात्' (१।१।३) कषण । 'श-षोः सः' (१।२६०) षस्य सः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कसणो** ।

**[ कसिणो ]** कृत्स्न । 'ऋतोऽत्' (१।१२६) कृ० → क० । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'र्ह-श्री-ह्री-कृत्स्न-क्रिया-दिष्ट्यास्वित्' (२।१०४) स्-नयोर्विश्लेषं कृत्वा नात् प्राग् इः । 'लोकात्' (१।१।३) कसिन । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कसिणो** ॥७५॥

## ह्लो ल्हः ॥ ८।२।७६ ॥

ह्लः स्थाने लकाराक्रान्तो हकारो भवति ॥ कल्हारं । पल्हाओ ॥

**[ ह्लो ल्हः ]** ह्ल्-ह्ला षष्ठी ङस् । ल्ह प्रथमा सि ।

**[ कल्हारं ]** कह्लार । अनेन ह्लस्य ल्हः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कल्हारं** ।

**[ पल्हाओ ]** प्रह्लाद । 'सर्वत्र०' (२।७९) र्लुक् । अनेन ह्लस्य ल्हः । 'क-ग-च-ज-त-द०' (१।१७७) द्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० पल्हाओ ॥७६॥

**क-ग-ट-ड-त-द-प-श-ष-स- ≍ क- )( पामूर्ध्वं लुक् ॥ ८।२।७७ ॥**

एषां संयुक्तवर्णसम्बन्धिनामूर्ध्वं स्थितानां लुग् भवति ॥

क - भुत्तं । सित्थं । ग - दुद्धं । मुद्धं । ट - षट्पदः → छप्पओ । कट्फलम् → कप्फलं । ड - खड्गः → खग्गो । षड्जः → सज्जो । त - उप्पलं । उप्पाओ । द - मद्गुः → मग्गू । मोग्गरो । प - सुत्तो । गुत्तो । श - लण्हं । निच्चलो । चुअइ । ष - गोट्ठी । छट्ठो । निट्ठुरो । स - खलिओ । नेहो । ≍ क - दु ≍ खम् → दुक्खं । )( प- अंत )( पातः → अंतप्पाओ ॥

**[ कगटडतदपशषस ≍ क )( पाम् ]** कश्च गश्च टश्च डश्च तश्च दश्च पश्च शश्च षश्च सश्च ≍ कश्च )( प् च = कगटडतदपशषस ≍ क )( पः, तेषाम् = कगटडतदपशषस ≍ क )( पाम् । षष्ठी आस् ।

**[ ऊर्ध्वं लुक् ]** ऊर्ध्व प्रथमा सि । लुक् प्रथमा सि ।

**[ भुत्तं ]** भुक्त । प्रथमा सि । अनेन क्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **भुत्तं** ।

**[ सित्थं ]** सिक्थ । अनेन क्लुक् । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सित्थं** ।

**[ दुद्धं ]** दुग्ध । अनेन ग्लुक् । 'अनादौ०' (२।८९) धस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वधस्य दः । प्रथमा सि । 'क्लीबे०' (३।२) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दुद्धं** ।

**[ मुद्धं ]** मुग्ध । अनेन ग्लुक् । 'अनादौ०' (२।८९) धस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वधस्य दः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मुद्धं** ।

**[ छप्पओ ]** षट्पद । 'षट्-शमी-शाव-सुधा-सप्तपर्णेष्वादेश्छः' (१।२६५) षस्य छः । अनेन ट्लुक् । 'अनादौ०' (२।८९) पस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **छप्पओ** ।

**[ कप्फलं ]** कट्फल । अनेन ट्लुक् । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कप्फलं** ।

**[ खग्गो ]** खड्ग । अनेन ड्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खग्गो** ।

**[ सज्जो ]** षड्ज । 'श-षोः सः' (१।२६०) ष० → स० । अनेन ड्लुक् । 'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सज्जो** ।

**[ उप्पलं ]** उत्पल । प्रथमा सि । अनेन त्लुक् । 'अनादौ०' (२।८९) पस्य द्वित्वम् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **उप्पलं** ।

**[ उप्पाओ ]** उत्पात । अनेन त्लुक् । 'अनादौ०' (२।८९) पस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **उप्पाओ** ।

**[ मग्गू ]** मद्गु । अनेन द्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **मग्गू** - काकः ।

**[ मोग्गरो ]** मुद्गर । 'ओत् संयोगे' (१।११६) मु० → मो० । अनेन द्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मोग्गरो** ।

**[ सुत्तो ]** सुप्त । अनेन प्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सुत्तो** ।

**[ गुत्तो ]** गुप्त । अनेन प्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **गुत्तो** ।

**[ लण्हं ]** श्लक्ष्ण । अनेन श्लुक् । 'सूक्ष्म-श्न-ष्ण-स्न-ह्न-ह्ण-क्ष्णां ण्हः' (२।७५) क्ष्णस्य ण्हः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **लण्हं** ।

[1]**[ निच्चलो ]** निश्चल । प्रथमा सि । अनेन श्लुक् । 'अनादौ०' (२।८९) चस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निच्चलो** ।

**[ चुअइ ]** श्च्युत् । वर्त्त० तिव् । अनेन श्लुक् । 'अधो म-न-याम्' (२।७८) य्लोपः । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात् (१।१।३) चुतति इति जाते 'त्यादीनामाद्यत्रय०' (३।१३९) ति० → इ० । 'क-ग-च-ज०' (१।१७७) त्लुक् **चुअइ** ।

**[ गोट्ठी ]** गोष्ठी । अनेन ष्लुक् । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **गोट्ठी** ।

**[ छट्ठो ]** षष्ठ । 'षट्-शमी-शाव०' (१।२६५) षस्य छः । अनेन ष्लुक् । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **छट्ठो** ।

**[ निट्ठुरो ]** निष्ठुर । अनेन ष्लुक् । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निट्ठुरो** ।

**[ खलिओ ]** स्खलित । प्रथमा सि । अनेन स्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खलिओ** ।

**[ नेहो ]** स्नेह । प्रथमा सि । अनेन स्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नेहो** ।

**[ दुक्खं ]** दु ᳵ ख । प्रथमा सि । अनेन जिह्वामूलीयलुक् । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दुक्खं** ।

**[ अंतप्पाओ ]** अंतᳶपात । प्रथमा सि । अनेन मूर्धनीयलुक् । 'अनादौ०' (२।८९) पस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अंतप्पाओ** ॥७७॥

## अधो म-न-याम् ॥ ८।२।७८ ॥

म-न-यां संयुक्तस्याधो वर्तमानानां लुग् भवति ॥

---

१. सर्वमुद्रितेषु णिच्चलो ।

म-जुग्गं । रस्सी । सरो । सेरं । न-नग्गो । लग्गो । य-सामा । कुड्डं । वाहो ॥

**[ अधो मनयाम् ]** अधस् सप्तमी ङि । 'अव्ययस्य' (३।२।७) ङिलुप् । मश्च नश्च य् च = मनयः, तेषाम् = मनयाम् । षष्ठी आम् ।

**[ जुग्गं ]** युग्म । 'आदेर्यो जः' (१।२४५) यस्य जः । अनेन म्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जुग्गं** ।

**[ रस्सी ]** रश्मि । अनेन म्लोपः । 'श-षोः सः' (१।२६०) शस्य सः । 'अनादौ०' (२।८९) सस्य द्वित्वम् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **रस्सी** ।

**[ सरो ]** स्मर । प्रथमा सि । अनेन म्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सरो** ।

**[ सेरं ]** स्मेर । प्रथमा सि । अनेन म्लुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सेरं** ।

**[ नग्गो ]** नग्न । प्रथमा सि । अनेन न्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नग्गो** ।

**[ लग्गो ]** लग्न । प्रथमा सि । अनेन न्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **लग्गो** ।

[1]**[ मग्गो ]** मग्न । प्रथमा सि । अनेन न्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मग्गो** ।

[2]**[ भग्गो ]** भग्न । प्रथमा सि । अनेन न्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भग्गो** ।

**[ सामा ]** श्यामा । अनेन य्लुक् । 'श-षोः सः' (१।२६०) शा० → सा० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सामा** ।

**[ कुड्डं ]** कुड्य । अनेन य्लुक् । 'अनादौ०' (२।८९) डस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कुड्डं** ।

**[ वाहो ]** व्याध । अनेन य्लुक् । 'ख-घ-थ-ध-भाम्' (१।१८७) धस्य हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वाहो** ॥७८॥

## सर्वत्र ल-ब-रामवन्द्रे ॥ ८।२।७९ ॥

वन्द्रशब्दादन्यत्र लबरां सर्वत्र संयुक्तस्योर्ध्वमधश्च स्थितानां लुग् भवति ॥

ऊर्ध्वम्-ल-उल्का → उक्का-। वल्कलम् → वक्कलं । ब-शब्दः → सद्दो । अब्दः → अद्दो । लुब्धकः → लोद्धओ । र-अर्कः → अक्को । वर्गः → वग्गो । अधः - श्लक्ष्णम् → सण्हं । विक्लवः → विक्कवो । पक्वम् → पक्कं - पिक्कं । ध्वस्तः → धत्थो । चक्रम् → चक्कं । ग्रहः → गहो । रात्रिः → रत्ती ॥

अत्र द्वे इत्यादिसंयुक्तानामुभयप्राप्तौ यथादर्शनं लोपः ॥ क्वचिदूर्ध्वम् - उद्विग्नः → उव्विग्गो । द्विगुणः → विउणो । द्वितीयः → बीओ । कल्मषम् → कम्मसं । सर्वम् → सव्वं । शुल्बम् → सुब्बं ॥

१. A. मग्गो उदाहरणम् । २. A. भग्गो उदाहरणम् ।

क्वचित्त्वधः - काव्यम् → कव्वं । कुल्या → कुल्ला । माल्यम् → मल्लं । द्विपः → दिओ । द्विजातिः → दुआई ॥

क्वचित् पर्यायेण - द्वारम् → बारं - दारं । उद्विग्नः → उव्विग्गो उव्विण्णो ॥

अवन्द्र इति किम् ? वन्द्रं ॥ संस्कृतसमोऽयं प्राकृतशब्दः । अत्रोत्तरेण विकल्पोऽपि न भवति, निषेधसामर्थ्यात् ॥

**[ सर्वत्र लबरामवन्द्रे ]** सर्वत्र सप्तमी ङि । लश्च बश्च र् च = लबरः, तेषाम् = लबराम् । षष्ठी आम् । न वन्द्रमवन्द्रम्, तस्मिन् = अवन्द्रे । सप्तमी ङि ।

**[ उक्का ]** उल्का । अनेन ल्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **उक्का** ।

**[ वक्कलं ]** वल्कल । प्रथमा सि । अनेन ल्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वक्कलं** ।

**[ सद्दो ]** शब्द । 'श-षोः सः' (१।२६०) शस्य सः । अनेन ब्लुक् । 'अनादौ०' (२।८९) दस्य द्वित्वम् । प्रथमा सि। 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सद्दो** ।

**[ अद्दो ]** अब्द । प्रथमा सि । अनेन ब्लुक् । 'अनादौ०' (२।८९) दस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अद्दो** ।

**[ लोद्धओ ]** लुब्धक । 'ओत् संयोगे' (१।११६) लु० → लो० । अनेन ब्लुक् । 'अनादौ०' (२।८९) धस्य द्वित्वम्। 'द्वितीय-तुर्ययो०' (२।९०) पूर्वधस्य दः । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **लोद्धओ** ।

**[ अक्को ]** अर्क । अनेन र्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अक्को** ।

**[ वग्गो ]** वर्ग । अनेन र्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वग्गो** ।

[१]**[ कक्को ]** कर्क । अनेन र्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कक्को** ।

**[ सण्हं ]** श्लक्ष्ण । प्रथमा सि । अनेन ल्लुक् । 'श-षोः सः' (१।२६०) शस्य सः । 'सूक्ष्म-श्न-ष्ण-स्न-ह्न-ह्ण-क्ष्णां ण्हः' (२।७५) क्ष्णस्य ण्हः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सण्हं**।

**[ विक्कवो ]** विक्लव । अनेन ल्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विक्कवो** ।

**[ पिक्कं पक्कं ]** पक्व । 'पक्वा-ऽङ्गार-ललाटे वा' (१।४७) प० → पि० । अनेन व्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पिक्कं पक्कं** ।

**[ धत्थो ]** ध्वस्त । अनेन व्लुक् । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्तस्य थः । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **धत्थो**।

---

१. A. कक्को उदाहरणम् ।

**[ चक्कं ]** चक्र । प्रथमा सि । अनेन र्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **चक्कं** ।

[1]**[ वक्कं ]** वक्र । प्रथमा सि । अनेन र्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः वक्कं । पक्षे-'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वक्को** ।

**[ गहो ]** ग्रह । प्रथमा सि । अनेन र्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **गहो** ।

**[ रत्ती ]** रात्रि । 'ह्रस्वः संयोगे' (१।८४) रा० → र० । अनेन र्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **रत्ती** ।

द्व इत्यादि संयुक्तानामक्षराणां सूत्रद्वयप्राप्तौ यादृशं रूपे दृश्यते तदनुसारेण सूत्रं प्राप्यते ॥

क्वचित् ऊर्ध्वाक्षरस्यैव लोपः, नाधोवर्तिनः । यथा-

**[ उव्विग्गो ]** उद्विग्न । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । 'अधो म-न-याम्' (२।७८) न्लोपः । 'अनादौ०' (२।८९) गस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **उव्विग्गो** ।

**[ विउणो ]** द्विगुण । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'क-ग-च-ज०' (१।१७७) ग्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विउणो** ।

**[ वीओ ]** द्वितीय । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'स्वरस्योद्वृत्ते' (१।८) इति क्वचित् सन्धिरेव, ततः 'समानानां०' (१।२।१) इति दीर्घः । 'क-ग-च-ज-त-द-प-य-वां०' (१।१७७) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **वीओ** ।

**[ कम्मसं ]** कल्मष । 'सर्वत्र०' (२।७९) ल्लुक् । 'अनादौ०' (२।८९) मस्य द्वित्वम् । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कम्मसं** ।

**[ सव्वं ]** सर्व । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।७९) वस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सव्वं** ।

**[ सुब्बं ]** शुल्ब । 'सर्वत्र०' (२।७९) ल्लुक् । 'अनादौ०' (२।७९) बस्य द्वित्वम् । 'श-षोः सः' (१।२६०) शस्य सः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुब्बं** ।

क्वचिदधोवर्तिन एव लुग् भवति । यथा –

**[ कव्वं ]** काव्य । 'ह्रस्वः संयोगे' (१।८४) का० → क० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कव्वं** ।

**[ कुल्ला ]** कुल्या । प्रथमा सि । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) लस्य द्वित्वम् । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **कुल्ला** ।

**[ मल्लं ]** माल्य । 'ह्रस्वः संयोगे' (१।८४) मा० → म० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) लस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मल्लं** ।

१. A. वक्कं उदाहरणम् ।

**[ दिओ ]** द्विप । प्रथमा सि । 'सर्वत्र०' (२।७९) व्लुक् । 'क-ग-च-ज०' (१।१७७) प्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दिओ** ।

**[ दुआई ]** द्विजाति । 'सर्वत्र०' (२।७९) व्लुक् । 'द्विन्योरुत्' (१।९४) दि० → दु० । 'क-ग-च-ज०' (१।१७७) ज-तयोर्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **दुआई** ।

क्वचिदनुक्रमेण लुक् - ऊर्ध्ववर्त्तिनोऽधोवर्त्तिनश्च । यथा -

**[ वारं दारं ]** द्वार । 'क-ग-ट-ड०' (२।७७) द्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वारं** । द्वार । 'सर्वत्र०' (२।७९) व्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दारं** ।

**[ उव्विग्गो उव्विण्णो ]** उद्विग्न । प्रथमा सि । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **उव्विग्गो** ।

उद्विग्न । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । 'क-ग-ट-ड०' (२।७७) ग्लुक् । 'नो णः' (१।२२८) नस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **उव्विण्णो** ।

**[ वन्द्रं ]** वन्द्र । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वन्द्रं**-समूहः ॥७९॥

## द्रे रो नवा ॥ ८।२।८० ॥

[1]द्रशब्दस्य रेफस्य वा लुग् भवति ॥

चन्दो चन्द्रो । रुद्दो रुद्रो । भद्दं भद्रं । समुद्दो समुद्रो ॥ ह्रदशब्दस्य स्थितिपरिवृत्तौ द्रह इति रुपम्, तत्र दहो द्रहो ॥ केचिद् रलोपं नेच्छन्ति ॥ द्रहशब्दमपि कश्चित् संस्कृतं मन्यते ॥ वोद्रहादयस्तु तरुणपुरुषादिवाचका नित्यं रेफसंयुक्ता देश्या एव ॥ सिक्खन्तु[2] वोद्रहीओ । वोद्रह[3]-द्रहम्मि पडिआ ॥

**[ द्रे रो नवा ]** द्र सप्तमी ङि । र् षष्ठी ङस् । नवा प्रथमा सि ।

**[ चन्दो चन्द्रो ]** चन्द्र । अनेन वा र्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **चन्दो** । पक्षे-चन्द्र । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **चन्द्रो** ।

**[ रुद्दो रुद्रो ]** रुद्र । प्रथमा सि । अनेन वा र्लुक् । 'अनादौ०' (२।८९) दस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० रुद्दो । पक्षे-**रुद्र** । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **रुद्रो** ।

---

१. H. L. M. द्रशब्दे । E. द्रे शब्दे ।

२. सिक्करिअमणिअमुहवेविआइँ धुअहत्थसिञ्जि(ञ्जि)अव्वाइं । **सिक्खन्तु वोडहीओ** कुसुम्भ तुम्ह प्पसाएण ॥ [गा० स० - ४।९२] सीत्कारमणितमुखवेपितानि धूतहस्तशिञ्जितव्यानि । शिक्षन्तां कुमार्यः कुसुम्भ युष्मत्प्रसादेन ॥

३. ते चिय धण्णा ते चिय सप्पुरिसा ते जियंतु जियलोए । **वोद्दह-दहम्मि पडिया** तरंति जे चेव लीलाए ॥ [प० प्र० - २।११७] ते चैव धन्याः ते चैव सत्पुरुषाः ते जीवन्तु जीवलोके । यौवनद्रहे पतिताः तरन्ति ये चैव लीलया ॥

**[ भद्दं भद्रं ]** भद्र । प्रथमा सि । अनेन वा र्लुक् । 'अनादौ०' (२।८९) दस्य द्वित्वम् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **भद्दं** । पक्षे-भद्र । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **भद्रं** ।

**[ समुद्दो समुद्रो ]** समुद्र । प्रथमा सि । अनेन वा र्लुक् । 'अनादौ०' (२।८९) दस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **समुद्दो** । पक्षे-समुद्र । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **समुद्रो** ।

**[ दहो द्रहो ]** द्रह । प्रथमा सि । अनेन वा र्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० दहो । पक्षे-द्रह । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **द्रहो** ।

**[ सिक्खन्तु वोद्रहीओ ]** 'शिक्षि विद्योपादाने' (८७९) शिक्ष् । पञ्चमी अन्तु (अन्ताम्) । 'बहुषु न्तु-ह-मो' (३।१७६) अन्तु(अन्ताम्०) → न्तु० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) शिक्षन्तु इति स्थिते 'श-षोः सः' (१।२६०) शस्य सः । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्षस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः **सिक्खन्तु** ।

वोद्रही । प्रथमा जस् । 'स्त्रियामुदोतौ वा' (३।२७) जस्० → ओ० वोद्रहीओ - तरुण्यः स्त्रियः ।

**[ वोद्रह-द्रहम्मि पडिआ ]** वोद्रह-द्रह । सप्तमी ङि। 'डे-म्मि ङेः' (३।११) ङि० → म्मि० । तारुण्यद्रहे इत्यर्थः ।

पतित । 'सद-पतोर्डः' (४।२१९) तस्य डः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लोपः । 'जस्-शस्०' (३।१२) दीर्घः - त० → ता० **पडिआ** ॥८०॥

## धात्र्याम् ॥ ८।२।८१ ॥

धात्रीशब्दे रस्य लुग् वा भवति ॥ धत्ती ॥ ह्रस्वात् प्रागेव रलोपे - धाई । पक्षे-धारी ॥

**[ धात्र्याम् ]** धात्री सप्तमी ङि ।

**[ धत्ती ]** धात्री । अनेन वा र्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक्। 'ह्रस्वः संयोगे' (१।८४) धा० → ध० **धत्ती** ।

**[ धाई धारी ]** धात्री । ह्रस्वात् पूर्वमेव अनेन र्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् धाई ।

पक्षे-धात्री । 'क-ग-ट-ड०' (२।७७) त्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **धारी** ॥८१॥

## तीक्ष्णे णः ॥ ८।२।८२ ॥

तीक्ष्णशब्दे णस्य लुग् वा भवति ॥ तिक्खं तिण्हं ॥

**[ तीक्ष्णे णः ]** तीक्ष्ण सप्तमी ङि । ण् षष्ठी ङस् ।

**[ तिक्खं तिण्हं ]** तीक्ष्ण । 'ह्रस्वः संयोगे' (१।८४) ती० → ति० । अनेन वा णस्य लुक् । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्षस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तिक्खं** ।

पक्षे-तीक्ष्ण । 'ह्रस्वः संयोगे' (१।८४) ती० → ति० । 'सूक्ष्म-श्न-ष्ण०' (२।७५) क्ष्णस्य ण्हः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तिण्हं** ॥८२॥

## ज्ञो ञः ॥ ८।२।८३ ॥

ज्ञः सम्बन्धिनो ञस्य लुग् वा भवति ॥

जाणं णाणं । सव्वज्जो सव्वण्णू । अप्पज्जो अप्पण्णू । दइवज्जो दइवण्णू । इङ्गिअज्जो इङ्गिअण्णू । मणोज्जं मणोण्णं । अहिज्जो अहिण्णू । पज्जा पण्णा । अज्जा आणा । संज्जा सण्णा ॥ क्वचिन्न भवति - विण्णाणं ॥

**[ ज्ञो ञः ]** ज्ञ् षष्ठी ङस् । ञ् षष्ठी ङस् ।

**[ जाणं णाणं ]** ज्ञान । अनेन वा ञ्लुक् । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जाणं** ।

पक्षे-ज्ञान । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **णाणं** ।

**[ सव्वज्जो सव्वण्णू ]** सर्वज्ञ । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । अनेन वा ञस्य लुक् । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सव्वज्जो** ।

पक्षे-सर्वज्ञ । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । 'ज्ञो णत्वेऽभिज्ञादौ' (१।५६) ण० → णू० । 'अन्त्यव्य०' (१।११) स्लुक् **सव्वण्णू** ।

**[ अप्पज्जो अप्पण्णू ]** आत्मज्ञ । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः पो वा' (२।५१) त्मस्य पः । 'अनादौ०' (२।८९) पस्य द्वित्वम् । अनेन वा ञस्य लुक् । 'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अप्पज्जो** ।

पक्षे-आत्मज्ञ । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः पो वा' (२।५१) त्मस्य पः । 'अनादौ०' (२।८९) पस्य द्वित्वम् । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । 'ज्ञो णत्वेऽभिज्ञादौ' (१।५६) ण० → णू० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **अप्पण्णू** ।

**[ दइवज्जो दइवण्णू ]** दैवज्ञ । प्रथमा सि । 'एच्च दैवे' (१।१५३) दै० → दइ० । अनेन वा ञस्य लुक् । 'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दइवज्जो** ।

पक्षे-दैवज्ञ । 'एच्च दैवे' (१।१५३) दै० → दइ० । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । 'ज्ञो णत्वेऽभिज्ञादौ' (१।५६) ण० → णू० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **दइवण्णू** ।

**[ इङ्गिअज्जो इङ्गिअण्णू ]** इङ्गितज्ञ । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन वा ञस्य लुक् । 'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **इङ्गिअज्जो** ।

पक्षे-इङ्गितज्ञ । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । 'ज्ञो णत्वेऽभिज्ञादौ' (१।५६) ण० → णू० । 'अन्त्यव्य०' (१।११) स्लुक् **इङ्गिअण्णू** ।

**[ मणोज्जं मणोण्णं ]** मनोज्ञ । 'नो णः' (१।२२८) नस्य णः । अनेन वा ञस्य लुक् । 'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मणोज्जं** ।

पक्षे-मनोज्ञ । 'नो णः' (१।२२८) नस्य णः । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मणोण्णं** ।

**[ अहिज्जो अहिण्णू ]** अभिज्ञ । प्रथमा सि । 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः । अनेन वा ञस्य लुक् । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अहिज्जो** ।

पक्षे-अभिज्ञ । प्रथमा सि । 'ख-घ-थ०' (१।१८७) भस्य हः । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'अनादौ०' (२।८७) णस्य द्वित्वम् । 'ज्ञो णत्वेऽभिज्ञादौ' (१।५६) ण० → णू० । 'अन्त्यव्य०' (१।११) स्लुक् **अहिण्णू** ।

**[ पज्जा पण्णा ]** प्रज्ञा । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । अनेन वा ञस्य लुक् । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **पज्जा** ।

पक्षे-प्रज्ञा । 'सर्वत्र०' (२।७९) र्लुक् । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **पण्णा** ।

[1] **[ अज्जा अण्णा आणा ]** आज्ञा । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । अनेन वा ञस्य लुक् । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'अन्त्यव्य०' (१।११) स्लुक् **अज्जा** ।

पक्षे-आज्ञा । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'अन्त्यव्य०' (१।११) स्लुक् । 'अनादौ०' (२।८९) णस्य द्वित्वम् **अण्णा** ।

'ह्रस्वः-द्वित्वयोरभावे **आणा** इत्यपि ।

**[ संज्जा सण्णा ]** संज्ञा । अनेन वा ञस्य लुक् । 'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **संज्जा** ।

पक्षे-संज्ञा । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णत्वे सति 'मांसाऽऽदेर्वा (१।२९) अनुस्वारलोपः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सण्णा** ।

**[ विण्णाणं ]** विज्ञान । प्रथमा सि । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । 'नो णः' (१।२२८) नस्य णः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **विण्णाणं** ॥८३॥

### मध्याह्ने हः ॥ ८।२।८४ ॥

मध्याह्ने हस्य लुग् वा भवति ॥ मज्झन्नो मज्झण्हो ॥

**[ मध्याह्ने हः ]** मध्याह्न सप्तमी ङि । ह प्रथमा सि ।

**[ मज्झन्नो मज्झण्हो ]** मध्याह्न । 'ह्रस्वः संयोगे' (१।८४) ध्या० → ध्य० । 'साध्वस-ध्य-ह्यां झः' (२।२६) ध्यस्य झः । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वझस्य जः । अनेन वा हस्य लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मज्झन्नो** ।

पक्षे-मध्याह्न । 'ह्रस्वः संयोगे' (१।८४) ध्या० → ध्य० । 'साध्वस-ध्य०' (२।२६) ध्यस्य झः । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वझस्य जः । 'सूक्ष्म-श्न-ष्ण-स्न०' (२।७५) ह्नस्य ण्हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मज्झण्हो** ॥८४॥

### दशार्हे ॥ ८।२।८५ ॥

पृथग्योगाद्वेति निवृत्तम् ॥ दशार्हे हस्य लुग् भवति ॥ दसारो ॥

---

१. A. अज्जा अण्णा आणा इत्युदाहरणानि ।

**[ दशार्हे ]** दशार्ह सप्तमी ङि ।

**[ दसारो ]** दशार्ह । 'श-षोः सः' (१।२६०) शस्य सः । अनेन हलुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दसारो** ॥८५॥

## आदेः श्मश्रु-श्मशाने ॥ ८।२।८६ ॥

अनयोरादेर्लुग् भवति ॥

मासू मंसू मस्सू । मसाणं ॥ आर्षे श्मशानशब्दस्य सीआणं सुसाणमित्यपि भवति ॥

**[ आदेः श्मश्रुश्मशाने ]** आदि षष्ठी ङस् । श्मश्रु च श्मशानं च = श्मश्रुश्मशानम्, तस्मिन् = श्मश्रुश्मशाने । सप्तमी ङि ।

**[ मासू मंसू मस्सू ]** श्मश्रु । अनेन श्लुक् । 'सर्वत्र०' (२।७९) र्लुक् । 'लुप्तय-र-व-श-ष-सां श-ष-सां दीर्घः' (१।४३) म० → मा० । 'श-षोः सः' (१।२६०) शस्य सः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **मासू** ।

द्वितीये-श्मश्रु । अनेन श्लुक् । 'वक्रादावन्तः' (१।२६) अनुस्वारः । 'सर्वत्र०' (२।७९) र्लुक् । 'लुप्तय-र-व-श-ष-सां०' (१।४३) मं० → मां० । 'मांसादिष्वनुस्वारे' (१।७०) ह्रस्वः मां० → मं० । 'श-षोः सः' (१।२६०) शस्य सः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **मंसू** ।

तृतीये-श्मश्रु । अनेन श्लुक् । 'सर्वत्र०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शस्य सः । 'अनादौ०' (२।८९) सस्य द्वित्वम् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **मस्सू** ।

**[ मसाणं ]** श्मशान । अनेन श्लुक् । 'श-षोः सः' (१।२६०) शस्य सः । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मसाणं** ॥८६॥

## श्चो हरिश्चन्द्रे ॥ ८।२।८७ ॥

हरिश्चन्द्रशब्दे श्च इत्यस्य लुग् भवति ॥ हरिअन्दो ॥

**[ श्चो हरिश्चन्द्रे ]** श्च् षष्ठी ङस् । हरिश्चन्द्र सप्तमी ङि ।

**[ हरिअन्दो ]** हरिश्चन्द्र । प्रथमा सि । अनेन श्चस्य लुक् । 'द्रे रो नवा' (२।८०) र्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **हरिअन्दो** ॥८७॥

## रात्रौ वा ॥ ८।२।८८ ॥

रात्रिशब्दे संयुक्तस्य लुग् वा भवति ॥ राई रत्ती ॥

**[ रात्रौ वा ]** रात्रि सप्तमी ङि । वा प्रथमा सि ।

**[ राई रत्ती ]** रात्रि । प्रथमा सि । अनेन वा त्रस्य लुक् । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **राई** ॥

पक्षे-रात्रि । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) रा० → र० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **रत्ती** ॥८८॥

## अनादौ शेषाऽऽदेशयोर्द्वित्वम् ॥ ८।२।८९ ॥

पदस्य अनादौ वर्तमानस्य शेषस्य आदेशस्य च द्वित्वं भवति ॥

शेष - कप्पतरू । भुत्तं । दुद्धं । नग्गो । उक्का । अक्को । मुक्खो ॥

आदेश - डक्को । जक्खो । रग्गो । किच्ची ॥ रुप्पी ॥ क्वचिन्न भवति-कसिणो ॥ अनादाविति किम् ? खलिअं । थेरो । खम्भो ॥ द्वयोस्तु द्वित्वमस्त्येवेति न भवति ॥ विञ्चुओ । भिण्डिवालो ॥

**[ अनादौ शेषाऽऽदेशयोर्द्वित्वम् ]** अनादि सप्तमी ङि । शेषश्च आदेशश्च = शेषाऽऽदेशौ, तयोः = शेषाऽऽदेशयोः । षष्ठी ओस् । द्वित्व प्रथमा सि ।

**[ कप्पतरू ]** कल्पतरु । प्रथमा सि । 'सर्वत्र०' (२।७९) ल्लुक् । अनेन पस्य द्वित्वम् । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **कप्पतरू** ।

**[ भुत्तं ]** भुक्त । 'क-ग-ट-ड०' (२।७७) क्लुक् । अनेन तस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **भुत्तं** ।

**[ दुद्धं ]** दुग्ध । प्रथमा सि । 'क-ग-ट-ड०' (२।७७) ग्लुक् । अनेन धस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वधस्य दः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दुद्धं** ।

**[ नग्गो ]** नग्न । प्रथमा सि । 'अधो म-न-याम्' (२।७८) न्लुक् । अनेन गस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नग्गो** ।

**[ उक्का ]** उल्का । प्रथमा सि । 'सर्वत्र०' (२।७९) ल्लुक् । अनेन कस्य द्वित्वम् । 'अन्त्यव्य०' (१।११) स्लुक् **उक्का** ।

**[ अक्को ]** अर्क । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । अनेन कस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अक्को** ।

**[ मुक्खो ]** मूर्ख । 'ह्रस्वः संयोगे' (१।८४) मू० → मु० । 'सर्वत्र०' (२।७९) र्लुक् । अनेन खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मुक्खो** ।

**[ डक्को ]** दष्ट । प्रथमा सि । 'दशन-दष्ट-दग्ध-दोला-दण्ड-दर-दाह-दम्भ-दर्भ-कदन-दोहदे दो वा डः' (१।२१७) दस्य डः । 'शक्त-मुक्त-दष्ट-रुग्ण-मृदुत्वे को वा' (२।२) ष्टस्य कः । अनेन कस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **डक्को** ।

**[ जक्खो ]** यक्ष । प्रथमा सि । 'आदेर्यो जः' (१।२४५) यस्य जः । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्षस्य खः । अनेन खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जक्खो** ।

**[ रग्गो ]** रक्त । प्रथमा सि । 'रक्ते गो वा' (२।१०) क्तस्य गः । अनेन गस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **रग्गो** ।

**[ किच्ची ]** कृत्ति । 'इत् कृपादौ' (१।१२८) कृ० → कि० । 'कृत्ति-चत्वरे चः' (२।१२) त्ति० → चि० । अनेन चस्य द्वित्वम् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **किच्ची** ।

**[ रुप्पी ]** रुक्मिन् । 'ड्म-क्मोः' (२।५२) क्मस्य पः । अनेन पस्य द्वित्वम् । प्रथमा सि । 'अन्त्यव्य०' (१।११) न्लुक् । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **रुप्पी** ।

**[ कसिणो ]** कृत्स्न । 'ऋतोऽत्' (१।१२६) कृ० → क० । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'र्ह-श्री-ह्री-कृत्स्न-क्रिया-दिष्ट्यास्वित्' (२।१०४) स्-नयोर्विश्लेषं कृत्वा नात् प्राग् इः । 'लोकात्' (१।१।३) कसिन । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कसिणो** ।

**[ खलिअं ]** स्खलित । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **खलिअं** ।

**[ थेरो ]** स्थविर । 'स्थविर-विचकिला-ऽयस्कारे' (१।१६६) स्थवि० → थे० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **थेरो** ।

**[ खम्भो ]** स्तम्भ । प्रथमा सि । 'स्तम्भे स्तो वा' (२।८) स्तस्य खः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खम्भो** ।

**[ विञ्चुओ ]** वृश्चिक । प्रथमा सि । 'इत् कृपादौ' (१।१२८) वृ० → वि० । 'वृश्चिके श्चेर्ञ्चुर्वा' (२।१६) श्चि० → ञ्चु० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **विञ्चुओ** ।

**[ भिण्डिवालो ]** भिन्दिपाल । प्रथमा सि । 'कन्दरिका-भिन्दिपाले ण्डः' (२।३८) न्दि० → ण्डि० । 'पो वः' (१।२३१) पस्य वः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भिण्डिवालो** ॥८९॥

## द्वितीय-तुर्ययोरुपरि पूर्वः ॥ ८।२।९० ॥

द्वितीय - तुर्ययोर्द्वित्वप्रसङ्गे उपरि पूर्वौ भवतः ॥ द्वितीयस्योपरि प्रथमश्चतुर्थस्योपरि तृतीय इत्यर्थः ॥

शेष - वक्खाणं । वग्घो । मुच्छा । निब्भरो । कट्ठं । तित्थं । निद्धणो । गुप्फं । निज्झरो ॥

आदेश-जक्खो । कस्यापि वर्णस्य घ इति आदेशो नास्ति ततस्तदुहादरणं नोक्तम् ॥ अच्छी । मज्झं । पट्ठी । वुड्ढो । हत्थो । आलिद्धो । पुप्फं । भिब्भलो । 'तैलादौ' (२।९८) द्वित्वे ओक्खलं । 'सेवादौ वा' (२।९९) नक्खा नहा । 'समासे वा' (२।९७) कइ-द्धओ कइ-धओ ॥ द्वित्व इत्येव - खाओ ॥

**[ द्वितीयतुर्ययोरुपरि पूर्वः ]** द्वितीयश्च तुर्यश्च = द्वितीयतुर्यौ, तयोः = द्वितीयतुर्ययोः । षष्ठी ओस् । उपरि सप्तमी ङि। पूर्व प्रथमा सि ।

**[ वक्खाणं ]** व्याख्यान । 'अधो म-न-याम्' (२।७८) द्वयोर्यलोपः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । अनेन पूर्वखस्य कः । 'ह्रस्वः संयोगे' (१।८४) वा० → व० । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वक्खाणं** ।

**[ वग्घो ]** व्याघ्र । 'अधो म-न-याम्' (२।७८) य्लोपः । 'ह्रस्वः संयोगे' (१।८४) वा० → व० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) घस्य द्वित्वम् । अनेन पूर्वघस्य गः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वग्घो** ।

**[ मुच्छा ]** मूर्छा । 'ह्रस्वः संयोगे' (१।८४) मू० → मु० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) छस्य द्वित्वम् । अनेन पूर्वछस्य चः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **मुच्छा** ।

**[ निब्भरो ]** निर्भर । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) भस्य द्वित्वम् । अनेन पूर्वभस्य **बः** । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निब्भरो** ।

**[ कट्ठं ]** काष्ट । 'ह्रस्वः संयोगे' (१।८४) का० → क० । 'ष्टस्याऽनुष्ट्रेष्टा०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । अनेन पूर्वठस्य टः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कट्ठं**।

**[ तित्थं ]** तीर्थ । 'ह्रस्वः संयोगे' (१।८४) ती० → ति० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) थस्य द्वित्वम् । अनेन पूर्वथस्य तः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तित्थं** ।

**[ निद्धणो ]** निर्धन । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) धस्य द्वित्वम् । अनेन पूर्वधस्य दः । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निद्धणो** ।

**[ गुप्फं ]** गुल्फ । 'सर्वत्र०' (२।७९) ल्लुक् । 'अनादौ०' (२।८९) फस्य द्वित्वम् । अनेन पूर्वफस्य पः । प्रथमा सि। 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **गुप्फं** ।

**[ निज्झरो ]** निर्झर । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) झस्य द्वित्वम् । अनेन पूर्वझस्य जः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निज्झरो** ।

**[ जक्खो ]** यक्ष । 'आदेर्यो जः' (१।२४५) यस्य जः । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्षस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । अनेन पूर्वखस्य कः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जक्खो** ।

कस्यापि वर्णस्य घ इत्यादेशो नास्ति ततस्तदुदाहरणं नोक्तम् ॥

**[ अच्छी ]** अक्षि । 'छोऽक्ष्यादौ' (२।१७) क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । अनेन पूर्वछस्य चः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **अच्छी** ।

**[ मज्झं ]** मध्य । 'साध्वस-ध्य-ह्यां झः' (२।२६) ध्यस्य झः । 'अनादौ०' (२।८९) झस्य द्वित्वम् । अनेन पूर्वझस्य जः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मज्झं** ।

**[ पट्ठी ]** [1]स्पृष्टि । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'ऋतोऽत्' (१।१२६) पृ० → प० । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । अनेन पूर्वठस्य टः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **पट्ठी** ।

**[ वुड्ढो ]** वृद्ध । 'उदृत्वादौ' (१।१३१) वृ० → वु० । 'दग्ध-विदग्ध-वृद्धि-वृद्धे ढः' (२।४०) **द्धस्य ढः** । 'अनादौ०' (२।८९) ढस्य द्वित्वम् । अनेन पूर्वढस्य डः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वुड्ढो** ।

**[ हत्थो ]** हस्त । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्तस्य थः । 'अनादौ०' (२।८९) थस्य द्वित्वम् । अनेन पूर्वथस्य तः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **हत्थो** ।

**[ आलिद्धो ]** आश्लिष्ट । 'आश्लिष्टे ल-धौ' (२।४९) श्लिष्टस्य लि-ध० । 'अनादौ०' (२।८९) धस्य द्वित्वम् । अनेन पूर्वधस्य दः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आलिद्धो** ।

---

१. G. पाठां० - पृष्टि ग० । I. J. पृष्ठि ।

**[ पुप्फं ]** पुष्प । 'ष्प-स्पयोः फः' (२।५३) ष्पस्य फः । 'अनादौ०' (२।८९) फस्य द्वित्वम् । अनेन पूर्वफस्य पः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पुप्फं** ।

**[ भिब्भलो ]** विह्वल । 'वा विह्वले वौ वश्च' (२।५८) वि० → भि० - ह्वस्य च भः । 'अनादौ०' (२।८९) भस्य द्वित्वम् । अनेन भस्य बः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भिब्भलो** ।

**[ ओक्खलं ]** उदू(लू)खल । 'नवा मयूख-लवण-चतुर्गुण-चतुर्थ-चतुर्दश-चतुर्वार-सुकुमार-कुतूहलोदूखलोलूखले' (१।१७१) दू(लू)वर्णेन सह उ० → ओ० । 'तैलादौ' (२।९८) ('सेवादौ वा' (२।९९)) खस्य द्वित्वम् । अनेन पूर्वखस्य कः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **ओक्खलं** ।

**[ नक्खा नहा ]** नख । 'सेवादौ वा' (२।९९) खस्य द्वित्वम् । अनेन पूर्वखस्य कः । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः' (३।१२) ख० → खा० **नक्खा** ।

पक्षे-नख । प्रथमा जस् । 'ख-घ-थ-ध-भाम्' (१।१८७) खस्य हः । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) ह० → हा० **नहा** ।

**[ कइद्धओ कइधओ ]** कपि-ध्वज । कपिर्ध्वजे यस्य सः = कपिध्वजः । 'क-ग-च-ज-त-द-प०' (१।१७७) प्लुक् । 'सर्वत्र०' (२।७९) व्लुक् । 'समासे वा' (२।९७) धस्य द्वित्वम् । अनेन पूर्वधस्य दः । 'क-ग-च-ज-त-द०' (१।१७७) ज्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कइद्धओ** ।

पक्षे-कपि-ध्वज । 'क-ग-च-ज०' (१।१७७) प्लुक् । 'सर्वत्र०' (२।७९) व्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कइधओ** ।

**[ खाओ ]** [1]ख्यात । 'अधो म-न-याम्' (२।७८) य्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **खाओ** ॥९०॥

## दीर्घे वा ॥ ८।२।९१ ॥

दीर्घशब्दे शेषस्य घस्य उपरि पूर्वो वा भवति ॥ दिग्घो दीहो ॥

**[ दीर्घे वा ]** दीर्घ सप्तमी ङि । वा प्रथमा सि ।

**[ दिग्घो दीहो ]** दीर्घ । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) घस्य द्वित्वम् । अनेन पूर्वघस्य गः । 'ह्रस्वः संयोगे' (१।८४) दी० → दि० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दिग्घो** । पक्षे-दीर्घ । 'सर्वत्र०' (२।७९) र्लुक् । 'ख-घ-थ०' (१।१८७) घस्य हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दीहो** ॥९१॥

## न दीर्घानुस्वारात् ॥ ८।२।९२ ॥

दीर्घानुस्वाराभ्यां लाक्षणिकाभ्यामलाक्षणिकाभ्यां च परयोः शेषाऽऽदेशयोर्द्वित्वं न भवति ॥

छूढो । नीसासो । फासो ॥ अलाक्षणिक - पार्श्वम् → पासं । शीर्षम् → सीसं । ईश्वरः → ईसरो । द्वेष्यः → वेसो । लास्यम् → लासं । आस्यम् → आसं । प्रेष्यः → पेसो । अवमाल्यम् → ओमालं । आज्ञा → आणा । आज्ञप्तिः → आणत्ती । आज्ञपनं → आणवणं ॥ अनुस्वारात् - त्र्यस्रम् → तंसं ॥ अलाक्षणिक - संझा । विंझो । कंसालो ॥

१. G. पाठां० खात ता० टि० ।

**[ न दीर्घानुस्वारात् ]** न प्रथमा सि । दीर्घश्च अनुस्वारश्च = दीर्घानुस्वारम्, तस्मात् = दीर्घानुस्वारात् । पञ्चमी ङसि ।

**[ छूढो ]** क्षिप्त । 'वृक्ष-क्षिप्तयो रुक्ख-छूढौ' (२।१२७) क्षिप्तस्य छूढः । 'अनादौ०' (२।८९) इति द्वित्वप्राप्तो अनेन निषेधः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **छूढो** ।

**[ नीसासो ]** निर्-श्वास । 'निर्दुरोर्वा' (१।२३) र्लुक् । 'लुंकि निरः' (१।९३) नि० → नी० । 'सर्वत्र०' (२।७९) व्लुक् । 'श-षोः सः' (१।२६०) शस्य सः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नीसासो** ।

**[ फासो ]** स्पर्श । 'ष्प-स्पयोः फः' (२।५३) स्पस्य फः । 'सर्वत्र०' (२।७९) र्लुक् । 'लुप्तय-र-व-श-ष-सां०' (१।४३) फ० → फा० । 'श-षोः सः' (१।२६०) शस्य सः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **फासो** ।

अथवा 'स्पृशंत् संस्पर्शे' (१४१२) स्पृश् । स्पर्शनं = स्पर्शः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ० । 'स्पृशः फास-फंस-फरिस-छिव०' (४।१८२) स्पृशस्य फास आदेशः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **फासो** ।

**[ पासं ]** पार्श्व । 'सर्वत्र०' (२।७९) र-वयोर्लुक् । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पासं** ।

**[ सीसं ]** शीर्ष । 'श-षोः सः' (१।२६०) श-षयोः सः । 'सर्वत्र०' (२।७९) र्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सीसं** ।

**[ ईसरो ]** ईश्वर । 'सर्वत्र०' (२।७९) व्लुक् । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **ईसरो** ।

**[ वेसो ]** द्वेष्य । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अधो म-न-याम्' (२।७८) य्लोपः । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वेसो** ।

**[ लासं ]** लास्य । 'अधो म-न-याम्' (२।७८) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **लासं** ।

**[ आसं ]** आस्य । 'अधो म-न-याम्' (२।७८) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **आसं** ।

**[ पेसो ]** प्रेष्य । 'सर्वत्र०' (२।७९) र्लुक् । 'अधो म-न-याम्' (२।७८) य्लुक् । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पेसो** ।

**[ ओमालं ]** अवमाल्य । 'अवापोते' (१।१७२) अवस्य ओ० । 'अधो म-न-याम्' (२।७८) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **ओमालं** ।

**[ आणा ]** आज्ञा । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **आणा** ।

**[ आणत्ती ]** आज्ञप्ति । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'क-ग-ट-ड०' (२।७७) प्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **आणत्ती** ।

**[ आणवणं ]** आज्ञपन । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'नो णः' (१।२२८) नस्य णः । 'पो वः' (१।२३१) पस्य वः । प्रथमा सि । 'क्लीबे०' (३।२३) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **आणवणं** ।

**[ तंसं ]** त्र्यस्र । 'सर्वत्र०' (२।७९) र्लुक् । 'अधो म-न-याम्' (२।७८) य्लुक् । 'वक्रादावन्तः' (१।२६) अनुस्वारः । 'सर्वत्र०' (२।७९) र्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तंसं** ।

**[ संझा ]** संध्या । 'साध्वस-ध्य-ह्यां झः' (२।२६) ध्यस्य झः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **संझा** ।

**[ विंझो ]** विंध्य । 'साध्वस-ध्य०' (२।२६) ध्यस्य झः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विंझो** ।

**[ कंसालो ]** [१]कांश्यताल । 'ह्रस्वः संयोगे' (१।८४) कां० → कं० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'श-षोः सः' (१।२६०) शस्य सः । बाहुलकात् सन्धिः । 'समानानां०' (१।२।१) इति दीर्घः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कंसालो** ॥९२॥

## र-होः ॥ ८।२।९३ ॥

रेफ-हकारयोर्द्वित्वं न भवति ॥ रेफः शेषो नास्ति ॥

आदेश-सुन्देरं । [२]बम्भचेरं । पेरन्तं ॥ शेषस्य हस्य विहलो ॥ आदेशस्य कहावणो ॥

**[ रहोः ]** रश्च ह् च = रहौ, तयोः = रहोः । षष्ठी ओस् ।

**[ सुन्देरं ]** सौन्दर्य । 'उत् सौन्दर्यादौ' (१।१६०) सौ० → सु० । 'एच्छय्यादौ' (१।५७) द० → दे० । 'ब्रह्मचर्य-तूर्य-सौन्दर्य-शौण्डीर्ये र्यो रः' (२।६३) र्यस्य रः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुन्देरं** ।

**[ बम्भचेरं ]** ब्रह्मचर्य । 'सर्वत्र०' (२।७९) र्लुक् । क्वचित् म्भोऽपि । ह्मस्य म्भः । 'ब्रह्मचर्ये चः' (१।५९) च० → चे० । 'ब्रह्मचर्य-तूर्य०' (२।६३) र्यस्य रः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **बम्भचेरं** ।

**[ पेरन्तं ]** पर्यन्त । 'वल्ल्युत्कर-पर्यन्ता-ऽऽश्चर्ये वा' (१।५८) प० → पे० । 'एतः पर्यन्ते' (२।६५) र्यस्य रः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पेरन्तं** ।

**[ विहलो ]** विह्वल । 'सर्वत्र०' (२।७९) व्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विहलो** ।

**[ कहावणो ]** कार्षापण । 'ह्रस्वः संयोगे' (१।८४) का० → क० । 'कार्षापणे' (२।७१) र्षस्य हः । 'पो वः' (१।२३१) पस्य वः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कहावणो** ॥९३॥

## धृष्टद्युम्ने णः ॥ ८।२।९४ ॥

धृष्टद्युम्ने शब्दे आदेशस्य णस्य द्वित्वं न भवति ॥ धट्ठज्जुणो ॥

**[ धृष्टद्युम्ने णः ]** धृष्टद्युम्न सप्तमी ङि । ण् षष्ठी ङस् ।

**[ धट्ठज्जुणो ]** धृष्टद्युम्न । 'ऋतोऽत्' (१।१२६) धृ० → ध० । 'ष्टस्याऽनुष्ट्रेष्टा०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'द्य-य्य-र्यां जः' (२।२४) द्यु० → जु० । 'अनादौ०'

---

१. G. कांस्यताल । G. पाठां० कांश्यताल ख० । कांशताल ग० । J. L. पा० म० - कांस्याल । २. सर्वमुद्रितेषु बम्हचेरं ।

(२।८९) जस्य द्वित्वम् । 'म्न-ज्ञोर्णः' (२।४२) म्नस्य णः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **धट्ठज्जुणो** ॥९४॥

## कर्णिकारे वा ॥ ८।२।९५ ॥

कर्णिकारशब्दे शेषस्य णस्य द्वित्वं वा भवति ॥ कणिआरो कण्णिआरो ॥

**[ कर्णिकारे वा ]** कर्णिकार सप्तमी ङि । वा प्रथमा सि ।

**[ कण्णिआरो कणिआरो ]** कर्णिकार । 'सर्वत्र०' (२।७९) र्लुक् । अनेन वा द्वित्वं न ? भवति । यत्र भवति तत्र 'अनादौ०' (२।८९) द्वित्वम् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कण्णिआरो** ।

पक्षे-कर्णिकार । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कणिआरो** ॥९५॥

## दृप्ते ॥ ८।२।९६ ॥

दृप्तशब्दे शेषस्य द्वित्वं न भवति ॥ [१]दरिअ-सीहेण ॥

**[ दृप्ते ]** दृप्त सप्तमी ङि ।

**[ दरिअ-सीहेण ]** दृप्त-सिंह । 'अरिर्दृप्ते' (१।१४४) "दृ" इत्यस्य दरिः । 'क-ग-ट-ड०' (२।७७) प्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । सिंह । 'मांसाऽऽदेर्वा' (१।२९) अनुस्वारलुक् । 'ईर्जिह्वा-सिंह-त्रिंशद्विंशतौ त्या' (१।९२) सि० → सी० । तृतीया टा । 'टा-आमोर्णः' (३।६) टास्थाने णः । 'टाण-शस्येत्' (३।१४) ह० → हे० । **दरिअ-सीहेण** ॥९६॥

## समासे वा ॥ ८।२।९७ ॥

शेषाऽऽदेशयोः समासे द्वित्वं वा भवति ॥

नइ-ग्गामो नइ-गामो । कुसुम-प्पयरो कुसुम-पयरो । देव-त्थुई देव-थुई । हर-क्खन्दा हर -खन्दा । आणाल-क्खम्भो आणाल - खम्भो ॥ आलान स्तम्भ इत्यत्र ल-नोर्व्यत्ययः ॥

बहुलाधिकारादशेषाऽऽदेशयोरपि । स-प्पिवासो स-पिवासो । बद्ध-प्फलो बद्ध-फलो । मलय-सिहर-क्खण्डं मलय-सिहर-खण्डं । पम्मुक्कं पमुक्कं । अद्दंसणं अदंसणं । पडिक्कूलं पडिकूलं । तेल्लोक्कं तेलोक्कं इत्यादि ॥

**[ समासे वा ]** समास सप्तमी ङि । वा प्रथमा सि ।

**[ नइ-ग्गामो नइ-गामो ]** नदी-ग्राम । नदीयुक्तो ग्रामो नदीग्रामः । 'दीर्घ-ह्रस्वौ मिथो वृत्तौ' (१।४) दी० → दि० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'सर्वत्र०' (२।७९) र्लुक् । अनेन वा द्वित्वं-ग्ग० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नइग्गामो नइगामो** ।

---

१. भम धम्मिअ ! वीसद्धो/वीसत्थो सो सुणओ अज्ज मारिओ तेण । गोला[१]णईकच्छकुडंगवासिणा **दरिअसीहेण** ॥
[शृ० प्र०-७/१६७ । गा० स० - २।७५ । ध्व० लो० - प्रथमोद्योतः]
भ्रम धार्मिक ! विस्रब्धः/विश्वस्तः स शुनकोऽद्य मारितस्तेन । गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन ॥
१. पाठां० - गा० स० - गोलाअडविअडकु० = गोदातटविकटकु० ।

**[ कुसुम-प्पयरो कुसुम-पयरो ]** कुसुम-प्रकर । 'सर्वत्र०' (२।७९) र्लुक् । अनेन वा द्वित्वं-प्प० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० **कुसुमप्पयरो** । पक्षे-कुसुम-प्रकर । 'सर्वत्र०' (२।७९) र्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कुसुमपयरो** ।

**[ देव-त्थुई देव-थुई ]** देव-स्तुति । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्तस्य थः । अनेन वा थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **देवत्थुई** । पक्षे-देव-स्तुति । 'स्तस्य थोऽसमस्त०' (२।४५) स्तस्य थः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **देवथुई** ।

**[ हर-क्खन्दा हर-खन्दा ]** हरश्च स्कन्दश्च = हरस्कन्दौ । 'शुष्क-स्कन्दे वा' (२।५) स्कस्य खः । अनेन खस्य वा द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । प्रथमा औ । 'द्विवचनस्य बहुवचनम्' (३।१३०) औस्थाने जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) द० → दा० **हरक्खन्दा** । पक्षे-हर-स्कन्द । 'शुष्क-स्कन्दे वा' (२।५) स्कस्य खः । प्रथमा औ । 'द्विवचनस्य बहुवचनम्' (३।१३०) औस्थाने जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) द० → दा० **हरखन्दा** ।

**[ आणाल-क्खम्भो आणाल-खम्भो ]** आलान-स्तम्भ । आलानश्चासौ स्तम्भश्च । 'आलाने ल-नोः' (२।११७) लानस्थाने नाल० । 'नो णः' (१।२२८) नस्य णः । 'स्तम्भे स्तो वा' (२।८) स्तस्य खः । अनेन वा खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आणालक्खम्भो** । पक्षे-आलान-स्तम्भ । द्वित्वं मुक्त्वा शेषं पूर्ववत् । **आणालखम्भो** ।

**[ स-प्पिवासो स-पिवासो ]** स-पिपास(सा) । सह पिपासया वर्त्तते यः सः = सपिपासः पुरुषः (२) । बहुलाधिकारात् शेषाऽऽदेशौ मुक्त्वा अन्यत्रापि भवति द्वित्वम्, ततोऽनेन वा द्वित्वं-पि० → प्पि० । 'पो वः' (१।२३१) पस्य वः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सप्पिवासो सपिवासो** ।

**[ बद्ध-प्फलो बद्ध-फलो ]** बद्ध-फल । बद्धं फलं यत्र सः = बद्धफलः । अनेन वा फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **बद्धप्फलो** । पक्षे प्रकृतिरेव- **बद्धफलो** ।

**[ मलय-सिहर-क्खण्डं मलय-सिहर-खण्डं ]** मलय-शिखर-खण्ड । 'श-षोः सः' (१।२६०) शि० → सि० । 'ख-घ-थ-ध-भाम्' (१।१८७) खस्य हः । अनेन वा खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मलय-सिहर-क्खण्डं** । पक्षे-मलय-शिखर-खण्ड । द्वित्वं मुक्त्वा शेषं पूर्ववत् । **मलय-सिहर-खण्डं** ।

**[ पम्मुक्कं पमुक्कं ]** प्रमुक्त । 'सर्वत्र०' (२।७९) र्लुक् । अनेन वा मस्य द्वित्वम् । 'शक्त-मुक्त-दष्ट-रुग्ण-मृदुत्वे को वा' (२।२) क्तस्य कः । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पम्मुक्कं** । पक्षे-प्रमुक्त । मस्य द्वित्वं मुक्त्वा शेषं पूर्ववत् । **पमुक्कं** ।

**[ अद्दंसणं अदंसणं ]** अदर्शन । 'सर्वत्र०' (२।७९) र्लुक् । 'वक्रादावन्तः' (१।२६) अनुस्वारः द० → दं० । अनेन वा दस्य द्वित्वम् । 'श-षोः सः' (१।२६०) शस्य सः । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अद्दंसणं** । पक्षे-अदर्शन । दस्य द्वित्वं मुक्त्वा शेषं पूर्ववत् **अदंसणं** ।

**[ पडिक्कूलं पडिकूलं ]** प्रतिकूल । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'प्रत्यादौ डः' (१।२०६) तस्य डः । अनेन वा कस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पडिक्कूलं** । पक्षे-प्रतिकूल । कस्य द्वित्वं मुक्त्वा शेषं पूर्ववत् । **पडिकूलं** ।

**[ तेल्लोक्कं तेलोक्कं ]** त्रैलोक्य । 'सर्वत्र०' (२।७९) र्लुक् । 'ऐत एत्' (१।१४८) तै० → ते० । 'अधो म-न-याम्' (२।७८) य्लुक् । अनेन वा लस्य द्वित्वम् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तेल्लोक्कं** । द्वितीये लस्य द्वित्वं मुक्त्वा शेषं पूर्ववत् । **तेलोक्कं** ॥९७॥

## तैलादौ ॥ ८।२।९८ ॥

तैलादिषु अनादौ यथादर्शनमन्त्यस्याऽनन्त्यस्य च व्यञ्जनस्य द्वित्वं भवति ॥

तेल्लं । मण्डुक्को । वेइल्लं । उज्जू । विड्डा । बहुत्तं ॥ अनन्त्यस्य-सोत्तं । पेम्मं । [1]जोव्वणं ॥ आर्षे - पडिसोओ । [2]विस्सोअसिआ ॥

तैल । मण्डूक । विचकिल । ऋजु । व्रीडा । प्रभूत । स्रोतस् । प्रेमन् । यौवन इत्यादि ॥

**[ तैलादौ ]** तैलं [3]आदिर्यस्याऽसौ तैलादिस्तस्मिन् = तैलादौ । सप्तमी ङि ।

**[ तेल्लं ]** तैल । 'ऐत एत्' (१।१४८) तै० → ते० । अनेन द्वित्वं-ल० → ल्ल० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तेल्लं** ।

**[ मण्डुक्को ]** मण्डूक । अनेन द्वित्वं-क० → क्क० । 'ह्रस्वः संयोगे' (१।८४) डू० → डु० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मण्डुक्को** ।

**[ वेइल्लं ]** विचकिल । 'स्थविर-विचकिला-ऽयस्कारे' (१।१६६) चेन सह वि० → वे० । 'क-ग-च-ज०' (१।१७७) क्लुक् । अनेन द्वित्वं-ल० → ल्ल० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वेइल्लं** ।

**[ उज्जू ]** ऋजु । 'उदृत्वादौ' (१।१३१) ऋ० → उ० । अनेन द्वित्वं-जु० → ज्जु० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **उज्जू** ।

**[ विड्डा ]** व्रीडा । 'सर्वत्र०' (२।७९) र्लुक् । अनेन द्वित्वं-डा० → ड्डा० । 'ह्रस्वः संयोगे' (१।८४) वी० → वि० । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **विड्डा** ।

**[ बहुत्तं ]** प्रभूत । 'सर्वत्र०' (२।७९) र्लुक् । 'ख-घ-थ०' (१।१८७) भू० → हू० । अनेन द्वित्वं - त० → त्त० । 'ह्रस्वः संयोगे' (१।८४) हू० → हु० । 'प्रभूते बः' (१।२३३) पस्य बः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **बहुत्तं** ।

**[ सोत्तं ]** स्रोतस् । 'सर्वत्र०' (२।७९) र्लुक् । अनेन द्वित्वं -त० → त्त० । 'अन्त्यव्य०' (१।११) स्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सोत्तं** ।

**[ पेम्मं ]** प्रेमन् । 'सर्वत्र०' (२।७९) र्लुक् । अनेन द्वित्वं - म० → म्म० । 'अन्त्यव्य०' (१।११) न्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पेम्मं** ।

---

१. H. I. J. M. जुव्वणं । २. पा० म० - विस्रोतसिका → विसोत्तिया-विस्सोअसिआ । J. L. विस्सोअसिआ । ३. E. आदौ ।

**[ जोव्वणं ]** यौवनं । 'औत ओत्' (१।१५९) यौ० → यो० । 'आदेर्यो जः' (१।२४५) यस्य जः । अनेन द्वित्वं - व० → व्व० । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जोव्वणं** ।

आर्षे - प्रतिश्रो(स्रो)तः → पडिसोओ ।

विश्रो(स्रो)तसिका → विसोअसिआ ॥९८॥

## सेवादौ वा ॥ ८।२।९९ ॥

सेवादिषु अनादौ यथादर्शनमन्त्यस्य अनन्त्यस्य च द्वित्वं वा भवति ॥

सेव्वा सेवा । नेड्डं नीडं । नक्खा नहा । निहित्तो निहिओ । वाहित्तो वाहिओ । माउक्कं माउअं । एक्को एओ । कोउहल्लं कोउहलं । वाउल्लं वाउलं । [१]थुल्लं थोरं । हुत्तं हूअं । दइव्वं दइवं । तुण्हिक्को तुण्हिओ । मुक्को मूओ । खण्णू खाणू । थिण्णं थीणं ॥

अनन्त्यस्य - अम्हक्केरं अम्हकेरं । तं च्चेअ तं चेअ । सो च्चिअ सो चिअ ॥

सेवा । नीड । नख । निहित । व्याहृत । मृदुक । एक । कुतूहल । व्याकुल । स्थूल । हूत । दैव । तूष्णीक । मूक । स्थाणु । स्त्यान । अस्मदीय । चेअ । चिअ इत्यादि ॥

**[ सेवादौ वा ]** सेवा आदिर्यस्य सः = सेवादिस्तस्मिन् = सेवादौ । सप्तमी ङि । वा प्रथमा सि ।

**[ सेव्वा सेवा ]** सेवा । अनेन वा द्वित्वं - वा० → व्वा० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् सेव्वा । पक्षे-**सेवा** ।

**[ नेड्डं नीडं ]** नीड । 'नीड-पीठे वा' (१।१०६) नी० → ने० । अनेन वा द्वित्वं - ड० → ड्ड० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **नेड्डं** । पक्षे-**नीडं** ।

**[ नक्खा नहा ]** नख । अनेन वा द्वित्वं - ख० → ख्ख० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । प्रथमा जस् । 'जस्-शस्०' (३।१२) क्ख० → क्खा० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **नक्खा** । पक्षे- नख । 'ख-घ-थ०' (१।१८७) खस्य हः । प्रथमा जस् । 'जस्-शसो०' (३।४) जस्लुक् । 'जस्-शस्०' (३।१२) ह० → हा० **नहा** ।

**[ निहित्तो निहिओ ]** निहित । अनेन वा द्वित्वं - त० → त्त० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निहित्तो** । पक्षे-निहित । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निहिओ** ।

**[ वाहित्तो वाहिओ ]** व्याहृत । 'अधो म-न-याम्' (२।७८) य्लुक् । 'इत् कृपादौ' (१।१२८) हृ० → हि० । अनेन वा द्वित्वं - त० → त्त० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० वाहित्तो । पक्षे-व्याहृत । 'अधो म-न-याम्' (२।७८) य्लुक् । 'इत् कृपादौ' (१।१२८) हृ० → हि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वाहिओ** ।

**[ माउक्कं माउअं ]** मृदुक । 'आत् कृशा-मृदुक-मृदुत्वे वा' (१।१२७) मृ० → मा० । 'क-ग-च-ज०' (१।१७७) द्लुक् । अनेन वा द्वित्वं - क० → क्क० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः

१. सर्वमुद्रितेषु थुल्लो थोरो । पा० म० - थुल्ल वि० । थोर वि० ।

माउक्कं । पक्षे-मृदुक । 'आत् कृशा-मृदुक०' (१।१२७) मृ० → मा० । 'क-ग-च-ज०' (१।१७७) द्लुक्-क्लुक् च । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **माउअं** ।

**[ एक्को एओ ]** एक । अनेन वा द्वित्वं - क० → क्क० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **एक्को** । पक्षे-एक । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **एओ** ।

**[ कोउहल्लं कोउहलं ]** कुतूहल । 'कुतूहले वा ह्रस्वश्च' (१।११७) कु० → को० - तू० → तु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन वा द्वित्वं - ल० → ल्ल० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कोउहल्लं** । पक्षे- कुतूहल । द्वित्वं विना शेषं पूर्ववत् । **कोउहलं** ।

[1]**[ वाउल्लं वाउलं ]** व्याकुल । 'अधो म-न-याम्' (२।७८) य्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । अनेन वा द्वित्वं - ल० → ल्ल० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः वाउल्लं । पक्षे-व्याकुल । द्वित्वं विना शेषं पूर्ववत् । **वाउलं** ।

**[ थुल्लं थोरं ]** स्थूल । 'क-ग-ट-ड०' (२।७७) स्लुक् । अनेन वा द्वित्वं ल० → ल्ल० । 'ह्रस्वः संयोगे' (१।८४) थू० → थु० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **थुल्लं** । पक्षे-स्थूल । 'ओत् कूष्माण्डी - तूणीर- कूर्पर-स्थूल०' (१।१२४) स्थू० → स्थो० । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'स्थूले लो रः' (१।२५५) लस्य रः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **थोरं** ।

**[ हुत्तं हूअं ]** हूत । अनेन वा द्वित्वं - त० → त्त० । 'ह्रस्वः०' (१।८४) हू० → हु० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **हुत्तं** । पक्षे-हूत । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि। 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **हूअं** ।

**[ दइव्वं दइवं ]** दैव । 'एच्च दैवे' (१।१५३) दै० → दइ० । अनेन वा द्वित्वं - व० → व्व० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दइव्वं** । पक्षे-दैव । 'एच्च दैवे' (१।१५३) दै० → दइ० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दइवं** ।

**[ तुण्हिक्को तुण्हिओ ]** तूष्णीक । 'ह्रस्वः संयोगे' (१।८४) तू० → तु० । 'सूक्ष्म-श्न-ष्ण-स्न०' (२।७५) ष्णी० → ण्ही० । अनेन वा द्वित्वं - क० → क्क० । 'ह्रस्वः संयोगे' (१।८४) ण्ही० → ण्हि० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तुण्हिक्को** । पक्षे-तूष्णीक । 'ह्रस्वः संयोगे' (१।८४) तू० → तु० । 'सूक्ष्म-श्न-ष्ण-स्न०' (२।७५) ष्णी० → ण्ही० । 'पानीयादिष्वित्' (१।१०१) ण्ही० → ण्हि० । 'क-ग-च-ज०' (१।१७७) **क्लुक्** । प्रथमा सि। 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तुण्हिओ** ।

**[ मुक्को मूओ ]** मूक । अनेन वा द्वित्वं - क० → क्क० । 'ह्रस्वः संयोगे' (१।८४) मू० → मु० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मुक्को** । पक्षे-मूक । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मूओ** ।

**[ खण्णू खाणू ]** स्थाणु । 'स्थाणावहरे' (२।७) स्था० → खा० । अनेन वा द्वित्वं - णु० → ण्णु० । 'ह्रस्वः संयोगे' (१।८४) खा० → ख० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - ण्णु० → ण्णू० । 'अन्त्यव्य०' (१।११)

---

१. H. I. J. वाउल्लो वाउलो । पा० म० - वाउल्ल वाउल वि० ।

स्लुक् **खण्णू** । पक्षे -स्थाणु । 'स्थाणावहरे' (२।७) स्था० → खा० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - णु० → णू० । 'अन्त्यव्य०' (१।११) स्लुक् **खाणू** ।

**[ थिण्णं थीणं ]** स्त्यान । 'ईः स्त्यान-खल्वाटे' (१।७४) स्त्या० → स्त्यी० । 'अधो म-न-याम्' (२।७८) य्लुक् - स्ती० । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्ती० → थी० । 'नो णः' (१।२२८) नस्य णः । अनेन वा द्वित्वं-ण० → ण्ण० । 'ह्रस्वः संयोगे' (१।८४) थी० → थि० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **थिण्णं** । पक्षे-स्त्यान । 'ईः स्त्यान - खल्वाटे' (१।७४) स्त्या० → स्त्यी० । 'अधो म-न-याम्' (२।७८) य्लुक्-स्त्यी० → स्ती० । 'स्तस्य थोऽसमस्त०' (२।४५) स्ती० → थी० । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **थीणं** ।

**[ अम्हक्केरं अम्हकेरं ]** अस्मदीय । 'पक्ष्म-श्म-ष्म-स्म०' (२।७४) स्म० → म्ह० । 'इदमर्थस्य केरः' (२।१४७) ईयस्य केरः । 'क-ग-च-ज०' (१।१७७) द्लुक् । अनेन वा द्वित्वं - के० → क्के० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अम्हक्केरं** । पक्षे-अस्मदीय । द्वित्वं मुक्त्वा शेषं पूर्ववत् । **अम्हकेरं** ।

**[ तं च्चेअ तं चेअ ]** तद्-एव । 'अन्त्यव्य०' (१।११) द्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः तं । 'णइ-चेअ-चिअ-च्च अवधारणे' (२।१८४) एवस्य चेअ० । अनेन वा द्वित्वं - चेअ० → च्चेअ० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **तं च्चेअ** । पक्षे । तद्-एव । द्वित्वं मुक्त्वा शेषं पूर्ववत् । **तं चेअ** ।

**[ सो च्चिअ सो चिअ ]** तद्-एव । 'अन्त्यव्य०' (१।११) द्लुक् । 'तदश्च तः सोऽक्लीबे' (३।८६) तस्य सः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० सो । 'णइ-चेअ-चिअ०' (२।१८४) एवस्य चिअ० । अनेन वा द्वित्वं - चिअ० → च्चिअ० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **सो च्चिअ** । पक्षे- तद्-एव । द्वित्वं मुक्त्वा शेषं पूर्ववत् । **सो चिअ** ॥९९॥

## शार्ङ्गे ङात् पूर्वोऽत् ॥ ८।२।१०० ॥

शार्ङ्गे ङात् पूर्वोऽकारो भवति ॥ सारङ्गं ॥

**[ शार्ङ्गे ङात् पूर्वोऽत् ]** शार्ङ्ग सप्तमी ङि । ङ पञ्चमी ङसि । पूर्व प्रथमा सि । अत् प्रथमा सि ।

**[ सारङ्गं ]** शार्ङ्ग । 'श-षोः सः' (१।२६०) शस्य सः । अनेन रकार-ङकारयोर्विश्लेषं कृत्वा ङ पूर्वं अ० । 'लोकात्' (१।१।३) सारङ्ग । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सारङ्गं** ॥१००॥

## क्ष्मा-श्लाघा-रत्नेऽन्त्यव्यञ्जनात् ॥ ८।२।१०१ ॥

एषु [1]संयुक्तं यदन्त्यव्यञ्जनं तस्मात् [2]पूर्वोऽकारो भवति ॥

छमा । सलाहा । रयणं ॥ आर्षे-सूक्ष्मेऽपि सुहमं ॥

**[ क्ष्माश्लाघारत्ने ]** क्ष्मा च श्लाघा च रत्नं च = क्ष्माश्लाघारत्नम्, तस्मिन् = क्ष्माश्लाघारत्ने । सप्तमी ङि ।

**[ अन्त्यव्यञ्जनात् ]** अन्त्यव्यञ्जन पञ्चमी ङसि ।

**[ छमा ]** क्ष्मा । क्ष्-मा इति विश्लेषं कृत्वा अनेन मात् पूर्वं अ० । 'लोकात्' (१।१।३) क्ष्मा । 'क्ष्मायां कौ' (२।१८) क्षस्य छः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **छमा** ।

---

१. H. J. K. M. संयुक्तस्य । २. H. J. L. M. पूर्वोऽद् ।

**[ सलाहा ]** श्लाघा । श्-ला इति विश्लेषं कृत्वा लात् पूर्वं अ० । 'लोकात्' (१।१।३) शलाघा । 'श-षोः सः' (१।२६०) शस्य सः । 'ख-घ-थ०' (१।१८७) घस्य हः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सलाहा** ।

**[ रयणं ]** रत्न । त्-न इति विश्लेषं कृत्वा नपूर्वं अ० । 'लोकात्' (१।१।३) रतन । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **रयणं** ।

आर्षे सूक्ष्मशब्देऽपि **[ सुहमं ]** सूक्ष्म । 'ह्रस्वः संयोगे' (१।८४) सू० → सु० । आर्षत्वात् क्ष्मस्य म्हः(ह्म) । ह्-म इति विश्लेषं कृत्वा मपूर्वं अ० । 'लोकात्' (१।१।३) सुहम । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुहमं** ॥१०१॥

## स्नेहा-ऽग्न्योर्वा ॥ ८।२।१०२ ॥

अनयोः संयुक्तस्य अन्त्यव्यञ्जनात् [1]पूर्वोऽद्वा भवति ॥ सणेहो नेहो । अगणी अग्गी ॥

**[ स्नेहाऽग्न्योर्वा ]** स्नेहश्च अग्निश्च = स्नेहाऽग्नी, तयोः = स्नेहाऽग्न्योः । षष्ठी ओस् । वा प्रथमा सि ।

**[ सणेहो नेहो ]** स्नेह । स्-ने इति विश्लेषे अनेन वा नेपूर्वं अ० । 'लोकात्' (१।१।३) सनेह । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सणेहो** । पक्षे-स्नेह । प्रथमा सि । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नेहो** ।

**[ अगणी अग्गी ]** अग्नि । ग्-नि इति विश्लेषे अनेन वा निपूर्वं अ० । 'लोकात्' (१।१।३) अगनि । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **अगणी** । पक्षे-अग्नि । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **अग्गी** ॥१०२॥

## प्लक्षे लात् ॥ ८।२।१०३ ॥

प्लक्षशब्दे संयुक्तस्य अन्त्यव्यञ्जनाल्लात्पूर्वोऽद् भवति ॥ पलक्खो ॥

**[ प्लक्षे लात् ]** प्लक्ष सप्तमी ङि । ल पञ्चमी ङसि ।

**[ पलक्खो ]** प्लक्ष । प्-ल इति विश्लेषे लात् पूर्वं अ० । 'लोकात्' (१।१।३) पलक्ष । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्षस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पलक्खो** ॥१०३॥

## र्ह-श्री-ह्री-कृत्स्न-क्रिया-दिष्ट्यास्वित् ॥ ८।२।१०४ ॥

एषु संयुक्तस्य अन्त्यव्यञ्जनात् पूर्व इकारो भवति ॥

र्ह-अरिहइ । [2]अरिहो । गरिहा । [3]बरिहा ॥ श्री → सिरी ॥ ह्री → हिरी । ह्रीतः → हिरीओ । अह्रीकः → अहिरीओ ॥ कृत्स्नः → कसिणो ॥ क्रिया → किरिआ ॥ आर्षे तु हयं नाणं कियाहीणं ॥ दिष्ट्या → दिट्ठिआ ॥

**[ र्हश्रीह्रीकृत्स्नक्रियादिष्ट्यास्वित् ]** र्हश्च श्रीश्च ह्रीश्च कृत्स्नश्च क्रिया च दिष्ट्या च = र्हश्रीह्रीकृत्स्नक्रियादिष्ट्याः, तासु = र्हश्रीह्रीकृत्स्नक्रियादिष्ट्यासु । सप्तमी सुप् । इत् प्रथमा सि ।

---

१. H. J. K. L. M. अकारो वा । २. H. I. J. L. अरिहा । ३. सर्वमुद्रितेषु बरिहो ।

**[ अरिहइ ]** 'अर्ह पूजायाम्' (५६४) अर्ह् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) अर्हति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । र्-ह इति विश्लेषं कृत्वा अनेन हपूर्वं इ० । 'लोकात्' (१।१।३) **अरिहइ** ।

**[ अरिहो ]** अर्हन् । 'अन्त्यव्य०' (१।११) न्लुक् । र्-ह इति विश्लेषे अनेन हपूर्वं इ० । 'लोकात्' (१।१।३) अरिह । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अरिहो** ।

**[ गरिहा ]** गर्हा । र्-ह इति विश्लेषे अनेन हपूर्वं इ० । 'लोकात्' (१।१।३) गरिहा । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **गरिहा** ।

**[ बरिहा ]** बर्हन् । 'अन्त्यव्य०' (१।११) न्लुक् । र्-ह इति विश्लेषे अनेन हपूर्वं इ० । 'लोकात्' (१।१।३) बरिह । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्०' (३।१२) ह० → हा० **बरिहा** ।

**[ सिरी ]** श्री । श्-री इति विश्लेषे अनेन रीपूर्वं इ० । 'लोकात्' (१।१।३) शिरी । 'श-षोः सः' (१।२६०) शि० → सि० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सिरी** ।

**[ हिरी ]** ह्री । ह्-री इति विश्लेषे रीपूर्वं इ० । 'लोकात्' (१।१।३) हिरी । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **हिरी** ।

**[ हिरीओ ]** ह्रीत । ह्-री इति विश्लेषे अनेन रीपूर्वं इ० । 'लोकात्' (१।१।३) हिरीत । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **हिरीओ** ।

**[ अहिरीओ ]** अह्रीक । ह्-री इति विश्लेषे अनेन रीपूर्वं इ० । 'लोकात्' (१।१।३) अहिरीक । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अहिरीओ** ।

**[ कसिणो ]** कृत्स्न । 'ऋतोऽत्' (१।१२६) कृ० → क० । 'क-ग-ट-ड०' (२।७७) त्लुक् । स्-न इति विश्लेषे अनेन नपूर्वं इ० । 'लोकात्' (१।१।३) कसिन । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कसिणो** ।

**[ किरिआ ]** क्रिया । क्-रि इति विश्लेषे अनेन रिपूर्वं इ० । 'लोकात्' (१।१।३) किरिया । 'क-ग-च-ज-त०' (१।१७७) य्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **किरिआ** ।

**[ हयं नाणं कियाहीणं ]** हत । 'क-ग-च-ज-त-द०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **हयं** ।

ज्ञान । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'व्यत्ययश्च' (४।४४७) इति न्यायात् 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **नाणं** ।

आर्षे-क्रिया । 'सर्वत्र०' (२।७९) र्लुक् । **किया** । हीन । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **हीणं** ।

**[ दिट्ठिआ ]** दिष्ट्या । ष्ट्-या इति विश्लेषे अनेन यापूर्वं इ० । 'लोकात्' (१।१।३) दिष्टिया । 'ष्टस्याऽनु०' (३।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'क-ग-च-ज०' (१।१७७) य्लुक् **दिट्ठिआ** ॥१०४॥

## र्श-र्ष-तप्त-वज्रे वा ॥ ८।२।१०५ ॥

र्श-र्षयोस्तप्त-वज्रयोश्च संयुक्तस्य अन्त्यव्यञ्जनात् पूर्व इकारो वा भवति ॥

र्श-आयरिसो आयंसो । सुदरिसणो सुदंसणो । दरिसणं दंसणं ॥ र्ष-वरिसं वासं । वरिसा वासा । वरिस-सयं वास-सयं ॥

व्यवस्थितविभाषया क्वचिन्नित्यम् - परामरिसो । हरिसो । अमरिसो ॥

तप्त-तविओ तत्तो ॥ वज्र - वइरं वज्जं ॥

**[ र्शर्षतप्तवज्रे वा ]** र्शश्च र्षश्च तप्तश्च वज्रं च = र्शर्षतप्तवज्रम्, तस्मिन् = र्शर्षतप्तवज्रे । सप्तमी ङि । वा प्रथमा सि ।

**[ आयरिसो आयंसो ]** आदर्श । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । र्-श इति विश्लेषे अनेन वा शपूर्वं इ० । 'लोकात्' (१।१।३) आयरिश । 'श-षोः सः' (१।२६०) शस्य सः । प्रथमा सि। 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आयरिसो** । पक्षे-आदर्श । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'वक्रादावन्तः' (१।२६) अनुस्वारः यं० । 'सर्वत्र०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शस्य सः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आयंसो** ।

**[ सुदरिसणो सुदंसणो ]** सुदर्शन । अनेन वा र्-श इति विश्लेषे शपूर्वं इ० । 'लोकात्' (१।१।३) सुदरिशन । 'श-षोः सः' (१।२६०) शस्य सः । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सुदरिसणो** । पक्षे-सुदर्शन । 'वक्रादावन्तः' (१।२६) अनुस्वारः द० → दं० । 'सर्वत्र०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शस्य सः । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सुदंसणो** ।

**[ दरिसणं दंसणं ]** दर्शन । र्-श इति विश्लेषे अनेन वा शपूर्वं इ० । 'लोकात्' (१।१।३) दरिशन । 'श-षोः सः' (१।२६०) शस्य सः । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दरिसणं** । पक्षे-दर्शन । 'सर्वत्र०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शस्य सः । 'वक्रादावन्तः' (१।२६) अनुस्वारः द० → दं० । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दंसणं** ।

**[ वरिसं वासं ]** वर्ष । र्-ष इति विश्लेषे अनेन वा षपूर्वं इ० । 'लोकात्' (१।१।३) वरिष । 'श-षोः सः' (१।२६०) षस्य सः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वरिसं** । पक्षे-वर्ष। 'सर्वत्र०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) षस्य सः । 'लुप्तय-र-व-श-ष-सां श-ष-सां दीर्घः' (१।४३) व० → वा० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वासं** ।

**[ वरिसा वासा ]** वर्षा । र्-षा इति विश्लेषे अनेन वा षापूर्वं इ० । 'लोकात्' (१।१।३) वरिषा । 'श-षोः सः' (१।२६०) षस्य सः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **वरिसा** । पक्षे-वर्षा । 'सर्वत्र०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) षस्य सः । 'लुप्तय-र-व०' १।४३) व० → वा० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **वासा**।

**[ वरिससयं वाससयं ]** वर्षशत । र्-ष इति विश्लेषे अनेन वा षपूर्वं इ० । 'लोकात्' (१।१।३) वरिषशत । 'श-षोः सः' (१।२६०) ष-शयोः सः । 'क-ग-च-ज-त-द०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वरिससयं** । पक्षे-वर्षशत । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) ष-शयोः सः । 'लुप्तय-र-व-श-ष-सां०' (१।४३) व० → वा० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वाससयं** ।

**[ परामरिसो ]** [1]परामर्ष । र्-ष इति विश्लेषे अनेन वा षपूर्वं इ० । 'लोकात्' (१।१।३) परामरिष । 'श-षोः सः' (१।२६०) षस्य सः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **परामरिसो** ।

**[ हरिसो ]** हर्ष । र्-ष इति विश्लेषे अनेन वा षपूर्वं इ० । 'लोकात्' (१।१।३) हरिष । 'श-षोः सः' (१।२६०) षस्य सः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **हरिसो** ।

**[ अमरिसो ]** अमर्ष । र्-ष इति विश्लेषे अनेन वा षपूर्वं इ० । 'लोकात्' (१।१।३) अमरिष । 'श-षोः सः' (१।२६०) षस्य सः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अमरिसो** ।

**[ तविओ तत्तो ]** तप्त । प्-त इति विश्लेषे अनेन वा तपूर्वं इ० । 'लोकात्' (१।१।३) तपित । 'पो वः' (१।२३१) पस्य वः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तविओ** । पक्षे-तप्त । 'क-ग-ट-ड०' (२।७७) प्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तत्तो** ।

**[ वइरं वज्जं ]** वज्र । ज्-र इति विश्लेषे अनेन वा रपूर्वं इ० । 'लोकात्' (१।१।३) वजिर । 'क-ग-च-ज०' (१।१७७) जलुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वइरं** । पक्षे-वज्र । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वज्जं** ॥१०५॥

## लात् ॥ ८।२।१०६ ॥

संयुक्तस्य अन्त्यव्यञ्जनाल्लात्पूर्व इद् भवति ॥

किलिन्नं । किलिट्ठं । सिलिट्ठं । पिलुट्ठं । पिलोसो । सिलिम्हो । सिलेसो । सुक्किलं । सुइलं । सिलोओ । किलेसो । अम्बिलं । गिलाइ । गिलाणं । मिलाइ । मिलाणं । किलम्मइ । किलन्तं ॥

क्वचिन्न भवति - कमो । पवो । विप्पवो । सुक्कपक्खो । उत्प्लावयति → उप्पावेइ ॥

**[ लात् ]** ल पञ्चमी ङसि ।

**[ किलिन्नं ]** क्लिन्न । क्-लि इति विश्लेषे अनेन लिपूर्वं इ० । 'लोकात्' (१।१।३) किलिन्न । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **किलिन्नं** ।

**[ किलिट्ठं ]** क्लिष्ट । क्-लि इति विश्लेषे अनेन लिपूर्वं इ० । 'लोकात्' (१।१।३) किलिष्ट । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **किलिट्ठं** ।

[2]**[ सिलिट्ठं ]** श्लिष्ट । श्-लि इति विश्लेषे अनेन लिपूर्वं इ० । 'लोकात्' (१।१।३) शिलिष्ट । 'श-षोः सः' (१।२६०) शि० → सि० । 'ष्टस्याऽनुष्ट्रेष्टा०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सिलिट्ठं** ।

**[ पिलुट्ठं ]** प्लुष्ट । प्-लु इति विश्लेषे अनेन लुपूर्वं इ० । 'लोकात्' (१।१।३) पिलुष्ट । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पिलुट्ठं** ।

---

१. I. M. पा० म० - परामर्श । २. A. सिलिट्ठं उदाहरणम् ।

**[ पिलोसो ]** प्लोष । प्-लो इति विश्लेषे अनेन लोपूर्वं इ० । 'लोकात्' (१।१।३) पिलोष । 'श-षोः सः' (१।२६०) षस्य सः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पिलोसो** ।

**[ सिलिम्हो ]** श्लेष्मन् । 'अन्त्यव्य०' (१।११) नूलुक् । 'पक्ष्म-श्म-ष्म०' (२।७४) ष्मस्म म्हः । 'ह्रस्वः संयोगे' (१।८४) श्ले० → श्लि० । श्-लि इति विश्लेषे लिपूर्वं इ० । 'लोकात्' (१।१।३) शिलिम्ह । 'श-षोः सः' (१।२६०) शस्य सः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सिलिम्हो** ।

**[ सिलेसो ]** श्लेष । श्-ले इति विश्लेषे अनेन लेपूर्वं इ० । 'लोकात्' (१।१।३) शिलेष । 'श-षोः सः' (१।२६०) श-षयोः सः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सिलेसो** ।

**[ सुक्किलं ]** शुक्ल । 'श-षोः सः' (१।२६०) शस्य सः । क्-ल इति विश्लेषे अनेन लपूर्वं इ० । 'लोकात्' (१।१।३) सुकिल । 'सेवादौ वा' (२।९९) द्वित्वं - कि० → क्कि० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुक्किलं** ।

द्वित्वं विकल्पत्वात् सुइलं । उभयोः 'अनादौ०' (२।८९) वा द्वित्वं-ल्ल० । शेषं पूर्ववत् । सुक्किल्लं सुइल्लं ।

**[ सुइलं ]** शुक्ल । 'श-षोः सः' (१।२६०) शु० → सु० । क्-ल इति विश्लेषे अनेन लपूर्वं इ० । 'लोकात्' (१।१।३) कि० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुइलं** ।

**[ सिलोओ ]** श्लोक । श्-लो इति विश्लेषे अनेन लोपूर्वं इ० । 'लोकात्' (१।१।३) शि० । 'श-षोः सः' (१।२६०) शस्य सः । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सिलोओ**।

**[ किलेसो ]** क्लेश । क्-ले इति विश्लेषे अनेन लेपूर्वं इ० । 'लोकात्' (१।१।३) कि० । 'श-षोः सः' (१।२६०) शस्य सः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **किलेसो** ।

**[ अम्बिलं ]** अम्ल । म्-ल इति विश्लेषे अनेन लपूर्वं इ० । 'लोकात्' (१।१।३) मि० । 'व्यत्ययश्च' (४।४४७) इति न्यायात् 'मोऽनुनासिको वो वा' (४।३९७) इति मात् अधो वकार आनीयते । ब-वयोरैक्यं ज्ञेयम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अम्बिलं** ।

**[ गिलाइ ]** 'ग्लैं हर्षक्षये' (३१) ग्लै । वर्त्त० तिव् । 'स्वराणां स्वराः' (४।२३८) ग्ला । ग्-ला इति विश्लेषे अनेन लात् पूर्वं इ० । 'लोकात्' (१।१।३) गि० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **गिलाइ** ।

**[ गिलाणं ]** ग्लान । ग्-ला इति विश्लेषे अनेन लात् पूर्वं इ० । 'लोकात्' (१।१।३) गि० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **गिलाणं** ।

**[ मिलाइ ]** म्लैं गात्रविनामे' (३२) म्लै । 'स्वराणां स्वराः' (४।२३८) म्ला । वर्त्त० तिव् । म्-ला इति विश्लेषे अनेन लात्पूर्वं इ० । 'लोकात्' (१।१।३) मि० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **मिलाइ** ।

**[ मिलाणं ]** म्लान । म्-ला इति विश्लेषे अनेन लात्पूर्वं इ० । 'लोकात्' (१।१।३) मि० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मिलाणं** ।

**[ किलम्मइ ]** 'क्लमूच् ग्लानौ' (१२३७) क्लम् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) क्लम० । क्-ल इति विश्लेषे अनेन लपूर्वं इ० । 'लोकात्' (१।१।३) कि० । 'शकादीनां द्वित्वम्' (४।२३०) म० → म्म० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **किलम्मइ** ।

**[ किलन्तं ]** क्लान्त । क्-ला इति विश्लेषे अनेन लात्पूर्वं इ० । 'लोकात्' (१।१।३) कि० । 'ह्रस्वः संयोगे' (१।८४) ला० → ल० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **किलन्तं** ।

**[ कमो ]** क्लम । 'सर्वत्र ल०' (२।७९) ल्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कमो** ।

**[ पवो ]** प्लव । 'सर्वत्र ल०' (२।७९) ल्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पवो** ।

**[ विप्पवो ]** विप्लव । 'सर्वत्र ल०' (२।७९) ल्लुक् । 'अनादौ०' (२।८९) पस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विप्पवो** ।

**[ सुक्कपक्खो ]** शुक्लपक्ष । 'श-षोः सः' (१।२६०) शु० → सु० । 'सर्वत्र ल०' (२।७९) ल्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । 'क्षः खः क्वचित्तु०' (२।३) क्षस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सुक्कपक्खो** ।

**[ उप्पावेइ ]** 'प्लुंङ् गतौ' (५९८) प्लु, उत्पूर्वम् । उत्प्लवमानं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'उवर्णस्या०' (४।२३३) प्लु० → प्लव० । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'णेरदेदावावे' (३।१४९) णिग्० → ए० - वि० → वे० । 'अदेल्लु०' (३।१५३) प्ल० → प्ला० । 'सर्वत्र ल०' (२।७९) ल्लुक् । 'अनादौ०' (२।८९) पस्य द्वित्वं - पा० → प्पा० **उप्पावेइ** ॥१०६॥

## स्याद्-भव्य-चैत्य-चौर्यसमेषु यात् ॥ ८।२।१०७ ॥

स्यादादिषु चौर्यशब्देन समेषु च शब्देषु संयुक्तस्य यात्पूर्व इद् भवति ॥

सिआ । सिआवाओ । भविओ । चेइअं ॥ चौर्यसम - चोरिअं । थेरिअं । भारिआ । गम्भीरिअं । गहीरिअं । आयरिओ । सुन्दरिअं । सोरिअं । वीरिअं । वरिअं । सूरिओ । धीरिअं । [१]बम्भचरिअं ॥

**[ स्याद्भव्यचैत्यचौर्यसमेषु ]** स्याच्च [२]भव्यं च चैत्यं च [३]चौर्यसमश्च = स्याद्भव्यचैत्यचौर्यसमाः, तेषु = स्याद्भव्यचैत्यचोर्यसमेषु । सप्तमी सुप् ।

**[ यात् ]** य पञ्चमी ङसि ।

**[ सिआ ]** स्यात् । स्-या इति विश्लेषे यात्पूर्वं इ० । 'लोकात्' (१।१।३) सि० । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'अन्त्यव्य०' (१।११) त्लुक् **सिआ** ।

**[ सिआवाओ ]** स्याद्वाद । सिआ पूर्ववत् । वाद इत्यत्र 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सिआवाओ** ।

**[ भविओ ]** भव्य । व्-य इति विश्लेषे यात्पूर्वं इ० । 'लोकात्' (१।१।३) वि० । 'क-ग-च-ज-त-द-प-य-वां०' (१।१७७) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भविओ** ।

**[ चेइअं ]** चैत्य । 'ऐत एत्' (१।१४८) चै० → चे० । त्-य इति विश्लेषे यात्पूर्वं इ० । 'लोकात्' (१।१।३) ति० । 'क-ग-च-ज०' (१।१७७) त-ययोर्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **चेइअं** ।

---

१. सर्वमुद्रितेषु बम्हचरिअं । २. B. C. E. K. भव्यश्च । ३. E. K. चौर्यसमं च ।

**[ चोरिअं ]** चौर्य । र्-य इति विश्लेषे अनेन यात्पूर्वं इ० । 'लोकात्' (१।१।३) रि० । 'औत ओत्' (१।१५९) चौ० → चो० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'क्लीबे०' (१।१७७) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **चोरिअं** ।

**[ थेरिअं ]** स्थैर्य । 'ऐत एत्' (१।१४८) स्थै० → स्थे० । 'क-ग-ट-ड०' (२।७७) स्लुक् । र्-य इति विश्लेषे अनेन यात्पूर्वं इ० । 'लोकात्' (१।१।३) रि० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **थेरिअं** ।

**[ भारिआ ]** भार्या । र्-या इति विश्लेषे अनेन यात्पूर्वं इ० । 'लोकात्' (१।१।३) रि० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **भारिआ** ।

**[ गम्भीरिअं ]** गाम्भीर्य । 'ह्रस्वः संयोगे' (१।८४) गा० → ग० । र्-य इति विश्लेषे अनेन यात्पूर्वं इ० । 'लोकात्' (१।१।३) रि० । 'क-ग-च-ज०' (१।१७७) । य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **गम्भीरिअं** ।

[1]**[ गहीरिअं ]** गभीर्य । 'ख-घ-थ-ध-भाम्' (१।१८७) भी० → ही० । र्-य इति विश्लेषे अनेन यात्पूर्वं इ० । 'लोकात्' (१।१।३) रि० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **गहीरिअं** ।

**[ आयरिओ ]** आचार्य । 'आचार्ये चोऽच्च' (१।७३) चा० → च० । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । र्-य इति विश्लेषे अनेन यात्पूर्वं इ० । 'लोकात्' (१।१।३) रि० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आयरिओ** ।

**[ सुन्दरिअं ]** सौन्दर्य । 'औत ओत्' (१।१५९) सौ० → सो० । 'ह्रस्वः संयोगे' (१।८४) सो० → सु० । ('उत्सौन्दर्यादौ ' (१।१६०) सौ० → सु०) । र्-य इति विश्लेषे यात्पूर्वं इ० । 'लोकात्' (१।१।३) रि० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुन्दरिअं** ।

**[ सोरिअं ]** शौर्य । 'औत ओत्' (१।१५९) शौ० → शो० । 'श-षोः सः' (१।२६०) शो० → सो० । र्-य इति विश्लेषे यात्पूर्वं इ० । 'लोकात्' (१।१।३) रि० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सोरिअं** ।

**[ वीरिअं ]** वीर्य । र्-य इति विश्लेषे यात्पूर्वं इ० । 'लोकात्' (१।१।३) रि० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वीरिअं** ।

**[ वरिअं ]** वर्य । र्-य इति विश्लेषे अनेन यात्पूर्वं इ० । 'लोकात्' (१।१।३) रि० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वरिअं** ।

**[ सूरिओ ]** सूर्य । र्-य इति विश्लेषे यात्पूर्वं इ० । 'लोकात्' (१।१।३) रि० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सूरिओ** ।

---

१. G. टि० - गम्भीरे साध्विति व्युत्पत्त्यनुरोधेनाऽत्र 'गम्भीरिअ' इत्यनेन भवितव्यम् । J. गाम्भीर्यम् । 'ह्रस्वः संयोगे' (१।८४) गा० → ग० । 'अधो म-न-याम्' (२।७८) म्लुक् । 'ख-घ-थ०' (१।१८७) भी० → ही० । अनेन र० → रि० । 'अधो म-न०' (२।७८) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः गहीरिअं । I. पा० म० - गाभीर्य प्रकृतिः । L. गभीर्य प्रकृतिः ।

**[ धीरिअं ]** धैर्य । ईद्धैर्ये (१।१५५) धै० → धी० । र्-य इति विश्लेषे यात्पूर्वं इ० । 'लोकात्' (१।१।३) रि० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **धीरिअं** ।

[1]**[ बम्भचरिअं ]** ब्रह्मचर्य । 'सर्वत्र०' (२।७९) र्लुक् । 'पक्ष्म-श्म०' (२।७४) ह्म० → म्ह० । 'म्हो म्भो वा' (४।४१२) म्ह० → म्भ० । चरिअं पूर्ववत् । **बम्भचरिअं** ॥१०७॥

## स्वप्ने नात् ॥ ८।२।१०८ ॥

स्वप्नशब्दे नकारात् पूर्व इद् भवति ॥ सिविणो ॥

**[ स्वप्ने नात् ]** स्वप्न सप्तमी ङि । न पञ्चमी ङसि ।

**[ सिविणो ]** स्वप्न । अनेन नात्पूर्व इ० । 'लोकात्' (१।१।३) पि० । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'इः स्वप्नादौ' (१।४६) स० → सि० । 'पो वः' (१।२३१) पि० → वि० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि। 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सिविणो** ॥१०८॥

## स्निग्धे वाऽदितौ ॥ ८।२।१०९ ॥

स्निग्धे संयुक्तस्य नात्पूर्वौ अदितौ वा भवतः ॥ सणिद्धं सिणिद्धं । पक्षे-निद्धं ॥

**[ स्निग्धे वाऽदितौ ]** स्निग्ध सप्तमी ङि । वा प्रथमा सि । अच्च इच्च = अदितौ । प्रथमा औ ।

**[ सणिद्धं सिणिद्धं निद्धं [2]णिद्धं ]** स्निग्ध । स्- नि इति विश्लेषे निपूर्वं अ-इ० । 'लोकात्' (१।१।३) स० - सि० । 'नो णः' (१।२२८) नि० → णि० । 'क-ग-ट-ड०' (२।७७) ग्लुक् । 'अनादौ०' (२।८९) धस्य द्वित्वम् । 'द्वितीय-तुर्य०' (२।९०) पूर्वधस्य दः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सणिद्धं - सिणिद्धं** । पक्षे-स्निग्ध । 'क-ग-ट-ड०' (२।७७) स्लुक् - ग्लुक् च । 'अनादौ०' (२।८९) धस्य द्वित्वम्। 'द्वितीय-तुर्ययो०' (२।९०) पूर्वधस्य दः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **निद्धं** । 'नो णः' (१।२२८) **णिद्धं** वा ॥१०९॥

## कृष्णे वर्णे वा ॥ ८।२।११० ॥

कृष्णे वर्णवाचिनि संयुक्तस्य अन्त्यव्यञ्जनात्पूर्वौ अदितौ वा भवतः ॥

कसणो कसिणो कण्हो ॥ वर्ण इति किम् ? विष्णौ कण्हो ॥

**[ कृष्णे वर्णे वा ]** कृष्ण सप्तमी ङि । वर्ण सप्तमी ङि । वा प्रथमा सि ।

**[ कसणो कसिणो कण्हो ]** कृष्ण (२) । 'ऋतोऽत्' (१।१२६) कृ० → क० । ष्-ण इति विश्लेषे अनेन णात्पूर्वं अ०-इ० । 'लोकात्' (१।१।३) ष० - षि० । 'श-षोः सः' (१।२६०) स० - सि० । 'नो णः' (१।२२८) ण० (?) । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कसणो कसिणो** । पक्षे-कृष्ण । 'ऋतोऽत्' (१।१२६) कृ० → क० । 'सूक्ष्म-श्न-ष्ण-स्न०' (२।७५) ष्णस्य ण्हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कण्हो** ।

**[ विष्णौ कण्हो ]** कण्हो पूर्ववत् ॥११०॥

---

१. H. L. बम्हचरिअं । २. A. णिद्धं उदाहरणम् ।

## उच्चाऽर्हति ॥ ८।२।१११ ॥

अर्हत्शब्दे संयुक्तस्य अन्त्यव्यञ्जनात्पूर्व उत्-अदितौ च भवतः ॥ अरुहो अरहो अरिहो । अरुहन्तो अरहन्तो अरिहन्तो ॥

**[ उच्चाऽर्हति ]** उत् प्रथमा सि । च प्रथमा सि । अर्हत् सप्तमी ङि ।

**[ अरुहो अरहो अरिहो ]** 'अर्ह पूजायाम्' (५६४) अर्ह् । अर्हतीति । 'अर्होऽच्' (५।१।९१) अच्प्र० → अ । 'लोकात्' (१।१।३) अर्ह इति जातः । र्-ह इति विश्लेषे अनेन प्रथमे हात्पूर्व उ० । द्वितीये हात्पूर्व अ० । तृतीये हात्पूर्व इ० । 'लोकात्' (१।१।३) रु-र-रि । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अरुहो अरहो अरिहो** ।

**[ अरुहन्तो अरहन्तो अरिहन्तो ]** अर्हन् । अर्हतीति । 'सुग्-द्विषार्हः सत्रि--शत्रु-स्तुत्ये' (५।२।२६) शतृप्र०(अतृश्प्र०) → अत् । 'लोकात्' (१।१।३) अर्हत् । 'न्त-माणौ' (३।१८०) ('गोणादयः' (२।१७४)) अत्स्थाने न्त० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । र्-ह इति विश्लेषे अनेन प्रथमे हात्पूर्व उ० । द्वितीये हात्पूर्व अ० । तृतीये हात्पूर्व इ० । 'लोकात्' (१।१।३) रु-र-रि । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अरुहन्तो अरहन्तो अरिहन्तो** ॥१११॥

## पद्म-छद्म-मूर्ख-द्वारे वा ॥ ८।२।११२ ॥

एषु संयुक्तस्य अन्त्यव्यञ्जनात्पूर्व उद् वा भवति ॥

पउमं [1]पअमं पइमं पोम्मं । छउमं [2]छअमं छइमं छम्मं । मुरुक्खो मुक्खो । दुवारं पक्षे-वारं देरं दारं ॥

**[ पद्मछद्ममूर्खद्वारे ]** पद्म च छद्म च मूर्खश्च द्वारं च = पद्मछद्ममूर्खद्वारम्, तस्मिन् = पद्मछद्ममूर्खद्वारे । सप्तमी ङि ।

**[ वा ]** वा प्रथमा सि ।

**[ पउमं पअमं पइमं पोम्मं ]** पद्म । द्-म इति विश्लेषे अनेन वा मात्पूर्व उ० । द्वितीये अ० । तृतीये इ० । 'लोकात्' (१।१।३) पदुम पदम पदिम इति स्थिते 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **पउमं पअमं पइमं** । पक्षे-पद्म । 'ओत्पद्मे' (१।६१) प० → **पो०** । 'क-ग-ट-ड०' (२।७७) द्लुक् । [3]'अनादौ०' (२।८९) मस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पोम्मं** ।

**[ छउमं छअमं छइमं छम्मं ]** छद्मन् । 'अन्त्यव्यञ्जनस्य' (१।११) न्लुक् । द्-म इति विश्लेषे अनेन वा मात्पूर्व उ० । द्वितीये अ० । तृतीये इ० । 'लोकात्' (१।१।३) छदुम छदम छदिम इति स्थिते 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **छउमं छअमं छइमं** । पक्षे-छद्मन् । 'अन्त्य०' (१।११) न्लुक् । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अनादौ०' (२।८९) मस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **छम्मं** ।

**[ मुरुक्खो मुक्खो ]** मूर्ख । 'ह्रस्वः संयोगे' (१।८४) मू० → मु० । र्-ख इति विश्लेषे अनेन वा खपूर्व उ० । 'लोकात्' (१।१।३) मुरुख । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मुरुक्खो** । पक्षे-मूर्ख । 'ह्रस्वः संयोगे' (१।८४) मू० → मु० । 'सर्वत्र ल०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मुक्खो** ।

---

१-२. A. पअमं पइमं छअमं छइमं उदाहरणानि । ३. G. 'सेवादौ वा' (२।९९) - G. पाठां० - 'तैलादौ' (२।९८) ।

**[ दुवारं वारं देरं दारं ]** द्वार । द्-वा इति विश्लेषे अनेन वा वापूर्व उ० । 'लोकात्' (१।१।३) दु० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दुवारं** । पक्षे-द्वार । 'क-ग-ट-ड०' (२।७७) द्लुक्। प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वारं** । द्वार । 'सर्वत्र ल०' (२।७९) व्लुक्। 'द्वारे वा' (१।७९) विकल्पेन दा० → दे० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **देरं** । द्वार । 'सर्वत्र ल०' (२।७९) व्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दारं** ॥११२॥

## तन्वीतुल्येषु ॥ ८।२।११३ ॥

उकारान्ता ङीप्रत्ययान्तास्तन्वीतुल्याः तेषु संयुक्तस्य अन्त्यव्यञ्जनात्पूर्व उकारो भवति ॥

तणुवी । लहुवी । गरुवी । बहुवी । पुहुवी । मउवी ॥ क्वचिदन्यत्रापि-स्रुघ्नम् → सुरुग्घं ॥ आर्षे-सूक्ष्मम् → सुहुमं ॥

**[ तन्वीतुल्येषु ]** [1]तन्वा(न्व्याः) तुल्याः(ल्यः) = तन्वीतुल्याः(ल्यः) तेषु ।

**[ तणुवी ]** तन्वी । न्-वी इति विश्लेषे अनेन वीपूर्वं उ० । 'लोकात्' (१।१।३) नु० । 'नो णः' (१।२२८) नु० → णु० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **तणुवी** ।

**[ लहुवी ]** लघ्वी । घ्-वी इति विश्लेषे अनेन वीपूर्वं उ० । 'लोकात्' (१।१।३) घु० । 'ख-घ-थ-ध-भाम्' (१।१८७) घस्य हः । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **लहुवी** ।

**[ गरुवी ]** गुर्वी । 'उतो मुकुलादिष्वत्' (१।१०७) गु० → ग० । र्-वी इति विश्लेषे अनेन वीपूर्वं उ० । 'लोकात्' (१।१।३) रु० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **गरुवी** ।

**[ बहुवी ]** बह्वी । ह्-वी इति विश्लेषे अनेन वीपूर्वं उ० । 'लोकात्' (१।१।३) हु० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **बहुवी** ।

**[ पुहुवी ]** पृथ्वी । 'उदृत्वादौ' (१।१३१) पृ० → पु० । थ्-वी इति विश्लेषे अनेन वीपूर्वं उ० । 'लोकात्' (१।१।३) थु० । 'ख-घ-थ-ध-भाम्' (१।१८७) थु० → हु० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **पुहुवी** ।

**[ मउवी ]** मृद्वी । 'ऋतोऽत्' (१।१२६) मृ० → म० । द्-वी इति विश्लेषे अनेन वीपूर्वं उ० । 'लोकात्' (१।१।३) दु० । 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **मउवी** ।

**[ सुरुग्घं ]** स्रुघ्न । स्-रु इति विश्लेषे अनेन रुपूर्वं उ० । 'लोकात्' (१।१।३) सु० । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) घस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वघस्य गः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुरुग्घं** ।

**[ सुहुमं ]** आर्षे सूक्ष्मशब्देऽपि उकारः । सूक्ष्म । 'ह्रस्वः संयोगे' (१।८४) सू० → सु० । क्ष्-म इति विश्लेषे मपूर्वं उ० । 'लोकात्' (१।१।३) क्षु० । 'सूक्ष्मे हो वा' (     ) क्षु० → हु० । ['क्षः खः क्वचित्तु०' (२।३) क्षु० → खु० । 'ख-घ-थ०' (१।१८७) खु० → हु०] । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुहुमं** ॥११३॥

---

१. K. तन्व्या तुल्याः ।

## एकस्वरे श्वः-स्वे ॥ ८।२।११४ ॥

एकस्वरे पदे यौ श्वस्-स्व इत्येतौ तयोरन्त्यव्यञ्जनात्पूर्व उद् भवति ॥

श्वः कृतम् → सुवे कयं । स्वे जनाः → सुवे जणा ॥ एकस्वर इति किम् ? स्वजनः → सयणो ॥

**[ एकस्वरे ]** एकस्वर सप्तमी ङि ।

**[ श्वःस्वे ]** श्वस् च स्वश्च = श्वःस्वम्, तस्मिन् = श्वःस्वे । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् । सप्तमी ङि । 'अव्ययस्य' (३।२।७) ङिलुप् ।

**[ सुवे कयं ]** श्वस् । श्-व इति विश्लेषे अनेन वपूर्व उ० । 'लोकात्' (१।१।३) शु० । 'श-षोः सः' (१।२६०) शु० → सु० । 'एच्छय्यादौ' (१।५७) व० → वे० । 'अन्त्य०' (१।११) स्लुक् **सुवे** । कृत । 'ऋतोऽत्' (१।१२६) कृ० → क० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कयं** ।

**[ सुवे जणा ]** स्व । प्रथमा जस् । स्-व इति विश्लेषे अनेन वपूर्व उ० । 'लोकात्' (१।१।३) सु० । 'अतः सर्वादेर्डेर्जसः' (३।५८) जस्० → डे० → ए० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् **सुवे** । जन । प्रथमा जस् । 'नो णः' (१।२२८) न० → ण० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्०' (३।१२) ण० → णा० **जणा** ।

**[ सयणो ]** स्वजन । 'सर्वत्र ल०' (२।७९) व्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सयणो** ॥११४॥

## ज्यायामीत् ॥ ८।२।११५ ॥

ज्याशब्दे अन्त्यव्यञ्जनात्पूर्व ईद् भवति ॥ जीआ ॥

**[ ज्यायामीत् ]** ज्या सप्तमी ङि । ईत् प्रथमा सि ।

**[ जीआ ]** ज्या । ज्-या इति विश्लेषे अनेन यापूर्वं ई० । 'लोकात्' (१।१।३) जी० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **जीआ** ॥११५॥

## करेणू-वाराणस्यो र-णोर्व्यत्ययः ॥ ८।२।११६ ॥

अनयो रेफ-णकारयोर्व्यत्ययः स्थितिपरिवृत्तिर्भवति ॥

कणेरू । वाणारसी ॥ स्त्रीलिङ्गनिर्देशात् पुंसि न भवति । एसो करेणू ॥

**[ करेणूवाराणस्योः ]** करेणूश्च वाराणसी च = करेणूवाराणस्यौ, तयोः = करेणूवाराणस्योः । षष्ठी ओस् ।

**[ रणोः ]** रश्च ण् च = रणौ, तयोः = रणोः । षष्ठी ओस् ।

**[ व्यत्ययः ]** व्यत्यय प्रथमा सि ।

**[ कणेरू ]** करेणू । अनेन व्यत्ययः । रेणूस्थाने णेरू० । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **कणेरू** ।

**[ वाणारसी ]** वाराणसी । अनेन व्यत्ययः । राणस्थाने णार० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **वाणारसी** ।

**[एसो करेणू]** एतद् । 'अन्त्यव्य०' (१।११) द्लुक् । 'तदश्च तः सोऽक्लीबे' (३।८६) तस्य सः । प्रथमा सि । **एसो** ।

करेणु । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **करेणू** ॥११६॥

## आलाने ल-नोः ॥ ८।२।११७ ॥

आलानशब्दे लनोर्व्यत्ययो भवति ॥ आणालो । आणाल-क्खम्भो ॥

**[आलाने लनोः]** आलान सप्तमी ङि । लश्च न् च = लनौ, तयोः = लनोः । षष्ठी ओस् ।

**[आणालो]** आलान । अनेन व्यत्ययः । लानस्थाने नाल० । 'नो णः' (१।२२८) ना० → णा० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आणालो** ।

**[आणालक्खम्भो]** आलान-स्तम्भ । अनेन लानस्थाने नाल० । 'नो णः' (१।२२८) ना० → णा० । 'स्तम्भे स्तो वा' (२।८) स्तस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आणालक्खम्भो** ॥११७॥

## अचलपुरे च-लोः ॥ ८।२।११८ ॥

अचलपुरे चकार-लकारयोर्व्यत्ययो भवति ॥ अलचपुरं ॥

**[अचलपुरे चलोः]** अचलपुर सप्तमी ङि । च च ल् च = चलौ, तयोः = चलोः । षष्ठी ओस् ।

**[अलचपुरं]** अचलपुर । अनेन व्यत्ययः । चलस्थाने लच० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अलचपुरं** ॥११८॥

## महाराष्ट्रे ह-रोः ॥ ८।२।११९ ॥

महाराष्ट्रशब्दे ह-रोर्व्यत्ययो भवति ॥ मरहट्ठं ॥

**[महाराष्ट्रे हरोः]** महाराष्ट्र सप्तमी ङि । हश्च र् च = हरौ, तयोः = हरोः । षष्ठी ओस् ।

**[मरहट्ठं]** महाराष्ट्र । 'महाराष्ट्रे' (१।६९) हा० → ह० । 'ह्रस्वः संयोगे' (१।८४) रा० → र० । अनेन व्यत्ययः । हरस्थाने रह० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'ष्टस्याऽनुष्ट्रेष्टा०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मरहट्ठं** ॥११९॥

## ह्रदे ह-दोः ॥ ८।२।१२० ॥

ह्रदशब्दे हकार-दकारयोर्व्यत्ययो भवति ॥ द्रहो ॥ आर्षे-हरए महपुण्डरिए ॥

**[ह्रदे हदोः]** ह्रद सप्तमी ङि । हश्च द् च = हदौ, तयोः = हदोः । षष्ठी ओस् ।

**[द्रहो]** ह्रद । अनेन व्यत्ययः । ह्रदस्थाने द्रह० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **द्रहो** ।

**[हरए महपुण्डरिए]** ह्रद । प्रथमा सि । 'अतः एत्सौ पुंसि मागध्याम्' (४।२८७) द० → दे० । 'अन्त्यव्य०' (१।११) स्लुक् । आर्षत्वात् ह्र० → हर० । 'क-ग-च-ज०' (१।१७७) द्लुक् **हरए** ।

महापुण्डरीक । 'दीर्घ-ह्रस्वौ मिथो वृत्तौ' (१।४) हा० → ह० । 'पानीयादिष्वित्' (१।१०१) री० → रि० । **प्रथमा** सि । 'अत एत्सौ पुंसि०' (४।२८७) क० → के० । 'क-ग-च-ज०' (१।१७७) कलुक् । 'अन्त्य०' (१।११) स्लुक् **महपुण्डरिए** ॥१२०॥

## हरिताले र-लोर्नवा ॥ ८।२।१२१ ॥

हरितालशब्दे रकार-लकारयोर्व्यत्ययो वा भवति ॥ हलिआरो हरिआलो ॥

**[ हरिताले रलोर्नवा ]** हरिताल सप्तमी ङि । रश्च ल् च = रलौ, तयोः = रलोः । षष्ठी ओस् । नवा प्रथमा सि ।

**[ हलिआरो हरिआलो ]** हरिताल । अनेन वा व्यत्ययः । रिस्थाने लि० - लस्थाने र० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **हलिआरो** । पक्षे-हरिताल । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **हरिआलो** ॥१२१॥

## लघुके ल-होः ॥ ८।२।१२२ ॥

लघुकशब्दे घस्य हत्वे कृते लहोर्व्यत्ययो वा भवति ॥

हलुअं लहुअं ॥ घस्य व्यत्यये कृते पदादित्वात् हो न प्राप्नोतीति हकरणम् ॥

**[ लघुके लहोः ]** लघुक सप्तमी ङि । लश्च ह् च = लहौ, तयोः = लहोः । षष्ठी ओस् ।

**[ हलुअं लहुअं ]** लघुक । 'ख-घ-थ-ध-भाम्' (१।१८७) घु० → हु० । अनेन वा व्यत्ययः । लहुस्थाने हलु० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **हलुअं** । पक्षे-लघुक । 'ख-घ-थ०' (१।१८७) घु० → हु० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **लहुअं** ॥१२२॥

## ललाटे ल-डोः ॥ ८।२।१२३ ॥

ललाटशब्दे लकार-डकारयोर्व्यत्ययो भवति वा ॥

णडालं णलाडं ॥ 'ललाटे च' (१।२५७) इति आदेर्लस्य णविधानादिह द्वितीयो लः स्थानी ॥

**[ ललाटे लडोः ]** ललाट सप्तमी ङि । लश्च ड् च = लडौ, तयोः = लडोः । षष्ठी ओस् ।

**[ णडालं णलाडं ]** ललाट । 'ललाटे च' (१।२५७) आदिलस्य णः । अनेन वा व्यत्ययः । लाटस्थाने टाल० । 'टो डः' (१।१९५) टा० → डा० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **णडालं** । पक्षे - ललाट । 'ललाटे च' (१।२५७) आदिलस्य णः । 'टो डः' (१।१९५) ट० → ड० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **णलाडं** ॥१२३॥

## ह्ये ह्योः ॥ ८।२।१२४ ॥

ह्यशब्दे हकार-यकारयोर्व्यत्ययो वा भवति ॥ गुह्यम् → गुय्हं गुज्झं । सह्यः → सय्हो सज्झो ॥

**[ ह्ये ह्योः ]** ह्य सप्तमी ङि । ह् च य् च = ह्यौ, तयोः = ह्योः । षष्ठी ओस् ।

**[ गुय्हं, गुज्झं ]** गुह्य । अनेन वा हस्थाने यः - यस्थाने हः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **गुय्हं** । पक्षे-गुह्य । 'साध्वस-ध्य-ह्यां झः' (२।२६) ह्य० → झ० । 'अनादौ०' (२।८९)

झस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वझस्य ज० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **गुज्झं** ।

**[ सय्हो, सज्झो ]** सह्य । अनेन वा हस्थाने यः - यस्थाने हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सय्हो** । पक्षे-सह्य । 'साध्वस-ध्य-ह्यां झः' (२।२६) ह्य० → झ० । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वझस्य ज० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सज्झो** ॥१२४॥

## स्तोकस्य थोक्क-थोव-थेवाः ॥ ८।२।१२५ ॥

स्तोकशब्दस्य एते त्रय आदेशा भवन्ति वा ॥ थोक्कं थोवं थेवं । पक्षे-थोअं ॥

**[ स्तोकस्य ]** स्तोक षष्ठी ङस् ।

**[ थोक्कथोवथेवाः ]** थोक्कश्च थोवश्च थेवश्च = थोक्कथोवथेवाः । प्रथमा जस् ।

**[ थोक्कं थोवं थेवं थोअं ]** स्तोक (३) । अनेन वा प्रथमे स्तोकस्य थोक्क० । द्वितीये स्तोकस्य थोव० । तृतीये स्तोकस्य थेव०' । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **थोक्कं थोवं थेवं** । पक्षे-स्तोक । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्तो० → थो० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **थोअं** ॥१२५॥

## दुहितृ-भगिन्योर्धूआ-बहिण्यौ ॥ ८।२।१२६ ॥

अनयोरेतावादेशौ वा भवतः ॥ धूआ दुहिआ । बहिणी भइणी ॥

**[ दुहितृभगिन्योः ]** दुहिता च भगिनी च = दुहितृभगिन्यौ, तयोः = दुहितृभगिन्योः । षष्ठी ओस् ।

**[ धूआबहिण्यौ ]** धूआ च बहिणी च = धूआबहिण्यौ । प्रथमा औ ।

**[ धूआ दुहिआ ]** दुहितृ । अनेन वा दुहितृस्थाने धूआ । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् धूआ । पक्षे-दुहितृ । प्रथमा सि । 'स्वस्रादेर्डा' (३।२५) सि० → डा० → आ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् **दुहिआ** ।

**[ बहिणी भइणी ]** भगिनी । अनेन वा भगिनीस्थाने बहिणी । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **बहिणी** । पक्षे-भगिनी । 'क-ग-च-ज०' (१।१७७) ग्लुक् । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **भइणी** ॥१२६॥

## वृक्ष-क्षिप्तयो रुक्ख-छूढौ ॥ ८।२।१२७ ॥

वृक्ष-क्षिप्तयोर्यथासंख्यं रुक्ख-छूढ इत्यादेशौ वा भवतः ॥ रुक्खो वच्छो । छूढं खित्तं । उच्छूढं उक्खित्तं ॥

**[ वृक्षक्षिप्तयोः ]** वृक्षश्च क्षिप्तं च = वृक्षक्षिप्तम्(प्ते), तयोः = वृक्षक्षिप्तयोः । षष्ठी ओस् ।

**[ रुक्खछूढौ ]** रुक्ख - छूढ प्रथमा औ ।

**[ रुक्खो वच्छो ]** वृक्ष । अनेन वा वृक्षस्थाने रुक्ख० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **रुक्खो** । पक्षे-वृक्ष । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'छोऽक्ष्यादौ' (२।१७) क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वच्छो** ।

**[ छूढं खित्तं ]** क्षिप्त । अनेन वा क्षिप्तस्थाने छूढ० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **छूढं** । पक्षे-क्षिप्त । 'क्षः खः क्वचित्तु०' (२।३) क्षि० → खि० । 'क-ग-ट-ड०' (२।७७) प्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **खित्तं** ।

**[ उच्छूढं उक्खित्तं ]** उत्पूर्वं क्षिप्तम् । शेषं पूर्ववत् ॥१२७॥

## वनिताया विलया ॥ ८।२।१२८ ॥

वनिताशब्दस्य विलया इत्यादेशो वा भवति ॥ विलया वणिआ ॥ विलयेति संस्कृतेऽपीति केचित् ॥

**[ वनिताया विलया ]** वनिता षष्ठी ङस् । विलया प्रथमा सि ।

**[ विलया वणिआ ]** वनिता । अनेन वा वनिता० → विलया० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **विलया** । पक्षे-वनिता । 'नो णः' (१।२२८) नस्य णः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **वणिआ** ॥१२८॥

## गौणस्येषतः कूरः ॥ ८।२।१२९ ॥

ईषच्छब्दस्य गौणस्य कूर इत्यादेशो वा भवति ॥ चिंच व्व कूर - पिक्का । पक्षे- ईसि ॥

**[ गौणस्येषतः कूरः ]** गौण षष्ठी ङस् । ईषत् षष्ठी ङस् । कूर प्रथमा सि ।

**[ चिंच व्व कूरपिक्का, पक्षे-ईसि ]** चिंचा इव । 'मिव-पिव-विव-व्व-व-विअ इवार्थे वा' (२।१८२) इवस्य व्व० । 'ह्रस्वः संयोगे' (१।८४) चा० → च० **चिंच व्व** ।

ईषत् पक्वा । अनेन वा ईषत्स्थाने कूर० । 'पक्वा-ऽङ्गार-ललाटे वा' (१।४७) प० → पि० । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **कूरपिक्का** ।

[1]बाला लायण्ण-निही, अहिणव-छल्लि व्व माऊलिंगस्स ।
**चिंच व्व कूरपिक्का**, करेइ लालाउलं हिययं ॥१॥

अस्य व्याख्या-लावण्यनिधिर्बाला मातुलिङ्गस्य - बीजपूरस्य अभिनवत्वगिव ईषत् पक्वा चिंचा इव - अम्लिका इव पुरुषाणां हृदयं लालाकुलं करोति । अत्र पूर्वपदं गौणं उत्तरपदं मुख्यम् । पक्षे-ईषत् । 'अन्त्य०' (१।११) त्लुक् । 'श-षोः सः' (१।२६०) ष० → स० । 'इः स्वप्नादौ' (१।४६) स० → सि । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **ईसि** ॥१२९॥

## स्त्रिया इत्थी ॥ ८।२।१३० ॥

स्त्रीशब्दस्य इत्थी इत्यादेशो वा भवति ॥ इत्थी थी ॥

**[ स्त्रिया इत्थी ]** स्त्री षष्ठी ङस् । इत्थी प्रथमा सि ।

---

१. बाला लावण्णणिही नवल्लवल्लि व्व माउलिंगस्स । **चिंचि व्व दूरपक्का** करेइ लालाउयं हिययं ॥
[व० ल० - लावण्णवज्जा-३१८]
बाला लावण्यनिधिर्नवीनवल्लीव मातुलिङ्गस्य । चिञ्चेव दूरपक्वा करोति लालाकुलं(लालायुतं) हृदयम् ॥

**[ इत्थी थी ]** स्त्री । अनेन वा स्त्रीशब्दस्य इत्थी । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **इत्थी** । पक्षे-स्त्री । 'सर्वत्र' ल-व०' (२।७९) र्लुक् । 'स्तस्य थोऽसमस्त०' (२।४५) स्ती० → थी० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **थी** ॥१३०॥

## धृतेर्दिहिः ॥ ८।२।१३१ ॥

धृतिशब्दस्य दिहिरित्यादेशो वा भवति ॥ दिही धिई ॥

**[ धृतेर्दिहिः ]** धृति षष्ठी ङस् । दिहि प्रथमा सि ।

**[ दिही धिई ]** धृति । अनेन वा धृतिस्थाने दिहि० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **दिही** । पक्षे- धृति । 'इत्कृपादौ' (१।१२८) धृ० → धि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **धिई** ॥१३१॥

## मार्जारस्य मञ्जर-वञ्जरौ ॥ ८।२।१३२ ॥

मार्जारशब्दस्य मञ्जर-वञ्जर इत्यादेशौ वा भवतः ॥ मञ्जरो वञ्जरो । पक्षे-मज्जारो ॥

**[ मार्जारस्य मञ्जरवञ्जरौ ]** मार्जार षष्ठी ङस् । मञ्जरश्च वञ्जरश्च = मञ्जरवञ्जरौ । प्रथमा औ ।

**[ मञ्जरो वञ्जरो ]** मार्जार । अनेन मार्जारस्य मञ्जर-वञ्जर इत्यादेशौ । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मञ्जरो वञ्जरो** ।

**[ मज्जारो ]** मार्जार । 'ह्रस्वः संयोगे' (१।८४) मा० → म० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मज्जारो** ॥१३२॥

## वैडूर्यस्य वेरुलिअं ॥ ८।२।१३३ ॥

वैडूर्यशब्दस्य वेरुलिअं इत्यादेशो वा भवति ॥ वेरुलिअं वेडुज्जं ॥

**[ वैडूर्यस्य वेरुलिअं ]** वैडूर्य षष्ठी ङस् । वेरुलिअ प्रथमा सि ।

**[ वेरुलिअं वेडुज्जं ]** वैडूर्य । अनेन वैडूर्यस्य वेरुलिअ । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वेरुलिअं** । पक्षे-वैडूर्य । 'ऐत एत्' (१।१४८) वै० → वे० । 'ह्रस्वः संयोगे' (१।८४) डू० → डु० । 'द्य-य्य-र्यां-जः' (२।२४) र्यस्य जः । 'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वेडुज्जं** ॥१३३॥

## एण्हि-एत्ताहे इदानीमः ॥ ८।२।१३४ ॥

अस्य एतावादेशौ वा भवतः ॥ एण्हि । एत्ताहे । इआणिं ॥

**[ एण्हि - एत्ताहे ]** एण्हि - एत्ताहे प्रथमा औ ।

**[ इदानीमः ]** इदानीम् षष्ठी ङस् ।

**[ एण्हि एत्ताहे इआणिं ]** इदानीम् । अनेन वा "इदानीम्" स्थाने एण्हि - एत्ताहे इत्यादेशौ **एण्हि - एत्ताहे** । पक्षे-इदानीम् । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'पानीयादिष्वित्' (१।१०१) नी० → नि० । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **इआणिं** ॥१३४॥

## पूर्वस्य पुरिमः ॥ ८।२।१३५ ॥

पूर्वस्य स्थाने पुरिम इत्यादेशो वा भवति ॥ पुरिमं पुव्वं ॥

**[ पूर्वस्य पुरिमः ]** पूर्व षष्ठी ङस् । पुरिम प्रथमा सि ।

**[ पुरिमं पुव्वं ]** पूर्व । अनेन वा पूर्वस्य स्थाने पुरिम० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पुरिमं** । पक्षे-पूर्व । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । 'ह्रस्वः संयोगे' (१।८४) पू० → पु० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पुव्वं** ॥१३५॥

## त्रस्तस्य हित्थ-तट्ठौ ॥ ८।२।१३६ ॥

त्रस्तशब्दस्य हित्थ-तट्ठ इत्यादेशौ वा भवतः ॥ हित्थं तट्ठं तत्थं ॥

**[ त्रस्तस्य हित्थतट्ठौ ]** त्रस्त षष्ठी ङस् । हित्थश्च तट्ठश्च = हित्थतट्ठौ । प्रथमा औ ।

**[ हित्थं तट्ठं ]** त्रस्त । अनेन वा त्रस्तस्य हित्थ-तट्ठ । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **हित्थं तट्ठं** ।

**[ तत्थं ]** त्रस्त । 'सर्वत्र०' (२।७९) र्लुक् । 'स्तस्य थो०' (२।४५) स्तस्य थः । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय तु०' (२।९०) पूर्वथस्य तः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तत्थं** ॥१३६॥

## बृहस्पतौ बहो भयः ॥ ८।२।१३७ ॥

बृहस्पतिशब्दे बह इत्यस्यावयवस्य भय इत्यादेशो वा भवति ॥

भयस्सई भयप्फई भयप्पई । पक्षे- बहस्सई बहप्फई बहप्पई ॥

'वा बृहस्पतौ' (१।१३८) इति इकारे उकारे च बिहस्सई बिहप्फई बिहप्पई । बुहस्सई बुहप्फई बुहप्पई ॥

**[ बृहस्पतौ बहो भयः ]** बृहस्पति सप्तमी ङि । बह् षष्ठी ङस् । भय प्रथमा सि ।

**[ भयस्सई ]** बृहस्पति । 'ऋतोऽत्' (१।१२६) बृ० → ब० । अनेन वा बह इत्यस्य भय इति । 'बृहस्पति-वनस्पत्योः सो वा' (२।६९) स्पस्य सः । 'अनादौ०' (२।८९) द्वित्वं - स्स० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **भयस्सई** ।

**[ भयप्फई ]** बृहस्पति । 'ऋतोऽत्' (१।१२६) बृ० → ब० । अनेन वा बह इत्यस्य भय इति । 'ष्प-स्पयोः फः' (२।५३) स्पस्य फः । 'अनादौ०' (२।८९) द्वित्वं - फ्फ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **भयप्फई** ।

**[ भयप्पई ]** बृहस्पति । 'ऋतोऽत्' (१।१२६) बृ० → ब० । अनेन वा बह इत्यस्य भय इति । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'अनादौ०' (२।८९) द्वित्वं-प्प० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **भयप्पई** ।

**[ बहस्सई ]** बृहस्पति । 'ऋतोऽत्' (१।१२६) बृ० → ब० । 'बृहस्पति - वनस्पत्योः सो वा' (२।६९) स्पस्य स० । 'अनादौ०' (२।८९) द्वित्वं-स्स० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **बहस्सई** ।

**[ बहप्फई ]** बृहस्पति । 'ऋतोऽत्' (१।१२६) बृ० → ब० । 'ष्प-स्पयोः फः' (२।५३) स्पस्य फः । 'अनादौ०' (२।८९) द्वित्वं-फ्फ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **बहप्फई** ।

**[ बहप्पई ]** बृहस्पति । 'ऋतोऽत्' (१।१२६) बृ० → ब० । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'अनादौ०' (२।८९) द्वित्वं-प्प० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **बहप्पई** ।

**[ बिहस्सई ]** बृहस्पति । 'वा बृहस्पतौ' (१।१३८) बृ० → बि० । 'बृहस्पति-वनस्पत्योः सो वा' (२।६९) स्पस्य स० । 'अनादौ०' (२।८९) द्वित्वं-स्स० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **बिहस्सई** ।

**[ बिहप्फई ]** बृहस्पति । 'वा बृहस्पतौ' (१।१३८) बृ० → बि० । 'ष्प-स्पयोः फः' (२।५३) स्पस्य फः । 'अनादौ०' (२।८९) द्वित्वं-फ्फ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **बिहप्फई** ।

**[ बिहप्पई ]** बृहस्पति । 'वा बृहस्पतौ' (१।१३८) बृ० → बि० । शेषं 'बहप्पई' वत् ।

**[ बुहस्सई ]** बृहस्पति । 'वा बृहस्पतौ' (१।१३८) बृ० → बु० । शेषं 'बिहस्सई' वत् ।

**[ बुहप्फई ]** बृहस्पति । 'वा बृहस्पतौ' (१।१३८) बृ० → बु० । शेषं 'बिहप्फई' वत् ।

**[ बुहप्पई ]** बृहस्पति । 'वा बृहस्पतौ' (१।१३८) बृ० → बु० । शेषं 'बिहप्पई' वत् ॥१३७॥

**मलिनोभय-शुक्ति-छुप्ता-ऽऽरब्ध-पदातेर्मइला-ऽवह-सिप्पि-छिक्का-ऽऽढत्त-पाइक्कं ॥ ८।२।१३८ ॥**

मलिनादीनां यथासंख्यं मइलादय आदेशा वा भवन्ति ॥

मलिन → मइलं मलिणं । उभय → अवहं । उवहमित्यपि केचित् । अवहोआसं । उभयबलं । आर्षे-उभयोकालं । शुक्ति → सिप्पी सुत्ती । छुप्त → छिक्को छुत्तो । आरब्ध → आढत्तो आरद्धो । पदाति - पाइक्को पयाई ॥

**[ मलिनोभयशुक्तिछुप्ताऽऽरब्धपदातेः ]** मलिनं च उभयं च शुक्तिश्च छुप्तश्च आरब्धश्च पदातिश्च = मलिनोभयशुक्तिछुप्ताऽऽरब्धपदाति, तस्य = मलिनोभयशुक्तिछुप्ताऽऽरब्धपदातेः ।

**[ मइलाऽवहसिप्पिछिक्काऽऽढत्तपाइक्कं ]** मइलं च अवहं च सिपिश्च छिक्कश्च आढत्तश्च पाइक्कश्च = मइलाऽवहसिप्पिछिक्काऽऽढत्तपाइक्कम् ।

**[ मइलं मलिणं ]** मलिन । अनेन वा मलिनशब्दस्य मइल० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मइलं** । पक्षे-मलिन । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मलिणं** ।

**[ अवहं उवहं ]** उभय । अनेन वा उभयस्य अवह इति । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः अवहं । केचित् उवहमपीच्छति - **उवहं** ।

**[ अवहोआसं उभयबलं उभयोकालं ]** उभयावकाश । अनेन वा उभयस्य अवह इत्यादेशः । 'अवापोते' (१।१७२) अवस्य ओ० । 'लुक्' (१।१०) हमध्यादलोपः । 'लोकात्' (१।१३) ह० → ह्० । 'क-ग-च-ज०' (१।१७७) क्लुक् ।

'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अवहोआसं** । पक्षे-उभयबल । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **उभयबलं** । आर्षे-**उभयोकालमिति** ।

**[ सिप्पी सुत्ती ]** शुक्ति । अनेन शुक्तेः सिप्पि० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **सिप्पी** । पक्षे-शुक्ति । 'श-षोः सः' (१।२६०) शु० → सु० । 'क-ग०' (२।७७) क्लुक् । 'अनादौ०' (२।८९) द्वित्वं - त्ति० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **सुत्ती** ।

**[ छिक्को छुत्तो ]** छुप्त । अनेन वा छुप्तस्य छिक्क० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **छिक्को** । पक्षे-छुप्त । 'क-ग-ट-ड०' (२।७७) प्लुक् । 'अनादौ०' (२।८९) द्वित्वं - त्त० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **छुत्तो** - स्पृष्टः ।

**[ आढत्तो आरद्धो ]** आरब्ध । अनेन वा आरब्धस्य आढत्त इति । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आढत्तो** । पक्षे-आरब्ध । 'सर्वत्र ल-व०' (२।७९) ब्लुक् । 'अनादौ०' (२।८९) द्वित्वं - ध्ध० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वधस्य दः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आरद्धो** ।

**[ पाइक्को पयाई ]** पदाति । अनेन वा पदाति० → पाइक्क० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पाइक्को** । पक्षे-पदाति । 'क-ग-च-ज०' (१।१७७) द्लुक् - त्लुक् च । प्रथमा सि । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० । 'अक्लीबे सौ' (३।१९) दीर्घः इ० → ई० । अन्त्यव्य०' (१।११) स्लुक् **पयाई** ॥१३८॥

## दंष्ट्राया दाढा ॥ ८।२।१३९ ॥

पृथग्योगाद्वेति निवृत्तम् ॥

दंष्ट्राशब्दस्य दाढा इत्यादेशो भवति ॥ दाढा ॥ अयं संस्कृतेऽपि ॥

**[ दंष्ट्राया दाढा ]** दंष्ट्रा षष्ठी ङस् । दाढा प्रथमा सि ।

**[ दाढा ]** दंष्ट्रा । अनेन दंष्ट्राया दाढा० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **दाढा** ॥१३९॥

## बहिसो बाहिं - बाहिरौ ॥ ८।२।१४० ॥

बहिःशब्दस्य बाहिं - बाहिर इत्यादेशौ भवतः ॥ बाहिं । बाहिरं ॥

**[ बहिसः ]** बहिस् षष्ठी ङस् ।

**[ बाहिंबाहिरौ ]** बाहिं च बाहिरश्च = बाहिंबाहिरौ । प्रथमा औ ।

**[ बाहिं ]** बहिस् । अनेन बहिस्० → बाहिं० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **बाहिं** ।

**[ बाहिरं ]** बहिस् । अनेन बहिस्० → बाहिर० । प्रथमा सि । सेर्बाहुलकान्मः - स्० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **बाहिरं** ॥१४०॥

## अधसो हेट्ठं ॥ ८।२।१४१ ॥

अधस्शब्दस्य [1]हेट्ठ इत्यादेशो भवति ॥ हेट्ठं ॥

---

१. G. टि० - अमकारान्तनिर्देशो 'हेट्ठिट्ठियसूरनिवारणाय' इत्यादि सिद्ध्यर्थम् ।

**[ अधसः ]** अधस् षष्ठी ङस् ।

**[ हेट्ठं ]** हेट्ठ प्रथमा सि ।

**[ हेट्ठं ]** अधस् । अनेन अधस्० → हेट्ठ० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **हेट्ठं** ॥१४१॥

## मातृ-पितुः स्वसुः सिआ-छौ ॥ ८।२।१४२ ॥

मातृ-पितृभ्यां परस्य स्वसृशब्दस्य सिआ-छा इत्यादेशौ भवतः ॥ माउसिआ माउच्छा । पिउसिआ पिउच्छा ॥

**[ मातृपितुः स्वसुः ]** मातृपितृ पञ्चमी ङसि । स्वसृ षष्ठी ङस् ।

**[ सिआछौ ]** सिआ-छा प्रथमा औ ।

**[ माउसिआ ]** मातृस्वसृ । अनेन स्वसृ० → सिआ० । 'गौणाऽन्त्यस्य' (१।१३४) तृ० → तु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **माउसिआ** ।

**[ माउच्छा ]** मातृस्वसृ । अनेन स्वसृ० → छा० । 'गौणाऽन्त्यस्य' (१।१३४) तृ० → तु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'आन्तान्ताड्डाः' (४।४३२) डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'लोकात्' (१।१।३) **माउच्छा** ।

**[ पिउसिआ ]** पितृस्वसृ । अनेन स्वसृ० → सिआ० । शेषं "माउसिआ"वत् **पिउसिआ** ।

**[ पिउच्छा ]** पितृस्वसृ । अनेन स्वसृ० → छा० । शेषं "माउच्छा" वत् **पिउच्छा** ॥१४२॥

## [1]तिर्यचस्तिरिच्छिः ॥ ८।२।१४३ ॥

तिर्यच्शब्दस्य तिरिच्छि[ः] इत्यादेशो भवति ॥

तिरिच्छि पेच्छइ ॥ आर्षे - तिरिआ इत्यादेशोऽपि । तिरिआ ॥

**[ तिर्यचस्तिरिच्छिः ]** तिर्यच् षष्ठी ङस् । तिरिच्छि प्रथमा सि ।

**[ तिरिच्छि पेच्छइ, तिरिआ ]** तिर्यच् । अनेन तिर्यच्० → **तिरिच्छि०** । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'दृशूं प्रेक्षणे' (४९५) दृश् । 'दृशो निअच्छ - पेच्छा०' (४।१८१) दृश्० → पेच्छ आदेशः । वर्त्त० तिव् । 'त्यादीनामाद्यत्रय०' (३।१३९) तिव्० → इ० **पेच्छइ** । आर्षे - **तिरिआ** ॥१४३॥

## गृहस्य घरोऽपतौ ॥ ८।२।१४४ ॥

गृहशब्दस्य घर इत्यादेशो भवति, पतिशब्दश्चेत् परो न भवति ॥

घरो । घर-सामी । राय-हरं ॥ अपताविति किम् ? गह-वई ॥

**[ गृहस्य ]** गृह षष्ठी ङस् ।

**[ घरोऽपतौ ]** घर प्रथमा सि । अपति सप्तमी ङि ।

**[ घरो ]** गृह । अनेन गृह० → घर आदेशः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **घरो** ।

---

१. B. C. तिर्यच् तिरिच्छि ।

**[ घरसामी ]** गृह-स्वामी । गृहस्य स्वामी । अनेन गृहस्य घरः । 'सर्वत्र ल-व०' (२।७९) व्लुक् । **प्रथमा** सि । 'अन्त्य०' (१।११) स्लुक् **घरसामी** ।

**[ रायहरं ]** राज-गृह । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । **अनेन** गृहस्य घरः । 'ख-घ-थ-ध-भाम्' (१।१८७) घ० → ह० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **रायहरं** ।

**[ गहवई ]** गृह-पति । 'ऋतोऽत्' (१।१२६) गृ० → ग० । 'पो वः' (१।२३१) पस्य व० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **गहवई** ॥१४४॥

## शीलाद्यर्थस्येरः ॥ ८।२।१४५ ॥

शील-धर्म-साध्वर्थे विहितस्य प्रत्ययस्य इर इत्यादेशो भवति ॥

हसनशीलः = हसिरो । रोविरो । लज्जिरो । जम्पिरो । वेविरो । भमिरो । ऊससिरो ॥

केचित् तृन एव इरमाहुस्तेषां नमिर - गमिरादयो न सिध्यन्ति । तृनोऽत्र रादिना बाधितत्वात् ॥

**[ शीलाद्यर्थस्येरः ]** शीलाद्यर्थ षष्ठी ङस् । इर प्रथमा सि ।

**[ हसिरो ]** 'हसे हसने' (५४५) हस् । हसतीत्येवंशीलः - हसतीत्येवंधर्मः - हसतीत्येवंसाधुः = हसिरो । 'तृन्-शील-धर्म-साधुषु' (५।२।२७) तृन्प्रत्ययः । अनेन तृन्० → इर इति । 'लोकात्' (१।१।३) हसिर । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **हसिरो** ।

**[ रोविरो ]** 'रुदृक् अश्रुविमोचने' (१०८७) रुद् । रोदितीत्येवंशीलः- रोदितीत्येवंधर्मः - रोदितीत्येवंसाधुः = रोविरो। 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० । 'युवर्णस्य गुणः' (४।२३७) रु० → रो० । अनेन तृन्० → इर० । 'लोकात्' (१।१।३) रुदिर इति जाते 'रुद-नमोर्वः' (४।२२६) दि० → वि० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **रोविरो** ।

**[ लज्जिरो ]** 'ओलस्जैति व्रीडे' (१४७०) लस्ज् । लज्जते इत्येवंशीलः - लज्जते इत्येवंधर्मः-लज्जते इत्येवंसाधुर्वा इति लज्जिरो । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० । प्रथमा सि । 'क-ग-ट-ड०' (२।७७) स्लुक्। 'अनादौ०' (२।८९) द्वित्वं - ज्ज० । अनेन तृन्० → इर० । 'लोकात्' (१।१।३) लज्जिर । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **लज्जिरो** ।

**[ जम्पिरो ]** 'कथण् वाक्यप्रबन्धे' (१८८१) कथ । कथयतीत्येवंशीलो धर्मो वा-साधुर्वा = जम्पिरो । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० । प्रथमा सि । कथेर्वज्जर-पज्जरोप्पाल-पिसुण-संघ-बोल्ल-चव-जम्प-सीस-साहाः' (४।२) इत्यनेन कथ० → जम्प० इति । अनेन तृन्० → इर० । 'लोकात्' (१।१।३) जम्पिर । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जम्पिरो** ।

**[ वेविरो ]** 'टुवेपृङ् चलने' (७५४) वेप् । वेपते इत्येवंशीलो धर्मो वा - साधुर्वा = वेविरो । 'चाल-शब्दार्थादकर्मकात्' (५।२।४३) अनप्र० । अनेन अन० → इर० । 'लोकात्' (१।१।३) वेपिर इति स्थिते 'पो वः' (१।२३१) पि० → वि० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वेविरो** ।

**[ भमिरो ]** 'भ्रमू चलने' (९७०) भ्रम् । भ्रमतीत्येवंशीलो धर्मो वा-साधुर्वा = भमिरो । 'शमष्टकाद् घिनण्' (५।२।४९) घिनणप्र० । प्रथमा सि । अनेन घिनण्० → इर० । 'लोकात्' (१।१।३) भ्रमिर । 'सर्वत्र ल-व-राम०' (२।७९) भ्रमध्याद् र्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भमिरो** ।

**[ ऊससिरो ]** 'श्वसक् प्राणने' (१०९०) श्वस्, उत्पूर्वम् । उत्श्वसितीत्येवंशीलो धर्मो वा- साधुर्वा = ऊससिरो । 'अनुत्साहो०' (१।११४) उत्० → ऊ० । 'तृन् शील०' (५।२।२७) तृन्प्र० । अनेन तृन्० → इर० । 'लोकात्' (१।१।३) ऊश्वसिर । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **ऊससिरो** ।

**[ नमिरो ]** 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम् । नमतीत्येवंशीलो धर्मो वा-साधुर्वा = नमिरो । केचित् तृन्प्रत्ययस्यैव इरमिच्छन्ति, तेषां नमिर-गमिरादयो न जायन्ते । 'स्म्यजस-हिंस-दीप-कम्प-कम-नमो रः' (५।२।७९) म० → म्र० - अग्रे रप्रत्ययः । चेत् तृन्प्रत्ययस्यैव इरः आदेशो विधीयते तदा तन्मते रादिप्रत्ययस्य इरो न स्यात्, ततस्तत्र युक्तम्, ततोऽनेन र० → इर० । 'लोकात्' (१।१।३) नमिर । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नमिरो** ।

**[ गमिरो ]** अम (३९२) द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । गच्छतीत्येवंशीलो धर्मो वा- साधुर्वा = गमिरो । 'शृ-कम-गम-हन-वृष-भू-स्थ उकण् (५।२।४०) उकण्प्र० । अनेन उकण्० → इर० । 'लोकात्' (१।१।३) गमिर । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **गमिरो** ॥१४५॥

## क्त्वस्तुमत्तूण-तुआणाः ॥ ८।२।१४६ ॥

क्त्वाप्रत्ययस्य तुम्-अत्-तूण-तुआण इत्येते आदेशा भवन्ति ॥

तुम्-दट्ठुं । मोत्तुं ॥ अत्-भमिअ । रमिअ ॥ तूण-घेत्तूण । काऊण ॥ तुआण - भेत्तुआण । सोउआण ॥

वन्दितु इत्यनुस्वारलोपात् ॥ वन्दित्ता इति सिद्धसंस्कृतस्यैव वलोपेन ॥ कट्टु इति तु आर्षे ॥

**[ क्त्वस्तुमत्तूणतुआणाः ]** क्त्वा षष्ठी ङस् । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः । तुम् च अच्च तूणश्च तुआणश्च = तुमत्तूणतुआणाः । प्रथमा जस् ।

**[ दट्ठुं ]** 'दृशृं प्रेक्षणे' (४९५) दृश् । दर्शनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । अनेन त्वा० → तुम्० । 'ऋतोऽत्' (१।१२६) दृ० → द० । 'दृशस्तेन ट्ठः' (४।२१३) स(श)कारस्य तकारेण सह ट्ठ० । दट्ठुम् इति स्थाने 'मोऽनुस्वारः' (१।२३) अनुस्वारः **दट्ठुं** ।

**[ मोत्तुं ]** 'मुच्लृंती मोक्षणे' (१३२०) मुच् । मोचनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । अनेन त्वा० → तुम्० । 'युवर्णस्य गुणः' (४।२३७) मु० → मो० । 'रुद-भुज-मुचां तोऽन्त्यस्य' (४।२१२) च्० → त्० । 'लोकात्' (१।१।३) मोत्तुम् । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **मोत्तुं** ।

**[ भमिअ ]** 'भ्रमू चलने' (९७०) भ्रम् । भ्रमणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । अनेन त्वाप्रत्ययस्य अत् । 'सर्वत्र ल-व०' (२।७९) भ्रमध्याद् र्लोपः । 'व्यञ्जनाददन्ते' (४।२३९) अत् - म् अग्रे अ० । 'लोकात्' (१।१।३) भमअत् इति जाते 'एच्च क्त्वा-तुम्०' (३।१५७) इत्यनेन म० → मि० । 'अन्त्य०' (१।११) त्लुक् **भमिअ** ।

**[ रमिअ ]** 'रमिं क्रीडायाम्' (९८९) रम् । रमणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । अनेन त्वाप्रत्ययस्य अत् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) रमअत् इति जाते 'एच्च क्त्वा-तुम्०' (३।१५७) इत्यनेन म० → मि० । 'अन्त्य०' (१।११) त्लुक् **रमिअ** ।

**[ घेत्तूण ]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । ग्रहणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । अनेन त्वा० → तूण० । 'क्त्वा-तुम्-तव्येषु घेत्' (४।२१०) ग्रह्० → घेत्० । 'लोकात्' (१।१।३) **घेत्तूण** ।

**[ काऊण ]** 'डुकृंग् करणे' (८८८) कृ । करणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । अनेन त्वा० → तूण० । 'आः कृगो भूत-भविष्यतोश्च' (४।२१४) कृ० → का० । 'क-ग-च-ज०' (१।१७७) तूणमध्यात् त्लुक् । 'लोकात्' (१।१।३) **काऊण** ।

**[ भेत्तुआण ]** 'भिदृंपी विदारणे' (१४७७) भिद् । भेदनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'युवर्णस्य गुणः' (४।२३७) भि० → भे० । अनेन त्वा० → तुआण० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द्० → त्० । 'लोकात्' (१।१।३) **भेत्तुआण** ।

**[ सोउआण ]** इं (११) - दुं (१२) द्रुं (१३) - शुं (१४) - [1]'स्रुं गतौ' (१५) स्रु । स्रवणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । अनेन त्वा० → तुआण० । 'युवर्णस्य गुणः' (४।२३७) स्रु० → स्रो० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् **सोउआण** ।

**[ वन्दित्तु ]** 'वदुङ् स्तुत्यभिवादनयोः' (७२१) वद् । वन्दनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नागमः । अनेन त्वा० → तुम्० । [2]'मांसादेर्वा' (१।२९) म्लुक् । 'तैलादौ' (२।९८) द्वित्वं - त्तु० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) वन्दत्तु इति जाते 'एच्च क्त्वा-तुम्०' (३।१५७) न्द० → न्दि० **वन्दित्तु** ।

**[ वन्दित्ता ]** वन्दित्वा । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'अनादौ०' (२।८९) द्वित्वं - ता० → त्ता० **वन्दित्ता** ।

**[ कट्टु ]** 'डुकृंग् करणे' (८८८) कृ । करणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । अनेन त्वाप्रत्ययस्य तुम्० । 'ऋतोऽत्' (१।१२६) कृ० → क० । आर्षत्वात् **कट्टु** इति ॥१४६॥

## इदमर्थस्य केरः ॥ ८।२।१४७ ॥

इदमर्थस्य प्रत्ययस्य केर इत्यादेशो भवति ॥

युष्मदीयः → तुम्हकेरो । अस्मदीयः → अम्हकेरो ॥ न च भवति - मईअपक्खे पाणिणीआ ॥

**[ इदमर्थस्य केरः ]** इदमर्थ षष्ठी ङस् । केर प्रथमा सि ।

**[ तुम्हकेरो ]** युष्मद् । युष्माकमयं = युष्मदीयः । 'दोरीयः' (६।३।३२) ईयप्र० । प्रथमा सि । 'लोकात्' (१।१।३) युष्मदीयः । अनेन ईयस्य केरः । 'युष्मद्यर्थपरे तः' (१।२४६) यु० → तु० । 'पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः' (२।७४) ष्मस्य म्हः । 'अन्त्य०' (१।११) द्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तुम्हकेरो** ।

**[ अम्हकेरो ]** अस्मद् । अस्माकमयमिति अस्मदीयः । 'दोरीयः' (६।३।३२) ईयप्र० । अनेन ईयस्य केरः । 'अन्त्य०' (१।११) द्लुक् । 'पक्ष्म-श्म-ष्म-स्म०' (२।७४) स्मस्य म्हः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अम्हकेरो** ।

---

१. J. 'श्रुंट् श्रवणे' (१२९६) श्रु । 'सर्वत्र ल०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शु० → सु० । 'युवर्णस्य गुणः' (४।२३७) सु० → सो० । २. G. टि० - 'विंशत्यादेर्लुक्' (१।२८) अनुस्वारलुक् ताटि० ।

**[ मईअपक्खो( क्खे ) ]** मदीयपक्ष । बहुलाधिकारात् ईयस्य केरो न स्यात् । 'क-ग-च-ज०' (१।१७७) द्लुक् - य्लुक् च । 'क्ष: ख: क्वचित्तु०' (२।३) क्षस्य ख: । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य क: । प्रथमा सि । 'अत: सेर्डो:' (३।२) सि० → डो० → ओ० **मईअपक्खो** (सप्तमी ङि **मईअपक्खे**) ।

**[ पाणिणीआ ]** पाणिनीय । पाणिनेरिमे छात्रा इति पाणिनीया: । 'नो ण:' (१।२२८) नी० → णी० । 'क-ग-च-ज-त-द-प-य-वां प्रायो लुक्' (१।१७७) य्लुक् । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) अ० → आ० **पाणिणीआ** ॥१४७॥

## पर-राजभ्यां क्क-डिक्कौ च ॥ ८।२।१४८ ॥

पर-राजन् इत्येताभ्यां परस्येदमर्थस्य प्रत्ययस्य यथासंख्यं संयुक्तौ क्को - डित् इक्कश्चादेशौ भवत: । चकारात्केरश्च ॥

परकीयम् → पारक्कं परक्कं पारकेरं । राजकीयम् → राइक्कं रायकेरं ॥

**[ परराजभ्याम् ]** परश्च राजा च = परराजानौ, ताभ्याम् = परराजभ्याम् ।

**[ क्कडिक्कौ च ]** क्कश्च डिक्कश्च = क्कडिक्कौ । प्रथमा औ । च प्रथमा सि ।

**[ पारक्कं परक्कं पारकेरं ]** पर । परस्य इदं = परकीयम् । 'पर-जन०' (६।३।३१) कीयप्र० । अनेन कीय० → क्क० । 'अत: समृद्ध्यादौ वा' (१।४४) प० → पा० । प्रथमा सि । 'क्लीबे स्वरान्म् से:' (३।२५) सि० → म्० । 'मोऽनुस्वार:' (१।२३) अनुस्वार: **पारक्कं-परक्कं** । तृतीये-परकीय । अनेन कीय० → केर० । 'अत: समृद्ध्यादौ वा' (१।४४) प० → पा० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वार: **पारकेरं** ।

**[ राइक्कं रायकेरं ]** राजकीय । अनेन कीय० → डिक्क० → इक्क० । 'डित्यन्त्यस्वरादे:' (२।१।११४) अन्त्यस्वरादिलोप: । 'लोकात्' (१।१।३) राजिक्क० । 'क-ग-च-ज०' (१।१७७) ज्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वार: **राइक्कं** । द्वितीये-राजकीय । अनेन कीय० → केर० । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुति:' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वार: **रायकेरं** ॥१४८॥

## युष्मदस्मदोऽञ एच्चय: ॥ ८।२।१४९ ॥

आभ्यां परस्येदमर्थस्याऽञ एच्चय इत्यादेशो भवति ॥

युष्माकमिदं → यौष्माकम् । तुम्हेच्चयं । एवम् - अम्हेच्चयं ॥

**[ युष्मदस्मद: ]** युष्मच्च अस्मच्च = युष्मदस्मदौ, तयो: = युष्मदस्मदो: । षष्ठी ओस् । (तस्मात् = युष्मदस्मद: । पञ्चमी ङसि) ।

**[ अञ एच्चय: ]** अञ् षष्ठी ङस् । एच्चय प्रथमा सि ।

**[ तुम्हेच्चयं ]** युष्मद् । युष्माकमिदम् । 'वा युष्मदस्मदोऽञीनञौ०' (६।३।६७) अञ्प्र० - "युष्माक" आदेश: । अनेन आक० → एच्चय० । 'युष्मद्यर्थपरे त:' (१।२४६) यु० → तु० । 'पक्ष्म-श्म-ष्म-स्म-ह्मां म्ह:' (२।७४) ष्म० → म्ह० । 'लुक्' (१।१०) म्हमध्याद् अलोप: । 'लोकात्' (१।१।३) तुम्हेच्चय । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वार: **तुम्हेच्चयं** ।

**[ अम्हेच्चयं ]** अस्मद् । अस्माकमिदम् । 'वा युष्मदस्मदोऽञीनञौ०' (६।३।६७) अञ्प्र० - "अस्माक" आदेशः । अनेन आक० → एच्चय० । 'पक्ष्म-श्म-ष्म-स्म०' (२।७४) स्म० → म्ह० । 'लुक्' (१।१०) म्हमध्याद् अलोपः । 'लोकात्' (१।१।३) 'अम्हेच्चय । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अम्हेच्चयं** ॥१४९॥

## वतेर्व्वः ॥ ८।२।१५० ॥

वतेः प्रत्ययस्य द्विरुक्तो वो भवति ॥ महुर व्व पाडलिउत्ते पासाया ॥

**[ वतेर्व्वः ]** वति षष्ठी ङस् । व्व प्रथमा सि ।

**[ महुर व्व पाडलिउत्ते पासाया ]** मथुरा । मथुरायामिव = मथुरावत् । [१]"स्यादेरिवे' (७।१।५२) वत्प्र० । अनेन वत्० → व्व० । 'ख-घ-थ-ध-भाम्' (१।१८७) थु० → हु० । 'ह्रस्वः संयोगे' (१।८४) रा० → र० । **महुर व्व** ।

पाटलिपुत्र । 'टो डः' (१।१९५) टस्य डः । 'क-ग-च-ज०' (१।१७७) प्लुक् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । सप्तमी ङि । 'डे म्मि डेः' (३।११) ङि० → डे० → ए० । 'ङित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **पाडलिउत्ते** ।

प्रासाद । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) य० → या० **पासाया** । मथुरावत् पाटलिपुत्रे प्रासादाः ॥१५०॥

## सर्वाङ्गादीनस्येकः ॥ ८।२।१५१ ॥

सर्वाङ्गात् 'सर्वादेः पथ्यङ्ग०' (७।१।९४) इत्यादिना विहितस्येनस्य स्थाने इक इत्यादेशो भवति ॥

सर्वाङ्गीणः → सव्वङ्गिओ ॥

**[ सर्वाङ्गादीनस्येकः ]** सर्वाङ्ग पञ्चमी ङसि । इन षष्ठी ङस् । इक प्रथमा सि ।

**[ सव्वङ्गिओ ]** सर्वाङ्ग । सर्वाण्यङ्गानि व्याप्नोतीति सर्वाङ्गीणः । 'सर्वादेः पथ्यङ्ग-कर्म-पत्र-पात्र-शरावं व्याप्नोतीति' (७।१।९४) ईनप्र० । अनेन ईनस्य इक० । 'लुक्' (१।१०) गमध्याद् अलोपः । 'लोकात्' (१।१।३) सर्वाङ्गिक । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'ह्रस्वः संयोगे' (१।८४) वा० → व० । 'अनादौ०' (२।८९) वस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सव्वङ्गिओ** ॥१५१॥

## पथो णस्येकट् ॥ ८।२।१५२ ॥

'नित्यं णः पन्थश्च' (६।४।८९) इति यः पथो णो विहितस्तस्य इकट् भवति ॥ पान्थः → पहिओ ॥

**[ पथो णस्येकट् ]** पथ् षष्ठी ङस् । ण षष्ठी ङस् । इकट् प्रथमा सि ।

**[ पहिओ ]** पथिन् । नित्यं पन्थानं वहतीति पान्थः । 'नित्यं णः पन्थश्च' (६।४।८९) इति पथिन् अग्रे णप्र० - पन्थ आदेशः । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) पं० → पां० । अनेन णप्रत्ययस्य इकट् → इक इति । 'लुक्' (१।१०) थस्य अलुक् । 'लोकात्' (१।१।३) पान्थिक इति जाते 'ह्रस्वः संयोगे' (१।८४) पा० → प० । 'विंशत्यादेर्लुक्'

---

१. G. 'तत्र' (७।१।५३) वत्प्र० ।

(१।२८) अनुस्वारलोपः । 'ख-घ-थ०' (१।१८७) थि० → हि० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पहिओ** ॥१५२॥

## ईयस्याऽऽत्मनो णयः ॥ ८।२।१५३ ॥

आत्मनः परस्य ईयस्य णय इत्यादेशो भवति ॥ आत्मीयम् → अप्पणयं ॥

**[ ईयस्याऽऽत्मनो णयः ]** ईय षष्ठी ङस् । आत्मन् षष्ठी ङस् । णय प्रथमा सि ।

**[ अप्पणयं ]** आत्मीय । अनेन ईयस्य स्थाने णयः । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः पो वा' (३।५१) त्म० → प० । 'अनादौ०' (२।८९) पस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **अप्पणयं** ॥१५३॥

## त्वस्य डिमा-त्तणौ वा ॥ ८।२।१५४ ॥

त्वप्रत्ययस्य डिमा-त्तण इत्यादेशौ वा भवतः ॥

पीणिमा । पुप्फिमा । पीणत्तणं । पुप्फत्तणं । पक्षे-पीणत्तं । पुप्फत्तं ॥ इम्नः पृथ्वीदिषु नियतत्वात् तदन्यप्रत्ययान्तेषु अस्य विधिः ॥ पीनता इत्यस्य प्राकृते पीणया इति भवति । पीणदा इति तु भाषान्तरे, तेनेह तलो दा न क्रियते ॥

**[ त्वस्य डिमात्तणौ वा ]** त्व षष्ठी ङस् । डिमा-त्तण प्रथमा औ । वा प्रथमा सि ।

**[ पीणिमा ]** पीनत्व । अनेन वा त्वस्य डिमा० → इमा० । डित्वात्' डित्यन्त्य०' (२।१।११४) अलोपः । 'लोकात्' (१।१।३) पीनिमा । 'नो णः' (१।२२८) नि० → णि० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् पीणिमा ।

**[ पुप्फिमा ]** पुष्पत्व । अनेन वा त्वस्य डिमा० → इमा० । डित्वात् 'डित्यन्त्य०' (२।१।११४) अलोपः । 'लोकात्' (१।१।३) पुष्पिमा । 'ष्प-स्पयोः फः' (२।५३) ष्पस्य फ० । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **पुप्फिमा** ।

**[ पीणत्तणं ]** पीनत्व । अनेन वा त्वस्य त्तणः । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पीणत्तणं** ।

**[ पुप्फत्तणं ]** पुष्पत्व । अनेन वा त्वस्य त्तणः । 'ष्प-स्पयोः फः' (२।५३) ष्पस्य फ० । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पुप्फत्तणं** ।

**[ पीणत्तं ]** पीनत्व । 'नो णः' (१।२२८) नस्य णः । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'अनादौ' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः (१।२३) अनुस्वारः **पीणत्तं** ।

**[ पुप्फत्तं ]** पुष्पत्व । 'ष्प-स्पयोः फः' (२।५३) ष्पस्य फ० । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पुप्फत्तं** ।

**[ पीणया ]** पीनता । 'नो णः' (१।२२८) नस्य णः । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **पीणया** ।

**[ पीणदा ]** पीनता । 'नो णः' (१।२२८) नस्य णः । 'तो दोनादौ शौरसेन्यामयुक्तस्य' (४।२६०) ता० → दा० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **पीणदा** ॥१५४॥

## अनङ्कोठात्तैलस्य डेल्लः ॥ ८।२।१५५ ॥

अङ्कोठवर्जिताच्छब्दात्परस्य तैलप्रत्ययस्य डेल्ल इत्यादेशो भवति ॥

सुरही(हि)-जलेण कडुएल्लं ॥ अनङ्कोठादिति किम् ? अङ्कोल्लतेल्लं ॥

**[ अनङ्कोठात् ]** न अङ्कोठः = अनङ्कोठस्तस्मात् = अनङ्कोठात् ।

**[ तैलस्य डेल्लः ]** तैल षष्ठी ङस् । डेल्ल प्रथमा सि ।

**[ सुरही( हि )-जलेण कडुएल्लं ]** [1]सुरभी(भि)-जल । 'ख-घ-थ०' (१।१८७) भी०(भि०) → ही०(हि०) । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) ल० → ले० **सुरही( हि )-जलेण** ।

कटुकतैल । 'टो डः' (१।१९५) टस्य ड० । अनेन तैलस्य डेल्ल० → एल्ल० । 'डित्यन्त्य०' (२।१।११४) कमध्याद् अलुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कडुएल्लं** ।

**[ अङ्कोल्लतेल्लं ]** अङ्कोठतैल्ल । 'अङ्कोठे ल्लः' (१।२००) ठस्य ल्ल० । 'ऐत एत्' (१।१४८) तै० → ते० । 'तैलादौ' (२।९८) लस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अङ्कोल्लतेल्लं** ॥१५५॥

## यत्तदेतदोऽतोरित्तिअ एतल्लुक् च ॥ ८।२।१५६ ॥

एभ्यः परस्य डावादेरतोः परिमाणार्थस्य इत्तिअ इत्यादेशो भवति, एतदो लुक् च ॥

यावत् → जित्तिअं । तावत् → तित्तिअं । एतावत् → इत्तिअं ॥

**[ यत्तदेतदोऽतोरित्तिअः ]** यच्च तच्च एतच्च = यत्तदेतत्, तस्मात् = यत्तदेतदः । अतु षष्ठी ङस् । इत्तिअ प्रथमा सि ।

**[ एतल्लुक् च ]** एतल्लुक् प्रथमा सि । च प्रथमा सि ।

**[ जित्तिअं ]** यत् । या संख्यामानमस्य । 'यत्तदेतदो डावादिः' (७।१।१४९) डावतुप्र० → आवत् । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । 'आदेर्यो जः' (१।२४५) या० → जा० । अनेन डावत्० → इत्तिअ० । 'लोकात्' (१।१।३) जित्तिअ । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **जित्तिअं** ।

**[ तित्तिअं ]** तद् । सा संख्यामानमस्य । 'यत्तदेतदो डावादिः' (७।१।१४९) डावतुप्र० → आवत् । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । अनेन डावत्० → इत्तिअ० । 'लोकात्' (१।१।३) तित्तिअ० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **तित्तिअं** ।

**[ इत्तिअं ]** एतद् । एषा संख्यामानमस्य । 'यत्तदेतदो डावादिः' (७।१।१४९) डावतुप्र० → आवत् । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । अनेन एतावत्० → इत्तिअ० । प्रथमा सि । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **इत्तिअं** ।

स्त्रियाम्- आत्' (२।४।१८) आप्प्र० → आ । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **इत्तिआ** ॥१५६॥

---

१. श० महो० - सुरभिशब्दः पुं - नपुं - त्रिलिङ्गः ।

## इदं-किमश्च डेत्तिअ-डेत्तिल-डेद्दहाः ॥ ८।२।१५७ ॥

इदं-किंभ्यां यत्तदेतद्भ्यश्च परस्य अतोर्डावतोर्वा डित एत्तिअ-एत्तिल- एद्दह इत्यादेशा भवन्ति, एतल्लुक् च ॥

इयत् - एत्तिअं एत्तिलं एद्दहं । कियत् - केत्तिअं केत्तिलं केद्दहं । यावत् - जेत्तिअं जेत्तिलं जेद्दहं । तावत् - तेत्तिअं तेत्तिलं तेद्दहं । एतावत् - एत्तिअं एत्तिलं एद्दहं ॥

**[ इदंकिमश्च ]** इदम् च किम् च = इदंकिम्, तस्य = इदंकिमः । षष्ठी ङस् । च प्रथमा सि ।

**[ डेत्तिअडेत्तिलडेद्दहाः ]** डेत्तिअश्च डेत्तिलश्च डेद्दहश्च = डेत्तिअडेत्तिलडेद्दहाः । प्रथमा जस् ।

**[ एत्तिअं ]** इयत् । अनेन अत्० → डेत्तिअ० → एत्तिअ० इति । 'डित्यन्त्यस्वरादेः' (२।१।११४) इय्लुक् । प्रथमा सि । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **एत्तिअं** ।

**[ एत्तिलं ]** इयत् । अनेन अत्० → डेत्तिल० → एत्तिल० इति । 'डित्यन्त्य०' (२।१।११४) इय्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **एत्तिलं** ।

**[ एद्दहं ]** इयत् । अनेन अत्० → डेद्दह० → एद्दह० इति । 'डित्यन्त्य०' (२।१।११४) इय्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **एद्दहं** ।

**[ केत्तिअं ]** कियत् । अनेन अत्० → डेत्तिअ० → एत्तिअ० इति । 'डित्यन्त्य०' (२।१।११४) इय्लुक् । 'लोकात्' (१।१।३) केत्तिअ । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **केत्तिअं** ।

**[ केत्तिलं ]** कियत् । अनेन अत्० → डेत्तिल० → एत्तिल० इति । 'डित्यन्त्य०' (२।१।११४) इय्लुक् । 'लोकात्' (१।१।३) केत्तिल । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **केत्तिलं** ।

**[ केद्दहं ]** कियत् । अनेन अत्० → डेद्दह० → एद्दह० इति । 'डित्यन्त्य०' (२।१।११४) इय्लुक् । 'लोकात्' (१।१।३) केद्दह । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **केद्दहं** ।

**[ जेत्तिअं ]** यावत् । 'आदेर्यो जः' (१।२४५) या० → जा० । अनेन आवत्० → डेत्तिअ० → एत्तिअ० इति । 'लोकात्' (१।१।३) जेत्तिअ । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जेत्तिअं** ।

**[ जेत्तिलं ]** यावत् । 'आदेर्यो जः' (१।२४५) या० → जा० । अनेन आवत्० → डेत्तिल० → एत्तिल० इति । 'लोकात्' (१।१।३) जेत्तिल । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जेत्तिलं** ।

**[ जेद्दहं ]** यावत् । 'आदेर्यो जः' (१।२४५) या० → जा० । अनेन आवत्० → डेद्दह० → एद्दह० इति । 'लोकात्' (१।१।३) जेद्दह । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जेद्दहं** ।

**[ तेत्तिअं ]** तावत् । अनेन आवत्० → डेत्तिअ० → एत्तिअ० इति । 'लोकात्' (१।१।३) तेत्तिअ । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तेत्तिअं** ।

**[ तेत्तिलं ]** तावत् । अनेन आवत्० → डेत्तिल० → एत्तिल० इति । 'लोकात्' (१।१।३) तेत्तिल । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः तेत्तिलं ।

**[ तेद्दहं ]** तावत् । अनेन आवत्० → डेद्दह० → एद्दह० इति । 'लोकात्' (१।१।३) तेद्दह । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तेद्दहं** ।

**[ एत्तिअं ]** एतावत् । अनेन आवत्० → डेत्तिअ० → एत्तिअ० इति - "एत्" लुक् च । 'लोकात्' (१।१।३) (१।१।३) एत्तिअ । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **एत्तिअं** ।

**[ एत्तिलं ]** एतावत् । अनेन आवत्० → डेत्तिल० → एत्तिल० इति - "एत्"लुक् च । 'लोकात्' (१।१।३) एत्तिल । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **एत्तिलं** ।

**[ एद्दहं ]** एतावत् । अनेन आवत्० → डेद्दह० → एद्दह० इति -"एत्"लुक् च । 'लोकात्' (१।१।३) एद्दह । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **एद्दहं** ॥१५७॥

## कृत्वसो हुत्तं ॥ ८।२।१५८ ॥

'वारे कृत्वस्' (७।२।१०९) इति यः कृत्वस् विहितस्तस्य हुत्तमित्यादेशो भवति ॥

[१]सयहुत्तं । सहस्सहुत्तं ॥ कथं प्रियाभिमुखं पियहुत्तं ? अभिमुखार्थेन हुत्तशब्देन भविष्यति ॥

**[ कृत्वसो हुत्तं ]** कृत्वस् षष्ठी ङस् । हुत्त प्रथमा सि ।

**[ सयहुत्तं ]** शत-कृत्वस् । शतवारान् कृत्वा । 'श-षोः सः' (१।२६०) श० → स० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । अनेन कृत्वस्० → हुत्तं० **सयहुत्तं** ।

**[ सहस्सहुत्तं ]** सहस्र - कृत्वस् । सहस्रवारान् कृत्वा । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'अनादौ०' (२।८९) सस्य द्वित्वम् । अनेन कृत्वस्० → हुत्तं० **सहस्सहुत्तं** ।

**[ पियहुत्तं ]** प्रियहुत्त । 'सर्वत्र ल-व०' (२।७९) र्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पियहुत्तं** । हुत्तशब्दोऽभिमुखार्थे ॥१५८॥

## आल्विल्लोल्लाल-वन्त-मन्तेत्तेर-मणा मतोः ॥ ८।२।१५९ ॥

आलु इत्यादयो नव आदेशा मतोः स्थाने यथाप्रयोगं भवन्ति ॥

आलु - नेहालू । दयालू । ईसालू । लज्जालुआ ॥ इल्ल-सोहिल्लो । छाइल्लो । जामइल्लो ॥ उल्ल-विआरुल्लो । मंसुल्लो । दप्पुल्लो ॥ आल-सद्दालो । जडालो । फडालो । रसालो । जोण्हालो ॥ वन्त-धणवन्तो । भत्तिवन्तो ॥ मन्त-हणुमन्तो । सिरिमन्तो । पुण्णमन्तो ॥ इत्त-कव्वइत्तो । माणइत्तो ॥ इर-गव्विरो । रेहिरो ॥ मण-धणमणो ॥

केचिन्मादेशमपीच्छन्ति - हणुमा ॥ मतोरिति किम् ? धणी । अत्थिओ ॥

**[ आल्विल्लोल्लालवन्तमन्तेत्तेरमणाः ]** आलुश्च इल्लश्च उल्लश्च आलश्च वन्तश्च मन्तश्च इत्तश्च इरश्च मणश्च = आल्विल्लोल्लालवन्तमन्तेत्तेरमणाः । प्रथमा जस् ।

**[ मतोः ]** मतु षष्ठी ङस् ।

---

१. चुम्बिज्जइ **सअहुत्तं** अवरुंभिज्जइ **सहस्संहुत्तं** वि । रमिअ पुणो वि रमिज्जइ पिए जणे णत्थि पुणरुत्तं ॥
[शृ० प्र० - ७।१०१ । ध्व० लो० - प्रथमोद्योतः]

चुम्ब्यते शतकृत्व आलिङ्ग्यते सहस्रकृत्वोऽपि । रन्त्वा पुनरपि रम्यते प्रिये जने नास्ति पुनरुक्तम् ॥
१. पाठां०- शृ० प्र०- अपवाहिज्जइ = अवरुध्यते । २. सहस्ससअहुत्तं = सहस्रशतकृत्वः ।

**[ नेहालू ]** स्नेह । स्नेहो विद्यते यस्य सः = स्नेहवान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । अनेन मत्० → आलु० । 'क-ग-ट-ड०' (२।७७) स्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **नेहालू** ।

**[ दयालू ]** दया । दया विद्यते यस्याऽसौ दयावान् । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । अनेन मत्० → आलु० । 'समानानां०' (१।२।१) दीर्घः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **दयालू** ।

**[ ईसालू ]** ईर्ष्या । ईर्ष्या विद्यते यस्याऽसौ ईर्ष्यालुः । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'श-षोः सः' (१।२६०) ष० → स० । अनेन मत्० → आलु० । 'समानानां०' (१।२।१) दीर्घः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **ईसालू** ।

**[ लज्जालुआ ]** लज्जा । लज्जा विद्यते यस्याऽसौ लज्जावान् । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । अनेन मत्० → आलु० । 'समानानां०' (१।२।१) दीर्घः । 'स्वार्थे कश्च वा' (२।१६४) कप्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **लज्जालुआ** । कप्रत्ययं विना पक्षे-**लज्जालू** । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् ।

**[ सोहिल्लो ]** शोभावान् । 'श-षोः सः' (१।२६०) शो० → सो० । 'ख-घ-थ-ध-भाम्' (१।१८७) भा० → हा० । अनेन मत्० → इल्ल० । 'लुक्' (१।१०) हामध्ये आलुक् । 'लोकात्' (१।१।३) सोहिल्ल । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सोहिल्लो** ।

**[ छाइल्लो ]** छायावान् । अनेन मत्० → इल्ल० । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'लुक्' (१।१०) आलुक् । 'लोकात्' (१।१।३) छाइल्ल० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **छाइल्लो** ।

**[ जामइल्लो ]** यामवान् । अनेन मत्० → इल्ल० । अत्र अलोपो बाहुलकान्न । 'आदेर्यो जः' (१।२४५) यस्य जः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जामइल्लो** ।

**[ विआरुल्लो ]** विकारवान् । 'क-ग-च-ज०' (१।१७७) क्लुक् । अनेन मत्० → उल्ल० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) विआरुल्ल । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विआरुल्लो** ।

**[ मंसुल्लो ]** [१]श्मश्रुवा(मा)न् । 'आदेः श्मश्रु-श्मशाने' (२।८६) आदि''श्''लुक् । 'वक्रादावन्तः' (१।२६) अनुस्वारः । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शु० → सु० । अनेन मत्० → उल्ल० । 'लुक्' (१।१०) सुमध्याद् उलोपः । 'लोकात्' (१।१।३) मंसुल्ल । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मंसुल्लो** ।

**[ दप्पुल्लो ]** दर्पवान् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) पस्य द्वित्वम् । अनेन मत्० → उल्ल० । 'लुक्' (१।१०) पमध्याद् अलुक् । 'लोकात्' (१।१।३) दप्पुल्ल० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दप्पुल्लो** ।

**[ सद्दालो ]** शब्दवान् । 'सर्वत्र०' (२।७९) ब्लुक् । 'श-षोः सः' (१।२६०) श० → स० । 'अनादौ०' (२।८९) दस्य द्वित्वम् । अनेन मत्० → आल० । 'समानानां०' (१।२।१) दीर्घः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सद्दालो** ।

---

१. L. मांसमस्त्यस्मिन् वेति । मतुप्र० → मत् । 'मांसादि०' (१।७०) मां० → मं० । अनेन मत्० → उल्ल० ।

**[ जडालो ]** जटावान् । 'टो डः' (१।१९५) टा० → डा० । अनेन मत्० → आल० । 'समानानां०' (१।२।१) दीर्घः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जडालो** ।

**[ फडालो ]** फटावान् । 'टो डः' (१।१९५) टा० → डा० । अनेन मत्० → आल० । 'समानानां०' (१।२।१) दीर्घः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **फडालो** ।

**[ रसालो ]** रसवान् । अनेन मत्० → आल० । 'समानानां०' (१।२।१) दीर्घः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **रसालो** ।

**[ जोण्हालो ]** ज्योत्स्नावान् । 'अधो म-न-याम्' (२।७८) यलुक् । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'सूक्ष्म-श्न-ष्ण-स्न-ह्न-ह्ण-क्ष्णां ण्हः' (२।७५) स्ना० → ण्हा० । अनेन मत्० → आल० । 'समानानां०' (१।२।१) दीर्घः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जोण्हालो** ।

**[ धणवन्तो ]** धनवान् । 'नो णः' (१।२२८) न० → ण० । अनेन मत्० → वन्त० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **धणवन्तो** ।

**[ भत्तिवन्तो ]** भक्तिवा(मा)न् । 'क-ग०' (२।७७) क्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । अनेन मत्० → वन्त० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भत्तिवन्तो** ।

**[ हणुमन्तो ]** हनूमत् । 'नो णः' (१।२२८) नस्य णः । 'उ-भ्रूहनूमत्-कण्डूय-वातूले' (१।१२१) णू० → णु० । अनेन मत्० → मन्त० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **हणुमन्तो** ।

**[ सिरिमन्तो ]** श्रीमत् । 'ई-श्री-ह्री-कृत्स्न-क्रिया-दिष्ट्यास्वित्' (२।१०४) श्-री इति विश्लेषे रीपूर्वे इ० । 'लोकात्' (१।१।३) शिरीमत् । 'श-षोः सः' (१।२६०) शि० → सि० । 'दीर्घ-ह्रस्वौ मिथो वृत्तौ' (१।४) री० → रि० । अनेन मत्० → मन्त० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सिरिमन्तो** ।

**[ पुण्णमन्तो ]** पुण्यमत् । 'अधो म-न-याम्' (२।७८) यलुक् । 'अनादौ०' (२।८९) णस्य द्वित्वम् । अनेन मत्० → मन्त० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पुण्णमन्तो** ।

**[ कव्वइत्तो ]** काव्यवान् । 'ह्रस्वः संयोगे' (१।८४) का० → क० । 'अधो म-न-याम्' (२।७८) यलुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । अनेन मत्० → इत्त० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कव्वइत्तो** ।

**[ माणइत्तो ]** मानवान् । 'नो णः' (१।२२८) नस्य णः । अनेन मत्० → इत्त० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **माणइत्तो** ।

**[ गव्विरो ]** गर्ववान् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । अनेन मत्० → इर० । 'लुक्' (१।१०) व्वमध्याद् अलुक् । 'लोकात्' (१।१।३) गव्विर० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **गव्विरो** ।

**[ रेहिरो ]** रेखावान् । 'ख-घ-थ-ध-भाम्' (१।१८७) खा० → हा० । अनेन मत्० → इर० । 'लुक्' (१।१०) हामध्याद् आलोपः । 'लोकात्' (१।१।३) रेहिर । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **रेहिरो** ।

**[ धणमणो ]** धनवान् । 'नो णः' (१।२२८) नस्य णः । अनेन मत्० → मण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **धणमणो** ।

केचित्तु मतुस्थाने मा इत्यादेशमिच्छन्ति, तन्मते हणुमा इति रूपम् ।

**[ धणी ]** धनिन् । 'नो णः' (१।२२८) नस्य णः । 'अन्त्य०' (१।११) न्लुक् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **धणी** ।

**[ अत्थिओ ]** अर्थ । 'अर्थोऽस्याऽस्तीति अर्थिकः । 'अतोऽनेकस्वरात्' (७।२।६) इकप्र० । 'लुक्' (१।१०) अलोपः । 'लोकात्' (१।१।३) अर्थिक । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अत्थिओ** ॥१५९॥

## त्तो-दो तसो वा ॥ ८।२।१६० ॥

तसः प्रत्ययस्य स्थाने त्तो-दो इत्यादेशौ वा भवतः ॥

सव्वत्तो सव्वदो । एकत्तो एकदो । अन्नत्तो अन्नदो । कत्तो कदो । जत्तो जदो । तत्तो तदो । इत्तो इदो । पक्षे-सव्वओ इत्यादि ॥

**[ त्तोदो ]** त्तोश्च दोश्च = त्तोदो । प्रथमा औ । सूत्रत्वाद् औलुक् ।

**[ तसो वा ]** तस् षष्ठी ङस् । वा प्रथमा सि ।

**[ सव्वत्तो सव्वदो ]** सर्वतः (२) । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । अनेन वा तस्० → त्तो० - दो० **सव्वत्तो सव्वदो** ।

[1]**[ एकत्तो एकदो ]** एकतः (२) । 'अनादौ स्वरादसंयुक्तानां क-ख-त-थ-प-फां ग-घ-द-ध-ब-भाः' (४।३९६) कस्य गः । अनेन वा तस्० → त्तो० - दो० **एगत्तो एगदो एकत्तो एकदो** । एकस्य को गो वा इति वा कस्य गः ।

**[ अन्नत्तो अन्नदो ]** अन्यतः (२) । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वम् । अनेन वा तस्० → त्तो० - दो० **अन्नत्तो अन्नदो** ।

**[ कत्तो कदो ]** किम् (२) । 'किमद्व्यादिसर्वाद्यवैपुल्यबहोः०' (७।२।८९) पित् तस्प्र० । 'किमः कस्त्रतसोश्च' (३।७१) किम्० → कः । अनेन वा तस्० → त्तो० - दो० **कत्तो कदो** ।

**[ जत्तो जदो ]** यतः (२) । 'आदेर्यो जः' (१।२४५) यस्य जः । अनेन वा तस्० → त्तो० - दो० **जत्तो जदो** ।

**[ तत्तो तदो ]** ततः (२) । अनेन वा तस्० → त्तो० - दो० **तत्तो तदो** ।

**[ इत्तो इदो ]** इतः । अनेन वा तस्० → त्तो० - दो० **इत्तो इदो** ॥१६०॥

## त्रपो हि-ह-त्थाः ॥ ८।२।१६१ ॥

त्रप्प्रत्ययस्य एते भवन्ति ॥

यत्र - जहि जह जत्थ । तत्र - तहि तह तत्थ । कुत्र - कहि कह कत्थ । अन्यत्र - अन्नहि अन्नह अन्नथ ॥

**[ त्रपो हिहत्थाः ]** त्रप् षष्ठी ङस् । हिश्च हश्च त्थश्च = हिहत्थाः । प्रथमा जस् ।

१. B. C. E. एगत्तो एगदो । A. एगत्तो एगदो एकत्तो एकदो उदाहरणानि ।

**[ जहि जह जत्थ ]** यत्र (३) । अनेन त्रप्० → हि० - ह० - त्थ० । 'आदेर्यो जः' (१।२४५) यस्य जः । सप्तमी ङि । 'अव्ययस्य' (३।२।७) ङिलुप् । **जहि जह जत्थ** ।

**[ तहि तह तत्थ ]** तत्र (३) । अनेन त्रप्० → हि० - ह० - त्थ० । सप्तमी ङि । 'अव्ययस्य' (३।२।७) ङिलुप् । **तहि तह तत्थ** ।

**[ कहि कह कत्थ ]** कुत्र (३) । 'किमः कस्त्रतसोश्च' (३।७१) किम्० → कः । अनेन त्रप्० → हि० - ह० - त्थ० **कहि कह कत्थ** ।

**[ अन्नहि अन्नह अन्नत्थ ]** अन्यत्र (३) । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वम् । अनेन त्रप्० → हि० - ह० - त्थ० **अन्नहि अन्नह अन्नत्थ** ॥१६१॥

## वैकाद्दः सि-सिअं-इआः ॥ ८।२।१६२ ॥

एकशब्दात् परस्य दाप्रत्ययस्य सि-सिअं-इआ इत्यादेशा वा भवन्ति ॥

एकदा → एक्कसि । एक्कसिअं । एक्कइआ । पक्षे-एगया ॥

**[ वैकाद्दः ]** वा प्रथमा सि । एक पञ्चमी ङसि । द्(दा) षष्ठी ङस् ।

**[ सिसिअंइआः ]** सिश्च सिअं च इआ च = [१]सिसिअंइआः । प्रथमा जस् ।

**[ एक्कसि ]** एकदा । अनेन दा० → सि० । 'सेवादौ वा' (२।९९) कस्य द्वित्वम् । सप्तमी ङि । 'अव्ययस्य' (३।२।७) ङिलुप् **एक्कसि** ।

**[ एक्कसिअं ]** एकदा । अनेन दा० → सिअं० । 'सेवादौ वा' (२।९९) कस्य द्वित्वम् । सप्तमी ङि । 'अव्ययस्य' (३।२।७) ङिलुप् **एक्कसिअं** ।

**[ एक्कइआ ]** एकदा । अनेन दा० → इआ० । 'सेवादौ वा' (२।९९) कस्य द्वित्वम् । सप्तमी ङि । 'अव्ययस्य' (३।२।७) ङिलुप् **एक्कइआ** । पक्षे-

**[ एगया ]** एकदा । 'अनादौ स्वरादसंयुक्तानां क-ख-त-थ-प०' (४।३९६) कस्य गः । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'सप्तमी ङि । 'अव्ययस्य' (३।२।७) ङिलुप् **एगया** ॥१६२॥

## डिल्ल-डुल्लौ भवे ॥ ८।२।१६३ ॥

भवेऽर्थे नाम्नः परौ इल्ल-उल्ल इत्येतौ डितौ प्रत्ययौ भवतः ॥

गामिल्लिआ । पुरिल्लं । हेट्ठिल्लं । उवरिल्लं । अप्पुल्लं ॥ आल्वालावपीच्छन्त्यन्ये ॥

**[ डिल्लडुल्लौ भवे ]** डिल्लश्च डुल्लश्च = डिल्लडुल्लौ । भव सप्तमी ङि ।

**[ गामिल्लिआ ]** ग्राम । ग्रामे [२]भवा = गामिल्लिआ । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन डिल्लप्रत्यय → इल्ल इति । 'डित्यन्त्य०' (२।१।११४) म-मध्याद् अलोपः । 'लोकात्' (१।१।३) गामिल्ल इति जाते 'अस्याऽयत्०' (२।४।१११) ल्ल० → ल्लि० । 'स्वार्थे कश्च वा' (२।१६४) कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **गामिल्लिआ** ।

---

१. K. सिसिअंइआ । प्रथमा सि । २. L. भवाः ।

**[ पुरिल्लं ]** [१]पुर । पुरे भवं अथवा पुरा भवं = पुरिल्लं । अनेन डिल्लप्रत्यय → इल्ल इति । 'डित्यन्त्य०' (२।१।११४) रमध्याद् अलोपः । 'लोकात्' (१।१।३) पुरिल्ल० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पुरिल्लं** ।

**[ हेट्ठिल्लं ]** अधस् । अधो भवं = हेट्ठिल्लं । 'अधसो हेट्ठं' (२।१४१) अधस्० → हेट्ठ० इति । अनेन डिल्लप्रत्यय → इल्ल इति । 'डित्यन्त्य०' (२।१।११४) ट्ठमध्याद् अलोपः । 'लोकात्' (१।१।३) हेट्ठिल्ल० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **हेट्ठिल्लं** ।

**[ उवरिल्लं ]** उपरि । उपरि भवम् = उवरिल्लं । 'पो वः' (१।२३१) पस्य वः । अनेन डिल्लप्रत्यय → इल्ल इति । 'डित्यन्त्य०' (२।१।११४) रि-मध्याद् इलोपः । 'लोकात्' (१।१।३) उवरिल्ल० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **उवरिल्लं** ।

**[ अप्पुल्लं ]** आत्मन् । आत्मनि भवम् = अप्पुल्लं । 'अन्त्य०' (१।११) न्लुक् । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः पो वा' (२।५१) त्मस्य पः । 'अनादौ०' (२।८९) पस्य द्वित्वम् । अनेन डुल्लप्रत्यय → उल्ल इति। 'डित्यन्त्य०' (२।१।११४) । प-मध्याद् अलुक् । 'लोकात्' (१।१।३) अप्पुल्ल० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अप्पुल्लं** ॥१६३॥

## स्वार्थे कश्च वा ॥ ८।२।१६४ ॥

स्वार्थे कश्चकारादिल्लोल्लौ डितौ प्रत्ययौ भवतो वा ॥

क - कुंकुमपिञ्जरयं । चन्दओ । गयणयम्मि । धरणीहरपक्खुब्भन्तयं । दुहिअए राम-हिअयए । इहयं । [२]आलेट्ठुअं - आश्लेष्टुमित्यर्थः ॥

द्विरपि भवति - बहुअयं ॥

ककारोच्चारणं पैशाचिकभाषार्थम् - यथा वतनके वतनकं समप्पेत्तून ॥

इल्ल - निज्जिआसोअ - पल्लविल्लेण । पुरिल्लो - पुरा पुरो वा ॥

उल्ल - मह पिउल्लओ । मुहुल्लं । हत्थुल्ला ॥

पक्षे - चन्दो । गयणं । इह । आलेट्ठुं । बहु । बहुअं । मुहं । हत्था ॥

कुत्सादिविषये तु संस्कृतवदेव कप् सिद्धः । यावादिलक्षणः कः प्रतिनियतविषय एवेति वचनम् ॥

**[ स्वार्थे कश्च वा ]** स्वार्थ सप्तमी ङि । क प्रथमा सि । च प्रथमा सि । वा प्रथमा सि ।

**[ कुंकुमपिञ्जरयं ]** कुंकुमपिंजर । अनेन कप्र० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कुंकुमपिंजरयं** ।

**[ चन्दओ ]** चन्द्र । अनेन कप्र० । 'द्रे रो नवा' (२।८०) र्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **चन्दओ** ।

---

१. पा० म० - पुरातन - पौरस्त्य - पौर → पुरिल्ल वि० । २. G. आलिट्ठुयं ।

[ **गयणयम्मि** ] गगन । अनेन कप्र० । 'क-ग-च-ज०' (१।१७७) ग्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'नो णः' (१।२२८) नस्य णः । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । सप्तमी ङि । 'डे म्मि ङेः' (३।११) ङि० → म्मि० **गयणयम्मि** ।

[1][ **धरणीहरपक्खुब्भन्तयं** ] धरणीधरपक्षोद्भ्रान्त । 'ख-घ-थ०' (१।१८७) धस्य हः । 'क्षः खः क्वचित्तु०' (२।३) क्षस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । 'ह्रस्वः संयोगे' (१।८४) क्खो० → क्खु० । 'क-ग-ट-ड-त०' (२।७७) द्लुक् । 'ह्रस्वः संयोगे' (१।८४) भ्रा० → भ्र० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) भस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वभस्य बः । अनेन कप्र० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **धरणीहरपक्खुब्भन्तयं** ।

[ **दुहिअए रामहिअयए** ] दुःखित । 'निर्दुरोर्वा' (१।१३) र्लुक् । ख-घ-थ-ध-भाम्' (१।१८७) खि० → हि० । अनेन कप्र० । 'क-ग-च-ज०' (१।१७७) त-कयोर्लुक् । सप्तमी ङि । 'डे म्मि ङेः' (३।११) ङि० → डे० → ए० । 'ङित्यन्त्य०' (२।१।११४) अलुक् **दुहिअए** ।

रामहृदय । 'इत् कृपादौ' (१।१२८) हृ० → हि० । 'क-ग-च-ज०' (१।१७७) द्लुक् । अनेन कप्र० । 'क-ग-च-ज०' (१।१७७) क्लुक् । सप्तमी ङि । 'डे म्मि ङेः' (३।११) ङि० → डे० → ए० । 'ङित्यन्त्य०' (२।१।११४) अलुक् **रामहिअयए** ।

[ **इहयं** ] इह । अनेन कप्र० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । बाहुलकात् 'वा स्वरे मश्च' (१।२४) म्० । 'मोऽनु०' (१।२३) अनुस्वारः **इहयं** ।

[ **आलेट्ठुअं** ] आश्लेष्टुम् । 'क-ग-ट-ड-त०' (२।७७) श्लुक् । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः । अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । अनेन कप्र० । 'विंशत्यादेर्लुक्' (१।२८) म्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) **आलेट्ठुअं** ।

कप्रत्ययं द्विरपि भवति । यथा -

[ **बहुअयं** ] बहुक । अनेन कप्र० । 'क-ग-च-ज०' (१।१७७) द्वयोः कयोर्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । बाहुलकात् 'वा स्वरे मश्च' (१।२४) म्० । 'मोऽनु०' (१।२३) अनुस्वारः **बहुअयं** ।

सूत्रे ककारस्योच्चारणं कथम् ? पैशाचिकभाषार्थम् । यथा -

[ **वतनके वतनकं समप्पेत्तून** ] वदन । 'तदोस्तः' (४।३०७) दस्य तः । अनेन कप्र० । सप्तमी ङि । 'डे म्मि ङेः' (३।११) ङि० → डे० → ए० । 'ङित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **वतनके** । **वतनकं** तथैव ।

समर्पि इति निःपाद्य क्त्वाप्र० । 'क्त्वस्तूनः' (४।३१२) क्त्वा० → तून० । 'एच्च क्त्वा-तुम्-तव्य-भविष्यत्सु' (३।१५७) ('णेरदेदावावे' (३।१४९)) र्पि० → र्पे० । 'सर्वत्र ल०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) पे० → प्पे० **समप्पेत्तून** ।

---

१. ससिमऊहपडिपेल्लणपक्खुब्भन्तअं । संचरंत**धरणीहरपक्खुब्भन्तअं** ॥
धीरअं सइमुहलघणअविज्जन्तअं । अट्टिअं च वलवाणलपअविज्जन्तअं ॥ [से० ब० - २।२४]

शशिमयूखपरिप्रेरणप्रक्षुभ्यत्कं सञ्चरद्धरणीधरप्रक्षोभ्यमाणम् । धैर्यकं सदामुखरघनपीयमानमस्थितं च वडवानलप्रताप्यमानम् ॥

**[ निज्जिआसोअ-पल्लविल्लेण ]** निर्जिताशोक । 'सर्वत्र ल०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-जि० → ज्जि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'श-षोः सः' (१।२६०) शो० → सो० । 'क-ग-च-ज०' (१।१७७) क्लुक् **निज्जिआसोअ** ।

पल्लव । अनेन डिल्लप्रत्यय → इल्ल इति । 'डित्यन्त्य०' (२।१।११४) वमध्याद् अलुक् । 'लोकात्' (१।१।३) पल्लविल्ल। तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) ल्ल० → ल्ले० **पल्लविल्लेण** ।

**[ पुरिल्लो ]** पुरा अथवा पुरस् । अनेन डिल्लप्रत्यय → इल्ल इति । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'लोकात्' (१।१।३) पुरिल्ल० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पुरिल्लो** ।

**[ मह पिउल्लओ ]** मम-पितृ । 'मे-मइ-मम-मह-महं-मज्झ-मज्झं-अम्ह-अम्हं ङसा' (३।११३) मम० → मह० । अनेन डुल्लप्रत्यय → उल्ल इति - कप्रत्ययश्च । 'डित्यन्त्य०' (२।१।११४) तृमध्याद् ऋलुक् । 'लोकात्' (१।१।३) पितुल्लक। 'क-ग-च-ज०' (१।१७७) त-कयोर्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मह पिउल्लओ** ।

**[ मुहुल्लं ]** मुख । 'ख-घ-थ-ध-भाम्' (१।१८७) ख० → ह० । अनेन डुल्लप्रत्यय → उल्ल इति । 'डित्यन्त्य०' (२।१।११४) हमध्याद् अलुक् । 'लोकात्' (१।१।३) मुहुल्ल० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मुहुल्लं** ।

**[ हत्थुल्ला ]** हस्त । हस्तावेव । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्तस्य थः । 'अनादौ शेषाऽऽदेशयोर्द्वित्वम्' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । अनेन डुल्लप्रत्यय → उल्ल इति । 'डित्यन्त्य०' (२।१।११४) त्थमध्याद् अलुक् । 'लोकात्' (१।१।३) हत्थुल्ल० । प्रथमा औ । 'द्विवचनस्य बहुवचनम्' (३।१३०) औ० → जस्० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्०' (३।१२) ल्ल० → ल्ला० **हत्थुल्ला** ।

**[ चन्दो ]** चन्द्र । 'द्रे रो नवा' (२।८०) र्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० चन्दो।

**[ गयणं ]** गगन । 'क-ग-च-ज०' (१।१७७) ग्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **गयणं** ।

**[ इह ]** इह । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **इह** ।

**[ आलेट्ठुं ]** आश्लेष्टुम् । 'क-ग-ट-ड०' (२।७७) श्लुक् । 'ष्टस्याऽनुष्ट्रेष्टा०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'मोऽनु०' (१।२३) अनुस्वारः **आलेट्ठुं** ।

**[ बहु ]** बहु । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **बहु** ।

**[ बहुअं ]** बहुक । 'क-ग-च-ज०' (१।१७७) क्लुक् **बहुअं** ।

**[ मुहं ]** मुख । 'ख-घ-थ०' (१।१८७) ख० → ह० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मुहं** ।

**[ हत्था ]** हस्त । 'स्तस्य थोऽसमस्त०' (२।४५) स्त० → थ० । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । प्रथमा औ । 'द्विवचनस्य बहुवचनम्' (३।१३०) औ० → जस्० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्०' (३।१२) दीर्घः त्थ० → त्था० **हत्था** ।

'कुत्सिता-ऽल्पा-ऽज्ञाते' (७।३।३३) इत्यनेन यः कप्रत्ययः समेति स तु कुत्सादिविषये संस्कृतवदेव **सिद्धः** । तत्र(तः) कुत्सिताद्यर्थमन्यत् सूत्रं नोक्तम् । 'यावादिभ्यः कः' (७।३।१५) इति सूत्रेण यः कप्रत्ययः स यावादिगणाद् **भवति** इतिकारणात् 'स्वार्थे कश्च वा' (२।१६४) इति सूत्रं कृतम् ॥१६४॥

## ल्लो नवैकाद्वा ॥ ८।२।१६५ ॥

आभ्यां स्वार्थे संयुक्तो लो वा भवति ॥

नवल्लो । एकल्लो ॥ सेवादित्वात् कस्य द्वित्वे एक्कल्लो ॥ पक्षे-नवो । एक्को । एओ ॥

**[ ल्लो नवैकाद्वा ]** ल्ल प्रथमा सि । नवश्च एकश्च = नवैकम्, तस्मात् = नवैकात् । पञ्चमी ङसि । वा प्रथमा सि ।

**[ नवल्लो ]** नव । अनेन वा ल्लप्र० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नवल्लो** ।

**[ एकल्लो ]** एक । अनेन वा ल्लप्र० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **एकल्लो** ।

**[ एक्कल्लो ]** एक । अनेन ल्लप्र० । सेवादौ पठनात् 'सेवादौ वा' (२।९९) कस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **एक्कल्लो** ।

**पक्षे- [ नवो ]** नव । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **नवो** ।

**[ एक्को ]** एक । 'सेवादौ वा' (२।९९) कस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **एक्को** ।

**[ एओ ]** एक । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **एओ** ॥१६५॥

## उपरेः संव्याने ॥ ८।२।१६६ ॥

संव्यानेऽर्थे वर्तमानादुपरिशब्दात् स्वार्थे ल्लो भवति ॥ अवरिल्लो ॥ संव्यान इति किम् ? अवरिं ॥

**[ उपरेः संव्याने ]** उपरि पञ्चमी ङसि । संव्यान सप्तमी ङि ।

**[ अवरिल्लो ]** उपरि । 'वोपरौ' (१।१०८) उ० → अ० । 'पो वः' (१।२३१) पस्य वः । अनेन ल्लप्र० । **प्रथमा सि** । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अवरिल्लो** । प्रावरणमित्यर्थः ।

**[ अवरिं ]** उपरि । 'वोपरौ' (१।१०८) उ० → अ० । 'पो वः' (१।२३१) पस्य वः । 'वक्रादावन्तः' (१।२६) अनुस्वारः **अवरिं** ॥१६६॥

## भ्रुवो मया डमया ॥ ८।२।१६७ ॥

भ्रूशब्दात् स्वार्थे मया-डमया इत्येतौ प्रत्ययौ भवतः ॥ भुमया । भमया ॥

**[ भ्रुवो मया डमया ]** भ्रू पञ्चमी ङसि । मया प्रथमा सि । डमया प्रथमा सि ।

**[ भुमया ]** भ्रू । 'उर्भ्रू-हनूमत्-कण्डूय-वातूले' (१।१२१) भ्रू० → भ्रु० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन मयाप्र० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **भुमया** ।

**[ भमया ]** भ्रू । अनेन डमया० → अमया० इति । 'डित्यन्त्य०' (२।१।११४) ऊलुक् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **भमया** ॥१६७॥

## शनैसो डिअम् ॥ ८।२।१६८ ॥

शनैस्‌शब्दात् स्वार्थे डिअम् भवति ॥ सणिअमवगूढो ॥

**[ शनैसो डिअम् ]** शनैस् पञ्चमी ङसि । डिअम् प्रथमा सि ।

**[ सणिअमवगूढो ]** शनैस् । 'श-षोः सः' (१।२६०) श० → स० । 'नो णः' (१।२२८) नै० → णै० । अनेन डिअम्० → इअम्० इति । 'डित्यन्त्य०' (२।१।११४) ऐस्लुक् । 'लोकात्' (१।१।३) **सणिअम्** । अवगूढ प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अवगूढो** ॥१६८॥

## मनाको नवा डयं च ॥ ८।२।१६९ ॥

मनाक्‌शब्दात् स्वार्थे डयम्-डिअम् च प्रत्ययो वा भवति ॥ मणयं । मणिअं । पक्षे-मणा ॥

**[ मनाको नवा डयं च ]** मनाक् पञ्चमी ङसि । नवा प्रथमा सि । डयम् प्रथमा सि । च प्रथमा सि ।

**[ मणयं ]** मनाक् । अनेन वा डयम् → अयम् इति । 'डित्यन्त्य०' (२।१।११४) आक्लुक् । 'लोकात्' (१।१।३) मनयम् । 'नो णः' (१।२२८) न० → ण० - मणयम् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'मोऽनु०' (१।२३) अनुस्वारः **मणयं** ।

**[ मणिअं ]** मनाक् । अनेन डिअम्० → इअम्० इति । 'डित्यन्त्य०' (२।१।११४) आक्लुक् । 'लोकात्' (१।१।३) मनिअम् । 'नो णः' (१।२२८) नि० → णि० । 'मोऽनु०' (१।२३) अनुस्वारः **मणिअं** ।

**पक्षे- [ मणा ]** मनाक् । 'नो णः' (१।२२८) ना० → णा० । 'अन्त्यव्य०' (१।११) क्लुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **मणा** ॥१६९॥

## मिश्राड्डालिअः ॥ ८।२।१७० ॥

मिश्रशब्दात् स्वार्थे डालिअः प्रत्ययो वा भवति ॥ मीसालिअं । पक्षे-मीसं ॥

**[ मिश्राड्डालिअः ]** मिश्र पञ्चमी ङसि । डालिअ प्रथमा सि ।

**[ मीसालिअं ]** मिश्र । अनेन डालिअप्र० → आलिअ० इति । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'लुप्तय-र-व-श-ष-सां श-ष-सां दीर्घः' (१।४३) मि० → मी० । 'श-षोः सः' (१।२६०) शा० → सा० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) मीसालिअ । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मीसालिअं** । पक्षे -

**[ मीसं ]** मिश्र । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'लुप्तय-र-व०' (१।४३) दीर्घः - मि० → मी० । 'श-षोः सः' (१।२६०) श० → स० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मीसं** ॥१७०॥

## रो दीर्घात् ॥ ८।२।१७१ ॥

दीर्घशब्दात् परः स्वार्थे रो वा भवति ॥ दीहरं । दीहं ॥

**[ रो दीर्घात् ]** र प्रथमा सि । दीर्घ पञ्चमी ङसि ।

**[ दीहरं दीहं ]** दीर्घ । अनेन वा रप्र० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'ख-घ-थ-ध-भाम्' (१।१८७) घस्य हः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दीहरं** । पक्षे-दीर्घ । 'सर्वत्र ल-व०'

(२।७९) र्लुक् । 'ख-घ-थ०' (१।१।८७) घस्य हः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दीहं** ॥१७१॥

## त्वादेः सः ॥ ८।२।१७२ ॥

'भावे त्व-तल्' (७।१।५५) इत्यादिना विहितात् त्वादेः परः स्वार्थे स एव त्वादिर्वा भवति ॥

मृदुकत्वेन → मउअत्तयाइ । आतिशायिकात् त्वातिशायिकः संस्कृतवदेव सिद्धः । जिट्ठयरो । जिट्ठयमो । कणिट्ठयरो ॥

**[ त्वादेः सः ]** त्वादि पञ्चमी ङसि । स प्रथमा सि ।

**[ मउअत्तयाइ ]** मृदुकत्व । 'ऋतोऽत्' (१।१२६) मृ० → म० । 'क-ग-च-ज०' (१।१७७) द-कयोर्लुक् । 'सर्वत्र०' (२।७९) व्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । अनेन तल्प्र० → त इति । स्त्रियां- 'आत्' (२।४।१८) आप्प्र० → आ । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० । तृतीया टा । 'टा-ङस्-ङेरदादिदेद्वा तु ङसेः' (३।२९) टा० → इ० **मउअत्तयाइ** ।

अतिशयार्थप्रत्ययात् अतिशयार्थप्रत्ययः समेति, यः(सः) संस्कृतसम एव यथा -

[1]**[ जिट्ठयरो जिट्ठयमो ]** अतिशयेन प्रौढः = ज्येष्ठः । अतिशयेन ज्येष्ठः = जे(ज्ये)ष्ठतरः, जे(ज्ये)ष्ठतमः । 'अधो म-न-याम्' (२।७८) य्लुक् । 'ह्रस्वः संयोगे' (१।८४) जे० → जि० । 'ष्टस्या०' (२।३४) ष्ठस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जिट्ठयरो जिट्ठयमो** ।

**[ कणिट्ठयरो ]** अतिशयेन अल्पः = कनिष्ठः । अतिशयेन कनिष्ठः = कनिष्ठतरः । 'नो णः' (१।२२८) नि० → णि० । 'ष्टस्या०' (२।३४) ष्टस्य ठः । शेषं पूर्ववत् । **कणिट्ठयरो** ॥१७२॥

## विद्युत्-पत्र-पीता-ऽन्धाल्लः ॥ ८।२।१७३ ॥

एभ्यः स्वार्थे लो वा भवति ॥

विज्जुला । पत्तलं । पीवलं पीअलं । अन्धलो ॥ पक्षे- विज्जू । पत्तं । पीअं । अन्धो ॥

कथं जमलं ? यमलमिति संस्कृतशब्दाद् भविष्यति ॥

**[ विद्युत्पत्रपीताऽन्धाल्लः ]** विद्युत्पत्रपीताऽन्ध पञ्चमी ङसि । ल प्रथमा सि ।

**[ विज्जुला ]** विद्युत् । 'द्य-य्य-र्यां जः' (२।२४) द्यु० → जु० । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'अन्त्य०' (१।११) त्लुक् । अनेन वा लप्रत्ययः । स्त्रियां- 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **विज्जुला** ।

**[ पत्तलं ]** पत्र । अनेन वा लप्रत्ययः । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पत्तलं** ।

**[ पीवलं पीअलं ]** पीत । अनेन वा लप्रत्ययः । 'पीते वो ले वा' (१।२१३) तस्य वा व० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पीवलं** । द्वितीये-पीत । अनेन वा लप्रत्ययः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पीअलं** ।

---

१. H. L. जेट्ठयरो । A. जिट्ठयमो उदाहरणम् ।

**[ अन्धलो ]** अन्ध । अनेन वा लप्रत्ययः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अन्धलो** । पक्षे -

**[ विज्जू ]** विद्युत् । 'द्य-य्य-र्यां जः' (२।२४) द्यु० → जु० । 'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'अन्त्यव्य०' (१।११) त्लुक् । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **विज्जू** ।

**[ पत्तं ]** पत्र । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पत्तं** ।

**[ पीअं ]** पीत । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पीअं** ।

**[ अन्धो ]** अन्ध । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अन्धो** ।

**[ जमलं ]** यमल । 'आदेर्यो जः' (१।२४५) यस्य जः । जमलमिति तु संस्कृतसिद्धं ज्ञेयम् ॥१७३॥

## गोणादयः ॥ ८।२।१७४ ॥

गोणादयः शब्दा अनुक्तप्रकृति-प्रत्यय-लोपा-ऽऽगम-वर्णविकारा बहुलं निपात्यन्ते ॥

गौः → गोणो - गावी । गावः → गावीओ । बलीवर्दः → बइल्लो । आपः → आऊ । पञ्चपञ्चाशत् → पञ्चावण्णा - पणपण्णा(न्ना) । त्रिपञ्चाशत् → तेवण्णा । त्रिचत्वारिंशत् → तेआलीआ । व्युत्सर्गः → विउसग्गो । व्युत्सर्जनम् → वोसिरणं । बहिर्मैथुनं वा → बहिद्धा । कार्यम् → णामुक्कसिअं । क्वचित् → कत्थइ । उद्वहति → मुव्वहइ । अपस्मारः → [1]वम्हलो । उत्पलम् → कन्दुट्टं । धिक् धिक् → छि छि - [2]धिद्धी । धिगस्तु → धिरत्थु । प्रतिस्पर्धी(र्धा) → पडिसिद्धी - पाडिसिद्धी । स्थासकः → चच्चिक्कं । निलयः → निहेलणं । मघवान् → मघोणो । साक्षी → सक्खिणो । जन्म → जम्मणं । महान् → महन्तो । भवान् → भवन्तो । आशीः → आसीसा । क्वचित् हस्य ड्ड-भौ - बृहत्तरम् → वड्डयरं । हिमोरः → भिमोरो । ल्लस्य ड्डः - क्षुल्लकः → खुड्डुओ । घोषाणामग्रेतनो गायनः → घायणो । वडः → वढो । ककुदम् → ककुधं । अकाण्डम् → अत्थक्कं । लज्जावती → लज्जालुइणी । कुतूहलम् → कुड्डं । चूतः → मायन्दो । माकन्दशब्दः संस्कृतेऽपीत्यन्ये । विष्णुः → भट्टिओ । श्मशानम् → करसी । असुराः → अगया । खेलम् → खेड्डुं । पौष्पं रजः → तिंगिच्छि । दिनम् → अल्लं । समर्थः → पक्कलो । पण्डकः → णेलच्छो । कर्पासः → पलही । बली → उज्जल्लो । ताम्बूलम् → झसुरं । पुंश्चली → छिंछई । शाखा → साहुली इत्यादि ॥

वाऽधिकारात् पक्षे यथादर्शनं गउओ इत्याद्यपि भवति ॥

गोला - गोआवरी इति तु गोला - गोदावरीभ्यां सिद्धम् ॥

भाषाशब्दाश्च - आहित्थ । लल्लक्क । विड्डिर । पच्चड्डिअ । उप्पेहड । मडप्फर । पड्डिच्छिर । अट्टमट्ट । विहडप्फड । उज्जल्ल । हल्लप्फल इत्यादयो महाराष्ट्रविदर्भादिदेशप्रसिद्धा लोकतोऽवगन्तव्याः ॥

क्रियाशब्दाश्च - अवयासइ । फुम्फुल्लइ । उप्फालेइ इत्यादयः ॥ अत एव कृष्ट-घृष्ट-वाक्य-विद्वस्-वाचस्पति-विष्टरश्रवस्-प्रचेतस्-प्रोक्त-प्रोतादीनां-क्विबादिप्रत्ययान्तानां च अग्निचित्-सोमसुत्-सुग्ल-सुम्लेत्यादीनां पूर्वैः कविभिरप्रयुक्तानां प्रतीतिवैषम्यपरः प्रयोगो न कर्तव्यः, शब्दान्तरैरेव तदर्थोऽभिधेयः । यथा कृष्टः → कुशलः । वाचस्पतिर्गुरुः । विष्टरश्रवाः → हरिरित्यादि ॥

---

१. पा० म० - वम्हल नपुंसकलिङ्गः । २. I. J. L. धिद्धि ।

घृष्टशब्दस्य तु सोपसर्गस्य प्रयोग इष्यत एव । मन्दर-यड-परिघट्टं । तद्दिअस-निहट्ठाणङ्ग इत्यादि ॥

आर्षे तु यथादर्शनं सर्वमविरुद्धम् ॥ यथा - घट्ठा । मट्ठा । विउसा । सुअ-लक्खणाणुसारेण । वक्कन्तरेसु अ पुणो इत्यादि ॥

**[ गोणादयः ]** गोण आदौ येषां ते = गोणादयः । प्रथमा जस् ।

**[ गोणो ]** गो । अनेन गोण इति निपातः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **गोणो** ।

**[ गावी ]** गो । अनेन गाव इति निपातः । 'अजातेः पुंसः' (३।३२) ङीप्र० → ई० इति । 'लोकात्' (१।१।३) गावी । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **गावी** ।

**[ गावीओ ]** गो । प्रथमा जस् । अनेन गाव आदेशः । 'अजातेः पुंसः' (३।३२) ङीप्र० → ई० इति । 'लोकात्' (१।१।३) गावी । 'स्त्रियामुदोतौ वा' (३।२७) जस्० → उ० अथवा ओ० **गावीओ** ।

**[ बइल्लो ]** बलीवर्द । अनेन बइल्ल आदेशः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **बइल्लो** ।

**[ आऊ ]** आपः । अनेन आपः० → आउ० । प्रथमा जस् । 'जस्-शस्-ङसि०' (३।१२) उ० → ऊ । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **आऊ** ।

**[ पञ्चावण्णा पणपन्ना ]** पञ्चपञ्चाशत् । अनेन पञ्चपञ्चाशत् → पञ्चावण्णा पणपन्ना च इति निपातः । **पञ्चावण्णा पणपन्ना** ।

**[ तेवण्णा ]** त्रिपञ्चाशत् । अनेन तेवण्णा इति निपातः । **तेवण्णा** ।

**[ तेआलीसा ]** त्रिचत्वारिंशत् । अनेन तेआलीसा इति निपातः । **तेआलीसा** ।

**[ विउसग्गो ]** व्यत्सर्ग । अनेन व्यु० → विउ० इति निपातः । 'क-ग-ट-ड-त०' (२।७७) त्लुक् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विउसग्गो** ।

**[ वोसिरणं ]** व्युत्सर्जन । 'सृजो रः' (४।२२९) र्जस्य रः । 'नो णः' (१।२२८) नस्य णः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः । शेषं अनेन निपात्यते । **वोसिरणं** ।

**[ बहिद्धा ]** बहिस् अथवा मैथुन । अनेन बहिद्धा इति निपातः । **बहिद्धा** ।

**[ णामुक्कसिअं ]** कार्यम् । अनेन णामुक्कसिअं इति निपातः । **णामुक्कसिअं** ।

**[ कत्थइ ]** क्वचित् । अनेन कत्थइ इति निपातः । **कत्थइ** ।

**[ मुव्वहइ ]** उद्वहति । अनेन निपातत्वात् आदौ "म्" इति निपातः । 'लोकात्' (१।१।३) मुद्वहति । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । 'त्यादीनामाद्य०' (३।१३९) ति० → इ० **मुव्वहइ** ।

**[ वम्हलो ]** अपस्मार । अनेन अपस्मार० → वम्हल० इति निपातः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वम्हलो**-उन्मादरोग इत्यर्थः ।

**[ कन्दुट्टं ]** उत्पल । अनेन कन्दुट्ट इति निपातः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कन्दुट्टं** ।

**[ छिछि धिद्धी ]** धिक् धिक् । अनेन छि छि अथवा धिद्धी इति निपातः । **छि छि धिद्धी** ।

**[ धिरत्थु ]** धिगस्तु । अनेन गस्य "र" वा इति निपातः । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्तु० → थु० । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **धिरत्थु धिगत्थु** ।

**[ पडिसिद्धी पाडिसिद्धी ]** प्रतिस्पर्द्धा - प्रतिसिद्धि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अतः समृद्ध्यादौ वा' (१।४४) प० → पा० । 'प्रत्यादौ डः' (१।२०६) ति० → डि० । अनेन पडिसिद्धी पाडिसिद्धी निपातः । **पडिसिद्धी पाडिसिद्धी** ।

**[ चच्चिक्कं ]** स्थासक । अनेन निपातः । **चच्चिक्कं** ।

**[ निहेलणं ]** निलयः । अनेन निहेलणं निपातः । **निहेलणं** ।

**[ मघोणो ]** मघवान् । अनेन मघोणो निपातः । **मघोणो** ।

**[ सक्खिणो ]** साक्षिन् । 'ह्रस्वः संयोगे' (१।८४) सा० → स० । 'क्षः खः क्वचित्तु०' (२।३) क्षस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । अनेन णकारनिपातः । प्रथमा सि । **सक्खिणो** ।

**[ जम्मणं ]** जन्मन् । 'न्मो मः' (२।६१) न्मस्य मः । 'अनादौ०' (२।८९) मस्य द्वित्वम् । अनेन न्० → ण० निपातः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जम्मणं** ।

**[ महन्तो ]** महान् । 'ह्रस्वः संयोगे' (१।८४) हा० → ह० (?) । अनेन महन्त निपातः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **महन्तो** ।

**[ भवन्तो ]** भवान् । 'ह्रस्वः संयोगे' (१।८४) वा० → व० (?) । शेषं निपातः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भवन्तो** ।

**[ आसीसा ]** [1]आशिष् । 'श-षोः सः' (१।२६०) शि० → सि० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् । शेषमनेन निपातः । **आसीसा** ।

क्वचित् हस्य ड्डकारो भश्च भवति ।

**[ वड्डयरं ]** बृहत्तर । 'ऋतोऽत्' (१।१२६) बृ० → ब० । अनया हस्य ड्ड० निपातः । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वड्डयरं** ।

**[ भिमोरो ]** हिमस्य उरोमध्यं = हिमोरः । अनया हि० → भि० निपातः । 'स्नमदाम-शिरो-नभः' (१।३२) इति पुंस्त्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भिमोरो** ।

क्वचित् ह्रस्य डो निपात्यते ।

---

१. L. आशिस् ।

**[ खुड्डओ ]** क्षुल्लक । 'क्षः खः क्वचित्तु०' (२।३) क्षु० → खु० । अनेन ल्लस्य डो निपातः । 'अनादौ शेषाऽऽदेशयोर्द्वित्वम्' (२।८९) डस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खुड्डओ** ।

**[ घायणो ]** घोषवतां वर्णानां अग्रेतनो वर्णो भवति गायनः । अनया गा० → घा० निपातः । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **घायणो** ।

**[ वढो ]** वड । अनया डस्य ढो निपातः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वढो** ।

[1]**[ ककुधं ]** ककुदम् । 'क-ग-च-ज०' (१।१७७) क्लुक्(?) । अनया दस्य धो निपातः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कउ( कु )धं** ।

**[ अत्थक्कं ]** अकाण्डम् । अनेन अत्थक्कं इति निपातः । **अत्थक्कं** ।

**[ लज्जालुइणी ]** लज्जावती । **लज्जालुइणी** ।

लज्जावती इत्यारभ्य साहुली यावत् अनेन सूत्रेण निपातः ।

**[ गउओ ]** गो । 'गव्यउ आअः' (१।१५८) गो० → गउ० । स्वार्थे कप्र० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **गउओ** ।

**[ गोला ]** गोला । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **गोला** ।

**[ गोआवरी ]** गोदावरी । 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **गोआवरी** ।

**[ आहित्थो ]** चलितः - कुपितः - आकुलो वा ।

**[ लल्लक्कं ]** [2]भीष्मम् ।

**[ विड्डिरो ( रं ) ]** [3]आभोगः ।

**[ पच्चड्डिअं ]** क्षरितम् ।

**[ उप्पेहडं ]** उद्भटम् ।

**[ मडप्फरो ]** गर्वः ।

[4]**[ पडिच्छिरं ]** सदृशम् ।

**[ अट्टमट्टं ]** [5]आलमालम् ।

**[ विहडप्फडो ]** व्याकुलः ।

**[ उज्जल्लो( ल्लं ) ]** [6]हठः ।

[7]**[ हल्लप्फलो( लं ) ]** आनन्द इत्यादि ।

---

१. पा० म० - ककुद → कउह-ककुह-कउड-ककुध-ककुभ । २. I. भीषणम् । ३. K. आनकः । ४. L. पड्डिच्छिरं सदृक्-क्वचित् । K. सदृक्-अहिवच्छरोऽग्निविकारो वा । ५. L. आलबालम् । K. आरवालम् । ६. L. बलिष्ठस्य उज्जल्लं । K. अज्जल्लं । ७. L. औत्सुक्यस्य हल्लप्फडं ।

[ **अवयासइ** ] सा(अ)वकाशं करोति ददाति वा सा(अ)वकाशयति ।

[ **फुम्फुल्लइ** ] उत्पाटयति कथयति वा ।

[ **उप्फालेइ** ] उत्पाटयति कथयति वा ।

[ **कृष्टः** ] पण्डितवाचकः ।

[ **मन्दर-यड-परिघट्टं** ] मन्दर-तट-परिघृष्ट । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'टो डः' (१।१९५) टस्य डः । 'ऋतोऽत्' (१।१२६) घृ० → घ० । 'ष्टस्या०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्य०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मन्दर-यड-परिघट्टं** ।

[ **तद्दिअस-निहट्ठाणङ्ग** ] तद्दिवस-निघृष्टाऽनङ्ग । 'क-ग-च-ज०' (१।१७७) व्लुक् । 'ऋतोऽत्' (१।१२६) घृ० → घ० । 'ख-घ०' (१।१८७) घ० → ह० । 'ष्टस्या०' (२।३४) ष्टस्य ठः । 'द्वितीय-तुर्य०' (२।९०) पूर्वठस्य टः । 'नो णः' (१।२२८) न० → ण० **तद्दिअस-निहट्ठाणङ्ग** ।

आर्षे तु यथादर्शनं सर्वे प्रयोगा अविरुद्धा एव-घट्ठा.......... ।

[ **विउसा** ] विद्वस् । आर्षे विउस इति निपातः । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः स० → सा० **विउसा** ।

[ **सुअ-लक्खणाणुसारेण** ] श्रुत-लक्षणानुसारेण । 'सर्वत्र ल०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शु० → सु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'क्षः खः०' (२।३) क्ष० → ख० । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्य०' (२।९०) पूर्वखस्य कः । 'नो णः' (१।२२८) नु० → णु० । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) र० → रे० **सुअ-लक्खणाणुसारेण** ।

[ **वक्कन्तरेसु अ पुणो** ] वाक्यान्तरेषु च पुनः । वाक्यान्तर । सप्तमी सुप् । 'ह्रस्वः संयोगे' (१।८४) ह्रस्वः । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) कस्य द्वित्वम् । 'भिस्-भ्यस्-सुपि' (३।१५) र० → रे० **वक्कन्तरेसु**। च । 'क-ग-च-ज०' (१।१७७) च्लुक् **अ** । पुनः । 'नो णः' (१।२२८) न० → ण० । 'अतो डो विसर्गस्य' (१।३७) विसर्गस्य डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **पुणो** ॥१७४॥

## अव्ययम् ॥ ८।२।१७५ ॥

अधिकारोऽयम् । अतः परं ये वक्ष्यन्ते आ पादसमाप्तेस्ते अव्ययसंज्ञा ज्ञातव्याः ॥१७५॥

## तं वाक्योपन्यासे ॥ ८।२।१७६ ॥

तमिति वाक्योपन्यासे प्रयोक्तव्यम् ॥ [१]तं तिअसबन्दिमोक्खं ॥

[ **तं वाक्योपन्यासे** ] तं प्रथमा सि । वाक्योपन्यास सप्तमी ङि ।

[१][ **तं तिअसबन्दिमोक्खं** ] तं । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **तं** । त्रिदशबन्दिमोक्ष । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'श-षोः सः' (१।२६०) श० → स० । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्षस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **तिअसबन्दिमोक्खं** ।

[1]**तं तिअसबन्दिमोक्खं**, समत्ततिलुक्कहिअयसमुद्धरणं ।
सुणह अणुरायविध(इण्हं) सीआदुक्खक्खयं दहमुहस्स वहं ॥ ॥ कन्दकनाम छन्दः ॥१७७॥

## आम अभ्युपगमे ॥ ८।२।१७७ ॥

आमेत्यभ्युपगमे प्रयोक्तव्यम् ॥ आम बहला वणोली ॥

**[ आम अभ्युपगमे ]** आम प्रथमा सि । अभ्युपगम सप्तमी ङि ।

[2]**[ आम बहला वणोली ]** आम । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **आम** । बहला । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **बहला** । वनाली । 'नो णः' (१।२२८) ना० → णा० । 'ओदाल्यां पङ्क्तौ' (१।८३) णा० → णो० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **वणोली** । वनाली निबिडा वर्त्तते । अनेन वाक्येन अन्यस्य अङ्गीकारो ज्ञायते इत्यर्थः ॥१७७॥

## णवि वैपरीत्ये ॥ ८।२।१७८ ॥

णवीति वैपरीत्ये प्रयोक्तव्यम् ॥ णवि हा ! वणे ॥

**[ णवि वैपरीत्ये ]** णवि प्रथमा सि । वैपरीत्य सप्तमी ङि ।

**[ णवि हा ! वणे ]** णवि । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **णवि** । हा ! प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **हा !** । वन । सप्तमी ङि । 'नो णः' (१।२२८) न० → ण० । 'डे-म्मि ङेः' (३।११) ङि → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अकारलोपः **वणे** । हा ! इति खेदे । सा वने न भविष्यतीति वैपरीत्यम् ॥१७८॥

## पुणरुत्तं कृतकरणे ॥ ८।२।१७९ ॥

पुणरुत्तमिति कृतकरणे प्रयोक्तव्यम् ॥ अइ ! सुप्पइ पंसुलि ! णीसहेहिँ अंगेहिँ पुणरुत्तं ॥

**[ पुणरुत्तं कृतकरणे ]** पुणरुत्तं प्रथमा सि । कृतकरण सप्तमी ङि ।

**[ अइ ! सुप्पइ पंसुलि ! णीसहेहिँ अंगेहिँ पुणरुत्तं ]** अयि । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'अव्ययस्य' (३।२।७) सिलुप् **अइ !** ।

'ञिष्वपंक् शये' (१०८८) ष्वप् । 'षः सोऽष्ट्यै०' (२।३।९८) स्वप् । वर्त्त० ते । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) ते० → इ० । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'सर्वत्र०' (२।७९) व्लुक् । 'स्वपावुच्च' (१।६४) स० → सु० । 'गमादीनां द्वित्वम्' (४।२४९) पस्य द्वित्वं - क्यस्य च लुक् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) **सुप्पइ** ।

---

१. [शृ० प्र० - ११।३६३ । से० ब० - १।१२]
तं त्रिदशबन्दिमोक्षं समस्तत्रैलोक्यहृदयशल्योद्धरणम् । शृणुत अनुरागचिह्नं सीतादुःखक्षयं दशमुखस्य वधम् ॥
२. **आम बहला वणा( णो )ली** मुहला जलरङ्कुणो जलं सिसिरं । अण्णणईणं[1] वि रेवाइ तह वि अण्णे गुणा के वि ॥
[गा० स० - ६।७८ । गा० को० - ६।६६]
सत्यं बहला वनाली मुखरा जलैरङ्कवो[2] जलं शिशिरम् । अन्यनदीनामपि रेवायास्तथाऽप्यन्ये गुणाः केऽपि ॥
१. पाठां - गा० को० - अन्नणईसु = अन्यनदीषु । २. जलपक्षिणो ।

पांशुला । 'अजातेः पुंसः' (३।३२) ङीप्र० → ई० । 'लुक्' (१।१०) आलुक् । 'लोकात्' (१।१।३) पांशुली । 'मांसादिष्वनुस्वारे' (१।७०) ह्रस्वः - पां० → पं० । 'श-षोः सः' (१।२६०) शु० → सु० । आमन्त्रणे सि । 'ईदूतोर्ह्रस्वः' (३।४२) ली० → लि० । 'अन्त्यव्य०' (१।११) स्लुक् **पंसुलि !** ।

निर्-सह । 'निर्दुरोर्वा' (१।१३) र्लुक् । 'र्लुकि निरः' (१।९३) नि० → नी० । 'वाऽऽदौ' (१।२२९) नी० → णी० । णीसह इति जाते तृतीया भिस् । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिँ । 'भिस्-भ्यस्-सुपि' (३।१५) ह० → हे० **णीसहेहिँ** ।

अंग । तृतीया भिस् । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिँ० । 'भिस्-भ्यस्-सुपि' (३।१५) ग० → गे० **अंगेहिँ** ।

पुणरुत्तं । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **पुणरुत्तं** ।

अस्यार्थः - अयि ! इति कोमलामन्त्रणे । हे पांसुले ! । [१]भवती निःसहैरङ्गैर्वारं (२) स्वपिति ॥१७९॥

## हन्दि विषाद-विकल्प-पश्चात्ताप-निश्चय-सत्ये ॥ ८।२।१८० ॥

हन्दि इति विषादादिषु प्रयोक्तव्यम् ॥

हन्दि चलणे णओ सो ण माणिओ, हन्दि हुज्ज एत्ताहे ।

हन्दि न होही भणिरी, सा सिज्जइ हन्दि तुह कज्जे ॥

हन्दि सत्यमित्यर्थः ॥

**[ हन्दि ]** हन्दि प्रथमा सि ।

**[ विषादविकल्पपश्चात्तापनिश्चयसत्ये ]** विषादश्च विकल्पश्च इत्यादि द्वन्द्वः ।

**[ हन्दि चलणे णओ सो ण माणिओ.............. ]**

हन्दि । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **हन्दि** ।

चरण । 'हरिद्रादौ लः' (१।२५४) र० → ल० चलण । सप्तमी ङि । 'डे-म्मि ङेः' (३।११) ङि० → डे० → ए० इति **चलणे** ।

नत । 'वाऽऽदौ' (१।२२९) नस्य णः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **णओ** ।

तद् । प्रथमा सि । 'तः सौ सः' (२।१।४२) तस्य सः । ('तदश्च तः०' (३।८६) त० → स०) । 'अन्त्यव्य०' (१।११) द्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सो** ।

न मानित । प्रथमा सि । 'वाऽऽदौ' (१।२२९) नस्य णः । 'नो णः' (१।२२८) नस्य णः । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **ण माणिओ** ।

'भू सत्तायाम्' (१) भू । भविष्यन्ती स्यति । 'मध्ये च स्वरान्ताद्वा' (३।१७८) स्यति० → ज्ज० । 'अविति हुः' (४।६१) भू० → हु० **हुज्ज** ।

---

१. K. त्वम् ।

इदानीम् । 'एण्हि - एत्ताहे इदानीमः' (२।१३४) इदानीम्० → एत्ताहे० । प्रथमा सि । 'अव्ययस्य०' (३।२।७) सिलुप् **एत्ताहे** ।

न । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **न** ।

'भू सत्तायाम्' (१) भू । भविष्यन्ती स्यति । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० । 'भविष्यति हिरादिः' (३।१६६) स्य० → हि० । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) ति० → इ० । बाहुलकात् 'पदयोः सन्धिर्वा' (१।५) इति एकपदेऽपि सन्धिः **होही** ।

'भण शब्दे' (२६४) भण् । भणतीत्येवंशीलो धर्मो वा - साधुर्वा । 'तृन् शील-धर्म०' (५।२।२७) तृन्प्र० । 'शीलाद्यर्थस्येरः' (२।१४५) तृन्० → इर० । 'लोकात्' (१।१।३) भणिर । 'अजातेः पुंसः' (३।३२) ङीप्र० → ई० इति । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) **भणिरी** ।

सा । 'ञिष्विदाङ् मोचने च' (९४६) ष्विद् । 'ष्विदांच् गात्रप्रक्षरणे' (११७८) ष्विद् । 'षः सोऽष्ट्यै०' (२।३।९८) स्विद् । वर्त्त० ते । 'त्यादीनामा०' (३।१३९) इ० । 'क्यः शिति' (३।४।७०) क्यप्र० → य इति । 'लोकात्' (१।१।३) स्विद्यइ । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'स्विदां ज्जः' (४।२२४) द्यस्य ज्ज० **सिज्जइ** ।

युष्मद् । षष्ठी ङस् । 'तइ-तु-ते-तुम्ह-तुह०' (३।९९) युष्मद्० → **तुह०** ।

कार्य । 'ह्रस्वः संयोगे' (१।८४) का० → क० । 'द्य-य्य-र्यां जः' (२।२४) र्यस्य ज० । 'अनादौ०' (२।८९) जस्य द्वित्वम् । सप्तमी ङि । 'डे-म्मि-ङेः' (३।११) ङि० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् **कज्जे** ।

हन्दि विषादे - स चलने यदा नतः तदा न मानितः । स इदानीं भविष्यति न वा इति विकल्पः । सा भणिष्यति न वा इति पश्चात्तापः । किं कथयिष्यति ? तदाऽऽह-तव कार्ये सा स्विद्यते । खेदं प्राप्नोतीत्यर्थः ॥१८०॥

## हन्द च गृहाणार्थे ॥ ८।२।१८१ ॥

हन्द हन्दि च गृहाणार्थे प्रयोक्तव्यम् ॥ हन्द पलोएसु इमं । हन्दि । गृहाणेत्यर्थः ॥

**[ हन्द च गृहाणार्थे ]** हन्द प्रथमा सि । च प्रथमा सि । गृहाणार्थ सप्तमी ङि ।

**[ हन्द पलोएसु इमं ]** हन्द । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **हन्द** ।

'लोकृङ् दर्शनाङ्कयोः(दर्शने)' (६१२) लोक्, प्रपूर्व० । पञ्चमी स्व । 'दु-सु-मु विध्यादिष्वेकर्स्मिस्त्रयाणाम्' (३।१७३) स्व० → सु० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) लोकसु । 'वर्तमाना-पञ्चमी-शतृषु वा'(३।१५८) एत्वं - क० → के० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'सर्वत्र ल-व०' (२।७९) र्लुक् **पलोएसु** ।

इदम् । द्वितीया अम् । 'इदम इमः' (३।७२) इदम्० → इम० । 'अमोऽस्य' (३।५) अम्० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **इमं** । इदं वस्तु प्रलोकयस्व-गृहाण इत्यर्थः ।

**[ हन्दि ]** हन्दि अव्ययं - गृहाण ॥१८१॥

## मिव-पिव-विव-व्व-व-विअ इवार्थे वा ॥ ८।२।१८२ ॥

एते इवाऽर्थे अव्ययसंज्ञकाः प्राकृते वा प्रयुज्यन्ते ॥

कुमुअं मिव । चंदणं पिव । हंसो विव । साअरो व्व । खीरोओ सेसस्स व निम्मोओ, तुह जास रासी परिप्फुरइ । कमलं विअ । पक्षे-नीलुप्पलमाला इव ॥

**[ मिवपिवविवव्ववविअ ]** मिव-पिवेत्यादि ।

**[ कुमुअं मिव ]** कुमुद । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कुमुअं** । मिव । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **मिव** ।

**[ चंदणं पिव ]** चंदन । प्रथमा सि । 'नो णः' (१।२२८) न० → ण० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **चंदणं** । पिव । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **पिव** ।

**[ हंसो विव ]** हंस । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० हंसो । विव प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **विव** ।

**[ साअरो व्व ]** सागर । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) ग्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **साअरो** । व्व । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **व्व** ।

**[ खीरोओ सेसस्स व निम्मोओ ]** क्षीरोद । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्षस्य खः । 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खीरोओ** ।

शेष । षष्ठी ङस् । 'श-षोः सः' (१।२६०) श०- ष० → स० । 'ङसः स्सः' (३।१०) ङस् → स्स० सेसस्स ।

व । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **व** ।

निर्मोक । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) मस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निम्मोओ** ।

**[ कमलं विअ ]** कमल । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः कमलं । विअ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **विअ** ।

**पक्षे-[ नीलुप्पलमाला इव ]** नीलोत्पलमाला । 'ह्रस्वः संयोगे' (१।८४) लो० → लु० । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'अनादौ०' (२।८९) पस्य द्वित्वम् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **नीलुप्पलमाला** । इव । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **इव** ॥१८२॥

## जेण-तेण लक्षणे ॥ ८।२।१८३ ॥

जेण-तेण इत्येतौ लक्षणे प्रयोक्तव्यौ ॥

भमररुअं जेण कमलवणं । भमररुअं तेण कमलवणं ॥

**[ जेण-तेण लक्षणे ]** जेण-तेण प्रथमा औ । 'अव्ययस्य' (३।२।७) औलुप् । लक्षण सप्तमी ङि ।

**[ भमररुअं जेण कमलवणं ]** भ्रमररुत । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **भमररुअं** ।

जेण । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **जेण** ।

कमलवन । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कमलवणं** ।

**[ भमररुअं तेण कमलवणं ]** तेण । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **तेण** । शेषं पूर्ववत् ॥१८३॥

## णइ-चेअ-चिअ-च्च अवधारणे ॥ ८।२।१८४ ॥

एतेऽवधारणे प्रयोक्तव्याः ॥

गईए णइ । जं चेअ मउलणं लोअणाणं । अणुबद्धं तं चिअ कामिणीणं । सेवादित्वाद् द्वित्वमपि । [१]ते च्चिअ धन्ना । ते च्चेअ सुपुरिसा । स च्च य रूवेण । स च्च सीलेण ॥

**[ णइचेअचिअच्च ]** णइ इत्यादि ।

**[ अवधारणे ]** अवधारण सप्तमी ङि ।

**[ गईए णइ ]** गति । तृतीया टा । 'टा-ङस्-ङेरदादिदेद्वा तु ङसेः' (३।२९) टा० → ए० - दीर्घश्च ति० → ती० । 'क-ग-च-ज०' (१।१७७) त्लुक् **गईए** ।

णइ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **णइ** ।

**[ जं चेअ मउलणं लोअणाणं ]** यद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् । 'वा स्वरे मश्च' (१।२४) द्० → म्० । 'आदेर्यो जः' (१।२४५) य० → ज० । 'मोऽनु०' (१।२३) अनुस्वारः **जं** ।

चेअ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **चेअ** ।

मुकुलन । 'उतो मुकुलादिष्वत्' (१।१०७) मु० → म० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मउलणं** ।

लोचन । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि०' (३।१२) न० → ना० । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'नो णः' (१।२२८) ना० → णा० **लोअणाणं** ।

**[ अणुबद्धं तं चिअ कामिणीणं ]** अनुबद्ध । 'नो णः' (१।२२८) नु० → णु० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अणुबद्धं** ।

तद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् । 'वा स्वरे मश्च' (१।२४) द्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तं** ।

चिअ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **चिअ** ।

कामिनी । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'नो णः' (१।२२८) नी० → णी० **कामिणीणं** ।

[१]**[ ते च्चिअ धन्ना ]** तद् । प्रथमा जस् । 'अतः सर्वादेर्डेर्जसः' (३।५८) जस्० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अद्लोपः । 'लोकात्' (१।१।३) **ते** ।

चिअ । 'सेवादौ वा' (२।९९) द्वित्वं-चि० → च्चि० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । **च्चिअ** ।

धन्य । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) द्वित्वं-न० → न्न० । प्रथमा जस् । **धन्ना** ।

**[ ते च्चेअ सुपुरिसा ]** ते च्चेअ सुपुरुषाः । 'पुरुषे रोः' (१।१११) रु० → रि० । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्०' (३।१२) दीर्घः- स० → सा० **सुपुरिसा** ।

---

१. **ते चिय धण्णा ते चिय सप्पुरिसा** ते जियंतु जियलोए । वोद्दह-दहम्मि पडिया तरंति जे चेव लीलाए ॥

[प० प्र० - द्वितीयो महाधिकारः -२।११७]

ते चैव धन्याः ते चैव सत्पुरुषाः ते जीवन्तु जीवलोके । यौवनद्रहे पतिताः तरन्ति ये चैव लीलया ॥

**[ स च्च य रूवेण ]** स च्च च । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **स च्च य** ।

रूप । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१८) प० → पे० । 'पो वः' (१।२३१) पे० → वे० **रूवेण** ।

**[ स च्च सीलेण ]** स च्च शील । तृतीया टा । 'श-षोः सः' (१।२६०) शी० → सी० । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) ल० → ले० **सीलेण** ॥१८४॥

## बले निर्धारण-निश्चययोः ॥ ८।२।१८५ ॥

बले इति निर्धारणे निश्चये च प्रयोक्तव्यम् ॥

निर्धारणे - बले पुरिसो धणंजओ खत्तिआणं ॥ निश्चये - बले सीहो । सिंह एवाऽयम् ॥

**[ बले निर्धारणनिश्चययोः ]** बले सप्तमी ङि । (प्रथमा सि) । निर्धारणं च निश्चयश्च = निर्धारणनिश्चयौ, तयोः = निर्धारणनिश्चययोः ।

**[ बले पुरिसो धणंजओ खत्तिआणं ]** बले । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । **बले** ।

पुरुष । 'पुरुषे रोः' (१।१११) रु० → रि० । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पुरिसो** ।

धनंजय । 'नो णः' (१।२२८) नं० → णं । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **धणंजओ** ।

क्षत्रिय । 'क्षः खः क्वचित्तु०' (२।३) क्ष० → ख० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ति० → त्ति० । 'क-ग-च-ज०' (१।१७७) य्लुक् । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि०' (३।१२) अ० → आ० **खत्तिआणं**

**[ बले सीहो ]** सिंह । 'विंशत्यादेर्लुक्' (१।२८) अनुस्वारलुक् । 'ईर्जिह्वा-सिंह-त्रिंशद्विंशतौ त्या' (१।९२) सि० → सी० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सीहो** ॥१८५॥

## किरेर-हिर किलार्थे वा ॥ ८।२।१८६ ॥

किर-इर-हिर इत्येते किलार्थे वा प्रयोक्तव्याः ॥

[१]कल्लं किर खर-हिअओ । तस्स इर । पिअ-वयंसो हिर ॥ पक्षे- एवं किल तेण सिविणए भणिआ ॥

**[ किरेर-हिर किलार्थे वा ]** किरेर-हिर प्रथमा सि । किलार्थ सप्तमी ङि । वा प्रथमा सि ।

[१]**[ कल्लं किर खरहिअओ पविसिहिइ पिउत्ति सुव्वइ जणंमि ।**
**तह वड्ढसु भयवइ ! निसे जह से कल्लं वि य ( चिअ ) न होइ ॥१॥ ]**

---

१. कल्लं **किल** खरहिअओ पव[१]सिहिइ पि[२]ओत्ति सु[३]ण्णइ जणम्मि । तह वड्ढ भयवइ ! णिसे ! जह से कल्लं चिअ ण होइ ॥
[गा० स०-१४६ । गा० को०-१४८ । व० ल०-पवसियवज्जा-३६५ । शृ० प्र०-२२।९९-२३।५३-३१।८३]
१. पाठां० शृ० प्र० -पवच्चसिहि । २. शृ० प्र० -दइओ । ३. व० ल० - शृ० प्र०- सुव्वइ ।
कल्यं किल खरहृदयः प्रवत्स्यति प्रिय ! इति श्रूयते जने । तथा वर्धस्व भगवति ! निशे ! यथा तस्य कल्यमेव न भवति ॥

किल(र) इति सम्भावनायाम् । कल्ये खरहृदयः प्रियः प्रवेक्ष्यति-चलिष्यति इति जने श्रूयते । हे भगवति ! निशे त्वं तथा वर्द्धस्व यथा से - तस्य भर्तुः कल्यमेव - प्रभातमेव न भवतीति अस्यार्थः ।

कल्य । सप्तमी ङि । 'सप्तम्या द्वितीया' (३।१३७) द्वितीया अम् । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ल० → ल्ल० । 'अमोऽस्य' (३।५) अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कल्लं** ।

किर । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **किर** ।

खरहृदय । 'इत् कृपादौ' (१।१२८) हृ० → हि० । 'क-ग-च-ज०' (१।१७७) द-ययोर्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **खरहिअओ** ।

**[ तस्स इर ]** तद् । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० । 'अन्त्य०' (१।११) द्लुक् तस्स ।

इर । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **इर** ।

**[ पिअवयंसो हिर ]** प्रियवयस्य । 'सर्वत्र०' (२।७९) र्लुक् । 'वक्रादावन्तः' (१।२६) अनुस्वारः । 'अधो म-न-याम्' (२।७८) य्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पिअवयंसो** ।

माननीय । 'नो णः' (१।२२८) द्वयोर्नयोर्णः । 'वोत्तरीयानीय-तीय-कृद्ये ज्जः' (१।२४८) य० → ज्ज० । 'ह्रस्वः संयोगे' (१।८४) णी० → णि० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० माणणिज्जो ।

**[ एवं किल तेण सिविणए भणिआ ]** तेन । 'नो णः' (१।२२८) न० → ण० **तेण** ।

स्वप्न । 'इः स्वप्नादौ' (१।४६) प्-न इति विश्लेषे नात् पूर्वं इ० । 'लोकात्' (१।१।३) पि० । 'सर्वत्र०' (२।७९) व्लुक् । 'स्वप्ने नात्' (२।१०८) स० → सि० । 'पो वः' (१।२३१) पि० → वि० । 'नो णः' (१।२२८) न० → ण० । 'स्वार्थे कश्च वा' (२।१६४) कप्र० । सप्तमी ङि । 'डे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'ङित्यन्त्य०' (२।१।११४) कस्य अलुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् **सिविणए** ।

भणिता । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अन्त्यव्य०' (१।११) स्लुक् **भणिआ** ॥१८६॥

## णवर केवले ॥ ८।२।१८७ ॥

केवलार्थे णवर इति प्रयोक्तव्यम् ॥ णवर पिआइं चिअ णिव्वडन्ति ॥

**[ णवर केवले ]** णवर प्रथमा सि । केवल सप्तमी ङि ।

**[ णवर पिआइं चिअ णिव्वडन्ति ]** णवर । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **णवर** ।

प्रिय । प्रथमा जस् । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'जस्-शस इँ-इं-णयः सप्राग्दीर्घाः' (३।२६) जस्० → इं - दीर्घश्च अ० → आ० **पिआइं** ।

चिअ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **चिअ** ।

'भू सत्तायाम्' (१) भू । वर्त्त० अन्ति । 'पृथक्-स्पष्टे णिव्वडः' (४।६२) भू० → णिव्वड इति । 'बहुष्वाद्यस्य० (३।१४२) अन्ति० → न्ति० **णिव्वडन्ति** ॥१८७॥

## आनन्तर्ये णवरि ॥ ८।२।१८८ ॥

आनन्तर्ये णवरीति प्रयोक्तव्यम् ॥ [१]णवरि अ से रहुवइणा ॥

केचित्तु केवलाऽऽनन्तर्ययोर्णवर-णवरीत्येकमेव सूत्रं कुर्वन्ति, तन्मते उभावप्युभयाऽर्थौ ।

**[ आनन्तर्ये णवरि ]** आनन्तर्य सप्तमी ङि । णवरि प्रथमा सि ।

[१]**[ णवरि अ से रहुवइणा ]** तद् । षष्ठी ङस् । 'वेदं-तदेतदो ङसाम्भ्यां से-सिमौ' (३।८१) ङस्सहित-तद्० → **से०** ।

रघुपति । तृतीया टा । 'ख-घ-थ०' (१।१८७) घु० → हु० । 'पो वः' (१।२३१) प० → व० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'टो णा' (३।२४) टा० → णा० **रहुवइणा** ॥१८८॥

## अलाहि निवारणे ॥ ८।२।१८९ ॥

अलाहीति निवारणे प्रयोक्तव्यम् ॥ अलाहि किं वाइएण लेहेण ॥

**[ अलाहि निवारणे ]** अलाहि प्रथमा सि । निवारण सप्तमी ङि ।

**[ अलाहि किं वाइएण लेहेण ]** वाचितेन । 'क-ग-च-ज०' (१।१७७) च-तयोर्लुक् । 'नो णः' (१।२२८) न० → ण० **वाइएण** ।

लेखेन । 'ख-घ-थ-ध-भाम्' (१।१८७) खे० → हे० । 'नो णः' (१।२२८) न० → ण० **लेहेण** । वाचितेन लेखेन किम् ?

सहिता व अत्थउ च्चिय,<br>
एयारिसिं लिहंता, न हंति पहिया वि एस्स उ ॥१॥ ॥१८९॥

## अण-णाइं नञर्थे ॥ ८।२।१९० ॥

अण-णाइं इत्येतौ नञोऽर्थे प्रयोक्तव्यौ ॥ [२]अणचिन्तिअममुणन्ती । णाइं करेमि रोसं ॥

**[ अण-णाइं नञर्थे ]** अण-णाइं प्रथमा सि । नञोऽर्थः = नञर्थस्तस्मिन् = नञर्थे । सप्तमी ङि ।

[२]**[ अणचिन्तिअममुणन्ती ]** अचिन्तित = अणचिन्तित । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अणचिन्तिअं** । 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । 'शत्रानशावे०' (५।२।२०) शतृप्र० → अत् इति । 'ज्ञो जाण-मुणौ' (४।७) ज्ञा० → मुण० आदेशः । 'शत्रानशः' (३।१८१) अत्० → न्त० । 'प्रत्यये ङीर्नवा' (३।३१) ङीप्र० → ई इति । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) मुणन्ती । नञ्पूर्व० [३]**अमुणन्ती** ।

---

१. **णवरि अ सो रहुवइणा** वारं वारेण चन्द्रहासच्छिण्णो । एक्केण सरेण लुओ एक्कमुहो दहमुहस्स मुहसंघाओ ॥
[से० ब० - १५।७९]

अनन्तरं च सो रघुपतिना वारं वारं चन्द्रहासच्छिन्नः । एकेन शरेण लून एकमुखो दशमुखस्य मुखसङ्घातः ॥

२. **अणचिंतियममुणंती** चिंतियकरणेण तस्य मणखेयं ।
कायव्वेसु कुणंती न याणिमो कत्थ वच्चिस्सं ॥ [तारागण]

३. M. अजानती ।

[1][ **णाइं करेमि रोसं** ] णाइं । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **णाइं** ।

'डुकृंग् करणे' (८८८) कृ । वर्त्तमाना मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'ऋवर्ण०' (४।२३४) कृ० → कर० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) करमि । 'वर्तमाना-पञ्चमी-शतृषु वा' (३।१५८) र० → रे० करेमि ।

रोष । प्रथमा सि । 'श-षोः सः' (१।२६०) ष० → स० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **रोसं** । अहं रोषं न करोमीत्यर्थः ॥१९०॥

## [2]माइं माऽर्थे ॥ ८।२।१९१ ॥

माइं इति माऽर्थे प्रयोक्तव्यम् ॥ माइं काहीअ रोसं ॥ मा कार्षीद् रोषम् ॥

[ **माइं माऽर्थे** ] माइं प्रथमा सि । माऽर्थ सप्तमी ङि ।

[ **माइं काहीअ रोसं** ] **माइं** निषेधे । 'डुकृंग् करणे' (८८८) कृ । अद्यतनी दि । 'सी-ही-हीअ भूतार्थस्य' (३।१६२) दि० → हीअ० आदेशः । 'आः कृगो भूत०' (४।२१४) कृ० → का० **काहीअ** ।

रोष । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः रोसं । **रोषं** मा कार्षीदित्यर्थः ॥१९१॥

## हद्धी निर्वेदे ॥ ८।२।१९२ ॥

हद्धी इत्यव्ययमत एव निर्देशात् हा - धिक् शब्दादेशो वा निर्वेदे प्रयोक्तव्यम् ॥

हद्धी ! हद्धी ! हा ! धाह धाह ॥

[ **हद्धी निर्वेदे** ] हद्धी प्रथमा सि । निर्वेद सप्तमी ङि ।

[ **हद्धी ! हद्धी !** ] हा-धिक् 'असकृत् सम्भ्रमे' (७।४।७२) द्वित्वम् । अनेन हद्धी इत्यादेशः **हद्धी ! हद्धी !** ।

[ **हा ! धाह धाह** ] हा ! प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **हा !** ।

'धावूग् गति-शुद्ध्योः' (९२०) धाव् । पञ्चमी त । 'बहुषु न्तु-ह-मो' (३।१७६) त० → ह० । 'खाद-धावोर्लुक्' (४।२२८) व्लुक् । 'भृशा-ऽऽभीक्ष्ण्या-ऽविच्छेदे द्विः प्राक् तमबादेः' (७।४।७३) द्विः **धाह धाह** ॥१९२॥

## वेव्वे भय-वारण-विषादे ॥ ८।२।१९३ ॥

भय-वारण-विषादेषु वेव्वे इति प्रयोक्तव्यम् ॥

वेव्वे त्ति भये वेव्वे त्ति वारणे जूरणे अ वेव्वे त्ति ।
उल्लाविरीइ वि तुहं वेव्वे त्ति मयच्छि ! किं णेअं ॥१॥

किं उल्लावेन्तीए उअ जूरन्तीए किं तु भीआए ।
उव्वाडिरीए वेव्वे त्ति तीए भणिअं न विम्हरिमो ॥२॥

---

१. **णाइं करेमि रोसं** चिंतिअकरणेण तस्स मणखेअं । कायव्वेसु कुणंती नो जाणं कत्थ वच्चिस्सं ॥ [अनु० अङ्कः-६६]
न करोमि रोषं चिंतितकरणेन तस्य मनःखेदम् । कर्तव्येषु कुर्वन्ती न जानामि कुत्र व्रजिष्यामि ॥

२. G. माइँ ।

**[ वेव्वे भयवारणविषादे ]** वेव्वे प्रथमा सि । भयं च वारणं च विषादश्च = भयवारणविषादम्, तस्मिन् ।

**[ वेव्वे त्ति भये वेव्वे त्ति वारणे........ ]**

अस्यार्थः - हे मृगाक्षि ! तव वेव्वे त्ति इति उल्लापयत्याः मया किं ज्ञेयम् ? । वेव्वे इति शब्दो भये वत्तते, वेव्वे इति वारणे च वत्तते, वेव्वे इति जूरणे च विषादे वर्त्तते । अत्र वेव्वे इति शब्देन त्वया किमुक्तं ?, मया न ज्ञायते इत्यर्थः ।

वेव्वे । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । इति । 'इतेः स्वरात् तश्च द्विः' (१।४२) ति० → त्ति० - इलुक् **वेव्वे त्ति** ।

भय । सप्तमी ङि । वारण । सप्तमी ङि । 'ङे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् **भये वारणे** ।

[1]"खिदिंच् परितापे' (१२५९) खिद् । खिद्यते इति वाक्ये अनट्प्र० → अन । 'खिदेर्जूर-विसूरौ' (४।१३२) खिद्० → जूर० आदेशः । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) जूरन । 'नो णः' (१।२२८) न० → ण० । सप्तमी ङि । 'ङे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **जूरणे** इति सिद्धम् ।

च इति प्रकृतिः । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'अव्ययस्य' (३।२।७) सिलुप् अ ।

उल्लपति । उल्लपतीत्येवंशीलो धर्मो वा-साधुर्वा । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० । 'स्वराणां स्वराः' (४।२३८) ल्ल० → ल्ला० । 'अजातेः पुंसः' (३।३२) ङीप्र० → ई० इति । षष्ठी ङस् । 'टा-ङस्०' (३।२९) ङस् → इ० । 'शीलाद्यर्थस्येरः' (२।१४५) तृन्० → इर० । 'पो वः' (१।२३१) पस्य वः । 'लुक्' (१।१०) वस्य अलुक् **उल्लविरीइ** ।

अपि । 'पदादपेर्वा' (१।४१) अलुक् । 'पो वः' (१।२३१) पि० → वि० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **वि** ।

युष्मद् । षष्ठी ङस् । 'तइ-तु-ते०' (३।९९) षष्ठीङस्सहितयुष्मद् → **तुहं** ।

मृगाक्षी । 'ऋतोऽत्' (१।१२६) मृ० → म० । 'ह्रस्वः संयोगे' (१।८४) गा० → ग० । 'क-ग-च-ज०' (१।१७७) ग्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'छोऽक्ष्यादौ' (२।१७) क्षी० → छी० । 'आमन्त्र्ये' (२।२।३२) प्रथमा सि । 'अनादौ०' (२।८९) द्वित्वं - छ्छी० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'ईदूतोर्ह्रस्वः' (३।४२) च्छी० → च्छि० । 'अन्त्यव्य०' (१।११) स्लुक् **मयच्छि** ! ।

किम् । प्रथमा सि । 'किमः किम्' (३।८०) किम्० → किम्० । 'मोऽनु०' (१।२३) अनुस्वारः किं ।

ज्ञेयम् । 'म्न-ज्ञोर्णः' (२।४२) ज्ञे० → णे० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **णेअं** ।

**[ किं उल्लवेन्तीए उअ जूरन्तीए............ ]**

अस्यार्थः - वेव्वे इति..... । तया स्त्रिया भणितं तद्वयं न विस्मरामः । तया कथम्भूतया ? उल्लापयन्त्या । पुनः कथम्भूतया ? उत अथवा जूरन्त्या - खेदं कुर्वन्त्या । पुनः किं तु भीतया । पुनः कथम्भूतया ? उद्घटन्त्या-निषेधं कुर्वन्त्या वा इत्यर्थः ।

---

१. धा० पा० - खिदिंच् दैन्ये । परितापे इत्यन्ये ।

अथ व्युत्पत्तिः - किम् । प्रथमा सि । 'किमः किं' (३।८०) सिना सह किमः किं **किं** । 'लप व्यक्ते वचने' (३३६) लप्, उत्पूर्व० । उल्लपतीति उल्लपन्ती । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत् इति । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ० इति । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'लोकात्' (१।१।३) उल्ला० । 'णेरदेदावावे' (३।१४९) पि० → पे० । 'पो वः' (१।२३१) पे० → वे० । 'अजातेः पुंसः' (३।३२) ङीप्र० → ई० इति । 'न्त-माणौ' (३।१८०) अत्० → न्त० (?) । ('शत्रानशः' (३।१८१) अत्० → न्त०) । तृतीया टा । 'टा-ङस्-ङेरदादिदेद्वा०' (३।२९) टा० → ए० । 'अन्त्यव्य०' (१।११) उत्० → उ० । 'अनादौ०' (२।८९) द्वित्वं -ल्ल० **उल्लवेन्तीए** ।

उत । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **उअ** ।

'खिदिंच् परितापे' (१२५९) खिद् । खिद्यते । 'शत्रानशा०' (५।२।२०) शतृप्र० → अत् (आनश्प्र० → आन) । 'न्त-माणौ' (३।१८०) अत्० → न्त० ('शत्रानशः' (३।१८१) आनश्० → न्त०) । 'अजातेः पुंसः' (३।३२) ङीप्र० → ई० इति । तृतीया टा । 'टा-ङस्-ङेरदादि०' (३।२९) टा० → ए० । 'खिदेर्जूर-विसूरौ' (४।१३२) खिद्० → जूर० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लुक्' (१।१०) रस्य अलुक् । 'लोकात्' (१।१।३) **जूरन्तीए** ।

भीता । तृतीया टा । 'टा-ङस्-ङेरदादि०' (३।२९) टा० → ए० । 'क-ग-च-ज०' (१।१७७) त्लुक् **भीआए** ।

उत्पूर्व० 'वट परिभाषणे' (१०३१) वट् । उद्वटतीत्येवंशीला-धर्मा-साधुर्वा । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० । 'स्वराणां स्वराः' (४।२३८) व० → वा० । 'अजातेः पुंसः' (३।३२) ङीप्र० → ई० इति । 'शीलाद्यर्थस्येरः' (२।१४५) तृन्० → इर० । 'लोकात्' (१।१।३) उद्वाटिरी । 'टो डः' (१।१९५) टि० → डि० । 'अन्त्यव्य०' (१।११) उत्० → उ० । 'अनादौ०' (२।८९) द्वित्वं - व्वा० । 'लुक्' (१।१०) रस्य अलुक् । 'लोकात्' (१।१।३) री० । तृतीया टा । 'टा-ङस्-ङेरदादि०' (३।२९) टा० → ए० **उव्वाडिरीए** ।

वेव्वे । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् वेव्वे । इति । 'इतेः स्वरात् तश्च द्विः' (१।४२) इलुक् - तस्य द्वित्वं - त्ति० **वेव्वे त्ति** ।

तद् । 'अन्त्य०' (१।११) द्लुक् । 'किं-यत्तदोस्यमामि' (३।३३) ङीप्र० → ई० इति । 'लुक्' (१।१०) तस्य अलुक् । 'लोकात्' (१।१।३) ती । तृतीया टा । 'टा-ङस्-ङेरदादि०' (३।२९) टा० → ए० **तीए** ।

भणित । द्वितीया अम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **भणिअं** ।

न । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **न** ।

विपूर्व० 'स्मृं चिन्तायाम्' (१८) स्मृ । 'विस्मुः पम्हुस-विम्हर-वीसराः' (४।७५) विस्मृ० → विम्हर० । वर्त्त० → मस् । 'तृतीयस्य मो-मु-माः' (३।१४४) मस्० → मो० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'इच्च मो-मु-मे वा' (३।१५५) अत्० → इ० । 'लुक्' (१।१०) रस्य अलुक् । 'लोकात्' (१।१।३) **विम्हरिमो** ॥१९३॥

### वेव्व च आमन्त्रणे ॥ ८।२।१९४ ॥

वेव्व वेव्वे च आमन्त्रणे प्रयोक्तव्ये ॥

वेव्व गोले ! । वेव्वे मुरन्दले ! वहसि पाणिअं ॥

**[ वेव्व च आमन्त्रणे ]** वेव्व प्रथमा सि । च प्रथमा सि । आमन्त्रण सप्तमी ङि ।

**[ वेव्व गोले ! ]** गोला । आम० सि । 'वाप ए' (३।४१) एत्वं-ला० → ले० । 'अन्त्यव्य०' (१।११) स्लुक् **गोले !** ।

**[ वेव्वे मुरन्दले ! वहसि पाणिअं ]** वेव्वे मुरन्दले ! । 'वहीं प्रापणे' (९९६) वह् । वर्त्त० सिव् । 'द्वितीयस्य सि-से' (३।१४०) सिव्० → सि० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) **वहसि** ।

पानीय । 'पानीयादिष्वित्' (१।१०१) नी० → नि० । 'नो णः' (१।२२८) नि० → णि० । 'क-ग-च-ज०' (१।१७७) य्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पाणिअं** ॥१९४॥

## मामि-हला-हले सख्या वा ॥ ८।२।१९५ ॥

एते सख्या आमन्त्रणे वा प्रयोक्तव्याः ॥

मामि ! सरिसक्खराण वि । पणवह माणस्स हला ! । हले ! हयासस्स । पक्षे - सहि ! एरिसि च्चिअ गई ॥

**[ मामिहलाहले ]** मामिश्च हला च हलेश्च = मामिहलाहले ।

**[ सख्या वा ]** सखी षष्ठी ङस् । वा प्रथमा सि ।

[1]**[ मामि ! सरिसक्खराण वि अत्थि विसेसो पयंपिअव्वाणं ।**
**नेहभरियाण अन्नो, अन्नो अवराहभरियाण ॥१॥ ]**

अस्यार्थः- हे मामि ! हे सखि ! सदृशाक्षराणामपि प्रजल्प(ल्प्य)मानानां वचनानां विशेषोऽस्ति, स्नेहभृतानां वचनानामन्यो विशेषः, अपराधभृतानां तु वचनानां विशेषोऽन्य एव इति गाथार्थः ।

सखी । अनेन मामि ! आदेशः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **मामि !** ।

सदृशाक्षराणामपि । 'दृशः क्विप्-टक्-सकः' (१।१४२) रि० । 'ह्रस्वः संयोगे' (१।८४) शा० → श० । 'श-षोः सः' (१।२६०) श० → स० । 'क्षः खः क्वचित्तु०' (२।३) क्ष० → ख० । 'अनादौ०' (२।८९) द्वित्वं-ख्ख० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० ॥ 'पदादपेर्वा' (१।४१) अपि० → पि० । 'पो वः' (१।२३१) पि० → वि० **सरिसक्खराण वि** ।

[2]**[ पणवह माणस्स हला ! ]** हे हला ! हे सखि ! पूयं(पूय)मानं प्रणमत । प्रपूर्व० 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम् । पञ्चमी त । 'बहुषु न्तु-ह-मो' (३।१७६) तस्य ह० । 'रुद-नमोर्वः' (४।२२६) म० → व० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) प्रनवह । 'सर्वत्र ल-व०' (२।७९) प्रस्य र्लुक् । 'नो णः' (१।२२८) न० → ण० **पणवह** ॥

मान । द्वितीया अम् । 'क्वचिद् द्वितीयादेः' (३।१३४) द्वितीयार्थे षष्ठी । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० । 'नो णः' (१।२२८) न० → ण० **माणस्स** ।

सखी ! । अनेन हला ! । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **हला !** ।

---

१. पाठां० - गा० को० - गा० स० - णेहमइआणं = स्नेहमयानाम् । गा० र० - नेहभणियाण । गा० को० - गा० स० - उवरोहमइआणं = उपरोधमयानाम् । गा० र० - उवरोहभणियाण ।

२. **पणम( व )ह माणस्स/मअणस्स हला !** चलणे किं देवएहिं अण्णेहिं ।
जस्स पसाएण पिओ लोलइ पाअंतपासेसु ॥ [शृ० प्र० - ३०।३९१ । गा० स० - ८९३]
प्रणमत मानस्य/मदनस्य सख्यश्चरणौ किं देवतैरन्यैः ।
यस्य प्रसादेन प्रियः लोलति पादान्तपार्श्वेषु ॥

[1] [ **अन्नो को वि सहावो, वम्महसिहिणो हंले ! हयासस्स ।**
**विज्झाय( इ ) नीरसाणं, हिअए सरंसाण पज्जलइ ॥१॥** ]

अस्यार्थः - हे हले ! हे सखि ! मन्मथ एव शिखी-वह्निः, तस्य = मन्मथशिखिनः, अन्यः कोऽपि स्वभावः, किंलक्षणस्य मन्मथशिखिनः ? हताशस्य - निन्द्यस्य अन्यस्वभावत्वमेव प्रकटयति, नीरसानां हृदये विधमति, सरसानां हृदये प्रज्वलति । अन्यस्तु वह्निनीरसस्थाने निर्जलप्रदेशे प्रज्वलति, सरसस्थाने सजलप्रदेशे विधमति । कन्दर्पाग्निस्ततो विपरीत इति गाथार्थः ॥

सखि ! इत्यस्य अनेन हले ! इत्यादेशः **हले** ! ।

हताशस्य । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० । 'श-षोः सः' (१।२६०) श० → स० । षष्ठी ङस् । 'ङस स्सः' (३।१०) ङस्० → स्स० **हयासस्स** । पक्षे -

[2] [ **सहि ! एंरिसि च्चिअ गई, मा रुवउ तंसवलियमुहंयंदं ।**
**एयाण बालवालुंकितंतुकुडिलाण पेम्माण ॥१॥** ]

अस्यार्थः- हे सरिव ! एतेषा प्रेम्णां गतिरीदृश्येवेति, त्र्यंसवलितमुखचन्द्रं यथास्यात् तथाभवतीति मा रोदितु । कथम्भूतानां प्रेम्णां ? बालवालुंकितन्तुकुटिलानाम् - बालचिर्भटीतन्तुवक्राणाम् । कोऽर्थः ? सखी सखीं वक्ति, हे सखि ! मुखचन्द्रं वक्रीकृत्य रोदनं कुतः क्रियते, प्रेम्णां गतिस्तु ईदृशी एव वत्तते इति भावार्थः ।

ईदृशी एव । 'एत् पीयूषाऽऽपीड-बिभीतक-कीदृशेदृशे' (१।१०५) ई० → ए० । 'दृशः क्विप्-टक्-सकः' (१।१४२) रि० । 'श-षोः सः' (१।२६०) शी० → सी० । 'णइ चेअ चिअ च्च अवधारणे' (२।१८४) एव० → चिअ० । 'सेवादौ वा' (२।९९) द्वित्वं-चि० → च्चि० । 'ह्रस्वः संयोगे' (१।८४) सी० → सि० **एरिसि च्चिअ** ।

गति । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **गई** ॥१९५॥

## दे सम्मुखीकरणे च ॥ ८।२।१९६ ॥

सम्मुखीकरणे सख्या आमन्त्रणे च दे इति प्रयोक्तव्यम् ॥

दे पसिअ ताव सुन्दरि ! । दे आ ! पसिअ निअत्तसु ॥

[ **दे सम्मुखीकरणे च** ] दे प्रथमा सि । सम्मुखीकरण सप्तमी ङि । च प्रथमा सि ।

---

१. [व० ल० - अणंवगज्जा ३९० । गा० को० - ३।१९ । गा० स० - ५।३०]

अन्यः कोऽपि स्वभावो मन्मथशिखिनः सखि ! हताशस्य ।
विध्यते नीरसानां हृदये सरसानां प्रज्वलति ॥

१. पाठां०- व० ल० - गा० को० - गा० स० - हलां ! । २. गा० स० - सरसाणं झत्ति पज्जलइ = सरसानां झटिति प्रज्वलति ।

२. [शृ० प्र० - ३०।२२० । गा० स० - १।१० । गा० को० - १९ । गा० र० - ४२०]

सखि ! ईदृश्येव गतिः, मा रोदीः त्र्यंसवलितमुखचन्द्रम् ।
एतेषां बालकर्कटीतन्तुकुटिलानां प्रेम्णाम् ॥

१. पाठां०- गा० स० ईरिसि । २. गा० र० - इंदं । ३. गा० स० - तिर्यग्० ।

[1][**दे पसिअ ताव सुन्दरि ! पुणो वि सुलहाइं रूसिअव्वाइं ।**
**एसा मयच्छि ! मयलंछणुज्जला गलइ छणराई ॥१॥]**

अस्यार्थः- दे इति सम्मुखीकरणे अव्ययम् । रुष्टां प्रियां सम्मुखीकृत्य भर्ता वक्ति, हे सुन्दरि ! त्वं तावत् प्रसीद, रुषितव्यानि पुनरपि सुलभानि भविष्यन्ति । हे मृगाक्षी ! एषा क्षणरात्रिः- पर्वरात्रिः गलति- वृथा याति । रात्रिः कथम्भूता ? मृगलाञ्छनोज्ज्वला, मृगलाञ्छनश्चन्द्रः, तेन उज्ज्वला-निर्मला इति गाथार्थः ।

प्रसीद । 'सर्वत्र०' (२।७९) र्लुक् । 'पानीयादिष्वित्' (१।१०१) सी० → सि० । 'क-ग-च-ज०' (१।१७७) द्लुक् **पसिअ** ।

तावत् । प्रथमा सि । 'अन्त्य०' (१।११) त्लुक् । 'अव्ययस्य' (३।२।७) सिलुप् **ताव** ।

[2][**दे आ ! पसिअ निअत्तसु, मुहससिजुण्हाविलुत्ततमनिवहे ।**
**अहिसारिआण विग्घं करेसि अन्नाण वि हयासे ! ॥१॥]**

अस्यार्थः- दे इति सम्मुखीकरणे । आ इति सम्बोधने हे ! । मुखशशिज्योत्स्नाविलुप्ततमोनिवहे त्वं प्रसीद-निवर्तस्व । हे हताशे ! अन्यासामप्यभिसारिकाणां विघ्नं करोषि । कोऽर्थः ? इष्टपुरुषमुद्दिश्य कांचित्(कश्चित्) स्त्रियं गच्छन्तीं सखी प्राह-त्वं इष्टपुरुषं, मा याहि । गमननिषेधे हेतुमाह - तव मुखचन्द्रकान्त्या मार्गे उद्योतो भविष्यति, तेन तवापि विघ्नं भविष्यति अन्यासामपि, इष्टपुरुषोद्देशेन गच्छतीनामभिसारिकाणां विघ्नं भविष्यति, ततो मा याहि इति भावार्थः गाथार्थश्च ।

प्रसीद । 'पानीयादिष्वित्' (१।१०१) सी० → सि० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'सर्वत्र०' (२।७९) र्लुक् **पसिअ** ।

'वृतूङ् वर्तने' (९५५) वृत्, निपूर्व० । पञ्चमी स्व । 'दु-सु-मु विध्यादि०' (३।१७३) स्व० → सु० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'क-ग-च-ज०' (१।१७७) व्लुक् । 'शकादीनां द्वित्वम्' (४।२३०) त्त० **निअत्तसु** ॥१९६॥

## हुं दान-पृच्छा-निवारणे ॥ ८।२।१९७ ॥

हुं इति दानादिषु प्रयुज्यते ॥

दाने - हुं गेण्ह अप्पणो च्चिअ । पृच्छायाम्-हुं साहसु सब्भावं । निवारणे - हुं निल्लज्ज समोसर ॥

**[हुं दानपृच्छानिवारणे]** हुं प्रथमा सि । दानं च पृच्छा च निवारणं च = दानपृच्छानिवारणम्, तस्मिन् = दानपृच्छानिवारणे । सप्तमी ङि ।

**[हुं गेण्ह अप्पणो च्चिअ]** हुं इति दाने अव्ययम् । 'ग्रहीश् उपादाने' (१५१७) ग्रह् । 'ग्रहो वल-गेण्ह-हर-पङ्ग०' (४।२०९) ग्रह्० → गेण्ह० । पञ्चमी हि । 'दु-सु-मु विध्यादि०' (३।१७३) हि० → सु० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'अत इज्जस्विज्जहीज्जे-लुको वा' (३।१७५) सुलुक् । 'लुक्' (१।१०) ण्हस्य अलुक् । 'लोकात्' (१।१।३) **गेण्ह**।

स्वयम् । 'स्वयमोऽर्थे अप्पणो नवा' (२।२०९) स्वयम्० → **अप्पणो०** ॥

---

१. दे सुअणु ! पसिअ एण्हि पुणो.... [गा० स० -५।६६] । हे सुतनु ! प्रसीदेदानीं पुन.... ।

२. [शृ० प्र० - ७।१७६ । ध्व० लो० - प्रथमोद्योतः । स० क० - प्रथमोल्लासः । गा० स० - ९६८]

प्रार्थये तावत् प्रसीद निवर्तस्व मुखशशिज्योत्स्नाविलुप्ततमोनिवहे ।
अभिसारिकाणां विघ्नं करोषि अन्यासामपि हताशे ! ॥

**[ हुं साहसु सब्भावं ]** 'कथण् वाक्यप्रबन्धे' (१८८१) कथ । 'कथेर्वज्जर - पज्जरोप्पाल-पिसुण-संघ-बोल्ल-चव-जम्प-सीस-साहाः' (४।२) कथ० → साह० । पञ्चमी हि । 'दु-सु-मु विध्यादि०' (३।१७३) हि० → सु० **साहसु** ।

सद्भाव । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अनादौ०' (२।८९) भस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वभस्य बः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सब्भावं** ।

[1]**[ हुं निल्लज्ज समोसर ]** समपसर । 'अवापोते' (१।१७२) अपेन सह ओकारः-मो० **समोसर** ॥१९७॥

## हु-खु निश्चय-वितर्क-सम्भावन-विस्मये ॥ ८।२।१९८ ॥

हु-खु इत्येतौ निश्चयादिषु प्रयोक्तव्यौ ॥

निश्चये - [2]तं पि हु अच्छिन्नसिरी । [3]तं खु सिरीए रहस्सं ॥

वितर्कः - ऊहः संशयो वा । ऊहे - न हु णवरं संगहिआ । एअं खु हसइ । संशये-जलहरो खु धूमवडलो खु ॥ सम्भावने - तरिउं ण हु णवरं इमं । एअं खु हसइ ॥ विस्मये - को खु एसो सहस्ससिरो ॥ बहुलाधिकारात् अनुस्वारात् परो हु न प्रयोक्तव्यः ॥

**[ हु-खु ]** हु-खु प्रथमा औ ।

**[ निश्चयवितर्कसम्भावनविस्मये ]** निश्चयश्च वितर्कश्च सम्भावनं च विस्मयश्च = निश्चयवितर्कसम्भावनविस्मयम्, तस्मिन् = निश्चयवितर्कसम्भावनविस्मये । सप्तमी ङि ।

[2]**[ तं पि हु अच्छिन्नसिरी ]** युष्मद् । प्रथमा सि । 'युष्मदस्तं-तुं-तुवं-तुह-तुमं सिना' (३।९०) सिना सह युष्मद्० → **तं०** ।

अपि । 'पदादपेर्वा' (१।४१) अलुक् - अपि० → **पि०** । **हु** निश्चये ।

अच्छिन्ना श्रीर्यस्य सः । 'दीर्घ-ह्रस्वौ मिथो वृत्तौ' (१।४) ह्रस्वे श्री-श्-री इति विश्लेषे री० → रि० । 'र्ह-श्री-ह्री-कृत्स्न-क्रिया-दिष्ट्यास्वित्' (२।१०४) इकारः । 'लोकात्' (१।१।३) शि० । 'श-षोः सः' (१।२६०) शि० → सि० । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **अच्छिन्नसिरी** ।

[3]**[ तं खु सिरीए रहस्सं ]** श्री । षष्ठी ङस् । 'टा-ङस्-ङेरदादि०' (३।२९) ङस्० → ए० । 'र्ह-श्री-ह्री-कृत्स्न०' (२।१०४) श्-री इति विश्लेषे रीपूर्वं इ० । 'लोकात्' (१।१।३) शि० । 'श-षोः सः' (१।२६०) शि० → सि० **सिरीए**।

---

१. **हुं णिल्लज्ज समोसर** तं चिअ अणुणेसु जाएँ दे वअणे । पाअंगुट्ठालत्तअरसेण तिलअं विणिम्मविअं ॥

[शृ० प्र० - ३०।२१ । स० क० - ५।४९]

हुं निर्लज्ज समपसर तामेवानुनय यया ते वदने । पादाङ्गुष्ठालक्तकरसेन तिलकं विनिर्मितम् ॥

१. पाठां० - स० क० - एवं = एतत् । २. स० क० - पाअग्गंगुट्ठालत्तएण = पादाग्राङ्गुष्ठालक्तकेन ।

२. **तं पि हु अच्छिन्नसिरिं** सेविज्जइ तं पि वारणारीहिं । तुह कडया रिउनयरस्स भिज्जए नाह ! न तिलो वि ॥ [तारा.-अनु०-६६]

३. **तं खु[4] सिरीएँ रहस्सं** जं सुचरिअ-मग्गणेक्क-हिअओ[5] वि । अप्पाणमोसरंतं गुणेहिं लोओ ण लक्खेइ ॥ [ग० व०-८६० अनु०-६६]

तत् खलु श्रियो रहस्यं यत् सुचरितमार्गणैकहृदयोऽपि । आत्मानमपसरन्तं गुणैर्लोको न लक्षयति ॥

४. पाठां० - अनु० - खु । ५. पाठां० - अनु० - रसिओ ।

रहस्य । 'अधो म-न-याम्' (२।७८) यलुक् । 'अनादौ०' (२।८९) सस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **रहस्सं** ।

**[ न हु णवरं संगहिआ ]** नवर । 'णवर केवले' (२।१८७) णवर आदेशः । 'वक्रादावन्तः' (१।२६) अनुस्वारः **णवरं** ।

संगृहीता । 'ऋतोऽत्' (१।१२६) गृ० → ग० । 'पानीयादिष्वित्' (१।१०१) ही० → हि० । 'क-ग-च-ज०' (१।१७७) त्लुक् **संगहिआ** ।

**[ एअं खु हसइ ]** एतद् । 'वा स्वरे मश्च' (१।२४) द्० → म्० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'मोऽनु०' (१।२३) अनुस्वारः **एअं** । **खु** । हसति । 'त्यादीनामाद्य०' (३।१३९) ति० → इ० **हसइ** ।

**[ जलहरो खु धूमवडलो खु ]** जलधर । 'ख-घ-ध-थ-भाम्' (१।१८७) ध० → ह० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जलहरो** ।

धूमपटल । 'पो वः' (१।२३१) प० → व० । 'टो डः' (१।१९५) ट० → ड० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **धूमवडलो** ।

**[ तरिउं ण हु णवर इमं ]** 'तॄ प्लवन-तरणयो' (२७) तॄ । तुम्प्र० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'एच्च क्त्वा-तुम्०' (३।१५७) इ० । 'ऋवर्ण०' (४।२३४) तर्० । 'लोकात्' (१।१।३) तरितुम् । 'क-ग-च-ज०' (१।१७७) त्लुक् **तरिउं** ।

**ण हु णवर** । इदम् । द्वितीया अम् । 'इदम इमः' (३।७२) इदम्० → इम० । 'आत्' (२।४।१८) आप्प्र० → आ । 'दीर्घ-ह्रस्वौ०' (१।४) आ० → अ० । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनुस्वारः' (१।२३) **इमं** ।

इमां नदीं केवलं तरीतुं न सम्भावयामि ।

**[ एअं खु हसइ ] हसइ** पूर्ववत् ।

**[ को खु एसो सहस्ससिरो ]** किम् । प्रथमा सि । 'किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **को** ।

खु । एतद् । प्रथमा सि । 'अन्त्य०' (१।११) द्लुक् । 'तदश्च तः सोऽक्लीबे' (३।८६) त० → स० । 'वैतत्तदः' (३।३) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **एसो** ।

सहस्रशिरस् । सहस्राणि शिरांसि यस्य सः । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) सस्य द्वित्वम् । 'श-षोः सः' (१।२६०) शि० → सि० । 'अन्त्य०' (१।११) स्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सहस्ससिरो** ॥१९८॥

**ऊ गर्हा-ऽऽक्षेप-विस्मय-सूचने ॥ ८।२।१९९ ॥**

ऊ इति गर्हाऽऽदिषु प्रयोक्तव्यम् ॥

गर्हा-ऊ णिल्लज्ज ! । प्रक्रान्तस्य वाक्यस्य विपर्यासाशङ्काया विनिवर्तनलक्षण आक्षेपः ॥ ऊ किं मए भणिअं । विस्मये - ऊ कह मुणिआ अहयं । सूचने - ऊ केण न विण्णायं ॥

**[ ऊ गर्हाऽऽक्षेपविस्मयसूचने ]** ऊ प्रथमा सि । गर्हा च आक्षेपश्च विस्मयश्च सूचनं च = गर्हाऽऽक्षेपविस्मयसूचनम्, तस्मिन् = गर्हाऽऽक्षेपविस्मयसूचने । सप्तमी ङि ।

**[ ऊ णिल्लज्ज ! ]** ऊ इति गर्हायाम् । हे निर्लज्ज ! । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'वाऽऽदौ' (१।२२९) नि० → णि० । 'अनादौ०' (२।८९) लस्य द्वित्वम् **णिल्लज्ज !** ।

**[ ऊ किं मए भणियं ]** अस्मद् । तृतीया टा । 'मि-मे-ममं-ममए-ममाइ-मइ-मए-मयाइ-णे टा' (३।१०९) टेन सह अस्मद्० → मए० । भणितम् । 'क-ग-च-ज०' (१।१७७) त्लुक् **भणिअं** ।

**[ ऊ कह मुणिआ अहयं ]** कथं । 'मांसाऽऽदेर्वा' (१।२९) अनुस्वारलुक् । 'ख-घ-थ-ध-भाम्' (१।१८७) थस्य हः **कह** ।

मुनिता-ज्ञाता । 'नो णः' (१।२२८) नि० → णि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **मुणिआ** ।

अस्मद् । प्रथमा सि । 'अस्मदो म्मि-अम्मि-अम्हि-हं-अहं-अहयं सिना' (३।१०५) सिना सह अस्मद्० → **अहयं**।

**[ ऊ केण न विण्णायं ]** विज्ञात । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'अनादौ०' (२।८९) णस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **विण्णायं** ॥१९९॥

## थू कुत्सायाम् ॥ ८।२।२०० ॥

थू इति कुत्सायां प्रयोक्तव्यम् ॥ थू निल्लज्जो लोओ ॥

**[ थू कुत्सायाम् ]** थू प्रथमा सि । कुत्सा सप्तमी ङि ।

**[ थू निल्लज्जो लोओ ]** निर्लज्ज । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) लस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निल्लज्जो** ।

लोक । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **लोओ** ॥२००॥

## रे-अरे सम्भाषण-रतिकलहे ॥ ८।२।२०१ ॥

अनयोरर्थयोर्यथासंख्यमेतौ प्रयोक्तव्यौ ॥

रे सम्भाषणे - रे हिअय ! मडह-सरिआ । अरे रतिकलहे-अरे मए समं मा करेसु उवहासं ॥

**[ रे-अरे ]** रे- अरे प्रथमा [1]औ ।

**[ सम्भाषणरतिकलहे ]** सम्भाषणं च रतिकलहश्च = सम्भाषणरतिकलहम्, तस्मिन् = सम्भाषणरतिकलहे । सप्तमी ङि ।

[2]**[ रे हिअय ! मडहसरिआ जल[3]भरवुज्झंत-सुक्कदारु व्व ।**
**ठाणे ठाणे चिअ लग्गमाण केणावि डज्झिहिसि ॥१॥ ]**

अस्या व्याख्या - रे हृदय ! अल्पसरित् जलभरोह्यमानशुष्कदारुवत् स्थाने स्थाने लगमानः केनापि दह्यसे । कोऽर्थः ? यथा शुष्कं काष्ठं अल्पनदीप्रवाहे वहति, क्वचिद् विलग्नस्थाने लगति । केनापि गृहीत्वा इन्धनं क्रियते । तथा हे हृदय !

---

१. K. सि । २. [गा० को० - २।१३ । गा० स० - २।५]

३. पाठां० - गा० स० - जलरअहीरन्तदीहदारू व्व ।

हे हृदय ! स्वल्पसरिज्जलरयहि(ही)यमाणदीर्घदारुवत् । स्थाने स्थाने एव लगत् केनापि धक्ष्यसे ॥

त्वमपि संसारप्रवाहे वहमानं स्थाने (२) लगमानं स्थाने (२) प्रसङ्गं कुर्वाणं केनापि दह्यसे-भृशं परितापं प्रापयिष्यसे । अतः स्थाने (२) प्रसङ्गं मा कुरु इति भावार्थो गाथार्थश्च ।

**[ रे हिअय ! मडहसरिआ ]** रे प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **रे** ।

हृदय । आमन्त्रणे सि । 'डो दीर्घो वा' (३।३८) इत्यनेन आमन्त्रणे सेर्डोः आदेशो विकल्पेन भवति । 'इत् कृपादौ' (१।१२८) हृ० → हि० । 'अन्त्यव्य०' (१।११) स्लुक् **हिअय !** ।

अल्पसरित् । 'स्त्रियामादविद्युतः' (१।१५) त्० → आ० । 'गोणादयः' (२।१७४) अल्पस्य मडह इति । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **मडहसरिआ** ।

**[ अरे मए समं मा करेसु उवहासं ]** अरे प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **अरे** ।

अस्मद् । तृतीया टा । 'मि-मे-ममं-ममए-ममाइ-मइ-मए०' (३।१०९) टेन सह अस्मद्० → **मए०** ।

सम । द्वितीया अम् । 'अमोऽस्य' (३।५) अलुक्-अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **समं** ।

मा । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **मा** ।

'डुकृंग् करणे' (८८८) कृ । पञ्चमी हि । 'दु-सु-मु विध्यादि०' (३।१७३) हि० → सु० । 'ऋवर्ण०' (४।२३४) कृ० → कर० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'वर्तमाना-पञ्चमी०' (३।१५८) अ० → ए० । 'लोकात्' (१।१।३) **करेसु** ।

उपहास । प्रथमा सि । 'पो वः' (१।२३१) प० → व० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **उवहासं** ॥२०१॥

## हरे क्षेपे च ॥ ८।२।२०२ ॥

क्षेपे सम्भाषण-रतिकलहयोश्च हरे इति प्रयोक्तव्यम् ॥

क्षेपे-हरे निल्लज्ज ! ॥ सम्भाषणे - हरे पुरिसा ! ॥ रतिकलहे- हरे बहु-वल्लह ! ॥

**[ हरे क्षेपे च ]** **हरे** प्रथमा सि । क्षेप सप्तमी ङि । च प्रथमा सि ।

**[ हरे निल्लज्ज ! ]** हरे इति निन्दायामव्ययं च । निर्लज्ज ! । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) लस्य द्वित्वम् । प्रथमा सि । **निल्लज्ज !** ।

**[ हरे पुरिसा ! ] हरे** इति सम्भाषणे । यथा-पुरुष । आमन्त्रणे सि । 'पुरुषे रोः' (१।१११) रु० → रि० । 'श-षोः सः' (१।२६०) ष० → स० । 'डो दीर्घो वा' (३।३८) स० → सा० । 'अन्त्यव्य०' (१।११) स्लुक् **पुरिसा !** ।

**[ हरे बहुवल्लह ! ]** हरे इति रतिकलहे । यथा-बहुवल्लभ । 'ख-घ-थ-ध-भाम्' (१।१८७) भ० → ह० । आमन्त्रणे सि । **हरे बहुवल्लह !** ॥२०२॥

## ओ सूचना-पश्चात्तापे ॥ ८।२।२०३ ॥

ओ इति सूचना-पश्चात्तापयोः प्रयोक्तव्यम् ॥

सूचनायाम् - ओ अविणय-तत्तिल्ले ! । पश्चात्तापे-ओ न मए छाया इत्तिआए ॥

विकल्पे तु उतादेशेनैवौकारेण सिद्धम् । [१]ओ विरएमि नहयले ॥

**[ ओ सूचनापश्चात्तापे ]** ओ प्रथमा सि । सूचना च पश्चात्तापश्च = सूचनापश्चात्तापम्, तस्मिन् = सूचनापश्चात्तापे । सप्तमी ङि ।

**[ ओ अविणयतत्तिल्ले ! ]** [२]अविनयतप्तिर्विद्यते यस्याः सा = अविनयतप्तिमत् । 'तदस्याऽस्त्य०' (७।२।१) मतुप्प्र० → मत् । प्रथमा सि । 'आल्विल्लोल्लाल-वन्त-मन्तेत्तेर-मणा मतोः' (२।१५९) मत्० → इल्ल आदेशः । 'लुक्' (१।१०) इलोपः - प्ति० → प्त० । 'लोकात्' (१।२३) तप्तिल्ल० । 'आत्' (२।४।१८) आप्प्र० → आ । 'वाप ए' (३।४१) ल्ला० → ल्ले० । 'अन्त्यव्य०' (१।११) स्लुक् । 'नो णः' (१।२२८) न० → ण० । 'क-ग-ट-ड०' (२।७७) प्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वं-ति० → त्ति० **अविणयतत्तिल्ले !** ।

**[ ओ न मए छाया इत्तिआए ]** अस्मद् । तृतीया टा । 'मि-मे-ममं-ममए-ममाइ०' (३।१०९) टेन सह अस्मद्० → **मए०** ।

छाया ! प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **छाया** ।

एतावत् । 'यत्तदेतदोऽतोरित्तिअ एतल्लुक् च' (२।१५६) एतावत्० → इत्तिआ इत्यादेशः । सप्तमी ङि । 'टा-ङस्-ङे०' (३।२९) ङि० → ए० **इत्तिआए** । एतावत्यां वेलायां न ज्ञाता इत्यर्थः ।

उकारो विकल्पार्थे वर्त्तते, परंतु 'अवापोते' (१।१७२) इत्यनेन उतस्य ओ इत्यादेशेनैव विकल्पार्थः सिद्ध एव ।

**[ ओ विरएमि नहयले ]** 'रचण् प्रयत्ने' (१८५३) रच्, विपूर्व० । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । वर्त्त० → मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'णेरदेदावावे' (३।१४९) णि० → ए० । 'क-ग-च-ज०' (१।१७७) च्लुक् **विरएमि** ।

नभस्तल । 'ख-घ-थ०' (१।१८७) भ० → ह० । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । सप्तमी ङि । 'डे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् **नहयले** ॥२०३॥

### अव्वो सूचना-दुःख-सम्भाषणा-ऽपराध-विस्मया-ऽऽनन्दा-ऽऽदर-भय-खेद-विषाद-पश्चात्तापे ॥ ८।२।२०४ ॥

अव्वो इति सूचनादिषु प्रयोक्तव्यम् ॥

सूचनायाम् - अव्वो दुक्करकारय ! ॥ दुःखे-अव्वो दलन्ति हिअयं ॥

सम्भाषणे-अव्वो किमिणं किमिणं ॥

अपराध-विस्मययोः - अव्वो हरन्ति हिअयं तह वि न वेसा हवन्ति जुवईण ।
अव्वो किं पि रहस्सं मुणन्ति धुत्ता जणब्भहिआ ॥१॥

आनन्दा-ऽऽदर-भयेषु - अव्वो सुपहायमिणं अव्वो अज्जम्ह सप्फलं जीअं ।
अव्वो अइअम्मि तुमे नवरं जइ सा न जूरिहिइ ॥२॥

---

१. **ओ विरएमि णहअले** तुरिअपहाविअपवंगसंचरणसहं । अणुपरिवाडिपरिट्ठिअघणकूडघडंतमहिहरं सेउवहं ॥ [से० ब० - ८।२४]
उत विरचयामि नभस्तले त्वरितप्रधावितप्लवङ्गसंचरणसहम् । अनुपरिपाटीपरिस्थितघनकूटघटमानमहीधरं सेतुपथम् ॥

२. K. अविनयेन तृप्तिर्विद्यते यस्याः सा । पा० म० - तृप्ति० → तत्ति० ।

खेदे - अव्वो न जामि छित्तं ॥

विषादे - अव्वो नासेन्ति दिहिं पुलयं वड्ढेन्ति दिन्ति रणरणयं ।
एण्हि तस्सेअ गुणा ते च्चिअ अव्वो कह णु एअं ॥३॥

पश्चात्तापे - अव्वो तह तेण कया अहयं जह कस्स साहेमि ॥

**[ अव्वो ]** अव्वो प्रथमा सि ।

**[ सूचनादुःखसम्भाषणाऽपराधविस्मयाऽऽनन्दाऽऽदरभयखेदविषादपश्चात्तापे ]** सूचनादौ समाहारद्वन्द्वात् सप्तमी ।

[1]अव्वो [2]दुक्करकारय ! पुणो वि तत्तिं करेसि गमणस्स ।
अज्ज वि न हुंति सरला वेणीइ तरंगिणो चिहुरा ॥

अस्यार्थः - अव्वो सूचनायाम् । हे दुष्करकारक ! पुनरपि गमनस्य तत्ति-विचारं करोषि ? । वेण्याश्चिकुरास्तरङ्गिणो वक्रा अद्यापि सरला न भवन्ति ।

कोऽर्थः ? - पूर्वं कस्याश्चिदपि नायिकायाः भर्त्ता चलितः । स बहुभिर्दिनैः समागतः, ततस्तया [3]वेणीदडस्छोटितः । भर्त्ता च पुनरपि चलनवार्त्ता कृता । ततः कान्तयोच्यते - हे भर्त्तः ! वेणीकेशाः अद्यापि सरला न भवन्ति, ततश्चलनवार्त्ता कुर्वाणोऽसि ? । अहो दुष्करकारित्वमिति सूच्यते इति भावार्थो गाथार्थश्च ।

**[ अव्वो दुक्करकारय ! ]** दुष्करकारक ! । 'निर्दुरोर्वा' (१।१३) र्लुक् । 'अनादौ शेषाऽऽदेशयोर्द्वित्वम्' (२।८९) कस्य द्वित्वं - क० → क्क० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । आमन्त्रणे प्रथमा सि । **दुक्करकारय !** ।

**[ अव्वो दलन्ति हिअयं ]** 'दल विशरणे' (४१३) दल् । वर्त्त० अन्ति । 'लोकात्' (१।१।३) **दलन्ति** ।

हृदय । 'इत् कृपादौ' (१।१२८) हृ० → हि० । 'क-ग-च-ज०' (१।१७७) द्लुक् **हिअयं** ।

**[ अव्वो किमिणं किमिणं ]** किम् । प्रथमा सि । 'किमः किम्' (३।८०) सिना सह किम्० → किम्० । इदम् । प्रथमा सि । 'क्लीबे स्यमेदमिणमो च' (३।७९) सिना सह इदम्० → इणम्० । 'लोकात्' (१।१।३) इणम् । 'वा स्वरे मश्च' (१।२४) म्० । 'मोऽनु०' (१।२३) अनुस्वारः **किमिणं ( २ )** ।

**[ अव्वो हरन्ति हिअयं............. ]**

अस्या व्याख्या - अव्वो इति अपराधे । धूर्त्ता हृदयं हरन्ति युवतीनां, द्वेष्या न भवन्ति । अव्वो इति विस्मये । धूर्त्ताः किमपि रहस्यं जानन्ति । किंविशिष्टा धूर्त्ताः ? जनेभ्योऽधिका-जनाभ्यधिकाः इति गाथार्थः ।

अथ व्युत्पत्तिः - 'हृंग् हरणे' (८८५) हृ । वर्त्त० अन्ति । 'बहुषु न्तु-ह-मो' (३।१७६) (?) ('बहुष्वाद्यस्य न्ति-न्ते-इरे' (३।१४२) अन्ति० → न्ति०) । 'ऋवर्णस्या०' (४।२३४) हृ० → हर० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) **हरन्ति** ।

---

१. [शृ० प्र० - ११।२८ - १५।२५२ । गा० को० - ३।२२ । स० क० - ५।२९१ । गा० स० - ३।७३]
अहो दुष्करकारक ! पुनरपि चिन्तां करोषि गमनस्य ।
अद्यापि न भवन्ति सरला वेण्यास्तरङ्गिणश्चिकुराः ॥

२. पाठां० - गा० स० - शृ० प्र० - स० क० - दुक्करआरअ ! । गा० को० - दुक्करयारय ! । ३. E. वेणीदण्ड ।

**हिअयं** पूर्ववत् । तथा । 'वाऽव्ययोत्खातादावदातः' (१।६७) था० → थ० । 'ख-घ-थ०' (१।१८७) थ० → ह० । अपि । 'पदादपेर्वा' (१।४१) अलोपः - अपि० → पि० । 'पो वः' (१।२३१) पि० → वि० **तह वि** ।

द्वेष्याः । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अधो म-न-याम्' (२।७८) य्लुक् । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **वेसा** ।

'भू सत्तायाम्' (१) भू । वर्त्त० अन्ति । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हव० । 'बहुष्वाद्यस्य०' (३।१४२) अन्ति० → न्ति० **हवन्ति** ।

युवति । षष्ठी आम् । 'आदेर्यो जः' (१।२४५) यु० → जु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः' (३।१२) इ० → ई० **जुवईण** ।

किम् - अपि । 'पदादपेर्वा' (१।४१) अपि० → पि० । 'मोऽनु०' (१।२३) अनुस्वारः **किं पि** ।

रहस्य । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) सस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **रहस्सं** ।

'ज्ञांश् अवबोधने' (१५४०) ज्ञा । 'ज्ञो जाण-मुणौ' (४।७) ज्ञा० → मुण० । वर्त्त० अन्ति । 'बहुष्वाद्यस्य०' (३।१४२) अन्ति० → न्ति० **मुणन्ति** ।

धूर्त्ताः । 'ह्रस्वः संयोगे' (१।८४) धू० → धु० । 'सर्वत्र०' (२।७९) र्लुक् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **धुत्ता** । जनाभ्यधिकाः । 'नो णः' (१।२२८) ना० → णा० । 'ह्रस्वः संयोगे' (१।८४) णा० → ण० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) भस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (४।१।४२) पूर्वभस्य बः । 'ख-घ-थ०' (१।१८७) धि० → हि० । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्०' (३।१२) अ० → आ० **जणब्भहिआ** इति व्युत्पत्तिः ।

**[ अव्वो सुपहायमिणं ................. ]**

अस्या व्याख्या - अव्वो इति आनन्दे । अद्याऽस्माकं इदं सुप्रभातम् । अव्वो इति आदरे । अद्याऽस्माकं जीवितं सफलम् । अव्वो इति भये । यदि त्वय्यतीते सा केवलं न खेत्स्यति इति गाथार्थः ।

अथ व्युत्पत्तिः - अव्वो । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **अव्वो** ।

सुप्रभात । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'ख-घ-थ०' (१।१८७) भा० → हा० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः । इदम् । प्रथमा सि । 'क्लीबे स्यमेदमिणमो च' (३।७९) सिना सह इदम्० → इणम्० । 'वा स्वरे मश्च' (१।२४) म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुपहायमिणं** ।

अद्य । 'द्य-य्य-र्यां-जः' (२।२४) द्य० → ज० । 'अनादौ०' (२।८९) जस्य द्वित्वम् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **अज्ज** ।

अस्मद् । षष्ठी आम् । 'णे-णो-मज्झ-अम्ह-अम्हं-अम्हे-अम्हो-अम्हाण-ममाण-महाण-मज्झाण आमा' (३।११४) आमा सह अस्मद्० → अम्ह० । 'त्यदाद्यव्ययात् तत्स्वरस्य लुक्' (१।४०) अलुक् **म्ह०** ।

सफल । 'समासे वा' (२।९७) फस्य द्वित्वम् । 'द्वितीय०' (२।९०)पूर्वफस्य पः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' १।२३) अनुस्वारः **सप्फलं** ।

जीवित । 'यावत्तावज्जीविता-ऽऽवर्त्तमाना-ऽवट-प्रावारक-देवकुलैवमेवे वः' (१।२७१) विलुक्-जीवित० → जीत० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जीअं** ।

अतीत । 'पानीयादिष्वित्' (१।१०१) ती० → ति० । 'क-ग-च-ज०' (१।१७७) तयोर्द्वयोर्लुक् । सप्तमी ङि । 'ङे-म्मि ङेः' (३।११) ङि० → म्मि० **अइअम्मि** ।

युष्मद् । सप्तमी ङि । 'तुमे-तुमए-तुमाइ-तइ-तए-ङिना' (३।१०१) ङिना सह युष्मद्० → **तुमे०** ।

नवरं । यदि । 'आदेर्यो जः' (१।२४५) य० → ज० । 'क-ग-च-ज०' (१।१७७) द्लुक् **जइ** ।

तद् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक्-द्लुक् च । 'तदश्च तः सोऽक्लीबे' (३।८६) त० → स० । 'आत्' (२।४।१८) आप्प्र० → आ । 'समानानां०' (१।२।१) दीर्घः **सा** ।

'खिदिंच् परितापे' (१२५९) खिद् । 'खिदेर्जूर-विसूरौ' (४।१३२) खिद्० → जूर आदेशः । भविष्यन्ती स्यति । 'त्यादीनामाद्य०' (३।१३९) स्यति० → इ० । 'भविष्यति हिरादिः' (३।१६६) "हि" आगमः । 'एच्च क्त्वा०' (३।१५७) र० → रि० **जूरिहिइ** इति व्युत्पत्तिः ।

[1]**[ अव्वो न जामि छित्तं, खज्जउ साली कुरङ्गकीरेहिं ।**

**उन्नय मज्झ पओहर, झडित्ति ताली न संपडइ ॥ ॥ ]**

अस्यार्थः - सुता मातरं प्रति वक्ति-अव्वो इति खेदे । अहं क्षेत्रं न यामि । कुरङ्ग-कीरैः शालिः खाद्यताम् । मम पयोधरौ उन्नतौ । झटिति-शीघ्रं तालिका न संपतति इत्यर्थः ।

**[ अव्वो न जामि छित्तं ]** 'यांक् प्रापणे' (१०६२) या । वर्त्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'आदेर्यो जः' (१।२४५) या० → जा० **जामि** ।

क्षेत्र । द्वितीया अम् । 'क्षः खः०' (२।३) ('छोऽक्ष्यादौ' (२।१७)) क्षे० → छे० । 'ह्रस्वः संयोगे' (१।८४) छे० → छि० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **छित्तं** ।

**[ अव्वो नासेन्ति दिर्हिं.................. ]**

अस्यार्थः- अव्वो इति विषादे । तस्यैव गुणा धृतिं नाशयन्ति, पुलकं वर्धयन्ति, रणरणकमौत्सुक्यं ददति । इदानीं तस्यैव त एव गुणा धृतिं नाशयन्ति । एतत् कथं जातम् ? । नु इति वितर्के । इति गाथार्थः ।

अथ व्युत्पत्तिः - [2]"णशूच् अदर्शने' (१२०२) णश् । 'आदेः ष्णो०' (शाकटायने (४।२।२६१)) नश् । नश्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः न० → ना० । वर्त्त० अन्ति । 'बहुष्वाद्य०' (३।१४२) अन्ति० → न्ति० । 'णेरदेदावावे' (३।१४९) इ० → ए० । 'लोकात्' (१।१।३) **नासेन्ति** ।

धृति । द्वितीया अम् । 'धृतेर्दिहिः' (२।१३१) धृति० → दिहि० । 'शेषेऽदन्तवत्' (३।१२४) इति न्यायात् 'अमोऽस्य' (३।५) अलुक् **दिर्हिं** ।

---

१. **अव्वो ! न जामि खेत्ते** साली खज्जंतु कीरनिवहेहिं । जाणंता वि हयासा पहिया पुच्छंति मे मग्गं ॥ [सु० गा० सं० - ६५]
२. सि० श०- 'नशौच् अदर्शने' (१२०२) नश् ।

पुलक । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पुलयं** ।

'वृधूङ् वर्धने' (९५७) वृध् । वर्धमानं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ऋवर्णस्या०' (४।२३४) वृ० → वर० । 'क्वथ-वर्धां ढः' (४।२२०) ध० → ढ० । 'अनादौ०' (२।८९) ढस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वढस्य डः । 'णेरदेदावावे' (३।१४९) इ० → ए० । वर्त्त० अन्ति । 'बहुष्वाद्यस्य न्ति०' (३।१४२) अन्ति० → न्ति० **वड्ढेन्ति** ।

'डुदांग्क् दाने' (११३८) दा । वर्त्त० अन्ति । 'स्वराणां स्वराः' (४।२३८) दा० → दे० । 'बहुष्वाद्यस्य०' (३।१४२) अन्ति० → न्ति० । 'ह्रस्वः संयोगे' (१।८४) दे० → दि० **दिन्ति** ।

रणरणक । द्वितीया अम् । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **रणरणयं** ।

इदानीम् । 'एण्हिं-एत्ताहे इदानीमः' (२।१३४) इदानीम्० → एण्हि० । तस्य एव । तद् । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० । 'लोकात्' (१।१।३) तस्स । 'लुक्' (१।१०) अलुक् । 'क-ग-च-ज०' (१।१७७) व्लुक् । प्रथमा सि । **तस्सेअ** ।

गुण । प्रथमा जस् । 'जस्-शसोर्लुक्'(३।४) जस्लुक् । 'जस्-शस्०' (३।१२) ण० → णा० **गुणा** ।

तद् । प्रथमा जस् । 'अतः सर्वादेर्डेर्जसः' (३।५८) जस्० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अद्लुक् । 'लोकात्' (१।१।३) **ते** ।

चिअ । 'णइ-चेअ-चिअ-च्च अवधारणे' (२।१८४) चिअ आगमः । 'सेवादौ वा' (२।९९) द्वित्वे **च्चिअ०** ।

कथं नु । 'मांसादेर्वा' (१।२९) अनुस्वारलुक् । 'ख-घ-थ०' (१।१८७) थ० → ह० । 'नो णः' (१।२२८) नु० → णु० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **कह णु** ।

एतद् । 'वा स्वरे मश्च' (१।२४) द्० → म्० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'मोऽनु०' (१।२३) अनुस्वारः **एअं** ।

**[ अव्वो तह तेण कया अहयं जह कस्स साहेमि ]** तथा । प्रथमा सि । 'वाऽव्ययोत्खाता०' (१।६७) था० → थ० । 'ख-घ-थ०' (१।१८७) थ० → ह० । 'अव्ययस्य' (३।२।७) सिलुप् **तह** ।

तद् । तृतीया टा । 'अन्त्यव्य०' (१।११) द्लुक् । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) त० → ते० **तेण** ।

कृता । प्रथमा सि । 'ऋतोऽत्' (१।१२६) कृ० → क० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० । 'अन्त्यव्य०' (१।११) स्लुक् **कया** ।

अस्मद् । प्रथमा सि । 'अस्मदो म्मि-अम्मि-अम्हि हं-अहं-अहयं सिना' (३।१०५) सिना सह अस्मद्० → **अहयं** ।

यथा । 'वाऽव्ययोत्खाता०' (१।६७) था० → थ० । 'ख-घ-थ०' (१।१८७) थ० → ह० । 'आदेर्यो जः' (१।२४५) य० → ज० **जह** ।

किम् । षष्ठी ङस् । 'किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **कस्स** ।

'कथण् वाक्यप्रबन्धे' (१८८०) कथ । 'कथेर्वज्जर-पज्जरोप्पाल०' (४।२) कथ० → साह० इति । वर्त्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'वर्त्तमाना-पञ्चमी०' (३।१५८) ह० → हे० **साहेमि** । तेनाहं तथा कृता यथाहं कस्याग्रे कथयामि ॥२०४॥

## अइ सम्भावने ॥ ८।२।२०५ ॥

सम्भावने अइ इति प्रयोक्तव्यम् ॥ [1]अइ दिअर ! किं न पेच्छसि ।

**[ अइ सम्भावने ]** अइ प्रथमा सि । सम्भावन सप्तमी ङि ।

**[ अइ दिअर ! किं न पेच्छसि ]** अइ इति सम्भावने । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **अइ** ।

देवर । 'एत इद्वा वेदना - चपेटा-देवर-केसरे' (१।१४६) दे० → दि० । 'क-ग-च-ज०' (१।१७७) व्लुक् । आमन्त्रणे सि । **दिअर !** ।

किम् न । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'मोऽनु०' (१।२३) अनुस्वारः । 'वर्गेऽन्त्यो वा' (१।३०) अनुस्वारस्य न० → **किन्न०** ।

'दृशं प्रेक्षणे' (४९५) दृश् । 'दृशो निअच्छ-पेच्छा-ऽवयच्छा०' (४।१८१) दृश्० → पेच्छ० इति । वर्त्तमाना सिव् । 'द्वितीयस्य सि-से' (३।१४०) सिव्० → सि० इति **पेच्छसि** ॥२०५॥

## वणे निश्चय-विकल्पा-ऽनुकम्प्ये च ॥ ८।२।२०६ ॥

वणे इति निश्चयादौ सम्भावने च प्रयोक्तव्यम् ॥

निश्चये-वणे देमि-ददमि ॥ विकल्पे - होइ वणे न होइ । भवति वा न भवति ॥ अनुकम्प्ये - दासो वणे न मुच्चइ । दासोऽनुकम्प्यो न त्यज्यते ॥ सम्भावने - नत्थि वणे जं न देइ विहि-परिणामो । सम्भाव्यते एतदित्यर्थः ॥

**[ वणे ]** वणे प्रथमा सि ।

**[ निश्चयविकल्पाऽनुकम्प्ये च ]** निश्चयश्च विकल्पश्च अनुकम्प्यश्च = निश्चयविकल्पाऽनुकम्प्यम्, तस्मिन् = निश्चयविकल्पाऽनुकम्प्ये । सप्तमी ङि । च प्रथमा सि ।

**[ वणे देमि ] वणे** इति निश्चये अव्ययम् । 'डुदांग्क् दाने' (११३८) दा० । वर्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'स्वराणां स्वराः' (४।२३८) दा० → दे० **देमि** ।

**[ होइ वणे न होइ ]** 'भू सत्तायाम्' (१) भू । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० । **होइ वणे न होइ** ।

**[ दासो वणे न मुच्चइ ]** दास । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दासो** ।

---

१. **अइ दिअर ! किं ण पेच्छसि** आआसं किं मुहा पलोएसि । जाआए बाहुमूलम्मि अद्धअन्दाणं परिवाडिं ॥
[स० क० - ५।१७३ । शृ० प्र० - ७।१५ । गा० स० - ६।७० । गा० का० - ५।३६]

अयि देवर ! किं न प्रेक्षसे आकाशं किं मुधा प्रलोकयसि । जायाया बाहुमूलेऽर्धचन्द्राणां परिपाटीम् ॥

'मुच्लृंती मोक्षणे' (१३२०) मुच् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'गमादीनां द्वित्वम्' (४।२४९) द्वित्वं-च० → च्च० -क्यलुक् च । 'व्यञ्जना०' (४।२३९) अत् । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **मुच्चइ** ।

**[ नत्थि वणे जं न देइ विहिपरिणामो ]** न अस्ति । 'अत्थिस्त्यादिना' (३।१४८) अस्ति० → अत्थि० । 'लुक्' (१।१०) अलुक् **नत्थि** ।

यत्र । 'आदेर्यो जः' (१।२४५) य० → ज० **जं न** ।

'डुदांग्क् दाने' (११३८) दा । वर्त्त० तिव् । 'स्वराणां स्वराः' (४।२३८) दा० → दे० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **देइ** ।

विधिपरिणाम । प्रथमा सि । 'ख-घ-थ०' (१।१८७) धि० → हि० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विहिपरिणामो** ॥२०६॥

## मणे विमर्शे ॥ ८।२।२०७ ॥

मणे इति विमर्शे प्रयोक्तव्यम् ॥ मणे सूरो । किंस्वित् सूर्यः । अन्ये मन्ये इत्यर्थमपीच्छन्ति ॥

**[ मणे विमर्शे ]** मणे प्रथमा सि । विमर्श सप्तमी ङि ।

**[ मणे सूरो ]** सूर । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सूरो** ॥२०७॥

## अम्मो आश्चर्ये ॥ ८।२।२०८ ॥

अम्मो इत्याश्चर्ये प्रयोक्तव्यम् ॥ अम्मो कह पारिज्जइ ॥

**[ अम्मो आश्चर्ये ]** अम्मो प्रथमा सि । आश्चर्य सप्तमी ङि ।

**[ अम्मो कह पारिज्जइ ]** कथं । 'मांसादेर्वा' (१।२९) अनुस्वारलोपः । 'ख-घ-थ०' (१।१८७) थ० → ह० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **कह** ।

'पार कर्मसमाप्तौ' (१९०१) [1]पार । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० आदेशः । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'लोकात्' (१।१।३) पारिज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **पारिज्जइ** । शक्यते इत्यर्थः ॥२०८॥

## स्वयमोऽर्थे अप्पणो नवा ॥ ८।२।२०९ ॥

स्वयमित्यस्याऽर्थे अप्पणो वा प्रयोक्तव्यम् ॥

विसयं विअसन्ति अप्पणो कमलसरा । पक्षे-सयं चेअ मुणसि करणिज्जं ॥

**[ स्वयमोऽर्थे अप्पणो नवा ]** स्वयम् षष्ठी ङस् । अर्थ सप्तमी ङि । अप्पणो प्रथमा सि । नवा प्रथमा सि ।

**[ विसयं विअसन्ति अप्पणो कमलसरा ]** विशदं यथा भवति तथा स्वयं कमलसरांसि विकसन्तीत्यर्थः । विशद । 'श-षोः सः' (१।२६०) श० → स० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **विसयं** ।

---

१. G. 'शक्लृंट् शक्तौ' (१३००) शक् । 'शकेश्चय०' (४।८६) शक्० → पार० ।

विकसन्ति । 'क-ग-च-ज०' (१।१७७) कूलुक् **विअसन्ति** । अप्पणो । प्रथमा सि ।

कमलसरस् । प्रथमा जस् । 'अन्त्यव्य०' (१।११) स्लुक् । 'स्नमदाम-शिरो-नभः' (१।३२) पुंस्त्वम् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्०' (३।१२) र० → रा० **कमलसरा** । पक्षे-

**[ सयं चेअ मुणसि करणिज्जं ]** स्वयं चैव । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'ऐत एत्' (१।१४८) चै० → चे० । 'क-ग-च-ज०' (१।१७७) व्लुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **सयं चेअ** ।

'ज्ञांश् अवबोधने' (१५४०) ज्ञा । वर्त्त० सिव् । 'द्वितीयस्य सि-से' (३।१४०) सिव्० → सि० । 'ज्ञो जाण-मुणौ' (४।७) ज्ञा० → मुण० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लुक्' (१।१०) अलोपः **मुणसि** ।

करणीय । 'वोत्तरीयानीय-तीय-कृद्ये ज्जः' (१।२४८) य० → ज्ज० । 'ह्रस्वः संयोगे' (१।८४) णी० → णि० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **करणिज्जं** ॥२०९॥

## प्रत्येकमः पाडिक्कं-पाडिएक्कं ॥ ८।२।२१० ॥

प्रत्येकमित्यस्याऽर्थे पाडिक्कं-पाडिएक्कं इति च वा प्रयोक्तव्यम् ॥ पाडिक्कं । पाडिएक्कं । पक्षे- पत्तेअं ॥

**[ प्रत्येकमः पाडिक्कं पाडिएक्कं ]** प्रत्येकम् षष्ठी ङस् । पाडिक्कं प्रथमा सि । पाडिएक्कं प्रथमा सि ।

**[ पाडिक्कं पाडिएक्कं पत्तेअं ]** प्रत्येकम् । अनेन **पाडिक्कं० - पाडिएक्कं०** । पक्षे- 'सर्वत्र०' (२।७९) र्लुक् । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वम् । 'क-ग-च-ज०' (१।१७७) क्लुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **पत्तेअं** ॥२१०॥

## उअ पश्य ॥ ८।२।२११ ॥

उअ इति पश्येत्यर्थे वा प्रयोक्तव्यम् ॥ उअ निच्चल-निप्फंदा । पक्षे- पुलआऽऽदयः ॥

**[ उअ पश्य ]** उअ प्रथमा सि । पश्य प्रथमा सि ।

[1]**उअ निच्चल-निप्फंदा** भिसिणी-पत्तंमि रेहइ बलाआ ।
निम्मल-मरगय-भायण-परिट्ठिआ सङ्ख-सुत्ति व्व ॥

**उअ** इति पश्य इत्यर्थे । बलाका बिसिनीपत्रे - कमलिनीपत्रे राजते । किंविशिष्टा बलाका ? निश्चला-निष्पन्दा । निश्चला-बहिर्ग्रीवादिना । निष्पन्दा-अन्तःउत्स्वा(उच्छ्वा)सादिना । केव ? निर्मलमरकतभाजनप्रतिष्ठिता शङ्खशुक्तिरिव इति गाथार्थः ।

**[ उअ निच्चलनिप्फंदा ]** निश्चलनिष्पन्दा । 'क-ग-ट-ड०' (२।७७) श्लुक् । 'अनादौ०' (२।८९) चस्य द्वित्वम् । 'ष्प-स्पयोः फः' (२।५३) ष्प० → फ० । 'अनादौ०' (२।८९) फस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वफस्य पः । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **निच्चलनिप्फंदा** । पक्षे -

**[ पुलआऽऽदयः ]** 'दृशृं प्रेक्षणे' (४९५) दृश् । 'दृशो निअच्छ-पेच्छा-ऽवयच्छा०' (४।१८१) इत्यादिना दृश्० → **पुलअ०** इत्यादयः आदेशाः स्युः ॥२११॥

---

१. [का० प्र० - २।८ । गा० को० - १।३ । गा० स० - १।४]
पश्य निश्चलनिष्पन्दा बिसिनीपत्रे राजते बलाका ।
निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव ॥

## इहरा इतरथा ॥ ८।२।२१२ ॥

इहरा इति इतरथाऽर्थे प्रयोक्तव्यं वा ॥ इहरा[१] नीसामन्नेहिं । पक्षे - इअरहा ॥

**[ इहरा इतरथा ] इहरा** प्रथमा सि । इतरथा सप्तमी ङि ।

**[ इहरा नीसामन्नेहिं ]** इहरा इति इतरथाऽर्थे अव्ययं च । [२]निस्सामान्य । तृतीया भिस् । 'क-ग-ट-ड-त-द-प-श-ष-स- ≍ क- )( पामूर्ध्वं लुक्' (२।७७) स्लुक् । 'लुप्तय-र-व-श-ष-सां०' (१।४३) नि० → नी० । 'ह्रस्वः संयोगे' (१।८४) मा० → म० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वम् । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं । 'भिस्-भ्यस्-सुपि' (३।१५) न्न० → न्ने० **नीसामन्नेहिं** । पक्षे -

**[ इअरहा ]** इतरथा । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'ख-घ-थ-ध-भाम्' (१।१८७) था० → हा० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **इअरहा** ॥२१२॥

## एक्कसरिअं झगिति-सम्प्रति ॥ ८।२।२१३ ॥

एक्कसरिअं झगित्यर्थे सम्प्रत्यर्थे च प्रयोक्तव्यम् ॥ एक्कसरिअं झगिति साम्प्रतं वा ॥

**[ एक्कसरिअं ]** झगिति-सम्प्रति इति द्वयोरर्थे एक्कसरिअं इत्यादेशः ॥२१३॥

## मोरउल्ला मुधा ॥ ८।२।२१४ ॥

मोरउल्ला इति मुधाऽर्थे प्रयोक्तव्यम् ॥ मोरउल्ला । मुधेत्यर्थः ॥

**[ मोरउल्ला मुधा ]** मोरउल्ला प्रथमा सि । मुधा सप्तमी ङि ॥२१४॥

## दराऽर्धाऽल्पे ॥ ८।२।२१५ ॥

दर इत्यव्ययमर्धाऽर्थे ईषदर्थे च प्रयोक्तव्यम् ॥ दर- विअसिअं । अर्धेनेषद्वा विकसितमित्यर्थः ॥

**[ दराऽर्धाऽल्पे ]** दर प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । अर्धं च अल्पं च = अर्धाऽल्पम्, तस्मिन् = अर्धाऽल्पे । सप्तमी ङि ।

**[ दर- विअसिअं ]** विकसित । 'क-ग-च-ज०' (१।१७७) क्लुक् - त्लुक् च । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **विअसिअं** ॥२१५॥

## किणो प्रश्ने ॥ ८।२।२१६ ॥

किणो इति प्रश्ने प्रयोक्तव्यम् ॥ किणो धुवसि ॥

**[ किणो प्रश्ने ]** किणो प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । प्रश्न सप्तमी ङि ।

**[ किणो धुवसि ]** 'धूगट् कम्पने' (१२९१) धू । 'धूगेर्धुवः' (४।५९) धू० → धुव० इति । वर्त्त० सिव् । 'द्वितीयस्य सि-से' (३।१४०) सिव्० → सि० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लुक्' (१।१०) वस्य अलोपः । 'लोकात्' (१।१।३) **धुवसि** ॥२१६॥

---

१. थोवागअ-दोसच्चिअ ववहार-वहम्मि होंति सप्पुरिसा । **इहरा णीसामण्णेहिँ** तेहिँ कह संगअं होइ ॥ [ग० व० -९६०] स्तोकागतदोषा एव व्यवहारपथे भवन्ति सत्पुरुषाः । इतरथा निःसामान्यैस्तैः कथं सङ्गतं भवति ॥

२. G. निर्-सामान्य । 'अन्त्य०' (१।११) र्लुक् । 'लुंकि निरः' (१।९३) नि० → नी० ।

## इ-जे-राः पादपूरणे ॥ ८।२।२१७ ॥

इ-जे-र इत्येते पादपूरणे प्रयोक्तव्याः ॥

न उणा इ अच्छीइं । [१]अणुकूलं वोत्तुं जे । गेण्हइ र कलमगोवी ॥

अहो । हंहो । हेहो । हा । नाम । अहह । [२]ही-सि । [३]अयि । अहाह । अरि । रि । हो इत्यादयस्तु संस्कृतसमत्वेन सिद्धाः ॥

**[ इजेराः पादपूरणे ]** इ-जे-र प्रथमा जस् । पादपूरण सप्तमी ङि ।

**[ न उणा इ अच्छीइं ] न** पुनर् । 'अन्त्य०' (१।११) र्लुक् । 'क-ग-च-ज०' (१।१७७) प्लुक् । 'नो णः' (१।२२८) न० → ण० । 'नात् पुनर्यादा०' (१।६५) ण० → णा० **उणा** । **इ** इति पादपूरणे । अक्षि । प्रथमा जस् । 'क्षः खः क्वचित्तु०' (२।३) ('छोऽक्ष्यादौ' (२।१७)) । क्षि० → छि० । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'जस्-शस इँ-इं-णयः सप्राग्दीर्घाः' (३।२६) जस्० → णि०(इं) -पूर्वस्य च दीर्घः - च्छि० → च्छी० **अच्छीणि( इं )** ।

**[ अणुकूलं वोत्तुं जे ]** अनुकूल । प्रथमा सि । 'नो णः' (१।२२८) नु० → णु० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अणुकूलं** ।

'वचंक् परिभाषणे' (१०९६) वच् । तुम्प्र० । 'वचो वोत्' (४।२११) वच्० → वोत्० । 'मोऽनु०' (१।२३) अनुस्वारः **वोत्तुं** । **जे** इति पादपूरणे ।

**[ गेण्हइ र कलमगोवी ]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । 'ग्रहो वल-गेण्ह-हर-पङ्ग०' (४।२०९) ग्रह० → गेण्ह० इति आदेशः । वर्त्तमाना तिव् । 'त्यादीनामा०' (३।१३९) तिव्० → इ० **गेण्हइ** ।

**र** पूरणार्थे पादस्य । कलमगोपी । 'पो वः' (१।२३१) पी० → वी० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **कलमगोवी** ॥२१७॥

## प्यादयः ॥ ८।२।२१८ ॥

प्यादयो नियताऽर्थवृत्तयः प्राकृते प्रयोक्तव्याः ॥ पि-वि अप्यर्थे ॥२१८॥

इति श्रीबृहत्तपागच्छे श्रीश्रीश्रीश्रीसौभाग्यसागरसूरिशिष्य-भुजिष्यहर्षकुलपण्डितवचःप्राप्तप्रयोगरहस्येन उदयसौभाग्यगणिना लिखितायां हैमप्राकृतवृत्तिढुण्ढिकायां व्युत्पत्तिदीपिकाभिधानायां सर्वप्रयोगविशेषव्युत्पत्तिप्रकाशिकायां द्वितीयः पादः समर्थितः ॥

द्विषत्पुरक्षोदविनोदहेतोर्भवादवामस्य भवद् भुजस्य ।
अयं विशेषो भुवनैकवीर ! परं न यत्काममपाकरोति ॥१॥

---

१. **अणुऊलं वोत्तुं जे** दाउं अइवल्लहं पि वेसे वि ।
कुवियं च पसाएउं सिक्खेउ लोओ तुमाहिंतो ॥ [गा० को० - ६।५७ । अनु० अङ्कः -६६]
१. पाठां० - गा० को० - अणुऊलं चिअ वोत्तुं । २. बहुवल्लह वल्लहे वि वेसे वि । ३. सिक्खइ ।
२. I. J. हीसि । ३. I. अपि ।
अनुकूलं वक्तुं यद् दातुमतिवल्लभमपि द्वेष्येऽपि । कुपितं च प्रसादयितुं शिक्षतां लोकस्त्वत्तः ॥

॥ अर्हम् ॥

॥ नमो नमः श्रीगुरुनेमिसूरये ॥

# बृहत्तपागच्छीय-श्रीउदयसौभाग्यगणिविरचितया व्युत्पत्तिदीपिकाभिधान-ढुण्ढिकया समर्थितं सिद्धहेमप्राकृतव्याकरणम् ॥

## ॥ अथ अष्टमाध्यायस्य तृतीयः पादः ॥

### वीप्स्यात् स्यादेर्वीप्स्ये स्वरे मो वा ॥ ८।३।१ ॥

वीप्सार्थात् पदात् परस्य स्यादेः स्थाने वीप्सार्थे पदे परे मो वा भवति ॥

एकैकम् । एक्कमेक्कं । एक्कमेक्केण । अङ्गे अङ्गे । अङ्गमङ्गम्मि । पक्षे - एक्केक्कमित्यादि ॥

**[ वीप्स्यात् ]** वीप्सा(प्स्य) पञ्चमी ङसि ।

**[ स्यादेर्वीप्स्ये ]** स्यादि षष्ठी ङस् । वीप्सा(प्स्य) सप्तमी ङि ।

**[ स्वरे मो वा ]** स्वर सप्तमी ङि । म प्रथमा सि । वा प्रथमा सि ।

**[ एक्कमेक्कं ]** एक । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः । अग्रे एक । अनेन वा म्० । 'सेवादौ वा' (२।९९) कस्य द्वित्वं एक्कमेक्क० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **एक्कमेक्कं** ।

**[ एक्कमेक्केण ]** एक्कमेक्क पूर्ववत् । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) क्क० → क्के० **एक्कमेक्केण** ।

**[ अङ्गमङ्गम्मि ]** अङ्ग । सप्तमी ङि । 'डे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् अङ्गे । अनेन ङि० → म्० । 'लोकात्' (१।१।३) अङ्गमङ्ग इति जाते 'डे-म्मि ङेः' (३।११) ङि० → म्मि० । **अङ्गमङ्गम्मि** । पक्षे-

**[ एक्केक्कं ]** एकैक । 'ऐत एत्' (३।१४८) कै० → के० । 'सेवादौ वा' (२।९९) द्वयोः कयोर्द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **एक्केक्कं** ॥१॥

### अतः सेर्डोः ॥ ८।३।२ ॥

अकारान्तान्नाम्नः परस्य स्यादेः सेः स्थाने डो भवति ॥ वच्छो ॥

**[ अतः सेर्डोः ]** अत् पञ्चमी ङसि । सि षष्ठी ङस् । डो प्रथमा सि ।

**[ वच्छो ]** वृक्ष । प्रथमा सि । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'छोऽक्ष्यादौ' (२।१७) क्ष० → छ० । 'अनादौ०' (२।८९) द्वित्वं-छ्छ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । अनेन सि० → डो० → ओ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् **वच्छो** ॥२॥

### वैतत्तदः ॥ ८।३।३ ॥

एतत्तदोरकारात् परस्य स्यादेः सेर्डो वा भवति ॥ एसो । एस ॥ सो णरो । स णरो ॥

**[ वैतत्तदः ]** वा प्रथमा सि । एतत्तद् पञ्चमी ङसि ।

**[ एसो एस ]** एतद् । प्रथमा सि । 'अन्त्यव्य०' (२।८९) द्लुक् । 'तदश्च तः सोऽक्लीबे' (३।८६) त० → स० । अनेन वा सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **एसो** । पक्षे- एतद् । 'अन्त्य०' (१।११) स्लुक्-द्लुक् च । 'तदश्च तः सोऽक्लीबे' (३।८६) त० → स० **एस** ।

**[ सो णरो स णरो ]** तद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । 'तदश्च०' (३।८६) त० → स० । अनेन वा सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **सो** । नर । प्रथमा सि । 'वाऽऽदौ' (१।२२९) न० → ण० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **णरो** ॥३॥

## जस्-शसोर्लुक् ॥ ८।३।४ ॥

अकारान्तान्नाम्नः परयोः स्यादिसम्बन्धिनोर्जस्-शसोर्लुग् भवति ॥ वच्छा एए । वच्छे पेच्छ ॥

**[ जस्-शसोर्लुक् ]** जस्-शस् षष्ठी ओस् । लुक् प्रथमा सि । ।

**[ वच्छा एए ]** वृक्ष । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'छोऽक्ष्यादौ' (२।१७) क्ष० → छ० । 'अनादौ०' (२।८९) द्वित्वं-छ्छ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । प्रथमा जस् । 'जस्-शस्-ङसि-त्तो-दो-द्वामि-दीर्घः' (३।१२) च्छ० → च्छा० । अनेन जस्लुक् **वच्छा** ।

एते । 'क-ग-च-ज०' (१।१७७) त्लुक् **एए** ।

**[ वच्छे पेच्छ ]** वृक्ष । द्वितीया शस् । 'टाण शस्येत्' (३।१४) एकारः । शेषं पूर्ववत् । **वच्छे** ।

'दृशृं प्रेक्षणे' (४९५) दृश् । पञ्चमी हि । 'दृशो निअच्छ-पेच्छा-ऽवयच्छा०' (४।१८१) दृश्० → पेच्छ० । 'दु-सु-मु विध्यादि०' (३।१७३) हि० → सु० । 'अत इज्जस्विज्जहीज्जे-लुको वा' (३।१७५) सु० → लुक्० **पेच्छ** ॥४॥

## अमोऽस्य ॥ ८।३।५ ॥

अतः परस्याऽमोऽकारस्य लुग् भवति ॥ वच्छं पेच्छ ॥

**[ अमोऽस्य ]** अम् षष्ठी ङस् । अ षष्ठी ङस् ।

**[ वच्छं पेच्छ ]** वृक्ष । द्वितीया अम् । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'छोऽक्ष्यादौ' (२।१७) क्ष० → छ० । 'अनादौ०' (२।८९) द्वित्वं-छ्छ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । अनेन अम्० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **वच्छं** । **पेच्छ** इति पूर्ववत् [८।३।४]॥५॥

## टा-आमोर्णः ॥ ८।३।६ ॥

अतः परस्य टा इत्येतस्य षष्ठीबहुवचनस्य च आमो णो भवति ॥ वच्छेण । वच्छाण ॥

**[ टा-आमोर्णः ]** टा-आम् षष्ठी ओस् । ण प्रथमा सि ।

**[ वच्छेण ]** वच्छ पूर्ववत् । तृतीया टा । अनेन टा० → ण० । 'टाण-शस्येत्' (३।१४) एकारः -च्छ० → च्छे० **वच्छेण** ।

**[ वच्छाण ]** वच्छ पूर्ववत् । षष्ठी आम् । 'जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः' (३।१२) च्छ० → च्छा० । अनेन आम्० → ण० **वच्छाण** ॥६॥

## भिसो हि-हिँ-हिं ॥ ८।३।७ ॥

अतः परस्य भिसः स्थाने केवलः-सानुनासिकः-सानुस्वारश्च हिर्भवति ॥

वच्छेहि वच्छेहिँ वच्छेहिं कया छाही ॥

**[ भिसो हि-हिँ-हिं ]** भिस् षष्ठी ङस् । हि-हिँ-हिं प्रथमा सि ।

**[ वच्छेहि वच्छेहिँ वच्छेहिं कया छाही ]** वृक्ष । तृतीया भिस् । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'छोऽक्ष्यादौ' (२।१७) क्ष० → छ० । 'अनादौ०' (२।८९) द्वित्वं-छ्छ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । अनेन भिस्० → हि-हिँ-हिं । 'भिस्-भ्यस्-सुपि' (३।१५) वच्छ० → वच्छे० - **वच्छेहि वच्छेहिँ वच्छेहिं** ।

कृता । 'ऋतोऽत्' (१।१२६) कृ० → क० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० **कया** ।

छाया । 'छायायां होऽकान्तौ वा' (१।२४९) या० → हा० । 'छाया-हरिद्रयोः' (३।३४) ङीप्र० → ई० । 'लुक्' (१।१०) आलोपः । 'लोकात्' (१।१।३) छाही । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **छाही** ॥७॥

## ङसेस्त्तो-दो-दु-हि-हिन्तो-लुकः ॥ ८।३।८ ॥

अतः परस्य ङसेः त्तो-दो-दु-हि-हिन्तो-लुक् इत्येते षडादेशा भवन्ति ॥

वच्छत्तो । वच्छाओ । वच्छाउ । वच्छाहि । वच्छाहिन्तो । वच्छा ॥ दकारकरणं भाषान्तरार्थम् ॥

**[ ङसेः त्तो-दो-दु-हि-हिन्तो-लुकः ]** ङसि षष्ठी ङस् । त्तो-दो-दु-हु-हिन्तो-लुक् प्रथमा जस् ।

**[ वच्छत्तो ]** वृक्ष । पञ्चमी ङसि । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'छोऽक्ष्यादौ' (२।१७) क्ष० → छ० । 'अनादौ०' (२।८९) द्वित्वं-छ्छ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । अनेन ङसि० → त्तो० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - च्छ० → च्छा०' । 'ह्रस्वः संयोगे' (१।८४) च्छा० → च्छ० **वच्छत्तो** ।

**[ वच्छाओ ]** वच्छ । पञ्चमी ङसि । अनेन ङसि० → दो० । 'जस्-शस्-ङसि-त्तो-दो०' (३।१२) च्छ० → च्छा० । 'क-ग-च-ज०' (१।१७७) द्लुक् **वच्छाओ** ।

**[ वच्छाउ ]** वच्छ । पञ्चमी ङसि । अनेन ङसि० → दु० । 'जस्-शस्-ङसि०' (३।१२) च्छ० → च्छा० । 'क-ग-च-ज०' (१।१७७) द्लुक् **वच्छाउ** ।

**[ वच्छाहि ]** वच्छ । पञ्चमी ङसि । अनेन ङसि० → हि० । 'जस्-शस्-ङसि०' (३।१२) च्छ० → च्छा० **वच्छाहि**।

**[ वच्छाहिन्तो ]** वच्छ । पञ्चमी ङसि । अनेन ङसि० → हिन्तो० । 'जस्-शस्-ङसि०' (३।१२) च्छ० → च्छा० **वच्छाहिन्तो** ।

**[ वच्छा ]** वच्छ । पञ्चमी ङसि । 'जस्-शस्-ङसि०' (३।१२) च्छ० → च्छा० । अनेन ङसिलुक् **वच्छा** ॥८॥

## भ्यसस्त्तो-दो-दु-हि-हिन्तो-सुन्तो ॥ ८।३।९ ॥

अतः परस्य भ्यसः स्थाने त्तो-दो-दु-हि-हिन्तो-सुन्तो इत्यादेशा भवन्ति ॥

वृक्षेभ्यः - वच्छत्तो । वच्छाओ । वच्छाउ । वच्छाहि वच्छेहि । वच्छाहिन्तो वच्छेहिन्तो । वच्छासुन्तो वच्छेसुन्तो ॥

**[ भ्यसः ]** भ्यस् षष्ठी ङस् ।

**[ वच्छत्तो ]** वच्छ । भ्यस्प्र० । अनेन भ्यस्० → त्तो० । 'जस्-शस्-ङसि-त्तो०' (३।१२) च्छ० → च्छा० । 'ह्रस्वः संयोगे' (१।८४) च्छा० → च्छ० **वच्छत्तो** ।

**[ वच्छाओ ]** वच्छ । भ्यस्प्र० । अनेन भ्यस्० → दो० । 'जस्-शस्-ङसि०' (३।१२) च्छ० → च्छा० । 'क-ग-च-ज०' (१।१७७) द्लुक् **वच्छाओ** ।

**[ वच्छाउ ]** वच्छ । भ्यस्प्र० । अनेन भ्यस्० → दु० । 'जस्-शस्-ङसि०' (३।१२) च्छ० → च्छा० । 'क-ग-च-ज०' (१।१७७) द्लुक् **वच्छाउ** ।

**[ वच्छाहि वच्छेहि ]** वच्छ । भ्यस्प्र० । अनेन भ्यस्० → हि० । 'भ्यसि वा' (३।१३) वा च्छ० → च्छा० **वच्छाहि**। पक्षे- 'भिस्-भ्यस्-सुपि' (३।१५) च्छ० → च्छे० **वच्छेहि** ।

**[ वच्छाहिन्तो वच्छेहिन्तो ]** वच्छ । भ्यस्प्र० । अनेन भ्यस्० → हिन्तो० । 'भ्यसि वा' (३।१३) वा च्छ० → च्छा० **वच्छाहिन्तो** । पक्षे- 'भिस्-भ्यस्-सुपि' (३।१५) च्छ० → च्छे० **वच्छेहिन्तो** ।

**[ वच्छासुन्तो वच्छेसुन्तो ]** वच्छ । भ्यस्प्र० । अनेन भ्यस्० → सुन्तो० । 'भ्यसि वा' (३।१३) वा च्छ० → च्छा० **वच्छासुन्तो** । पक्षे- 'भिस्-भ्यस्-सुपि' (३।१५) च्छ० → च्छे० **वच्छेसुन्तो** ॥९॥

## ङसः स्सः ॥ ८।३।१० ॥

अतः परस्य ङसः संयुक्तः सो भवति ॥

पियस्स । पेम्मस्स । उपकुम्भं शैत्यम् । उप(व)कुम्भस्स सीअलत्तणं ॥

**[ ङसः स्सः ]** ङस् षष्ठी ङस् । स्स प्रथमा सि ।

**[ पियस्स ]** प्रिय । षष्ठी ङस् । 'सर्वत्र०' (२।७९) र्लुक् । अनेन ङस्० → स्स० **पियस्स** ।

**[ पेम्मस्स ]** प्रेमन् । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'अन्त्य०' (१।११) न्लुक् । अनेन ङस्० → स्स० । 'तैलादौ' (२।९८) द्वित्वं-म्म० **पेम्मस्स** ।

**[ उवकुम्भस्स सीअलत्तणं ]** कुम्भस्य समीपमुपकुम्भम्, तस्य । 'पो वः' (१।२३१) प० → व० । अनेन ङस्० → स्स० **उवकुम्भस्स** । शीतलस्य भावः = शीतलत्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० । 'त्वस्य डिमा-त्तणौ वा' (२।१५४) त्वस्य त्तण आदेशः । 'श-षोः सः' (१।२६०) शी० → सी० । 'क-ग-च-ज०' (१।१७७) त्लुक् **सीअलत्तणं** ॥१०॥

## डे-म्मि ङेः ॥ ८।३।११ ॥

अतः परस्य ङेर्डित् एकारः संयुक्तो मिश्च भवति ॥

वच्छे । वच्छम्मि ॥ देवम् → देवम्मि । तम् → तम्मि ॥ अत्र 'द्वितीया-तृतीययोः सप्तमी' (३।१३५) इत्यमो ङिः ॥

**[ डे-म्मि ङेः ]** डे-म्मि प्रथमा औ । ङि षष्ठी ङस् ।

**[ वच्छे वच्छम्मि ]** वच्छ । सप्तमी ङि । अनेन ङि० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् **वच्छे** । द्वितीये-ङि० → म्मि० **वच्छम्मि** ।

**[ देवम्मि ]** देव । द्वितीया अम् । 'द्वितीया-तृतीययोः सप्तमी' (३।१३५) अम्० → म्मि० **देवम्मि** ।

**[ तम्मि ]** तद् । द्वितीया अम् । 'अन्त्यव्य०' (१।११) द्लुक् । 'द्वितीया-तृतीययोः सप्तमी' (३।१३५) अम्० → म्मि० **तम्मि** ॥११॥

## जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः ॥ ८।३।१२ ॥

एषु परेषु अतो दीर्घो भवति ॥

जसि शसि च वच्छा ॥ ङसि - वच्छाओ । वच्छाउ । वच्छाहि । वच्छाहिन्तो । वच्छा ॥ त्तो-दो-दुषु वृक्षेभ्यः → वच्छत्तो । 'ह्रस्वः संयोगे' (१।८४) इति ह्रस्वः । वच्छाओ । वच्छाउ ॥ आमि-वच्छाण ॥ ङसिनैव सिद्धे त्तो-दो-दु ग्रहणं भ्यसि एत्वबाधनार्थम् ॥

**[ जस्-शस्-ङसि-त्तो-दो-द्वामि ]** जस्-शस्-ङसि-त्तो-दो-द्वाम् सप्तमी ङि ।

**[ दीर्घः ]** दीर्घ प्रथमा सि ।

**[ वच्छा ]** वृक्ष । प्रथमा जस्- द्वितीया शस् । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'छोऽक्ष्यादौ' (२।१७) क्ष० → छ० । 'अनादौ०' (२।८९) द्वित्वं-छ्छ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । अनेन दीर्घः-च्छ० → च्छा० । 'जस्-शसोर्लुक्' (३।४) जस्-शस्लुक् **वच्छा** ।

**[ वच्छाओ वच्छाउ वच्छाहि वच्छाहिन्तो वच्छा ]** वच्छ । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु-हि-हिन्तो लुकः' (३।८) ङसि० → दो-दु-हि-हिन्तो-पञ्चमे लुक् । अनेन दीर्घः । 'क-ग-च-ज०' (१।१७७) द्लुक् **वच्छाओ वच्छाउ वच्छाहि वच्छाहिन्तो वच्छा** ।

**[ वच्छत्तो वच्छाओ वच्छाउ ]** वच्छ (३) । भ्यस्प्र० । 'भ्यसस्त्तो-दो-दु-हि-हिन्तो-सुन्तो' (३।९) भ्यस्स्थाने त्तो-दो-दु० । अनेन दीर्घः । प्रथमे 'ह्रस्वः संयोगे' (१।८४) च्छा० → च्छ० । द्वितीये तृतीये च 'क-ग-च-ज०' (१।१७७) द्लुक् **वच्छत्तो वच्छाओ वच्छाउ** ।

**[ वच्छाण ]** वच्छ । षष्ठी आम् । अनेन दीर्घः । 'टा-आमोर्णः' (३।६) आम्० → ण० **वच्छाण** ॥१२॥

## भ्यसि वा ॥ ८।३।१३ ॥

भ्यसादेशे परे अतो दीर्घो वा भवति ॥

वच्छाहिन्तो वच्छेहिन्तो । वच्छासुन्तो वच्छेसुन्तो । वच्छाहि वच्छेहि ॥

**[ भ्यसि वा ]** भ्यस् सप्तमी ङि । वा प्रथमा सि ।

**[ वच्छाहिन्तो वच्छेहिन्तो वच्छासुन्तो वच्छेसुन्तो वच्छाहि वच्छेहि ]** वच्छ (६) । पञ्चमी भ्यस्प्र० । 'भ्यसस्त्तो-दो-दु-हि-हिन्तो-सुन्तो' (३।९) भ्यस्० → हिन्तो-सुन्तो-हि । अनेन वा दीर्घः - **वच्छाहिन्तो वच्छासुन्तो वच्छाहि** । पक्षे- 'भिस्-भ्यस्-सुपि' (३।१५) एत्वम्-**वच्छेहिन्तो वच्छेसुन्तो वच्छेहि** ॥१३॥

## टाण-शस्येत् ॥ ८।३।१४ ॥

टादेशे णे शसि च परे अस्य एकारो भवति ॥

टाण-वच्छेण ॥ णेति किम् ? अप्पणा अप्पणिआ अप्पणइआ ॥ शस्-वच्छे पेच्छ ॥

**[ टाण-शस्येत् ]** टाण-शस् सप्तमी ङि । एत् प्रथमा सि ।

**[ वच्छेण ]** वृक्ष । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'छोऽक्ष्यादौ' (२।१७) क्षस्य छः । 'अनादौ०' (२।८९) द्वित्वं-छ्छ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । अनेन एकारः - च्छ० → च्छे० **वच्छेण** ।

**[ अप्पणा ]** आत्मन् । तृतीया टा । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः पो वा' (२।५१) त्मस्य पः । 'अनादौ०' (२।८९) द्वित्वं - प्प० । 'लोकात्' (१।१।३) अप्प० । 'नो णः' (१।२२८) ना० → णा० **अप्पणा** ।

**[ अप्पणिआ अप्पणइआ ]** आत्मन् (२) । तृतीया टा । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः पो वा' (२।५१) त्मस्य पः । 'अनादौ०' (२।८९) द्वित्वं-प्प० । 'आत्मनष्टो णिआ णइआ' (३।५७) टास्थाने प्रथमे णिआ-द्वितीये णइआ **अप्पणिआ अप्पणइआ** ।

**[ वच्छे पेच्छ ]** वच्छ । द्वितीया शस् । अनेन एकारः । 'जस्-शसोर्लुक्' (३।४) शस्लुक् **वच्छे** ।

'दृशृं प्रेक्षणे' (४९५) दृश् । पञ्चमी हि । 'दृशो निअच्छ-पेच्छा-ऽवयच्छा०' (४।१८१) दृश्० → पेच्छ० । 'दु-सु-मु विध्यादि०' (३।१७३) हि० → सु० । 'अत इज्जस्विज्जहीज्जे-लुको वा' (३।१७५) सुलुक् **पेच्छ** ॥१४॥

## भिस्-भ्यस्-सुपि ॥ ८।३।१५ ॥

एषु अत एर्भवति ॥

भिस् - वच्छेहि । वच्छेहिँ । वच्छेहिं ॥ भ्यस्-वच्छेहि । वच्छेहिन्तो । वच्छेसुन्तो ॥ सुप्- वच्छेसु ॥

**[ भिस्भ्यस्सुपि ]** भिस्-भ्यस्-सुप् सप्तमी ङि ।

**[ वच्छेहि वच्छेहिँ वच्छेहिं ]** वच्छ (३) । तृतीया भिस् । 'भिसो हि-हिँ-हिं' (३।७) भिस्स्थाने हि-हिँ-हिं । अनेन एकारः - **वच्छेहि वच्छेहिँ वच्छेहिं** ।

**[ वच्छेहि वच्छेहिन्तो वच्छेसुन्तो ]** वच्छ (३) । पञ्चमी भ्यस् । 'भ्यसस्त्तो-दो-दु-हि-हिन्तो-सुन्तो' (३।९) भ्यस्स्थाने हि-हिन्तो-सुन्तो । अनेन एकारः - **वच्छेहि वच्छेहिन्तो वच्छेसुन्तो** ।

**[ वच्छेसु ]** वच्छ । सप्तमी सुप् । अनेन एकारः - **वच्छेसु** ॥१५॥

## इदुतो दीर्घः ॥ ८।३।१६ ॥

इकारस्य उकारस्य च भिस्-भ्यस्-सुप्सु परेषु दीर्घो भवति ॥

भिस् - गिरीहिं । बुद्धीहिं । दहीहिं । तरूहिं । धेणूहिं । महूहिं कयं ॥

भ्यस् - गिरीओ । बुद्धीओ । दहीओ । तरूओ । धेणूओ । महूओ आगओ ॥ एवम् - गिरीहिन्तो गिरीसुन्तो आगओ इत्याद्यपि ॥

सुप् - गिरीसु । बुद्धीसु । दहीसु । तरूसु । धेणूसु । महूसु ठिअं ॥

क्वचिन्न भवति - [१]दिअ-भूमिसु दाण-जलोल्लिआइं ॥ इदुत इति किम् ? वच्छेहिं । वच्छेसुन्तो । वच्छेसु ॥ भिस्भ्यस्सुपीत्येव - गिरिं । दहिं । तरुं पेच्छ ॥

**[ इदुतो दीर्घः ]** इदुत् षष्ठी ङस् । दीर्घ प्रथमा सि ।

---

१. **दिअ-भूमिसु दाण-जलुल्लिआइँ** कालम्मि जाइँ उत्ताइं । ताइँ तुह णाह ! रोहंति संपअं विहव-बीआइं ॥
[ग० व० -७२७ । अनु० अङ्कः - ६६]

द्विजभूमिषु दानजलार्द्राणि काले यान्युप्तानि । तानि तव नाथ ! रोहन्ति साम्प्रतं विभवबीजानि ॥

**[ गिरीहिं बुद्धीहिं दहीहिं तरूहिं धेणूहिं महूहिं कयं ]** गिरि - बुद्धि-दधि-तरु-धेनु-मधु अग्रे तृतीया भिस् । 'शेषेऽदन्तवत्' (३।१२४) इति न्यायात् इदुदन्तादपि 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हि-हिँ-हिं । अनेन दीर्घः । यथाप्राप्तौ 'ख-घ-थ-ध-भाम्' (१।१८७) ध० → ह० । 'नो णः' (१।२२८) नू० → णू० **गिरीहिं बुद्धीहिं दहीहिं तरूहिं धेणूहिं महूहिं** । **कयं** पूर्ववत् [२।११४] ।

**[ गिरीओ बुद्धीओ दहीओ तरूओ धेणूओ महूओ आगओ, गिरीहिन्तो गिरीसुन्तो आगओ ]** गिरि-बुद्ध्यादिषु पञ्चमी भ्यस्प्र० । अनेन दीर्घः । 'भ्यसस्त्तो-दो-दु-हि०' (३।९) भ्यस्० → दो० सर्वत्र । 'क-ग-च-ज०' (१।१७७) द्लुक् गिरीओ बुद्धीओ दहीओ तरूओ धेणूओ महूओ ।

आगत । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् । आगओ सर्वत्र योज्यते ।

एवं भ्यस्स्थाने हिन्तो-गिरीहिन्तो इत्यादेशः सर्वाण्यपि रूपाणि ज्ञेयानि ।

भ्यस्स्थाने सुन्तो-गिरीसुन्तो इत्यादि ।

**[ गिरीसु बुद्धीसु दहीसु तरूसु धेणूसु महूसु ठिअं ]** गिर्यादिषु सुपि परे अनेन दीर्घः । **गिरीसु बुद्धीसु दहीसु तरूसु धेणूसु महूसु** । शेषं पूर्ववत् ।

स्थितं । 'स्थष्ठा-थक्क-चिट्ठ-निरप्पाः' (४।१६) स्थि० → ठि० । 'क-ग-च-ज०' (१।१७७) त्लुक् **ठिअं** ।

**[ दिअ-भूमिसु दाण-जलोल्लिआइं ]** द्विजभूमिषु । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'श-षोः सः' (१।२६०) षु० → सु० **दिअ-भूमिसु** ।

दानजलार्द्रित । 'नो णः' (१।२२८) न० → ण० **दाण** । 'उदोद्वार्द्रे' (१।८२) ला० → लो० । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'हरिद्रादौ लः' (१।२५४) रस्य लः । 'तैलादौ' (२।९८) द्वित्वं-लि० → ल्लि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा जस् । 'जस्-शस इँ-इं०' (३।२६) जस्स्थाने इं - पूर्वस्य च दीर्घः - अ० → आ० **जलोल्लिआइं** ।

**[ वच्छेहिं ]** वच्छ । तृतीया भिस् । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं० । 'भिस्-भ्यस्-सुपि' (३।१५) एत्त्वं - च्छ० → च्छे० **वच्छेहिं** ।

**[ वच्छेसुन्तो ]** वच्छ । पञ्चमी भ्यस् । 'भ्यसस्त्तो-दो-दु-हि-हिन्तो-सुन्तो' (३।९) भ्यस्० → सुन्तो० । 'भिस्-भ्यस्-सुपि' (३।१५) एत्त्वं-च्छ० → च्छे० **वच्छेसुन्तो** ।

**[ वच्छेसु ]** वच्छ । सप्तमी सुप् । 'भिस्-भ्यस्-सुपि' (३।१५) एत्त्वं - च्छ० → च्छे० **वच्छेसु** ।

**[ गिरिं पेच्छ ]** गिरि । द्वितीया अम् । 'अमोऽस्य' (३।५) अलुक् - अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **गिरिं** ।

'दृशृं प्रेक्षणे' (४९५) दृश् । पञ्चमी हि । 'दृशो निअच्छ-पेच्छा-ऽवयच्छा०' (४।१८१) दृश्० → पेच्छ० । 'दु-सु-मु विध्यादि०' (३।१७३) हि० → सु० । 'अत इज्ज०' (३।१७५) सुलुक् **पेच्छ** ।

**[ दहिं पेच्छ ]** दहि(धि) । द्वितीया अम् । ['ख-घ-थ-ध०' (१।१८७) धि० → हि०] । 'अमोऽस्य' (३।५) अलुक् - अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दहिं** । **पेच्छ** पूर्ववत् ।

**[ तरुं पेच्छ ]** तरु । द्वितीया अम् । 'अमोऽस्य' (३।५) अलुक् - अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तरुं** । **पेच्छ** पूर्ववत् ॥१६॥

## चतुरो वा ॥ ८।३।१७ ॥

चतुर उदन्तस्य भिस्-भ्यस्-सुप्सु परेषु दीर्घो वा भवति ॥

चऊहि चउहि । चऊओ चउओ । चऊसु चउसु ॥

**[ चतुरो वा ]** चतुर् षष्ठी ङस् । वा प्रथमा सि ।

**[ चऊहि चउहि ]** चतुर् । तृतीया भिस् । 'अन्त्य०' (१।११) र्लुक् । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन वा दीर्घः - **चऊहि** । पक्षे - चतुर् । दीर्घं विना शेषं पूर्ववत् । **चउहि** ।

**[ चऊओ चउओ ]** चतुर् । पञ्चमी भ्यस् । 'अन्त्यव्य०' (१।११) र्लुक् । 'भ्यसस्त्तो-दो०' (३।९) भ्यस्० → दो० । अनेन वा दीर्घः - तु० → तू० । 'क-ग-च-ज०' (१।१७७) त-दयोर्लुक् **चऊओ** । पक्षे-दीर्घं मुक्त्वा शेषं पूर्ववत् । **चउओ** ।

**[ चऊसु चउसु ]** चतुर् । सप्तमी सुप् । 'अन्त्यव्य०' (१।११) र्लुक् । अनेन वा दीर्घः । 'क-ग-च-ज०' (१।१७७) त्लुक् **चऊसु चउसु** ॥१७॥

## लुप्ते शसि ॥ ८।३।१८ ॥

इदुतोः शसि लुप्ते दीर्घो भवति ॥

गिरी । बुद्धी । तरू । धेणू पेच्छ ॥ लुप्त इति किम् ? गिरिणो । तरुणो पेच्छ ॥ इदुत इत्येव - वच्छे पेच्छ ॥ 'जस्-शस्०' (३।१२) इत्यादिना शसि दीर्घस्य लक्ष्यानुरोधार्थो योगः ॥ लुप्त इति तु णवि प्रतिप्रसवार्थशङ्कानिवृत्त्यर्थम् ॥

**[ लुप्ते शसि ]** लुप्त सप्तमी ङि । शस् सप्तमी ङि ।

**[ गिरी पेच्छ ]** गिरि । द्वितीया शस् । 'जस्-शसोर्लुक्' (३।४) शस्लोपः । अनेन दीर्घः - रि० → री० **गिरी** । **पेच्छ** पूर्ववत् [३।१६] ।

**[ बुद्धी पेच्छ ]** बुद्धि । द्वितीया शस् । 'जस्-शसोर्लुक्' (३।४) शस्लोपः । अनेन दीर्घः - द्धि० → द्धी० **बुद्धी** । **पेच्छ** पूर्ववत् [३।१६] ।

**[ तरू पेच्छ ]** तरु । द्वितीया शस् । 'जस्-शसोर्लुक्' (३।४) शस्लोपः । अनेन दीर्घः - रु० → रू० **तरू** । **पेच्छ** पूर्ववत् [३।१६] ।

**[ धेणू पेच्छ ]** धेनु । द्वितीया शस् । 'जस्-शसोर्लुक्' (३।४) शस्लोपः । अनेन दीर्घः - नु० → नू० । 'नो णः' (१।२२८) नू० → णू० **धेणू** । **पेच्छ** पूर्ववत् [३।१६] ।

**[ गिरिणो पेच्छ ]** गिरि । द्वितीया शस् । 'जस्-शसोर्णो वा' (३।२२) शस्० → णो० **गिरिणो** । **पेच्छ** पूर्ववत् [३।१६] ।

**[ तरुणो पेच्छ ]** तरु । द्वितीया शस् । 'जस्-शसोर्णो वा' (३।२२) शस्० → णो० **तरुणो** । **पेच्छ** पूर्ववत् [३।१६]

**[ वच्छे पेच्छ ]** वृक्ष । द्वितीया शस् । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'छोऽक्ष्यादौ' (२।१७) क्षस्य छः । 'अनादौ०' (२।८९) द्वित्वं - छ्छ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'टाण-शस्येत्' (३।१४) च्छ० → च्छे० । 'जस्-शसोर्लुक्' (३।४) शस्लुक् **वच्छे** । **पेच्छ** पूर्ववत् [३।१६] ।

'जस्-शस्-ङसि०' (३।१२) इत्यादिना शसि परे क्वचित् दीर्घो भवति, क्वचिन्न भवति, तत इदं सूत्रं शसीति क्रियमाणे 'न दीर्घो णो' (३।१२५) इत्यनेन यो दीर्घनिषेधस्तस्य प्रसङ्गे पुनरपि दीर्घो मा भूदित्याशङ्क्य लुप्ते इत्युक्तम् ॥१८॥

## अक्लीबे सौ ॥ ८।३।१९ ॥

इदुतोऽक्लीबे नपुंसकादन्यत्र सौ दीर्घो भवति ॥

गिरी । बुद्धी । तरू । धेणू ॥ अक्लीब इति किम् ? दहिं । महुं ॥ साविति किम् ? गिरिं । **बुद्धिं** । तरुं । धेणुं ॥ केचित्तु दीर्घत्वं विकल्प्य तदभावपक्षे सेर्मादेशमपीच्छन्ति - अग्गिं । निहिं । वाउं । विहुं ॥

[ **अक्लीबे सौ** ] अक्लीब सप्तमी ङि । सि सप्तमी ङि ।

[ **गिरी** ] गिरि । प्रथमा सि । अनेन दीर्घः । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **गिरी** ।

[ **बुद्धी** ] बुद्धि । प्रथमा सि । अनेन दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **बुद्धी** ।

[ **तरू** ] तरु । प्रथमा सि । अनेन दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **तरू** ।

[ **धेणू** ] धेनु । प्रथमा सि । अनेन दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् । 'नो णः' (१।२२८) नू० → णू० **धेणू** ।

[ **दहिं** ] दधि । प्रथमा सि । 'ख-घ-थ-ध-भाम्' (१।१८७) धि० → हि० । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दहिं** ।

[ **महुं** ] मधु । प्रथमा सि । 'ख-घ-थ-ध०' (१।१८७) धु० → हु० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **महुं** ।

[ **गिरिं** ] गिरि । द्वितीया अम् । 'अमोऽस्य' (३।५) अलुक् - अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **गिरिं** ।

[ **बुद्धिं** ] बुद्धि । द्वितीया अम् । 'अमोऽस्य' (३।५) अलुक् - अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **बुद्धिं** ।

[ **तरुं** ] तरु । द्वितीया अम् । 'अमोऽस्य' (३।५) अलुक् - अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तरुं** ।

[ **धेणुं** ] धेनु । द्वितीया अम् । 'अमोऽस्य' (३।५) अलुक् - अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः । 'नो णः' (१।२२८) नुं० → णुं० **धेणुं** ।

केचिदत्र वा दीर्घत्वं वदन्ति, यत्र दीर्घाऽभावस्तत्र सेर्मादेशमिच्छन्ति, तन्मते यथा-

[ **अग्गिं** ] अग्नि । प्रथमा सि । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ग्गि० । सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अग्गिं** ।

[ **निहिं** ] निधि । प्रथमा सि । 'ख-घ-थ०' (१।१८७) धि० → हि० । सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **निहिं** ।

[ **वाउं** ] वायु । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) यलुक् । सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वाउं** ।

[ **विहुं** ] विधु । प्रथमा सि । 'ख-घ-थ०' (१।१८७) धु० → हु० । सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **विहुं** ॥१९॥

## पुंसि जसो डउ-डओ वा ॥ ८।३।२० ॥

इदुत इतीह पञ्चम्यन्तं सम्बध्यते ॥ इदुतः परस्य जसः पुंसि अउ-अओ इत्यादेशौ डितौ वा भवतः ॥

अग्गउ अग्गओ । वायउ वायओ चिट्ठन्ति ॥ पक्षे-अग्गिणो । वाउणो ॥ शेषे अदन्तवद्भावाद् अग्गी । वाऊ ॥ पुंसीति किम् ? बुद्धीओ । धेणूओ । दहीइं । महूइं ॥ जस इति किम् ? अग्गी अग्गिणो । वाऊ वाउणो पेच्छइ ॥ इदुत इत्येव - वच्छा ॥

**[ पुंसि जसो डउ-डओ वा ]** पुंस् सप्तमी ङि । जस् षष्ठी ङस् । डउ-डओ प्रथमा सि । वा प्रथमा सि ।

**[ अग्गउ अग्गओ चिट्ठन्ति ]** अग्नि (२) । प्रथमा जस् । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ शेषाऽऽदेशयोर्द्वित्वम्' (२।८९) द्वित्वं-ग्गि० । अनेन वा जस्स्थाने प्रथमे डउ इति - द्वितीये डओ इति । 'डित्यन्त्य०' (२।१।११४) इलुक् । 'लोकात्' (१।१।३) **अग्गउ अग्गओ** ।

**[ वायउ वायओ चिट्ठन्ति ]** वायु (२) । प्रथमा जस् । अनेन वा जस्स्थाने डउ इति-डओ इति । 'डित्यन्त्य०' (२।१।११४) उलोपः । 'लोकात्' (१।१।३) **वायउ वायओ** ।

'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव०' (२।३।९८) स्था । 'निमित्ताभावे नैमित्तिकस्याप्यभावः' (न्या० वक्ष० (१) - सूत्र (२९) स्था । वर्त्त० अन्ति । 'बहुष्वाद्यस्य न्ति-न्ते-इरे' (३।१४२) अन्ति० → न्ति० । 'स्थष्ठा-थक्क-चिट्ठ०' (४।१०) स्था० → चिट्ठ इति । 'व्यञ्जना०' (४।२३९) अत् । 'लुक्' (१।१०) अलुक् **चिट्ठन्ति** ।

**[ अग्गिणो ]** अग्नि । प्रथमा जस् । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) द्वित्वं - ग्गि० । 'जस्-शसोर्णो वा' (३।२२) जस्० → णो० **अग्गिणो** ।

**[ वाउणो ]** वायु । प्रथमा जस् । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'जस्-शसोर्णो वा' (३।२२) जस्० → णो० **वाउणो** ।

**[ अग्गी ]** 'शेषेऽदन्तवत्' (३।१२४) शेषमकारान्तवत्सिद्धमिति न्यायात् अग्नीत्यत्र प्रथमा जस् । 'जस्-शस्-ङसि०' (३।१२) इत्यनेन इकारो दीर्घः **अग्गी** ।

**[ वाऊ ]** वायु । प्रथमा जस् । 'जस्-शस्-ङसि०' (३।१२) इत्यनेन उकारो दीर्घः **वाऊ** ।

**[ बुद्धीओ ]** बुद्धि । प्रथमा जस् । 'स्त्रियामुदोतौ वा' (३।२७) जस्० → ओ० - पूर्वस्य च दीर्घः **बुद्धीओ** ।

**[ धेणूओ ]** धेनु । प्रथमा जस् । 'स्त्रियामुदोतौ वा' (३।२७) जस्० → ओ० -पूर्वस्य च दीर्घः । 'नो णः' (१।२८) नू० → णू० **धेणूओ** ।

**[ दहीइं ]** दधि । प्रथमा जस् । 'ख-घ-थ-ध-भाम्' (१।१८७) धि० → हि० । 'जस्-शस इँ-इं०' (३।२६) जस्० → इं० - पूर्वस्य च दीर्घः **दहीइं** ।

**[ महूइं ]** मधु । प्रथमा जस् । 'ख-घ-थ०' (१।१८७) धु० → हु० । 'जस्-शस इँ-इं०' (३।२६) जस्० → इं० - पूर्वस्य च दीर्घः **महूइं** ।

**[ अग्गी अग्गिणो पेच्छइ ]** अग्नि (२) । द्वि० शस् । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ग्गि० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः । 'जस्- शसोर्लुक्' (३।४) शस्लुक् । [1]'जस्-शस्०' (३।१२) दीर्घः । पक्षे - 'जस्-शसोर्णो वा' (३।२२) शस्० → णो० **अग्गी-अग्गिणो** ।

---

१. G. 'लुप्ते शसि' (३।१८) दीर्घः ।

'दृशृं प्रेक्षणे' (४९५) दृश् । वर्त्त० तिव् । 'दृशो निअच्छ-पेच्छा-ऽवयच्छा०' (४।१८१) दृश्० → पेच्छ० इति । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) तिव्० → इ पेच्छइ ।

**[ वाऊ वाउणो पेच्छइ ]** वायु (२) । द्वि० शस् । 'क-ग-च-ज०' (१।१७७) यलुक् । '[1]जस्-शस्-ङसि०' (३।१२) दीर्घः । 'जस्-शसोर्लुक्' (३।४) शस्लुक् । पक्षे - 'जस्-शसोर्णो वा' (३।२२) शस्० → णो० **वाऊ वाऊणो । पेच्छइ** पूर्ववत् ।

**[ वच्छा ]** वृक्ष । प्रथमा जस् । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'छोऽक्ष्यादौ' (२।१७) क्ष० → छ० । 'अनादौ०' (२।८९) द्वित्वं-छ्छ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'जस्-शस्-ङसि०' (३।१२) च्छ० → च्छा० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **वच्छा** ॥२०॥

## वोतो डवो ॥ ८।३।२१ ॥

उदन्तात्परस्य जसः पुंसि डित् अवो इत्यादेशो वा भवति ॥

साहवो । पक्षे - साहओ । साहउ । साहू । साहुणो ॥ उत इति किम् ? वच्छा ॥ पुंसीत्येव - धेणू । महूइं ॥ जस इत्येव - साहू साहुणो पेच्छ ॥

**[ वोतो डवो ]** वा प्रथमा सि । उत् पञ्चमी ङसि । डवो प्रथमा सि ।

**[ साहवो साहओ साहउ साहू साहुणो ]** साधु । प्रथमा जस् । 'ख-घ-थ-ध-भाम्' (१।१८७) धस्य हः । अनेन वा जस्स्थाने डवो० → अवो० इति । 'डित्यन्त्य०' (२।१।११४) उलुक् **साहवो** । पक्षे - साधु (२) । 'पुंसि जसो डउ डओ वा' (३।२०) जस्स्थाने डउ-डओ इत्यादेशौ । 'डित्यन्त्य०' (२।१।११४) उलुक् । 'ख-घ-थ०' (१।१८७) धस्य हः **साहउ साहओ** । पक्षे - साधु (२) । प्रथमा जस् । 'ख-घ-थ०' (१।१८७) ध० → ह० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **साहू** । 'जस्-शसोर्णो वा' (३।२२) जस्स्थाने णो० **साहुणो** ।

**[ वच्छा ] वच्छा** पूर्ववत् । [३।२०] ।

**[ धेणू ]** धेनु । प्रथमा जस् । 'नो णः' (१।२२८) नु० → णु० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **धेणू** ।

**[ महूइं ]** मधु । प्रथमा जस् । 'ख-घ-थ०' (१।१८७) धु० → हु० । 'जस्-शस इँ-इं०' (३।२६) जस्० → इं० - पूर्वस्य च दीर्घः **महूइं** ।

**[ साहू साहुणो पेच्छ ]** साधु (२) । द्वितीया शस् । 'ख-घ-थ-ध-भाम्' (१।१८७) धस्य हः । 'जस्-शसोर्लुक्' (३।४) शस्लुक् । [2]"जस्-शस्०' (३।१२) दीर्घः- **साहू** । द्वितीये 'जस्-शसोर्णो वा' (३।२२) शस्० → णो० **साहुणो** । **पेच्छ** पूर्ववत् [३।१६] ॥२१॥

## जस्-शसोर्णो वा ॥ ८।३।२२ ॥

इदुतः परयोर्जस्-शसोः पुंसि णो इत्यादेशो वा भवति ॥

गिरिणो तरुणो रेहन्ति पेच्छ वा । पक्षे - गिरी । तरू ॥ पुंसीत्येव - दहीइं । महूइं ॥ जस्-शसोरिति किम् ? गिरिं । तरुं ॥ इदुत इत्येव - वच्छा । वच्छे ॥ जस्-शसोरिति द्वित्वमिदुत इत्यनेन यथासंख्याऽभावार्थम् ॥ एवमुत्तरसूत्रेऽपि ॥

१-२. G. 'लुप्ते शसि' (३।१८) दीर्घः ।

**[ जस्-शसोर्णो वा ]** जस्-शस् षष्ठी ओस् । णो प्रथमा सि । वा प्रथमा सि ।

**[ गिरिणो रेहन्ति पेच्छ वा ]** गिरि । प्रथमा जस् - द्वितीया शस् । अनेन जस्-शस्स्थाने णो० **गिरिणो** ।

'राजृग् दीप्तौ' (८९३) राज् । 'राजेरग्घ-छज्ज-सह-रीर-रेहाः' (४।१००) राज्० → रेह० इति । वर्त्त० अन्ति । 'बहुष्वाद्यस्य न्ति-न्ते-इरे' (३।१४२) अन्ति० → न्ति० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लुक्' (१।१०) अलोपः **रेहन्ति**। **पेच्छ** पूर्ववत् [३।१६] ।

**[ तरुणो रेहन्ति पेच्छ वा ]** तरु । प्रथमा जस् - द्वितीया शस् । अनेन जस्-शस्स्थाने णो० **तरुणो** । **रेहन्ति** पूर्ववत्। **पेच्छ** पूर्ववत् [३।१६] ।

**[ गिरी ]** गिरि । प्रथमा जस् - द्वितीया शस् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः । 'जस्-शसोर्लुक्' (३।४) जस्-शस्लुक् **गिरी** ।

**[ तरू ]** तरु । प्रथमा जस् - द्वितीया शस् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः । 'जस्-शसोर्लुक्' (३।४) जस्-शस्लुक् **तरू** ।

**[ दहीइं ]** दधि । प्रथमा जस् - द्वितीया शस् । 'ख-घ-थ-ध-भाम्' (१।१८७) धि० → हि० । 'जस्-शस इं-इ०' (३।२६) जस्-शस्० → इं -पूर्वस्य च दीर्घः **दहीइं** ।

**[ महूइं ]** मधु । प्रथमा जस् - द्वितीया शस् । 'ख-घ-थ०' (१।१८७) धु० → हु० । 'जस्-शस इँ-इं०' (३।२६) जस्-शस्० → इं - पूर्वस्य च दीर्घः **महूइं** ।

**[ गिरिं ]** गिरि । द्वितीया अम् । 'अमोऽस्य' (३।५) अलुक् - अम्० → म्० । 'मोऽनुस्वारः (१।२३) अनुस्वारः **गिरिं** ।

**[ तरुं ]** तरु । द्वितीया अम् । 'अमोऽस्य' (३।५) अलुक् - अम्० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **तरुं**।

**[ वच्छा ]** वच्छ । प्रथमा जस् । 'जस्-शस्-ङसि-त्तो-दो०' (३।१२) दीर्घः - च्छ० → च्छा० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **वच्छा** ।

**[ वच्छे ]** वच्छ । द्वितीया शस् । 'टाण-शस्येत्' (३।१४) एत्त्वं - च्छ० → च्छे० । 'जस्-शसोर्लुक्' (३।४) शस्लुक् **वच्छे** ।

जस्-शसोरित्यत्र द्वित्वकथनं 'इदुतो०' (३।१६) इत्यनेन सूत्रेण यथासंख्यनिवृत्त्यर्थः । इकारात्परो जस् - उकारात्परः शस् इति यथासंख्याऽभावार्थम् ॥२२॥

### ङसि-ङसोः पुं-क्लीबे वा ॥ ८।३।२३ ॥

पुंसि क्लीबे च वर्तमानादिदुतः परयोः ङसि-ङसोर्णो वा भवति ॥

गिरिणो तरुणो दहिणो महुणो आगओ विआरो वा॥ पक्षे-ङसेः-गिरीओ । गिरीउ । गिरीहिन्तो । तरूओ । तरूउ । तरूहिन्तो ॥ हिलुकौ निषेत्स्येते ॥ ङसः- गिरिस्स । तरुस्स ॥ ङसि-ङसोरिति किम् ? गिरिणा । तरुणा कयं ॥ पुं-क्लीब इति किम् ? बुद्धीअ । धेणूअ लद्धं समिद्धी वा ॥ इदुत इत्येव - [1]कमलाउ । कमलस्स ॥

**[ ङसि-ङसोः ]** ङसि-ङस् षष्ठी ओस् ।

१. मुद्रितेषु कमलाओ ।

**[ पुं-क्लीबे ]** पुं-क्लीब सप्तमी ङि ।

**[ वा ]** वा प्रथमा सि ।

**[ गिरिणो आगओ विआरो वा ]** गिरि । पञ्चमी ङसि - षष्ठी ङस् । अनेन ङसि-ङस्स्थाने णो० **गिरिणो** । **आगओ** पूर्ववत् [३।१६] ।

विकार । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **विआरो** ।

**[ तरुणो आगओ विआरो वा ]** तरु । पञ्चमी ङसि - षष्ठी ङस् । अनेन ङसि-ङस्स्थाने णो० **तरुणो** । **आगओ** पूर्ववत् [३।१६] । **विआरो** पूर्ववत् ।

**[ दहिणो आगओ विआरो वा ]** दधि । पञ्चमी ङसि - षष्ठी ङस् । 'ख-घ-थ-ध-भाम्' (१।१८७) धि० → हि० । अनेन ङसि - ङस्स्थाने णो० **दहिणो** । **आगओ** पूर्ववत् [३।१६] । **विआरो** पूर्ववत् ।

**[ महुणो आगओ विआरो वा ]** मधु । पञ्चमी ङसि-षष्ठी ङस् । 'ख-घ-थ०' (१।१८७) धु० → हु० । अनेन ङसि-ङस्स्थाने णो० **महुणो** । **आगओ** पूर्ववत् [३।१६] । **विआरो** पूर्ववत् । पक्षे-ङसि । यथा -

**[ गिरीओ गिरीउ गिरीहिन्तो ]** गिरि (३) । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु-हि-हिन्तो-लुकः' (३।८) ङसि० → दो-दु-हिन्तो । 'जस्-शस्-ङसि-त्तो-दो०' (३।१२) दीर्घः - रि० → री० । 'क-ग-च-ज०' (१।१७७) द्लुक् **गिरीओ गिरीउ गिरीहिन्तो** ।

**[ तरूओ तरूउ तरूहिन्तो ]** तरु (३) । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु-हि-हिन्तो-लुकः' (३।८) ङसि० → दो-दु-हिन्तो । 'जस्-शस्-ङसि-त्तो-दो०' (३।१२) दीर्घः - उ० → ऊ० । 'क-ग-च-ज०' (१।१७७) द्लुक् **तरूओ तरूउ तरूहिन्तो** ।

अत्र ङसिस्थाने हि-लोपावादेशौ निषेत्स्येते । ङसः —

**[ गिरिस्स ]** गिरि । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **गिरिस्स** ।

**[ तरुस्स ]** तरु । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **तरुस्स** ।

**[ गिरिणा कयं ]** गिरि । तृतीया टा । 'टो णा' (३।२४) टा० → णा० **गिरिणा** । कयं पूर्ववत् [२।११४] ।

**[ तरुणा कयं ]** तरु । तृतीया टा । 'टो णा' (३।२४) टा० → णा० **तरुणा** । कयं पूर्ववत् [२।११४] ।

**[ बुद्धीअ लद्धं समिद्धी वा ]** बुद्धि । पञ्चमी ङसि - षष्ठी ङस् । 'टा - ङस्-ङेरदादिदेद्वा तु ङसेः' (३।२९) ङसि० - ङस्० → अ - दीर्घश्च **बुद्धीअ** ।

लब्ध । 'सर्वत्र ल-व०' (२।७९) ब्लुक् । 'अनादौ०' (२।८९) द्वित्वं - ध्ध० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वधस्य दः । प्रथमा सि । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **लद्धं** ।

समृद्धि । प्रथमा सि । 'इत्कृपादौ' (१।१२८) मृ० → मि० । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) स्लुक् **समिद्धी** ।

**[ धेणूअ लद्धं समिद्धी वा ]** धेनु । पञ्चमी ङसि - षष्ठी ङस् । 'टा-ङस्-ङे०' (३।२९) ङसि० - ङस्० → अ-दीर्घश्च । 'नो णः' (१।२२८) नू० → णू० **धेणूअ** । **लद्धं** पूर्ववत् । **समिद्धी** पूर्ववत् ।

**[ कमलाउ ]** कमल । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु०' (३।८) ङसि० → दु० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः । 'क-ग-च-ज०' (१।१७७) द्लुक् **कमलाउ** ।

**[ कमलस्स ]** कमल । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **कमलस्स** ॥२३॥

## टो णा ॥ ८।३।२४ ॥

पुं-क्लीबे वर्तमानादिदुतः परस्य टा इत्यस्य णा भवति ॥

गिरिणा । गामणिणा । खलपुणा । तरुणा । दहिणा । महुणा ॥ ट इति किम् ? गिरी । तरू । दहिं । महुं ॥ पुं-क्लीब इत्येव - बुद्धीअ धेणूअ कयं ॥ इदुत इत्येव - कमलेण ॥

**[ टो णा ]** टा षष्ठी ङस् । णा प्रथमा सि ।

**[ गिरिणा ]** गिरि । तृतीया टा । अनेन टा० → णा० **गिरिणा** ।

**[ गामणिणा ]** ग्रामं नयतीति क्विप् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'क्विपः' (३।४३) सर्वापहारी लोपः - ह्रस्वः - णी० → णि० । तृतीया टा । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'नो णः' (१।२२८) नि० → णि० । अनेन टा० → णा० **गामणिणा** ।

**[ खलपुणा ]** खलं पुनातीति क्विप् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'क्विपः' (३।४३) सर्वापहारी लोपः - ह्रस्वः - पू० → पु० । तृतीया टा । अनेन टा० → णा० **खलपुणा** ।

**[ तरुणा ]** तरु । तृतीया टा । अनेन टा० → णा० **तरुणा** ।

**[ दहिणा ]** दधि । तृतीया टा । 'ख-घ-थ-ध-भाम्' (१।१८७) धि० → हि० । अनेन टा० → णा० **दहिणा** ।

**[ महुणा ]** मधु । तृतीया टा । 'ख-घ०' (१।१८७) धु० → हु० । अनेन टा० → णा० **महुणा** ।

**[ गिरी ]** गिरि । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - रि० → री० । 'अन्त्य०' (१।११) स्लुक् **गिरी** ।

**[ तरू ]** तरु । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - रु० → रू० । 'अन्त्यव्य०' (१।११) स्लुक् **तरू** ।

**[ दहिं ]** दधि । प्रथमा सि । 'ख-घ-थ-ध०' (१।१८७) धि० → हि० । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दहिं** ।

**[ महुं ]** मधु । प्रथमा सि । 'ख-घ-थ-ध०' (१।१८७) धु० → हु० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **महुं** ।

**[ बुद्धीअ कयं ]** बुद्धि । तृतीया टा । 'टा-ङस्-ङेरदादिदेद्वा तु ङसेः' (३।२९) टा० → अ० - पूर्वस्य च दीर्घः **बुद्धीअ** । **कयं** पूर्ववत् [२।११४] ।

**[ धेणूअ कयं ]** धेनु । तृतीया टा । 'टा-ङस्-ङेर०' (३।२९) टा० → अ० -पूर्वस्य च दीर्घः । 'नो णः' (१।२२८) नू० → णू० **धेणूअ** । **कयं** पूर्ववत् [२।११४] ।

**[ कमलेण ]** कमल । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्वं - ल० → ले० **कमलेण** ॥२४॥

## क्लीबे स्वरान्म् सेः ॥ ८।३।२५ ॥

क्लीबे वर्तमानात्स्वरान्तान्नाम्नः सेः स्थाने म् भवति ॥

वणं । पिम्मं । दहिं । मुहं ॥ दहि । महु इति तु सिद्धापेक्षया ॥ केचिदनुनासिकमपीच्छन्ति - दहिँ । मुहँ ॥ क्लीब इति किम् ? बालो । बाला ॥ स्वरादिति इदुतो निवृत्त्यर्थम् ॥

[ **क्लीबे स्वरान्म् सेः** ] क्लीब सप्तमी ङि । स्वर पञ्चमी ङसि । म् प्रथमा सि । सि षष्ठी ङस् ।

[ **वणं** ] वन । प्रथमा सि । 'नो णः' (१।२२८) न० → ण० । अनेन सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वणं** ।

[1][ **पिम्मं** ] प्रेमन् । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'अन्त्यव्य०' (१।११) न्लुक् । 'तैलादौ' (२।९८) द्वित्वं - म० → म्म० । 'ह्रस्वः संयोगे' (१।८४) पे० → पि० । अनेन सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पिम्मं** ।

[ **दहिं** ] दधि । प्रथमा सि । 'ख-घ-थ-ध०' (१।१८७) धि० → हि० । अनेन सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दहिं** ।

[ **मुहं** ] मुख । प्रथमा सि । 'ख-घ-थ-ध०' (१।१८७) ख० → ह० । अनेन सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मुहं** ।

अनुनासिकः **दहिँ** । **मुहँ** ।

[ **बालो** ] बाल । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **बालो** ।

[ **बाला** ] बाला । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **बाला** ॥२५॥

## जस्-शस इँ-इं-णयः सप्राग्दीर्घाः ॥ ८।३।२६ ॥

क्लीबे वर्तमानान्नाम्नः परयोर्जस् - शसोः स्थाने सानुनासिक-सानुस्वाराविकारौ णिश्चादेशा भवन्ति - सप्राग्दीर्घाः । एषु सत्सु पूर्वस्वरस्य दीर्घत्वं विधीयते इत्यर्थः ॥

इँ - [2]जाइँ वयणाइँ अम्हे ॥ इं - उम्मीलन्ति पङ्कयाइं चिट्ठन्ति पेच्छ वा । दहीइं जेम वा हुन्ति । महूइं मुञ्च वा ॥ णि - फुल्लन्ति पङ्कयाणि गेण्ह वा । हुन्ति दहीणि जेम वा । एवं महूणि ॥ क्लीब इत्येव - वच्छा वच्छे ॥ जस्-शस इति किम् ? सुहं ॥

[ **जस्शसः** ] जस्-शस् षष्ठी ङस् ।

[ **इँ-इं-णयः** ] इँ-इं-णयः(णि) प्रथमा जस् ।

[ **सप्राग्दीर्घाः** ] सप्राग्दीर्घ प्रथमा जस् ।

---

१. पा० म० - प्रेमन् पुं० - नपुं० - पेम पेम्म । पुं० - पिम्म ।

२. **जाइँ वयणाइँ अम्हे** वि ताइँ जंपइ जनो वि । ताइं चिअ तेण पयंपियाइँ हिअयं सुहावेंति ॥

[शृ० प्र० - २२।१५० । गा० को० - ७।९७]

यानि वचनानि वयमपि जल्पामस्तानि जल्पति जनोऽपि । तान्येव तेन प्रजल्पितानि हृदयं सुखयन्ति[1] ॥

१. पाठां- - शृ० प्र० - सुखापयन्ति ।

**[ जाइँ वयणाइँ अम्हे ]** यद् । प्रथमा जस् - द्वितीया शस् वा । 'आदेर्यो जः' (१।२४५) य० → ज० । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन जस्-शस्० → इँ० - पूर्वस्य च दीर्घः - ज० → जा० **जाइँ** ।

वचन । प्रथमा जस् - द्वितीया शस् वा । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'नो णः' (१।२२८) न० → ण० । अनेन जस्-शस्० → इँ० - पूर्वस्य च दीर्घः - ण० → णा० **वयणाइँ** ।

अस्मद् । षष्ठी आम् । 'णे-णो-मज्झ-अम्ह-अम्हं-अम्हे-अम्हो-अम्हाण-ममाण-महाण-मज्झाण आमा' (३।११४) आमा सह अस्मद्० → **अम्हे०** ।

**[ उम्मीलन्ति पङ्कयाइं चिट्ठन्ति पेच्छ वा ]** [1]उन्मील् । वर्त्त० अन्ति । 'बहुष्वाद्यस्य न्ति०' (३।१४२) अन्ति० → न्ति० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) उम्मीलन्ति । [2]'अन्त्यव्य०' (१।११) न्लुक् । 'अनादौ०' (२।८९) द्वित्वं - म्मी० **उम्मीलन्ति** ।

पङ्कज । प्रथमा जस् - द्वितीया शस् वा । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । अनेन जस्-शस्० → इं० - पूर्वस्य च दीर्घः - य० → या० **पङ्कयाइं** । **चिट्ठन्ति** पूर्ववत् [३।२०] । **पेच्छ** पूर्ववत् [३।१६] ।

**[ दहीइं जेम वा हुन्ति ]** दधि । प्रथमा जस् - द्वितीया शस् वा । 'ख-घ-थ०' (१।१८७) धि० → हि० । अनेन जस्०-शस्० → इं० - पूर्वस्य च दीर्घः - हि० → ही० **दहीइं** ।

'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । 'भुजो भुञ्ज-जिम-जेम-कम्माण्ह०' (४।११०) भुज्० → जेम इति । पञ्चमी स्व । 'दु-सु-मु०' (३।१७३) स्व० → सु० । 'अत इज्जस्विज्जहीज्जेलुको वा' (३।१७५) सुलुक् **जेम** ।

'भू सत्तायाम्' (१) भू । वर्त्त० अन्ति । 'अविति हुः' (४।६१) भू० → हु० । 'बहुष्वाद्यस्य न्ति०' (३।१४२) अन्ति० → न्ति० **हुन्ति** ।

**[ महूइं मुञ्च वा ]** मधु । प्रथमा जस्-द्वितीया शस् वा । 'ख-घ-थ-ध-भाम्' (१।१८७) धु० → हु० । अनेन जस्० -शस्० → इं० - पूर्वस्य च दीर्घः **महूइं** ।

'मुच्लृंती मोक्षणे' (१३२०) मुच् । पञ्चमी हि । 'दु-सु-मु०' (३।१७३) हि० → सु० । 'वक्रादावन्तः' (१।२६) अनुस्वारः । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) मुंचसु । 'अत इज्जस्विज्ज०' (३।१७५) सुलुक् **मुंच** ।

**[ फुल्लन्ति पङ्कयाणि गेण्ह वा ]** 'फुल्ल विकसने' (४२९) फुल्ल् । वर्त्त० अन्ति । 'बहुष्वाद्यस्य०' (३।१४२) अन्ति० → न्ति० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) **फुल्लन्ति** ।

पङ्कज । प्रथमा जस् - द्वितीया शस् वा । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । अनेन जस्०-शस्० → णि० - पूर्वस्य च दीर्घः **पङ्कयाणि** ।

'ग्रहीश् उपादाने' (१५१७) ग्रह् । पञ्चमी हि । 'ग्रहो वल-गेण्ह०' (४।२०९) ग्रह० → गेण्ह० इति । 'दु-सु-मु०' (३।१७३) हि० → सु० । 'अत इज्जस्विज्ज०' (३।१७५) सुलुक् **गेण्ह** इति ।

**[ हुन्ति दहीणि जेम वा ]** **हुन्ति** पूर्ववत् । दधि । प्रथमा जस् - द्वितीया शस् वा । 'ख-घ-थ-ध०' (१।१८७) धि० → हि० । अनेन जस्०-शस्० → णि० - पूर्वस्य च दीर्घः **दहीणि** । **जेम** पूर्ववत् ।

---

१. पा० म० - उद्-मील्० उम्मिल्ल० । २. J. 'अधो म-न-याम्' (२।७८) न्लुक् ।

**[ महूणि ]** मधु । प्रथमा जस् - द्वितीया शस् वा । 'ख-घ-थ०' (१।१८७) धु० → हु० । अनेन जस्० - शस्० → णि० - पूर्वस्य च दीर्घः **महूणि** ।

**[ वच्छा ]** पूर्ववत् । [३।२०] ।

**[ वच्छे ]** पूर्ववत् । [३।२२] ।

**[ सुहं ]** सुख । प्रथमा सि । 'ख-घ-थ०' (१।१८७) ख० → ह० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सुहं** ॥२६॥

## स्त्रियामुदोतौ वा ॥ ८।३।२७ ॥

स्त्रियां वर्तमानान्नाम्नः परयोर्जस्-शसोः स्थाने प्रत्येकं उत्-ओत् इत्येतौ सप्राग्दीर्घौ वा भवतः ॥

वचनभेदो यथासंख्यनिवृत्त्यर्थः ॥

मालाउ मालाओ । बुद्धीउ बुद्धीओ । सहीउ सहीओ । धेणूउ धेणूओ । वहूउ वहूओ ॥ पक्षे - माला । बुद्धी । सही । धेणू । वहू ॥ स्त्रियामिति किम् ? वच्छा ॥ जस्-शस इत्येव - मालाए कयं ॥

**[ स्त्रियामुदोतौ वा ]** स्त्री सप्तमी ङि । उत्-ओत् प्रथमा औ । वा प्रथमा सि ।

**[ मालाउ मालाओ ]** माला (२) । प्रथमा जस् - द्वितीया शस् वा । अनेन जस्०-शस्० → उत्० - ओत्० वा भवतः **मालाउ मालाओ** ।

**[ बुद्धीउ बुद्धीओ ]** बुद्धि (२) । प्रथमा जस् - द्वितीया शस् वा । अनेन जस्०-शस्० → उत्०-ओत्० वा भवतः - पूर्वस्य च दीर्घः **बुद्धीउ बुद्धीओ** ।

**[ सहीउ सहीओ ]** सखि (२) । प्रथमा जस् - द्वितीया शस् वा । अनेन जस्०-शस्० → उत्०-ओत्० वा भवतः - पूर्वस्य च दीर्घः । 'ख-घ-थ-ध-भाम्' (१।१८७) खी० → ही० **सहीउ सहीओ** ।

**[ धेणूउ धेणूओ ]** धेनु (२) । प्रथमा जस् - द्वितीया शस् वा । अनेन जस्०-शस्० → उत्०-ओत्० वा भवतः - पूर्वस्य च दीर्घः । 'नो णः' (१।२२८) नू० → णू० **धेणूउ धेणूओ** ।

**[ वहूउ वहूओ ]** वधू (२) । प्रथमा जस् - द्वितीया शस् वा । अनेन जस्०-शस्० → उत्०-ओत्० वा भवतः । 'ख-घ-थ०' (१।१८७) धू० → हू० **वहूउ वहूओ** ।

**[ माला बुद्धी सही धेणू वहू ]** पक्षे-मालादिप्रकृतिः प्राग्वत् । अग्रे प्रथमा जस् - द्वितीया शस् वा । 'जस्-शस्-ङसि०' (३।१२) दीर्घः । 'जस्-शसोर्लुक्' (३।४) जस्-शस्लुक् । यथाप्राप्तौ 'ख-घ-थ-ध-भाम्' (१।१८७) ख०-ध० → ह० । 'नो णः' (१।२२८) नू० → णू० **माला बुद्धी सही धेणू वहू** ।

**[ वच्छा ]** पूर्ववत् । [३।२०] ।

**[ मालाए कयं ]** माला । तृतीया टा । 'टा-ङस्-ङे०' (३।२९) टा० → ए० । **कयं** पूर्ववत् [२।११४] ॥२७॥

## ईतः सेश्चा वा ॥ ८।३।२८ ॥

स्त्रियां वर्तमानान्नाम्न ईकारान्तात् सेर्जस्-शसोश्च स्थाने आकारो वा भवति ॥

एसा हसन्तीआ । गोरीआ चिट्ठन्ति पेच्छ वा ॥ पक्षे - हसन्ती । गोरीओ ॥

**[ ईतः सेश्चा वा ]** ईत् पञ्चमी ङसि । सि षष्ठी ङस् । च प्रथमा सि । आ प्रथमा सि । वा प्रथमा सि ।

**[ एसा हसन्तीआ ]** एतद् । प्रथमा सि । 'अन्त्य०' (१।११) दूलुक् । 'तदश्च तः सोऽक्लीबे' (३।८६) त० → स० । 'आत्' (२।४।१८) आप्प्र० → आ । 'समानानां०' (१।२।१) दीर्घः सा । 'अन्त्यव्य०' (१।११) स्लुक् **एसा** ।

हसन्ती । प्रथमा सि । अनेन सिस्थाने वा आकारः **हसन्तीआ** ।

**[ गोरीआ चिट्ठन्ति पेच्छ वा ]** गौरी । प्रथमा जस् - द्वितीया शस् वा । 'औत ओत्' (१।१५९) गौ० → गो० । अनेन वा जस्-शस्स्थाने आकारः **गोरीआ** ।

स्था । वर्त्तमाना अन्ति । 'स्थष्ठा-थक्क०' (४।१६) स्था० → चिट्ठ० आदेशः । 'बहुष्वाद्यस्य०' (३।१४२) अन्ति० → न्ति० । 'व्यञ्जनाद०' (४।२३९) अत् । 'लुक्' (१।१०) अलुक् **चिट्ठन्ति** ।

'दृशं प्रेक्षणे (४९५) दृश् । पञ्चमी हि । 'दृशो निअच्छ-पेच्छा-ऽवयच्छा०' (४।१८१) दृश्० → पेच्छ० । 'दु-सु-मु विध्यादि०' (३।१७३) हि० → सु० । 'अत इज्जस्विज्ज०' (३।१७५) सुलुक् **पेच्छ** । पक्षे -

**[ हसन्ती ]** हसन्ती । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **हसन्ती** ।

**[ गोरीओ ]** गौरी । प्रथमा जस् - द्वितीया शस् । 'औत ओत्' (१।१५९) गौ० → गो० । 'स्त्रियामुदोतौ वा' (३।२७) जस्०-शस्० → ओ० **गोरीओ** ॥२८॥

## टा-ङस्-ङेरदादिदेद्वा तु ङसेः ॥ ८।३।२९ ॥

स्त्रियां वर्त्तमानान्नाम्नः परेषां टा-ङस्-ङीनां स्थाने प्रत्येकं अत्-आत्-इत्-एत् इत्येते चत्वार आदेशाः सप्राग्दीर्घा भवन्ति । ङसेः पुनरेते सप्राग्दीर्घा वा भवन्ति ॥

मुद्धाअ मुद्धाइ मुद्धाए कयं मुहं ठिअं वा ॥ कप्रत्यये तु मुद्धिआअ मुद्धिआइ मुद्धिआए ॥ कमलिआअ कमलिआइ कमलिआए ॥ बुद्धीअ बुद्धीआ बुद्धीइ बुद्धीए कयं विहओ ठिअं वा ॥ सहीअ सहीआ सहीइ सहीए कयं वयणं ठिअं वा॥ धेणूअ धेणूआ धेणूइ धेणूए कयं दुद्धं ठिअं वा ॥ वहूअ वहूआ वहूइ वहूए कयं भवणं ठिअं वा ॥

ङसेस्तु वा - मुद्धाअ मुद्धाइ मुद्धाए ॥ बुद्धीअ बुद्धीआ बुद्धीइ बुद्धीए ॥ सहीअ सहीआ सहीइ सहीए । धेणूअ धेणूआ धेणूइ धेणूए ॥ वहूअ वहूआ वहूइ वहूए आगओ ॥

पक्षे - मुद्धाओ मुद्धाउ मुद्धाहिन्तो ॥ रईओ रईउ रईहिन्तो ॥ धेणूओ धेणूउ धेणूहिन्तो इत्यादि ॥

'शेषेऽदन्तवत्' (३।१२४) अतिदेशात् 'जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः' (३।१२) इति दीर्घत्वं पक्षेऽपि भवति ॥

स्त्रियामित्येव - वच्छेण । वच्छस्स । वच्छे । वच्छम्मि । वच्छाओ ॥

टादीनामिति किम् ? मुद्धा । बुद्धी । सही । धेणू । वहू ॥

**[ टाङस्ङेः ]** टा-ङस्-ङि षष्ठी ङस् ।

**[ अदादिदेद्वा तु ङसेः ]** अत्-आत्-इत्-एत् प्रथमा सि । वा प्रथमा सि । तु प्रथमा सि । ङसि षष्ठी ङस् ।

**[ मुद्धाअ मुद्धाइ मुद्धाए कयं मुहं ठिअं वा ]** मुग्धा । तृतीया टा । षष्ठी ङस् । सप्तमी ङि । 'क-ग-ट-ड०' (२।७७) ग्लुक् । 'अनादौ०' (२।८९) द्वित्वं - ध्धा० । 'द्वितीय-तुर्ययोरुपरि पूर्वः' (२।९०) पूर्वधस्य दः । अनेन

टास्थाने अ० - ङस्स्थाने इ० - ङिस्थाने ए० - पूर्वस्य च दीर्घः **मुद्धाअ मुद्धाइ मुद्धाए** । आकारान्तशब्दस्य आत् आदेशो न भवति । 'नात आत्' (३।३०) इत्यनेन निषेधः कृतस्तदुदाहरणं नोक्तम्, मुग्धाशब्दस्य आकारान्तत्वात् । **कयं** पूर्ववत् [२।११४] ।

मुखं । 'ख-घ-थ०' (१।१८७) खं० → हं० **मुहं** ।

स्था । तिष्ठति स्म = स्थितम् । 'श्लिष-शीङ्-स्था-ऽऽस-वस०' (५।१।९) क्तप्र० → त० । 'स्थष्ठा-थक्क-चिट्ठ०' (४।१६) स्था० → ठा० । 'स्वरादनतो वा' (४।२४०) अत् । 'क्ते' (३।१५६) इ० । 'लुक्' (१।१०) आलुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **ठिअं** ।

**[ मुद्धिआअ मुद्धिआइ मुद्धिआए ]** मुग्धा । 'स्वार्थे कश्च वा' (२।१६४) कप्र० । 'इच्चापुंसो०' (२।४।१०७) ग्धा० → ग्धि० । 'आत्' (२।४।१८) आप्प्र० → आ । 'समानानां०' (१।२।१) दीर्घः । मुग्धिका इति जाते तृतीया टा-षष्ठी ङस्- सप्तमी ङि । अनेन टास्थाने अ० - ङस्स्थाने इ० - ङिस्थाने ए० आदेशाः । 'क-ग-ट-ड०' (२।७७) ग्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ध्धा० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वधस्य दः । 'क-ग-च-ज०' (१।१७७) क्लुक् **मुद्धिआअ मुद्धिआइ मुद्धिआए** ।

**[ कमलिआअ कमलिआइ कमलिआए ]** कमला । कप्रत्यये कमलिका पूर्ववत् । तृतीया टा-षष्ठी ङस्-सप्तमी ङि । अनेन विभक्तिस्थाने अत्-इत्-एत् **कमलिआअ कमलिआइ कमलिआए** ।

**[ बुद्धीअ बुद्धीआ बुद्धीइ बुद्धीए कयं विहओ ठिअं वा ]** बुद्धि (४) । तृतीया टा - षष्ठी ङस्-सप्तमी ङि । अनेन विभक्तिस्थाने अत्-आत्-इत्-एत्-पूर्वस्य च दीर्घः-द्धि० → द्धी० **बुद्धीअ बुद्धीआ बुद्धीइ बुद्धीए** । **कयं** पूर्ववत् [२।११४] । विभव । प्रथमा सि । 'ख-घ-थ-ध-भाम्' (१।१८७) भ० → ह० । 'क-ग-च-ज०' (१।१७७) व्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **विहओ** । **ठिअं** पूर्ववत् ।

**[ सहीअ सहीआ सहीइ सहीए कयं वयणं ठिअं वा ]** सखी । तृतीया टा-षष्ठी ङस्-सप्तमी ङि । 'ख-घ-थ०' (१।१८७) खस्य हः । अनेन विभक्तिस्थाने अदादयश्चत्वार आदेशाः **सहीअ सहीआ सहीइ सहीए** । **कयं** पूर्ववत् [२।११४]। वदनं वचनं वा । 'क-ग-च-ज०' (१।१७७) द-चयोर्लुक् । 'नो णः' (१।२२८) न० → ण० । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० **वयणं** । **ठिअं** पूर्ववत् ।

**[ धेणूअ धेणूआ धेणूइ धेणूए कयं दुद्धं ठिअं वा ]** धेनु (४) । तृतीया टा-षष्ठी ङस्-सप्तमी ङि । 'नो णः' (१।२२८) नु० → णु० । अनेन विभक्तिस्थाने अदादयश्चत्वार आदेशाः - पूर्वस्य च दीर्घः **धेणूअ धेणूआ धेणूइ धेणूए**। **कयं** पूर्ववत् [२।११४] । दुग्ध । प्रथमा सि । 'क-ग-ट-ड०' (२।७७) ग्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ध्ध० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वधस्य दः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **दुद्धं** । **ठिअं** पूर्ववत् ।

**[ वहूअ वहूआ वहूइ वहूए कयं भवणं ठिअं वा ]** वधू (४) । तृतीया टा - षष्ठी ङस् - सप्तमी ङि । 'ख-घ-थ-ध-भाम्' (१।१८७) धस्य हः । अनेन विभक्तिस्थाने अदादयश्चत्वार आदेशाः **वहूअ वहूआ वहूइ वहूए** । **कयं** पूर्ववत् [२।११४] । भवनं । 'नो णः' (१।२२८) नं० → णं० **भवणं** । **ठिअं** पूर्ववत् ।

ङसेः पुनरेते आदेशा वा भवन्ति –

**[ मुद्धाअ मुद्धाइ मुद्धाए ]** मुग्धा (३) । पञ्चमी ङसि । 'क-ग-ट-ड०' (२।७७) ग्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ध्धा० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वधस्य दः । अनेन विभक्तिस्थाने अत्-इत्-एत् **मुद्धाअ मुद्धाइ मुद्धाए** ।

**[ बुद्धीअ बुद्धीआ बुद्धीइ बुद्धीए ]** बुद्धि (४) । पञ्चमी ङसि । अनेन विभक्तिस्थाने अदादयश्चत्वार आदेशाः - पूर्वस्य च दीर्घः **बुद्धीअ बुद्धीआ बुद्धीइ बुद्धीए** ।

**[ सहीअ सहीआ सहीइ सहीए ]** सखी (४) । पञ्चमी ङसि । 'ख-घ-थ०' (१।१८७) खी० → ही० । अनेन वा विभक्तिस्थाने अदादयश्चत्वार आदेशाः **सहीअ सहीआ सहीइ सहीए** ।

**[ धेणूअ धेणूआ धेणूइ धेणूए ]** धेनु (४) । पञ्चमी ङसि । 'नो णः' (१।२२८) नु० → णु० । अनेन वा विभक्तिस्थाने अदादयश्चत्वार आदेशाः - पूर्वस्य च दीर्घः **धेणूअ धेणूआ धेणूइ धेणूए** ।

**[ वहूअ वहूआ वहूइ वहूए आगओ ]** वधू (४) । पञ्चमी ङसि । 'ख-घ-थ-ध-भाम्' (१।१८७) धू० → हू० । अनेन वा विभक्तिस्थाने अदादयश्चत्वार आदेशाः **वहूअ वहूआ वहूइ वहूए** । **आगओ** पूर्ववत् [३।१६] । पक्षे -

**[ मुद्धाओ मुद्धाउ मुद्धाहिन्तो ]** मुग्धा (३) । पञ्चमी ङसि । 'क-ग०' (२।७७) ग्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ध्धा० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वधस्य दः । 'ङसेस्त्तो-दो-दु-हि-हिन्तो लुकः' (३।८) ङसि० → दो-दु-हिन्तो । 'क-ग-च-ज०' (१।१७७) द्लुक् **मुद्धाओ मुद्धाउ मुद्धाहिन्तो** ।

**[ रईओ रईउ रईहिन्तो ]** रति (३) । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु-हि०' (३।८) ङसि० → दो-दु-हिन्तो । 'शेषेऽदन्तवत्' (३।१२४) इति न्यायात् 'जस्-शस्-ङसि०' (३।१२) इति विकल्पपक्षेऽपि दीर्घः - ति० → ती० । 'क-ग-च-ज०' (१।१७७) त्-द्लुक् **रईओ रईउ रईहिन्तो** ।

**[ धेणूओ धेणूउ धेणूहिन्तो ]** धेनु (३) । पञ्चमी ङसि । 'ङसेस्त्तो-दो०' (३।८) ङसि० → दो-दु-हिन्तो । 'शेषेऽदन्तवत्' (३।१२४) इति न्यायात् 'जस्-शस्-ङसि-त्तो०' (३।१२) इति विकल्पपक्षेऽपि दीर्घः - नु० → नू० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'नो णः' (१।२२८) नू० → णू० **धेणूओ धेणूउ धेणूहिन्तो** ।

**[ वच्छेण ]** वृक्ष । तृतीया टा । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'छोऽक्ष्यादौ' (२।१७) क्षस्य छः । 'अनादौ०' (२।८९) द्वित्वं-छ्छ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्वं - च्छ० → च्छे० **वच्छेण** ।

**[ वच्छस्स ]** वच्छ । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **वच्छस्स** ।

**[ वच्छे ]** वच्छ । सप्तमी ङि । 'डे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **वच्छे** ।

**[ वच्छम्मि ]** वच्छ । सप्तमी ङि । 'डे-म्मि ङेः' (३।११) ङि० → म्मि० **वच्छम्मि** ।

**[ वच्छाओ ]** वच्छ । पञ्चमी ङसि । ङसेस्त्तो-दो०' (३।८) ङसि० → दो० । 'जस्-शस्-ङसि०' (३।१२) च्छ० → च्छा० । 'क-ग-च-ज०' (१।१७७) द्लुक् **वच्छाओ** ।

**[ मुद्धा ]** मुग्धा । प्रथमा सि । 'क-ग-ट-ड०' (२।७७) ग्लुक् । 'अनादौ०' (२।८९) द्वित्वं - ध्धा० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वधस्य दः । 'अन्त्य०' (१।११) स्लुक् **मुद्धा** ।

**[ बुद्धी ]** बुद्धि । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - द्धि० → द्धी० । 'अन्त्यव्य०' (१।११) स्लुक् **बुद्धी** ।

**[ सही ]** सखी । प्रथमा सि । 'ख-घ-थ०' (१।१८७) खी० → ही० । 'अन्त्यव्य०' (१।११) स्लुक् **सही** ।

**[ धेणू ]** धेनु । प्रथमा सि । 'नो णः' (१।२२८) नु० → णु० । 'अक्लीबे सौ' (३।१९) दीर्घः - णु० → णू० । 'अन्त्यव्य०' (१।११) स्लुक् **धेणू** ।

**[ वहू ]** वधू । प्रथमा सि । 'ख-घ-थ-ध-भाम्' (१।१८७) धस्य हः । 'अन्त्यव्य०' (१।११) स्लुक् **वहू** ॥२९॥

## नात आत् ॥ ८।३।३० ॥

स्त्रियां वर्तमानादादन्तान्नाम्नः परेषां टा-ङस्-ङि-ङसीनामादादेशो न भवति ॥

मालाअ (२) । मालाइ मालाए कयं सुहं ठिअं आगओ वा ॥

**[ नात आत् ]** न प्रथमा सि । आत् पञ्चमी ङसि । आत् प्रथमा सि ।

**[ मालाअ ( २ ) मालाइ मालाए कयं सुहं ठिअं आगओ वा ]** माला (४) । तृतीया टा-पञ्चमी ङसि-षष्ठी ङस्-सप्तमी ङि । अनेन टास्थाने-ङसिस्थाने अत्- ङस्स्थाने इत् - ङिस्थाने एत् । **मालाअ ( २ ) मालाइ मालाए** ।

**कयं** पूर्ववत् [२।११४] ।

मु(सु)ख । 'ख-घ-थ-ध-भाम्' (१।१८७) खस्य ह० **सुहं** । स्था । तिष्ठति स्म = स्थितम् । 'श्लिष-शीङ्-स्था०' (५।१।९) क्तप्र० → त० । 'स्थष्ठा-थक्क-चिट्ठ०' (४।१६) स्था० → ठा० । 'स्वरादनतो वा' (४।२४०) अत् । 'क्ते' (३।१५६) इ० । 'लुक्' (१।१०) आलुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **ठिअं** । **आगओ** पूर्ववत् [३।१६] ॥३०॥

## प्रत्यये ङीर्नवा ॥ ८।३।३१ ॥

अणादिसूत्रेण (२।४।२०) प्रत्ययनिमित्तो यो ङीरुक्तः स स्त्रियां वर्तमानान्नाम्नो वा भवति ॥

साहणी । कुरुचरी । पक्षे-'आत्' (२।४।१८) इत्याप् साहणा । कुरुचरा ॥

**[ प्रत्यये ङीर्नवा ]** प्रत्यय सप्तमी ङि । ङी प्रथमा सि । नवा प्रथमा सि ।

**[ साहणी ]** साध्यतेऽनया । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । अनेन वा ङीप्र० । 'ख-घ-थ-ध-भाम्' (१।१८७) ध० → ह० । 'नो णः' (१।२२८) नी० → णी० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) णी० **साहणी** ।

**[ कुरुचरी ]** कुरुषु चरति । 'चरेष्टः' (५।१।१३८) टप्र० → अ । अनेन वा ङीप्र० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) री० **कुरुचरी** । पक्षे-

**[ साहणा ]** साधन । 'ख-घ-थ०' (१।१८७) ध० → ह० । 'नो णः' (१।२२८) न० → ण० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अन्त्य०' (१।११) स्लुक् **साहणा** ।

**[ कुरुचरा ]** कुरुचर । 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **कुरुचरा** ॥३१॥

## अजातेः पुंसः ॥ ८।३।३२ ॥

अजातिवाचिनः पुल्लिङ्गात् स्त्रियां वर्तमानात् ङीर्वा भवति ॥

नीली नीला । काली काला । हसमाणी हसमाणा । सुप्पणही सुप्पणहा । इमीए इमाए । इमीणं इमाणं । एईए एआए । एईणं एआणं ॥

अजातेरिति किम् ? करिणी । अया । एलया ॥ अप्राप्ते विभाषेयम् । तेन-गोरी । कुमारी इत्यादौ संस्कृतवन्नित्यमेव ङीः ।

**[ अजातेः पुंसः ]** अजाति पञ्चमी ङसि । पुम्स् पञ्चमी ङसि ।

**[ नीली नीला ]** नील (२) । अनेन वा ङीप्र० । पक्षे- 'आत्' (२।४।१८) आप्प्र० → आ । 'लुक्' (१।१०) अलोपः । 'लोकात्' (१।१।३) ली० - ला० । प्रथमा सि । 'अन्त्यव्यञ्जन०' (१।११) स्लुक् **नीली नीला** ।

**[ काली काला ]** काल (२) । अनेन वा ङीप्र० । पक्षे - 'आत्' (२।४।१८) आप्प्र० → आ । 'लुक्' (१।१०) अलोपः । 'लोकात्' (१।१।३) ली० - ला० । प्रथमा सि । 'अन्त्यव्यञ्जन०' (१।११) स्लुक् **काली काला** ।

**[ हसमाणी हसमाणा ]** हसमान (२) । अनेन वा ङीप्र० । पक्षे - 'आत्' (२।४।१८) आप्प्र० → आ । 'लुक्' (१।१०) अलोपः । 'लोकात्' (१।१।३) नी-ना । 'नो णः' (१।२२८) नी० → णी० - ना० → णा० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **हसमाणी हसमाणा** ।

**[ सुप्पणही सुप्पणहा ]** सूर्पणखा (२) । 'ह्रस्वः संयोगे' (१।८४) सू० → सु० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं - प्प० । 'ख-घ-थ०' (१।१८७) खस्य ह० । अनेन वा ङीप्र० । पक्षे-'आत्' (२।४।१८) आप्प्र० → आ । 'लुक्' (१।१०) आलुक् । 'लोकात्' (१।१।३) ही० - हा० । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **सुप्पणही सुप्पणहा** रावणभगिनी ।

**[ इमीए इमाए ]** इदम् (२) । तृतीया टा-षष्ठी ङस् वा - सप्तमी ङि वा - पञ्चमी ङसि वा । 'इदम इमः' (३।७२) इदम्० → इम० । अनेन वा ङीप्र० । पक्षे-'आत्' (२।४।१८) आप्प्र० → आ । 'टा-ङस्-ङेरदादिदेद्वा०' (३।२९) विभक्तिस्थाने एत् **इमीए इमाए** ।

**[ इमीणं इमाणं ]** इमी इमा पूर्ववत् । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्स्थाने ण० । 'क्त्वा-स्यादेर्ण-स्वोर्वा' (१।२७) अनुस्वारः **इमीणं इमाणं** ।

**[ एईए एआए ]** एतद् (२) । तृतीया टा-षष्ठी ङस्-सप्तमी ङि-पञ्चमी ङसि । 'अन्त्य०' (१।११) द्लुक् । अनेन वा ङीप्र० । पक्षे-'आत्' (२।४।१८) आप्प्र० → आ । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) ती०-ता० । 'क-ग-च-ज०' (१।१७७) त्लुक् एई - एआ इति स्थिते 'टा-ङस्-ङेरदादि०' (३।२९) विभक्तिस्थाने एत् **एईए एआए** ।

**[ एईणं एआणं ]** एई एआ पूर्ववत् । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्स्थाने ण० । 'क्त्वा-स्यादेर्ण-स्वोर्वा' (१।२७) अनुस्वारः **एईणं एआणं** ।

**[ करिणी ]** करिणी । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **करिणी** ।

**[ अया ]** अजा । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो०' (१।१८०) आ० → या० । 'अन्त्यव्य०' (१।११) स्लुक् **अया** ।

**[ एलया ]** एडका । प्रथमा सि । 'डो लः' (१।२०२) डस्य लः । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो०' (१।१८०) आ० → या० । 'अन्त्यव्य०' (१।११) स्लुक् **एलया** ।

नीली इत्यादिषु संस्कृते ङीप्रत्ययस्याप्राप्तावयं विकल्पः । गौरी-कुमार्यादौ तु ङीप्रत्ययः समेति ततोऽत्र न विकल्पं सूत्रं, नित्यमेव ङीप्रत्ययः ।

**[ गोरी ]** गौरी । प्रथमा सि । 'औत ओत्' (१।१५९) गौ० → गो० । 'अन्त्यव्य०' (१।११) स्लुक् **गोरी** ।

**[ कुमारी ]** कुमारी । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **कुमारी** ॥३२॥

## किं-यत्तदोस्यमामि ॥ ८।३।३३ ॥

सि-अम्-आम्वर्जिते स्यादौ परे एभ्यः स्त्रियां ङीर्वा भवति ॥

[१]कीउ । काउ । कीए । काए । कीसु । कासु । एवं - जीउ । जाउ । तीउ । ताउ इत्यादि ॥

अस्यमामीति किम् ? का । जा । सा । कं । जं । तं । काण । जाण । ताण ॥

[ **किं-यत्तदोस्यमामि** ] किम्-यत्-तद् पञ्चमी ङसि । सिश्च अम् च आम् च = स्यमाम्, न स्यमाम् = अस्यमाम्, तस्मिन् = अस्यमामि । सप्तमी ङि ।

[ **कीउ काउ** ] किम् (२) । प्रथमा जस्-द्वितीया शस् वा । 'अन्त्यव्य०' (१।११) म्लुक् । अनेन वा ङीप्र० → ई० । पक्षे - 'आत्' (२।४।१८) आप्प्र० → आ । 'लुक्' (१।१०) इलोपः । 'लोकात्' (१।१।३) की-का । 'स्त्रियामुदोतौ वा' (३।२७) जस्०-शस्० → उत्० **कीउ काउ** ।

[ **कीए काए** ] की-का पूर्ववत् । तृतीया टा । 'टा-ङस्-ङेरदादि०' (३।२९) टा० → ए० **कीए काए** ।

[ **कीसु कासु** ] की-का पूर्ववत् । सप्तमी सुप् **कीसु कासु** ।

[ **जीउ जाउ** ] यद् (२) । प्रथमा जस्-द्वितीया शस् वा । 'आदेर्यो जः' (१।२४५) य० → ज० । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन वा ङीप्र० → ई० । पक्षे-'आत्' (२।४।१८) आप्प्र० → आ । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) जी-जा । 'स्त्रियामुदोतौ वा' (३।२७) जस्०-शस्० → उत्० **जीउ जाउ** ।

[ **तीउ ताउ** ] तद् (२) । प्रथमा जस्- द्वितीया शस् वा । 'अन्त्य०' (१।११) द्लुक् । अनेन वा ङीप्र० → ई० । पक्षे- 'आत्' (२।४।१८) आप्प्र० → आ । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) ती-ता । 'स्त्रियामुदोतौ वा' (३।२७) जस्०-शस्० → उत्० **तीउ ताउ** ।

[ **का** ] किम् । प्रथमा सि । 'अन्त्यव्य०' (१।११) म्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'लुक्' (१।१०) इलुक् । 'लोकात्' (१।१।३) का । 'अन्त्यव्य०' (१।११) स्लुक् **का** ।

[ **जा** ] यद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) या । 'आदेर्यो जः' (१।२४५) या० → जा० । 'अन्त्यव्य०' (१।११) स्लुक् **जा** ।

[ **सा** ] तद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) ता । 'तदश्च तः सोऽक्लीबे' (३।८६) ता० → सा० । 'अन्त्यव्य०' (१।११) स्लुक् **सा** ।

[ **कं** ] का पूर्ववत् । द्वितीया अम् । 'ह्रस्वोऽमि' (३।३६) का० → क० । 'अमोऽस्य' (३।५) अमोऽकारलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **कं** ।

[ **जं** ] जा पूर्ववत् । द्वितीया अम् । 'ह्रस्वोऽमि' (३।३६) जा० → ज० । 'अमोऽस्य' (३।५) अमोऽकारलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **जं** ।

[ **तं** ] ता पूर्ववत् । द्वितीया अम् । 'ह्रस्वोऽमि' (३।३६) ता० → त० । 'अमोऽस्य' (३।५) अमोऽकारलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **तं** ।

---

१. सर्वमुद्रितेषु कीउ इत्याद्युदाहरणेषु उकारस्थाने ओकारः ।

**[ काण ]** का पूर्ववत् । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० **काण** ।

**[ जाण ]** जा पूर्ववत् । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० **जाण** ।

**[ ताण ]** ता पूर्ववत् । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० **ताण** ॥३३॥

## छाया-हरिद्रयोः ॥ ८।३।३४ ॥

अनयोराप्प्रसङ्गे नाम्नः स्त्रियां ङीर्वा भवति ॥ छाही छाया । हलद्दी हलद्दा ॥

**[ छाया-हरिद्रयोः ]** छाया-हरिद्रा सप्तमी ओस् ।

**[ छाही छाया ]** छाया (२) । 'छायायां होऽकान्तौ वा' (१।२४९) या० → हा० । अनेन वा ङीप्र० । 'लुक्' (१।१०) आलोपः । 'लोकात्' (१।१।३) ही० । 'अन्त्यव्य०' (१।११) स्लुक् **छाही छाया** ।

**[ हलद्दी हलद्दा ]** हरिद्रा (२) । 'हरिद्रादौ लः' (१।२५४) रि० → लि० । 'पथि-पृथिवी-प्रतिश्रुन्मूषिक-हरिद्रा-बिभीत-केष्वत्' (१।८८) लि० → ल० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं - द्दा० । अनेन वा ङीप्रत्ययः । 'लुक्' (१।१०) आलोपः । 'लोकात्' (१।१।३) द्दी० । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् **हलद्दी हलद्दा** ॥३४॥

## स्वस्रादेर्डा ॥ ८।३।३५ ॥

स्वस्रादेः स्त्रियां वर्तमानात् डा प्रत्ययो भवति ॥

ससा । नणन्दा । दुहिआ । दुहिआहि । दुहिआसु । दुहिआसुओ । गउआ ॥

**[ स्वस्रादेर्डा ]** स्वस्रादि पञ्चमी ङसि । डा प्रथमा सि ।

**[ ससा ]** स्वसृ । प्रथमा सि । 'सर्वत्र०' (२।७९) व्लुक् । अनेन डाप्र० → आ इति । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलुक् । 'लोकात्' (१।१।३) सा । 'अन्त्यव्य०' (१।११) स्लुक् **ससा** ।

**[ नणन्दा ]** ननान्दृ । 'ह्रस्वः संयोगे' (१।८४) ना० → न० । 'नो णः' (१।२२८) न० → ण० । अनेन डाप्र० → आ इति । 'डित्यन्त्य०' (२।१।११४) ऋलुक् । 'लोकात्' (१।१।३) दा । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **नणन्दा** ।

**[ दुहिआ ]** दुहितृ । प्रथमा सि । अनेन डाप्र० → आ इति । 'डित्यन्त्य०' (२।१।११४) ऋलुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'लोकात्' (१।१।३) आ **दुहिआ** ।

**[ दुहिआहि ]** दुहितृ । पञ्चमी ङसि । अनेन डाप्र० → आ इति । 'डित्यन्त्य०' (२।१।११४) ऋलुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'लोकात्' (१।१।३) आ । 'ङसेस्त्तो-दो-दु-हि०' (३।८) ङसि० → हि० **दुहिआहि** ।

**[ दुहिआसु ]** दुहितृ । सप्तमी सुप् । अनेन डाप्र० → आ इति । 'डित्यन्त्य०' (२।१।११४) ऋलुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'लोकात्' (१।१।३) आ **दुहिआसु** ।

**[ दुहिआसुओ ]** दुहितृ-सुत । अनेन डाप्र० → आ इति । 'डित्यन्त्य०' (२।१।११४) ऋलुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'लोकात्' (१।१।३) आ । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **दुहिआसुओ** ।

**[ गउआ ]** गो । 'गव्यउ-आअः' (१।१५८) गो० → गउ० । 'स्वार्थे कश्च वा' (२।१६४) कप्र० । अनेन डाप्र० → आ इति । 'डित्यन्त्य०' (२।१।११४) कमध्यात् अलुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् **गउआ** ॥३५॥

## ह्रस्वोऽमि ॥ ८।३।३६ ॥

स्त्रीलिङ्गस्य नाम्नोऽमि परे ह्रस्वो भवति ॥

मालं । नइं । वहुं । हसमाणिं हसमाणं पेच्छ ॥ अमीति किम् ? माला । सही । वहू ॥

**[ ह्रस्वोऽमि ]** ह्रस्व प्रथमा सि । अम् सप्तमी ङि ।

**[ मालं ]** माला । द्वितीया अम् । अनेन ह्रस्वः । 'शेषेऽदन्तवत्' (३।१२४) ततः 'अमोऽस्य' (३।५) अलुक् **मालं** ।

**[ नइं ]** नदी । द्वितीया अम् । अनेन ह्रस्वः । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'शेषेऽदन्तवत्' (३।१२४) ततः 'अमोऽस्य' (३।५) अलुक् **नइं** ।

**[ वहुं ]** वधू । द्वितीया अम् । अनेन ह्रस्वः । 'ख-घ-थ-ध-भाम्' (१।१८७) धु० → हु० । 'शेषेऽदन्तवत्' (३।१२४) ततः 'अमोऽस्य' (३।५) अलुक् **वहुं** ।

**[ हसमाणिं हसमाणं पेच्छ ]** हसमानी - हसमाना । द्वितीया अम् । अनेन ह्रस्वः । 'नो णः' (१।२२८) नि० → णि० - न० → ण० । 'शेषेऽदन्तवत्' (३।१२४) ततः 'अमोऽस्य' (३।५) अलुक् **हसमाणिं हसमाणं** । **पेच्छ** पूर्ववत् [३।२८] ।

**[ माला ]** माला । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **माला** ।

**[ सही ]** सखी । प्रथमा सि । 'ख-घ-थ०' (१।१८७) खी० → ही० । 'अन्त्यव्य०' (१।११) स्लुक् **सही** ।

**[ वहू ]** वधू । प्रथमा सि । 'ख-घ-थ-ध०' (१।१८७) धू० → हू० । 'अन्त्यव्य०' (१।११) स्लुक् **वहू** ॥३६॥

## नाऽऽमन्त्र्यात्सौ मः ॥ ८।३।३७ ॥

आमन्त्र्यार्थात्परे सौ सति 'क्लीबे स्वरान्म् सेः' (३।२५) इति यो म् उक्तः स न भवति ॥

हे तण ! । हे दहि ! । हे महु ! ॥

**[ नाऽऽमन्त्र्यात्सौ मः ]** न प्रथमा सि । आमन्त्र्य पञ्चमी ङसि । सि सप्तमी ङि । म प्रथमा सि ।

**[ हे तण ! ]** हे तृण ! । प्रथमा सि । 'ऋतोऽत्' (१।१२६) तृ० → त० । 'अन्त्य०' (१।११) स्लुक् **हे तण !** ।

**[ हे दहि ! ]** हे दधि ! । प्रथमा सि । 'ख-घ-थ०' (१।१८७) धि० → हि० । 'अन्त्यव्य०' (१।११) स्लुक् **हे दहि !** ।

**[ हे महु ! ]** हे मधु ! । प्रथमा सि । 'ख-घ-थ०' (१।१८७) धु० → हु० । 'अन्त्यव्य०' (१।११) स्लुक् **हे महु !** ॥३७॥

## डो [1]दीर्घो वा ॥ ८।३।३८ ॥

आमन्त्र्यार्थात्परे सौ सति 'अतः सेर्डोः' (३।२) इति यो नित्यं डोः प्राप्तो यश्च 'अक्लीबे सौ' (३।१९) इति इदुतोरकारान्तस्य च प्राप्तो दीर्घः स वा भवति ॥

हे देव ! हे देवो ! । हे खमासमण ! । हे खमासमणो ! । हे अज्ज ! हे अज्जो ! ॥

---

१. G. दीर्घौ ।

दीर्घः - हे हरी ! हे हरि ! । हे गुरू ! हे गुरु ! । जाइविसुद्धेण पहू ! । हे प्रभो इत्यर्थः । एवं दोण्णि पहू ! जिअलोए । पक्षे - हे पहु ! । एषु प्राप्ते विकल्पः ।

इह त्वप्राप्ते - हे गोअमा ! हे गोअम ! । हे कासवा ! हे कासव ! । रे रे चप्फलया ! । रे रे निग्घिणया ! ॥

**[ डो दीर्घो वा ]** डो प्रथमा सि । दीर्घ प्रथमा सि । वा प्रथमा सि ।

'अतः सेर्डोः' (३।२) इत्यनेन नित्यं सिस्थाने डो भवति स विकल्पेन स्यात् । यस्तु 'अक्लीबे सौ' (३।१९) इत्यनेन इकारोकारयोर्दीर्घः प्रोक्तः सोपि वा भवति । 'अक्लीबे सौ' (३।१९) इत्यनेन अकारस्य दीर्घनिषेधेऽनेन अकारस्यापि दीर्घो वा भवति ॥

**[ हे देवो ! हे देव ! ]** हे देव ! (२) । आम० सि । अनेन वा सि० → डो० → ओ० इति । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) वो ! **हे देवो** ! । पक्षे - 'अन्त्यव्य०' (१।११) स्लुक् हे **देव** ! ।

**[ हे खमासमणो ! हे खमासमण ! ]** हे क्षमाश्रमण ! (२) । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्ष० → ख० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) श० → स० । आम० सि । अनेन वा सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) णो ! **हे खमासमणो** ! । पक्षे - 'अन्त्यव्य०' (१।११) स्लुक् **हे खमासमण** ! ।

**[ हे अज्जो ! हे अज्ज ! ]** हे आर्य ! (२) । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'द्य-य्य-र्यां जः' (२।२४) र्य० → ज० । 'अनादौ०' (२।८९) द्वित्वं - ज्ज० । आम० सि । अनेन वा सि० → डो० → ओ० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) ज्जो ! **हे अज्जो** ! । पक्षे- 'अन्त्यव्य०' (१।११) स्लुक् **हे अज्ज** ! ।

**[ हे हरी ! हे हरि ! ]** हे हरि ! (२) । आम० सि । अनेन वा इकारो दीर्घः - **हे हरी** ! । पक्षे - 'अन्त्यव्य०' (१।११) स्लुक् **हे हरि** ! ।

**[ हे गुरू ! हे गुरु ! ]** हे गुरु ! (२) । आम० सि । अनेन वा उकारो दीर्घः - **हे गुरू** ! । पक्षे - 'अन्त्यव्य०' (१।११) स्लुक् **हे गुरु** ! ।

**[ जाइविसुद्धेण पहू ! ]** जातिविशुद्ध । तृतीया टा । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'श-षोः सः' (१।२६०) शु० → सु० । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एकारः - द्ध० → द्धे० **जाइविसुद्धेण** ।

हे प्रभु ! । आम० सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'ख-घ-थ०' (१।१८७) भु० → हु० । अनेन वा दीर्घः - हु० → हू० । 'अन्त्यव्य०' (१।११) स्लुक् **हे पहू** ! ।

**[ दोण्णि पहू ! जिअलोए ]** द्वि । प्रथमा औ । 'द्विवचनस्य बहुवचनम्' (३।१३०) औस्थाने जस् । 'दुवे दोण्णि वेण्णि च जस्-शसा' (३।१२०) द्विस्थाने दोण्णि० जसा सह । **दोण्णि** ।

प्रभु । आम० सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'ख-घ-थ-ध०' (१।१८७) भस्य हः । अनेन वा दीर्घः - हु० → हू० **हे पहू** ! ।

जीवलोक । सप्तमी ङि । 'पानीयादिष्वित्' (१।१०१) जी० → जि० । 'क-ग-च-ज०' (१।१७७) व्लुक् - क्लुक् च । 'ङे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) ए **जिअलोए** । पक्षे -

**[ हे पहु ! ]** हे प्रभु ! । आम० सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'ख-घ-थ०' (१।१८७) भस्य हः । 'अन्त्य०' (१।११) स्लुक् **हे पहु !** ।

एषु दीर्घत्वप्राप्तेऽनेन विकल्पः ।

अप्राप्ते दीर्घविकल्पो यथा-

**[ हे गोअमा ! हे गोअम ! ]** हे गौतम ! (२) । आम० सि । 'औत ओत्' (१।१५९) गौ० → गो० । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन वाऽकारस्य दीर्घः - म० → मा० । 'अन्त्यव्य०' (१।११) स्लुक् **हे गोअमा ! हे गोअम !** ।

**[ हे कासवा ! हे कासव ! ]** हे काश्यप ! (२) । आम० सि । 'अधो म-न-याम्' (२।७८) य्लुक् । 'श-षोः सः' (१।२६०) श० → स० । 'पो वः' (१।२३१) प० → व० । अनेन वा दीर्घः । 'अन्त्यव्य०' (१।११) स्लुक् **हे कासवा ! हे कासव !** ।

**[ रे रे चप्फलया ! ]** रे रे ! । आम० सि । 'अव्ययस्य' (३।२।७) सिलुप् **रे रे** । मिथ्यावादिन् । आम० सि । 'गोणादयः' (२।१७४) चप्फल इत्यादेशः । 'स्वार्थे कश्च वा' (२।१६४) कप्र० । अनेन वा दीर्घः - क० → का० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० । 'अन्त्यव्यञ्ज०' (१।११) स्लुक् **चप्फलया !** ।

**[ रे रे निग्घिणया ! ]** रे रे । आम० सि । 'अव्ययस्य' (३।२।७) सिलुप् **रे रे** । निर्घृण । आम० सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'इत्कृपादौ' (१।१२८) घृ० → घि० । 'अनादौ०' (२।८९) द्वित्वं - घ्घि० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वघस्य गः । 'स्वार्थे कश्च वा' (२।१६४) कप्र० । अनेन वा दीर्घः - क० → का० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो०' (१।१८०) आ० → या० । 'अन्त्यव्य०' (१।११) स्लुक् **निग्घिणया !** ॥३८॥

### ऋतोऽद्वा ॥ ८।३।३९ ॥

ऋकारान्तस्याऽऽमन्त्रणे सौ परे अकारोऽन्तादेशो वा भवति ॥

हे पितः → हे पिअ ! । हे दातः ! → हे दाय ! । पक्षे- हे पिअरं ! । हे दायार ! ।

**[ ऋतोऽद्वा ]** ऋत् षष्ठी ङस् । अत् प्रथमा सि । वा प्रथमा सि ।

**[ हे पिअ ! ]** हे पितृ ! । आमन्त्रणे सि । अनेन वा तृ० → त० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **हे पिअ !** ।

**[ हे दाय ! ]** हे दातृ ! । आमन्त्रणे सि । अनेन वा तृ० → त० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'अन्त्यव्य०' (१।११) स्लुक् **हे दाय !** । पक्षे -

**[ हे पिअरं ! ]** हे पितृ ! । आमन्त्रणे सि । 'नाम्न्यरं वा' (३।४०) ऋकारस्य अरं । 'लोकात्' (१।१।३) पितरं । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अन्त्यव्य०' (१।११) स्लुक् **हे पिअरं !** ।

**[ हे दायार ! ]** हे दातृ ! । आमन्त्रणे सि । 'आरः स्यादौ' (३।४५) ऋकारस्य आर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० । 'अन्त्यव्य०' (१।११) स्लुक् **हे दायार !** ॥३९॥

### नाम्न्यरं वा ॥ ८।३।४० ॥

ऋदन्तस्याऽऽमन्त्रणे सौ परे नाम्नि संज्ञायां विषये अरं इति अन्तादेशो वा भवति ॥

हे पितः ! → हे पिअरं । पक्षे - हे पिअ ! । नाम्नीति किम् ? हे कर्तः ! → हे कत्तार ! ॥

**[ नाम्न्यरं वा ]** नामन् सप्तमी ङि । अरं प्रथमा सि । वा प्रथमा सि ।

**[ हे पिअरं ! ]** पूर्ववत् [३।३९] ।

**[ हे पिअ ! ]** पूर्ववत् [३।३९] ।

**[ हे कत्तार ! ]** हे कर्तृ ! । आमन्त्रणे सि । 'आरः स्यादौ' (३।४५) ऋ० → आर० । 'अनादौ०' (२।८९) तस्य द्वित्वम् । 'अन्त्यव्य०' (१।११) स्लुक् **हे कत्तार** ! ।।४०।।

## वाऽऽप ए ॥ ८।३।४१ ॥

आमन्त्रणे सौ परे आप एत्वं वा भवति ॥

हे माले ! । हे महिले ! । हे अज्जिए ! । हे पज्जिए ! । पक्षे - हे माला ! इत्यादि ॥ आप इति किम् ? हे पिउच्छा ! । हे माउच्छा ! ॥ बहुलाधिकारात् क्वचिदोत्वमपि - अम्मो ! भणामि भणिए ॥

**[ वाऽऽप ए ]** वा प्रथमा सि । आप् षष्ठी ङस् । ए प्रथमा सि ।

**[ हे माले ! ]** हे माला ! । आमन्त्रणे सि । अनेन वा आ० → ए० **हे माले** ! ।

**[ हे महिले ! ]** हे महिला ! । आमन्त्रणे सि । अनेन वा आ० → ए० **हे महिले** ! ।

**[ हे अज्जिए ! ]** आर्जिका ! । आमन्त्रणे सि । 'हृस्वः संयोगे' (१।८४) आ० → अ० । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं - जि० → ज्जि० । अनेन आ० → ए० । 'अन्त्यव्य०' (१।११) स्लुक् **हे अज्जिए** ! ।

**[ हे पज्जिए ! ]** प्रार्जिका ! । आमन्त्रणे सि । 'हृस्वः संयोगे' (१।८४) प्रा० → प्र० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-जि० → ज्जि० । अनेन आ० → ए० । 'अन्त्यव्य०' (१।११) स्लुक् **हे पज्जिए** ! ।

**[ हे माला ! ]** हे माला ! । आमन्त्रणे सि । 'अन्त्य०' (१।११) स्लुक् **हे माला** ! ।

**[ हे पिउच्छा ! ]** हे पितृस्वसृ ! । आमन्त्रणे सि । 'गौणान्त्यस्य' (१।१३४) तृ० → तु० । 'क-ग-च-ज०' (१।१७७) त्लुक् पिउस्वसृ । 'मातृ-पितुः स्वसुः सिआ-छौ' (२।१४२) स्वसृस्थाने छा आदेशः । 'अन्त्यव्य०' (१।११) स्लुक् **हे पिउच्छा** ! ।

**[ हे माउच्छा ! ]** हे मातृस्वसृ ! । आमन्त्रणे सि । 'गौणान्त्यस्य' (१।१३४) तृ० → तु० । 'क-ग-च-ज०' (१।१७७) त्लुक् - माउस्वसृ । 'मातृ-पितुः स्वसुः सिआ-छौ' (२।१४२) स्वसृस्थाने छा आदेशः । 'अन्त्यव्य०' (१।११) स्लुक् **हे माउच्छा** ! ।

बहुलाधिकारात् क्वचिदोत्वम् -

**[ अम्मो ! भणामि भणिए ]** अम्बा । आमन्त्र्ये सि । 'सर्वत्र ल-व०' (२।७९) ब्लुक् । 'अनादौ०' (२।८९) द्वित्वं - मा० → म्मा० । अनेन म्मो० । 'अन्त्यव्य०' (१।११) स्लुक् **अम्मो** ! ।

'भण शब्दे' (२६४) भण् । वर्त्त० मिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) भण । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'मौ वा' (३।१५४) दीर्घः - ण० → णा० **भणामि** ।

भणित । सप्तमी ङि । 'डे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'क-ग-च-ज०' (१।१७७) त्लुक् भणिए ।

[१]अइदीहराइं सुन्हे चिहुरे दीसंति वंसपत्ताइं ।

**अम्मो ! भणामि भणिए** तुम्हाण वि पंडुरा पुट्ठी ॥

अस्य व्याख्या - हे स्नुषे ! चिकुरे अतिदीर्घाणि वंशपत्राणि दृश्यन्ते इत्युक्ते सा प्रत्युवाच - हे अम्ब ! त्वया भणिते अहं भणामि युष्माकमपि पाण्डुरा पृष्टिः - धवला पृष्टिरित्यर्थः ॥४१॥

## ईदूतो[२] ह्रस्वः ॥ ८।३।४२ ॥

आमन्त्रणे सौ परे ईदूदन्तयोर्ह्रस्वो भवति ॥

हे नइ ! । हे गामणि ! । हे समणि ! । हे वहु ! । हे खलपु ! ॥

**[ ईदूतो ह्रस्वः ]** ईदूत् षष्ठी ङस् । ह्रस्व प्रथमा सि ।

**[ हे नइ ! ]** नदी । आम० सि- हे पूर्वइ० । अनेन ह्रस्वः - दी० → दि० । 'क-ग-च-ज०' (१।१७७) द्लुक् **हे नइ !** ।

**[ हे गामणि ! ]** ग्रामणी । आम० सि - हे पूर्वइ० । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । अनेन ह्रस्वः - णी० → णि० । 'अन्त्यव्य०' (१।११) स्लुक् **हे गामणि !** ।

**[ हे समणि ! ]** श्रमणी । आम० सि - हे पूर्वइ० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) श० → स० । अनेन ह्रस्वः - णी० → णि० । 'अन्त्यव्य०' (१।११) स्लुक् **हे समणि !** ।

**[ हे वहु ! ]** वधू । आमन्त्रणे सि - हे पूर्वइ० । 'ख-घ-थ-ध-भाम्' (१।१८७) धू० → हू० । अनेन ह्रस्वः -हू० → हु० । 'अन्त्यव्य०' (१।११) स्लुक् **हे वहु !** ।

**[ हे खलपु ! ]** खलपू । आमन्त्रणे सि - हे पूर्वइ० । अनेन ह्रस्वः - पू० → पु० । 'अन्त्यव्य०' (१।११) स्लुक् **हे खलपु !** ॥४२॥

## क्विपः ॥ ८।३।४३ ॥

क्विबन्तस्येदूदन्तस्य ह्रस्वो भवति ॥

गामणिणा । खलपुणा । गामणिणो । खलपुणो । [३]गामणिसुओ । खलपुसुओ ॥

**[ क्विपः ]** क्विप् षष्ठी ङस् ।

**[ गामणिणा ]** ग्रामणी । तृतीया टा । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन ह्रस्वः - णी० → णि० । 'टो णा' (३।२४) टा० → णा० **गामणिणा** ।

**[ खलपुणा ]** खलपू । तृतीया टा । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन ह्रस्वः - पू० → पु० । 'टो णा' (३।२४) टा० → णा० **खलपुणा** ।

---

१. अइदीहराइँ वहुए सीसे दीसन्ति वंसवत्ताइं । **भणिए भणामि अत्ता** तुम्हाणं वि पण्डुरा पुट्ठी ॥ [गा० स० - ७।७४]

अतिदीर्घाणि वध्वाः शीर्षे दृश्यन्ते वंशपत्राणि । भणिते भणामि श्वश्रु ! युष्माकमपि पाण्डुरं पृष्ठम् ॥

२. सर्वमुद्रितेषु ईदूतोर्ह्रस्वः । ३. A. E. गामणिसुओ - खलपुसुओ ।

**[ गामणिणो ]** ग्रामणी । प्रथमा जस् - द्वितीया शस् वा । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन ह्रस्वः - णी० → णि० । 'जस्-शसोर्णो वा' (३।२२) जस्०-शस्० → णो० **गामणिणो** ।

**[ खलपुणो ]** खलपू । प्रथमा जस् - द्वितीया शस् वा । अनेन ह्रस्वः - पू० → पु० । 'जस्-शसोर्णो वा' (३।२२) जस्०-शस्० → णो० **खलपुणो** ।

**[ गामणिसुओ ]** ग्रामणीसुत । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन ह्रस्वः - णी० → णि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **गामणिसुओ** ।

**[ खलपुसुओ ]** खलपूसुत । अनेन ह्रस्वः - पू० → पु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **खलपुसुओ** ॥४३॥

## ऋतामुदस्यमौसु वा ॥ ८।३।४४ ॥

सि-अम्-औवर्जिते अर्थात् स्यादौ परे ऋदन्तानामुदन्तादेशो वा भवति ॥

जस् - भत्तू भत्तुणो भत्तउ भत्तओ । पक्षे - भत्तारा ॥

शस् - भत्तू भत्तुणो । पक्षे - भत्तारे ॥ टा - भत्तुणा । पक्षे - भत्तारेण ॥

भिस् - भत्तूहिं । पक्षे - भत्तारेहिं ॥

ङसि - भत्तुणो भत्तूओ भत्तूउ भत्तूहिन्तो । पक्षे - भत्ताराओ भत्ताराउ भत्ताराहि भत्ताराहिन्तो भत्तारा ॥

भ्यस् - भत्तूओ भत्तूहिन्तो भत्तूसुन्तो । पक्षे- भत्ताराओ भत्ताराउ भत्ताराहिन्तो भत्तारेहिन्तो भत्तारासुन्तो भत्तारेसुन्तो ॥

ङस् - भत्तुणो भत्तुस्स । पक्षे - भत्तारस्स ॥

आम् - भत्तूणं भत्तूण । पक्षे- भत्ताराणं भत्ताराण ॥

ङि - भत्तुम्मि । पक्षे- भत्तारे भत्तारम्मि ॥

सुप् - भत्तूसु । पक्षे- भत्तारेसु ॥

बहुवचनस्य व्याप्त्यर्थत्वाद् यथादर्शनं नाम्न्यपि उद्वा भवति । जस्-शस्-ङसि-ङस्सु पिउणो । जामाउणो । भाउणो ॥

टायाम् - पिउणा ॥ भिसि - पिऊहिं ॥ सुपि - पिऊसु ॥ पक्षे - पिअरा इत्यादि ॥

अस्यमौस्विति किम् ? सि-पिआ । अम्-पिअरं । औ-पिअरा ॥

**[ ऋतामुदस्यमौसु वा ]** ऋत् षष्ठी आम् । उत् प्रथमा सि । अस्यमौ सप्तमी सुप् । वा प्रथमा सि ।

**[ भत्तू भत्तुणो ]** भर्तृ (२) । प्रथमा जस् । अनेन वा तृ० → तु० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं - तु० → त्तु० । प्रथमे रूपे 'अक्लीबे सौ' (३।१९) दीर्घः - त्तु० → त्तू० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । द्वितीये 'जस्-शसोर्णो वा' (३।२२) जस्० → णो० **भत्तू भत्तुणो** ।

**[ भत्तउ भत्तओ ]** भर्तृ (२) । प्रथमा जस् । अनेन वा तृ० → तु० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं - तु० → त्तु० । 'पुंसि जसो डउ-डओ वा' (३।२०) जस्स्थाने डउ० → अउ० - डओ० → अओ० इति। 'डित्यन्त्य०' (२।१।११४) उलुक् **भत्तउ भत्तओ** । पक्षे-

**[ भत्तारा ]** भर्तृ । प्रथमा जस् । 'आरः स्यादौ' (३।४५) ऋ० → आर० । 'लोकात्' (१।१।३) भर्तार । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं - ता० → त्ता० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः र० → रा० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **भत्तारा** ।

**[ भत्तू भत्तुणो ]** भर्तृ । द्वितीया शस् । शेषं पूर्ववत् । **भत्तू भत्तुणो** । पक्षे-

**[ भत्तारे ]** भर्तृ । द्वितीया शस् । 'आरः स्यादौ०' (३।४५) ऋ० → आर० भर्तार । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ' (२।८९) द्वित्वं - ता० → त्ता० । 'लोकात्' (१।१।३) भत्तार । 'जस्-शसोर्लुक्' (३।४) शस्लुक् । 'टाण-शस्येत्' (३।१४) र० → रे० **भत्तारे** ।

**[ भत्तुणा ]** भर्तृ । तृतीया टा । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन वा तृ० → तु० । 'अनादौ०' (२।८९) द्वित्वं - तु० → त्तु० । 'टो णा' (३।५१) टा० → णा० **भत्तुणा** । पक्षे-

**[ भत्तारेण ]** भत्तार पूर्ववत् । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्त्वं - र० → रे० **भत्तारेण** ।

**[ भत्तूहिं ]** भर्तृ । तृतीया भिस् । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन तृ० → तु० । 'अनादौ०' (२।८९) द्वित्वं - तु० → त्तु० । 'इदुतो दीर्घः' (३।१६) त्तु० → त्तू० **भत्तूहिं** । पक्षे-

**[ भत्तारेहिं ]** भर्तृ । तृतीया भिस् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'आरः स्यादौ' (३।४५) तृ० → तार० । 'अनादौ०' (२।८९) द्वित्वं - ता० → त्ता० । 'भिस्-भ्यस्-सुपि' (३।१५) एत्त्वं - र० → रे० । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं० **भत्तारेहिं** ।

**[ भत्तुणो ]** भर्तृ । पञ्चमी ङसि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन वा तृ० → तु० । 'अनादौ०' (२।८९) द्वित्वं- तु० → त्तु० । 'ङसि-ङसोः पुं-क्लीबे वा' (३।२५) ङसि० → णो० **भत्तुणो** ।

**[ भत्तूओ भत्तूउ भत्तूहिन्तो ]** भर्तृ (३) । पञ्चमी ङसि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन वा तृ० → तु० । 'अनादौ०' (२।८९) द्वित्वं - तु० → त्तु० । 'ङसेस्त्तो-दो-दु-हि-हिन्तो-लुकः' (३।८) ङसि० → दो-दु-हिन्तो । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'जस्-शस्-ङसि-त्तो-दो०' (३।१२) त्तु० → त्तू० **भत्तूओ भत्तूउ भत्तूहिन्तो** ।

**[ भत्ताराओ भत्ताराउ भत्ताराहि भत्ताराहिन्तो भत्तारा ]** भर्तृ (५) । पञ्चमी ङसि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'आरः स्यादौ' (३।४५) तृ० → तार० । 'अनादौ०' (२।८९) द्वित्वं - ता० → त्ता० । 'जस्-शस्-ङसि-त्तो-दो०' (३।१२) र० → रा० । 'ङसेस्त्तो-दो-दु-हि-हिन्तो लुकः' (३।८) ङसि० → दो-दु-हि-हिन्तो-लुक् । 'क-ग-च-ज०' (१।१७७) द्लुक् **भत्ताराओ भत्ताराउ भत्ताराहि भत्ताराहिन्तो भत्तारा** ।

**[ भत्तूओ भत्तूहिन्तो भत्तूसुन्तो ]** भर्तृ (३) । पञ्चमी भ्यस् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन वा तृ० → तु० । 'अनादौ०' (२।८९) द्वित्वं - तु० → त्तु० । 'इदुतो०' (३।१६) दीर्घः त्तु० → त्तू० । 'भ्यसस्त्तो-दो-दु-हि-हिन्तो-सुन्तो' (३।९) भ्यस्० → दो-हिन्तो-सुन्तो । 'क-ग-च-ज०' (१।१७७) द्लुक् **भत्तूओ भत्तूहिन्तो भत्तूसुन्तो** ।

**[ भत्ताराओ भत्ताराउ भत्ताराहिन्तो भत्तारेहिन्तो भत्तारासुन्तो भत्तारेसुन्तो ]** भत्तार (६) । पञ्चमी भ्यस् । 'भ्यसस्त्तो-दो-दु०' (३।९) भ्यस्० → दो-दु-हिन्तो-सुन्तो । 'भिस्-भ्यस्- सुपि' (३।१५) एत्त्वं-र० → रे० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'भ्यसि वा' (३।१३) दीर्घः **भत्ताराओ भत्ताराउ भत्ताराहिन्तो भत्तारेहिन्तो भत्तारासुन्तो भत्तारेसुन्तो** ।

**[ भत्तुणो भत्तुस्स ]** भर्तृ (२)। षष्ठी ङस्। अनेन वा तृ० → तु०। 'अनादौ०' (२।८९) द्वित्वं - तु० → त्तु०। 'ङसि-ङसोः पुं-क्लीबे वा' (२।२३) ङस्० → णो०। द्वितीये ङस्स्थाने 'ङसः स्सः' (३।१०) ङस्० → स्स० **भत्तुणो भत्तुस्स**। पक्षे-

**[ भत्तारस्स ]** भत्तार। षष्ठी ङस्। 'ङसः स्सः' (३।१०) ङस्० → स्स० **भत्तारस्स**।

**[ भत्तूणं भत्तूण ]** भत्तु पूर्ववत् (२)। षष्ठी आम्। 'टा-आमोर्णः' (३।६) आम्० → ण०। 'जस्-शस्-ङसि०' (३।१२) दीर्घः। 'क्त्वा-स्यादेर्ण-स्वोर्वा' (१।२७) अनुस्वारो वा स्यात् **भत्तूणं भत्तूण**। पक्षे-

**[ भत्ताराणं भत्ताराण ]** भत्तार पूर्ववत्। षष्ठी आम्। 'जस्-शस्-ङसि०' (३।१२) दीर्घः। 'टा-आमोर्णः' (३।६) आम्० → ण०। 'क्त्वा०' (१।२७) वाऽनुस्वारः **भत्ताराणं भत्ताराण**।

**[ भत्तुम्मि भत्तारे भत्तारम्मि ]** भत्तु पूर्ववत्। सप्तमी ङि। 'डे-म्मि-ङेः' (३।११) ङि० → म्मि० **भत्तुम्मि**। पक्षे- **भत्तारे भत्तारम्मि**।

**[ भत्तूसु ]** भत्तु पूर्ववत्। सप्तमी सुप्। 'इदुतो दीर्घः' (३।१६) त्तु० → त्तू० **भत्तूसु**। पक्षे-

**[ भत्तारेसु ]** भर्तृ। सप्तमी सुप्। 'आरः स्यादौ' (३।४५) तृ० → तार०। 'अनादौ०' (२।८९) द्वित्वं - तार० → त्तार०। 'सर्वत्र०' (२।७९) र्लुक्। 'भिस्-भ्यस्-सुपि' (३।१५) एत्त्वं - र० → रे० **भत्तारेसु**।

**[ पिउणो ]** पितृ। प्रथमा जस् - द्वितीया शस् - पञ्चमी ङसि-षष्ठी ङस्। अनेन नाम्न्यपि उत् - तृ० → तु०। 'जस्-शसोर्णो वा' (३।२२) जस्० - शस्० → णो०। 'ङसि-ङसोः०' (३।२३) ङसि०-ङस्० → णो। 'क-ग-च-ज०' (१।१७७) त्लुक् **पिउणो**।

**[ जामाउणो ]** जामातृ। प्रथमा जस्-द्वितीया शस्-पञ्चमी ङसि-षष्ठी ङस्। अनेन नाम्न्यपि उत्-तृ० → तु०। 'जस्-शसोर्णो वा' (३।२२) जस्०-शस्० → णो०। 'ङसि-ङसोः पुं-क्लीबे वा' (३।२३) ङसि० - ङस्० → णो०। 'क-ग-च-ज०' (१।१७७) त्लुक् **जामाउणो**।

**[ भाउणो ]** भ्रातृ। प्रथमा जस् - द्वितीया शस्-पञ्चमी ङसि-षष्ठी ङस्। 'सर्वत्र ल-व०' (२।७९) र्लुक्। अनेन नाम्न्यपि उत्-तृ० → तु०। 'जस्-शसोर्णो वा' (३।२२) जस्०-शस्० → णो०। 'ङसि-ङसोः०' (३।२३) ङसि० → ङस्० → णो०। 'क-ग-च-ज०' (१।१७७) त्लुक् **भाउणो**।

**[ पिउणा ]** पितृ। तृतीया टा। अनेन नाम्न्यपि उत्-तृ० → तु०। 'टो णा' (३।२४) टा० → णा०। 'क-ग-च-ज०' (१।१७७) त्लुक् **पिउणा**।

**[ पिऊहिं ]** पितृ। तृतीया भिस्। अनेन नाम्न्यपि उत् - तृ० → तु०। 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं०। 'क-ग-च-ज०' (१।१७७) त्लुक्। 'इदुतो दीर्घः' (३।१६) दीर्घः - उ० → ऊ० **पिऊहिं**।

**[ पिऊसु ]** पितृ। सप्तमी सुप्। अनेन नाम्न्यपि उत् - तृ० → तु०। 'क-ग-च-ज०' (१।१७७) त्लुक्। 'इदुतो दीर्घः' (३।१६) उ० → ऊ० **पिऊसु**।

**[ पिअरा ]** पितृ। प्रथमा जस्। 'नाम्न्यरः' (३।४७) तृ० → तर०। 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः - र० → रा०। 'जस्-शसोर्लुक्' (३।४) जस्लुक्। 'क-ग-च-ज०' (१।१७७) त्लुक् **पिअरा**।

**[ पिआ ]** पितृ। प्रथमा सि। 'आ सौ नवा' (३।४८) तृ० → ता०। 'क-ग-च-ज०' (१।१७७) त्लुक्। 'अन्त्यव्य०' (१।११) स्लुक् **पिआ**।

**[ पिअरं ]** पितृ । द्वितीया अम् । 'नाम्यरः' (३।४७) तृ० → तर० । 'अमोऽस्य' (३।५) अलुक्-अम्० → म्० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'मोऽनु०' (१।२३) अनुस्वारः **पिअरं** ।

**[ पिअरा ]** पितृ । प्रथमा - द्वितीया औ । 'द्विवचनस्य बहुवचनम्' (३।१३०) द्विवचनस्थाने बहुवचनम् - जस्-शस्। 'नाम्यरः' (३।४७) तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः- र० → रा० । 'जस्-शसोर्लुक्' (३।४) जस्-शस्लुक् **पिअरा** ॥४४॥

## आरः स्यादौ ॥ ८।३।४५ ॥

स्यादौ परे ऋत आर इत्यादेशो भवति ॥

भत्तारो । भत्तारा । भत्तारं । भत्तारे । भत्तारेण । भत्तारेहिं ॥ एवं ङस्यादिषूदाहार्यम् ॥ लुप्तस्याद्यपेक्षया भत्तारविहिअं ॥

**[ आरः स्यादौ ]** आर प्रथमा सि । स्यादि सप्तमी ङि ।

**[ भत्तारो ]** भर्तृ । प्रथमा सि । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । अनेन तृ० → तार० । 'अनादौ०' (२।८९) द्वित्वं - ता० → त्ता० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भत्तारो** ।

**[ भत्तारा ]** भत्तार पूर्ववत् । प्रथमा जस् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - र० → रा० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **भत्तारा** ।

**[ भत्तारं ]** भत्तार पूर्ववत् । द्वितीया अम् । 'अमोऽस्य' (३।५) अलुक्-अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **भत्तारं** ।

**[ भत्तारे ]** भत्तार पूर्ववत् । द्वितीया शस् । 'टाण-शस्येत्' (३।१४) र० → रे० । 'जस्-शसोर्लुक्' (३।४) शस्लुक् **भत्तारे** ।

**[ भत्तारेण ]** भत्तार पूर्ववत् । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) र० → रे० **भत्तारेण** ।

**[ भत्तारेहिं ]** भत्तार पूर्ववत् । तृतीया भिस् । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं० । 'भिस्-भ्यस्-सुपि' (३।१५) र० → रे० **भत्तारेहिं** ।

लुप्तेपि आरः स्यादौ स्यात् -

**[ भत्तारविहिअं ]** भर्तृ-विहितं । भर्त्रा विहितं = भर्तृविहितम् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन तृ० → तार० । 'अनादौ०' (२।८९) द्वित्वं - ता० → त्ता० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **भत्तारविहिअं** ॥४५॥

## आ अरा मातुः ॥ ८।३।४६ ॥

मातृसम्बन्धिन ऋतः स्यादौ परे आ - अरा इत्यादेशौ भवतः ॥

माआ माअरा । माआउ माआओ । माअराउ माअराओ । माअं माअरं । इत्यादि ॥

बाहुलकाज्जनन्यर्थस्य आ देवतार्थस्य तु अरा इत्यादेशः । माआए कुच्छीए । नमो माअराण ॥ 'मातुरिद्वा' (१।१३५) इतीत्त्वे माईण इति भवति ॥ 'ऋतामुद०' (३।४४) इत्यादिना उत्त्वे तु माऊए समन्निअं वंदे इति ॥ स्यादावित्येव - माइदेवो । माइगणो ॥

**[ आ अरा मातुः ]** आ - अरा प्रथमा औ । सूत्रत्वात् औलोपः । मातृ षष्ठी ङस् ।

**[ माआ माअरा ]** मातृ (२) । प्रथमा सि । अनेन प्रथमे तृ० → ता० । द्वितीये तृ० → तरा० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अन्त्यव्य०' (१।११) स्लुक् **माआ माअरा** ।

**[ माआउ माआओ ]** मातृ (२) । प्रथमा जस् । अनेन तृ० → ता० । 'स्त्रियामुदोतौ वा' (३।२७) जस्० → उत्० - ओत्० । 'क-ग-च-ज०' (१।१७७) त्लुक् **माआउ माआओ** ।

**[ माअराउ माअराओ ]** मातृ (२) । प्रथमा जस् । अनेन तृ० → तरा० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'स्त्रियामुदोतौ वा' (३।२७) जस्० → उत्० - ओत्० **माअराउ माअराओ** ।

**[ माअं माअरं ]** मातृ (२) । द्वितीया अम् । अनेन प्रथमे तृ० → ता० । द्वितीये तृ० → तरा० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'ह्रस्वोऽमि' (३।३६) आ० → अ० । 'अमोऽस्य' (३।५) अलुक् - अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **माअं माअरं** ।

बाहुलकाज्जनन्या अर्थे आ देवताया अर्थे अरा इत्यादेशोऽनुक्तोऽपि भवति -

**[ माआए कुच्छीए ]** मातृ । षष्ठी ङस् । अनेन तृ० → ता० । 'टा-ङस्-ङेरदा०' (३।२९) ङस्० → ए० । 'क-ग-च-ज०' (१।१७७) त्लुक् **माआए** ।

कुक्षि । सप्तमी ङि । 'छोऽक्ष्यादौ' (२।१७) क्षि० → छि० । 'अनादौ०' (२।८९) द्वित्वं - छ्छि० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'टा-ङस्-ङेरदा०' (३।२९) ङि० → ए० - पूर्वस्य च दीर्घः - **कुच्छीए** ।

**[ नमो माअराण ]** नमस् । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० ('अतो डो विसर्गस्य' (१।३७) विसर्गस्य डो० → ओ०) । 'डित्यन्त्य०' (२।१।११४) अलुक् **नमो** ।

मातृ । षष्ठी आम् । अनेन तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'जस्-शस्-ङसि-त्तो०' (३।१२) र० → रा० । 'टा-आमोर्णः' (३।६) आम्० → ण० **माअराण** । मातृदेवेभ्यो नमः इत्यर्थः ।

**[ माईण ]** मातृ । षष्ठी आम् । 'मातुरिद्वा' (१।१३५) तृ० → ति० । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः - ति० → ती० । 'क-ग-च-ज०' (१।१७७) त्लुक् **माईण** ।

**[ माऊए समन्निअं वंदे ]** मातृ । तृतीया टा । 'ऋतामुदस्यमौसु वा' (३।४४) तृ० → तु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'टा-ङस्-ङेरदा०' (३।२९) टा० → ए० - पूर्वस्य च दीर्घः **माऊए** ।

समन्वित । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'अनादौ०' (२।८९) द्वित्वं - न्नि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । द्वितीया अम् । 'अमोऽस्य' (३।५) अलुक् - अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **समन्निअं** । मात्रा समन्वितं वन्दे इत्यर्थः ।

**[ माइदेवो ]** मातृदेव । प्रथमा सि । 'मातुरिद्वा' (१।१३५) तृ० → ति० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **माइदेवो** ।

**[ माइगणो ]** मातृगण । प्रथमा सि । 'मातुरिद्वा' (१।१३५) तृ० → ति० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **माइगणो** ॥४६॥

## नाम्न्यरः ॥ ८।३।४७ ॥

ऋदन्तस्य नाम्नि संज्ञायां स्यादौ परे अर इत्यन्तादेशो भवति ॥

पिअरा । पिअरं । पिअरे । पिअरेण । पिअरेहिं । जामायरा । जामायरं । जामायरे । जामायरेण । जामायरेहिं । भायरा । भायरं । भायरे । भायरेण । भायरेहिं ॥

[ **नाम्न्यरः** ] नामन् सप्तमी ङि । अर प्रथमा सि ।

[ **पिअरा** ] पितृ । प्रथमा जस् । अनेन तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'जस्-शस्-ङसि-त्तो-दो०' (३।१२) दीर्घः - र० → रा० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **पिअरा** ।

[ **पिअरं** ] पितृ । द्वितीया अम् । अनेन तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अमोऽस्य' (३।५) अलुक्-अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पिअरं** ।

[ **पिअरे** ] पितृ । द्वितीया शस् । अनेन तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'टाण-शस्येत्' (३।१४) र० → रे० । 'जस्-शसोर्लुक्' (३।४) शस्लुक् **पिअरे** ।

[ **पिअरेण** ] पितृ । तृतीया टा । अनेन तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) र० → रे० **पिअरेण** ।

[ **पिअरेहिं** ] पितृ । तृतीया भिस् । अनेन तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं० । 'भिस्-भ्यस्-सुपि' (३।१५) र० → रे० **पिअरेहिं** ।

[ **जामायरा** ] यामातृ । 'आदेर्यो जः' (१।२४५) या० → जा० । प्रथमा जस् । अनेन तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - र० → रा० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **जामायरा** ।

[ **जामायरं** ] यामातृ । 'आदेर्यो जः' (१।२४५) या० → जा० । द्वितीया अम् । अनेन तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'अमोऽस्य' (३।५) अलुक् - अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जामायरं** ।

[ **जामायरे** ] यामातृ । 'आदेर्यो जः' (१।२४५) या० → जा० । द्वितीया शस् । अनेन तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'टाण-शस्येत्' (३।१४) र० → रे० । 'जस्-शसोर्लुक्' (३।४) शस्लुक् **जामायरे** ।

[ **जामायरेण** ] यामातृ । 'आदेर्यो जः' (१।२४५) या० → जा० । तृतीया टा । अनेन तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण शस्येत्' (३।१४) र० → रे० **जामायरेण** ।

[ **जामायरेहिं** ] यामातृ । 'आदेर्यो जः' (१।२४५) या० → जा० । तृतीया भिस् । अनेन तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं० । 'भिस्-भ्यस्-सुपि' (३।१५) र० → रे० **जामायरेहिं** ।

**[ भायरा ]** भ्रातृ । प्रथमा जस् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - र० → रा० । 'जस्-शसोर्लुक्' (३।४) जस्लुक **भायरा** ।

**[ भायरं ]** भ्रातृ । द्वितीया अम् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'अमोऽस्य' (३।५) अलुक् - अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **भायरं** ।

**[ भायरे ]** भ्रातृ । द्वितीया शस् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'टाण-शस्येत्' (३।१४) र० → रे० । 'जस्-शसोर्लुक्' (३।४) शस्लुक् **भायरे** ।

**[ भायरेण ]** भ्रातृ । तृतीया टा । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) र० → रे० **भायरेण** ।

**[ भायरेहिं ]** भ्रातृ । तृतीया भिस् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं० । 'भिस्-भ्यस्-सुपि' (३।१५) र० → रे० **भायरेहिं** ॥४७॥

## आ सौ नवा ॥ ८।३।४८ ॥

ऋदन्तस्य सौ परे आत्वं वा भवति ॥

पिआ । जामाया । भाया । कत्ता । पक्षे- पिअरो । जामायरो । भायरो । कत्तारो ॥

**[ आ सौ नवा ]** आ प्रथमा सि । सि सप्तमी ङि । नवा प्रथमा सि ।

**[ पिआ ]** पितृ । प्रथमा सि । अनेन तृ० → ता० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अन्त्यव्य०' (१।११) स्लुक् **पिआ** ।

**[ जामाया ]** यामातृ । 'आदेर्यो जः' (१।२४५) या० → जा० । प्रथमा सि । अनेन तृ० → ता० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० । 'अन्त्यव्य०' (१।११) स्लुक् **जामाया** ।

**[ भाया ]** भ्रातृ । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन तृ० → ता० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) आ० → या० । 'अन्त्यव्य०' (१।११) स्लुक् **भाया** ।

**[ कत्ता ]** कर्तृ । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन तृ० → ता० । 'अनादौ०' (२।८९) द्वित्वं - ता० → त्ता० । 'अन्त्यव्य०' (१।११) स्लुक् **कत्ता** । पक्षे -

**[ पिअरो ]** पितृ । प्रथमा सि । 'नाम्न्यरः' (३।४७) तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पिअरो** ।

**[ जामायरो ]** यामातृ । 'आदेर्यो जः' (१।२४५) या० → जा० । प्रथमा सि । 'नाम्न्यरः' (३।४७) तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जामायरो** ।

**[ भायरो ]** भ्रातृ । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'नाम्यरः' (३।४७) तृ० → तर० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भायरो** ।

**[ कत्तारो ]** कर्तृ । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'आरः स्यादौ' (३।४५) तृ० → तार० । 'अनादौ०' (२।८९) द्वित्वं-ता० → त्ता० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कत्तारो** ॥४८॥

## राज्ञः ॥ ८।३।४९ ॥

राज्ञो नलोपेऽन्त्यस्य आत्वं वा भवति, सौ परे ॥

राया । हे राया ! । पक्षे - आणादेशे रायाणो ॥ हे राय ! । हे रायं ! इति तु शौरसेन्याम् । एवम्-हे अप्प ! । हे अप्पं ! ॥

**[ राज्ञः ]** राजन् षष्ठी ङस् ।

**[ राया ]** राजन् । प्रथमा सि । 'अन्त्यव्य०' (१।११) न्लुक् । अनेन वा ज० → जा० । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० । 'अन्त्यव्य०' (१।११) स्लुक् **राया** ।

**[ हे राया ! ]** हे राजन् । आम० सि । शेषं "राया" वत् । **हे राया !** । पक्षे-

**[ रायाणो ]** राजन् । प्रथमा सि । 'पुंस्यन आणो राजवच्च' (३।५६) अन्० → आण० । 'लोकात्' (१।१।३) राजाण । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **रायाणो** ।

**[ हे राय ! ]** राजन् - हेपूर्व० । आमन्त्रणे सि । 'अन्त्यव्य०' (१।११) न्लुक् - स्लुक् च । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो०' (१।१८०) अ० → य० **हे राय !** ।

**[ हे रायं ! ]** राजन्-हेपूर्व० । आमन्त्रणे सि । 'मो वा' (४।२६४) न्० → म्० । 'अन्त्यव्य०' (१।११) स्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **हे रायं !** ।

**[ हे अप्प ! ]** आत्मन् - हेपूर्व० । आम० सि । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः पो वा' (२।५१) त्म० → प० । 'अनादौ०' (२।८९) द्वित्वं-प्प० । 'अन्त्यव्य०' (१।११) न्लुक्-स्लुक् च **हे अप्प !** ।

**[ हे अप्पं ! ]** आत्मन्-हे पूर्व० । आम० सि । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः पो वा' (२।५१) त्म० → प० । 'अनादौ०' (२।८९) द्वित्वं प्प० । 'मो वा' (४।२६४) न्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **हे अप्पं !** ॥४९॥

## जस्-शस्-ङसि-ङसां णो ॥ ८।३।५० ॥

राजन्शब्दात्परेषामेषां णो इत्यादेशो वा भवति ॥

जस्-रायाणो चिट्ठन्ति । पक्षे-राया ॥ शस्-रायाणो पेच्छ । पक्षे-राया राए ॥ ङसि-राइणो रण्णो आगओ । पक्षे-रायाओ रायाउ रायाहि रायाहिन्तो राया ॥ ङस्-राइणो रण्णो धणं । पक्षे-रायस्स ॥

**[ जस्शस्ङसिङसां णो ]** जस्शस्ङसिङस् षष्ठी आम् । णो प्रथमा सि ।

**[ रायाणो चिट्ठन्ति ]** राजन् । प्रथमा जस् । अनेन वा जस्० → णो० । 'अन्त्यव्य०' (१।११) न्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'जस्-शस्-ङसि-त्तो-दो०' (३।१२) दीर्घः-य० → या० **रायाणो** । **चिट्ठन्ति** पूर्ववत् [३।२०] । पक्षे-

**[ राया ]** राजन् । प्रथमा जस् । 'अन्त्यव्य०' (१।११) न्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः- य० → या० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **राया**।

**[ रायाणो पेच्छ ]** राजन् । द्वितीया शस् । शेषं पूर्ववत् । **रायाणो** । **पेच्छ** पूर्ववत् [३।२८] । पक्षे-

**[ राया राए ]** **राया** पूर्ववत् । द्वितीये 'टाण-शस्येत्' (३।१४) एत्त्वम् **राए** ।

**[ राइणो रण्णो आगओ ]** राजन् (२) । पञ्चमी ङसि । 'अन्त्यव्य०' (१।११) न्लुक् । अनेन वा ङसि० → णो० । 'इर्जस्य णो-णा-ङौ' (३।५) ज० → जि० । 'क-ग-च-ज०' (१।१७७) ज्लुक् **राइणो** ।

राजन् । पञ्चमी ङसि । 'अन्त्यव्य०' (१।११) न्लुक् । अनेन ङसि० → णो० । 'आजस्य टा-ङसि-ङस्सु सणाणोष्वण्' (३।५५) आज० → अण्० । 'लोकात्' (१।१।३) **रण्णो** । **आगओ** पूर्ववत् [३।१६] ।

**[ रायाओ ]** राजन् । पञ्चमी ङसि । 'ङसेस्त्तो-दो०' (३।८) ङसि० → दो० । 'अन्त्य०' (१।११) न्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'जस्-शस्-ङसि-त्तो-दो०' (३।१२) दीर्घः - य० → या० । 'क-ग-च-ज०' (१।१७७) द्लुक् **रायाओ** ।

**[ रायाउ ]** राजन् । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु०' (३।८) ङसि० → दु० । 'अन्त्यव्य०' (१।११) न्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः- य० → या० । 'क-ग-च-ज०' (१।१७७) द्लुक् **रायाउ** ।

**[ रायाहि ]** राजन् । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु-हि०' (३।८) ङसि० → हि० । 'अन्त्यव्य०' (१।११) न्लुक्। 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः-य० → या० **रायाहि** ।

**[ रायाहिन्तो ]** राजन् । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु-हि-हिन्तो०' (३।८) ङसि० → हिन्तो० । 'अन्त्यव्य०' (१।११) न्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'जस्-शस्०' (३।१२) दीर्घः- य० → या० **रायाहिन्तो** ।

**[ राया ]** राजन् । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु०' (३।८) ङसिलुक् । 'अन्त्यव्य०' (१।११) न्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - य० → या० **राया**।

**[ राइणो रण्णो धणं ]** राजन् । षष्ठी ङस् । शेषं पञ्चमी ङसिवत् । **राइणो रण्णो** । पक्षे-

**[ रायस्स ]** राजन् । षष्ठी ङस् । 'अन्त्यव्य०' (१।११) न्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'ङसः स्सः' (३।१०) ङस्० → स्स० **रायस्स** ॥५०॥

## टो णा ॥ ८।३।५१ ॥

राजन्शब्दात्परस्य टा इत्यस्य णा इत्यादेशो वा भवति ॥ राइणा रण्णा । पक्षे- राएण कयं ॥

**[ टो णा ]** टा षष्ठी ङस् । णा प्रथमा सि ।

**[ राइणा ]** राजन् । तृतीया टा । 'अन्त्यव्य०' (१।११) न्लुक् । अनेन वा टा० → णा० । **'इर्जस्य णो-णा-ङौ'** (३।५२) ज० → जि० । 'क-ग-च-ज०' (१।१७७) ज्लुक् **राइणा** ।

**[ रण्णा ]** राजन् । तृतीया टा । 'अन्त्यव्य०' (१।११) न्लुक् । अनेन टा० → णा० । 'आजस्य टा-ङसि-ङस्सु सणाणोष्वण्' (३।५५) आज० → अण्० । 'लोकात्' (१।१।३) रण्० **रण्णा** । पक्षे-

**[ राएण कयं ]** राजन् । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । 'अन्त्यव्य०' (१।११) न्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'टाण-शस्येत्' (३।१४) एत्त्वम् **राएण** । **कयं** पूर्ववत् [२।११४] ॥५१॥

## इर्जस्य णो-णा-ङौ ॥ ८।३।५२ ॥

राजन्शब्दसम्बन्धिनो जकारस्य स्थाने णो-णा-ङिषु परेषु इकारो वा भवति ॥

राइणो चिट्ठन्ति पेच्छ आगओ धणं वा । राइणा कयं । राइम्मि । पक्षे-रायाणो । रण्णो । रायणा । राएण । रायम्मि ॥

**[ इर्जस्य ]** इ प्रथमा सि । ज षष्ठी ङस् ।

**[ णोणाङौ ]** णो-णा-ङि सप्तमी ङि ।

**[ राइणो चिट्ठन्ति पेच्छ आगओ धणं वा ]** राजन् (४) । प्रथमा जस् - द्वितीया शस्-पञ्चमी ङसि-षष्ठी ङस् । 'जस्-शस्-ङसि-ङसां णो' (३।५०) जसादिविभक्तिस्थाने णो । अनेन वा ज० → जि० । 'क-ग-च-ज०' (१।१७७) ज्लुक् **राइणो** । **चिट्ठन्ति** पूर्ववत् [३।२०] । **पेच्छ** पूर्ववत् [३।२८] । **आगओ** पूर्ववत् [३।१६] । धनं । 'नो णः' (१।२२८) नं० → णं० **धणं** ।

**[ राइणा कयं ]** राजन् । तृतीया टा । 'अन्त्यव्य०' (१।११) न्लुक् । 'टो णा' (३।५१) टा० → णा० । अनेन वा ज० → जि० । 'क-ग-च-ज०' (१।१७७) ज्लुक् **राइणा** । **कयं** पूर्ववत् [२।११४] ।

**[ राइम्मि ]** राजन् । सप्तमी ङि । 'अन्त्यव्य०' (१।११) न्लुक् । अनेन वा ज० → जि० । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'डे-म्मि ङेः' (३।११) ङि० → म्मि० **राइम्मि** । पक्षे-

**[ रायाणो ]** राजन् । प्रथमा जस् - द्वितीया शस् । 'जस्-शस्-ङसि-ङसां णो' (३।५०) जस्०-शस्० → णो० । 'अन्त्यव्य०' (१।११) न्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः- य० → या० **रायाणो** ।

**[ रण्णो ]** राजन् । पञ्चमी ङसि - षष्ठी ङस् वा । 'अन्त्यव्य०' (१।११) न्लुक् । 'जस्-शस्-ङसि-ङसां णो' (३।५०) ङसि० - ङस्० → णो० । 'आजस्य टा-ङसि-ङस्सु०' (३।५५) आज० → अण्० । 'लोकात्' (१।१।३) रण्० **रण्णो** ।

**[ रायणा ]** राजन् । तृतीया टा । 'अन्त्यव्य०' (१।११) न्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'टो णा' (३।५१) टा० → णा० **रायणा** ।

**[ राएण ]** राजन् । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । 'अन्त्यव्य०' (१।११) न्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'टाण-शस्येत्' (३।१४) एत्त्वम् **राएण** ।

**[ रायम्मि ]** राजन् । सप्तमी ङि । 'डे-म्मि ङेः' (३।११) ङि० → म्मि० । 'अन्त्यव्य०' (१।११) न्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो०' (१।१८०) अ० → य० **रायम्मि** ॥५२॥

## इणममामा ॥ ८।३।५३ ॥

राजन्शब्दसम्बन्धिनो जकारस्य अमाम्भ्यां सहितस्य स्थाने इणम् इत्यादेशो वा भवति ॥

राइणं पेच्छ । राइणं धणं । पक्षे-रायं । राईणं ॥

**[ इणममामा ]** इणम् प्रथमा सि । अमाम् तृतीया टा ।

**[ राइणं पेच्छ ]** राजन् । द्वितीया अम् । 'अन्त्यव्य०' (१।११) न्लुक् । अनेन वा अम्सहितस्य जस्य इणम् । 'मोऽनु०' (१।२३) अनुस्वारः **राइणं** । **पेच्छ** पूर्ववत् [३।२८] ।

**[ राइणं धणं ]** राजन् । षष्ठी आम् । 'अन्त्यव्य०' (१।११) न्लुक् । अनेन वा आम्सहितस्य जस्य इणम् । 'मोऽनु०' (१।२३) अनुस्वारः **राइणं** । धनं । 'नो णः' (१।२२८) नं० → णं० **धणं** । पक्षे-

**[ रायं ]** राजन् । द्वितीया अम् । 'अन्त्यव्यञ्जनस्य' (१।११) न्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'अमोऽस्य' (३।५) अलुक् -अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **रायं** ।

**[ राईणं ]** राजन् । षष्ठी आम् । 'अन्त्य०' (१।११) न्लुक् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'ईद्भिस्भ्यसाम्सुपि' (३।५४) ज० → जी० । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'क्त्वा-स्यादेर्ण-स्वोर्वा' (१।२७) अनुस्वारः **राईणं** ॥५३॥

## ईद्भिस्भ्यसाम्सुपि ॥ ८।३।५४ ॥

राजन्शब्दसम्बन्धिनो जकारस्य भिसादिषु परतो वा ईकारो भवति ॥

भिस्-राईहि । भ्यस्-राईहिन्तो राईसुन्तो । आम्-राईणं । सुप्-राईसु । पक्षे-रायाणेहि इत्यादि ॥

**[ ईद्भिस्भ्यसाम्सुपि ]** ईत् प्रथमा सि । भिस्-भ्यस्-आम्-सुप् सप्तमी ङि ।

**[ राईहि ]** राजन् । तृतीया भिस् । 'अन्त्य०' (१।११) न्लुक् । अनेन वा ज० → जी० । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हि० राईहि ।

**[ राईहिन्तो राईसुन्तो ]** राजन् (२) । पञ्चमी भ्यस् । 'अन्त्यव्य०' (१।११) न्लुक् । अनेन वा ज० → जी० । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'भ्यसस्त्तो-दो-दु-हि-हिन्तो-सुन्तो' (३।९) भ्यस्० → हिन्तो०-सुन्तो० **राईहिन्तो राईसुन्तो** ।

**[ राईणं ]** राजन् । षष्ठी आम् । 'अन्त्यव्य०' (१।११) न्लुक् । 'टा-आमोर्णः' (३।६) आम्० → ण० । अनेन वा ज० → जी० । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'क्त्वा-स्यादे०' (१।२७) अनुस्वारः **राईणं** ।

**[ राईसु ]** राजन् । सप्तमी सुप् । 'अन्त्यव्य०' (१।११) न्लुक् । अनेन वा ज० → जी० । 'क-ग-च-ज०' (१।१७७) ज्लुक् **राईसु** । पक्षे-

**[ रायाणेहि ]** राजन् । तृतीया भिस् । 'पुंस्यन आणो राजवच्च' (३।५६) अन्० → आण० । 'लोकात्' (१।१।३) राजाण । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० । 'भिस्-भ्यस्-सुपि' (३।१५) एत्वं - ण० → णे० । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हि० **रायाणेहि** ॥५४॥

## आजस्य टा-ङसि-ङस्सु सणाणोष्वण् ॥ ८।३।५५ ॥

राजन्शब्दसम्बन्धिन आज इत्यवयवस्य टा-ङसि-ङस्सु णा-णो इत्यादेशापन्नेषु परेषु अण् वा भवति ॥

रण्णा राइणा कयं । रण्णो राइणो आगओ धणं वा ॥ टा-ङसि-ङस्स्विति किम् ? रायाणो चिट्ठन्ति पेच्छ वा ॥ सणाणोष्विति किम् ? राएण । रायाओ । रायस्स ॥

**[ आजस्य टाङसिङस्सु ]** आज षष्ठी ङस् । टा-ङसि-ङस् सप्तमी सुप् ।

**[ सणाणोष्वण् ]** सणाणो सप्तमी सुप् । अण् प्रथमा सि ।

**[ रण्णा राइणा कयं ]** राजन् । तृतीया टा । 'अन्त्यव्य०' (१।११) न्लुक् । 'टो णा' (३।५१) टा० → णा० । अनेन वा आज० → अण्० । 'लोकात्' (१।१।३) रण्० **रण्णा** । पक्षे- राजन् । तृतीया टा । 'अन्त्यव्य०' (१।११) न्लुक्। 'टो णा' (३।५१) टा० → णा० । 'इर्जस्य णो-णा-ङौ' (३।५२) ज० → जि० । 'क-ग-च-ज०' (१।१७७) ज्लुक् **राइणा**। **कयं** पूर्ववत् [२।११४] ।

**[ रण्णो राइणो आगओ धणं वा ]** राजन् । पञ्चमी ङसि - षष्ठी ङस् । 'जस्-शस्-ङसि-ङसां णो' (३।५०) ङसि-ङस्० → णो० । 'अन्त्यव्य०' (१।११) न्लुक् । अनेन वा आज० → अण्० । 'लोकात्' (१।१।३) रण्० **रण्णो**। पक्षे-राजन् । पञ्चमी ङसि - षष्ठी ङस् । 'जस्-शस्-ङसि-ङसां णो' (३।५०) ङसि०-ङस्० → णो० । 'अन्त्यव्य०' (१।११) न्लुक् । 'इर्जस्य णो-णा-ङौ' (३।५२) ज० → जि० । 'क-ग-च-ज०' (१।१७७) ज्लुक् **राइणो** । **आगओ** पूर्ववत् [३।१६] ।

धन । प्रथमा सि । 'नो णः' (१।२२८) न० → ण० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **धणं** ।

**[ रायाणो चिट्ठन्ति पेच्छ वा ]** राजन् । प्रथमा जस्-द्वितीया शस् वा । 'जस्-शस्०' (३।५०) जस्-शस्० → णो० । 'अन्त्यव्य०' (१।११) न्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - य० → या० **रायाणो** । **चिट्ठन्ति** पूर्ववत् [३।२०] । **पेच्छ** पूर्ववत् [३।२८] ।

**[ राएण ]** राजन् । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । 'अन्त्यव्य०' (१।११) न्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'टाण-शस्येत्' (३।१४) एत्त्वम् **राएण** ।

**[ रायाओ ]** राजन् । पञ्चमी ङसि । 'ङसेस्त्तो-दो०' (३।८) ङसि० → दो० । 'अन्त्यव्य०' (१।११) न्लुक् । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः - ज० → जा० । 'क-ग-च-ज०' (१।१७७) ज्लुक्-द्लुक् च **रायाओ** ।

**[ रायस्स ]** राजन् । षष्ठी ङस् । 'अन्त्यव्यञ्जनस्य' (१।११) न्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'ङसः स्सः' (३।१०) ङस्० → स्स० **रायस्स** ॥५५॥

### पुंस्यन आणो राजवच्च ॥ ८।३।५६ ॥

पुल्लिङ्गे वर्तमानस्याऽन्नन्तस्य स्थाने आण इत्यादेशो वा भवति । पक्षे - यथादर्शनं राजवत्कार्यं भवति । आणादेशे च 'अतः सेर्डोः' (३।२) इत्यादयः प्रवर्तन्ते । पक्षे- तु 'राज्ञः' (३।४९) - 'जस्-शस्-ङसि-ङसां णो' (३।५०) - 'टो णा' (३।५१) - 'इणममामा' (३।५३) इति प्रवर्तन्ते ॥

अप्पाणो । अप्पाणा । अप्पाणं । अप्पाणे । अप्पाणेण । अप्पाणेहि । अप्पाणाओ । अप्पाणासुन्तो । अप्पाणस्स । अप्पाणाण । अप्पाणम्मि । अप्पाणेसु । अप्पाण कयं ॥ पक्षे-राजवत् ।

अप्पा । अप्पो । हे अप्पा ! । हे अप्प ! । अप्पाणो चिट्ठन्ति । अप्पाणो पेच्छ । अप्पणा । अप्पेहिं । अप्पाणो । अप्पाओ । अप्पाउ । अप्पाहि । अप्पाहिन्तो । अप्पा । अप्पासुन्तो । अप्पणो धणं । अप्पाणं । अप्पे । [अप्पम्मि] । अप्पेसु ॥

रायाणो । रायाणा । रायाणं । रायाणे । रायाणेण । रायाणेहिं । रायाणाहिन्तो । रायाणस्स । रायाणाणं । रायाणम्मि । रायाणेसु । पक्षे- राया इत्यादि ॥

एवम् - जुवाणो । जुवाण - जणा । जुआ । बम्हाणो । बम्हा । अद्धाणो । अद्धा । उक्षन् → उच्छाणो । उच्छा । ग्रावन् → गावाणो । गावा । पूसाणो । पूसा । तक्खाणो । तक्खा । मुद्धाणो । मुद्धा । श्वन् → साणो । सा । सुकर्मणः पश्य → सुकम्माणे पेच्छ । निएइ कह सो सुकम्माणे । पश्यति स कथं सुकर्मण इत्यर्थः ॥ पुंसीति किम् ? शर्म → सम्मं ॥

**[ पुंस्यन आणो राजवच्च ]** पुंस् सप्तमी ङि । अन् षष्ठी ङस् । आण प्रथमा सि । राजवत् प्रथमा सि । च प्रथमा सि ।

**[ अप्पाणो ]** आत्मन् । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः पो वा' (२।५१) त्म० → प० । 'अनादौ०' (२।८९) पस्य द्वित्वं- प० → प्प० । अनेन वा अन्० → आण० इति । 'लोकात्' (१।१।३) अप्पाण । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **अप्पाणो** ।

**[ अप्पाणा ]** अप्पाण पूर्ववत् । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - ण० → णा० **अप्पाणा** ।

**[ अप्पाणं ]** अप्पाण पूर्ववत् । द्वितीया अम् । 'अमोऽस्य' (३।५) अलुक् - अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अप्पाणं** ।

**[ अप्पाणे ]** अप्पाण पूर्ववत् । द्वितीया शस् । 'टाण-शस्येत्' (३।१४) एत्त्वं - ण० → णे० । 'जस्-शसोर्लुक्' (३।४) शस्लुक् **अप्पाणे** ।

**[ अप्पाणेण ]** अप्पाण पूर्ववत् । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्त्वं - ण० → णे० **अप्पाणेण** ।

**[ अप्पाणेहि ]** अप्पाण पूर्ववत् । तृतीया भिस् । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हि० । 'भिस्-भ्यस्-सुपि' (३।१५) एत्त्वं - ण० → णे० **अप्पाणेहि** ।

**[ अप्पाणाओ ]** अप्पाण पूर्ववत् । पञ्चमी ङसि । 'ङसेस्त्तो-दो०' (३।८) ङसि० → दो० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'जस्-शस्-ङसि-त्तो-दो०' (३।१२) दीर्घः - ण० → णा० **अप्पाणाओ** ।

**[ अप्पाणाहिन्तो ]** अप्पाण पूर्ववत् । पञ्चमी भ्यस् । 'भ्यसस्त्तो-दो-दु-हि-हिन्तो-सुन्तो' (३।९) भ्यस्० → हिन्तो० । 'भ्यसि वा' (३।१३) दीर्घः - ण० → णा० **अप्पाणाहिन्तो** ।

**[ अप्पाणासुन्तो ]** अप्पाण पूर्ववत् । पञ्चमी भ्यस् । 'भ्यसस्त्तो-दो०' (३।९) भ्यस्० → सुन्तो० । 'भ्यसि वा' (३।१३) दीर्घः - ण० → णा० **अप्पाणासुन्तो** ।

**[ अप्पाणस्स ]** अप्पाण पूर्ववत् । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **अप्पाणस्स** ।

**[ अप्पाणाण ]** अप्पाण पूर्ववत् । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि-त्तो-दो०' (३।१२) दीर्घः- ण० → णा० **अप्पाणाण** ।

**[ अप्पाणम्मि अप्पाणे ]** अप्पाण पूर्ववत् । सप्तमी ङि । 'डे-म्मि ङेः' (३।११) ङि० → म्मि० अप्पाणम्मि । केचित् 'डे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् - **अप्पाणे** ।

**[अप्पाणेसु]** अप्पाण पूर्ववत् । सप्तमी सुप् । 'भिस्-भ्यस्-सुपि' (३।१५) एत्त्वं - ण० → णे० **अप्पाणेसु** ।

लुप्तस्याद्यपेक्षया समासेऽपि आण स्यात् ।

**[अप्पाण कयं]** आत्मना कृतमित्यर्थे **अप्पाण कयं** पूर्ववत् [२।१।१४] ।

अथ राजन्शब्दवत् आत्मन्रूपाणि । यथा -

**[अप्पा अप्पो]** आत्मन् (२) । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः पो वा' (२।५१) त्म० → प० । 'अनादौ०' (२।८९) पस्य द्वित्वं - प० → प्प० । 'राज्ञः' (३।४९) आ० । 'समानानां०' (१।२।१) दीर्घः । द्वितीये 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **अप्पा अप्पो** ।

**[हे अप्पा ! हे अप्प !]** हे आत्मन् (२) । आमन्त्रणे सि । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः०' (२।५१) त्म० → प० । 'अनादौ०' (२।८९) पस्य द्वित्वं-प० → प्प० । 'राज्ञः' (३।४९) आ० । 'समानानां०' (१।२।१) दीर्घः । 'अन्त्य०' (१।११) स्लुक् । पक्षे- 'अन्त्यव्य०' (१।११) न्लुक् **! हे अप्प !** ।

**[अप्पाणो चिट्ठन्ति]** आत्मन् । अप्प पूर्ववत् । प्रथमा जस् । 'जस्-शस्-ङसि-ङसां णो' (३।५०) जस्० → णो० । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः - प्प० → प्पा० **अप्पाणो** । **चिट्ठन्ति** पूर्ववत् [३।२०] ।

**[अप्पाणो पेच्छ]** आत्मन् । अप्प पूर्ववत् । द्वितीया शस् । 'जस्-शस्-ङसि-ङसां णो' (३।५०) शस्० → णो० । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः प्प० → प्पा० **अप्पाणो** । **पेच्छ** पूर्ववत् [३।२८] ।

**[अप्पणा]** अप्प पूर्ववत् । तृतीया टा । 'टो णा' (३।५१) टा० → णा० **अप्पणा** ।

**[अप्पेहिं]** अप्प पूर्ववत् । तृतीया भिस् । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं० । 'भिस्-भ्यस्-सुपि' (३।१५) एत्त्वं - प्प० → प्पे० **अप्पेहिं** ।

**[अप्पाणो]** आत्मन् । पञ्चमी ङसि । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः०' (२।५१) त्म० → प० । 'अनादौ०' (२।८९) पस्य द्वित्वं - प० → प्प० । 'जस्-शस्-ङसि०' (३।५०) ङसि० → णो० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - प्प० → प्पा० **अप्पाणो** ।

**[अप्पाओ]** आत्मन् । पञ्चमी ङसि । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः०' (२।५१) त्म० → प० । 'अनादौ०' (२।८९) पस्य द्वित्वं - प० → प्प० । 'ङसेस्त्तो-दो-दु०' (३।८) ङसि० → दो० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः - प्प० → प्पा० **अप्पाओ** ।

**[अप्पाउ]** आत्मन् । पञ्चमी ङसि । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः०' (२।५१) त्म० → प० । 'अनादौ०' (२।८९) पस्य द्वित्वं - प० → प्प० । 'ङसेस्त्तो-दो-दु०' (३।८) ङसि० → दु० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः - प्प० → प्पा० **अप्पाउ** ।

**[अप्पाहि]** आत्मन् । पञ्चमी ङसि । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः०' (२।५१) त्म० → प० । 'अनादौ०' (२।८९) पस्य द्वित्वं - प० → प्प० । 'ङसेस्त्तो-दो-दु-हि०' (३।८) ङसि० → हि० । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः - प्प० → प्पा० **अप्पाहि** ।

**[अप्पाहिन्तो]** आत्मन् । पञ्चमी ङसि । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः०' (२।५१) त्म० → प० । 'अनादौ०' (२।८९) पस्य द्वित्वं - प० → प्प० । 'ङसेस्त्तो-दो-दु०' (३।८) ङसि० → हिन्तो० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - प्प० → प्पा० **अप्पाहिन्तो** ।

**[ अप्पा ]** आत्मन् । पञ्चमी ङसि । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः०' (२।५१) त्म० → प० । 'अनादौ०' (२।८९) पस्य द्वित्वं - प० → प्प० । 'ङसेस्त्तो-दो-दु०' (३।८) ङसिलुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - प्प० → प्पा० **अप्पा** ।

**[ अप्पासुन्तो ]** आत्मन् । अप्पा पूर्ववत् । पञ्चमी भ्यस् । 'भ्यसस्त्तो-दो-दु-हि-हिन्तो-सुन्तो' (३।९) भ्यस्० → सुन्तो० **अप्पासुन्तो** ।

**[ अप्पणो धणं ]** आत्मन् । अप्प पूर्ववत् । षष्ठी ङस् । 'जस्-शस्-ङसि-ङसां णो' (३।५०) ङस्० → णो० **अप्पणो** । धनं । 'नो णः' (१।२२८) नं० → णं० **धणं** ।

**[ अप्पाणं ]** आत्मन् । षष्ठी आम् । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः०' (२।५१) त्म० → प० । 'अनादौ०' (२।८९) पस्य द्वित्वं - प० → प्प० । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - प्प० → प्पा० । 'क्त्वा-स्यादेर्ण-स्वोर्वा' (१।२७) अनुस्वारः **अप्पाणं** ।

**[ अप्पे अप्पम्मि ]** अप्प (२) । सप्तमी ङि । 'ङे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् **अप्पे** । पक्षे - ङि० → म्मि० **अप्पम्मि** ।

**[ अप्पेसु ]** अप्प । सप्तमी सुप् । 'भिस्-भ्यस्-सुपि' (३।१५) एत्त्वं - प्प० → प्पे० **अप्पेसु** ।

**[ रायाणो ]** राजन् । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । अनेन वा अन्० → आण० । 'लोकात्' (१।१।३) रायाण । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **रायाणो** ।

**[ रायाणा ]** राजन् । प्रथमा जस् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । अनेन वा अन्० → आण० । 'लोकात्' (१।१।३) रायाण । 'जस्-शस्-ङसि-त्तो-दो०' (३।१२) दीर्घः **रायाणा** ।

**[ रायाणं ]** रायाण पूर्ववत् । द्वितीया अम् । 'अमोऽस्य' (३।५) अलुक् अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **रायाणं** ।

**[ रायाणे ]** रायाण पूर्ववत् । द्वितीया शस् । 'टाण-शस्येत्' (३।१४) एत्त्वं - ण० → णे० । 'जस्-शसोर्लुक्' (३।४) शस्लुक् **रायाणे** ।

**[ रायाणेण ]** रायाण पूर्ववत् । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्त्वं - ण० → णे० **रायाणेण** ।

**[ रायाणेहिं ]** रायाण पूर्ववत् । तृतीया भिस् । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं० । 'भिस्-भ्यस्-सुपि' (३।१५) एत्त्वं - ण० → णे० **रायाणेहिं** ।

**[ रायाणाहिन्तो ]** रायाण पूर्ववत् । पञ्चमी ङसि - पञ्चमी भ्यस् । 'ङसेस्त्तो-दो-दु०' (३।८) ङसि० → हिन्तो० । 'भ्यसस्त्तो-दो-दु०' (३।९) भ्यस्० → हिन्तो० । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः - ण० → णा० **रायाणाहिन्तो** ।

**[ रायाणस्स ]** रायाण पूर्ववत् । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **रायाणस्स** ।

**[ रायाणाणं ]** रायाण पूर्ववत् । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः - ण० → णा० । 'क्त्वा-स्यादेर्ण-स्वोर्वा' (१।२७) अनुस्वारः **रायाणाणं** ।

**[ रायाणम्मि ]** रायाण पूर्ववत् । सप्तमी ङि । 'ङे-म्मि ङेः' (३।११) ङि० → म्मि० **रायाणम्मि** ।

**[ रायाणेसु ]** रायाण । सप्तमी सुप् । 'भिस्-भ्यस्-सुपि' (३।१५) एत्त्वं - ण० → णे० **रायाणेसु** । पक्षे-

**[ राया ]** राजन् । 'अन्त्य०' (१।११) न्लुक् । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'राज्ञः' (३।४९) आ । 'लोकात्' (१।१।३) या० । 'अन्त्य०' (१।११) स्लुक् **राया** इत्यादि ।

**[ जुवाणो ]** युवन् । प्रथमा सि । 'आदेर्यो जः' (१।२४५) यु० → जु० । अनेन वा अन्० → आण० । 'लोकात्' (१।१।३) जुवाण । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **जुवाणो** ।

लुप्तस्याद्यपेक्षया समासेऽपि आण आदेशो भवति ।

**[ जुवाणजणो ]** युवा चासौ जनश्च । युवन्-जन इत्यर्थे **जुवाणजणो** पूर्ववत् । पक्षे-

**[ जुआ ]** युवन् । प्रथमा सि । 'आदेर्यो जः' (१।२४५) यु० → जु० । 'अन्त्य०' (१।११) न्लुक् । 'राज्ञः' (३।४९) आ । 'क-ग-च-ज०' (१।१७७) व्लुक् । 'समानानां०' (१।२।१) आ । 'अन्त्य०' (१।११) स्लुक् **जुआ** ।

**[ बम्हाणो बम्हा ]** ब्रह्मन् । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'पक्ष्म-श्म-ष्म०' (२।७४) ह्म० → म्ह० । अनेन वा अन्० → आण० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **बम्हाणो** ।

पक्षे - ब्रह्मन् । प्रथमा सि । 'अन्त्य०' (१।११) न्लुक् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'पक्ष्म-श्म-ष्म०' (२।७४) ह्म० → म्ह० । 'राज्ञः' (३।४९) आ । 'समानानां०' (१।२।१) म्हा० । 'अन्त्यव्य०' (१।११) स्लुक् **बम्हा** ।

**[ अद्धाणो अद्धा ]** अध्वन् । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'अनादौ०' (२।८९) धस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वधस्य दः । अनेन वा अन्० → आण० । 'लोकात्' (१।१।३) अद्धाण । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **अद्धाणो** ।

पक्षे- अध्वन् । प्रथमा सि । 'अन्त्य०' (१।११) न्लुक् । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'अनादौ०' (२।८९) धस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वधस्य दः । 'राज्ञः' (३।४९) आ । 'लोकात्' (१।१।३) अद्धा । 'अन्त्यव्य०' (१।११) स्लुक् **अद्धा** ।

**[ उच्छाणो उच्छा ]** उक्षन् । प्रथमा सि । 'छोऽक्ष्यादौ' (२।१७) क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । अनेन वा अन्० → आण० । 'लोकात्' (१।१।३) उच्छाण । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **उच्छाणो** ।

पक्षे - उक्षन् । प्रथमा सि । 'अन्त्य०' (१।११) न्लुक् । 'छोऽक्ष्यादौ' (२।१७) क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'राज्ञः' (३।४९) आ । 'लोकात्' (१।१।३) उच्छा । 'अन्त्यव्य०' (१।११) स्लुक् **उच्छा** ।

**[ गावाणो गावा ]** ग्रावन् । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन वा अन्० → आण० । 'लोकात्' (१।१।३) गावाण । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **गावाणो** ।

पक्षे - ग्रावन् । प्रथमा सि । 'अन्त्य०' (१।११) न्लुक् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'राज्ञः' (३।४९) आ० । 'अन्त्यव्य०' (१।११) स्लुक् **गावा** ।

**[ पूसाणो पूसा ]** पूषन् । प्रथमा सि । 'श-षोः सः' (१।२६०) ष० → स० । अनेन वा अन्० → आण० । 'लोकात्' (१।१।३) पूसाण । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पूसाणो** ।

पक्षे- पूषन् । प्रथमा सि । 'अन्त्य०' (१।११) न्लुक् । 'श-षोः सः' (१।२६०) ष० → स० । 'राज्ञः' (३।४९) आ० । 'लोकात्' (१।१।३) पूसा । 'अन्त्य०' (१।११) स्लुक् **पूसा** ।

**[ तक्खाणो तक्खा ]** तक्षन् । प्रथमा सि । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्ष० → ख० । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । अनेन वा अन्० → आण० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तक्खाणो** ।

पक्षे- तक्षन् । प्रथमा सि । 'अन्त्य०' (१।११) न्लुक् । 'क्षः खः०' (२।३) क्ष० → ख० । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । 'राज्ञः' (३।४९) आ० । 'लोकात्' (१।१।३) तक्खा । 'अन्त्यव्य०' (१।११) स्लुक् **तक्खा** ।

**[ मुद्धाणो मुद्धा ]** मूर्धन् । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) मू० → मु० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) धस्य द्वित्वम् । 'द्वितीय०' (२।९०) पूर्वधस्य दः । अनेन वा अन्० → आण० । 'लोकात्' (१।१।३) मुद्धाण । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मुद्धाणो** ।

पक्षे - मूर्धन् । प्रथमा सि । 'अन्त्य०' (१।११) न्लुक् । 'ह्रस्वः संयोगे' (१।८४) मू० → मु० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) धस्य द्वित्वम् । 'द्वितीय०' (२।९०) पूर्वधस्य दः । 'राज्ञः' (३।४९) आ० । 'लोकात्' (१।१।३) मुद्धा । 'अन्त्यव्य०' (१।११) स्लुक् **मुद्धा** ।

**[ साणो सा ]** श्वन् । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'श-षोः सः' (१।२६०) श० → स० । अनेन वा अन्० → आण० । 'लोकात्' (१।१।३) साण । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **साणो** ।

पक्षे - श्वन् । प्रथमा सि । 'अन्त्य०' (१।११) न्लुक् । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'श-षोः सः' (१।२६०) श० → स० । 'राज्ञः' (३।४९) आ० । 'लोकात्' (१।१।३) सा । 'अन्त्य०' (१।११) स्लुक् **सा** ।

**[ सुकम्माणे पेच्छ ]** सुकर्मन् । द्वितीया शस् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) मस्य द्वित्वम् । अनेन वा अन्० → आण० । 'लोकात्' (१।१।३) सुकम्माण । 'टाण-शस्येत्' (३।१४) एत्वं - ण० → णे० । 'जस्-शसोर्लुक्' (३।४) शस्लुक् **सुकम्माणे** । **पेच्छ** पूर्ववत् [३।२८] ।

**[ निएइ कह सो सुकम्माणे ] सुकम्माणे** पूर्ववत् ।

**[ सम्मं ]** शर्मन् । प्रथमा सि । 'श-षोः सः' (१।२६०) श० → स० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) मस्य द्वित्वम् । 'अन्त्यव्य०' (१।११) न्लुक् । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनुस्वारः (१।२३) अनुस्वारः **सम्मं** ॥५६॥

### आत्मनष्टो णिआ-णइआ ॥ ८।३।५७ ॥

आत्मनः परस्याष्टायाः स्थाने णिआ-णइआ इत्यादेशौ वा भवतः ॥

अप्पणिआ पाउसे उवगयम्मि । अप्पणिआ य विअड्डिखाणिआ । अप्पणइआ । पक्षे - अप्पाणेण ॥

**[ आत्मनष्टो णिआ-णइआ ]** आत्मन् पञ्चमी ङसि । टा षष्ठी ङस् । णिआ-णइआ प्रथमा औ ।

**[ अप्पणिआ पाउसे उवगयम्मि ]** आत्मन् । तृतीया टा । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः पो वा' (२।५१) त्म० → प० । 'अनादौ०' (२।८९) पस्य द्वित्वम् । 'अन्त्यव्य०' (१।११) न्लुक् । अनेन वा टा० → णिआ० **अप्पणिआ** ।

प्रावृष् । 'सर्वत्र०' (२।७९) र्लुक् । 'उदृत्वादौ' (१।१३१) वृ० → वु० । 'क-ग-च-ज०' (१।१७७) व्लुक् । 'दिक्-प्रावृषोः सः' (१।१९) ष० → स० । सप्तमी ङि । 'डे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'लोकात्' (१।१।३) से **पाउसे** ।

उपगत । सप्तमी ङि । 'पो वः' (१।२३१) प० → व० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'डे-म्मि ङेः' (३।११) ङि० → म्मि **उवगयम्मि** । आत्मनैव प्रावृषे उपगतायामित्यर्थः ।

**[ अप्पणिआ य विअड्डिखाणिआ ]** आत्मन् । तृतीया टा । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः०' (२।५१) त्म० → प० । 'अनादौ०' (२।८९) पस्य द्वित्वं - प० → प्प० । 'अन्त्यव्य०' (१।११) न्लुक् । अनेन वा टा० → णिआ० **अप्पणिआ** ।

च । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'अवर्णो०' (१।१८०) अ० → य० **य** ।

वितर्दि । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'संमर्द-वितर्दि-विच्छर्द-च्छर्दि-कपर्द-मर्दिते र्दस्य' (२।३६) र्दि० → डि० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं - ड्डि० । 'स्यम्-जस्-शसां लुक्' (४।३४४) स्लुक् **विअड्डि** ।

खानिता । प्रथमा सि । 'नो णः' (१।२२८) नि० → णि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अन्त्यव्य०' (१।११) स्लुक् **खाणिआ** । आत्मनैव वितर्दि - वेदिका खानितेत्यर्थः ।

**[ अप्पणइआ ]** अप्प पूर्ववत् । तृतीया टा । अनेन टा० → णइआ० **अप्पणइआ** । पक्षे-

**[ अप्पाणेण ]** आत्मन् । तृतीया टा । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'भस्मा-ऽऽत्मनोः०' (२।५१) त्म० → प० । 'अनादौ०' (२।८९) पस्य द्वित्वं - प० → प्प० । 'पुंस्यन आणो राजवच्च' (३।५६) अन्० → आण० । 'लोकात्' (१।१।३) अप्पाण । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्त्वं - ण० → णे० **अप्पाणेण** ॥५७॥

## अतः सर्वादेर्डेर्जसः ॥ ८।३।५८ ॥

सर्वादेरकारात्परस्य[1] जसः डित् ए इत्यादेशो भवति ॥

सव्वे । अन्ने । जे । ते । के । एक्के । कयरे । इयरे । एए ॥ अत इति किम् ? सव्वाओ रिद्धीओ[2] ॥ जस इति किम् ? सव्वस्स ॥

**[ अतः सर्वादेर्डेर्जसः ]** अत् पञ्चमी ङसि । सर्वादि पञ्चमी ङसि । डे प्रथमा सि । जस् षष्ठी ङस् ।

**[ सव्वे ]** सर्व । प्रथमा जस् । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वं - व० → व्व० । अनेन जस्० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) व्वे० **सव्वे** ।

**[ अन्ने ]** अन्य । प्रथमा जस् । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वं - न० → न्न० । अनेन जस्० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) न्ने० **अन्ने** ।

**[ जे ]** यद् । प्रथमा जस् । अनेन जस्० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अद्लुक् । 'आदेर्यो जः' (१।२४५) ये० → जे० **जे** ।

---

१. H. L. M. रदन्तात् । E. रतः ।

२. **सव्वाओ रिद्धीओ**, पत्ता सव्वेवि सयण-संबंधा । संसारे ता विरमसु, तत्तो जइ मुणसि अप्पाणं ॥ [वै० श० -२५]

**[ ते ]** तद् । प्रथमा जस् । अनेन जस्० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अद्लुक् **ते** ।

**[ के ]** किम् । प्रथमा जस् । 'किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । अनेन जस्० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) के **के** ।

**[ एक्के ]** एक । प्रथमा जस् । 'सेवादौ वा' (२।९९) कस्य द्वित्वं - क० → क्क० । अनेन जस्० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) क्के **एक्के** ।

**[ कयरे ]** कतर । प्रथमा जस् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । अनेन जस्० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् 'लोकात्' (१।१।३) रे **कयरे** ।

[1]**[ कयमे ]** कतम । प्रथमा जस् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । अनेन जस्० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) मे **कयमे** ।

**[ इयरे ]** इतर । प्रथमा जस् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । अनेन जस्० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) रे **इयरे** ।

**[ एए ]** एतद् । प्रथमा जस् । 'अन्त्यव्यञ्जनस्य' (१।११) द्लुक् । अनेन जस्० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) ते । 'क-ग-च-ज०' (१।१७७) त्लुक् **एए** ।

**[ सव्वाओ रिद्धीओ ]** सर्वा । प्रथमा जस् । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वं - वा० → व्वा० । 'स्त्रियामुदोतौ वा' (३।२७) जस्० → ओ० **सव्वाओ** ।

ऋद्धि । प्रथमा जस् । 'रिः केवलस्य' (१।१४०) ऋ० → रि० । 'स्त्रियामुदोतौ वा' (३।२७) जस्० → ओ० - पूर्वस्य च दीर्घः **रिद्धीओ** ।

**[ सव्वस्स ]** सर्व । षष्ठी ङस् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वं - व० → व्व० । 'ङसः स्सः' (३।१०) ङस्० → स्स० **सव्वस्स** ॥५८॥

## ङेः स्सिं-म्मि-त्थाः ॥ ८।३।५९ ॥

सर्वादेरकारात्परस्य ङेः स्थाने स्सिं-म्मि-त्थ एते आदेशा भवन्ति ॥

सव्वस्सिं सव्वम्मि सव्वत्थ । अन्नस्सिं अन्नम्मि अन्नत्थ । एवं सर्वत्र ॥ अत इत्येव - अमुम्मि ॥

**[ ङेः स्सिं-म्मि-त्थाः ]** ङि षष्ठी ङस् । स्सिं-म्मि-त्थ प्रथमा जस् ।

**[ सव्वस्सिं सव्वम्मि सव्वत्थ ]** सर्व (३) । सप्तमी ङि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वं - व० → व्व० । अनेन ङि० → स्सिं-म्मि-त्थ आदेशाः **सव्वस्सिं सव्वम्मि सव्वत्थ** ।

**[ अन्नस्सिं अन्नम्मि अन्नत्थ ]** अन्य (३) । सप्तमी ङि । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।९८) नस्य द्वित्वं - न० → न्न० । अनेन ङि० → स्सिं-म्मि-त्थ आदेशाः **अन्नस्सिं अन्नम्मि अन्नत्थ** ।

**[ अमुम्मि ]** अदस् । सप्तमी ङि । 'अन्त्य०' (१।११) स्लुक् । 'मुः स्यादौ' (३।८८) द० → मु० । 'डे-म्मि ङेः' (३।११) ङि० → म्मि० **अमुम्मि** ॥५९॥

---

१. A. कयमे उदाहरणम् ।

## नवाऽनिदमेतदो हिं ॥ ८।३।६० ॥

इदम् - एतद्वर्जितस्य(तात्) सर्वादेरतः परस्य ङेर्हिमादेशो वा भवति ॥

सव्वहिं । अन्नहिं । कहिं । जहिं । तहिं । बहुलाधिकारात् किं-यत्तद्भ्यः स्त्रियामपि काहिं । जाहिं । ताहिं । बाहुलकादेव 'किं-यत्तदोस्यमामि' (३।३३) इति ङीर्नास्ति । पक्षे- सव्वस्सिं । सव्वम्मि । सव्वत्थ इत्यादि ॥ स्त्रियां तु पक्षे - काए कीए । जाए जीए । ताए तीए ॥ इदमेतद्वर्जनं किम् ? इमस्सिं । एअस्सिं ॥

**[ नवाऽनिदमेतदो हिं ]** नवा प्रथमा सि । अनिदमेतद् पञ्चमी ङसि । हिं प्रथमा सि ।

**[ सव्वहिं ]** सर्व । सप्तमी ङि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वं - व० → व्व० । अनेन वा ङि० → हिं० **सव्वहिं** ।

**[ अन्नहिं ]** अन्य । सप्तमी ङि । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वं - न० → न्न० । अनेन वा ङि० → हिं० **अन्नहिं** ।

**[ कहिं ]** किम् । सप्तमी ङि । 'किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । अनेन वा ङि० → हिं० **कहिं** ।

**[ जहिं ]** यद् । सप्तमी ङि । 'आदेर्यो जः' (१।२४५) य० → ज० । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन वा ङि० → हिं० **जहिं** ।

**[ तहिं ]** तद् । सप्तमी ङि । 'अन्त्य०' (१।११) द्लुक् । अनेन वा ङि० → हिं० **तहिं** ।

बहुलाधिकारात् स्त्रियामपि किं-यत्तद्भ्यो हिं आदेशः स्यात् ।

**[ काहिं ]** किम् । सप्तमी ङि । 'किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । 'आत्' (२।४।१८) आप्प्र० → आ । अनेन वा ङि० → हिं० **काहिं** ।

**[ जाहिं ]** यद् । सप्तमी ङि । 'आदेर्यो जः' (१।२४५) य० → ज० । 'अन्त्यव्य०' (१।११) द्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । अनेन वा ङि० → हिं० **जाहिं** ।

**[ ताहिं ]** तद् । सप्तमी ङि । 'अन्त्यव्य०' (१।११) द्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ० । अनेन वा ङि० → हिं० **ताहिं** ।

बाहुलकवचनात् 'किं-यत्तदोस्यमामि' (३।३३) इति ङीर्निषेधः । पक्षे-

**[ सव्वस्सिं सव्वम्मि सव्वत्थ ]** सर्व (३) । सप्तमी ङि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वं - व० → व्व० । 'ङेः स्सिं-म्मि-त्थाः' (३।५९) ङि० → स्सिं-म्मि-त्थ आदेशाः **सव्वस्सिं सव्वम्मि सव्वत्थ** ।

**[ [1]अन्नस्सिं अन्नम्मि अन्नत्थ ]** अन्य (३) । सप्तमी ङि । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वं - न० → न्न० । 'ङेः स्सिं-म्मि-त्थाः' (३।५९) ङि० → स्सिं-म्मि-त्थ आदेशाः **अन्नस्सिं अन्नम्मि अन्नत्थ** ।

स्त्रीलिङ्गे विकल्पपक्षे । यथा -

---

१. A. अन्नस्सिं अन्नम्मि अन्नत्थ उदाहरणानि ।

**[ काए कीए ]** किम् (२) । किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । 'आत्' (२।४।१८) आप्प्र० → आ । सप्तमी ङि । 'टा-ङस्-ङेरदादिदेद्वा तु ङसेः' (३।२९) ङि० → ए० **काए** ।

किम् । सप्तमी ङि । 'किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । 'किं-यत्तदोस्यमामि' (३।३३) ङी । 'लुक्' (१।१०) अलोपः । 'लोकात्' (१।१।३) की । 'टा-ङस्-ङेरदादि०' (३।२९) ङि० → ए० **कीए** ।

**[ जाए जीए ]** यद् (२) । सप्तमी ङि । 'आदेर्यो जः' (१।२४५) य० → ज० । 'अन्त्यव्य०' (१।११) द्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'समानानां तेन०' (१।२।१) जा । 'टा-ङस्-ङेरदादि०' (३।२९) ङि० → ए० **जाए** ।

यद् । सप्तमी ङि । 'आदेर्यो जः' (१।२४५) य० → ज० । 'अन्त्यव्य०' (१।११) द्लुक् । 'किं-यत्तदोस्यमामि' (३।३३) ङी । 'लुक्' (१।१०) अलुक् । 'टा-ङस्-ङेरदादि०' (३।२९) ङि० → ए० **जीए** ।

**[ ताए तीए ]** तद् (२) । सप्तमी ङि । 'अन्त्यव्य०' (१।११) द्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ० । 'समानानां०' (१।२।१) ता । 'टा-ङस्-ङेरदादि०' (३।२९) ङि० → ए० **ताए** ।

तद् । सप्तमी ङि । 'अन्त्यव्य०' (१।११) द्लुक् । 'किं-यत्तदोस्यमामि' (३।३३) ङी । 'लुक्' (१।१०) अलुक् । 'टा-ङस्-ङेरदादि०' (३।२९) ङि० → ए० **तीए** ।

**[ इमस्सिं इमम्मि इमत्थ ]** इदम् । सप्तमी ङि । 'अन्त्य०' (१।११) म्लुक् । 'इदम इमः' (३।७२) इम० । 'ङेः स्सिं-म्मि-त्थाः' (३।५९) ङि० → स्सिं-म्मि-त्थ आदेशाः **इमस्सिं इमम्मि इमत्थ** ।

**[ एअस्सिं एअम्मि एअत्थ ]** एतद् । सप्तमी ङि । 'अन्त्यव्य०' (१।११) द्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'ङेः स्सिं-म्मि-त्थाः' (३।५९) ङि० → स्सिं-म्मि-त्थ आदेशाः **एअस्सिं एअम्मि एअत्थ** ॥६०॥

## आमो डेसिं ॥ ८।३।६१ ॥

सर्वादेरकारात्परस्य आमो डेसिमित्यादेशो वा भवति ॥

सव्वेसिं । अन्नेसिं । अवरेसिं । इमेसिं । एएसिं । जेसिं । तेसिं । केसिं । पक्षे - सव्वाण । अन्नाण । अवराण । इमाण । एआण । जाण । ताण । काण । बाहुलकात् स्त्रियामपि सर्वासाम्० → सव्वेसिं० । एवम्-अन्नेसिं । तेसिं ॥

**[ आमो डेसिं ]** आम् षष्ठी ङस् । डेसिं प्रथमा सि ।

**[ सव्वेसिं ]** सर्व । षष्ठी आम् । 'सर्वत्र ल०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वं - व० → व्व० । अनेन वा आम्० → डेसिं० → एसिं० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) व्वेसिं० **सव्वेसिं** ।

**[ अन्नेसिं ]** अन्य । षष्ठी आम् । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वं - न० → न्न० । अनेन वा आम्० → डेसिं० → एसिं० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) न्नेसिं० **अन्नेसिं** ।

**[ अवरेसिं ]** अपर । षष्ठी आम् । 'पो वः' (१।२३१) प० → व० । अनेन वा आम्० → डेसिं० → एसिं० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) रेसिं० **अवरेसिं** ।

**[ इमेसिं ]** इदम् । षष्ठी आम् । 'इदम इमः' (३।७२) इदम्० → इम० । अनेन वा आम्० → डेसिं० → एसिं० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) मेसिं० **इमेसिं** ।

**[ एएसिं ]** एतद् । षष्ठी आम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन वा आम्० → डेसिं० → एसिं० । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । 'लोकात्' (१।१।३) एसिं० **एएसिं** ।

**[ जेसिं ]** यद् । षष्ठी आम् । 'आदेर्यो जः' (१।२४५) य० → ज० । अनेन वा आम्० → डेसिं० → एसिं० । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । 'लोकात्' (१।१।३) जेसिं० **जेसिं** ।

**[ तेसिं ]** तद् । षष्ठी आम् । अनेन वा आम्० → डेसिं० → एसिं० । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । 'लोकात्' (१।१।३) तेसिं० **तेसिं** ।

**[ केसिं ]** किम् । षष्ठी आम् । 'किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । अनेन वा आम्० → डेसिं० → एसिं० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) केसिं० **केसिं** । पक्षे -

**[ सव्वाण ]** सव्व पूर्ववत् । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः' (३।१२) दीर्घः - व्व० → व्वा० **सव्वाण** ।

**[ अन्नाण ]** अन्न पूर्ववत् । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - न्न० → न्ना० **अन्नाण** ।

**[ अवराण ]** अवर पूर्ववत् । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - र० → रा० **अवराण** ।

**[ इमाण ]** इम पूर्ववत् । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः- म० → मा० **इमाण** ।

**[ एआण ]** एअ पूर्ववत् । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः- अ० → आ० **एआण** ।

**[ जाण ]** ज पूर्ववत् । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - ज० → जा० **जाण** ।

**[ ताण ]** त पूर्ववत् । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - त० → ता० **ताण** ।

**[ काण ]** क पूर्ववत् । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि०' (३।१२) क० → का० **काण** ।

**[ सव्वेसिं ]** सर्व । षष्ठी आम् । 'आत्' (२।४।१८) आप्प्र० → आ । 'समानानां०' (१।२।१) दीर्घः । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वं-वा० → व्वा० । अनेन स्त्रियामपि आम्० → डेसिं० → एसिं० । 'डित्यन्त्य०' (२।१।११४) आलुक् । 'लोकात्' (१।१।३) व्वेसिं० **सव्वेसिं** ।

**[ अन्नेसिं ]** अन्य । षष्ठी आम् । 'आत्' (२।४।१८) आप्प्र० → आ । 'समानानां०' (१।२।१) दीर्घः । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वं - ना० → न्ना० । अनेन आम्० → डेसिं० → एसिं० । 'डित्यन्त्य०' (२।१।११४) आलुक् । 'लोकात्' (१।१।३) न्नेसिं० **अन्नेसिं** ।

**[ तेसिं ]** तद् । षष्ठी आम् । 'अन्त्य०' (१।१।१) द्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'समानानां०' (१।२।१) दीर्घः । अनेन आम्० → डेसिं० → एसिं० । 'डित्यन्त्य०' (२।१।११४) आलुक् । 'लोकात्' (१।१।१३) तेसिं० **तेसिं** ॥६१॥

## किं-तद्भ्यां डासः ॥ ८।३।६२ ॥

किं-तद्भ्यां परस्य आमः स्थाने डास इत्यादेशो वा भवति ॥

कास । तास । पक्षे-केसिं । तेसिं ॥

**[ किं-तद्भ्यां डासः ]** किं-तद् पञ्चमी भ्याम् । डास प्रथमा सि ।

**[ कास केसिं ]** किम् । षष्ठी आम् । 'अन्त्यव्य०' (१।११) म्लुक् । अनेन वा आम्० → डास० → आस० इति । 'डित्यन्त्य०' (२।१।११४) इलुक् । 'लोकात्' (१।१।३) कास० **कास** । पक्षे- 'आमो डेसिं' (३।६१) आम्० → डेसिं० → एसिं० इति। 'डित्यन्त्य०' (२।१।११४) इलुक् । 'लोकात्' (१।१।३) केसिं० **केसिं** ।

**[ तास तेसिं ]** तद् । षष्ठी आम् । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन वा आम्० → डास्० → आस० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) तास० **तास** । पक्षे - तद् । षष्ठी आम् । 'आमो डेसिं' (३।६१) आम्० → डेसिं० → एसिं० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) तेसिं० **तेसिं** ॥६२॥

## किं-यत्तद्भ्यो ङसः ॥ ८।३।६३ ॥

एभ्यः परस्य ङसः स्थाने डास इत्यादेशो वा भवति ॥ 'ङसः स्सः' (३।१०) इत्यस्यापवादः । पक्षे सोऽपि भवति॥

कास कस्स । जास जस्स । तास तस्स ॥

बहुलाधिकारात् किं-तद्भ्यामाकारान्ताभ्यामपि डासादेशो वा । कस्या धनम् → कास धणं । तस्या धनम् → तास धणं। पक्षे - काए । जाए । ताए ॥

**[ किं-यत्तद्भ्यो ङसः ]** किं-यत्तद् पञ्चमी भ्यस् । ङस् षष्ठी ङस् ।

**[ कास कस्स ]** किम् (२) । षष्ठी ङस् । 'अन्त्यव्य०' (१।११) म्लुक् । अनेन वा ङस्० → डास० → आस० इति। 'डित्यन्त्य०' (२।१।११४) इलुक् । 'लोकात्' (१।१।३) कास० **कास** । पक्षे - किम् । षष्ठी ङस् । 'किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । 'ङसः स्सः' (३।१०) ङस्० → स्स० **कस्स** ।

**[ जास जस्स ]** यद् (२) । षष्ठी ङस् । 'आदेर्यो जः' (१।२४५) य० → ज० । 'अन्त्य०' (१।११) द्लुक् । अनेन वा ङस्० → डास० → आस० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) जास० **जास** । पक्षे - यद्। षष्ठी ङस् । 'आदेर्यो जः' (१।२४५) य० → ज० । 'अन्त्यव्य०' (१।११) द्लुक् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **जस्स** ।

**[ तास तस्स ]** तद् (२) । षष्ठी ङस् । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन वा ङस्० → डास० → आस० इति। 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) तास० तास । पक्षे - तद् । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० तस्स ।

**[ कास धणं ]** किम् । षष्ठी ङस् । 'अन्त्य०' (१।११) म्लुक् । 'लुक्' (१।१०) इकारलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'लोकात्' (१।१।३) का इति जाते बाहुलकात् आकारान्तादपि ङस्० → डास० → आस० इति । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । 'लोकात्' (१।१।३) कास० **कास** । धनं । 'नो णः' (१।२२८) नं० → णं० **धणं** ।

**[ तास धणं ]** तद् । षष्ठी ङस् । 'अन्त्यव्य०' (१।११) द्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'लोकात्' (१।१।३) ता इति जाते बाहुलकात् आकारान्तादपि ङस्० → डास० → आस० इति । 'डित्यन्त्य०' (२।१।११४) आलुक्। 'लोकात्' (१।१।३) तास० **तास** । **धणं** पूर्ववत् । पक्षे -

**[ काए ]** किम् । षष्ठी ङस् । 'अन्त्यव्य०' (१।११) म्लुक् । 'लुक्' (१।१०) इलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'टा-ङस्-ङेरदादिदेद्वा तु ङसेः' (३।२९) ङस्० → ए० **काए** ।

**[ जाए ]** यद् । षष्ठी ङस् । 'अन्त्यव्य०' (१।११) द्लुक् । 'आदेर्यो जः' (१।२४५) य० → ज० । 'आत्' (२।४।१८) आप्प्र० → आ । 'समानानां०' (१।२।१) दीर्घः । 'टा-ङस्-ङेरदादि०' (३।२९) ङस्० → ए० **जाए** ।

**[ ताए ]** तद् । षष्ठी ङस् । 'अन्त्यव्य०' (१।११) द्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'समानानां०' (१।२।१) दीर्घः । 'टा-ङस्-ङेरदादि०' (३।२९) ङस्० → ए० **ताए** ॥६३॥

## ईद्भ्यः स्सा-से ॥ ८।३।६४ ॥

किमादिभ्य ईदन्तेभ्यः परस्य ङसः स्थाने स्सा-से इत्यादेशौ वा भवतः ॥

'टा-ङस्-ङेरदादिदेद्वा तु ङसेः' (३।२९) इत्यस्यापवादः ॥ पक्षे अदादयोऽपि ॥

किस्सा । कीसे । कीअ कीआ कीइ कीए । जिस्सा । जीसे । जीअ जीआ जीइ जीए । तिस्सा । तीसे । तीअ तीआ तीइ तीए ॥

**[ ईद्भ्यः स्सा-से ]** ईत् पञ्चमी भ्यस् । स्सा-से प्रथमा औ ।

**[ किस्सा ]** किम् । षष्ठी ङस् । अनेन वा ङस्० → स्सा० । 'किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । 'किं-यत्तदोस्यमामि' (३।३३) ङीप्र० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) की० । 'ह्रस्वः संयोगे' (१।८४) की० → कि० **किस्सा** ।

**[ कीसे ]** किम् । षष्ठी ङस् । अनेन वा ङस्० → से० । 'किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । 'किं-यत्तदोस्यमामि' (३।३३) ङीप्र० । 'लुक्' (१।१०) कस्य अलोपः । 'लोकात्' (१।१।३) की० **कीसे** ।

**[ कीअ कीआ कीइ कीए ]** किम् (४) । षष्ठी ङस् । 'टा-ङस्-ङेरदादि०' (३।२९) ङस्० → अत्-आत्-इत्-एत् आदेशाः । 'किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । 'किं-यत्त०' (३।३३) ङीप्र० । 'लुक्' (१।१०) कस्य अलोपः । 'लोकात्' (१।१।३) **कीअ कीआ कीइ कीए** ।

**[ जिस्सा ]** यद् । षष्ठी ङस् । अनेन वा ङस्० → स्सा० । 'किं-यत्तदोस्यमामि' (३।३३) ङीप्र० । 'अन्त्य०' (१।११) द्लुक् । 'लुक्' (१।१०) यस्य अलोपः । 'लोकात्' (१।१।३) यी० । 'ह्रस्वः संयोगे' (१।८४) यी० → यि० । 'आदेर्यो जः' (१।२४५) यि० → जि० **जिस्सा** ।

**[ जीसे ]** यद् । षष्ठी ङस् । अनेन वा ङस्० → से० । 'अन्त्यव्य०' (१।११) द्लुक् । 'किं-यत्तदोस्यमामि' (३।३३) ङीप्र० । 'लुक्' (१।१०) यस्य अलोपः । 'लोकात्' (१।१।३) यी० । 'आदेर्यो जः' (१।२४५) यी० → जी० **जीसे** ।

**[ जीअ जीआ जीइ जीए ]** यद् (४) । षष्ठी ङस् । 'टा-ङस्-ङेरदादि०' (३।२९) ङस्० → अत्-आत्-इत्-एत् आदेशाः । 'अन्त्यव्य०' (१।११) द्लुक् । 'किं-यत्तदोस्यमामि' (३।३३) ङीप्र० । 'लुक्' (१।१०) यस्य अलोपः । 'लोकात्' (१।१।३) यी० । 'आदेर्यो जः' (१।२४५) यी० → जी० **जीअ जीआ जीइ जीए** ।

**[ तिस्सा ]** तद् । षष्ठी ङस् । अनेन वा ङस्० → स्सा० । 'किं-यत्तदो०' (३।३३) ङीप्र० । 'अन्त्यव्य०' (१।११) द्लुक् । 'लुक्' (१।१०) तस्य अलोपः । 'लोकात्' (१।१।३) ती० । 'ह्रस्वः संयोगे' (१।८४) ती० → ति० **तिस्सा** ।

**[ तीसे ]** तद् । षष्ठी ङस् । अनेन वा ङस्० → से० । 'अन्त्यव्य०' (१।११) द्लुक् । 'किं-यत्तदोस्यमामि' (३।३३) ङीप्र० । 'लुक्' (१।१०) तस्य अलोपः । 'लोकात्' (१।१।३) ती० **तीसे** ।

**[ तीअ तीआ तीइ तीए ]** तद् (४) । षष्ठी ङस् । 'टा-ङस्-ङेरदादि०' (३।२९) ङस्० → अत्-आत्-इत्-एत् आदेशाः । 'अन्त्यव्य०' (१।११) द्लुक् । 'किं-यत्तदो०' (३।३३) ङीप्र० । 'लुक्' (१।१०) तस्य अलोपः । 'लोकात्' (१।१।३) ती० **तीअ तीआ तीइ तीए** ॥६४॥

## ङेर्डाहे-डाला-इआ काले ॥ ८।३।६५ ॥

किं-यत्तद्भ्यः कालेऽभिधेये ङेः स्थाने आहे आला इति डितौ इआ इति च आदेशा वा भवन्ति ॥ हिं-स्सिं-म्मि-त्थानामपवादः ॥ पक्षे तेऽपि भवन्ति ॥

काहे काला कइआ । जाहे जाला जइआ । ताहे ताला तइआ ॥

[1]ताला जाअन्ति गुणा जाला ते सहिअएहिँ घिप्पंति ।
रविकिरणाणुग्गहिआइं हुन्ति कमलाइं कमलाइं ॥

पक्षे - कहिं । कस्सिं । कम्मि । कत्थ ॥

**[ ङेर्डाहे-डाला-इआ काले ]** ङि षष्ठी ङस् । डाहे-डाला-इआ प्रथमा जस् । काल सप्तमी ङि ।

**[ काहे काला कइआ ]** किम् (३) । सप्तमी ङि । अनेन वा ङि० → डाहे० → आहे० इति । 'किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) काहे । द्वितीये ङि० → डाला० → आला० इति । शेषं पूर्ववत् । **काला** । तृतीये किम् । सप्तमी ङि । अनेन वा ङि० → इआ० इति । 'किमः कस्त्र०' (३।७१) किम्० → क० **कइआ** ।

**[ जाहे जाला जइआ ]** यद् (३) । सप्तमी ङि । अनेन वा ङि० → डाहे० → आहे० इति **जाहे** । द्वितीये ङि० → डाला० → आला० इति । 'अन्त्यव्यञ्जनस्य' (१।११) द्लुक् । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'आदेर्यो जः' (१।२४५) या० → जा० **जाला** । तृतीये यद् । सप्तमी ङि । अनेन वा ङि० → इआ० इति । 'अन्त्यव्य०' (१।११) द्लुक्। 'आदेर्यो जः' (१।२४५) य० → ज० **जइआ** ।

**[ ताहे ताला तइआ ]** तद् (३) । सप्तमी ङि । अनेन वा ङि० → डाहे० → आहे० इति । द्वितीये ङि० → डाला० → आला० इति । 'अन्त्यव्य०' (१।११) द्लुक् । 'डित्यन्त्य०' (२।१।११४) तस्य अलोपः । 'लोकात्' (१।१।३) **ताहे ताला** । तृतीये तद् । सप्तमी ङि । अनेन वा ङि० → इआ इति । 'अन्त्यव्य०' (१।११) द्लुक् **तइआ** ।

[1]**[ ताला जाअन्ति गुणा............ ]**

अस्या व्याख्या - गुणास्तदा जायन्ते यदा सहृदयैर्गृह्यन्ते । तत्र दृष्टान्तः - रविकिरणानुगृहीतानि कमलानि कमलानि भवन्ति । पक्षे -

**[ कहिं ]** किम् । सप्तमी ङि । 'किमः कस्त्र०' (३।७१) किम्० → क० । 'नवाऽनिदमेतदो हिं' (३।६०) ङि० → हिं० **कहिं** ।

---

१. [शृ० प्र०- ७।३७ । का० प्र०- ७।१३५ । स० क० - द्वितीयः परिच्छेदः । ध्व० लो० - द्वितीयोद्योतः]
तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते ।
रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि ॥

**[ कस्सिं कम्मि कत्थ ]** किम् (३) । सप्तमी ङि । 'ङेः स्सिं-म्मि-त्थाः' (३।५९) ङि० → स्सिं-म्मि-त्थ आदेशाः । 'किमः कस्त्र०' (३।७१) किम्० → क० **कस्सिं कम्मि कत्थ** ॥६५॥

## ङसेर्म्हा ॥ ८।३।६६ ॥

किं-यत्तद्भ्यः परस्य ङसेः स्थाने म्हा इत्यादेशो वा भवति ॥

कम्हा । जम्हा । तम्हा । पक्षे-काओ । जाओ । ताओ ॥

**[ ङसेर्म्हा ]** ङसि षष्ठी ङस् । म्हा प्रथमा सि ।

**[ कम्हा ]** किम् । पञ्चमी ङसि । 'किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । अनेन वा ङसि० → म्हा० **कम्हा** ।

**[ जम्हा ]** यद् । पञ्चमी ङसि । 'आदेर्यो जः' (१।२४५) य० → ज० । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन वा ङसि० → म्हा० **जम्हा** ।

**[ तम्हा ]** तद् । पञ्चमी ङसि । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन वा ङसि० → म्हा० **तम्हा** । पक्षे -

**[ काओ ]** किम् । पञ्चमी ङसि । 'किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । 'ङसेस्त्तो-दो-दु-हि-हिन्तो-लुकः' (३।८) ङसि० → दो० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - **काओ** ।

**[ जाओ ]** यद् । पञ्चमी ङसि । 'अन्त्यव्य०' (१।११) द्लुक् । 'आदेर्यो जः' (१।२४५) य० → ज० । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः । 'ङसेस्त्तो-दो-दु-हि०' (३।८) ङसि० → दो० । 'क-ग-च-ज०' (१।१७७) द्लुक् **जाओ** ।

**[ ताओ ]** तद् । पञ्चमी ङसि । 'अन्त्यव्य०' (१।११) द्लुक् । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः । 'ङसेस्त्तो-दो-दु-हि०' (३।८) ङसि० → दो० । 'क-ग-च-ज०' (१।१७७) द्लुक् **ताओ** ॥६६॥

## तदो [1]डोः ॥ ८।३।६७ ॥

तदः परस्य ङसेर्डो इत्यादेशो वा भवति ॥ तो तम्हा ॥

**[ तदो डोः ]** तद् पञ्चमी ङसि । डो प्रथमा सि ।

**[ तो तम्हा ]** तद् । पञ्चमी ङसि । 'अन्त्य०' (१।११) द्लुक् । अनेन वा ङसि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **तो** । पक्षे- तद् । पञ्चमी ङसि । **'ङसेर्म्हा'** (३।६६) ङसि० → म्हा० । 'अन्त्यव्य०' (१।११) द्लुक् **तम्हा** ॥६७॥

## किमो डिणो-डीसौ ॥ ८।३।६८ ॥

किमः परस्य ङसेर्डिणो-डीस इत्यादेशौ वा भवतः ॥ किणो । कीस । कम्हा ॥

**[ किमो डिणो-डीसौ ]** किम् पञ्चमी ङसि । डिणो-डीस प्रथमा औ ।

**[ किणो ]** किम् । पञ्चमी ङसि । 'किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । अनेन वा ङसि० → डिणो० → इणो० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **किणो** ।

---

१. G. डो ।

**[ कीस ]** किम् । पञ्चमी ङसि । 'किमः कस्त्र०' (३।७१) किम्० → क० । अनेन वा ङसि० → डीस० → ईस० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **कीस** । पक्षे-

**[ कम्हा ]** किम् । पञ्चमी ङसि । 'किमः कस्त्र०' (३।७१) किम्० → क० । 'ङसेर्म्हा' (३।६६) ङसि० → म्हा० **कम्हा** ॥६८॥

## इदमेतत्किं-यत्तद्भ्यष्टो डिणा ॥ ८।३।६९ ॥

एभ्यः सर्वादिभ्योऽकारान्तेभ्यः परस्याष्टायाः स्थाने डित् इणाऽऽदेशो वा भवति ॥

इमिणा इमेण । एदिणा एदेण । किणा केण । जिणा जेण । तिणा तेण ॥

**[ इदमेतत्कियत्तद्भ्यष्टो डिणा ]** इदमेतत्कियत्तद् पञ्चमी भ्यस् । ट्(टा) षष्ठी ङस् । डिणा प्रथमा सि ।

**[ इमिणा इमेण ]** इदम् । तृतीया टा । 'इदम इमः' (३।७२) इदम्० → इम० । अनेन वा टा० → डिणा० → इणा० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **इमिणा** ।

पक्षे- इम पूर्ववत् । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण । 'टाण-शस्येत्' (३।१४) एत्त्वं - म० → मे० **इमेण** ।

**[ एदिणा एदेण ]** एतद् । तृतीया टा । 'अन्त्य०' (१।११) द्लुक् । 'तो दोनादौ शौरसेन्यामयुक्तस्य' (४।२६०) तस्य दः । अनेन वा टा० → डिणा० → इणा० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् **एदिणा** ।

पक्षे- एतद् । तृतीया टा । 'अन्त्यव्य०' (१।११) द्लुक् । 'तो दोनादौ शौरसेन्या०' (४।२६०) तस्य दः । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्त्वं -द० → दे० **एदेण** ।

**[ किणा केण ]** किम् । तृतीया टा । 'किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । अनेन वा टा० → डिणा० → इणा० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् **किणा** ।

पक्षे- किम् । तृतीया टा । 'किमः कस्त्र०' (३।७१) किम्० → क० । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्त्वं - क० → के० **केण** ।

**[ जिणा जेण ]** यद् । तृतीया टा । 'अन्त्यव्य०' (१।११) द्लुक् । 'आदेर्यो जः' (१।२४५) यस्य जः । अनेन वा टा० → डिणा० → इणा० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **जिणा** ।

पक्षे- यद् । तृतीया टा । 'अन्त्यव्य०' (१।११) द्लुक् । 'आदेर्यो जः' (१।२४५) यस्य जः । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्त्वं - ज० → जे० **जेण** ।

**[ तिणा तेण ]** तद् । तृतीया टा । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन वा टा० → डिणा० → इणा० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **तिणा** ।

पक्षे- तद् । तृतीया टा । 'अन्त्य०' (१।११) द्लुक् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'टाण-शस्येत्' (३।१४) एत्त्वं - त० → ते० **तेण** ॥६९॥

## तदो णः स्यादौ क्वचित् ॥ ८।३।७० ॥

तदः स्थाने स्यादौ परे ण आदेशो भवति । क्वचिल्लक्ष्यानुसारेण ॥

णं पेच्छ । तं पश्येत्यर्थः ॥ सोअइ अ णं रहुवई । तमित्यर्थः ॥ स्त्रियामपि - हत्थुन्नामिअ - मुही णं तिअडा । तां त्रिजटेत्यर्थः ॥ णेण भणिअं । तेन भणितमित्यर्थः ॥ तो णेण करयलट्ठिआ । तेनेत्यर्थः ॥ भणिअं च णाए । तयेत्यर्थः ॥ णेहिं कयं । तैः कृतमित्यर्थः ॥ णाहिं कयं । ताभिः कृतमित्यर्थः ॥

**[ तदो णः स्यादौ क्वचित् ]** तद् षष्ठी ङस् । ण प्रथमा सि । स्यादि सप्तमी ङि । क्वचित् प्रथमा सि ।

**[ णं पेच्छ ]** तद् । द्वितीया अम् । अनेन तद्० → ण० । 'अमोऽस्य' (३।५) अलुक्-अम्० → म्० । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **णं** । **पेच्छ** पूर्ववत् [३।२८] ।

[1]**[ सोअइ अ णं रहुवई ]** 'शुच शोके' (९९) शुच् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) शुच० । 'श-षोः सः' (१।२६०) शु० → सु० । 'युवर्णस्य गुणः' (४।२३७) सु० → सो० । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **सोअइ** । **णं** पूर्ववत् ।

रघुपति । प्रथमा सि । 'ख-घ-थ-ध-भाम्' (१।१८७) घु० → हु० । 'पो वः' (१।२३१) प० → व० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अक्लीबे सौ' (३।१९) दीर्घः - इ० → ई० । 'अन्त्यव्य०' (१।११) स्लुक् **रहुवई** ।

[2]तो विलविअनित्थैामं गलंतहिययपरिसुन्नलोअणजुयलं ।
महुरं आसासंती हत्थुन्नामियमुही भणइ णं तिअडा ॥१॥

अस्या व्याख्या - हस्तेन उन्नामितमूर्ध्वीकृतं मुखं यया सा, एवंविधा त्रिजटा-रावणभगिनी तां शी(सी)तां मधुरं यथा स्यात्तथा आसासंती वर्त्तते, किंविशिष्टां शी(सी)तां ? विलपितेन निस्थामा-कृशा विलपितनिस्थामा, ताम्, पुनः किंविशिष्टां ? गलित(गलद्)हृदयपरिशून्यलोचनयुगलां इति गाथार्थः ॥१॥

**[ हत्थुन्नामिअमुही ]** हस्तोन्नामितमुखी । प्रथमा सि । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्तो० → थो० । 'ह्रस्वः संयोगे' (१।८४) थो० → थु० । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'ख-घ-थ०' (१।१८७) खी० → ही० । 'अन्त्य०' (१।११) स्लुक् **हत्थुन्नामिअमुही** ।

**[ णं ]** तद् । द्वितीया अम् । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन स्त्रियामपि तस्य णः- णा इति । 'ह्रस्वोऽमि' (३।३६) ण० । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **णं** ।

**[ तिअडा ]** त्रिजटा । प्रथमा सि । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'टो डः' (१।१९५) टा० → डा० । 'अन्त्यव्य०' (१।११) स्लुक् **तिअडा** ।

**[ णेण भणिअं ]** तद् । तृतीया टा । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन तस्य ण० । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्वं - ण० → णे० **णेण** । भणितं । 'क-ग-च-ज०' (१।१७७) त्लुक् **भणिअं** ।

---

१. **सोअइ अ णं रहुवई** विरलाङ्गुलिगलिअकिरणधारावअरम् । वअणे विमलुज्जोअं दररोत्तूण सलिलञ्जलिं व णिमेन्तो ॥
[से० ब० - १।४१]

शोचति चैनं रघुपतिर्विरलाङ्गुलिगलितकिरणधाराप्रकरम् । वदने विमलोद्योतं दररुदित्वा सलिलाञ्जलिमिव नियोजयत् ॥

२. [से० ब० - ११।८७]

ततो विलपितनिस्पन्दां गलद्धृदयपरिशून्यलोचनयुगलाम् । मधुरमाश्वासयन्ती हस्तोन्नामितमुखी भणत्येनां त्रिजटा ॥

३. पाठां० - से० ब० - णिप्फन्दं ।

**[ तो णेण करयलट्ठिआ ]** तद् । पञ्चमी ङसि । 'तदो डोः' (३।६७) ङसि० → डो० → ओ० । 'अन्त्यव्य०' (१।११) द्लुक् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **तो** । **णेण** पूर्ववत् ।

करतलस्थिता । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । स्थाधातुः । 'स्थष्ठा-थक्क०' (४।१६) स्थस्य ठः - स्थि० → ठि० । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अन्त्यव्य०' (१।११) स्लुक् **करयलट्ठिआ** ।

**[ भणिअं च णाए ]** **भणिअं** पूर्ववत् । तद् । तृतीया टा । 'अन्त्यव्य०' (१।११) द्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । अनेन ता० → णा० । 'टा-ङस्-ङेरदादि०' (३।२९) टा० → ए० **णाए** ।

**[ णेहिं कयं ]** तद् । तृतीया भिस् । 'अन्त्य०' (१।११) द्लुक् । अनेन त० → ण० । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं० । 'भिस्-भ्यस्-सुपि' (३।१५) एत्त्वं- ण० → णे० **णेहिं** । **कयं** पूर्ववत् [२।१११४] ।

**[ णाहिं कयं ]** तद् । तृतीया भिस् । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन त० → ण० । 'आत्' (२।४।१८) आप्प्र० → आ । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं० **णाहिं** । **कयं** पूर्ववत् [२।१११४] ॥७०॥

## किमः कस्त्र-तसोश्च ॥ ८।३।७१ ॥

किमः को भवति, स्यादौ त्र-तसोश्च परयोः ॥

को । के । कं । के । केण ॥ त्र-कत्थ ॥ तस्-कओ । कत्तो । कदो ॥

**[ किमः कस्त्र-तसोश्च ]** किम् षष्ठी ङस् । क प्रथमा सि । त्र-तस् सप्तमी ओस् । च प्रथमा सि ।

**[ को ]** किम् । प्रथमा सि । अनेन किम्० → क० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **को** ।

**[ के ]** किम् । प्रथमा जस् । अनेन किम्० → क० । 'अतः सर्वादेर्डेर्जसः' (३।५८) जस्० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) के० **के** ।

**[ कं ]** किम् । द्वितीया अम् । अनेन किम्० → क० । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **कं** ।

**[ के ]** किम् । द्वितीया शस् । अनेन किम्० → क० । 'टाण-शस्येत्' (३।१४) एत्त्वं- क० → के० । 'जस्-शसोर्लुक्' (३।४) शस्लुक् **के** ।

**[ केण ]** किम् । तृतीया टा । अनेन किम्० → क० । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्त्वं - क० → के० **केण** ।

**[ कत्थ ]** किम् । सप्तमी ङि । अनेन किम्० → क० । 'सप्तम्याः' (७।२।९४) त्रप्प्र० । 'त्रपो हि-ह-त्थाः' (२।१६१) त्रप्० → त्थ० **कत्थ** ।

**[ कओ ]** किम् । किमद्व्यादिसर्वाद्यवैपुल्य०' (७।२।८९) तस्प्र० । अनेन किम्० → क० । 'सो रुः' (२।१।७२) स० → रु० । 'रः पदान्ते०' (१।३।५३) विसर्गः । 'अतो डो विसर्गस्य' (१।३७) विसर्गस्थाने डो० → ओ० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् **कओ** ।

**[ कत्तो ]** किम् । 'किमद्व्यादिसर्वाद्य०' (७।२।८९) तस्प्र० । अनेन किम्० → क० । 'त्तो दो तसो वा' (२।१६०) तस्स्थाने त्तो० **कत्तो** ।

**[ कदो ]** किम् । 'किमद्व्यादिसर्वाद्य०' (७।२।८९) तस्प्र० । अनेन किम्० → क० । 'त्तो दो तसो वा' (२।१६०) तस्स्थाने दो० **कदो** ॥७१॥

## इदम इमः ॥ ८।३।७२ ॥

इदमः स्यादौ परे इम आदेशो भवति ॥ इमो । इमे । इमं । इमे । इमेण । स्त्रियामपि - इमा ॥

**[ इदम इमः ]** इदम् षष्ठी ङस् । इम प्रथमा सि ।

**[ इमो ]** इदम् । प्रथमा सि । अनेन इदम्० → इम० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **इमो** ।

**[ इमे ]** इदम् । प्रथमा जस् । अनेन इदम्० → इम० । 'अतः सर्वादेर्डेर्जसः' (३।५८) जस्० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **इमे** ।

**[ इमं ]** इदम् । द्वितीया अम् । अनेन इदम्० → इम० । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **इमं** ।

**[ इमे ]** इदम् । द्वितीया शस् । अनेन इदम्० → इम० । 'टाण-शस्येत्' (३।१४) एत्त्वं- म० → मे० । 'जस्-शसोर्लुक्' (३।४) शस्लुक् **इमे** ।

**[ इमेण ]** इदम् । तृतीया टा । अनेन इदम्० → इम० । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्त्वं- म० → मे० **इमेण** ।

**[ इमा ]** इदम् । प्रथमा सि । अनेन इदम्० → इम० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **इमा** ॥७२॥

## पुं-स्त्रियोर्नवाऽयमिमिआ सौ ॥ ८।३।७३ ॥

इदम्शब्दस्य सौ परे अयमिति पुल्लिङ्गे-इमिआ इति स्त्रीलिङ्गे आदेशौ वा भवतः ॥

अहवायं कयकज्जो । इमिआ वाणिअधूआ । पक्षे-इमो । इमा ॥

**[ पुं-स्त्रियोर्नवाऽयमिमिआ सौ ]** पुं-स्त्री सप्तमी ओस् । नवा प्रथमा सि । अयमिमिआ प्रथमा औ । सि सप्तमी ङि।

अहवायं कयकज्जो मज्झ कए मुक्कजीविओ सोमित्ती ।
निप्फलछूढभुअभरो नवर मए चेय लहुईकओ अप्पाणो ॥१॥

अस्यार्थः - लक्ष्मणस्य शक्तिभेदे रामोक्तिः । अथवायं- अयं सौमित्रिर्लक्ष्मणो मम कृते मुक्तजीवितो वर्त्तते । किंविशिष्टः सौमित्रिः ? कृतं कार्यं येन स कृतकार्यः । मया आत्मा लघुकीकृतः । आत्मा कथम्भूतः ? नवरं-केवलं - निप्फलो छूढो धृतो भुजभरो येन स इत्यर्थः ।

**[ अहवायं कयकज्जो ]** अथवा । प्रथमा सि । 'ख-घ-थ-ध-भाम्' (१।१८७) थस्य हः । 'अव्ययस्य' (३।२।६) सिलुप् **अहवा** । इदम् । प्रथमा सि । अनेन वा पुल्लिङ्गे इदम्० → अयं० । 'अन्त्यव्य०' (१।११) स्लुक् **अयं** । कृतकार्य। प्रथमा सि । 'ऋतोऽत्' (१।१२६) कृ० → क० । 'क-ग-च-ज०' (१।१७७) तलुक् । 'ह्रस्वः संयोगे' (१।८४) का० → क० । 'द्य-य्य-र्यां जः' (२।२४) र्य० → ज० । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कयकज्जो** ।

**[ इमिआ वाणिअधूआ ]** इदम् । प्रथमा सि । अनेन वा स्त्रीलिङ्गे इदम्० → इमिआ आदेशः । 'अन्त्यव्य०' (१।११) स्लुक् **इमिआ** । वाणिजदुहितृ । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'दुहितृ-भगिन्योर्धूआ-बहिण्यौ' (२।१२६) दुहितृ० → धूआ० इति । 'अन्त्यव्य०' (१।११) स्लुक् **वाणिअधूआ** । एषा वाणिजदुहितेत्यर्थः । पक्षे-

**[ इमो ]** इदम् । प्रथमा सि । 'इदम इमः' (३।७२) इदम्० → इम० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **इमो** ।

**[ इमा ]** इदम् । प्रथमा सि । 'इदम इमः' (३।७२) इदम्० → इम० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अन्त्यव्य०' (१।११) स्लुक् **इमा** ॥७३॥

## स्सिं-स्सयोरत् ॥ ८।३।७४ ॥

इदमः स्सिं-स्स इत्येतयोः परयोरद्वा भवति ॥

अस्सिं । अस्स । पक्षे- इमादेशोऽपि-इमस्सिं । इमस्स । बहुलाधिकारादन्यत्रापि भवति - एहि । एसु । आहि ॥ एभिः । एषु । आभिरित्यर्थः ॥

**[ स्सिंस्सयोरत् ]** स्सिं-स्स सप्तमी ओस् । अत् प्रथमा सि ।

**[ अस्सिं ]** इदम् । सप्तमी ङि । 'ङेः स्सिं-म्मि-त्थाः' (३।५९) ङि० → स्सिं० । अनेन वा इदम्० → अ० **अस्सिं** ।

**[ अस्स ]** इदम् । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० । अनेन वा इदम्० → अ० **अस्स** । पक्षे-

**[ इमस्सिं ]** इदम् । सप्तमी ङि । 'ङेः स्सिं-म्मि-त्थाः' (३।५९) ङि० → स्सिं० । 'इदम इमः' (३।७२) इदम्० → इम० **इमस्सिं** ।

**[ इमस्स ]** इदम् । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० । 'इदम इमः' (३।७२) इदम्० → इम० **इमस्स** ।

बहुलाधिकारात् स्सिं-स्सयोर्विनाऽन्यत्रापि अदादेशो भवति । यथा-

**[ एहि ]** इदम् । तृतीया भिस् । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हि० । अनेन इदम्० → अ० । 'भिस्-भ्यस्-सुपि' (३।१५) एत्त्वं **एहि** ।

**[ एसु ]** इदम् । सप्तमी सुप् । अनेन इदम्० → अ० । 'भिस्-भ्यस्-सुपि' (३।१५) एत्त्वं **एसु** ।

**[ आहि ]** इदम् । तृतीया भिस् । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हि० । अनेन इदम्० → अ० । 'आत्' (२।४।१८) आप्प्र० → आ **आहि** ॥७४॥

## ङेर्मेन हः ॥ ८।३।७५ ॥

इदमः कृतेमाऽऽदेशात् परस्य ङेः स्थाने मेन सह ह आदेशो वा भवति ॥ **इह** । पक्षे-इमस्सिं । इमम्मि ॥

**[ ङेर्मेन हः ]** ङि षष्ठी ङस् । म तृतीया टा । ह प्रथमा सि ।

**[ इह ]** इदम् । सप्तमी ङि । 'इदम इमः' (३।७२) इदम्० → इम० । अनेन वा मकारेण सहैव ङिस्थाने इह । पक्षे-

**[ इमस्सिं ]** इदम् । सप्तमी ङि । 'इदम इमः' (३।७२) इदम्० → इम० । 'ङेः स्सिं-म्मि-त्थाः' (३।५९) ङि० → स्सिं० **इमस्सिं** ।

**[ इमम्मि ]** इदम् । सप्तमी ङि । 'इदम इमः' (३।७२) इदम्० → इम० । 'ङेः स्सिं-म्मि-त्थाः' (३।५९) ङि० → म्मि० **इमम्मि** ॥७५॥

## न त्थः ॥ ८।३।७६ ॥

इदमः परस्य 'ङेः स्सिं-म्मि-त्थाः' (३।५९) इति प्राप्तः त्थो न भवति ॥ इह । इमस्सिं । इमम्मि ॥

**[ न त्थः ]** न प्रथमा सि । त्थ प्रथमा सि ।

**[ इह ]** पूर्ववत् [३।७५] ।

**[ इमस्सिं ]** पूर्ववत् [३।७४-७५] ।

**[ इमम्मि ]** पूर्ववत् [३।७५] ॥७६॥

## णोऽम्-शस्-टा-भिसि ॥ ८।३।७७ ॥

इदमः स्थाने अम्-शस्-टा-भिस्सु परेषु ण आदेशो वा भवति ॥

णं पेच्छ । णे पेच्छ । णेण । णेहिं कयं ॥ पक्षे-इमं । इमे । इमेण । इमेहिं ॥

**[ णोऽम्शस्टाभिसि ]** ण प्रथमा सि । अम्-शस्-टा-भिस् सप्तमी ङि ।

**[ णं पेच्छ ]** इदम् । द्वितीया अम् । अनेन वा इदम्० → ण० । 'अमोऽस्य' (३।५) अलुक् - अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **णं** । **पेच्छ** पूर्ववत् [३।२८] ।

**[ णे पेच्छ ]** इदम् । द्वितीया शस् । अनेन वा इदम्० → ण० । 'टाण-शस्येत्' (३।१४) एत्त्वं - ण० → णे० । 'जस्-शसोर्लुक्' (३।४) शस्लुक् **णे** । **पेच्छ** पूर्ववत् [३।२८] ।

**[ णेण ]** इदम् । तृतीया टा । अनेन वा इदम्० → ण० । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्त्वं - ण० → णे० **णेण** ।

**[ णेहिं कयं ]** इदम् । तृतीया भिस् । अनेन इदम्० → ण० । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं० । 'भिस्-भ्यस्-सुपि' (३।१५) एत्त्वं - ण० → णे० **णेहिं** । **कयं** पूर्ववत् [२।११४] ।

**[ इमं ]** इदम् । द्वितीया अम् । 'इदम इमः' (३।७२) इदम्० → इम० । 'अमोऽस्य' (३।५) अलुक् - अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **इमं** ।

**[ इमे ]** इदम् । द्वितीया शस् । 'इदम इमः' (३।७२) इदम्० → इम० । 'टाण-शस्येत्' (३।१४) एत्त्वं - म० → मे० । 'जस्-शसोर्लुक्' (३।८) शस्लुक् **इमे** ।

**[ इमेण ]** इदम् । तृतीया टा । 'इदम इमः' (३।७२) इदम्० → इम० । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्त्वं -म० → मे० **इमेण** ।

**[ इमेहिं ]** इदम् । तृतीया भिस् । 'इदम इमः' (३।७२) इदम्० → इम० । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं० । 'भिस्-भ्यस्-सुपि' (३।१५) एत्त्वं - म० → मे० **इमेहिं** ॥७७॥

## अमेणम् ॥ ८।३।७८ ॥

इदमोऽमा सहितस्य स्थाने इणम् इत्यादेशो वा भवति ॥ इणं पेच्छ । पक्षे-इमं ॥

**[ अमेणम् ]** अम् तृतीया टा । इणम् प्रथमा सि ।

**[ इणं पेच्छ ]** इदम् । द्वितीया अम् । अनेन वा अम्सहितस्य इदम्० → इणं **इणं** । **पेच्छ** पूर्ववत् [३।२८] । पक्षे -

**[ इमं ]** इदम् । द्वितीया अम् । 'इदम इमः' (३।७२) इदम्० → इम० । 'अमोऽस्य' (३।५) अलुक्-अम्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **इमं** ॥७८॥

## क्लीबे स्यमेदमिणमो च ॥ ८।३।७९ ॥

नपुंसकलिङ्गे वर्तमानस्येदमः स्यम्भ्यां सहितस्य इदम्-इणमो-इणम् च नित्यमादेशा भवन्ति ॥

इदं इणमो इणं धणं चिट्ठइ पेच्छ वा ॥

**[ क्लीबे स्यमेदमिणमो च ]** क्लीब सप्तमी ङि । स्यम् तृतीया टा । इदम्-इणमो प्रथमा औ । 'अव्ययस्य' (३।२।७) औलुप् । च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ इदं इणमो इणं धणं चिट्ठइ पेच्छ वा ]** इदम् । प्रथमा सि । अनेन सिसहितस्य इदम्० → **इदं**० । इदम् । द्वितीया अम् । अनेन अम्सहितस्य इदम्० → **इणमो**० । इदम् । द्वितीया अम् । अनेन अम्सहितस्य इदम्० → **इणम्**० । धनं । 'नो णः' (१।२२८) नं० → णं० **धणं** । **चिट्ठइ** पूर्ववत् [१।२३६] । **पेच्छ** पूर्ववत् [३।२८] ॥७९॥

## किमः किं ॥ ८।३।८० ॥

किमः क्लीबे वर्तमानस्य स्यम्भ्यां सह किं भवति ॥ किं कुलं तुह । [१]किं किं ते पडिहाइ ॥

**[ किमः किं ]** किम् षष्ठी ङस् । किम् प्रथमा सि ।

**[ किं कुलं तुह ]** किम् । प्रथमा सि । अनेन सिसहितस्य किम्शब्दस्य किं करणं कार्यान्तरबाधनार्थम्, तेन 'किमः कस्त्र-तसोश्च' (३।७१) इति [क] न स्यादेव-**किं** । कुल । प्रथमा सि । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कुलं** । युष्मद् । षष्ठी ङस् । 'तइ-तु-ते-तुम्हं-तुह-तुहं०' (३।९९) इत्यादिना ङस्सहितस्य युष्मदः तुह इति **तुह** ।

**[ किं किं ते पडिहाइ ]** किम् । प्रथमा सि । **किं** पूर्ववत् । युष्मद् । षष्ठी ङस् । 'तइ-तु-ते०' (३।९९) ङस्सहितस्य युष्मदः ते आदेशः **ते** । प्रतिभाति । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'प्रत्यादौ डः' (१।२०६) ति० → डि० । 'ख-घ-थ०' (१।१८७) भा० → हा० । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) ति० → इ० **पडिहाइ** । एवं द्वितीयायामपि ॥८०॥

## वेदं-तदेतदो ङसाम्भ्यां से-सिमौ ॥ ८।३।८१ ॥

इदम्-तद्-एतद् इत्येतेषां स्थाने ङस्-आम् इत्येताभ्यां सह यथासंख्यं से-सिम् इत्यादेशौ वा भवतः ॥

इदम्- से सीलं । से गुणा । अस्य शीलं गुणा वेत्यर्थः ॥ सिं उच्छाहो । एषामुत्साह इत्यर्थः ॥ तद्-से सीलं । तस्य तस्या वेत्यर्थः ॥ सिं गुणा । तेषां तासां वेत्यर्थः ॥ एतद्-से अहिअं । एतस्याहितमित्यर्थः ॥ सिं गुणा । सिं सीलं । एतेषां गुणाः शीलं वेत्यर्थः ॥

---

१. **किं किं ते पडिहासइ** सहीहि इअ पुच्छिआए मुद्धाए । पढमुग्ग[१]यदोहलिणीए णवर दइअं गया दिट्ठी ॥
[गा० स० - १।१५ । गा० को० - १।१३ । शृ० प्र० - २३।८६ । स० क० - ५।२३६]

किं किं ते प्रतिभासते सखीभिरिति पृष्टाया मुग्धायाः । प्रथमोद्गतदोहदिन्याः केवलं दयितं गता दृष्टिः ॥

१. पाठां० - शृ० प्र० - पढमुल्लअ० = प्रथमार्द्र० । स० क० - प्रथमोद्गत० ।

पक्षे- इमस्स । इमेसिं । इमाण । तस्स । तेसिं । ताण । एअस्स । एएसिं । एआण ॥ इदं-तदोरामापि से आदेशं कश्चिदिच्छति ॥

**[ वेदं-तदेतदो ङसाम्भ्यां से-सिमौ ]** वा प्रथमा सि । इदं-तदेतद् षष्ठी ङस् । ङसाम् तृतीया भ्याम् । से-सिम् प्रथमा औ ।

**[ से सीलं ]** इदम् । षष्ठी ङस् । अनेन वा ङस्सहितस्य इदमः स्थाने **से** इति । शील । प्रथमा सि । 'श-षोः सः' (१।२६०) शी० → सी० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सीलं** ।

**[ से गुणा ]** से पूर्ववत् । गुण । प्रथमा जस् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि-त्तो-दो०' (३।१२) दीर्घः **गुणा** ।

**[ सिं उच्छाहो ]** इदम् । षष्ठी आम् । अनेन वा आम्सहितस्य इदमः **सिं** । उच्छाह । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **उच्छाहो** ।

**[ से सीलं ]** तद् । षष्ठी ङस् । अनेन वा तद्स्थाने ङसा सह से इत्यादेशः **से** । **सीलं** पूर्ववत् ।

**[ सिं गुणा ]** तद् । षष्ठी आम् । अनेन वा तद्स्थाने आमा सह सिं इत्यादेशः **सिं** । **गुणा** पूर्ववत् ।

**[ से अहिअं ]** एतद् । षष्ठी ङस् । अनेन वा एतद्स्थाने ङसा सह से इत्यादेशः **से** ।

**[ सिं गुणा ]** एतद् । षष्ठी आम् । अनेन वा एतद्स्थाने आमा सह सिं इत्यादेशः **सिं** । **गुणा** पूर्ववत् ।

**[ सिं सीलं ]** एतद् । षष्ठी आम् । अनेन वा एतद्स्थाने आमा सह सिं इत्यादेशः **सिं** । **सीलं** पूर्ववत् । पक्षे-

**[ इमस्स ]** इदम् । षष्ठी ङस् । 'इदम इमः' (३।७२) इदम्० → इम० । 'ङसः स्सः' (३।१०) ङस्० → स्स० **इमस्स** ।

**[ इमेसिं ]** इदम् । षष्ठी आम् । 'इदम इमः' (३।७२) इदम्० → इम० । 'आमो डेसिं' (३।६१) आम्० → डेसिं० → एसिं० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् **इमेसिं** ।

**[ इमाण ]** इदम् । षष्ठी आम् । 'इदम इमः' (३।७२) इदम्० → इम० । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः - म० → मा० **इमाण** ।

**[ तस्स ]** तद् । षष्ठी ङस् । 'अन्त्यव्य०' (१।११) द्लुक् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **तस्स** ।

**[ तेसिं ]** तद् । षष्ठी आम् । 'अन्त्यव्य०' (१।११) द्लुक् । 'आमो डेसिं' (३।६१) आम्० → डेसिं० → एसिं० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् **तेसिं** ।

**[ ताण ]** तद् । षष्ठी आम् । 'अन्त्यव्य०' (१।११) द्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः- त० → ता० । 'टा-आमोर्णः' (३।६) आम्० → ण० **ताण** ।

**[ एअस्स ]** एतद् । षष्ठी ङस् । 'अन्त्यव्य०' (१।११) द्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **एअस्स** ।

**[ एएसिं ]** एतद् । षष्ठी आम् । 'अन्त्यव्य०' (१।११) द्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'आमो डेसिं' (३।६१) आम्० → डेसिं० → एसिं० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् **एएसिं** ।

**[ एआण ]** एतद् । षष्ठी आम् । 'अन्त्यव्य०' (१।११) द्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः- अ० → आ० । 'टा-आमोर्णः' (३।६) आम्० → ण० **एआण** ।

केचित् इदम्-तद्शब्दयोराम्योगेऽपि से आदेशमिच्छति । यथासंख्यं नाऽङ्गीकरोतीत्यर्थः ॥८१॥

## वैतदो ङसेस्तो-त्ताहे ॥ ८।३।८२ ॥

एतदः परस्य ङसेः स्थाने त्तो-त्ताहे इत्येतावादेशौ वा भवतः ॥

एत्तो । एत्ताहे । पक्षे-एआओ । एआउ । एआहि । एआहिन्तो । एआ ॥

**[ वैतदो ङसेस्तो-त्ताहे ]** वा प्रथमा सि । एतद् पञ्चमी ङसि । ङसि षष्ठी ङस् । त्तो-त्ताहे प्रथमा औ ।

**[ एत्तो ]** एतद् । पञ्चमी ङसि । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन वा ङसिस्थाने त्तो० । 'त्थे च तस्य लुक्' (३।८३) तस्य लुक् **एत्तो** ।

**[ एत्ताहे ]** एतद् । पञ्चमी ङसि । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन वा ङसिस्थाने त्ताहे । 'त्थे च तस्य लुक्' (३।८३) तस्य लुक् **एत्ताहे** ।

**[ एआओ ]** एतद् । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु-हि-हिन्तो-लुकः' (३।८) ङसि० → दो० । 'क-ग-च-ज०' (१।१७७) त-दयोर्लुक् । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः - अ० → आ० **एआओ** ।

**[ एआउ ]** एतद् । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु०' (३।८) ङसि० → दु० । 'क-ग-च-ज०' (१।१७७) त-दयोर्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - अ० → आ० **एआउ** ।

**[ एआहि ]** एतद् । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु-हि०' (३।८) ङसि० → हि० । 'क-ग-च-ज०' (१।१७७) त-दयोर्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः- अ० → आ० **एआहि** ।

**[ एआहिन्तो ]** एतद् । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु-हि-हिन्तो०' (३।८) ङसि० → हिन्तो० । 'क-ग-च-ज०' (१।१७७) त-दयोर्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः- अ० → आ० **एआहिन्तो** ।

**[ एआ ]** एतद् । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु-हि-हिन्तो-लुकः' (३।८) ङसिलुक् । 'क-ग-च-ज०' (१।१७७) त-दयोर्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - अ० → आ० **एआ** ॥८२॥

## त्थे च तस्य लुक् ॥ ८।३।८३ ॥

एतदस्त्थे परे चकारात् त्तो-त्ताहे इत्येतयोश्च परयोस्तस्य लुग् भवति ॥ एत्थ । एत्तो । एत्ताहे ॥

**[ त्थे च तस्य लुक् ]** त्थ सप्तमी ङि । च प्रथमा सि । त षष्ठी ङस् । लुक् प्रथमा सि ।

**[ एत्थ ]** एतद् । सप्तमी ङि । 'ङेः स्सि-म्मि-त्थाः' (३।५९) ङि० → त्थ० । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन तस्य लुक् **एत्थ** ।

**[ एत्तो ]** एतद् । पञ्चमी ङसि । 'अन्त्यव्य०' (१।११) द्लुक् । 'वैतदो ङसेस्तो-त्ताहे' (३।८२) ङसि० → त्तो० । अनेन तस्य लुक् **एत्तो** ।

**[ एत्ताहे ]** एतद् । पञ्चमी ङसि । 'अन्त्यव्य०' (१।११) द्लुक् । 'वैतदो ङसेस्तो-त्ताहे' (३।८२) ङसि० → त्ताहे० । अनेन तस्य लुक् **एत्ताहे** ॥८३॥

## एरदीतौ म्मौ वा ॥ ८।३।८४ ॥

एतद एकारस्य ङ्यादेशे म्मौ परे अदीतौ वा भवतः ॥ अयम्मि । ईअम्मि । पक्षे-एअम्मि ॥

**[ एरदीतौ म्मौ वा ]** ए षष्ठी ङस् । अदीत् प्रथमा औ । म्मि सप्तमी ङि । वा प्रथमा सि ।

**[ अयम्मि ]** एतद् । सप्तमी ङि । 'ङेः स्सि-म्मि-त्थाः' (३।५९) ङि० → म्मि० । 'अन्त्यव्य०' (१।११) द्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन वा ए० → अ० । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० **अयम्मि** ।

**[ ईअम्मि ]** एतद् । सप्तमी ङि । 'ङेः स्सि-म्मि-त्थाः' (३।५९) ङि० → म्मि० । 'अन्त्यव्य०' (१।११) द्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन वा ए० → ई० **ईअम्मि** । पक्षे-

**[ एअम्मि ]** एतद् । सप्तमी ङि । 'ङेः स्सि-म्मि-त्थाः' (३।५९) ङि० → म्मि० । 'अन्त्यव्य०' (१।११) द्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् **एअम्मि** ॥८४॥

## वैसेणमिणमो सिना ॥ ८।३।८५ ॥

एतदः सिना सह एस-इणम्-इणमो इत्यादेशा वा भवन्ति ॥

[१]सव्वस्स वि एस गई । सव्वाण वि पत्थिवाण एस मही । एस सहाओ च्चिअ ससहरस्स । एस सिरं । इणं । इणमो । पक्षे-एअं । एसा । एसो ॥

**[ वैसेणमिणमो सिना ]** वा प्रथमा सि । एसेणमिणमो प्रथमा जस् । सि तृतीया टा ।

**[ सव्वस्स वि एस गई ]** सर्व । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स०' । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । अपि । 'पदादपेर्वा' (१।४१) अलुक् । 'पो वः' (१।२३१) पि० → वि० **सव्वस्स वि** ।

एतद् । प्रथमा सि । अनेन वा सिना सह एतद्स्थाने एस इति **एस** ।

गति । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अक्लीबे सौ' (३।१९) दीर्घः - इ० → ई० । 'अन्त्यव्य०' (१।११) स्लुक् **गई** ।

**[ सव्वाण वि पत्थिवाण एस मही ]** सर्व । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि-त्तो-दो०' (३।१२) दीर्घः । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । अपि । 'पदादपेर्वा' (१।४१) अलुक् । 'पो वः' (१।२३१) पि० → वि० **सव्वाण वि** ।

पार्थिव । षष्ठी आम् । 'ह्रस्वः संयोगे' (१।८४) पा० → प० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । 'जस्-शस्-ङसि०' (३।१२) दीर्घः । 'टा-आमोर्णः' (३।६) आम्० → ण० **पत्थिवाण** ।

---

१. **सव्वस्स अ एस गई** ण उणो माणुण्णआण इअमवसाणं ।
अणुसरिसं ति भणन्ती आहन्तूण पडिआ थिरं थणअलसं ॥ [से० ब० - ११।११५]

सर्वस्य चैषा गतिर्न पुनर्मानोन्नतानामिदमवसानम् ।
अनुसदृशमिति भणन्ती आहत्य पतिता स्थिरं स्तनकलशम् ॥

एतद् । प्रथमा सि । अनेन वा सिना सह एतद्स्थाने एस इति **एस** ।

मही । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **मही** ।

**[ [1]एस सहाओ च्चिअ ससहरस्स ]** एस पूर्ववत् । स्वभाव । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'ख-घ-थ०' (१।१८७) भा० → हा० । 'क-ग-च-ज०' (१।१७७) व्लुक् । 'अत: सेर्डो:' (३।२) सि० → डो० → ओ० **सहाओ** ।

एव । 'णइ चेअ चिअ च्च अवधारणे' (२।१८४) एवस्थाने चिअ इति । 'सेवादौ वा' (२।९९) द्वित्वं **च्चिअ** ।

शशधर । षष्ठी ङस् । 'श-षो: स:' (१।२६०) शस्य स० - द्वितीयस्यापि शस्य स० । 'ख-घ-थ०' (१।१८७) ध०→ ह० । 'ङस: स्स:' (३।१०) ङस्० → स्स० **ससहरस्स** ।

**[ एस सिरं ]** एस पूर्ववत् । शिरस् । 'श-षो: स:' (१।२६०) शस्य स: । 'अन्त्यव्य०' (१।११) स्लुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वार: **सिरं** ।

**[ इणं ]** एतद् । प्रथमा सि । अनेन सिना सह एतद्स्थाने इणं **इणं** ।

**[ इणमो ]** एतद् । प्रथमा सि । अनेन सिना सह एतद्स्थाने इणमो **इणमो** । पक्षे-

**[ एअं ]** एतद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'क्लीबे स्वरान्म् से:' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वार: **एअं** ।

**[ एसा ]** एतद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । 'तदश्च त: सोऽक्लीबे' (३।८६) त० → स० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अन्त्यव्य०' (१।११) स्लुक् **एसा** ।

**[ एसो ]** एतद् । प्रथमा सि । 'अन्त्य०' (१।११) द्लुक् । 'तदश्च त: सोऽक्लीबे' (३।८६) त० → स० । 'अत: सेर्डो:' (३।२) सि० → डो० → ओ० **एसो** ॥८५॥

### तदश्च त: सोऽक्लीबे ॥ ८।३।८६ ॥

तद एतदश्च तकारस्य सौ परे अक्लीबे सो भवति ॥

सो पुरिसो । सा महिला । एसो पिओ । एसा मुद्धा ॥ सावित्येव - ते एए धन्ना । [2]ताओ(ता) एआओ महिलाओ ॥ अक्लीब इति किम् ? तं एअं [3]धणं ॥

**[ तदश्च त: सोऽक्लीबे ]** तद् षष्ठी ङस् । च प्रथमा सि । त् षष्ठी ङस् । स प्रथमा सि । अक्लीब सप्तमी ङि ।

**[ सो पुरिसो ]** तद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन त० → स० । 'अत: सेर्डो:' (३।२) सि० → डो० → ओ० **सो** ।

---

१. **एस सहाओ च्चिअ ससहरस्स** खीणस्स वंकिमा जं से । रिद्धीइं पंजला हुंति सुवुरिसा न उण विवयासु ॥ [अनु० अङ्क:-६६]
एष स्वभावश्चैव शशधरस्य क्षीणस्य वक्रिमा यत् तस्य । ऋद्ध्या प्राञ्जला भवन्ति सुपुरुषा न पुनर्विपत्सु ॥

२. **ताओ एआओ महिलाओ** माणुन्नय(यं) देइ मं अवमाणं । अणुसरिसं ति भणंती आहंतूण पडियथिरत्तणुच्छंगं ॥
[अनु० अङ्क:-६६]
ता एता महिला मानोन्नतं ददति मामपमानम् । अनुसदृशमिति भणन्त्य: आहत्वा पतितस्थिरत्वोत्सङ्गम् (?) ॥

३. सर्वमुद्रितेषु वणं ।

पुरुष । प्रथमा सि । 'पुरुषे रोः' (१।१११) रु० → रि० । 'श-षोः सः' (१।२६०) ष० → स० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पुरिसो** ।

**[ सा महिला ]** तद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन त० → स० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अन्त्यव्य०' (१।११) स्लुक् **सा** ।

महिला । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **महिला** ।

**[ एसो पिओ ]** एतद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन तस्य सः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **एसो** ।

प्रिय । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पिओ** ।

**[ एसा मुद्धा ]** एतद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन तस्य सः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अन्त्यव्य०' (१।११) स्लुक् **एसा** ।

मुग्धा । प्रथमा सि । 'क-ग-ट-ड०' (२।७७) ग्लुक् । 'अनादौ०' (२।८९) धस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वधस्य दः । 'अन्त्यव्य०' (१।११) स्लुक् **मुद्धा** ।

**[ ते एए धन्ना ]** एतद् । प्रथमा जस् । 'अन्त्यव्य०' (१।११) द्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अतः सर्वादेर्डेर्जसः' (३।५८) जस्० → डे० → ए० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **एए** ।

धन्य । प्रथमा जस् । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) नस्य द्वित्वम् । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः- न्न० → न्ना० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **धन्ना** ।

**[ ताओ( ता ) एआओ महिलाओ ]** तद् । प्रथमा जस् । 'अन्त्यव्य०' (१।११) द्लुक् । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः- त० → ता० **ता** ।

एतद् । प्रथमा जस् । 'अन्त्यव्य०' (१।११) द्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'स्त्रियामुदोतौ वा' (३।२७) जस्० → ओ० **एआओ** ।

महिला । प्रथमा जस् । 'स्त्रियामुदोतौ वा' (३।२७) जस्० → ओ० **महिलाओ** ।

**[ तं एअं धणं ]** तद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तं** ।

एतद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **एअं** । धनं । 'नो णः' (१।२२८) नं० → णं० **धणं** ॥८६॥

## वाऽदसो दस्य होऽनोदाम् ॥ ८।३।८७ ॥

अदसो दकारस्य सौ परे ह आदेशो वा भवति, तस्मिंश्च कृते 'अतः सेर्डोः' (३।२) इत्योत्वम्, 'शेषं संस्कृतवत्सिद्धम्' (४।४४८) इत्यतिदेशात् 'आत्' (२।४।१८) इत्याप्, 'क्लीबे स्वरान्म् सेः' (३।२) इति मश्च न भवति ॥

अह पुरिसो । अह महिला । अह वणं । अह मोहो परगुणलहुअयाइ ॥ अह णे हिअएण हसइ मारुयतणओ । असावस्मान् हसतीत्यर्थः ॥ अह कमलमुही ॥ पक्षे - उत्तरेण मुरादेशः । अमू पुरिसो । अमू महिला । अमुं वणं ॥

**[ वाऽदसो दस्य होऽनोदाम् ]** वा प्रथमा सि । अदस् षष्ठी ङस् । द षष्ठी ङस् । ह प्रथमा सि । ओच्च आ-म् च = ओदाम्, न ओदाम् = अनोदाम् । प्रथमा सि ।

**[ अह पुरिसो ]** अदस् । प्रथमा सि । 'अन्त्य०' (१।११) स्लुक् । अनेन वा दस्य हः । 'अन्त्यव्य०' (१।११) स्लुक् **अह** ।

पुरुष । प्रथमा सि । 'पुरुषे रोः' (१।१११) रु० → रि० । 'श-षोः सः' (१।२६०) ष० → स० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पुरिसो** ।

**[ अह महिला ] अह** पूर्ववत् । महिला । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **महिला** ।

**[ अह वणं ] अह** पूर्ववत् । वन प्रथमा सि । 'नो णः' (१।२२८) न० → ण० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वणं** ।

**[ अह मोहो परगुणलहुअयाइ ]** अदस् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् । अनेन वा दस्य हः । 'अन्त्यव्य०' (१।११) स्लुक् **अह** ।

मोह । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मोहो** ।

परगुणलघुकता । तृतीया टा । 'ख-घ-थ०' (१।१८७) घु० → हु० । 'क-ग-च-ज०' (१।१७७) क-तयोर्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० । 'टा-ङस्-ङेरदा०' (३।२९) टा० → इ० **परगुणलहुअयाइ** ।

[१]अह मोहो परगुणलहुअयाइ जं किर गुणा पयट्टन्ति ।
अप्पाण-गोरवं चिअ गुणाण गुरुअत्तणनिमित्तं ॥१॥

अस्या व्याख्या - यत्किल परगुणलघुकतया आत्मनां गुणाः प्रवर्त्तन्ते । असौ मोहो गौरवमेव गुणानां गुरुकत्वनिमित्तमित्यर्थः ।

**[ अह णे हिअएण हसइ मारुअतणओ ] अह** पूर्ववत् ।

अस्मद् । द्वितीया शस् । 'अम्हे अम्हो अम्ह णे शसा' (३।१०८) अस्मदः शसा सहितस्य णे इति **णे** ।

हृदय । तृतीया टा । 'इत्कृपादौ' (१।१२८) हृ० → हि० । 'क-ग-च-ज०' (१।१७७) द-ययोर्लुक् । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्त्वं- अ० → ए० **हिअएण** ।

'हसे हसने' (५४५) हस् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'त्यादीनामाद्य०' (३।१३९) ति० → इ० हसइ ।

मारुततनय । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) तुलुक् । 'नो णः' (१।२२८) न० → ण० । 'क-ग-च-ज०' (१।१७७) यलुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मारुअतणओ** ।

[२]संखोहिअमयरहरो संभं[३]तो चत्तदिट्ठरक्ख[४]सलोओ ।
वेलायडमुज्झन्तो अह णे हिअएण हसइ मारुअतणओ ॥१॥

---

१. [ग० व० - ८९२ । अनु० अङ्कः - ६६]
अथ मोहो परगुणलघुकतया यत् किल गुणाः प्रवर्तन्ते । आत्मगौरवमेव गुणानां गुरुकत्वनिमित्तम् ॥

२. [से० ब० - ३।१६ । अनु० अङ्क० - ६६]
संक्षोभितमकरगृहः सम्भ्रान्तोद्वृत्तदृष्टराक्षसलोकः । वेलातटमुद्यंतोऽथाऽस्मान् हृदयेन हसति मारुततनयः ॥

३. पाठां० - से० ब० - अनु० - संभन्तुव्वत्तदिट्ठ० । ४. अनु० - रक्खसो । ५. अनु०- धरः । ६. अनु० - राक्षसो । ७. अनु०- मुज्झन् असावस्मान् ।

अस्यार्थः - असौ मारुततनयो हनुमान् हृदयेनाऽस्मान् हसति । किंविशिष्टो हनुमान् ? संक्षोभितमकरगृहः । पुनः किंविशिष्टो मारुततनयो हनुमान् ? इतस्ततो दृष्टराक्षसलोकः । किंकुर्वन् ? वेलातटमुज्झन् इत्यर्थः ।

**[ अह कमलमुही ] अह** पूर्ववत् । कमलमुखी । प्रथमा सि । 'ख-घ-थ-ध-भाम्' (१।१८७) खी० → ही० । 'अन्त्यव्य०' (१।११) स्लुक् **कमलमुही** ।

**[ अमू पुरिसो ]** अदस् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् । 'मुः स्यादौ' (३।८८) द० → मु० । 'अक्लीबे सौ' (३।१९) दीर्घः - मु० → मू० । 'अन्त्यव्य०' (१।११) स्लुक् **अमू** । **पुरिसो** पूर्ववत् ।

**[ अमू महिला ]** अदस् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् । 'मुः स्यादौ' (३।८८) दस्य मु० । 'अक्लीबे सौ' (३।१९) दीर्घः -मु० → मू० । 'अन्त्यव्य०' (१।११) स्लुक् **अमू महिला** ।

**[ अमुं वणं ]** अदस् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् । 'मुः स्यादौ' (३।८८) दस्य मु० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अमुं** । वन । प्रथमा सि । 'नो णः' (१।२२८) न० → ण० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **वणं** ॥८७॥

## मुः स्यादौ ॥ ८।३।८८ ॥

अदसो दस्य स्यादौ परे मुरादेशो भवति ॥

अमू पुरिसो । अमुणो पुरिसा । अमुं धणं । अमूइं धणाइं । अमूणि वणाणि । अमू माला । अमूउ अमूओ मालाओ-(उ) । अमुणा । अमूहिं ॥ ङसि-अमूओ । अमूउ । अमूहिन्तो ॥ भ्यस् - अमूहिन्तो । अमूसुन्तो ॥ ङस्-अमुणो अमुस्स ॥ आम् - अमूण ॥ ङि - अमुम्मि ॥ सुप् - अमूसु ॥

**[ मुः स्यादौ ]** मु प्रथमा सि । स्यादि सप्तमी ङि ।

**[ अमू पुरिसो ]** अदस् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् । अनेन दस्य मु० । 'अक्लीबे सौ' (३।१९) दीर्घः - मु० → मू० **अमू** । **पुरिसो** पूर्ववत् [३।८७] ।

**[ अमुणो पुरिसा ]** अमु पूर्ववत् । प्रथमा जस् । 'जस्-शसो०' (३।२२) जस्० → णो० अमुणो । पुरुष । प्रथमा जस् । 'पुरुषे रोः' (१।१११) रु० → रि० । 'श-षोः सः' (१।२६०) ष० → स० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - स० → सा० **पुरिसा** ।

**[ अमुं धणं ]** अमु पूर्ववत् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अमुं** । **धणं** पूर्ववत् [३।८६] ।

**[ अमूइं धणाइं ]** अमु पूर्ववत् । प्रथमा जस् । 'जस्-शस इँ-इं-णयः सप्राग्दीर्घाः' (३।२६) जस्० → इं - पूर्वस्य च दीर्घः- **अमूइं** । धन । प्रथमा जस् । 'नो णः' (१।२२८) न० → ण० । 'जस्-शस इँ-इं-णयः०' (३।२६) जस्० → इं - पूर्वस्य च दीर्घः **धणाइं** ।

**[ अमूणि वणाणि ]** अमु पूर्ववत् । प्रथमा जस् । 'जस्-शस इँ-इं०' (३।२६) जस्० → णि० - पूर्वस्य च दीर्घः -**अमूणि** । वन । 'नो णः' (१।२२८) न० → ण० । प्रथमा जस् - द्वितीया शस् वा । 'जस्-शस इँ-इं-णयः०' (३।२६) जस्० - शस्० → णि० - पूर्वस्य च दीर्घः **वणाणि** ।

**[ अमू माला ]** अमु पूर्ववत् । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः - मु० → मू० अमू **माला** ।

**[ अमूउ अमूओ मालाओ( उ ) ]** अमू (२) । 'स्त्रियामुदोतौ वा' (३।२७) जस्-शस्स्थाने उत्-ओत् **अमूउ अमूओ**। माला । प्रथमा जस्-द्वितीया शस् । 'स्त्रियामुदोतौ वा' (३।२७) जस्-शस्स्थाने उत् **मालाउ** ।

**[ अमुणा ]** अमु पूर्ववत् । तृतीया टा । 'टो णा' (३।२४) टा० → णा० **अमुणा** ।

**[ अमूहिं ]** अमु पूर्ववत् । तृतीया भिस् । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं० । 'इदुतो दीर्घः' (३।१६) मु० → मू० **अमूहिं** ।

**[ अमूओ ]** अमु पूर्ववत् । पञ्चमी ङसि । 'ङसेस्त्तो-दो०' (३।८) ङसि० → दो० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - मु० → मू० । 'क-ग-च-ज०' (१।१७७) द्लुक् **अमूओ** ।

**[ अमूउ ]** अमु पूर्ववत् । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु०' (३।८) ङसि० → दु० । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः - मु० → मू० । 'क-ग-च-ज०' (१।१७७) द्लुक् **अमूउ** ।

**[ अमूहिन्तो ]** अमु पूर्ववत् । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु-हि-हिन्तो०' (३।८) ङसि० → हिन्तो० । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः - मु० → मू० **अमूहिन्तो** ।

**[ अमूहिन्तो ]** अमु पूर्ववत् । पञ्चमी भ्यस् । 'भ्यसस्त्तो०' (३।९) भ्यस्० → हिन्तो० । 'इदुतो दीर्घः' (३।१६) मु० → मू० **अमूहिन्तो** ।

**[ अमूसुन्तो ]** अमु पूर्ववत् । पञ्चमी भ्यस् । 'भ्यसस्त्तो-दो-दु०' (३।९) भ्यस्० → सुन्तो० । 'इदुतो दीर्घः' (३।१६) मु० → मू० **अमूसुन्तो** ।

**[ अमुणो ]** अमु पूर्ववत् । षष्ठी ङस् । 'ङसि-ङसोः पुं-क्लीबे वा' (३।२३) ङसि० → णो० **अमुणो** ।

**[ अमुस्स ]** अमु पूर्ववत् । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **अमुस्स** ।

**[ अमूण ]** अमु पूर्ववत् । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि-त्तो०' (३।१२) मु० → मू० **अमूण** ।

**[ अमुस्सि ]** अमु पूर्ववत् । सप्तमी ङि । 'ङेः स्सि०' (३।५९) ङि० → स्सि० **अमुस्सि** ।

**[ अमुम्मि ]** अमु पूर्ववत् । सप्तमी ङि । 'ङेः स्सि-म्मि०' (३।५९) ङि० → म्मि० **अमुम्मि** ।

**[ अमुत्थ ]** अमु पूर्ववत् । सप्तमी ङि । 'ङेः स्सि-म्मि-त्थाः' (३।५९) ङि० → त्थ० **अमुत्थ** ।

**[ अमूसु ]** अमु पूर्ववत् । सप्तमी सुप् । 'इदुतो दीर्घः' (३।१६) मु० → मू० **अमूसु** ॥८८॥

### म्मावयेऔ वा ॥ ८।३।८९ ॥

अदसोऽन्त्यव्यञ्जनलुकि दकारान्तस्य स्थाने ङ्यादेशे म्मौ परतः अय-इअ इत्यादेशौ वा भवतः ॥

अयम्मि अयस्सि अयत्थ । इअम्मि इअस्सि इअत्थ । अमुस्सि अमुम्मि अमुत्थ ॥

**[ म्मावयेऔ वा ]** म्मि सप्तमी ङि । अयेअ प्रथमा औ । वा प्रथमा सि ।

**[ अयम्मि अयस्सि अयत्थ ]** अदस् (३) । सप्तमी ङि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् । 'ङेः स्सि-म्मि-त्थाः' (३।५९) ङि० → म्मि० । अनेन वा अदस्स्थाने अय-**अयम्मि** । एवं स्सि- **अयस्सि** । त्थ-**अयत्थ** ।

**[ इअम्मि इअस्सिं इअत्थ ]** अदस् (३) । सप्तमी ङि । 'अन्त्यव्य०' (१।११) स्लुक् । 'ङेः स्सिं-म्मि-त्थाः' (३।५९) ङि० → म्मि० । अनेन वा अदस्स्थाने इअ-**इअम्मि** । एवं - स्सिं-**इअस्सिं** । त्थ-**इअत्थ** । पक्षे-

[1]**[ अमुस्सिं अमुम्मि अमुत्थ ]** अदस् । सप्तमी ङि । 'अन्त्यव्य०' (१।११) स्लुक् । 'मुः स्यादौ' (३।८८) दस्य मु० । 'ङेः स्सिं-म्मि-त्थाः' (३।५९) ङि० → स्सिं-म्मि-त्थ **अमुस्सिं अमुम्मि अमुत्थ** ॥८९॥

## युष्मदस्तं-तुं-तुवं-तुह-तुमं सिना ॥ ८।३।९० ॥

युष्मदः सिना सह तं-तुं-तुवं-तुह-तुमं इत्येते पञ्चादेशा भवन्ति ॥ तं-तुं-तुवं-तुह-तुमं दिट्ठो ॥

**[ युष्मदस्तं-तुं-तुवं-तुह-तुमं सिना ]** युष्मद् षष्ठी ङस् । तं-तुं-तुवं-तुह-तुमं प्रथमा जस् । 'अव्ययस्य' (३।२।७) जस्लुप् । सि तृतीया टा ।

**[ तं-तुं-तुवं-तुह-तुमं दिट्ठो ]** दृष्ट । 'इत् कृपादौ' (१।१२८) दृ० → दि० । 'ष्टस्याऽनुष्ट्रेष्टा०' (२।३४) ष्ट० → ठ० । 'अनादौ' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **दिट्ठो** ॥९०॥

## भे-तुब्भे-[2]तुब्भ-तुम्ह-तुय्हे-उय्हे जसा ॥ ८।३।९१ ॥

युष्मदो जसा-सह भे-तुब्भे-तुब्भ-तुम्ह-तुय्हे-उय्हे इत्येते षडादेशा भवन्ति ॥

भे-तुब्भे-तुब्भ-तुम्ह-तुय्हे-उय्हे चेट्ठह ॥ 'ब्भो म्ह-ज्झौ वा' (३।१०४) इति वचनात् तुम्हे तुज्झे । एवं चाष्टरूप्यम् ॥

**[ भे-तुब्भे-तुब्भ-तुम्ह-तुय्हे-उय्हे जसा ]** भे-तुब्भे-तुब्भ-तुम्ह-तुय्हे-उय्हे प्रथमा सि । जस् तृतीया टा ।

**[ भे-तुब्भे-तुब्भ-तुम्ह-तुय्हे-उय्हे चेट्ठह ]** **चेट्ठह** पूर्ववत् ॥९१॥

## तं-तुं-तुमं-तुवं-तुह-तुमे-तुए अमा ॥ ८।३।९२ ॥

युष्मदोऽमा सह एते सप्तादेशा भवन्ति ॥ तं-तुं-तुमं-तुवं-तुह-तुमे-तुए वन्दामि ॥

**[ तं-तुं-तुमं-तुवं-तुह-तुमे-तुए अमा ]** तं-तुं-तुमं-तुवं-तुह-तुमे-तुए प्रथमा जस् । अम् तृतीया टा ।

**[ तं-तुं-तुमं-तुवं-तुह-तुमे-तुए वन्दामि ]** 'वदुङ् स्तुत्यभिवादनयोः' (७२१) वद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) वन्द् । वर्त्त० ए । 'तृतीयस्य मिः' (३।१४१) ए० → मि० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) वन्द० । 'मौ वा' (३।१५४) दीर्घः **वन्दामि** ॥९२॥

## वो-[3]तुब्भ-तुब्भे-तुय्हे-उय्हे-भे शसा ॥ ८।३।९३ ॥

युष्मदः शसा सह एते षडादेशा भवन्ति ॥

वो-तुब्भ-तुब्भे 'ब्भो म्ह-ज्झौ वा (३।१०४) इति वचनात् तुम्हे-तुज्झे-तुय्हे-उय्हे-भे पेच्छामि ॥

**[ वो-तुब्भ-तुब्भे-तुय्हे-उय्हे-भे शसा ]** वो-तुब्भ-तुब्भे-तुय्हे-उय्हे-भे प्रथमा सि । शस् तृतीया टा ।

**[ वो-तुब्भ-तुब्भे-तुम्हे-तुज्झे-तुय्हे-उय्हे-भे पेच्छामि ]** 'दृशृं प्रेक्षणे' (४९५) दृश् । वर्त्त० ए(मिव्) । 'दृशो निअच्छ-पेच्छा०' (४।१८१) दृश्० → पेच्छ इति । 'तृतीयस्य मिः' (३।१४१) ए(मिव्) → मि० । 'मौ वा' (३।१५४) दीर्घः - च्छ० → च्छा० **पेच्छामि** ॥९३॥

---

१. A. इअस्सिं -: इअत्थ अमुस्सिं-० अमुत्थ उदाहरणानि । २. H. L. M. तुज्झ । ३. H. L. M. तुज्झ ।

### भे-दि-दे-ते-तइ-तए-तुमं-तुमइ-तुमए-तुमे-तुमाइ टा ॥ ८।३।९४ ॥

युष्मदष्टा इत्यनेन सह एते एकादशादेशा भवन्ति ॥

भे-दि-दे-ते-तइ-तए-तुमं-तुमइ-तुमए-तुमे-तुमाइ जम्पिअं ॥

**[ भे-दि-दे-ते-तइ-तए-तुमं-तुमइ-तुमए-तुमे-तुमाइ जम्पिअं ]** 'कथण् वाक्यप्रबन्धे' (१८८१) कथ । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'कथेर्वज्जर-पज्जरोप्पाल-पिसुण-संघ-बोल्ल-चव-जम्प०' (४।२) कथ० → जम्प० इति। 'क्ते' (३।१५६) इति म्प० → म्पि० । 'क-ग-च-ज०' (१।१७७) त्लुक् **जम्पिअं** ॥९४॥

### भे-तुब्भेहिं-[1]उब्भेहिं-उम्हेहिं-तुय्हेहिं-उय्हेहिं भिसा ॥ ८।३।९५ ॥

युष्मदो भिसा सह एते षडादेशा भवन्ति ॥

भे-तुब्भेहिं 'ब्भो म्ह-ज्झौ वा' (३।१०४) इति वचनात् तुम्हेहिं-तुज्झेहिं-उब्भेहिं-उम्हेहिं-तुय्हेहिं-उय्हेहिं भुत्तं ॥ एवं चाष्टरूप्यम् ॥

**[ भे-तुब्भेहिं-उब्भेहिं-उम्हेहिं-तुय्हेहिं-उय्हेहिं भिसा ]** भे-तुब्भेहिं-उब्भेहिं-उम्हेहिं-तुय्हेहिं-उय्हेहिं तृतीया भिस् । भिस् तृतीया टा ।

**[ भे-तुब्भेहिं-तुम्हेहिं-तुज्झेहिं-उब्भेहिं-उम्हेहिं-तुय्हेहिं-उय्हेहिं भुत्तं ]** भुक्त । प्रथमा सि । 'क-ग-ट-ड०' (२।७७) क्लुक्। 'अनादौ०' (२।८९) तस्य द्वित्वम्। 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **भुत्तं** ॥९५॥

### तइ-तुव-तुम-तुह-तुब्भा ङसौ ॥ ८।३।९६ ॥

युष्मदो ङसौ पञ्चम्येकवचने परत एते पञ्चादेशा भवन्ति ॥ ङसेस्तु त्तो-दो-दु-हि-हिन्तो-लुको यथाप्राप्तमेव ॥

तइत्तो-तुवत्तो-तुमत्तो-तुहत्तो-तुब्भत्तो । 'ब्भो म्ह-ज्झौ वा' (३।१०४) इति वचनात् तुम्हत्तो-तुज्झत्तो ॥ एवं दो-दु-हि-हिन्तो-लुक्ष्वप्युदाहार्यम् ॥ तत्तो इति तु त्वत्त इत्यस्य वलोपे सति ॥

**[ तइ-तुव-तुम-तुह-तुब्भा ङसौ ]** तइ-तुव-तुम-तुह-तुब्भा तृतीया टा । ङसि सप्तमी ङि ।

**[ तइत्तो-तुवत्तो-तुमत्तो-तुहत्तो-तुब्भत्तो-तुम्हत्तो-तुज्झत्तो ]** युष्मद् । पञ्चमी ङसि । अनेन युष्मद्स्थाने तइ० । 'ङसेस्त्तो-दो०' (३।८) ङसिस्थाने एते आदेशाः- **तइत्तो** इत्यादि ।

**[ तत्तो ]** त्वत्तः । 'सर्वत्र ल-व०' (२।७९) व्लोपः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तत्तो** ॥९६॥

### तुय्ह-तुब्भ-तहिन्तो ङसिना ॥ ८।३।९७ ॥

युष्मदो ङसिना सहितस्य एते त्रय आदेशा भवन्ति ॥

तुय्ह-तुब्भ-तहिन्तो आगओ ॥ 'ब्भो म्ह-ज्झौ वा' (३।१०४) इति वचनात् तुम्ह-तुज्झ ॥ एवं च पञ्च रूपाणि ॥

**[ तुय्ह-तुब्भ-तहिन्तो ङसिना ]** तुय्ह-तुब्भ-तहिन्तो प्रथमा जस् । ङसि तृतीया टा ।

**[ तुय्ह-तुब्भ-तहिन्तो आगओ ]** आगत । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **आगओ** ॥९७॥

---

१. L. उज्झेहिं ।

## तुब्भ-तुय्होय्होम्हा भ्यसि ॥ ८।३।९८ ॥

युष्मदो भ्यसि परत एते चत्वार आदेशा भवन्ति ॥ भ्यसस्तु यथाप्राप्तमेव ॥

तुब्भत्तो-तुय्हत्तो-उय्हत्तो-उम्हत्तो । 'ब्भो म्ह-ज्झौ वा' (३।१०४) इति वचनात् तुम्हत्तो-तुज्झत्तो । एवं दो-दु-हि-हिन्तो-सुन्तोष्वप्युदाहार्यम् ॥

**[ तुब्भ-तुय्होय्होम्हा भ्यसि ]** तुब्भ-तुय्ह-उय्ह-उम्ह प्रथमा जस् । भ्यस् सप्तमी ङि ।

**[ तुब्भत्तो-तुय्हत्तो-उय्हत्तो-उम्हत्तो-तुम्हत्तो-तुज्झत्तो ]** तुब्भाद्यादेशे कृते 'भ्यसस्त्तो-दो-दु-हि०' (३।९) भ्यस्स्थाने त्तो-**तुब्भत्तो** इत्यादि ॥९८॥

## तइ-तु-ते-तुम्हं-तुह-तुहं-तुव-तुम-तुमे-तुमो-तुमाइ-दि-दे-इ-ए-तुब्भोब्भोय्हा ङसा ॥ ८।३।९९ ॥

युष्मदो ङसा षष्ठ्येकवचनेन सहितस्य एते अष्टादशादेशा भवन्ति ॥

तइ-तु-ते-तुम्हं-तुह-तुहं-तुव-तुम-तुमे-तुमो-तुमाइ-दि-दे-इ-ए- तुब्भ-उब्भ-उय्ह-धणं । 'ब्भो म्ह-ज्झौ वा' (३।१०४) इति वचनात् तुम्ह-तुज्झ-उम्ह-उज्झ । एवं च द्वाविंशती रूपाणि ॥

**[ तइ-तु-ते-तुम्हं-तुह-तुहं-तुव-तुम-तुमे-तुमो-तुमाइ-दि-दे-इ-ए- तुब्भोब्भोय्हा ङसा ]** तइ-तु-ते-तुम्हं-तुह-तुहं-तुव-तुम-तुमे-तुमो-तुमाइ-दि-दे-इ-ए-तुब्भ-उब्भ-उय्ह प्रथमा जस् । ङस् तृतीया टा ॥९९॥

## तु-वो-भे-तुब्भ-तुब्भं-तुब्भाण-तुवाण-तुमाण-तुहाण-उम्हाण आमा ॥ ८।३।१०० ॥

युष्मद आमा सहितस्य एते दशादेशा भवन्ति ॥

तु-वो-भे-तुब्भ-तुब्भं-तुब्भाण-तुवाण-तुमाण-तुहाण-उम्हाण । 'क्त्वा-स्यादेर्ण-स्वोर्वा' (१।२७) इत्यनुस्वारे तुब्भाणं-तुवाणं-तुमाणं-तुहाणं-उम्हाणं ॥ 'ब्भो म्ह-ज्झौ वा' (१।१०४) इति वचनात् तुम्ह-तुज्झ-तुम्हं-तुज्झं-तुम्हाण-तुम्हाणं-तुज्झाण-तुज्झाणं धणं । एवं च त्रयोविंशती रूपाणि ॥

**[ तु-वो-भे-तुब्भ-तुब्भं-तुब्भाण-तुवाण-तुमाण-तुहाण-उम्हाण आमा ]** तु वो-भे-तुब्भ-तुब्भं-तुब्भाण-तुवाण-तुमाण-तुहाण-उम्हाण प्रथमा जस् । आम् तृतीया टा ॥१००॥

## तुमे-तुमए-तुमाइ-तइ-तए ङिना ॥ ८।३।१०१ ॥

युष्मदो ङिना सह सप्तम्येकवचनेन सहितस्य एते पञ्चादेशा भवन्ति ॥ तुमे-तुमए-तुमाइ-तइ-तए ठिअं ॥

**[ तुमे-तुमए-तुमाइ-तइ-तए ङिना ]** तुमे-तुमए-तुमाइ-तइ-तए प्रथमा जस् । ङि तृतीया टा ।

**[ तुमे-तुमए-तुमाइ-तइ-तए ठिअं ]** स्था । 'श्लिष-शीङ्०' (५।१।९) क्तप्र० → त० । 'स्थष्ठा-थक्क-चिट्ठ-निरप्पाः' (४।१६) स्था० → ठा० । 'स्वरादनतो वा' (४।२४०) अत् । 'क्ते' (३।१५६) इ० । 'लुक्' (१।१०) आलुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **ठिअं** ॥१०१॥

## तु-तुव-तुम-तुह-तुब्भा ङौ ॥ ८।३।१०२ ॥

युष्मदो ङौ परत एते पञ्चादेशा भवन्ति ॥ ङेस्तु यथाप्राप्तमेव ॥

तुम्मि-तुवम्मि-तुमम्मि-तुहम्मि-तुब्भम्मि । 'ब्भो म्ह-ज्झौ वा' (३।१०४) इति वचनात् तुम्हम्मि-तुज्झम्मि इत्यादि ॥

**[ तु-तुव-तुम-तुह-तुब्भा ङौ ]** तु तुव-तुम-तुह-तुब्भ प्रथमा जस् । ङि सप्तमी ङि ।

**[ तुम्मि-तुवम्मि-तुमम्मि-तुहम्मि-तुब्भम्मि ]** युष्मद् । सप्तमी ङि । अनेन तु-तुव इत्यादेशे कृते 'ङेः स्सि-म्मि-त्थाः' (३।५९) ङि० → स्सि-म्मि-त्थतुस्सि-तुम्मि-तुत्थ इत्यादि ॥१०२॥

## सुपि ॥ ८।३।१०३ ॥

युष्मदः सुपि परतः तु-तुव-तुम-तुह-तुब्भा भवन्ति ॥

तुसु-तुवेसु-तुमेसु-तुहेसु-तुब्भेसु ॥ 'ब्भो म्ह-ज्झौ वा' (३।१०४) इति वचनात् तुम्हेसु-तुज्झेसु ॥ केचित् सुप्येत्वविकल्पमिच्छन्ति, तन्मते तुवसु-तुमसु-तुहसु-तुब्भसु-तुम्हसु-तुज्झसु ॥ तुब्भस्यात्वमपीच्छत्यन्यः । तुब्भासु-तुम्हासु-तुज्झासु ॥

**[ सुपि ]** सुप् सप्तमी ङि ।

## ब्भो म्ह-ज्झौ वा ॥ ८।३।१०४ ॥

युष्मदादेशेषु यो द्विरुक्तो भस्तस्य म्ह-ज्झ इत्येतावादेशौ वा भवतः ॥ पक्षे-स एवास्ते । तथैव चोदाहृतम् ॥

**[ ब्भो म्ह-ज्झौ वा ]** ब्भ् षष्ठी ङस् । म्ह-ज्झ प्रथमा औ । वा प्रथमा सि ॥१०४॥

## अस्मदो म्मि-अम्मि-अम्हि-हं-अहं-अहयं सिना ॥ ८।३।१०५॥

अस्मदः सिना सह एते षडादेशा भवन्ति ॥

[1]अज्ज म्मि हासिआ मामि ! तेण । उन्नम न अम्मि कुविआ । अम्हि करेमि । जेण हं विद्धा । किं पम्हुट्ठ म्हि अहं । अहयं कयप्पणामो ॥

**[ अस्मदो म्मि-अम्मि-अम्हि-हं-अहं-अहयं सिना ]** अस्मद् षष्ठी ङस् । म्मि-अम्मि-अम्हि-हं-अहं-अहयं प्रथमा सि । सि तृतीया टा ।

**[ अज्ज म्मि हासिआ मामि ! तेण ]** अद्य । प्रथमा सि । 'द्य-य्य-र्यां जः' (२।२४) द्य० → ज० । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'अव्ययस्य' (३।२।७) सिलुप् **अज्ज** ।

अस्मद् । प्रथमा सि । अनेन सिना सह अस्मद्स्थाने **म्मि०** । 'हसे हसने' (५४५) हस् । हसन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । हास्यते स्म । क्तप्र० । 'लुगावी क्त-भाव-कर्मसु' (३।१५२) णिग्लुक् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हास । 'क्ते' (३।१५६) स० → सि० । 'आत्' (२।४।१८) आप्प्र० → आ । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'समानानां०' (१।२।१) दीर्घः **हासिआ** ।

मामीति सख्याः सम्बोधने **मामि !** । तद् । तृतीया टा । 'अन्त्यव्य०' (१।११) द्लुक् । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्त्वं - त० → ते० **तेण** । मामीति हे सखि ! तेन अद्याऽहं हासितास्मीत्यर्थः ॥

---

१. **अज्ज म्मि हासिआ मामि ! तेण** पाएसु तह पडन्तेण । तीए वि जलन्ति दीववत्तिमब्भुण्णअन्तीए ॥
[गा० स० - वर्ण्यविषये - ३।६४]

२. **उन्नम न अम्मि कुविआ** अवऊहसु किं मुहा पसाएसि ।
तुह मन्नुसमुप्पन्नेण मज्झ माणेण वि न कज्जं ॥ [अनु० अङ्कः- ६६]

उन्नम नाऽस्मि कुपिता अवगूहस्व किं मुधा प्रसादयसि ? ।
तव मन्युसमुत्पन्नेन मम मानेनाऽपि न कार्यम् ॥

**[ उन्नम न अम्मि कुविआ ]** 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम्, उत्पूर्व० । पञ्चमी हि । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'दु-सु-मु०' (३।१७३) हिस्थाने सु० । 'अत इज्जस्विज्जहीज्जे-लुको वा' (३।१७५) सुलुक् **उन्नम** ।

न । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् **न** ।

अस्मद् । प्रथमा सि । अनेन सिना सह अस्मद्स्थाने **अम्मि** ।

कुपिता । प्रथमा सि । 'पो वः' (१।२३१) पि० → वि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अन्त्यव्य०' (१।११) स्लुक् **कुविआ** । त्वमुन्नम-उच्चैर्भव नाहं कुपितास्मीत्यर्थः ॥

**[ अम्हि करेमि ]** अस्मद् । प्रथमा सि । अनेन सिना सह अस्मद्स्थाने **अम्हि०** । 'डुकृंग् करणे' (८८८) कृ । वर्त्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'ऋवर्ण०' (४।२३४) कृ० → कर० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) कर० । 'वर्तमाना-पञ्चमी०' (३।१५८) र० → रे० **करेमि** ॥

[1]जम्मंतराइ सत्त वि चलणे जीएण मयण ! अग्घिस्सं ।
जइ तं पि तेण बाणेण विद्धसे **जेण हं विद्धा** ॥१॥

अस्यार्थः - काचित् कामार्त्ता कामिनी काममुवाच, हे मदन ! तव चरणान् अहं सप्त जन्मान्तराणि यावत् जीवितेन अर्चिष्यामि, यदि त्वमपि तेन बाणेन विध्यसे, तेन केन ? येनाहं विद्धेति गाथार्थः ॥

**[ जेण हं विद्धा ]** यद् । तृतीया टा । 'अन्त्यव्यञ्जनस्य' (१।११) द्लुक् । 'आदेर्यो जः' (१।२४५) य० → ज० । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्वं - ज० → जे० **जेण** ।

अस्मद् । प्रथमा सि । अनेन सिना सह अस्मद्स्थाने **हं** ।

[2]**[ किं पम्हुट्ठ म्हि अहं ]** विस्मृताऽस्मि । 'क्तेनाप्फुण्णादयः' (४।२५८) विस्मृतस्थाने पम्हुट्ठ इति । 'असक् भुवि' (११०२) अस् । वर्त्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'मि-मो-मैर्म्हि०' (३।१४७) अस्स्थाने मिना सह म्हि० । **पम्हुट्ठ म्हि** ।

अस्मद् । प्रथमा सि । अनेन अस्मद्स्थाने सिना सह **अहं** । किमहं विस्मृतास्मीत्यर्थः ॥

**[ [3]अहयं कयप्पणामो ]** अस्मद् । प्रथमा सि । अनेन अस्मद्स्थाने सिना सह **अहयं** ।

---

१. जेम्मंतरे वि चलणे जीएण खु मअण ! तुज्झ अच्चिस्सं । जइ तं पि तेण बाणेण विज्झसे **जेण हं विद्धा** ॥
[शृ० प्र० - १५।३५३ । गा० स० - ५।४१]

जन्मान्तरेऽपि चरणौ जीवेन खलु मदन ! तव अर्चिष्यामि । यदि तमपि तेन बाणेन विध्यसि येन अहं विद्धा ॥
१. पाठां० - जम्मंतराइँ वीसं चलणे जीएण मयण ! अग्घिस्सं । [गा० को० - ४।२१]

२. **किं पम्हुट्ठ म्हि अहं** तुह चलणुप्पण्णवतिवहआपडिउण्णं ।
खणकालाणलखविअं धरणिअलुद्धरणविलुलिअं अप्पाणं ॥ [से० ब० - ६।१२]

किं प्रस्मृतवानस्म्यहं तव चरणोत्पन्नत्रिपथगाप्रतिपूर्णम् । क्षय(ण)कालानलक्षपितं धरणितलोद्धरणविलुलितमात्मानम् ॥

३. सीसत्तेणोवगया संपयमिंदग्गिभूइणो जस्स । **अहयं कयप्पणामो** स महाभागोऽभिगमणिज्जो ॥ [अनु० अङ्कः- ६६]
शिष्यत्वेनोपगताः साम्प्रतमिन्द्राग्निभूती यस्य । अहं कृतप्रणामः स महाभाग्योऽभिगमनीयः ॥

कृतप्रणाम । 'ऋतोऽत्' (१।१२६) कृ० → क० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) पस्य द्वित्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **कयप्पणामो** । अहं कृतप्रणाम इत्यर्थः ॥१०५॥

## अम्ह-अम्हे-अम्हो-मो-वयं-भे जसा ॥ ८।३।१०६ ॥

अस्मदो जसा सह एते षडादेशा भवन्ति ॥

अम्ह-अम्हे-अम्हो-मो-वयं-भे भणामो ॥

**[ अम्ह-अम्हे-अम्हो-मो-वयं-भे जसा ]** अम्ह-अम्हे-अम्हो-मो-वयं-भे प्रथमा जस् । 'अव्ययस्य' (३।२।७) जस्लुप् । जस् तृतीया टा ।

**[ अम्ह-अम्हे-अम्हो-मो-वयं-भे भणामो ]** अस्मद् । प्रथमा जस् । अनेन अस्मद्स्थाने जसा सह **अम्ह** इत्यादि । 'भण शब्दे' (२६४) भण् । वर्त्त० मस् । 'तृतीयस्य मो-मु-माः' (३।१४४) मस्० → मो० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) भण० । 'इच्च मो-मु-मे वा' (३।१५५) ण० → णा० **भणामो** ॥१०६॥

## णे-णं-मि-अम्मि-अम्ह-मम्ह-मं-ममं-मिमं-अहं अमा ॥ ८।३।१०७ ॥

अस्मदोऽमा सह एते दशादेशा भवन्ति ॥

णे-णं-मि-अम्मि-अम्ह-मम्ह-मं-ममं-मिमं-अहं पेच्छ ॥

**[ णे-णं-मि-अम्मि-अम्ह-मम्ह-मं-ममं-मिमं-अहं अमा ]** णे-णं-मि-अम्मि-अम्ह-मम्ह-मं-ममं-मिमं-अहं प्रथमा जस् । अम् तृतीया टा ।

**[ णे-णं-मि-अम्मि-अम्ह-मम्ह-मं-ममं-मिमं-अहं पेच्छ ] पेच्छ** पूर्ववत् [३।२८] ॥१०७॥

## अम्हे-अम्हो-अम्ह-णे शसा ॥ ८।३।१०८ ॥

अस्मदः शसा सह एते चत्वार आदेशा भवन्ति ॥

अम्हे-अम्हो-अम्ह-णे पेच्छ ॥

**[ अम्हे-अम्हो-अम्ह-णे शसा ]** अम्हे-अम्हो-अम्ह-णे प्रथमा जस् । शस् तृतीया टा ।

**[ अम्हे-अम्हो-अम्ह-णे पेच्छ ] पेच्छ** पूर्ववत् [३।२८] ॥१०८॥

## मि-मे-ममं-ममए-ममाइ-मइ-मए-मयाइ-णे टा ॥ ८।३।१०९॥

अस्मदष्टा सह एते नवादेशा भवन्ति ॥

मि-मे-ममं-ममए-ममाइ-मइ-मए-मयाइ-णे कयं ॥

**[ मि-मे-ममं-ममए-ममाइ-मइ-मए-मयाइ-णे टा ]** मि-मे-ममं-ममए-ममाइ-मइ-मए-मयाइ-णे प्रथमा जस् । टा(ट्) तृतीया टा ।

**[ मि-मे-ममं-ममए-ममाइ-मइ-मए-मयाइ-णे कयं ] कयं** पूर्ववत् [२।११४] ॥१०९॥

**अम्हेहि-अम्हाहि-अम्ह-अम्हे-णे भिसा ॥ ८।३।११० ॥**

अस्मदो भिसा सह एते पञ्चादेशा भवन्ति ॥

अम्हेहि-अम्हाहि-अम्ह-अम्हे-णे कयं ॥

**[ अम्हेहि-अम्हाहि-अम्ह-अम्हे-णे भिसा ]** अम्हेहि-अम्हाहि-अम्ह-अम्हे-णे प्रथमा जस् । भिस् तृतीया टा ।

**[ अम्हेहि-अम्हाहि-अम्ह-अम्हे-णे कयं ] कयं** पूर्ववत् [२।११४] ॥११०॥

**मइ-मम-मह-मज्झा ङसौ ॥ ८।३।१११ ॥**

अस्मदो ङसौ पञ्चम्येकवचने परत एते चत्वार आदेशा भवन्ति ॥ ङसेस्तु यथाप्राप्तमेव ॥

मइत्तो-ममत्तो-महत्तो-मज्झत्तो आगओ ॥ मत्तो इति तु मत्त इत्यस्य ॥ एवं दो-दु-हि-हिन्तो-लुक्ष्वप्युदाहार्यम् ॥

**[ मइ-मम-मह-मज्झा ङसौ ]** मइ-मम-मह-मज्झ प्रथमा जस् । ङसि सप्तमी ङि ।

**[ मइत्तो-ममत्तो-महत्तो-मज्झत्तो आगओ ]** अस्मद् । पञ्चमी ङसि । अनेन चत्वार आदेशाः कृते सति 'ङसेस्त्तो-दो-दु-हि-हिन्तो०' (३।८) ङसिस्थाने त्तो-दो..... आदेशाः ।

**[ मत्तो ]** मत्तः । प्रथमा सि । 'अतो डो विसर्गस्य' (१।३७) विसर्गस्थाने डो० → ओ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) त्तो **मत्तो** ॥१११॥

**ममा-ऽम्हौ भ्यसि ॥ ८।३।११२ ॥**

अस्मदो भ्यसि परतो मम-अम्ह इत्यादेशौ भवतः ॥ भ्यसस्तु यथाप्राप्तम् ॥

ममत्तो अम्हत्तो । ममाहिन्तो अम्हाहिन्तो । ममासुन्तो अम्हासुन्तो । ममेसुन्तो अम्हेसुन्तो ॥

**[ ममा-ऽम्हौ भ्यसि ]** मम-अम्ह प्रथमा औ । भ्यस् सप्तमी ङि ।

**[ ममत्तो अम्हत्तो - ममाहिन्तो अम्हाहिन्तो - ममासुन्तो अम्हासुन्तो - ममेसुन्तो अम्हेसुन्तो ]** ममाहिन्तो इत्यत्र 'भ्यसि वा' (३।१३) आत्वम् ॥११२॥

**मे-मइ-मम-मह-महं-मज्झ-मज्झं-अम्ह-अम्हं ङसा ॥ ८।३।११३ ॥**

अस्मदो ङसा षष्ठ्येकवचनेन सहितस्य एते नवादेशा भवन्ति ॥

मे-मइ-मम-मह-महं-मज्झ-मज्झं-अम्ह-अम्हं धणं ॥

**[ मे-मइ-मम-मह-महं-मज्झ-मज्झं-अम्ह-अम्हं धणं ] धणं** पूर्ववत् [३।५५] ॥११३॥

**णे-णो-मज्झ-अम्ह-अम्हं-अम्हे-अम्हो-अम्हाण-ममाण-महाण-मज्झाण आमा ॥ ८।३।११४ ॥**

अस्मद आमा सहितस्य एते एकादशादेशा भवन्ति ॥

णे-णो-मज्झ-अम्ह-अम्हं-अम्हे-अम्हो-अम्हाण-ममाण-महाण-मज्झाण धणं ॥ 'क्त्वा-स्यादेर्ण-स्वोर्वा' (१।२७) इत्यनुस्वारे अम्हाणं-ममाणं-महाणं-मज्झाणं । एवं पञ्चदश रूपाणि ॥

**[ णे-णो-मज्झ-अम्ह-अम्हं-अम्हे-अम्हो-अम्हाण-ममाण-महाण-मज्झाण आमा ]** णे णो-मज्झ-अम्ह-अम्हं-अम्हे-अम्हो-अम्हाण-ममाण-महाण-मज्झाण प्रथमा जस्। आम् तृतीया टा ।

**[ णे-णो-मज्झ-अम्ह-अम्हं-अम्हे-अम्हो-अम्हाण-ममाण-महाण-मज्झाण धणं ]** धणं पूर्ववत् [३।५५] ॥११४॥

## मि-मइ-ममाइ-मए-मे ङिना ॥ ८।३।११५ ॥

अस्मदो ङिना सहितस्य एते पञ्चादेशा भवन्ति ॥ मि-मइ-ममाइ-मए-मे ठिअं ॥

**[ मि-मइ-ममाइ-मए-मे ङिना ]** मि-मइ-ममाइ-मए-मे प्रथमा जस् । ङि तृतीया टा ।

**[ मि-मइ-ममाइ-मए-मे ठिअं ]** स्था । 'स्थष्ठा०' (४।१६) स्था० → ठा० । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'स्वरादनतो वा' (४।२४०) अत् । 'क्ते' (३।१५६) अत्० → इ० । 'लुक्' (१।१०) आलोपः । 'लोकात्' (१।१।३) ठित० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **ठिअं** ॥११५॥

## अम्ह-मम-मह-मज्झा ङौ ॥ ८।३।११६ ॥

अस्मदो ङौ [1]परे एते चत्वार आदेशा भवन्ति ॥ अम्हम्मि-ममम्मि-महम्मि-मज्झम्मि ठिअं ॥

**[ अम्ह-मम-मह-मज्झा ङौ ]** अम्ह-मम-मह-मज्झ प्रथमा जस् । ङि सप्तमी ङि ।

**[ अम्हम्मि-ममम्मि-महम्मि-मज्झम्मि ठिअं ]** अस्मद् । सप्तमी ङि । अनेन अम्हादि आदेशे कृते 'ङेः म्सि-म्सि-त्थाः' (३।५९) ङि० → म्मि० **अम्हम्मि-ममम्मि-महम्मि-मज्झम्मि** । **ठिअं** पूर्ववत् [३।११५] ॥११६॥

## सुपि ॥ ८।३।११७ ॥

अस्मदः सुपि परे अम्हादयश्चत्वार आदेशा भवन्ति ॥

अम्हेसु-ममेसु-महेसु-मज्झेसु ॥ एत्वविकल्पमते तु अम्हसु-ममसु-महसु-मज्झसु ॥ अम्हस्यात्वमपीच्छन्त्यन्ये - अम्हासु ॥

**[ सुपि ]** सुप् सप्तमी ङि ।

**[ अम्हेसु-ममेसु-महेसु-मज्झेसु ]** अस्मद् । सप्तमी सुप् । अनेन अम्हादि आदेशे कृते 'भिस्-भ्यस्-सुपि' (३।१५) एत्वं-**अम्हेसु-ममेसु-महेसु-मज्झेसु** ॥११७॥

## त्रेस्ती तृतीयादौ ॥ ८।३।११८ ॥

त्रेः स्थाने ती इत्यादेशो भवति, तृतीयादौ ॥

तीहिं कयं । तीहिन्तो आगओ । तिण्हं धणं । तीसु ठिअं ॥

**[ त्रेस्ती तृतीयादौ ]** त्रि षष्ठी ङस् । ती प्रथमा सि । तृतीयादि सप्तमी ङि ।

**[ तीहिं कयं ]** त्रि । तृतीया भिस् । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं० । अनेन त्रिस्थाने ती-**तीहिं** । **कयं** पूर्ववत् [२।११४] ।

**[ तीहिन्तो आगओ ]** त्रि । पञ्चमी भ्यस् । 'भ्यसस्त्तो-दो-दु-हि-हिन्तो-सुन्तो' (३।९) भ्यस्० → हिन्तो० । अनेन त्रिस्थाने ती-**तीहिन्तो** । **आगओ** पूर्ववत् [३।९७] ।

---

१. H. J. M. परत ।

**[ तिण्हं धणं ]** त्रि । षष्ठी आम् । अनेन त्रि० → ती० । 'संख्याया आमो ण्ह-ण्हं' (३।१२३) आम्स्थाने ण्हं इति । 'ह्रस्वः संयोगे' (१।८४) ती० → ति० **तिण्हं** । धनं । 'नो णः' (१।२२८) नं० → णं० **धणं** ॥

**[ तीसु ठिअं ]** त्रि । सप्तमी सुप् । अनेन त्रि० → ती० **तीसु** । **ठिअं** पूर्ववत् [३।११५] ॥११८॥

## द्वेर्दो-बे ॥ ८।३।११९ ॥

द्विशब्दस्य तृतीयादौ दो-बे इत्यादेशौ भवतः ॥

दोहि बेहि कयं । दोहिन्तो बेहिन्तो आगओ । दोण्हं बेण्हं धणं । दोसु बेसु ठिअं ॥

**[ द्वेर्दो-बे ]** द्वि षष्ठी ङस् । दो-बे प्रथमा औ ।

**[ दोहि बेहि कयं ]** द्वि (२) । तृतीया भिस् । 'भिसो हि-हिँ-हिं' (३।७) भिस्स्थाने हि० । अनेन द्विस्थाने प्रथमे दो-द्वितीये बे-**दोहि बेहि** । **कयं** पूर्ववत् [२।११४] ।

**[ दोहिन्तो बेहिन्तो आगओ ]** द्वि (२) । पञ्चमी भ्यस् । 'भ्यसस्त्तो-दो-दु०' (३।९) भिस्० → हिन्तो० । अनेन द्विस्थाने प्रथमे दो-द्वितीये बे-**दोहिन्तो बेहिन्तो** । **आगओ** पूर्ववत् [३।९७] ।

**[ दोण्हं बेण्हं धणं ]** द्वि (२) । षष्ठी आम् । 'संख्याया आमो ण्ह-ण्हं' (३।१२३) आम्स्थाने ण्हं । अस्य कार्यम् - **दोण्हं बेण्हं** । **धणं** पूर्ववत् [३।११८] ।

**[ दोसु बेसु ठिअं ]** द्वि (२) । सप्तमी सुप् । अनेन द्विस्थाने दो **दोसु**-बे **बेसु** । **ठिअं** पूर्ववत् [३।११५] ॥११९॥

## दुवे-दोण्णि-बेण्णि च जस्-शसा ॥ ८।३।१२० ॥

जस्-शस्भ्यां सहितस्य द्वेः स्थाने दुवे-दोण्णि-बेण्णि इत्येते दो-बे इत्येतौ चादेशा भवन्ति ॥

दुवे-दोण्णि-बेण्णि-दो-बे ठिआ पेच्छ वा । 'ह्रस्वः संयोगे' (१।८४) इति ह्रस्वत्वे दुण्णि-बिण्णि ॥

**[ दुवे-दोण्णि-बेण्णि च जस्-शसा ]** दुवे-दोण्णि-बेण्णि प्रथमा जस् । च प्रथमा सि । जस्-शस् तृतीया टा ।

**[ दुवे-दोण्णि-बेण्णि-दो-बे ठिआ पेच्छ वा । दुण्णि-बिण्णि ]** द्वि (५) । प्रथमा जस्-द्वितीया शस् वा । अनेन द्विस्थाने जस्-शस्भ्यां सह **दुवे-दोण्णि-बेण्णि-दो-बे** आदेशाः । ठिअ पूर्ववत् [३।११५] प्रथमा सि । 'आत्' (२।४।१८) आप्प्र० → आ । 'अन्त्य०' (१।११) स्लुक् ठिआ । पेच्छ पूर्ववत् [३।२८] । **दुण्णि-बिण्णि** ॥१२०॥

## त्रेस्तिण्णिः ॥ ८।३।१२१ ॥

जस्-शस्भ्यां सहितस्य त्रेः स्थाने तिण्णि इत्यादेशो भवति ॥ तिण्णि ठिआ पेच्छ वा ॥

**[ त्रेस्तिण्णिः ]** त्रि षष्ठी ङस् । तिण्णि प्रथमा सि ।

**[ तिण्णि ठिआ पेच्छ वा ]** त्रि । प्रथमा जस्-द्वितीया शस् वा । अनेन त्रिस्थाने जस्-शस्भ्यां सह तिण्णि आदेशः । **ठिआ** पूर्ववत् [३।१२०] । **पेच्छ** पूर्ववत् [३।२८] ॥१२१॥

## चतुरश्चत्तारो-चउरो-चत्तारि ॥ ८।३।१२२ ॥

चतुर्शब्दस्य जस्-शस्भ्यां सहितस्य चत्तारो-चउरो-चत्तारि इत्येते आदेशा भवन्ति ॥

चत्तारो-चउरो-चत्तारि चिट्ठन्ति पेच्छ वा ॥

**[ चतुरश्चत्तारो-चउरो-चत्तारि ]** चतुर् षष्ठी ङस् । चत्तारो-चउरो-चत्तारि प्रथमा जस् ।

**[ चत्तारो-चउरो-चत्तारि चिट्ठन्ति पेच्छ वा ]** चतुर् । प्रथमा जस् - द्वितीया शस् वा । अनेन जस्-शस्भ्यां सह **चत्तारो-चउरो-चत्तारि** आदेशाः । स्था । वर्त्त० अन्ति । 'स्थष्ठा-थक्क-चिट्ठ०' (४।१६) स्था० → चिट्ठ इति । 'बहुष्वाद्यस्य न्ति-न्ते-इरे' (३।१४२) अन्ति० → न्ति० । 'व्यञ्जना०' (४।२३९) अत् । 'लुक्' (१।१०) अलुक् **चिट्ठन्ति**। **पेच्छ** वा पूर्ववत् [३।२८] ॥१२२॥

## संख्याया आमो ण्ह-ण्हं ॥ ८।३।१२३ ॥

संख्याशब्दात् परस्य आमो ण्ह-ण्हं इत्यादेशौ भवतः ॥

दोण्ह । तिण्ह । चउण्ह ।पञ्चण्ह । छण्ह । सत्तण्ह । अट्ठण्ह । एवं-दोण्हं । तिण्हं । चउण्हं । पञ्चण्हं । छण्हं । सत्तण्हं। अट्ठण्हं। नवण्हं । दसण्हं । पण्णरसण्हं दिवसाणं । अट्ठारसण्हं समणसाहस्सीणं । कतीनाम् → कइण्हं ॥ बहुलाधिकाराद् विंशत्यादेर्न भवति ॥

**[ संख्याया आमो ण्ह-ण्हं ]** संख्या षष्ठी ङस् । आम् षष्ठी ङस् । ण्ह-ण्हं प्रथमा औ ।

**[ दोण्ह ]** द्वि । षष्ठी आम् । अनेन आम्० → ण्ह० । 'द्वेर्दो-बे' (३।११९) द्वि० → दो० **दोण्ह** ।

**[ तिण्ह ]** त्रि । षष्ठी आम् । अनेन आम्० → ण्ह० । 'त्रेस्ती तृतीयादौ' (३।११८) त्रि० → ती० । 'ह्रस्वः संयोगे' (१।८४) ती० → ति० **तिण्ह** ।

**[ चउण्ह ]** चतुर् । षष्ठी आम् । 'अन्त्य०' (१।१११) र्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन आम्० → ण्ह० **चउण्ह** ।

**[ पञ्चण्ह ]** पञ्चन् । षष्ठी आम् । 'अन्त्य०' (१।११) न्लुक् । अनेन आम्० → ण्ह० **पञ्चण्ह** ।

**[ छण्ह ]** षट् । षष्ठी आम् । 'अन्त्यव्य०' (१।११) ट्लुक् । 'षट्-शमी-शाव-सुधा-सप्तपर्णेष्वादेश्छः' (१।२६५) ष० → छ० । अनेन आम्० → ण्ह० **छण्ह** ।

**[ सत्तण्ह ]** सप्तन् । षष्ठी आम् । 'अन्त्यव्य०' (१।११) न्लुक् । 'क-ग-ट-ड०' (२।७७) प्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वं - त० → त्त० । अनेन आम्० → ण्ह० **सत्तण्ह** ।

**[ अट्ठण्ह ]** अष्टन् । षष्ठी आम् । 'अन्त्यव्य०' (१।११) न्लुक् । 'ष्टस्याऽनुष्ट्रेष्टासं०' (२।३४) ष्ट० → ठ० । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । अनेन आम्० → ण्ह० **अट्ठण्ह** ।

**[ दोण्हं ]** द्वि । षष्ठी आम् । 'द्वेर्दो-बे' (३।११९) द्वि० → दो० । अनेन आम्० → ण्हं० **दोण्हं** ।

**[ तिण्हं ]** त्रि । षष्ठी आम् । 'त्रेस्ती तृतीयादौ' (३।११८) त्रि० → ती० । अनेन आम्० → ण्हं० । 'ह्रस्वः संयोगे' (१।८४) ती० → ति० **तिण्हं** ।

**[ नवण्हं ]** नवन् । षष्ठी आम् । 'अन्त्यव्य०' (१।११) न्लुक् । अनेन आम्० → ण्हं० **नवण्हं** ।

**[ दसण्हं ]** दशन् । षष्ठी आम् । 'अन्त्यव्य०' (१।११) न्लुक् । 'श-षोः सः' (१।२६०) श० → स० । अनेन आम्० → ण्हं **दसण्हं** ।

**[ पण्णरसण्हं दिवसाणं ]** पञ्चदशन् । षष्ठी आम् । 'पञ्चाशत्-पञ्चदश-दत्ते' (२।४३) ञ्च० → ण० । 'अनादौ०' (२।८९) णस्य द्वित्वम् । 'संख्या-गद्गदे रः' (१।२१९) दस्य रः । 'श-षोः सः' (१।२६०) श० → स० । 'अन्त्यव्य०' (१।११) न्लुक् । अनेन आम्० → ण्हं **पण्णरसण्हं** ।

दिवस । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः- स० → सा० । 'क्त्वा-स्यादेर्ण-स्वोर्वा' (१।२७) अनुस्वारः **दिवसाणं** ।

**[ अट्ठारसण्हं समणसाहस्सीणं ]** अष्टादशन् । षष्ठी आम् । 'ष्टस्याऽनुष्ट्रेष्टा०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'संख्या-गद्गदे रः' (१।२१९) दस्य रः । 'श-षोः सः' (१।२६०) श० → स० । अनेन आम्० → ण्हं० **अट्ठारसण्हं** ।

श्रमणसहस्र । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) श० → स० । 'अतः समृद्ध्यादौ वा' (१।४४) स० → सा० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) सस्य द्वित्वम् । आर्षत्वात् स्त्रीत्वम् । 'अजातेः पुंसः' (३।३२) ङीप्र० । 'लुक्' (१।१०) अलोपः । 'लोकात्' (१।१।३) स्सी० । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'क्त्वा-स्यादेर्ण०' (१।२७) अनुस्वारः **समणसाहस्सीणं** ।

**[ कइण्हं ]** कति । षष्ठी आम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन आम्० → ण्हं **कइण्हं** ॥१२३॥

## शेषेऽदन्तवत् ॥ ८।३।१२४ ॥

उपर्युक्तादन्यः शेषस्तत्र स्यादिविधिरदन्तवदतिदिश्यते । येष्वाकाराद्यन्तेषु पूर्वं कार्याणि नोक्तानि तेषु 'जस्-शसोर्लुक्' (३।४) इत्यादीनि अदन्ताधिकारविहितानि कार्याणि भवन्तीत्यर्थः ॥

तत्र 'जस्-शसोर्लुक्' (३।४) इत्येतत्कार्यातिदेशः । माला-गिरी-गुरू-सही-वहू रेहन्ति पेच्छ वा ॥

'अमोऽस्य' (३।५) इत्येतत्कार्यातिदेशः । गिरिं-गुरुं-सहिं-वहुं-गामणिं-खलपुं पेच्छ ॥

'टा-आमोर्णः' (३।६) इत्येतत्कार्यातिदेशः । हाहाण कयं । मालाण-गिरीण-गुरूण-सहीण-वहूण धणं ॥

टायास्तु 'टो णा' (३।२४) - 'टा-ङस्-ङेरदादिदेद्वा तु ङसेः' (३।२९) इति विधिरुक्तः ॥

'भिसो हि-हिँ-हिं' (३।७) इत्येतत्कार्यातिदेशः । मालाहि-गिरीहि-गुरूहि-सहीहि-वहूहि कयं ॥ एवं सानुनासिकाऽनुस्वारयोरपि ॥

'ङसेस्त्तो-दो-दु-हि-हिन्तो-लुकः' (३।८) इत्येतत्कार्यातिदेशः । मालाओ-मालाउ-मालाहिन्तो ॥ बुद्धीओ-बुद्धीउ-बुद्धीहिन्तो ॥ धेणूओ-धेणूउ-धेणूहिन्तो आगओ ॥ हि-लोपौ तु प्रतिषेत्स्येते (३।१२७,१२६) ॥

'भ्यसस्त्तो-दो-दु-हि-हिन्तो सुन्तो' (३।९) इत्येतत्कार्यातिदेशः । मालाहिन्तो-मालासुन्तो । हिस्तु निषेत्स्यते (३।१२७) । एवं-गिरीहिन्तो इत्यादि ॥

'ङसः स्सः' (३।१०) इत्येतत्कार्यातिदेशः । गिरिस्स । गुरुस्स । दहिस्स । महुस्स ॥ स्त्रियां तु 'टा-ङस्-ङे०' (३।२९) इत्याद्युक्तम् ॥

'डे-म्मि ङेः' (३।११) इत्येतत्कार्यातिदेशः । गिरिम्मि । गुरुम्मि । दहिम्मि । महुम्मि ॥ ङेस्तु निषेत्स्यते (३।१२८) । स्त्रियां तु 'टा-ङस्-ङे०' (३।२९) इत्याद्युक्तम् ॥

'जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः' (३।१२) इत्येतत्कार्यातिदेशः । गिरी - गुरू चिट्ठन्ति । गिरीओ-गुरूओ आगओ । गिरीण-गुरूण धणं ॥

'भ्यसि वा' (३।१३) इत्येतत्कार्यातिदेशो न प्रवर्तते । 'इदुतो दीर्घः' (३।१६) इति नित्यं विधानात् ॥

'टाण-शस्येत्' (३।१४) - 'भिस्-भ्यस्-सुपि' (३।१५) इत्येतत्कार्यातिदेशस्तु निषेत्स्यते (३।१२९) ॥

**[ शेषेऽदन्तवत् ]** शेष सप्तमी ङि । अदन्तवत् प्रथमा सि ।

**[ माला-गिरी-गुरू-सही-वहू रेहन्ति पेच्छ वा ]** माला-गिरि-गुरु-सखी-वधू । प्रथमा जस् - द्वितीया शस् वा । 'जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः' (३।१२) दीर्घः । 'ख-घ-थ-ध-भाम्' (१।१८७) खी० → ही० → धू० → हू० । 'जस्-शसोर्लुक्' (३।४) जस्-शस्लुक् । **माला-गिरी-गुरू-सही-वहू** । 'राजृग्-दीप्तौ' (८९३) राज् । वर्त० अन्ति । 'बहुष्वाद्यस्य न्ति०' (३।१४२) अन्ति० → न्ति० । 'राजेरग्घ-छज्ज-सह-रीर-रेहाः' (४।१००) राज० → रेह० इति । 'लुक्' (१।१०) अलोपः । 'लोकात्' (१।१।३) ह० **रेहन्ति** । **पेच्छ** पूर्ववत् [३।२८] ।

**[ गिरिं-गुरुं-सहिं-वहुं-गामणिं-खलपुं पेच्छ ]** गिरि-गुरु । द्वितीया अम् । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **गिरिं गुरुं** ।

सखी-वधू । द्वितीया अम् । 'ख-घ-थ०' (१।१८७) खी० → ही० - धू० → हू० । 'दीर्घ-ह्रस्वौ मिथो वृत्तौ' (१।४) ह्रस्वः ही० → हि० - हू० → हु० । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनुस्वारः' (१।२३) अनुस्वारः **सहिं वहुं**।

ग्रामणी-खलपू । द्वितीया अम् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'दीर्घ-ह्रस्वौ मिथो०' (१।४) ह्रस्वः- णी० → णि० - पू० → पु० । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **गामणिं खलपुं** । **पेच्छ** पूर्ववत् [३।२८] ।

**[ हाहाण कयं ]** हाहा । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० **हाहाण** । **कयं** पूर्ववत् [२।११४] ।

**[ मालाण-गिरीण-गुरूण-सहीण-वहूण धणं ]** माला-गिरि-गुरु-सखी-वधू । षष्ठी आम् । जस्-शस्-ङसि०' (३।१२) दीर्घः । 'ख-घ-थ०' (१।१८७) खी० → ही० - धू० → हू० । 'टा-आमोर्णः' (३।६) आम्० → ण० **मालाण - गिरीण-गुरूण-सहीण-वहूण** । धनं । 'नो णः' (१।२२८) नं० → णं० **धणं** ।

**[ मालाहि-गिरीहि-गुरूहि-सहीहि-वहूहि कयं ]** माला-गिरि-गुरु-सखी-वधू । तृतीया भिस् । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हि० । 'इदुतो दीर्घः' (३।१६) दीर्घः । 'ख-घ-थ०' (१।१८७) खी० → ही० - धू० → हू० **मालाहि-गिरीहि-गुरूहि-सहीहि-वहूहि** । **कयं** पूर्ववत् [२।११४] ।

**[ मालाओ-मालाउ-मालाहिन्तो ]** माला । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु-हि-हिन्तो लुकः' (३।८) ङसि० → दो-दु-हिन्तो । 'क-ग-च-ज०' (१।१७७) द्लुक् **मालाओ मालाउ मालाहिन्तो** ।

**[ बुद्धीओ-बुद्धीउ-बुद्धीहिन्तो ]** बुद्धि । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु-हि०' (३।८) ङसि० → दो-दु-हिन्तो । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः- **बुद्धीओ बुद्धीउ बुद्धीहिन्तो** ।

**[ धेणूओ-धेणूउ-धेणूहिन्तो आगओ ]** धेनु । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु-हि-हिन्तो०' (३।८) ङसि० → दो-दु-हिन्तो । 'नो णः' (१।२२८) नु० → णु० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः- **धेणूओ धेणूउ धेणूहिन्तो** । **आगओ** पूर्ववत् [३।९७] ।

**[ मालाहिन्तो मालासुन्तो ]** माला (२) । पञ्चमी भ्यस् । 'भ्यसस्त्तो-दो-दु-हि-हिन्तो-सुन्तो' (३।९) भ्यस्० → हिन्तो० - सुन्तो० **मालाहिन्तो मालासुन्तो** ।

**[ गिरीहिन्तो ]** गिरि । पञ्चमी भ्यस् । 'भ्यसस्त्तो-दो-दु-हि-हिन्तो०' (३।९) भ्यस्० → हिन्तो० । 'इदुतो दीर्घः' (३।१६) रि० → री० **गिरीहिन्तो** ।

**[ गिरिस्स-गुरुस्स-दहिस्स-महुस्स ]** गिरि-गुरु-दधि-मधु । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० । यथाप्राप्तौ 'ख-घ-थ-ध-भाम्' (१।१८७) धि० → हि० - धु० → हु० **गिरिस्स-गुरुस्स-दहिस्स-महुस्स** ।

**[ गिरिम्मि-गुरुम्मि-दहिम्मि-महुम्मि ]** गिरि-गुरु-दधि-मधु । सप्तमी ङि । 'ङे-म्मि ङेः' (३।११) ङि० → म्मि० । 'ख-घ-थ-ध-भाम्' (१।१८७) धि० → हि० - धु० → हु० **गिरिम्मि-गुरुम्मि-दहिम्मि-महुम्मि** ।

**[ गिरी-गुरू चिट्ठन्ति पेच्छ वा ]** गिरि-गुरु । प्रथमा जस्-द्वितीया शस् वा । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - रि० → री० - रु० → रू० । 'जस्-शसोर्लुक्' (३।४) जस्-शस्लुक् **गिरी-गुरू** । **चिट्ठन्ति** पूर्ववत् [३।२०] । **पेच्छ** पूर्ववत् [३।२८] ।

**[ गिरीओ-गुरूओ आगओ ]** गिरि-गुरु । पञ्चमी ङसि । 'ङसेस्त्तो-दो०' (३।८) ङसि० → दो० । 'जस्-शस्-ङसि०- त्तो०' (३।१२) दीर्घः-रि० → री० - रु० → रू० । 'क-ग-च-ज०' (१।१७७) द्लुक् **गिरीओ गुरूओ** । **आगओ** पूर्ववत् [३।९७] ।

**[ गिरीण-गुरूण धणं ]** गिरि-गुरु । षष्ठी आम् । 'जस्-शस्-ङसि-त्तो-दो०' (३।१२) दीर्घः - रि० → री० - रु० → रू० । 'टा-आमोर्णः' (३।६) आम्० → ण० **गिरीण गुरूण** । **धणं** पूर्ववत् ॥१२४॥

## न दीर्घो णो ॥ ८।३।१२५ ॥

इदुदन्तयोरर्थाज्जस्-शस्-ङस्यादेशे णो इत्यस्मिन् परतो दीर्घो न भवति ॥

अग्गिणो । वाउणो ॥ णो इति किम् ? अग्गी । अग्गीओ ॥

**[ न दीर्घो णो ]** न प्रथमा सि । दीर्घ प्रथमा सि । णो सप्तमी ङि ।

**[ अग्गिणो ]** अग्नि । प्रथमा जस्-द्वितीया शस्-पञ्चमी ङसि वा । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । 'जस्-शस्-ङसि-ङसां णो' (३।५०) जस्-शस्-ङसि० → णो० **अग्गिणो** ।

**[ वाउणो ]** वायु । प्रथमा जस्-द्वितीया शस्-पञ्चमी ङसि वा । 'जस्-शस्-ङसि-ङसां णो' (३।५०) जस्-शस्-ङसि० → णो० । 'क-ग-च-ज०' (१।१७७) य्लुक् **वाउणो** ।

**[ अग्गी ]** अग्नि । प्रथमा जस्-द्वितीया शस् । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । 'जस्-शसोर्लुक्' (३।४) जस्-शस्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - ग्गि० → ग्गी० **अग्गी** ।

**[ अग्गीओ ]** अग्नि । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु०' (३।८) ङसि० → दो० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् **अग्गीओ** ॥१२५॥

## ङसेर्लुक् ॥ ८।३।१२६ ॥

आकारान्तादिभ्योऽदन्तवत्प्राप्तो ङसेर्लुग् न भवति ॥

मालत्तो । मालाओ । मालाउ । मालाहिन्तो आगओ ॥ एवं - अग्गीओ । वाऊओ इत्यादि ॥

**[ ङसेर्लुक् ]** ङसि षष्ठी ङस् । लुक् प्रथमा सि ।

**[ मालत्तो मालाओ मालाउ मालाहिन्तो आगओ ]** माला (४) । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु-हि-हिन्तो०' (३।८) ङसि० → त्तो-दो-दु-हिन्तो० । 'क-ग-च-ज०' (१।१७७) द्लुक् । प्रथमे 'ह्रस्वः संयोगे' (१।८४) ला० → ल० -**मालत्तो मालाओ मालाउ मालाहिन्तो** । **आगओ** पूर्ववत् [३।९७] ।

**[ अग्गीओ ]** अग्नि । पञ्चमी ङसि । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वं-गि० → ग्गि० । 'जस्-शस्-ङसि-त्तो-दो०' (३।१२) दीर्घः - ग्गी० । 'ङसेस्त्तो-दो०' (३।८) ङसि० → दो० । 'क-ग-च-ज०' (१।१७७) द्लुक् **अग्गीओ** ।

**[ वाऊओ ]** वायु । पञ्चमी ङसि । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'ङसेस्त्तो-दो०' (३।८) ङसि० → दो० । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः - ऊ० । 'क-ग-च-ज०' (१।१७७) द्लुक् **वाऊओ** ॥१२६॥

## भ्यसश्च हिः ॥ ८।३।१२७ ॥

आकारान्तादिभ्योऽदन्तवत्प्राप्तो भ्यसो ङसेश्च हिर्न भवति ॥

मालाहिन्तो । मालासुन्तो । एवं-अग्गीहिन्तो इत्यादि ॥ मालाओ । मालाउ । मालाहिन्तो । एवं अग्गीओ इत्यादि ॥

**[ भ्यसश्च हिः ]** भ्यस् षष्ठी ङस् । च प्रथमा सि । हि प्रथमा सि ।

**[ मालाहिन्तो मालासुन्तो ]** माला (२) । पञ्चमी भ्यस् । 'भ्यसस्त्तो-दो-दु-हि-हिन्तो-सुन्तो' (३।९) भ्यस्० → हिन्तो० - सुन्तो० **मालाहिन्तो मालासुन्तो** ।

**[ अग्गीहिन्तो [1]अग्गीसुन्तो ]** अग्नि (२) । पञ्चमी भ्यस् । 'भ्यसस्त्तो-दो-दु०' (३।९) भ्यस्० → हिन्तो० - सुन्तो० । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । 'इदुतो दीर्घः' (३।१६) दीर्घः- ग्गि० → ग्गी० **अग्गीहिन्तो अग्गीसुन्तो** ।

**[ मालाओ मालाउ मालाहिन्तो ]** माला (३) । पञ्चमी भ्यस् । 'भ्यसस्त्तो-दो-दु-हि०' (३।९) भ्यस्० → दो० - दु० - हिन्तो० । 'क-ग-च-ज०' (१।१७७) द्लुक् **मालाओ मालाउ मालाहिन्तो** ।

**[ अग्गीओ ]** अग्नि । पञ्चमी भ्यस् । 'भ्यसस्त्तो-दो०' (३।९) भ्यस्० → दो० । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । 'इदुतो०' (३।१६) दीर्घः - ग्गि० → ग्गी० **अग्गीओ** ॥१२७॥

## ङेर्डेः ॥ ८।३।१२८ ॥

आकारान्तादिभ्योऽदन्तवत्प्राप्तो ङेर्डेर्न भवति ॥ अग्गिम्मि । वाउम्मि । दहिम्मि । महुम्मि ॥

**[ ङेर्डेः ]** ङि षष्ठी ङस् । डे प्रथमा सि ।

**[ अग्गिम्मि ]** अग्नि । सप्तमी ङि । 'डे-म्मि ङेः' (३।११) ङि० → म्मि० । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वं - गि० → ग्गि० **अग्गिम्मि** ।

**[ वाउम्मि ]** वायु । सप्तमी ङि । 'डे-म्मि ङेः' (३।११) ङि० → म्मि० । 'क-ग-च-ज०' (१।१७७) य्लुक् वाउम्मि ।

**[ दहिम्मि ]** दधि । सप्तमी ङि । 'डे-म्मि ङेः' (३।११) ङि० → म्मि० । 'ख-घ-थ०' (१।१८७) धि० → हि० **दहिम्मि** ।

---

१. A. अग्गीसुन्तो उदाहरणम् ।

**[ महुम्मि ]** मधु । सप्तमी ङि । 'डे-म्मि ङेः' (३।११) ङि० → म्मि० । 'ख-घ-थ०' (१।१८७) धु० → हु० **महुम्मि** ॥१२८॥

## एत् ॥ ८।३।१२९ ॥

आकारान्तादीनामर्थात् टा-शस्-भिस्-भ्यस्-सुप्सु परतोऽदन्तवद् एत्त्वं न भवति ॥

हाहाण कयं । मालाओ पेच्छ । मालाहि कयं । मालाहिन्तो मालासुन्तो आगओ । मालासु ठिअं । एवं - अग्गिणो । वाउणो इत्यादि ॥

**[ एत् ]** एत् प्रथमा सि ।

**[ हाहाण कयं ]** हाहा । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० **हाहाण** । **कयं** पूर्ववत् [२।११४] ।

**[ मालाओ पेच्छ ]** माला । द्वितीया शस् । 'स्त्रियामुदोतौ वा' (३।२७) शस्० → ओत्० **मालाओ** । **पेच्छ** पूर्ववत् [३।२८] ।

**[ मालाहि कयं ]** माला । तृतीया भिस् । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हि० **मालाहि** । **कयं** पूर्ववत् [२।११४] ।

**[ मालाहिन्तो मालासुन्तो आगओ ]** माला (२) । पञ्चमी भ्यस् । 'भ्यसस्त्तो-दो-दु-हि-हिन्तो-सुन्तो' (३।९) भ्यस्० → हिन्तो - सुन्तो० **मालाहिन्तो मालासुन्तो** । **आगओ** पूर्ववत् [३।९७] ।

**[ मालासु ठिअं ]** माला । सप्तमी सुप् । **मालासु** । **ठिअं** पूर्ववत् [३।११५] ।

**[ अग्गिणो ]** अग्नि । द्वितीया शस् । 'जस्-शसोर्णो वा' (३।२२) शस्० → णो० । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वं - गि० → ग्गि० **अग्गिणो** ।

**[ वाउणो ]** वायु । द्वितीया शस् । 'जस्-शसोर्णो वा' (३।२२) शस्० → णो० । 'क-ग-च-ज०' (१।१७७) य्लुक् **वाउणो** ॥१२९॥

## द्विवचनस्य बहुवचनम् ॥ ८।३।१३० ॥

सर्वासां विभक्तीनां स्यादीनां त्यादीनां च द्विवचनस्य स्थाने बहुवचनं भवति ॥

दोण्णि दुण्णि कुणन्ति । दुवे कुणन्ति । दोहिं दोहिन्तो दोसुन्तो दोसु हत्था पाया थणया नयणा ॥

**[ द्विवचनस्य बहुवचनम् ]** द्विवचन षष्ठी ङस् । बहुवचन प्रथमा सि ।

**[ दोण्णि दुण्णि कुणन्ति ]** द्वि (२) । प्रथमा जस् । 'दुवे दोण्णि बेण्णि च जस्-शसा' (३।१२०) उभयत्र जसा सह द्विस्थाने **दोण्णि** । द्वितीये 'ह्रस्वः संयोगे' (१।८४) **दुण्णि** ।

'डुकृंग् करणे' (८८८) कृ । वर्त्त० अन्ति । 'कृगेः कुणः' (४।६५) कृ० → कुण० । 'बहुष्वाद्यस्य न्ति-न्ते-इरे' (३।१४२) अन्ति० → न्ति० **कुणन्ति** ।

**[ दुवे कुणन्ति ]** द्वि । प्रथमा जस् । 'दुवे दोण्णि बेण्णि च जस्-शसा' (३।१२०) जसा सह द्विस्थाने दुवे **दुवे** । **कुणन्ति** पूर्ववत् ।

**[ दोहिं ]** द्वि । तृतीया भिस् । 'भिसो हि-हिं-हिं' (३।७) भिस्० → हिं० । 'द्वेर्दो-बे' (३।११९) द्वि० → दो० **दोहिं** ।

**[ दोहिन्तो ]** द्वि । पञ्चमी भ्यस् । 'भ्यसस्त्तो-दो-दु०' (३।९) भ्यस्० → हिन्तो० । 'द्वेर्दो-बे' (३।११९) द्वि० → दो० **दोहिन्तो** ।

**[ दोसुन्तो ]** द्वि । पञ्चमी भ्यस् । 'भ्यसस्त्तो-दो-दु०' (३।९) भ्यस्० → सुन्तो० । 'द्वेर्दो-बे' (३।११९) द्वि० → दो० **दोसुन्तो** ।

**[ दोसु ]** द्वि । सप्तमी सुप् । 'द्वेर्दो-बे' (३।११९) द्वि० → दो० **दोसु** ।

**[ हत्था ]** हस्त । प्रथमा औ । अनेन औ० → जस्० । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्तस्य थः । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । 'जस्-शस्-ङसि-त्तो-दो०' (३।१२) दीर्घः । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **हत्था** ।

**[ पाया ]** पाद । प्रथमा जस् । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अवर्णो०' (१।१८०) आ० → या० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **पाया** ।

**[ थणया ]** स्तनक । प्रथमा जस् । 'स्तस्य थोऽसमस्त०' (२।४५) स्त० → थ० । 'नो णः' (१।२२८) न० → ण० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **थणया** ।

**[ नयणा ]** नयन । प्रथमा जस् । 'नो णः' (१।२२८) न० → ण० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **नयणा** ॥१३०॥

## चतुर्थ्याः षष्ठी ॥ ८।३।१३१ ॥

चतुर्थ्याः स्थाने षष्ठी भवति ॥ मुणिस्स मुणीण देइ ॥ नमो देवस्स देवाण ॥

**[ चतुर्थ्याः षष्ठी ]** चतुर्थी षष्ठी ङस् । षष्ठी प्रथमा सि ।

**[ मुणिस्स देइ ]** मुनि । चतुर्थी ङे । 'नो णः' (१।२२८) नि० → णि० । अनेन षष्ठी । 'ङसः स्सः' (३।१०) ङस्० → स्स० **मुणिस्स देइ** ।

**[ मुणीण देइ ]** मुनि । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शम्-ङसि-त्तो०' (३।१२) दीर्घः - नि० → नी० । 'नो णः' (१।२२८) नी० → णी० **मुणीण देइ** ।

**[ नमो देवस्स ]** नमस् । प्रथम सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'सो रुः' (२।१।७२) स्० → रु० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः । 'अतो डो०' (१।३७) विसर्गस्य डो० → ओ० **नमो** । देव । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **देवस्स** ।

**[ नमो देवाण ]** **नमो** पूर्ववत् । देव । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः **देवाण** ॥१३१॥

## तादर्थ्यङेर्वा ॥ ८।३।१३२ ॥

तादर्थ्यविहितस्य ङेश्चतुर्थ्येकवचनस्य स्थाने षष्ठी वा भवति ॥

देवस्स देवाय । देवार्थमित्यर्थः ॥ ङेरिति किम् ? देवाण ॥

**[ तादर्थ्यङेर्वा ]** तादर्थ्यङि षष्ठी ङस् । वा प्रथमा सि ।

**[ देवस्स देवाय ]** देव । चतुर्थी ङे । अनेन वा ङेस्थाने षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **देवस्स** । पक्षे-देव । चतुर्थी ङे । 'ङे-ङस्योर्या०' (१।४।६) ङे० → य० । 'अत आः स्यादौ०' (१।४।१) व० → वा० **देवाय** ।

**[ देवाण ]** देव । षष्ठी आम् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः **देवाण** ॥१३२॥

## वधाड्डाइश्च वा ॥ ८।३।१३३ ॥

वधशब्दात्परस्य तादर्थ्यङेर्डिद् आइ षष्ठी च वा भवति ॥ वहाइ । वहस्स । वहाय । वधार्थमित्यर्थः ॥

**[ वधाड्डाइश्च वा ]** वध पञ्चमी ङसि । डाइ प्रथमा सि । च प्रथमा सि । वा प्रथमा सि ।

**[ वहाइ ]** वध । चतुर्थी ङे । वधार्थं = वधाय । अनेन ङे० → डाइ० → आइ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) वधाइ । 'ख-घ-थ-ध-भाम्' (१।१८७) धा० → हा० **वहाइ** ।

**[ वहस्स ]** वध । चतुर्थी ङे । अनेन चतुर्थीस्थाने षष्ठी । 'ङसः स्सः' (३।१०) ङस्० → स्स० । 'ख-घ-थ०' (१।१८७) ध० → ह० **वहस्स** ।

**[ वहाय ]** वध । चतुर्थी ङे । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) ङे० → य० । 'अत आः स्यादौ०' (१।४।१) ध० → धा० । 'ख-घ-थ-ध-भाम्' (१।१८७) धा० → हा० **वहाय** ॥१३३॥

## क्वचिद् द्वितीयादेः ॥ ८।३।१३४ ॥

द्वितीयादीनां विभक्तीनां स्थाने षष्ठी भवति क्वचित् ॥

सीमांधरस्स वन्दे । तिस्सा मुहस्स भरिमो । अत्र द्वितीयायाः षष्ठी ॥

धणस्स लंद्धो । धनेन लब्ध इत्यर्थः ॥ चिरस्स मुक्का । चिरेण मुक्तेत्यर्थः ॥ तेसिमेअमणाइण्णं । तैरेतदनाचरितम् ॥ अत्र तृतीयायाः ॥

चोरस्स बीहइ । चौराद् बिभेतीत्यर्थः ॥ इअराइं जाण लहुअक्खराइं पायन्तिमिल्लसहिआण । पादान्तेन सहितेभ्य इतराणीति ॥ अत्र पञ्चम्याः ॥

पिट्ठीए केसभारो । अत्र सप्तम्याः ॥

**[ क्वचिद् द्वितीयादेः ]** क्वचित् सप्तमी ङि । द्वितीयादि षष्ठी ङस् ।

**[ सीमाधरस्स वन्दे ]** सीमाधर । द्वितीया अम् । अनेन अम्स्थाने ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **सीमाधरस्स** ।

---

१. तमतिमिरपडल-विद्धंसणस्स सुरगणनरिंदमहियस्स ।
**सीमाधरस्स वंदे** पप्फोडियमोहजालस्स ॥ [आवश्यकसूत्रे पुक्खरवरदीवड्ढे सूत्रे गा० २]
तमस्तिमिरपटलविध्वंसनं सुरगणनरेन्द्रमहितम् ।
सीमाधरं वन्दे प्रस्फोटितमोहजालम् ॥

२. B. C. लुद्धो ।

'वदुङ् स्तुत्यभिवादनयोः' (७२१) वद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) वन्द् । वर्त्त० ए । 'लोकात्' (१।१।३) न्दे० **वन्दे** ।

**[ तिस्सा मुहस्स भरिमो ]** तद् । षष्ठी ङस् । 'अन्त्यव्य०' (१।११) द्लुक् । 'किं-यत्तदोस्यमामि' (३।३३) ङीप्र० । 'ईद्भ्यः स्सा-से' (३।६४) ङस्० → स्सा० । 'ह्रस्वः संयोगे' (१।८४) ती० → ति० **तिस्सा** ।

मुख । द्वितीया अम् । अनेन द्वितीयास्थाने षष्ठी । 'ङसः स्सः' (३।१०) ङस्० → स्स० । 'ख-घ-थ-ध-भाम्' (१।१८७) ख० → ह० **मुहस्स** ।

'स्मृं चिन्तायाम्' (१८) स्मृ । वर्त्त० मस् । 'स्मरेर्झर-झूर-भर-भल-लढ-विम्हर-सुमर-पयर-पम्हुहाः' (४।७४) स्मृ० → भर० । 'तृतीयस्य मो-मु-माः' (३।१४४) मस्० → मो० । 'इच्च मो-मु-मे वा' (३।१५५) इत्वम् **भरिमो** ।

**[ धणस्स लद्धो ]** धन । तृतीया टा । अनेन टास्थाने ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० । 'नो णः' (१।२२८) न० → ण० **धणस्स** ।

लब्ध । प्रथमा सि । 'सर्वत्र ल०' (२।७९) ब्लुक् । 'अनादौ०' (२।८९) धस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वधस्य दः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **लद्धो** ।

**[ चिरस्स मुक्का ]** चिर । तृतीया टा । अनेन टास्थाने ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **चिरस्स** ।

मुक्ता । 'शक्त-मुक्त-दष्ट-रुग्ण-मृदुत्वे को वा' (२।२) क्ता० → का० । 'अनादौ०' (२।८९) कस्य द्वित्वम् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **मुक्का** ।

[1]**[ तेसिमेअमणाइण्णं ]** तद् । षष्ठी आम् । 'अन्त्य०' (१।११) द्लुक् । 'आमो डेसिं' (३।६१) आम्० → डेसिं० → एसिं० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **तेसिं** ।

एतद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **एअं** ।

अनाचीर्णम् । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'ह्रस्वः संयोगे' (१।८४) ई० → इ० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'नो णः' (१।२२८) ना० → णा० । 'अनादौ०' (२।८९) णस्य द्वित्वम् **अणाइण्णं** ।

**[ चोरस्स बीहइ ]** चौर । पञ्चमी ङसि । अनेन ङसि० → स्स० । 'ङसः स्सः' (३।१०) ङस्० → स्स० । 'औत ओत्' (१।१५९) चौ० → चो० **चोरस्स** ।

'ञिभींक् भये' (११३२) भी । वर्त्त० तिव् । 'भियो भा-बीहौ' (४।५३) भी० → बीह० इति । 'त्यादीनामाद्य०' (३।१३९) ति० → इ० **बीहइ** ।

[2]**[ इअराइं जाण लहुअक्खराइं पायन्तिमिल्लसहिआण ]** इतर । द्वितीया शस् । 'जस्-शस इँ-इं-णयः०' (३।२६) शस्० → इं० - पूर्वस्य च दीर्घः - र० → रा० । 'क-ग-च-ज०' (१।१७७) त्लुक् **इअराइं** ।

---

१. संजमे सुट्ठिअप्पाणं, विप्पमुक्काण ताइणं ।
**तेसिमेयमणाइण्णं,** निग्गंथाण महेसिणं ॥ [द० वै०- खुड्डियायारकहा तृतीयेऽध्ययने गा० १]

संयमे सुस्थितात्मभिः विप्रमुक्तैः तायिभिः । तैरेतदनाचरितं निर्ग्रन्थैः महर्षिभिः ॥

२. **इअराइं जाण लहुअक्खराइं पाइंतिमेल्लसहिआण** । संजोअपढमदीहरसबिंदुसविसग्गवण्णाण ॥ [वृ० जा० स०-१३]
इतराणि जानीहि लघ्वक्षराणि पादान्तिमकसहितेभ्यः । संयोगप्रथमदीर्घतरबिन्दुसविसर्गवर्णेभ्यः ॥

'ज्ञांश् अवबोधने' (१५४०) ज्ञा । 'ज्ञो जाण-मुणौ' (४।७) ज्ञा० → जाण० । पञ्चमी हि । 'दु-सु-मु०' (३।१७३) हि० → सु० । 'अत इज्जस्विज्जहीज्जे-लुको वा' (३।१७५) सुलुक् **जाण** ।

लघुकाक्षर । द्वितीया शस् । 'ख-घ-थ०' (१।१८७) घु० → हु० । 'ह्रस्वः संयोगे' (१।८४) का० → क० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'क्षः खः क्वचित्तु०' (२।३) क्षस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य क० । 'जस्-शस इँ-इं०' (३।२६) जस्० → इं - पूर्वस्य च दीर्घः **लहुअक्खराइं** ।

पादान्तिमसहित । षष्ठी आम् । 'ह्रस्वः संयोगे' (१।८४) दा० → द० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'स्वार्थे कश्च वा' (२।१६४) इति अन्तिम अग्रे डिल्ल० → इल्ल इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) पायन्तिमिल्ल । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'जस्-शस्-ङसि-त्तो-दो०' (३।१२) दीर्घः । 'टा-आमोर्णः' (३।६) आम्० → ण० **पायन्तिमिल्लसहिआण** ।

**[ पिट्ठीए केसभारो ]** पृष्टि । सप्तमी ङि । अनेन ङिस्थाने षष्ठी ङस् । 'इत्कृपादौ' (१।१२८) पृ० → पि० । 'ष्टस्याऽनुष्ट्रेष्टा०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'इदुतो दीर्घः' (३।१६) दीर्घः-ट्ठि० → ट्ठी० । 'टा-ङस्-ङेर०' (३।२९) ङस्० → ए० **पिट्ठीए** ।

केशभार । प्रथमा सि । 'श-षोः सः' (१।२६०) श० → स० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **केसभारो** ॥१३४॥

## द्वितीया-तृतीययोः सप्तमी ॥ ८।३।१३५ ॥

द्वितीया-तृतीययोः स्थाने क्वचित् सप्तमी भवति ॥

गामे वसामि नयरे न जामि । अत्र द्वितीयायाः ॥

मइ वेविरीए मलिआइं । तिसु तेसु अलंकिआ पुहई । अत्र तृतीयायाः ॥

**[ द्वितीया-तृतीययोः सप्तमी ]** द्वितीया-तृतीया षष्ठी ओस् । सप्तमी प्रथमा सि ।

**[ गामे वसामि नयरे न जामि ]** ग्राम । द्वितीया अम् । अनेन अम्० → ङि० । 'सर्वत्र ल-व०' (२।७९) **र्लुक्** । 'ङे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) मे० **गामे** ।

'वसं निवासे' (९९९) वस् । वर्त्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'व्यञ्जनाद०' (४।२३९) अत् । 'लोकात्' (१।१।३) वसमि । 'मौ वा' (३।१५४) आत्वम् **वसामि** ।

नगर । द्वितीया अम् । अनेन अम्० → ङि० । 'क-ग-च-ज०' (१।१७७) ग्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'ङे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) रे० **नयरे** ।

''यांक् प्रापणे' (१०६२) या । वर्त्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'आदेर्यो जः' (१।२४५) या० → जा० **जामि** ।

**[ मइ वेविरीए मलिआइं ]** अस्मद् । तृतीया टा । अनेन टा० → ङि० । मि-मइ-ममाइ-मए-मे ङिना' (३।११५) ङिना सह अस्मद्स्थाने **मइ** ।

'टुवेपृङ् चलने' (७५४) वेप् । वेपति(ते) इत्येवंशील: । 'शीलाद्यर्थस्येर:' (२।१४५) इरप्र० । 'लोकात्' (१।१।३) वेपिर० । 'पो व:' (१।२३१) पि० → वि० । अनेन टा० → ङि० । 'अजाते: पुंस:' (३।३२) ङीप्र० । 'लोकात्' (१।१।३) वेविरी० । 'टा-ङस्-ङेरदादि०' (३।२९) ङि० → ए० **वेविरीए** ।

'मृदश् क्षोदे' (१५५०) मृद् । क्तप्र० । 'मृदो मल-मढ-परिहट्ट-खड्ड-चड्ड-मड्ड-पन्नाडा:' (४।१२६) मृद्० → मल० । 'क्ते' (३।१५६) ल० → लि० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) मलित० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा जस् । 'जस्-शस-इँ-इं०' (३।२६) जस्० → इं० - पूर्वस्य च दीर्घ: **मलिआइं** । मया कम्पमानया मर्दितानीत्यर्थ: ॥

[1]**[ विहलं जो अवलंबइ, आवइवडिअं च जो समुद्धरइ ।**
**सरणागयं च रक्खइ, तिसु तेसु अलंकिआ पुहई ॥ ]**

यो विफलं - धनरहितं पुमांसं अवलम्बते, यश्चापत्पतितं समुद्धरति, यश्च शरणागतं रक्षति, तैस्त्रिभि: पृथ्वी अलङ्कृता वर्तते इत्यर्थ: ॥

त्रि । तृतीया भिस् । 'त्रेस्ती तृतीयादौ' (३।११८) त्रि० → ती० । 'पानीया०' (१।१०१) ती० → ति० । अनेन भिस्० → सुप्० **तिसु** ।

तद् । तृतीया भिस् । अनेन भिस्० → सुप्० । 'अन्त्यव्यञ्जनस्य' (१।११) द्लुक् । 'भिस्-भ्यस्-सुपि' (३।१५) त० → ते० **तेसु** ।

अलङ्कृता । 'इत्कृपादौ' (१।१२८) कृ० → कि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक् **अलंकिआ** ।

पृथिवी । 'पथि-पृथिवी-प्रतिश्रुन्मूषिक-हरिद्रा-बिभीतकेष्वत्' (१।८८) थि० → थ० । 'उदृत्वादौ' (१।१३१) पृ० → पु० । 'ख-घ-थ-ध-भाम्' (१।१८७) थ० → ह० । 'क-ग-च-ज०' (१।१७७) व्लुक् । प्रथमा सि। 'अन्त्यव्य०' (१।११) स्लुक् **पुहई** । तैस्त्रिभिरलङ्कृता पृथिवीत्यर्थ: ॥१३५॥

## पञ्चम्यास्तृतीया च ॥ ८।३।१३६ ॥

पञ्चम्या: स्थाने क्वचित् तृतीया-सप्तम्यौ भवत: ॥

चोरेण बीहइ । चोराद् बिभेतीत्यर्थ: ॥ अन्तेउरे रमिउमागओ राया । अन्त:पुराद् रन्त्वा आगतो राजा इत्यर्थ: ॥

**[ पञ्चम्यास्तृतीया च ]** पञ्चमी षष्ठी ङस् । तृतीया प्रथमा सि । च प्रथमा सि ।

**[ चोरेण बीहइ ]** चौर । पञ्चमी ङसि । अनेन ङसि० → टा० । 'औत ओत्' (१।१५९) चौ० → चो० । 'टा-आमोर्ण:' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) र० → रे **चोरेण** ।

'ञिभीङ् भये' (११३२) भी । वर्त्त० तिव् । 'भियो भा-बीहौ' (४।५३) भी० → बीह० इति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **बीहइ** ।

---

१. जं जि खमेइ समत्थो धणवंतो जं न गव्वमुव्वहइ ।
जं च सविज्जो नमिरो **तिसु तेसु अलंकिया पुहवी** ॥ [व० ल० - नीइवज्जा - ८७]
यत् खलु क्षमते समर्थो धनवान् यन्न गर्वमुद्वहति ।
यच्च सविद्यो नम्रस्त्रिभिस्तैरलङ्कृता पृथ्वी ॥

**[ अन्तेउरे रमिउमागओ राया ]** अन्तर्-पुर । पञ्चमी ङसि । अनेन ङसि० → ङि० । 'अन्त्यव्य०' (१।११) र्लुक् । 'तोऽन्तरि' (१।६०) एत्वम्-त० → ते० । 'क-ग-च-ज०' (१।१७७) प्लुक् । 'डे-म्मि ङे' (३।११) ङि० → डे० → ए० । 'ङित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **अन्तेउरे** ।

'रमिं क्रीडायाम्' (९८९) रम् । रमणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'क्त्वस्तुमत्तूण-तुआणाः' (२।१४६) क्त्वा० → तुम्० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) रमतुम् । 'एच्च क्त्वा-तुम्-तव्य-भविष्यत्सु' (३।१५७) म० → मि० । 'क-ग-च-ज०' (१।१७७) त्लुक् **रमिउम्** ।

आगत । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आगओ** ।

राजन् । प्रथमा सि । 'अन्त्यव्य०' (१।११) न्लुक् । 'राज्ञः' (३।४९) जा० । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० । 'अन्त्यव्य०' (१।११) स्लुक् **राया** ॥१३६॥

## सप्तम्या द्वितीया ॥ ८।३।१३७ ॥

सप्तम्याः स्थाने क्वचिद् द्वितीया भवति ॥

विज्जुज्जोयं भरइ रत्तिं ॥ आर्षे तृतीयापि दृश्यते । तेणं कालेणं । तेणं समएणं । तस्मिन् काले तस्मिन् समये इत्यर्थः ॥ प्रथमाया अपि द्वितीया दृश्यते । चउवीसं पि जिणवरा । चतुर्विंशतिरपि जिनवरा इत्यर्थः ॥

**[ सप्तम्या द्वितीया ]** सप्तमी षष्ठी ङस् । द्वितीया प्रथमा सि ।

**[ विज्जुज्जोअं भरइ रत्तिं ]** विद्युत् । प्रथमा सि । 'अन्त्यव्य०' (१।११) त्लुक् । 'द्य-य्य-र्यां जः' (२।२४) द्यस्य जः - द्यु० → जु० । 'अनादौ०' (२।८९) जस्य द्वित्वं - जु० → ज्जु० । 'अक्लीबे सौ' (३।१९) दीर्घः - ज्जु० → ज्जू० । 'अन्त्यव्य०' (१।११) स्लुक् विज्जू ।

उद्योत । द्वितीया अम् । 'लुक्' (१।१०) ऊलोपः । 'द्य-य्य-र्यां जः' (२।२४) द्यस्य जः - द्यो० → जो० । 'अनादौ०' (२।८९) जस्य द्वित्वं - जो० → ज्जो० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनु०' (१।२३) अनुस्वारः उज्जोअं **विज्जुज्जोअं** ।

[1]भृ धातुः । वर्त्त० तिव् । 'ऋवर्णस्या०' (४।२३४) भृ० → भर्० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **भरइ** ।

रात्रि । सप्तमी ङि । अनेन सप्तमीस्थाने द्वितीया अम् । 'ह्रस्वः संयोगे' (१।८४) रा० → र० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) तस्य द्वित्वं - ति० → त्ति० । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **रत्तिं** । काचिन्नारी रात्रौ गच्छन्ती(ति) विद्युदुद्योतं स्मरतीत्यर्थः ।

**[ तेणं कालेणं ]** तद् । सप्तमी ङि । आर्षत्वात् सप्तमीस्थाने तृतीया टा । 'अन्त्यव्य०' (१।११) द्लुक् । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) त० → ते० । 'क्त्वा-स्यादेर्ण-स्वोर्वा' (१।२७) अनुस्वारः **तेणं** ।

काल । सप्तमी ङि । आर्षत्वात् सप्तम्याः स्थाने तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) ल० → ले० । 'क्त्वा-स्यादेर्ण०' (१।२७) अनुस्वारः **कालेणं** ।

---

१. टिप्पनकम् - अत्र 'स्मृं चिन्तायाम्' (१८) धातोर्गृहीत्वा तस्य 'स्मरेर्झर०' (४।७४) सूत्रेण भर आदेशग्रहणं सम्यक् प्रतिभाति ।

**[ तेणं समएणं ] तेणं** पूर्ववत् । समय । सप्तमी ङि । सूत्रेण तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) य० → ये० । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'क्त्वा-स्यादेर्ण०' (१।२७) अनुस्वारः **समएणं** ।

[1]**[ चउवीसं पि जिणवरा ]** चतुर्विंशति । प्रथमा सि । प्रथमार्थेऽपि द्वितीया । सिस्थाने द्वितीया अम् । 'विंशत्यादेर्लुक्' (१।२८) अनुस्वारलुक् । 'ईर्जिह्वा-सिंह-त्रिंशद्विंशतौ त्या' (१।९२) तिलुक् - वि० → वी० । 'श-षोः सः' (१।२६०) श० → स० । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **चउवीसं** ।

अपि । प्रथमा सि । 'पदादपेर्वा' (१।४१) अलुक् । 'अव्ययस्य' (३।२।७) सिलुप् **पि** ।

जिनवर । प्रथमा जस् । 'नो णः' (१।२२८) न० → ण० । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - र० → रा० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **जिणवरा** ॥१३७॥

## क्यङोर्यलुक् ॥ ८।३।१३८ ॥

क्यङन्तस्य क्यङ्षन्तस्य वा सम्बन्धिनो यस्य लुग् भवति ॥

क्यङ्-गरुआइ गरुआअइ । अगुरुर्गुरुर्भवति - गुरुरिवाचरति वेत्यर्थः ॥

क्यङ्ष् - दमदमाइ दमदमाअइ ॥ लोहिआइ लोहिआअइ ॥

**[ क्यङोर्यलुक् ]** क्यङ् षष्ठी ओस् । यलुक् प्रथमा सि ।

**[ गरुआइ गरुआअइ ]** गुरु । 'स्वार्थे कश्च वा' (२।१६४) कप्र० । 'गुरौ के वा' (१।१०९) गु० → गु० - ग० । अगुरुको गुरुको भवति । 'च्व्यर्थे भृशादेः०' (३।४।२९) क्यङ्प्र० → य इति । अथवा गुरुक इवाचरति । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य । शेषं संस्कृतवत् । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः - क० → का० । अनेन य्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । वर्त० ते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० गरुआइ । 'स्वरादनतो वा' (४।२४०) इति विकल्पेन अत् स्यात् । यत्र न अत् तत्र **गरुआइ**, यत्र अत् तत्र **गरुआअइ** इति रूपद्वयम् ॥

**[ दमदमाइ दमदमाअइ ]** दमत् । अदमत् दमत् भवति । 'अव्यक्तानुकरणादनेकस्वरात्०' (७।२।१४५) डाच्प्र० - दमत्द्विर्वचनं च । 'डाच्यादौ' (७।२।१४९) त्लुक् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलुक् । 'डाच्-लोहितादिभ्यः षित्' (३।४।३०) क्यङ्ष्प्र० → य० । अनेन य्लुक् । वर्त० ते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **दमदमाइ** । आडम्बरं करोतीत्यर्थः । 'स्वरादनतो वा' (४।२४०) अत् **दमदमाअइ** ।

**[ लोहिआइ लोहिआअइ ]** लोहित । अलोहितो लोहितो भवति । 'अव्यक्तानुकरणादनेकस्वरात्०' (७।२।१४५) डाच्प्र० → आ इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) लोहिता । 'डाच्-लोहितादिभ्यः षित्' (३।४।३०) क्यङ्ष्प्र० → य० । अनेन य्लुक् । वर्त० ते । 'त्यादीनामाद्य०' (३।४।३०) ते० → इ० । 'क-ग-च-ज०' (१।१७७) त्लुक् **लोहिआइ** । 'स्वरादनतो वा' (४।२४०) अत् आगमः **लोहिआअइ** ॥१३८॥

## त्यादीनामाद्यत्रयस्याऽऽद्यस्येचेचौ ॥ ८।३।१३९ ॥

त्यादीनां विभक्तीनां परस्मैपदानामात्मनेपदानां च सम्बन्धिनः प्रथमत्रयस्य यदाद्यं वचनं तस्य स्थाने इच्-एच् इत्येतावादेशौ भवतः ॥

---

१. एवं मए अभिथुआ विहुअरयमला पहीणजरमरणा । **चउवीसं पि जिणवरा** तित्थयरा मे पसीयन्तु ॥

[आवश्यकसूत्रे चतुर्विंशतिस्तवे गा. ५]

एवं मया अभिष्टुता विधूत-रजो-मलाः प्रहीण-जरा-मरणाः । चतुर्विंशतिरपि जिनवराः तीर्थकरा मे प्रसीदन्तु ॥

हसइ हसए ॥ वेवइ वेवए ॥ चकारौ 'इचेचः' (४।३१८) इत्यत्र विशेषणार्थौ ॥

**[ त्यादीनामाद्यत्रयस्याऽऽद्यस्येचेचौ ]** त्यादि षष्ठी आम् । आद्यत्रय षष्ठी ङस् । आद्य षष्ठी ङस् । इचेच् प्रथमा औ ।

**[ हसइ हसए ]** 'हसे हसने' (५४५) हस् (२) । वर्त्त० तिव् । 'व्यञ्जनाद०' (४।२३९) अत् । 'लोकात्' (१।१।३) हसति । अनेन तिव्स्थाने इच् → इ, एच् → ए, **हसइ हसए** ।

**[ वेवइ वेवए ]** 'टुवेपृङ् चलने' (७५४) वेप् (२) । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) वेपते । अनेन ते स्थाने इच् → इ, एच् → ए । 'पो वः' (१।२३१) प० → व० **वेवइ वेवए** ॥१३९॥

## द्वितीयस्य सि-से ॥ ८।३।१४० ॥

त्यादीनां परस्मैपदानामात्मनेपदानां च द्वितीयस्य त्रयस्य सम्बन्धिन आद्यस्य वचनस्य स्थाने सि-से इत्येतावादेशौ भवतः ॥ हससि हससे ॥ वेवसि वेवसे ॥

**[ द्वितीयस्य सि-से ]** द्वितीय षष्ठी ङस् । सि-से प्रथमा औ ।

**[ हससि हससे ]** 'हसे हसने' (५४५) हस् । वर्त्त० सिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हससि । अनेन सिव्स्थाने सि-से **हससि हससे** ।

**[ वेवसि वेवसे ]** 'टुवेपृङ् चलने' (७४५) वेप् । वर्त्त० सिव्(से) । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) वेपसि(से) । 'पो वः' (१।२३१) प० → व० । अनेन सिव्(से)स्थाने सि-से **वेवसि वेवसे** ॥१४०॥

## तृतीयस्य मिः ॥ ८।३।१४१ ॥

त्यादीनां परस्मैपदानामात्मनेपदानां च तृतीयस्य त्रयस्याऽऽद्यस्य वचनस्य स्थाने मिरादेशो भवति ॥

हसामि । वेवामि ॥ बहुलाधिकाराद् मिव्स्थानीयस्य मेरिकारलोपश्च ॥

[१]बहुजाणय ! रूसिउं सक्कं । शक्नोमीत्यर्थः ॥ न मरं । न म्रिये इत्यर्थः ॥

**[ तृतीयस्य मिः ]** तृतीय षष्ठी ङस् । मि प्रथमा सि ।

**[ हसामि ]** 'हसे हसने' (५४५) हस् । 'वर्त्त० मिव् । अनेन मिव्० → मि० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हसमि । 'मौ वा' (३।१५४) आत्वम् **हसामि** ।

**[ वेवामि ]** 'टुवेपृङ् चलने' (७५४) वेप् । वर्त्त० ए । अनेन ए० → मि० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) वेपमि । 'मौ वा' (३।१५४) आत्वम् । 'पो वः' (१।२३१) पा० → वा० **वेवामि** ।

**[ बहुजाणय ! रूसिउं सक्कं ]** बहु-ज्ञान । हे पूर्व० । प्रथमा सि । बहु ज्ञानं यस्य सः, तस्य सम्बोधने 'स्वार्थे कश्च वा' (२।१६४) कप्र० । 'ज्ञो ञः' (२।८३) ञ्लुक् । 'नो णः' (१।२२८) न० → ण० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'अन्त्यव्य०' (१।११) स्लुक् । अथवा बहु जानातीति । 'णक-तृचौ'

---

१. हिअ[१]अट्ठाविअमण्णुं अवरुद्धमुहं हि मं पसाअन्त । अवरुद्धस्स वि ण हु दे **बहुजाणअ ! रोसिउं सक्कं** ॥
[ध्व० लो० - द्वितीयोद्योतः । अनु० अङ्कः -६६]

हृदयस्थापितमन्युमपरुष्टमुखीमपि मां प्रसादयन् । अपराद्धस्यापि न खलु ते बहुज्ञ ! रोषितुं शक्यम् ॥

१. पाठां० - अनु० - हियअट्ठिअमन्नुं खु अणरुद्धमुहं पि मं पसायंतं । हृदयस्थितमन्युं खलु अनूर्ध्वमुखीमपि मां प्रसादयतः ।

(५।१।४८) णकप्र० → अक इति । 'ज्ञो जाण-मुणौ' (४।७) ज्ञा० → जाण० इति । 'लुक्' (१।१।३) अलुक् । 'लोकात्' (१।१।३) जाणक । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । आमन्त्रणे सि । 'अन्त्यव्य०' (१।११) स्लुक् **बहुजाणय !** ।

रु(रो)षितुम् । 'श-षोः सः' (१।२६०) षि० → सि० । 'क-ग-च-ज०' (१।१७७) त्लुक् **रूसिउं** ।

'शक्लृंट् शक्तौ' (१३००) शक् । वर्त्त० मिव् । बाहुलकात् अनेन मि-मध्याद् इलुक् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'शकादीनां०' (४।२३०) क्क० । 'लोकात्' (१।१।३) क्क० । 'मोऽनु०' (१।२३) अनुस्वारः **सक्कं** ।

**[ न मरं ]** नपूर्वं 'मृंत् प्राणत्यागे' (१३३३) मृ । वर्त्त० ए । 'ऋवर्ण०' (४।२३४) मृ० → मर० । अनेन ए० → मि० । बाहुलकात् मि-मध्याद् इलुक् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) मरम् । 'मोऽनु०' (१।२३) अनुस्वारः **न मरं** ॥१४१॥

## बहुष्वाद्यस्य न्ति-न्ते-इरे ॥ ८।३।१४२ ॥

त्यादीनां परस्मैपदानामात्मनेपदानां च प्रथमत्रयस्य बहुषु वर्तमानस्य वचनस्य स्थाने न्ति-न्ते-इरे इत्यादेशा भवन्ति ॥

हसन्ति । वेवन्ति । हसिज्जन्ति । रमिज्जन्ति ॥ गज्जन्ते खे मेहा ॥ बीहन्ते रक्खसाणं च ॥ उप्पज्जन्ते कइहिअय-सायरे कव्वरयणाइं ॥ दोण्णि वि न पहुप्पिरे बाहू । न प्रभवत इत्यर्थः ॥ विच्छुहिरे । विक्षुभ्यन्तीत्यर्थः ॥ क्वचिद् इरे एकत्वेऽपि- सूसइरे गाम-चिक्खल्लो । शुष्यतीत्यर्थः ॥

**[ बहुष्वाद्यस्य न्ति-न्ते-इरे ]** बहु सप्तमी सुप् । आद्य षष्ठी ङस् । न्ति-न्ते-इरे प्रथमा जस् ।

**[ हसन्ति ]** 'हसे हसने' (५४५) हस् । वर्त्त० अन्ति । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हस । अनेन अन्ति० → न्ति० **हसन्ति** ।

**[ वेवन्ति ]** 'टुवेपृङ् चलने' (७५४) वेप् । वर्त्त० अन्ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) वेप । 'पो वः' (१।२३१) प० → व० । अनेन अन्ते० → न्ति० **वेवन्ति** ।

**[ हसिज्जन्ति ]** हस् । वर्त्त० अन्ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'ईअ-इज्जौ क्यस्य' (३।१६०) यस्य इज्ज इति । 'लोकात्' (१।१।३) हसिज्ज । अनेन अन्ते० → न्ति० **हसिज्जन्ति** ।

**[ रमिज्जन्ति ]** 'रमिं क्रीडायाम्' (९८९) रम् । वर्त्त० अन्ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) यस्य इज्ज इति । 'लोकात्' (१।१।३) रमिज्ज । अनेन अन्ते० → न्ति० **रमिज्जन्ति** ।

[1]**[ गज्जन्ते खे मेहा, फुल्ला नीवा पणच्चिआ मोरा ।**
**नट्ठो चंदुज्जोओ, वासारत्तो हला ! पत्तो ॥१॥ ]**

अस्य व्याख्या - खे - आकाशे मेघा गर्जन्ति । नीपाः फुल्ला वर्त्तन्ते । मयूराः प्रनृत्यन्तो वर्त्तन्ते । चन्द्रोद्योतो नष्टः । हे सखि ! वर्षारात्रः प्राप्तः इत्यर्थः ॥

---

१. [शृ० प्र० - १०।२२६ । स० कं० - ३।१५३ । कं० द० - २।३६]
गर्जन्ते खे मेघाः फुल्ला नीवाः प्रर्णातिता मयूराः ।
नष्टश्चन्द्रोद्योतः वर्षारात्रः सखि ! प्राप्तः ॥

२. पाठां० - स० कं० - पणद्दिआ = प्रनर्तिता । ३. स० कं० - शृ० प्र० - वर्षर्तुः ॥

'गर्ज शब्दे' (१६३) गर्ज् । वर्त्त० अन्ति । अनेन अन्ति० → न्ते० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) गर्ज० । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'अनादौ०' (२।८९) जस्य द्वित्वं **गज्जन्ते** ।

[1]**[ बीहन्ते रक्खसाणं च ]** 'ञिभींक् भये' (११३२) भी । वर्त्त० अन्ति । 'भियो भा-बीहौ' (४।५३) भी० → बीह० इति । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) बीह० । अनेन अन्ति० → न्ते० **बीहन्ते** ।

राक्षस । पञ्चमी भ्यस् । 'क्वचिद् द्वितीयादेः' (३।१३४) भ्यस्स्थाने षष्ठी आम् । 'ह्रस्वः संयोगे' (१।८४) रा० → र० । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्षस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । 'जस्-शस्-ङसि०' (३।१२) दीर्घः । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'क्त्वा-स्यादेर्ण-स्वोर्वा' (१।२७) अनुस्वारः **रक्खसाणं च** ।

[2]**[ चिंतामंदरमंथाणमथिए वित्थयम्मि अत्थाहे ।**
**उप्पज्जन्ते कइहिअयसायरे कव्वरयणाइं ॥ ]**

अस्यार्थः - कविहृदयसागरे काव्यरत्नानि उत्पद्यन्ते । किंविशिष्टे कविहृदयसागरे ? चिन्तामेरुमन्थानमथिते । पुनः किंविशिष्टे ? विस्तृते । पुनः किंविशिष्टे ? अस्ताघे इत्यर्थः ।

उत्पूर्व० 'पदिंच् गतौ' (१२५९) पद् । वर्त्त० अन्ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) पद० । 'स्विदां ज्जः' (४।२२४) द० → ज्ज० । अनेन अन्ते० → न्ते० । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'अनादौ०' (२।८९) पस्य द्वित्वं **उप्पज्जन्ते** ।

कविहृदयसागर । सप्तमी ङि । 'क-ग-च-ज०' (१।१७७) व-द-गानां त्रयाणां लुक् । 'इत्कृपादौ' (१।१२८) हृ० → हि० । 'अवर्णो०' (१।१८०) अ० → य० । 'ङे-म्मि ङेः' (३।११) ङि० → ङे० → ए० । 'ङित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) रे० **कइहिअयसायरे** ।

काव्यरत्न । 'ह्रस्वः संयोगे' (१।८४) का० → क० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । 'क्ष्मा-श्लाघा-रत्नेऽन्त्यव्यञ्जनात्' (२।१०१) नात् पूर्वे अत् । 'लोकात्' (१।१।३) रतन० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'नो णः' (१।२२८) न० → ण० । प्रथमा जस् । 'जस्-शस इँ-इं-णयः०' (३।२६) जस्० → इं-पूर्वस्य च दीर्घः **कव्वरयणाइं** ।

**[ दोण्णि वि न पहुप्पिरे बाहू ]** द्वि । प्रथमा जस् । 'दुवे दोण्णि बेण्णि च जस्-शसा' (३।१२०) द्विस्थाने जसा सह **दोण्णि** ।

अपि । 'पदादपेर्वा' (१।४१) अलुक् । 'पो वः' (१।२३१) पि० → वि० **वि** ।

'भू सत्तायाम्' (१) भू, प्रपूर्व० । 'प्रभौ हुप्पो वा' (४।६३) भू० → हुप्प० आदेशः । 'सर्वत्र ल-व०' (२।७९) र्लुक् । वर्त्त० अन्ति । अनेन अन्ति० → इरे० । 'लुक्' (१।१०) अलोपः । 'लोकात्' (१।१।३) प्पिरे० **पहुप्पिरे** ।

बाहु । प्रथमा जस् । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः - हु० → हू० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **बाहू** ।

---

१. सुव्वंतबिभीसणमेघघोरसद्दाण विज्जुमालाण । पाउसदिणाण पहिया **बीहंते रक्खसाणं व** ॥ [गा० र० - ६४३]

२. [व० ल० - कव्ववज्जा - १ । गा० र० - २२]

चिन्तामन्दरमन्थानमथिते विस्तृतेऽस्ताघे । उत्पद्यन्ते कविहृदयसागरे काव्यरत्नानि ॥

**[ विच्छुहिरे ]** 'क्षुभच् सञ्चलने' (११९९) क्षुभ्, विपूर्व० । वर्त्त० अन्ति । अनेन अन्ति० → इरे० । 'क्षः खः क्वचित्तु०' (२।३) क्षु० → छु० । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः । 'लोकात्' (१।१।३) विच्छुह० **विच्छुहिरे** ।

**[ सूसइरे गामचिक्खल्लो ]** 'शुषंच् शोषणे' (१२०८) शुष् । वर्त्त० तिव् । अनेन तिव्० → इरे० । 'रुषादीनां दीर्घः' (४।२३६) शु० → शू० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) शूष० । 'श-षोः सः' (१।२६०) सूस० → **सूसइरे** ।

ग्रामचिक्खल्लो । 'सर्वत्र०' (२।७९) र्लुक् । चिक्खल्ल इति देश्यः कर्दमवाची ॥१४२॥

## मध्यमस्येत्था-हचौ ॥ ८।३।१४३ ॥

त्यादीनां परस्मैपदानामात्मनेपदानां च मध्यमत्रयस्य बहुषु वर्त्तमानस्य वचनस्य स्थाने इत्था-हच् इत्येतावादेशौ भवतः ॥

हसित्था । हसह ॥ वेवित्था । वेवह ॥ बाहुलकादित्थान्यत्रापि । यद्यत्ते रोचते । जं जं ते रोइत्था ॥ हच् इति चकारः 'इह-हचोर्हस्य' (४।२६८) इत्यत्र विशेषणार्थः ॥

**[ मध्यमस्येत्था-हचौ ]** मध्यम षष्ठी ङस् । इत्था-हच् प्रथमा औ ।

**[ हसित्था ]** 'हसे हसने' (५४५) हस् । वर्त्त० थ । अनेन थ० → इत्था० । 'लोकात्' (१।१।३) हसित्था ।

**[ हसह ]** हस् । वर्त्त० थ । अनेन थ० → ह० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) **हसह** ।

**[ वेवित्था ]** 'टुवेपृङ् चलने' (७४५) वेप् । वर्त्त० ध्वे । अनेन ध्वे० → इत्था० । 'लोकात्' (१।१।३) वेपित्था । 'पो वः' (१।२३१) पि० → वि० **वेवित्था** ।

**[ वेवह ]** वेप् । वर्त्त० ध्वे । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) वेपध्वे । 'पो वः' (१।२३१) प० → व० । अनेन ध्वे० → ह० **वेवह** ।

**[ जं जं ते रोइत्था ]** यद् (२) । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) द्लुक् । 'आदेर्यो जः' (१।२४५) य० → ज० । 'क्लीबे स्वरान्म् सेः' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जं जं** ।

युष्मद् । चतुर्थी ङे । 'चतुर्थ्याः षष्ठी' (३।१३१) ङे० → ङस्० । 'तइ-तु-ते०' (३।९९) ङसा सह युष्मद्स्थाने **ते** ।

'रुचि अभिप्रीत्यां च' (९३८) रुच् । वर्त्त० ते । 'युवर्णस्य गुणः' (४।२३७) रु० → रो० । अनेन ते० → इत्था० । 'लोकात्' (१।१।३) रोचित्था । 'क-ग-च-ज०' (१।१७७) च्लुक् **रोइत्था** ॥१४३॥

## तृतीयस्य मो-मु-माः ॥ ८।३।१४४ ॥

त्यादीनां परस्मैपदानामात्मनेपदानां च तृतीयस्य त्रयस्य सम्बन्धिनो बहुषु वर्तमानस्य वचनस्य स्थाने मो-मु-म इत्येते आदेशा भवन्ति ॥

हसामो । हसामु । हसाम ॥ तुवरामो । तुवरामु । तुवराम ॥

**[ तृतीयस्य मो-मु-माः ]** तृतीय षष्ठी ङस् । मो-मु-म प्रथमा जस् ।

**[ हसामो हसामु हसाम ]** 'हसे हसने' (५४५) हस् (३) । वर्त्त० मस् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हसमस् । अनेन मस्० → मो-मु-म आदेशाः । 'इच्च मो-मु-मे वा' (३।१५५) आ० **हसामो हसामु हसाम** ॥

**[ तुवरामो तुवरामु तुवराम ]** 'ञित्वरिष् सम्भ्रमे' (१०१०) त्वर् (३) । वर्त्त० महे । 'त्वरस्तुवर-जअडौ' (४।१७०) त्वर्० → तुवर आदेशः । अनेन महे० → मो-मु-म आदेशाः । 'इच्च मो-मु-मे वा' (३।१५५) आत्वम् **तुवरामो तुवरामु तुवराम** ॥१४४॥

## अत एवैच् से ॥ ८।३।१४५ ॥

त्यादेः स्थाने यौ एच्-से इत्येतावादेशावुक्तौ तावकारान्तादेव भवतो नान्यस्मात् ॥

हसए । हससे ॥ तुवरए । तुवरसे ॥ करए । करसे ॥ अत इति किम् ? ठाइ । ठासि । वसुआइ । वसुआसि । होइ । होसि ॥

एवकारोऽकारान्ताद् एच्-से एव भवत इति विपरीतावधारणनिषेधार्थः । तेनाकारान्ताद् इच्-सि इत्येतावपि सिद्धौ हसइ । हससि ॥ वेवइ । वेवसि ॥

**[ अत एवैच् से ]** अत् पञ्चमी ङसि । एव प्रथमा सि । एच् - से प्रथमा औ ।

**[ हसए ]** 'हसे हसने' (५४५) हस् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'त्यादीनामाद्यत्रय०' (३।१३९) तिव्० → ए० **हसए** ।

**[ हससे ]** हस् । वर्त्त० सिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'द्वितीयस्य सि-से' (३।१४०) सिव्० → से० **हससे** ।

**[ तुवरए ]** 'ञित्वरिष् सम्भ्रमे' (१०१०) त्वर् । वर्त्त० ते । 'त्वरस्तुवर-जअडौ' (४।१७०) त्वर्० → तुवर० आदेशः । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) तुवरते । 'त्यादीनामाद्य०' (३।१३९) ते० → ए० **तुवरए**।

**[ तुवरसे ]** त्वर् । वर्त्त० से । 'त्वरस्तुवर-जअडौ' (४।१७०) त्वर्० → तुवर० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) तुवरसे । 'द्वितीयस्य सि-से' (३।१४०) से० → से० **तुवरसे** ।

**[ करए ]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० तिव् । 'ऋवर्ण०' (४।२३४) कृ० → कर० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) करति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → ए० **करए** ।

**[ करसे ]** कृ । वर्त्त० सिव् । 'ऋवर्ण०' (४।२३४) कृ० → कर० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) करसि । 'द्वितीयस्य सि-से' (३।१४०) सिव्० → से० **करसे** ।

**[ ठाइ ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे०' (न्या० वक्ष० (१) - सूत्र २९) स्था । वर्त्त० तिव् । 'स्थष्ठा-थक्क-चिट्ठ-निरप्पाः' (४।१६) स्था० → ठा० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **ठाइ** ।

**[ ठासि ]** स्था । वर्त्त० सिव् । 'स्थष्ठा०' (४।१६) स्था० → ठा० । 'द्वितीयस्य सि-से' (३।१४०) सिव्० → सि० **ठासि** ।

**[ वसुआइ ]** 'वांक् गति-गन्धनयोः' (१०६३) वा, उत्पूर्व० । 'उद्वाकेरोरुम्मा-वसुआ' (४।११) उद्वा० → वसुआ इति । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **वसुआइ** ।

**[ वसुआसि ]** वा, उत्पूर्व० । 'उद्वाकेरोरुम्मा-वसुआ' (४।११) उद्वा० → वसुआ इति । वर्त्त० सिव् । 'द्वितीयस्य सि-से' (३।१४०) सिव्० → सि० **वसुआसि** ।

**[ होइ ]** 'भू सत्तायाम्' (१) भू । वर्त्त० तिव् । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **होइ** ।

**[ होसि ]** भू । वर्त्त० सिव् । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० । 'द्वितीयस्य सि-से' (३।१४०) सिव्० → सि० **होसि** ।

**[ हसइ ]** हस् । वर्त्त० तिव् । 'व्यञ्जनाद०' (४।२३९) अत् । 'लोकात्' (१।१।३) हसति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **हसइ** ।

**[ हससि ]** हस् । वर्त्त० सिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हससि । 'द्वितीयस्य सि-से' (३।१४०) सिव्० → सि० **हससि** ।

**[ वेवइ ]** वेप् । वर्त्त० तिव्(ते) । 'व्यञ्जनाद०' (४।२३९) अत् । 'लोकात्' (१।१।३) वेपति(ते) । 'पो वः' (१।२३१) प० → व० । 'त्यादीनामाद्य०' (३।१३९) ति०(ते०) → इ० **वेवइ** ।

**[ वेवसि ]** वेप् । वर्त्त० सिव्(से) । 'व्यञ्जनाद०' (४।२३९) अत् । 'लोकात्' (१।१।३) वेपसि(से) । 'पो वः' (१।२३१) प० → व० । 'द्वितीयस्य सि-से' (३।१४०) सिव्०(से०) → सि० **वेवसि** ॥१४५॥

### सिनास्तेः सिः ॥ ८।३।१४६ ॥

सिना द्वितीयत्रिकादेशेन सह अस्तेः सिरादेशो भवति ॥

निट्ठुरो जं सि ॥ सिनेति किम् ? से आदेशे सति अत्थि तुमं ॥

**[ सिनास्तेः सिः ]** सि तृतीया टा । अस्ति षष्ठी ङस् । सि प्रथमा सि ।

**[ निट्ठुरो जं सि ]** निष्ठुर । प्रथमा सि । 'ष्टस्याऽनु०' (२।३४) ष्ठस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निट्ठुरो** ।

यद् । प्रथमा सि । 'आदेर्यो जः' (१।२४५) य० → ज० । 'अन्त्यव्य०' (१।११) द्लुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **जं** ।

'असक् भुवि' (११०२) अस् । वर्त्त० सिव् । 'द्वितीयस्य सि-से' (३।१४०) सिव्० → सि० । अनेन सिना सह अस्स्थाने **सि** ।

**[ अत्थि तुमं ]** 'असक् भुवि' (११०२) अस् । वर्त्त० सिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) असिस । 'द्वितीयस्य सि-से' (३।१४०) सिव्स्थाने से । 'अत्थिस्त्यादिना' (३।१४८) सेसह अस्स्थाने **अत्थि** ।

युष्मद् । प्रथमा सि । 'युष्मदस्तं-तुं-तुवं-तुह-तुमं सिना' (३।९०) सिना सह युष्मत्स्थाने **तुमं** ॥१४६॥

### मि-मो-मैर्म्हि-म्हो-म्हा वा ॥ ८।३।१४७ ॥

अस्तेर्धातोः स्थाने मि-मो-म इत्यादेशैः सह यथासंख्यं म्हि-म्हो-म्ह इत्यादेशा वा भवन्ति ॥

एस म्हि । एषोऽस्मीत्यर्थः ॥ गय म्हो । गय म्ह ॥ मुकारस्याग्रहणादप्रयोग एव तस्येत्यवसीयते ॥ पक्षे-अत्थि अहं । अत्थि अम्हे । अत्थि अम्हो ॥

ननु च सिद्धावस्थायां 'पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः' (२।७४) इत्यनेन म्हादेशे म्हो इति सिध्यति । सत्यम्, किन्तु विभक्तिविधौ प्रायः साध्यमानावस्थाङ्गीक्रियते, अन्यथा वच्छेण । वच्छेसु । सव्वे । जे । ते । के इत्याद्यर्थं सूत्राण्यनारम्भणीयानि स्युः ॥

**[ मि-मो-मैर्म्हि-म्हो-म्हा वा ]** मि-मो-म तृतीया भिस् । म्हि-म्हो-म्ह प्रथमा जस् । वा प्रथमा सि ।

**[ एस म्हि ]** एतद् । प्रथमा सि । 'वैसेणमिणमो सिना' (३।८५) सिना सह एतद्स्थाने **एस** । 'असक् भुवि' (११०२) अस् । वर्त्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्स्थाने मि० । अनेन वा अस्स्थाने मिना सह **म्हि** ।

**[ गय म्हो गय म्ह ]** गत । प्रथमा जस् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः - त० → ता० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । अस् (२) । वर्त्त० मिव् । 'तृतीयस्य मो-मु-माः' (३।१४४) प्रथमे मिव्० → मो-द्वितीये मिव्० → म० । अनेन वा अस्स्थाने मो-माभ्यां सह म्हो-म्ह० । 'ह्रस्वः संयोगे' (१।८४) या० → य० । **गय म्हो** । **गय म्ह** ।

**[ अत्थि अहं ]** अस् । वर्त्त० मिव् । 'अत्थिस्त्यादिना' (३।१४८) मिवा सह अस्० → **अत्थि०** ।

अस्मद् । प्रथमा सि । 'अस्मदो म्मि-अम्मि-अम्हि-हं-अहं-अहयं सिना' (३।१०५) सिना सह अस्मद्० → **अहं०** ।

**[ अत्थि अम्हे अत्थि अम्हो ]** अस् (२) । वर्त्त० मस् । 'अत्थिस्त्यादिना' (३।१४८) मसा सह अस्० → **अत्थि०** ।

अस्मद् । प्रथमा जस् । 'अम्ह-अम्हे०' (३।१०६) अस्मदो जसा सह **अम्हे अम्हो** ।

अस्मद् । द्वितीया शस् । 'अम्हे-अम्हो०' (३।१०८) अस्मदः शसा सह **अम्हे-अम्हो** ॥१४७॥

## अत्थिस्त्यादिना ॥ ८।३।१४८ ॥

अस्तेः स्थाने त्यादिभिः सह अत्थि इत्यादेशो भवति ॥

अत्थि सो । अत्थि ते । अत्थि तुमं । अत्थि तुम्हे । अत्थि अहं । अत्थि अम्हे ॥

**[ अत्थिस्त्यादिना ]** अत्थि प्रथमा सि । त्यादि तृतीया टा ।

**[ अत्थि सो, अत्थि ते, अत्थि तुमं, अत्थि तुम्हे, अत्थि अहं, अत्थि अम्हे ]** 'असक् भुवि' (११०२) अस् (६) । वर्त्त० तिव्-अन्ति-सिव्-थ-मिव्-मस् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'बहुष्वाद्यस्य०' (३।१४२) अन्ति० → न्ति० । 'द्वितीयस्य सि-से' (३।१४०) सिव्० → सि० । 'मध्यमस्येत्था-हचौ' (३।१४३) थ० → इत्था० । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'तृतीयस्य मो-मु-माः' (३।१४४) मस्० → मो० । अनेन अस्स्थाने सर्वैरादेशैः सह अत्थि इत्यादेशः **अत्थि** ॥१४८॥

## णेरदेदावावे ॥ ८।३।१४९ ॥

णेः स्थाने अत्-एत्-आव-आवे [१]इति चत्वार आदेशा भवन्ति ॥

दरिसइ । कारेइ । करावइ । करावेइ ॥ हासेइ । हसावइ । हसावेइ ॥ उवसामेइ ॥ उवसमावइ । उवसमावेइ ॥ बहुलाधिकारात् क्वचिदेन्नास्ति-जाणावेइ ॥ क्वचिद् आवे नास्ति - पाएइ । भावेइ ॥

**[ णेरदेदावावे ]** णि षष्ठी ङस् । अत्-एत्-आव-आवे प्रथमा जस् ।

---

१. H. J. L. M. एते ।

**[ दरिसइ ]** 'दृशूं प्रेक्षणे' (४९५) दृश् । वर्त्त० तिव् । पश्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'वृषादीनामरि:' (४।२३५) दृ० → दरि० । अनेन णिग्० → अत्० । 'लोकात्' (१।१।३) दरिशइ । 'श-षोः सः' (१।२६०) शस्य सः **दरिसइ** ।

**[ कारेइ ]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० तिव् । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ऋवर्ण०' (४।२३४) करि० । अनेन णिग्स्थाने एत् । 'लोकात्' (१।१।३) करे० । 'अदेल्लुक्यादेरत आः' (३।१५३) क० → का० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **कारेइ** ।

**[ करावइ करावेइ ]** कृ (२) । वर्त्त० तिव् । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ऋवर्ण०' (४।२३४) कृ० → कर० । अनेन णिग्० → आव० - आवे० । 'लोकात्' (१।१।३) कराव० - करावे० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **करावइ करावेइ** ।

**[ हासेइ ]** 'हसे हसने' (५४५) हस् । वर्त्त० तिव् । हसन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे०' (३।४।२०) णिग्प्र० । अनेन णिग्० → एत्० । 'लोकात्' (१।१।३) हसेति । 'अदेल्लुक्यादेरत आः' (३।१५३) ह० → हा० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **हासेइ** ।

**[ हसावइ हसावेइ ]** हस् । वर्त्त० तिव् । हसन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । अनेन णिग्० → आव० - आवे० । 'लोकात्' (१।१।३) हसाव-हसावे । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **हसावइ हसावेइ** ।

**[ उवसामेइ ]** 'शमू उपशमे' (१२३०) शम्, उपपूर्व० । वर्त्त० तिव् । उपशाम्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे०' (३।४।२०) णिग्प्र० । अनेन णिग्० → एत्० । 'अदेल्लु०' (३।१५३) श० → शा० । 'लोकात्' (१।१।३) उपशामेति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'पो वः' (१।२३१) प० → व० । 'श-षोः सः' (१।२६०) शस्य सः **उवसामेइ** ।

[1]**[ उवदामेइ ]** शमू-'दमूच् उपशमे' (१२३१) दम्, उपपूर्व० । वर्त्त० तिव् । उपदाम्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । अनेन णिग्० → एत्० । 'अदेल्लु०' (३।१५३) द० → दा० । 'लोकात्' (१।१।३) उपदामेति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'पो वः' (१।२३१) प० → व० **उवदामेइ** ।

**[ उवसमावइ उवसमावेइ ]** 'शमू उपशमे' (१२३०) शम्, उपपूर्व० । वर्त्त० तिव् । उपशाम्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्या०' (३।४।२०) णिग्प्र० । अनेन णिग्० → आव०-आवे० । 'लोकात्' (१।१।३) उपशमावति-उपशमावेति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'पो वः' (१।२३१) प० → व० । 'श-षोः सः' (१।२६०) शस्य सः **उवसमावइ उवसमावेइ** ।

**[ जाणावेइ ]** 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । वर्त्त० तिव् । जानन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ज्ञो जाण-मुणौ' (४।७) ज्ञा० → जाण० इति । अनेन णिग्० → आवे० । 'लोकात्' (१।१।३) जाणावेति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **जाणावेइ** ।

**[ पाएइ ]** 'पां पाने' (२) पा । वर्त्त० तिव् । पिबन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । अनेन णिग्० → एत्० । 'लोकात्' (१।१।३) पाएति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पाएइ** ।

---

१. A. उवदामेइ उदाहरणम् ।

**[ भावेइ ]** 'भू सत्तायाम्' (१) भू । वर्त्त० तिव् । भवन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे०' (३।४।२०) णिग्प्र० । 'उवर्णस्यावः' (४।२३३) अव० । अनेन णिग्० → एत्० । 'अदेल्लु०' (३।१५३) भ० → भा० । 'लोकात्' (१।१।३) भावेति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **भावेइ** ॥१४९॥

## गुर्वादेरविर्वा ॥ ८।३।१५० ॥

गुर्वादेर्णेः स्थाने अवि इत्यादेशो वा भवति ॥

शोषितम् → सोसविअं सोसिअं । तोषितम् → तोसविअं तोसिअं ॥

**[ गुर्वादेरविर्वा ]** गुर्वादि षष्ठी ङस् । अवि प्रथमा सि । वा प्रथमा सि ।

**[ सोसविअं सोसिअं ]** 'शुषंच् शोषणे' (१२०८) शुष् । शुष्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'युवर्णस्य गुणः' (४।२३७) शु० → शो० । अनेन वा णिग्० → अवि० । 'लोकात्' (१।१।३) शोषवि-शोषि । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'श-षोः सः' (१।२६०) श-षयोः सः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सोसविअं** । पक्षे- शोषितम् । 'श-षोः सः' (१।२६०) श-षयोः सः । 'क-ग-च-ज०' (१।१७७) त्लुक् **सोसिअं** ।

**[ तोसविअं तोसिअं ]** 'तुषंच् तुष्टौ' (१२१३) तुष् । तुष्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'युवर्णस्य गुणः' (४।२३७) तु० → तो० । अनेन वा णिग्० → अवि० । 'लोकात्' (१।१।३) तोषवि - तोषि । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'श-षोः सः' (१।२६०) ष० → स० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तोसविअं** । पक्षे - तोषितम् । 'श-षोः सः' (१।२६०) षस्य सः । 'क-ग-च-ज०' (१।१७७) त्लुक् **तोसिअं** ॥१५०॥

## भ्रमेराडो वा ॥ ८।३।१५१ ॥

भ्रमेः परस्य णेराड आदेशो वा भवति ॥

भमाडइ । भमाडेइ । पक्षे - भामेइ । भमावइ । भमावेइ ॥

**[ भ्रमेराडो वा ]** भ्रमि षष्ठी ङस् । आड प्रथमा सि । वा प्रथमा सि ।

**[ भमाडइ ]** 'भ्रमू चलने' (९७०) भ्रम् । भ्रमन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन वा णिग्० → आड० इति । 'लोकात्' (१।१।३) भमाड । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **भमाडइ** ।

**[ भमाडेइ ]** भ्रम् । भ्रमन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'सर्वत्र०' (२।७९) र्लुक् । अनेन वा णिग्० → आड० इति । 'लोकात्' (१।१।३) भमाड । वर्त्त० तिव् । 'वर्त्तमाना-पञ्चमी-शतृषु वा' (३।१५८) ड० → डे० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **भमाडेइ** । पक्षे -

**[ भामेइ ]** भ्रम् । भ्रमन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'सर्वत्र०' (२।७९) र्लुक् । 'णेरदेदावावे' (३।१४९) णिग्स्थाने एत् । 'लोकात्' (१।१।३) भमे । 'अदेल्लुक्यादेरत आः' (३।१५३) भ० → भा० । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **भामेइ** ।

**[ भमावइ भमावेइ ]** भ्रम् (२) । वर्त्त० तिव् । भ्रमन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'णेरदेदावावे' (३।१४९) णिग्० → आव - आवे० । 'लोकात्' (१।१।३) भमावति भमावेति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **भमावइ भमावेइ** ॥१५१॥

## लुगावी क्त-भाव-कर्मसु ॥ ८।३।१५२ ॥

णेः स्थाने लुक्-आवि इत्यादेशौ भवतः, क्ते-भाव-कर्मविहिते च प्रत्यये परतः ॥

कारिअं । कराविअं । हासिअं । हसाविअं । खामिअं । खमाविअं ॥ भाव-कर्मणोः - कारीअइ । करावीअइ । कारिज्जइ । कराविज्जइ । हासीअइ । हसावीअइ । हासिज्जइ । हसाविज्जइ ॥

**[ लुगावी क्त-भाव-कर्मसु ]** लुग्-आवि प्रथमा औ । क्त-भाव-कर्मन् सप्तमी सुप् ।

**[ कारिअं ]** 'डुकृंग् करणे' (८८८) कृ । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ऋवर्ण०' (४।२३४) कृ० → कर० । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । अनेन णिग्स्थाने लुक् । 'अदेल्लुक्यादेरत आः' (३।१५३) क० → का० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) कारत । 'क्ते' (३।१५६) र० → रि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कारिअं** ।

**[ कराविअं ]** कृ । कर पूर्ववत् । अग्रे क्तप्र० । अनेन णिग्स्थाने आवि । 'लोकात्' (१।१।३) करावित । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कराविअं** ।

**[ हासिअं ]** 'हसे हसने' (५४५) हस् । हसन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । अनेन णिग्० → लुक्० । 'अदेल्लुक्यादेरत आः' (३।१५३) ह० → हा० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हासत । 'क्ते' (३।१५६) स० → सि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **हासिअं** ।

**[ हसाविअं ]** हस् । हसन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । अनेन णिग्० → आवि० । 'लोकात्' (१।१।३) हसावित । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **हसाविअं** ।

**[ खामिअं ]** 'क्षमौच् सहने' (१२३५) क्षम् । क्षाम्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्ष० → ख० । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । अनेन णिग्स्थाने लुक् । 'अदेल्लुक्यादेरत आः' (३।१५३) ख० → खा० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) खामत । 'क्ते' (३।१५६) म० → मि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **खामिअं** ।

**[ खमाविअं ]** क्षम् । क्षाम्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'क्षः खः क्वचित्तु०' (२।३) क्ष० → ख० । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । अनेन णिग्० → आवि० । 'लोकात्' (१।१।३) खमावित । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **खमाविअं** ।

**[ कारीअइ ]** 'डुकृंग् करणे' (८८८) कृ । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ऋवर्ण०' (४।२३४) कृ० → कर० । अनेन णिग्स्थाने लुक् । 'अदेल्लुक्या०' (३।१५३) क० → का० । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → ईअ० इति । 'लोकात्' (१।१।३) कारीअ । वर्त्त० तिव् । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) तिव्० → इ० **कारीअइ** ।

**[ करावीअइ ]** कृ । वर्त्त० तिव् । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ऋवर्ण०' (४।२३४) कृ० → कर० । अनेन णिग्स्थाने आवि । 'लोकात्' (१।१।३) करावििति । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → ईअ० इति । 'समानानां०' (१।२।१) दीर्घः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **करावीअइ** ।

**[ कारिज्जइ ]** कृ । वर्त्त० तिव् । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ऋवर्ण०' (४।२३४) कृ० → कर० । अनेन णिग्० → लुक्० । 'अदेल्लुक्यादे०' (३।१५३) क० → का० । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० इति । 'लोकात्' (१।१।३) कारिज्जति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **कारिज्जइ** ।

**[ कराविज्जइ ]** कृ । वर्त्त० तिव् । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ऋवर्ण०' (४।२३४) कृ० → कर० । अनेन णिग्० → आवि० । 'लोकात्' (१।१।३) करावित्ति । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० इति । 'लुक्' (१।१०) इलुक् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **कराविज्जइ** ।

**[ हासीअइ ]** 'हसे हसने' (५४५) हस् । वर्त्त० तिव् । हसन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । अनेन णिग्० → लुक्० । 'अदेल्लुक्यादे०' (३।१५३) ह० → हा० । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) यस्य ईअ । 'लोकात्' (१।१।३) हासीअति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **हासीअइ** ।

**[ हसावीअइ ]** हस् । वर्त्त० तिव् । हसन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । अनेन णिग्० → आवि० । 'क्यः शिति' (३।४।७०) क्यप्र० → य । ईअ-इज्जौ क्यस्य' (३।१६०) यस्य ईअ इति । 'समानानां०' (१।२।१) दीर्घः **हसावीअइ** ।

**[ हासिज्जइ ]** हस् । वर्त्त० तिव् । हसन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । अनेन णिग्० → लुक्० । 'अदेल्लुक्यादे०' (३।१५३) ह० → हा० । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) यस्य इज्ज इति । 'लोकात्' (१।१।३) हासिज्जति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **हासिज्जइ** ।

**[ हसाविज्जइ ]** हस् । वर्त्त० तिव् । हसन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । अनेन णिग्० → आवि० । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) यस्य इज्ज इति । 'लुक्' (१।१०) इलुक् । 'लोकात्' (१।१।३) हसाविज्जति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **हसाविज्जइ** ॥१५२॥

## अदेल्लुक्यादेरत आः ॥ ८।३।१५३ ॥

णेरदेल्लोपेषु कृतेषु आदेरकारस्य आ भवति ॥

अति-पाडइ । मारइ ॥ एति-कारेइ । खामेइ ॥ लुकि-कारिअं । खामिअं । कारीअइ । खामीअइ । कारिज्जइ । खामिज्जइ ॥

अदेल्लुकीति किम् ? कराविअं । करावीअइ । कराविज्जइ ॥

आदेरिति किम् ? संगामेइ ॥ इह व्यवहितस्य मा भूत्-कारिअं । इहान्त्यस्य मा भूत् ॥ अत इति किम् ? दूसेइ ॥ केचित्तु आवे-आव्यादेशयोरप्यादेरत आत्त्वमिच्छन्ति - कारावेइ । हासाविओ जणो सामलीए ॥

**[ अदेल्लुक्यादेरत आः ]** अत्-एत्-लुक् सप्तमी ङि । आदि षष्ठी ङस् । अत् षष्ठी ङस् । आ प्रथमा सि ।

**[ पाडइ ]** 'पत्लृ पतने' (९६२) पत् । वर्त्त० तिव् । पतन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे०' (३।४।२०) णिग्प्र० । 'णेरदेदावावे' (३।१४९) णिग्स्थाने अत् । 'सद-पतोर्डः' (४।२१९) त० → ड० । 'लोकात्' (१।१।३) पडति । अनेन प० → पा० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पाडइ** ।

**[ मारइ ]** 'मृंत् प्राणत्यागे' (१३३३) मृ । वर्त्त० तिव्(ते) । म्रियन्तं(माणं) प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ऋवर्ण०' (४।२३४) मृ० → मर० । अनेन म० → मा० । 'णेरदेदावावे' (३।१४९) णिग्० → अत्० । 'लोकात्' (१।१।३) मारति(ते) । 'त्यादीनामाद्य०' (३।१३९) तिव्०(ते) → इ० **मारइ** ।

**[ कारेइ ]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० तिव् । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ऋवर्ण०' (४।२३४) कृ० → कर० । अनेन क० → का० । 'णेरदेदावावे' (३।१४९) णिग्० → एत्० । 'लोकात्' (१।१।३) कारेति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **कारेइ** ।

**[ खामेइ ]** 'क्षमौच् सहने' (१२३५) क्षम् । वर्त्त० तिव् । क्षाम्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'णेरदेदावावे' (३।१४९) णिग्० → एत्० । अनेन क्ष० → क्षा० । 'क्षः खः क्वचि०' (२।३) क्षा० → खा० 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **खामेइ** ।

**[ कारिअं ]** कृ । वर्त्त० तिव् । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ऋवर्ण०' (४।२३४) कृ० → कर० । 'क्त-क्तवतू०' (५।१।१७४) क्तप्र० → त० । 'लुगावी क्त०' (३।१५२) णिग्० → लुक्० । अनेन क० → का० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) कारत । 'क्ते' (३।१५६) र० → रि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कारिअं** ।

**[ खामिअं ]** क्षम् । क्षाम्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'क्षः खः क्वचित्तु०' (२।३) क्ष० → ख० । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'लुगावी क्त०' (३।१५२) णिग्० → लुक्० । अनेन ख० → खा० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) खामत । 'क्ते' (३।१५६) म० → मि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **खामिअं** ।

**[ कारीअइ ]** कृ । वर्त्त० तिव् । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ऋवर्ण०' (४।२३४) कृ० → कर० । 'लुगावी क्त०' (३।१५२) णिग्० → लुक्० । अनेन क० → का० । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → ईअ इति । 'लोकात्' (१।१।३) कारीअति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **कारीअइ** ।

**[ खामीअइ ]** क्षम् । वर्त्त० तिव् । क्षाम्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'क्षः खः क्वचित्तु०' (२।३) क्ष० → ख० । 'लुगावी क्त०' (३।१५२) णिग्० → लुक्० । अनेन ख० → खा० । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → ईअ इति । 'लोकात्' (१।१।३) खामीअति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **खामीअइ** ।

**[ कारिज्जइ ]** कृ । वर्त्त० तिव् । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ऋवर्णस्या०' (४।२३४) कृ० → कर० । 'लुगावी क्त०' (३।१५२) णिग्० → लुक्० । अनेन क० → का० । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'लोकात्' (१।१।३) कारिज्जति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **कारिज्जइ** ।

**[ खामिज्जइ ]** क्षम् । वर्त्त० तिव् । क्षाम्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'क्षः खः क्वचित्तु०' (२।३) क्ष० → ख० । 'लुगावी क्त०' (३।१५२) णिग्० → लुक्० । अनेन ख० → खा० । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'लोकात्' (१।१।३) खामिज्जति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **खामिज्जइ** ।

**[ कराविअं ]** कृ । वर्त्त० तिव् । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ऋवर्णस्या०' (४।२३४) कृ० → कर० । 'क्त-क्तवतू०' (५।१।१७४) क्तप्र० → त० । 'लुगावी क्त०' (३।१५२) णिग्० → आवि० । 'लोकात्' (१।१।३) करावित । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कराविअं** ।

**[ करावीअइ ]** कृ । वर्त्त० तिव् । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ऋवर्णस्या०' (४।२३४) कृ० → कर० । 'लुगावी क्त०' (३।१५२) णिग्० → आवि० । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → ईअ० । 'लोकात्' (१।१।३) करावीअति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **करावीअइ** ।

**[ कराविज्जइ ]** कृ । वर्त्त० तिव् । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ऋवर्णस्या०' (४।२३४) कृ० → कर० । 'लुगावी क्त०' (३।१५२) णिग्० → आवि० । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'लुक्' (१।१०) इलुक् । 'लोकात्' (१।१।३) कराविज्जति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **कराविज्जइ** ।

**[ संगामेइ ]** 'संग्रामणि युद्धे' (१९३४) संग्राम् । वर्त्त० ते । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'णेरदेदावावे' (३।१४९) णिच्० → एत्० । 'लोकात्' (१।१।३) संग्रामेते । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **संगामेइ** ।

**[ कारिअं ]** कृ । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ऋवर्णस्या०' (४।२३४) कृ० → कर० । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'लुगावी क्त०' (३।१५२) णिग्० → लुक्० । 'अदेल्लुक्यादे०' (३।१५३) क० → का० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) कारत । 'क्ते' (३।१५६) र० → रि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कारिअं** ।

**[ दूसेइ ]** 'दुषंच् वैकृत्ये' (१२०९) दुष् । वर्त्त० तिव् । दुष्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'रुषादीनां दीर्घः' (४।२३६) दु० → दू० । 'णेरदेदावावे' (३।१४९) णिग्० → एत्० । 'लोकात्' (१।१।३) दूषेति । 'श-षोः सः' (१।२६०) षस्य सः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **दूसेइ** ।

**[ कारावेइ ]** कृ । वर्त्त० तिव् । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ऋवर्ण०' (४।२३४) कृ० → कर० । 'णेरदेदावावे' (३।१४९) आवे । 'लोकात्' (१।१।३) करावेति । केचित्तु 'अदेल्लुक्यादे०' (३।१५३) इत्यनेन आत्वमिच्छन्त्यावेप्यादेशे सति क० → का० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **कारावेइ** ।

[१]**[ हासाविओ जणो सामलीए ]** 'हसे हसने' (५४५) हस् । वर्त्त० तिव् । हसन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'लुगावी क्त-भाव-कर्मसु' (३।१५२) णिग्० → आवि० । 'लोकात्' (१।१।३) हसावित । केषाञ्चिन्मते 'अदेल्लुक्यादेरत आः' (३।१५३) ह० → हा० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः । अथवा 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **हासाविओ** ।

---

१. **हासाविओ जणो सामलीए** पढमं पसूअमाणा(णी)ए ।
वल्लहवाएण अलं मम त्ति बहुसो भणंतीए ॥ [गा० स० - २।२३ । गा० को० - २।३३]
हासितो जनः श्यामया(मलया-मल्या) प्रथमं प्रसूयमानया । वल्लभवादेन अलं ममेति बहुशो भणन्त्या ॥

जन । प्रथमा सि । 'नो णः' (१।२२८) न० → ण० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **जणो** ।

श्यामली । तृतीया टा । 'अधो म-न-याम्' (२।७८) यलुक् । 'श-षोः सः' (१।२६०) शस्य सः । 'टा-ङस्-ङेरदादि०' (३।२९) टा० → ए० **सामलीए** । श्यामल्या स्त्रिया जनो हासापित इत्यर्थः ॥१५३॥

## मौ वा ॥ ८।३।१५४ ॥

अत आ इति वर्त्तते । अदन्ताद्धातोर्मौ परे अत आत्वं वा भवति ॥

हसामि हसमि । जाणामि जाणमि । लिहामि लिहमि ॥ अत इत्येव-होमि ॥

**[ मौ वा ]** मि सप्तमी ङि । वा प्रथमा सि ।

**[ हसामि हसमि ]** 'हसे हसने' (५४५) हस् (२) । वर्त्त० मिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हसमि । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । अनेन वा आत्त्वम् **हसामि हसमि** ॥

**[ जाणामि जाणमि ]** 'ज्ञांश् अवबोधने' (१५४०) ज्ञा (२) । वर्त्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'ज्ञो जाण-मुणौ' (४।७) ज्ञा० → जाण० । अनेन वा आत्त्वम् **जाणामि जाणमि** ।

**[ लिहामि लिहमि ]** 'लिहींक् आस्वादने' (११२९) लिह् (२) । वर्त्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) लिहमि । अनेन वा आत्त्वम् **लिहामि लिहमि** ।

**[ होमि ]** 'भू सत्तायाम्' (१) भू । वर्त्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० **होमि** ॥१५४॥

## इच्च मो-मु-मे वा ॥ ८।३।१५५ ॥

अकारान्ताद्धातोः परेषु मो-मु-मेषु अत इत्त्वं चकाराद् आत्त्वं च वा भवतः ॥

भणिमो भणामो । भणिमु भणामु । भणिम भणाम । पक्षे-भणमो । भणमु । भणम ॥ 'वर्तमाना-पञ्चमी-शतृषु वा' (३।१५८) इत्येत्त्वे तु भणेमो । भणेमु । भणेम ॥ अत इत्येव - ठामो । होमो ॥

**[ इच्च मो-मु-मे वा ]** इत् प्रथमा सि । च प्रथमा सि । मो-मु-म सप्तमी ङि । वा प्रथमा सि ।

**[ भणिमो भणामो, भणिमु भणामु, भणिम भणाम ]** 'भण शब्दे' (२६४) भण् । वर्त्त० मिव् । 'तृतीयस्य मो-मु-माः' (३।१४४) मिव्० → मो-मु-म आदेशाः । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) भणमो-मु-म । अनेन वा इत्त्वं-आत्त्वं च । **भणिमो भणामो** । **भणिमु भणामु** । **भणिम भणाम** । पक्षे -

**[ भणमो भणमु भणम ]** भण् । वर्त्त० मस् । 'तृतीयस्य मो-मु-माः' (३।१४४) मस्० → मो-मु-म आदेशाः । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) **भणमो भणमु भणम** ।

**[ भणेमो भणेमु भणेम ]** भण् । वर्त्त० मस् । 'तृतीयस्य मो-मु-माः' (३।१४४) मस्० → मो-मु-म आदेशाः । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'वर्तमाना-पञ्चमी०' (३।१५८) एत्त्वम् **भणेमो भणेमु भणेम** ।

**[ ठामो ]** स्था । वर्त्त० मस् । 'स्थष्ठा०' (४।१६) स्था० → ठा० । 'तृतीयस्य मो-मु-माः' (३।१४४) मस्० → मो० **ठामो** ।

**[ होमो ]** 'भू सत्तायाम्' (१) भू । वर्त्त० मस् । 'तृतीयस्य मो-मु-माः' (३।१४४) मस्० → मो० । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० **होमो** ॥१५५॥

## क्ते ॥ ८।३।१५६ ॥

क्ते परतोऽत इत्त्वं भवति ॥

हसिअं । पढिअं । नविअं । हासिअं । पाढिअं ॥ गयं । नयमित्यादि तु सिद्धावस्थापेक्षणात् । अत इत्येव-झायं । लुअं। हूअं ॥

**[ क्ते ]** क्त सप्तमी ङि ।

**[ हसिअं ]** 'हसे हसने' (५४५) हस् । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हसत । अनेन इत्त्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **हसिअं** ।

**[ पढिअं ]** 'पठ व्यक्तायां वाचि' (२१३) पठ् । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'ठो ढः' (१।१९९) ठ० → ढ० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) पढत । अनेन इत्त्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक्। प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पढिअं** ।

**[ नविअं ]** 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम् । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) नमत । अनेन इत्त्वम् । 'रुद-नमोर्वः' (४।२२६) मस्य व० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **नविअं** ।

**[ हासिअं ]** हस् । हसन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'लुगावी क्त०' (३।१५२) णिग्लुक् । 'अदेल्लुक्यादे०' (३।१५३) ह० → हा० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हास । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । अनेन इत्त्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **हासिअं** ।

**[ पाढिअं ]** पठ् । पठन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'लुगावी क्त०' (३।१५२) णिग्लुक् । 'अदेल्लुक्यादे०' (३।१५३) प० → पा० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) पाठत । अनेन इत्त्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'ठो ढः' (१।१९९) ठि० → ढि० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पाढिअं** ।

**[ गयं ]** गतम् । अत्र सिद्धावस्थापेक्षणान्न इत्त्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० **गयं** ।

**[ नयं ]** नतम् । अत्र सिद्धावस्थापेक्षणान्न इत्त्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० **नयं** ।

**[ झायं ]** ध्यातम् । 'ध्या-गोर्झा-गौ' (४।६) ध्या० → झा० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० **झायं** ।

**[ लुअं ]** लूनम् । 'क्तेनाऽप्फुण्णादयः' (४।२५८) लुअं इति निपातः **लुअं** ।

**[ हूअं ]** भू । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । 'क्ते हूः' (४।६४) भू० → हू० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **हूअं** ॥१५६॥

## एच्च क्त्वा-तुम्-तव्य-भविष्यत्सु ॥ ८।३।१५७ ॥

क्त्वा-तुम्-तव्येषु भविष्यत्कालविहिते च प्रत्यये परतोऽत एकारश्चकारादिकारश्च भवति ॥

क्त्वा-हसेऊण हसिऊण ॥ तुम्-हसेउं हसिउं ॥ तव्य-हसेअव्वं हसिअव्वं ॥ भविष्यत्-हसेहिइ हसिहिइ ॥ अत इत्येव-काऊण ॥

**[ एच्च क्त्वा-तुम्-तव्य-भविष्यत्सु ]** एत् प्रथमा सि । च प्रथमा सि । क्त्वा-तुम्-तव्य-भविष्यत् सप्तमी सुप् ।

**[ हसेऊण हसिऊण ]** 'हसे हसने' (५४५) हस् (२) । हसनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'क्त्वस्तुमत्तूण-तुआणाः' (२।१४६) क्त्वा० → तूण० इति । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हसतूण। अनेन एत्त्वं-इत्त्वं च । 'क-ग-च-ज०' (१।१७७) त्लुक् **हसेऊण हसिऊण** ।

**[ हसेउं हसिउं ]** हस् (२) । हसनाय इति हसितुम् । 'क्रियायां क्रियार्थायां तुम्०' (५।३।१३) तुम्प्र० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हसतुम् । अनेन एत्त्वं-इत्त्वं च । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'मोऽनु०' (१।२३) अनुस्वारः **हसेउं हसिउं** ।

**[ हसेअव्वं हसिअव्वं ]** हस् (२) । हस्यते इति हसितव्यम् । 'तव्या-ऽनीयौ' (५।१।२७) तव्यप्र० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) हसतव्यम् । अनेन एत्त्वं-इत्त्वं च । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **हसेअव्वं हसिअव्वं** ।

**[ हसेहिइ हसिहिइ ]** हस् (२) । भविष्यन्ती स्यति । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हसस्यति। अनेन एत्त्वं-इत्त्वं च । 'त्यादीनामाद्य०' (३।१३९) स्यति० → इ० । 'भविष्यति हिरादिः' (३।१६६) "हि" आगमः **हसेहिइ हसिहिइ** ।

**[ काऊण ]** कृ । करणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'क्त्वस्तुमत्तूण-तुआणाः' (२।१४६) क्त्वा० → तूण० । 'आः कृगो भूत-भविष्यतोश्च' (४।२१४) कृ० → का० । 'क-ग-च-ज०' (१।१७७) त्लुक् **काऊण** ॥१५७॥

## वर्त्तमाना-पञ्चमी-शतृषु वा ॥ ८।३।१५८ ॥

वर्तमाना-पञ्चमी-शतृषु परतोऽकारस्य स्थाने एकारो वा भवति ॥

वर्त्तमाना-हसेइ हसइ । हसेम हसिम । हसेमु हसिमु ॥ पञ्चमी - हसेउ हसउ । सुणेउ सुणउ ॥ शतृ - हसेन्तो हसन्तो ॥ क्वचिन्न भवति - जयइ ॥ क्वचिदात्त्वमपि - सुणाउ ॥

**[ वर्त्तमाना-पञ्चमी-शतृषु वा ]** वर्त्तमाना-पञ्चमी-शतृ सप्तमी सुप् । वा प्रथमा सि ।

**[ हसेइ हसइ ]** 'हसे हसने' (५४५) हस् (२) । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) हसति । अनेन वा एकारः । 'त्यादीनामा०' (३।१३९) तिव्० → इ० **हसेइ हसइ** ।

**[ हसेम हसिम ]** हस् (२) । वर्त्त० मस् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हसमस् । अनेन वा एकारः । 'तृतीयस्य मो-मु-माः' (३।१४४) मस्० → म० **हसेम** । 'इच्च मो-मु-मे वा' (३।१५५) इत्त्वे **हसिम** ।

**[ हसेमु हसिमु ]** हस् (२) । वर्त्त० मस् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हसमस् । अनेन वा एकारः । 'तृतीयस्य मो-मु-माः' (३।१४४) मस्० → मु० **हसेमु** । 'इच्च मो-मु-मे वा' (३।१५५) इत्त्वे **हसिमु** ।

*[ हसेउ हसउ ] हस् (२) । पञ्चमी तुव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३)* हसतु । अनेन वा एत्त्वम् । 'दु-सु-मु विध्यादिष्वेकस्मिंस्त्रयाणाम्' (३।१७३) तुव्० → दु० । 'क-ग-च-ज०' (१।१७७) द्लुक् **हसेउ हसउ**।

**[ सुणेउ सुणउ ]** 'श्रुंट् श्रवणे' (१२९६) श्रु (२) । पञ्चमी तुव् । 'दु-सु-मु विध्यादि०' (३।१७३) तुव्० → दु० । 'चि-जि-श्रु-हु-स्तु-लू-पू-धूगां णो ह्रस्वश्च' (४।२४१) ण आगमः । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शु० → सु० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) सुणतु । अनेन वा एत्त्वम् । 'क-ग-च-ज०' (१।१७७) द्लुक् **सुणेउ सुणउ** ।

**[ हसेन्तो हसन्तो ]** हस् (२) । हसतीति हसन् । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत् । 'शत्रानाशः' (३।१८१) न्त० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) हसन्त । अनेन वा एत्त्वम् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **हसेन्तो हसन्तो** ।

**[ जयइ ]** [१]'जिं जये' (८) जि । वर्त्त० तिव् । 'युवर्णस्य गुणः' (४।२३७) जि० → जे० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) जेअति । 'शेषं संस्कृतवत्०' (४।४४८) इति कथनात् 'एदैतोऽयाय्' (१।२।२३) एकारस्य अय् । 'लोकात्' (१।१।३) जयति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **जयइ** ।

**[ सुणाउ ] 'श्रुंट् श्रवणे'** (१२९६) श्रु । पञ्चमी तुव् । 'दु-सु-मु विध्यादि०' (३।१७३) तुव्० → दु० । 'चि-जि-श्रु०' (४।२४१) ण आगमः । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शु० → सु० । क्वचिदात्वमपि। 'क-ग-च-ज०' (१।१७७) द्लुक् **सुणाउ** ॥१५८॥

## ज्जा-ज्जे ॥ ८।३।१५९ ॥

ज्जा-ज्ज इत्यादेशयोः परयोरकारस्य एकारो भवति ॥

हसेज्जा हसेज्ज ॥ अत इत्येव - होज्जा होज्ज ॥

**[ ज्जा-ज्जे ]** ज्जा-ज्ज सप्तमी ङि ।

**[ हसेज्जा हसेज्ज ]** हस् (२) । वर्त्त० तिव् । 'वर्तमाना-भविष्यन्त्योश्च ज्ज-ज्जा वा' (३।१७७) तिव्स्थाने ज्जा-ज्ज० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हसज्जा हसज्ज । अनेन उभयत्र एकारः **हसेज्जा हसेज्ज** ।

**[ होज्जा होज्ज ]** 'भू सत्तायाम्' (१) भू । भविष्यन्ती स्यति । 'मध्ये च स्वरान्ताद्वा' (३।१७८) स्यतिस्थाने ज्जा-ज्ज आदेशौ । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० **होज्जा-होज्ज** ॥१५९॥

## ईअ-इज्जौ क्यस्य ॥ ८।३।१६० ॥

चि-जिप्रभृतीनां भाव-कर्मविधिं वक्ष्यामः । येषां तु न वक्ष्यते तेषां संस्कृतातिदेशात् प्राप्तस्य क्यस्य स्थाने ईअ-इज्ज इत्येतावादेशौ भवतः ॥

हसीअइ हसिज्जइ । हसीअन्तो हसिज्जन्तो । हसीअमाणो हसिज्जमाणो । पढीअइ पढिज्जइ । होईअइ होइज्जइ ॥

---

१. धा० पा० - केचित्तु "जिं जये" इत्यकर्मकत्वार्थं पृथक् पठन्ति, जयः सर्वोत्कर्षे इति च व्याचक्षते, उत्कर्षस्याभिभवविशेषात् सकर्मकत्वाऽकर्मकत्वयोश्च विवक्षानिबन्धनत्वात्, तथा च जयति जिनः इत्यकर्मकः, जयति शत्रूनिति सकर्मकः । अत एव कौशिकोऽपि नामुमध्यैष्ट ।

बहुलाधिकारात् क्वचित् क्योऽपि विकल्पेन भवति । मए नवेज्ज । मए नविज्जेज्ज । तेण लहेज्ज । तेण लहिज्जेज्ज। तेण अच्छेज्ज । तेण अच्छिज्जेज्ज । तेण अच्छीअइ ॥

**[ ईअ-इज्जौ क्यस्य ]** ईअ-इज्ज प्रथमा औ । क्य षष्ठी ङस् ।

**[ हसीअइ हसिज्जइ ]** 'हसे हसने' (५४५) हस् (२) । वर्त्त० तिव्(ते) । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन यस्य ईअ-इज्ज । 'लोकात्' (१।१।३) हसीअते-हसिज्जते । 'त्यादीनामाद्य०' (३।१३९) तिव्०(ते) → इ० **हसीअइ हसिज्जइ** ।

**[ हसीअन्तो हसिज्जन्तो ]** हस् (२) । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन यस्य ईअ - इज्ज । 'लोकात्' (१।१।३) हसीअ-हसिज्ज । 'शत्रानशा०' (५।२।२०) शतृप्र० → अत् । 'शत्रानशः' (३।१८१) अत्० → न्त० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **हसीअन्तो हसिज्जन्तो** ।

**[ हसीअमाणो हसिज्जमाणो ]** हस् (२) । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन यस्य ईअ-इज्ज । 'लोकात्' (१।१।३) हसीअ-हसिज्ज । 'शत्रानशा०' (५।२।२०) शतृप्र० → अत्० । 'शत्रानशः' (३।१८१) अत्० → माण० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **हसीअमाणो हसिज्जमाणो** ।

**[ पढीअइ पढिज्जइ ]** 'पठ व्यक्तायां वाचि' (२१३) पठ् (२) । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन यस्य ईअ-इज्ज । 'लोकात्' (१।१।३) पठीअ-पठिज्ज । 'ठो ढः' (१।१९९) ठ० → ढ० । 'त्यादीनामा०' (३।१३९) तिव्०(ते) → इ० **पढीअइ पढिज्जइ** ।

**[ होईअइ होइज्जइ ]** 'भू सत्तायाम्' (१) भू (२) । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन यस्य ईअ-इज्ज । वर्त्त० तिव्०(ते) । 'त्यादीनामाद्य०' (३।१३९) तिव्०(ते) → इ० । 'अविति हुः' (४।६१) भू० → हु० । 'स्वराणां स्वराः' (४।२३८) हु० → हो० **होईअइ होइज्जइ** ।

**[ मए नवेज्ज ]** अस्मद् । तृतीया टा । 'मि-मे-ममं-ममए-ममाइ-मइ-मए-मयाइ-णे टा' (३।१०९) टेन सह अस्मद्स्थाने **मए** ।

'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादे०' (२।३।९७) नम् । वर्त्त० तिव् । 'रुद-नमोर्वः' (४।२२६) म० → व० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) नवति । 'वर्तमाना-भविष्यन्त्योश्च ज्ज-ज्जा वा' (३।१७७) तिव् → ज्ज० । 'ज्जा-ज्जे' (३।१५९) एत्त्वम् **नवेज्ज** ।

**[ मए नविज्जेज्ज ]** नम् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन यस्य **इज्ज०** । 'लोकात्' (१।१।३) नमिज्जते । 'रुद-नमोर्वः' (४।२२६) म० → व० । 'वर्तमाना-भविष्यन्त्योश्च०' (३।१७७) ते० → ज्ज० । 'ज्जा-ज्जे' (३।१५९) ए० **नविज्जेज्ज** ।

**[ तेण लहेज्ज तेण लहिज्जेज्ज ]** तद् । तृतीया टा । 'अन्त्यव्य०' (१।११) द्लुक् । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्त्वम् **तेण** ।

'डुलभिंष् प्राप्तौ' (७८६) लभ् । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) लभते । 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः । 'वर्त्तमाना भवि०' (३।१७७) ते० → ज्ज० । 'ज्जा-ज्जे' (३।१५९) एत्त्वम् **लहेज्ज** । यत्र क्यस्तत्र **लहिज्जेज्ज** पूर्ववत् ।

**[ तेण अच्छेज्ज तेण अच्छिज्जेज्ज ] तेण** पूर्ववत् । 'आसिक् उपवेशने' (१११९) आस् । वर्त्त० ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'गमिष्यमासां छः' (४।२१५) स० → छ० । 'तैलादौ' (२।९८) छस्य द्वित्वम् । 'द्वितीय-

तुर्ययो०' (२।९०) पूर्वछस्य चः । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'वर्त्तमाना-भवि०' (३।१७७) ते० → ज्ज० । 'ज्जा-ज्जे' (३।१५९) एत्त्वम् **अच्छेज्ज** । यत्र क्यस्तत्र **अच्छिज्जेज्ज** पूर्ववत् ।

**[ तेण अच्छीअइ ] तेण** पूर्ववत् । 'आसिक् उपवेशने' (१११९) आस् । वर्त० ते । 'गमिष्यमासां छः' (४।२१५) स० → छ० । 'तैलादौ' (२।९८) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) यस्य ईअ० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **अच्छीअइ** ॥१६०॥

## दृशि-वचेर्डीस-डुच्चं ॥ ८।३।१६१ ॥

दृशेर्वचेश्च परस्य क्यस्य स्थाने यथासंख्यं डीस-डुच्च इत्यादेशौ भवतः ॥ ईअ-इज्जापवादः ॥ दीसइ । वुच्चइ ॥

**[ दृशि-वचेर्डीस-डुच्चं ]** दृशि-वचि षष्ठी ङस् । डीस-डुच्च प्रथमा सि ।

**[ दीसइ ]** 'दृशृं प्रेक्षणे' (४९५) दृश् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन यस्य डीस० → ईस० इति । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । 'लोकात्' (१।१।३) दीसते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **दीसइ** ।

**[ वुच्चइ ]** 'वचंक् भाषणे' (१०९६) वच् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन यस्य डुच्च० → उच्च० इति । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । 'लोकात्' (१।१।३) वुच्चते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **वुच्चइ** ॥१६१॥

## सी-ही-हीअ भूतार्थस्य ॥ ८।३।१६२ ॥

भूतेऽर्थे विहितोऽद्यतन्यादिः प्रत्ययो भूतार्थस्तस्य स्थाने सी-ही-हीअ इत्यादेशा भवन्ति ॥

उत्तरत्र व्यञ्जनादीअविधानात् स्वरान्तादेवायं विधिः ॥

कासी काही काहीअ । अकार्षीत् अकरोत् चकार वेत्यर्थः ॥ एवं-ठासी ठाही ठाहीअ ॥ आर्षे "देविन्दो इणमब्बवी" इत्यादौ सिद्धावस्थाश्रयणात् ह्यस्तन्याः प्रयोगः ॥

**[ सी-ही-हीअ भूतार्थस्य ]** सी-ही-हीअ प्रथमा जस् । भूतार्थ षष्ठी ङस् ।

**[ कासी काही काहीअ ]** 'डुकृंग् करणे' (८८८) कृ (३) । अनेन अद्यतनी दि-ह्यस्तनी दिव्-परोक्षा णव् । 'आः कृगो भूत-भविष्यतोश्च' (४।२१४) कृ० → का० । अनेन दि-दिव्-णव्स्थाने सी-ही-हीअ आदेशाः **कासी काही काहीअ** ।

**[ ठासी ठाही ठाहीअ ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै०' (२।३।९८) स्था । 'निमित्ताभावे०' (न्या० वक्ष० (१) - सूत्र (२९) स्था । अद्यतनी दि-ह्यस्तनी दिव्-परोक्षा णव् । 'स्थष्ठा-थक्क-चिट्ठ-निरप्पाः' (४।१६) स्था० → ठा० । अनेन दि-दिव्-णव्स्थाने सी-ही-हीअ आदेशाः **ठासी ठाही ठाहीअ** ।

**[ देविन्दो इणमब्बवी ]** देवेन्द्र । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) वे० → वि० । 'द्रे रो नवा' (२।८०) र्लुक् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **देविन्दो** ।

इदम् । द्वितीया अम् । 'क्लीबे स्यमेदमिणमो च' (३।७९) अम्सहितस्य इदमः इणमादेशः । 'मोऽनु०' (१।२३) अनुस्वारः **इणं** ।

अब्रवीत् । 'अन्त्यव्य०' (१।११) त्लुक् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) बस्य द्वित्वम् **अब्बवी** ॥१६२॥

## व्यञ्जनादीअः ॥ ८।३।१६३ ॥

व्यञ्जनान्ताद्धातोः परस्य भूतार्थस्याऽद्यतन्यादिप्रत्ययस्य ईअ आदेशो भवति ॥

हुवीअ । अभूत् अभवत् बभूवेत्यर्थः ॥ एवम्-अच्छीअ । आसिष्ट आस्त आसांचक्रे वा । गेण्हीअ । अग्रहीत् अगृह्णात् जग्राह वा ॥

**[ व्यञ्जनादीअः ]** व्यञ्जन पञ्चमी ङसि । ईअ प्रथमा सि ।

**[ हुवीअ ]** 'भू सत्तायाम्' (१) भू । अद्यतनी दि - ह्यस्तनी दिव्-परोक्षा णव् । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हुव० आदेशः । अनेन अद्यतन्यादिप्रत्ययस्थाने ईअ आदेशः । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) **हुवीअ**।

**[ अच्छीअ ]** 'आसिक् उपवेशने' (१११९) आस् । अद्यतनी त-ह्यस्तनी त-परोक्षा ए । 'व्यञ्जना०' (४।२३९) अत् । 'गमिष्यमासां छः' (४।२१५) स० → छ० । 'तैलादौ' (२।९८) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । अनेन अद्यतन्यादिप्रत्ययस्थाने ईअ इति । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) **अच्छीअ** ।

**[ गेण्हीअ ]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । अद्यतनी दि-ह्यस्तनी दिव्-परोक्षा णव् । 'ग्रहो वल-गेण्ह-हर-पङ्ग०' (४।२०९) ग्रहस्थाने गेण्ह इति । अनेन अद्यतन्यादिप्रत्ययस्थाने ईअ इति । 'लोकात्' (१।१।३) **गेण्हीअ** ॥१६३॥

## तेनाऽस्तेरास्यहेसी ॥ ८।३।१६४ ॥

अस्तेर्धातोस्तेन भूतार्थेन प्रत्ययेन सह आसि-अहेसि इत्यादेशौ भवतः ॥

आसि सो-तुमं-अहं वा । जे आसि । ये आसन्नित्यर्थः ॥ एवम्-अहेसि ॥

**[ तेनाऽस्तेरास्यहेसी ]** तद् तृतीया टा । अस्ति षष्ठी ङस् । आस्यहेसि प्रथमा औ ।

**[ आसि सो-तुमं-अहं वा, जे आसि, अहेसि ]** 'असक् भुवि' (११०२) अस् । ह्यस्तनी दिव्-सिव्-अम्व । अनेन विभक्त्या सह अस्स्थाने **आसि** । एवम्-**अहेसि** ॥१६४॥

## ज्जात् सप्तम्या इर्वा ॥ ८।३।१६५ ॥

सप्तम्यादेशात् ज्जात् पर इर्वा प्रयोक्तव्यः ॥ भवेत् → होज्जइ - होज्ज ॥

**[ ज्जात्सप्तम्या इर्वा ]** ज्ज पञ्चमी ङसि । सप्तमी षष्ठी ङस् । इ प्रथमा सि । वा प्रथमा सि ।

**[ होज्जइ होज्ज ]** 'भू सत्तायाम्' (१) भू (२) । सप्तमी यात् । 'वर्तमाना-भविष्यन्त्योश्च ज्ज-ज्जा वा' (३।१७७) यात्० → ज्ज० । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० । अनेन वा इ आगमः **होज्जइ होज्ज** ॥१६५॥

## भविष्यति हिरादिः ॥ ८।३।१६६ ॥

भविष्यदर्थे विहिते प्रत्यये परे तस्यैवाऽऽदिर्हिः प्रयोक्तव्यः ॥

होहिइ । भविष्यति भविता वेत्यर्थः ॥ एवम् - होहिन्ति । होहिसि । होहित्था । हसिहिइ । काहिइ ॥

**[ भविष्यति हिरादिः ]** भविष्यत् सप्तमी ङि । हि प्रथमा सि । आदि प्रथमा सि ।

**[ होहिइ ]** 'भू सत्तायाम्' (१) भू । भविष्यन्ती स्यति-श्वस्तनी ता वा । 'त्यादीनामाद्य०' (३।१३९) स्यतिस्थाने-तास्थाने इ० । अनेन हि आगमः । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० **होहिइ** ।

**[ होहिन्ति ]** भू । भविष्यन्ती स्यन्ति । 'बहुष्वाद्यस्य न्ति-न्ते-इरे' (३।१४२) स्यन्ति० → न्ति० । अनेन हि आगमः । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० **होहिन्ति** ।

**[ होहिसि ]** भू । भविष्यन्ती स्यसि । 'द्वितीयस्य सि-से' (३।१४०) स्यसि० → सि० । अनेन हि आगमः । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० **होहिसि** ।

**[ होहित्था ]** भू । भविष्यन्ती स्यथ । 'मध्यमस्येत्था-हचौ' (३।१४३) स्यथ० → इत्था० । अनेन हि आगमः । 'लुक्' (१।१०) इलुक् । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० **होहित्था** ।

**[ हसिहिइ ]** 'हसे हसने' (५४५) हस् । भविष्यन्ती स्यति । 'त्यादीनामाद्य०' (३।१३९) स्यति० → इ० । अनेन हि आगमः । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हसहिइ । 'एच्च क्त्वा-तुम्-तव्य-भविष्यत्सु' (३।१५७) स० → सि० **हसिहिइ** ।

**[ काहिइ ]** 'डुकृंग् करणे' (८८८) कृ । भविष्यन्ती स्यति । 'त्यादीनामा०' (३।१३९) स्यति० → इ० । अनेन हि आगमः । 'आः कृगो०' (४।२१४) कृ० → का० **काहिइ** ॥१६६॥

## मि-मो-मु-मे स्सा-हा नवा ॥ ८।३।१६७ ॥

भविष्यत्यर्थे मि-मो-मु-मेषु तृतीयत्रिकादेशेषु परेषु तेषामेवादी स्सा-हा इत्येतौ वा प्रयोक्तव्यौ ॥ हेरपवादः ॥ पक्षे - हिरपि ॥

होस्सामि होहामि । होस्सामो होहामो । होस्सामु होहामु । होस्साम होहाम ॥ पक्षे - होहिमि । होहिमो । होहिमु । होहिम ॥ क्वचित्तु हा न भवति - हसिस्सामो । हसिहिमो ॥

**[ मि-मो-मु-मे स्सा-हा नवा ]** मि-मो-मु-म सप्तमी ङि । स्सा-हा प्रथमा औ । नवा प्रथमा सि ।

**[ होस्सामि होहामि ]** 'भू सत्तायाम्' (१) भू (२) । भविष्यन्ती स्यामि । 'तृतीयस्य मिः' (३।१४१) स्यामि० → मि० । 'अविति हुः' (४।६१) भू० → हु० । 'स्वराणां स्वराः' (४।२३८) हु० → हो० । अनेन वा स्सा-हा आगमौ **होस्सामि होहामि** ।

**[ होस्सामो होहामो, होस्सामु होहामु, होस्साम होहाम ]** भू (६) । भविष्यन्ती स्यामस् । 'तृतीयस्य मो-मु-माः' (३।१४४) स्यामस्० → मो-मु-म० । 'अविति हुः' (४।६१) भू० → हु० । 'स्वराणां स्वराः' (४।२३८) हु० → हो० । अनेन वा स्सा-हा आगमौ **होस्सामो होहामो, होस्सामु होहामु, होस्साम होहाम** ।

**[ होहिमि ]** भू । भविष्यन्ती स्यामि । 'तृतीयस्य मिः' (३।१४१) स्यामि० → मि० । 'अविति हुः' (४।६१) भू० → हु० । 'स्वराणां स्वराः' (४।२३८) हु० → हो० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः **होहिमि** ।

**[ होहिमो होहिमु होहिम ]** भू (३) । भविष्यन्ती स्यामस् । 'तृतीयस्य मो-मु-माः' (३।१४४) स्यामस्० → मो-मु-म० । 'अविति हुः' (४।६१) भू० → हु० । 'स्वराणां स्वराः' (४।२३८) हु० → हो० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः **होहिमो होहिमु होहिम** ।

**[ हसिस्सामो ]** 'हसे हसने' (५४५) हस् । भविष्यन्ती स्यामस् । 'तृतीयस्य मो०' (३।१४४) स्यामस्० → मो० । अनेन स्सा आगमः । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हसस्सामो । 'इच्च मो-मु-मे वा' (३।१५५) स० → सि० **हसिस्सामो** ।

**[ हसिहिमो ]** हस् । भविष्यन्ती स्यामस् । 'तृतीयस्य मो०' (३।१४४) स्यामस्० → मो० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हसमो । 'इच्च मो-मु-मे वा' (३।१५५) स० → सि० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः **हसिहिमो** ॥१६७॥

## मो-मु-मानां हिस्सा-हित्था ॥ ८।३।१६८ ॥

धातोः परो भविष्यत्काले मो-मु-मानां स्थाने हिस्सा-हित्था इत्येतौ वा प्रयोक्तव्यौ ॥

होहिस्सा होहित्था । हसिहिस्सा हसिहित्था । पक्षे-होहिमो । होस्सामो । होहामो इत्यादि ॥

**[ मो-मु-मानां हिस्सा-हित्था ]** मो-मु-म षष्ठी आम् । हिस्सा-हित्था प्रथमा औ ।

**[ होहिस्सा होहित्था ]** 'भू सत्तायाम्' (१) भू (२) । भविष्यन्ती स्यामस् । 'तृतीयस्य मो-मु-माः' (३।१४४) स्यामस्स्थाने मो-मु अथवा म० । अनेन वा विभक्तिस्थाने हिस्सा-हित्था । 'अविति हुः' (४।६१) भू० → हु० । 'स्वराणां स्वराः' (४।२३८) हु० → हो० **होहिस्सा होहित्था** ।

**[ हसिहिस्सा हसिहित्था ]** 'हसे हसने' (५४५) हस् (२) । भविष्यन्ती स्यामस् । 'तृतीयस्य मो०' (३।१४४) स्यामस्स्थाने मो-मु-म० । अनेन वा विभक्तिस्थाने हिस्सा-हित्था । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) हसहिस्सा हसहित्था । 'इच्च मो-मु-मे वा' (३।१५५) स० → सि० **हसिहिस्सा हसिहित्था** ।

**[ होहिमो ]** भू । भविष्यन्ती स्यामस् । 'तृतीयस्य मो०' (३।१४४) स्यामस्० → मो० । 'अविति हुः' (४।६१) भू० → हु० । 'स्वराणां स्वराः' (४।२३८) हु० → हो० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः **होहिमो** ।

**[ होस्सामो ]** भू । भविष्यन्ती स्यामस् । 'तृतीयस्य मो०' (३।१४४) स्यामस्० → मो० । 'अविति हुः' (४।६१) भू० → हु० । 'स्वराणां स्वराः' (४।२३८) हु० → हो० । 'मि-मो-मु-मे स्सा-हा नवा' (३।१६७) स्सा आगमः **होस्सामो** ।

**[ होहामो ]** भू । भविष्यन्ती स्यामस् । 'तृतीयस्य मो०' (३।१४४) स्यामस्० → मो० । 'अविति हुः' (४।६१) भू० → हु० । 'स्वराणां स्वराः' (४।२३८) हु० → हो० । 'मि-मो-मु-मे स्सा-हा नवा' (३।१६७) हा आगमः **होहामो** ॥१६८॥

## मेः स्सं ॥ ८।३।१६९ ॥

धातोः परो भविष्यति काले म्यादेशस्य स्थाने स्सं वा प्रयोक्तव्यः ॥

होस्सं । हसिस्सं । कित्तइस्सं । पक्षे - होहिमि । होस्सामि । होहामि । कित्तइहिमि ॥

**[ मेः स्सं ]** मि षष्ठी ङस् । स्स प्रथमा सि ।

**[ होस्सं ]** 'भू सत्तायाम्' (१) भू । भविष्यन्ती स्यामि । 'अविति हुः' (४।६१) भू० → हु० । 'स्वराणां स्वराः' (४।२३८) हु० → हो० । अनेन वा स्यामि० → स्सं० **होस्सं** ।

**[ हसिस्सं ]** 'हसे हसने' (५४५) हस् । भविष्यन्ती स्यामि । अनेन वा स्यामि० → स्सं० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) हसस्सं । 'एच्च क्त्वा-तुम्०' (३।१५७) इत्त्वम् **हसिस्सं** ।

**[ कित्तइस्सं ]** 'कृतण् संशब्दने' (१६४९) कृत् । 'कृतः [1]कीर्त्ति' (४।४।१२२) कीर्त्त० । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । भविष्यन्ती स्यामि । 'तृतीयस्य०' (३।१४१) मि० । अनेन मि० → स्सं० । 'ह्रस्वः संयोगे' (१।८४) की० → कि० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'णेरनिटि' (४।३।८३) णिग्लुक् । [2]'व्यञ्जना०' (४।२३९) अत् । 'एच्च क्त्वा-तुम्०' (३।१५७) अत्० → इ० **कित्तइस्सं** । पक्षे -

**[ होहिमि ]** भू । भविष्यन्ती स्यामि । 'तृतीयस्य मिः' (३।१४१) स्यामि० → मि० । 'अविति हुः' (४।६१) भू० → हु० । 'स्वराणां स्वराः' (४।२३८) हु० → हो० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः **होहिमि** ।

**[ होस्सामि ]** भू । भविष्यन्ती स्यामि । 'तृतीयस्य मिः' (३।१४१) स्यामि० → मि० । 'अविति हुः' (४।६१) भू० → हु० । 'स्वराणां स्वराः' (४।२३८) हु० → हो० । 'मि-मो-मु-मे स्सा-हा नवा' (३।१६७) स्सा आगमः **होस्सामि** ।

**[ होहामि ]** भू । भविष्यन्ती स्यामि । 'तृतीयस्य मिः' (३।१४१) स्यामि० → मि० । 'अविति हुः' (४।६१) भू० → हु० । 'स्वराणां स्वराः' (४।२३८) हु० → हो० । 'मि-मो-मु०' (३।१६७) हा आगमः **होहामि** ।

**[ कित्तइहिमि ]** कित्तइ पूर्ववत् । भवि० स्यामि । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । 'तृतीयस्य मिः' (३।१४१) स्यामि० → मि० **कित्तइहिमि** ॥१६९॥

## कृ-दो हं ॥ ८।३।१७० ॥

करोतेर्ददातेश्च परो भविष्यति विहितस्य म्यादेशस्य स्थाने हं वा प्रयोक्तव्यः ॥

काहं । दाहं । करिष्यामि । दास्यामीत्यर्थः ॥ पक्षे-काहिमि । दाहिमि इत्यादि ॥

**[ कृदो हं ]** कृ-द् पञ्चमी ङसि । हं प्रथमा सि ।

**[ काहं ]** 'डुकृंग् करणे' (८८८) कृ । भविष्यन्ती स्यामि । 'तृतीयस्य मिः' (३।१४१) स्यामि० → मि० । अनेन वा मि० → हं० । 'आः कृगो भूत-भविष्यतोश्च' (४।२१४) कृ० → का० **काहं** ।

**[ दाहं ]** 'डुदांग्क् दाने' (११३८) दा । भविष्यन्ती स्यामि । 'तृतीयस्य मिः' (३।१४१) स्यामि० → मि० । अनेन वा मि० → हं० **दाहं** । पक्षे -

**[ काहिमि ]** कृ । भविष्यन्ती स्यामि । 'तृतीयस्य मिः' (३।१४१) स्यामि० → मि० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । 'आः कृगो०' (४।२१४) कृ० → का० **काहिमि** ।

**[ दाहिमि ]** दा । भविष्यन्ती स्यामि । 'तृतीयस्य मिः' (३।१४१) स्यामि० → मि० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः **दाहिमि** ॥१७०॥

## श्रु-गमि-रुदि-विदि-दृशि-मुचि-वचि-छिदि-भिदि-भुजां सोच्छं-गच्छं-रोच्छं-वेच्छं-दच्छं-मोच्छं-वोच्छं-छेच्छं-भेच्छं-भोच्छं ॥ ८।३।१७१ ॥

श्वादीनां धातूनां भविष्यद्विहितम्यन्तानां स्थाने सोच्छमित्यादयो निपात्यन्ते ॥

सोच्छं श्रोष्यामि । गच्छं गमि●ष्यामि । संगच्छं संगंस्ये । रोच्छं रोदिष्यामि । विदक् ज्ञाने - वेच्छं वेदिष्यामि । दच्छं द्रक्ष्यामि । मोच्छं मोक्ष्यामि । वोच्छं वक्ष्यामि । छेच्छं छेत्स्यामि । भेच्छं भेत्स्यामि । भोच्छं भोक्ष्ये ॥

---

१. G. कीर्तिः । २. G. 'णेरदेदा०' (३।१४९) अत् ।

**[ श्रु-गमि-रुदि-विदि-दृशि-मुचि-वचि-छिदि-भिदि-भुजाम् ]** श्रुश्च गमिश्च रुदिश्च विदिश्च दृशिश्च मुचिश्च वचिश्च छिदिश्च भिदिश्च भुज् च = श्रुगमिरुदिविदिदृशिमुचिवचिछिदिभिदिभुज्, तेषाम् = श्रुगमिरुदिविदिदृशिमुचिवचिछिदि-भिदिभुजाम् । षष्ठी आम् ।

**[ सोच्छं-गच्छं-रोच्छं-वेच्छं-दच्छं-मोच्छं-वोच्छं-छेच्छं-भेच्छं-भोच्छं ]** सोच्छं-गच्छं-रोच्छं-वेच्छं-दच्छं-मोच्छं-वोच्छं-छेच्छं-भेच्छं-भोच्छं प्रथमा जस् ।

**[ सोच्छं ]** 'श्रुंट् श्रवणे' (१२९६) श्रु । भविष्यन्ती स्यामि । 'तृतीयस्य मिः' (३।१४१) स्यामि० → मि० । अनेन श्रुधातोर्मि० → **सोच्छं** । एवं सर्वत्र ॥१७१॥

## सोच्छादय इजादिषु, हिलुक् च वा ॥ ८।३।१७२ ॥

श्र्वादीनां स्थाने इजादिषु भविष्यदादेशेषु यथासंख्यं सोच्छादयो भवन्ति । ते एवाऽऽदेशा अन्त्यस्वराद्यवयववर्जा इत्यर्थः । हिलुक् च वा भवति ॥

सोच्छिइ । पक्षे- सोच्छिहिइ । एवम् -सोच्छिन्ति सोच्छिहिन्ति । सोच्छिसि सोच्छिहिसि । सोच्छित्था सोच्छिहित्था । सोच्छिह सोच्छिहिह । सोच्छिमि सोच्छिहिमि । सोच्छिस्सामि सोच्छिहामि । सोच्छिस्सं सोच्छं । सोच्छिमो सोच्छिहिमो । सोच्छिस्सामो सोच्छिहामो । सोच्छिहिस्सा सोच्छिहित्था । एवं-मु-मयोरपि ॥

गच्छिइ गच्छिहिइ । गच्छिन्ति गच्छिहिन्ति । गच्छिसि गच्छिहिसि । गच्छित्था गच्छिहित्था । गच्छिह गच्छिहिह । गच्छिमि गच्छिहिमि । गच्छिस्सामि गच्छिहामि । गच्छिस्सं गच्छं । गच्छिमो गच्छिहिमो । गच्छिस्सामो गच्छिहामो । गच्छिहिस्सा गच्छिहित्था । एवं-मु-मयोरपि । एवं-रुदादीनामप्युदाहार्यम् ॥

**[ सोच्छादय इजादिषु ]** सोच्छादि प्रथमा जस् । इजादि सप्तमी सुप् ।

**[ हिलुक् च वा ]** हिलुक् प्रथमा सि । च प्रथमा सि । वा प्रथमा सि ।

**[ सोच्छिइ सोच्छिहिइ ]** 'श्रुंट् श्रवणे' (१२९६) श्रु । भविष्यन्ती स्यति । 'त्यादीनामाद्यत्रयस्या०' (३।१३९) स्यति० → इ० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । अनेन श्रु० → सोच्छ आदेशः- हिलुक् च वा । 'एच्च क्त्वा-तुम्-तव्य०' (३।१५७) च्छ० → च्छि० **सोच्छिइ सोच्छिहिइ** ।

**[ सोच्छिन्ति सोच्छिहिन्ति ]** श्रु । भविष्यन्ती स्यन्ति । 'बहुष्वाद्यस्य न्ति-न्ते-इरे' (३।१४२) स्यन्ति० → न्ति० । अनेन श्रु० → सोच्छ० आदेशः । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । अनेन वा हिलुक् । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **सोच्छिन्ति सोच्छिहिन्ति** ।

**[ सोच्छिसि सोच्छिहिसि ]** श्रु । भविष्यन्ती स्यसि । 'द्वितीयस्य सि-से' (३।१४०) स्यसि० → सि० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । अनेन श्रु० → सोच्छ० - हिलुक् च वा । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **सोच्छिसि सोच्छिहिसि** ।

**[ सोच्छित्था सोच्छिहित्था ]** श्रु । भविष्यन्ती स्यथ । 'मध्यमस्येत्था-हचौ' (३।१४३) स्यथ० → इत्था० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । अनेन श्रु० → सोच्छ० - हिलुक् च वा **सोच्छित्था सोच्छिहित्था** ।

**[ सोच्छिह सोच्छिहिह ]** श्रु । भविष्यन्ती स्यथ । 'मध्यमस्येत्था-हचौ' (३।१४३) स्यथ० → ह० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । अनेन श्रु० → सोच्छ० - हिलुक् च वा । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **सोच्छिह सोच्छिहिह** ।

**[ सोच्छिमि सोच्छिहिमि ]** श्रु । भविष्यन्ती स्यामि । 'तृतीयस्य मिः' (३।१४१) स्यामि० → मि० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । अनेन श्रु० → सोच्छ० - हिलुक् च वा । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **सोच्छिमि सोच्छिहिमि** ।

**[ सोच्छिस्सामि सोच्छिहामि ]** श्रु । भविष्यन्ती स्यामि । 'तृतीयस्य मिः' (३।१४१) स्यामि० → मि० । 'मि-मो-मु-मे स्सा-हा नवा' (३।१६७) स्सा-हा आगमौ । अनेन श्रु० → सोच्छ० । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **सोच्छिस्सामि सोच्छिहामि** ।

**[ सोच्छिस्सं सोच्छं ]** श्रु । भविष्यन्ती स्यामि । 'तृतीयस्य मिः' (३।१४१) स्यामि० → मि० । 'मेः स्सं' (३।१६९) मि० → स्सं० । अनेन श्रु० → सोच्छ० । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **सोच्छिस्सं सोच्छं** ।

**[ सोच्छिमो सोच्छिहिमो ]** श्रु । भविष्यन्ती स्यामस् । 'तृतीयस्य मो-मु-माः' (३।१४४) स्यामस्० → मो० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । अनेन श्रु० → सोच्छ० - हिलुक् च वा । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **सोच्छिमो सोच्छिहिमो** ।

**[ सोच्छिस्सामो सोच्छिहामो ]** श्रु । भविष्यन्ती स्यामस् । 'तृतीयस्य मो-मु-माः' (३।१४४) स्यामस्० → मो० । 'मि-मो-मु-मे स्सा-हा नवा' (३।१६७) स्सा-हा आगमौ । अनेन श्रु० → सोच्छ० । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **सोच्छिस्सामो सोच्छिहामो** ।

**[ सोच्छिहिस्सा सोच्छिहित्था ]** श्रु । भविष्यन्ती स्यामस् । 'तृतीयस्य मो-मु-माः' (३।१४४) स्यामस्० → मो० । 'मो-मु-मानां हिस्सा-हित्था' (३।१६८) मो० → हिस्सा-हित्था । अनेन श्रु० → सोच्छ० । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **सोच्छिहिस्सा सोच्छिहित्था** ।

**[ गच्छिइ गच्छिहिइ ]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम्। भविष्यन्ती स्यति । 'त्यादीनामाद्य०' (३।१३९) स्यति० → इ० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । अनेन गम्० → गच्छ आदेशः - हिलुक् च वा । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **गच्छिइ गच्छिहिइ** ।

**[ गच्छिन्ति गच्छिहिन्ति ]** गम् । भविष्यन्ती स्यन्ति । 'बहुष्वाद्यस्य न्ति-न्ते-इरे' (३।१४२) स्यन्ति० → न्ति० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । अनेन गम्० → गच्छ० - हिलुक् च वा । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **गच्छिन्ति गच्छिहिन्ति** ।

**[ गच्छिसि गच्छिहिसि ]** गम् । भविष्यन्ती स्यसि । 'द्वितीयस्य सि-से' (३।१४०) स्यसि० → सि० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । अनेन गम्० → गच्छ० - हिलुक् च वा । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **गच्छिसि गच्छिहिसि** ।

**[ गच्छित्था गच्छिहित्था ]** गम् । भविष्यन्ती स्यथ । 'मध्यमस्येत्था-हचौ' (३।१४३) स्यथ० → इत्था० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । अनेन गम्० → गच्छ० - हिलुक् च वा । 'एच्च क्त्वा०' (३।१५७) च्छ० → च्छि० । 'लुक्' (१।१०) इलुक् **गच्छित्था गच्छिहित्था** ।

**[ गच्छिह गच्छिहिह ]** गम् । भविष्यन्ती स्यथ । 'मध्यमस्येत्था-हचौ' (३।१४३) स्यथ० → ह० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । अनेन गम्० → गच्छ० - हिलुक् च वा । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **गच्छिह गच्छिहिह** ।

**[ गच्छिमि गच्छिहिमि ]** गम् । भविष्यन्ती स्यामि । 'तृतीयस्य मिः' (३।१४१) स्यामि० → मि० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । अनेन गम्० → गच्छ० - हिलुक् च वा । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **गच्छिमि गच्छिहिमि** ।

**[ गच्छिस्सामि गच्छिहामि ]** गम् । भविष्यन्ती स्यामि । 'तृतीयस्य मिः' (३।१४१) स्यामि० → मि० । 'मि-मो-मु-मे स्सा-हा नवा' (३।१६७) स्सा-हा आगमौ । अनेन गम्० → गच्छ० । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **गच्छिस्सामि गच्छिहामि** ।

**[ गच्छिस्सं गच्छं ]** गम् । भविष्यन्ती स्यामि । 'तृतीयस्य मिः' (३।१४१) स्यामि० → मि० । 'मेः स्सं' (३।१६९) मि० → स्सं० । अनेन गम्० → गच्छ० । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **गच्छिस्सं गच्छं** ।

**[ गच्छिमो गच्छिहिमो ]** गम् । भविष्यन्ती स्यामस् । 'तृतीयस्य मो-मु-माः' (३।१४४) स्यामस्० → मो० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । अनेन गम्० → गच्छ० -हिलुक् च वा । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **गच्छिमो गच्छिहिमो** ।

**[ गच्छिस्सामो गच्छिहामो ]** गम् । भविष्यन्ती स्यामस् । 'तृतीयस्य मो-मु-माः' (३।१४४) स्यामस्० → मो० । 'मि-मो-मु-मे स्सा-हा०' (३।१६७) स्सा-हा आगमौ । अनेन गम्० → गच्छ० । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **गच्छिस्सामो गच्छिहामो** ।

**[ गच्छिहिस्सा गच्छिहित्था ]** गम् । भविष्यन्ती स्यामस् । 'तृतीयस्य मो-मु-माः' (३।१४४) स्यामस्० → मो० । 'मो-मु-मानां हिस्सा-हित्था' (३।१६८) मो० → हिस्सा-हित्था । अनेन गम्० → गच्छ० । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **गच्छिहिस्सा गच्छिहित्था** ॥१७२॥

## दु-सु-मु विध्यादिष्वेकस्मिंस्त्रयाणाम् ॥ ८।३।१७३ ॥

विध्यादिष्वर्थेषूत्पन्नानामेकत्वेऽर्थे वर्तमानानां त्रयाणामपि त्रिकाणां स्थाने यथासंख्यं दु-सु-मु इत्येते आदेशा भवन्ति ॥

हसउ सा । हससु तुमं । हसामु अहं ॥ पेच्छउ । प्रपूर्व० इषि(ईक्षि)धातोरात्मनेपदं पेच्छसु । पेच्छामु ॥ दकारोच्चारणं भाषान्तरार्थम् ॥

**[ दु-सु-मु विध्यादिष्वेकस्मिंस्त्रयाणाम् ]** दु-सु-मु प्रथमा जस् । विध्यादि सप्तमी सुप् । एक सप्तमी ङि । त्रि षष्ठी आम् ।

**[ हसउ सा ]** 'हसे हसने' (५४५) हस् । पञ्चमी तुव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हसतु । अनेन तुव्० → दु० । 'क-ग-च-ज०' (१।१७७) द्लुक् **हसउ** ।

**[ हससु तुमं ]** हस् । पञ्चमी हि । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हससि । अनेन हि० → सु० **हससु** ।

**[ हसामु अहं ]** हस् । पञ्चमी आनिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हसानि । अनेन आनिव्० → मु० । 'इच्च मो-मु-मे वा' (३।१५५) आत्त्वम्-स० → सा० **हसामु** ।

**[ पेच्छउ ]** 'दृशं प्रेक्षणे' (४९५) दृश् । पञ्चमी तुव् । 'दृशो निअच्छ-पेच्छा-ऽवयच्छा०' (४।१८१) दृश्० → पेच्छ० इति । अनेन तुव्० → दु० आदेशः । 'क-ग-च०' (१।१७७) द्लुक् **पेच्छउ** ।

**[ पेच्छसु ]** दृश् । पञ्चमी हि । 'दृशो निअच्छ-पेच्छा-ऽवयच्छा०' (४।१८१) दृश्० → पेच्छ० इति । अनेन हि० → सु० आदेशः **पेच्छसु** ।

**[ पेच्छामु ]** दृश् । पञ्चमी आनिव् । 'दृशो निअच्छ-पेच्छा-ऽवयच्छा०' (४।१८१) दृश्० → पेच्छ० इति । अनेन हि० → मु० आदेशः । 'इच्च मो-मु-मे वा' (३।१५५) आत्त्वम्-च्छ० → च्छा० **पेच्छामु** ॥१७३॥

## सोर्हिर्वा ॥ ८।३।१७४ ॥

पूर्वसूत्रविहितस्य सोः स्थाने हिरादेशो वा भवति ॥ देहि देसु ॥

**[ सोर्हिर्वा ]** सु षष्ठी ङस् । हि प्रथमा सि । वा प्रथमा सि ।

**[ देहि देसु ]** 'डुदांग्क् दाने' (११३८) दा (२) । पञ्चमी हि । 'दु-सु-मु विध्यादि०' (३।१७३) हि० → सु० । अनेन वा सु० → हि० । 'स्वराणां स्वराः' (४।२३८) एत्वम् - **देहि देसु** ॥१७४॥

## अत इज्जस्विज्जहीज्जे-लुको वा ॥ ८।३।१७५ ॥

अकारात्परस्य सोः इज्जसु-इज्जहि-इज्जे इत्येते लुक् च आदेशा वा भवन्ति ॥

हसेज्जसु । हसेज्जहि । हसेज्जे । हस । पक्षे-हससु । अत इति किम् ? होसु । ठाहि ॥

**[ अत इज्जस्विज्जहीज्जे-लुको वा ]** अत् पञ्चमी ङसि । इज्जसु-इज्जहि-इज्जे-लुक् प्रथमा जस् । वा प्रथमा सि ।

**[ हसेज्जसु हसेज्जहि हसेज्जे हस ]** 'हसे हसने' (५४५) हस् (४) । पञ्चमी हि अथवा सप्तमी यास् । 'दु-सु-मु विध्यादि०' (३।१७३) हि०-यास्० → सु० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हससु । अनेन वा सु० → इज्जसु-इज्जहि-इज्जे-लुक् च । 'अवर्णस्येवर्णा०' (१।२।६) ए० **हसेज्जसु-हसेज्जहि-हसेज्जे-हस** । पक्षे -

**[ हससु ]** हस् । पञ्चमी हि । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) हसहि । 'दु-सु-मु०' (३।१७३) हि० → सु० **हससु** ।

**[ होसु ]** 'भू सत्तायाम्' (१) भू । पञ्चमी हि । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० । 'दु-सु-मु विध्यादि०' (३।१७३) हि० → सु० **होसु** ।

**[ ठाहि ]** स्था । पञ्चमी हि । 'स्थष्ठा०' (४।१६) स्था० → ठा० । 'दु-सु-मु विध्यादि०' (३।१७३) हि० → सु० । 'सोर्हिर्वा' (३।१७४) सु० → हि० **ठाहि** ॥१७५॥

## बहुषु न्तु-ह-मो ॥ ८।३।१७६ ॥

विध्यादिषूत्पन्नानां बहुष्वर्थेषु वर्तमानानां त्रयाणां त्रिकाणां स्थाने यथासंख्यं न्तु-ह-मो इत्येते आदेशा भवन्ति ॥

न्तु-हसन्तु हसन्तु हसेयुर्वा ॥ ह-हसह हसत हसेत वा ॥ मो- हसामो हसाम हसेम वा ॥ एवं - तुवरन्तु तुवरह तुवरामो ॥

**[ बहुषु न्तु-ह-मो ]** बहु सप्तमी सुप् । न्तु-ह-मो प्रथमा जस् ।

**[ हसन्तु ]** 'हसे हसने' (५४५) हस् । पञ्चमी अन्तु-सप्तमी युस् वा । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हसन्तु-हसयुस् । अनेन अन्तु० - युस्० → न्तु० **हसन्तु** ।

**[ हसह ]** हस् । पञ्चमी त - सप्तमी यात वा । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) हसत-हसयात । अनेन त० - यात० → ह० **हसह** ।

**[ हसामो ]** हस् । पञ्चमी आमव्-सप्तमी याम वा । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) हसाम-हसयाम। अनेन आम०-याम० → मो० । 'इच्च मो०' (४।१५५) आत्त्वम् **हसामो** ।

**[ तुवरन्तु ]** 'ञित्वरिष् सम्भ्रमे' (१०१०) त्वर् । पञ्चमी अन्ताम् - सप्तमी ईरन् वा । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) त्वरन्ताम् - त्वरेरन् । 'त्वरस्तुवर-जअडौ' (४।१७०) त्वर० → तुवर० । अनेन अन्ताम्० - ईरन्० → न्तु० **तुवरन्तु** ।

**[ तुवरह ]** त्वर् । पञ्चमी ध्वम् - सप्तमी ईध्वम् वा । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) त्वरध्वम् - त्वरेध्वम् । 'त्वरस्तुवर०' (४।१७०) त्वर० → तुवर० । अनेन ध्वम्० - ईध्वम्० → ह० **तुवरह** ।

**[ तुवरामो ]** त्वर् । पञ्चमी आमहैव्- सप्तमी ईमहि वा । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) त्वरामहै-त्वरेमहि । 'त्वरस्तुवर०' (४।१७०) त्वर० → तुवर० । अनेन आमहै-ईमहि० → मो० । 'इच्च मो०' (३।१५५) आत्त्वम् **तुवरामो** ॥१७६॥

### वर्तमाना-भविष्यन्त्योश्च ज्ज-ज्जा वा ॥ ८।३।१७७ ॥

वर्तमानाया भविष्यन्त्याश्च विध्यादिषु च विहितस्य प्रत्ययस्य स्थाने ज्ज-ज्जा इत्येतावादेशौ वा भवतः ॥ पक्षे - यथाप्राप्तम् ॥

वर्तमाना-हसेज्ज हसेज्जा । पढेज्ज पढेज्जा । सुणेज्ज सुणेज्जा ॥ पक्षे-हसइ । पढइ । सुणइ ॥ भविष्यन्ती-पढेज्ज पढेज्जा ॥ पक्षे - पढिहिइ ॥ विध्यादिषु - हसेज्ज हसेज्जा । हसतु हसेद्वा इत्यर्थः ॥ पक्षे- हसउ ॥ एवं सर्वत्रापि । यथा तृतीयत्रिके अइवाएज्जा [1]अइवायाविज्जा । न समणुजाणामि न समणुजाणेज्जा ॥

अन्ये तु अन्यासामपीच्छन्ति-[2]होज्ज ॥ भवति भवेत् भवतु अभवत् अभूत् बभूव भूयात् भविता भविष्यति अभविष्यद्वा इत्यर्थः ॥

**[ वर्तमाना-भविष्यन्त्योश्च ज्ज-ज्जा वा ]** वर्तमाना-भविष्यन्ती षष्ठी ओस् । च प्रथमा सि । ज्ज-ज्जा प्रथमा औ । 'अव्ययस्य' (३।२।७) औलुप् । वा प्रथमा सि ।

**[ हसेज्ज हसेज्जा ]** 'हसे हसने' (५४५) हस् (२) । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । अनेन वा इ० → ज्ज-ज्जा० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'ज्जा-ज्जे' (३।१५९) स० → से० **हसेज्ज हसेज्जा** ।

**[ पढेज्ज पढेज्जा ]** 'पठ व्यक्तायां वाचि' (२१३) पठ् (२) । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । अनेन वा इ० → ज्ज-ज्जा० । 'ठो ढः' (१।१९९) ठ० → ढ० । 'व्यञ्जना०' (४।२३९) अत् । 'ज्जा-ज्जे' (३।१५९) ढ० → ढे० **पढेज्ज पढेज्जा** ।

**[ सुणेज्ज सुणेज्जा ]** 'श्रुंट् श्रवणे' (१२९६) श्रु (२) । वर्त्त० तिव् । 'बहुषु न्तु-ह-मो' (३।१७६) तिव्० → न्तु० । अनेन न्तु० → ज्ज-ज्जा० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शु० → सु० । 'चि-जि-श्रु-हु-स्तु-लू-पू-धूगां णो ह्रस्वश्च' (४।२४१) ण आगमः । 'ज्जा-ज्जे' (३।१५९) ण० → णे० **सुणेज्ज सुणेज्जा** । पक्षे-

---

१. L. अइवायावेज्जा । २. C. होज्ज होज्जा ।

**[ हसइ ]** हस् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हसति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **हसइ** ।

**[ पढइ ]** पठ् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) पठति । 'ठो ढः' (१।१९९) ठ० → ढ० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पढइ** ।

**[ सुणइ ]** श्रु । वर्त्त० तिव् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शु० → सु० । 'चि-जि-श्रु०' (४।२४१) ण आगमः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **सुणइ** ।

**[ पढेज्ज पढेज्जा ]** पठ् (२) । भविष्यन्ती स्यति । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) पठस्यति । 'ठो ढः' (१।१९९) ठ० → ढ० । 'त्यादीनामाद्य०' (३।१३९) स्यति० → इ० । अनेन इ० → ज्ज-ज्जा० । 'ज्जा-ज्जे' (३।१५९) ढ० → ढे० **पढेज्ज पढेज्जा** । पक्षे-

**[ पढिहिइ ]** पठ् । भविष्यन्ती स्यति । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) पठस्यति । 'ठो ढः' (१।१९९) ठ० → ढ० । 'त्यादीनामाद्य०' (३।१३९) स्यति० → इ० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । 'एच्च क्त्वा-तुम्०' (३।१५७) ढ० → ढि० **पढिहिइ** ।

**[ हसेज्ज हसेज्जा ]** हस् (२) । पञ्चमी तुव्-सप्तमी यात् वा । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हसतु-हसयात् । 'दु-सु-मु विध्यादि०' (३।१७३) तुव्० - यात्० → दु० । अनेन दु० → ज्ज-ज्जा० । 'ज्जा-ज्जे' (३।१५९) स० → से० **हसेज्ज हसेज्जा** । पक्षे -

**[ हसउ ]** हस् । पञ्चमी तुव् । 'दु-सु-मु०' (३।१७३) । तुव्० → दु० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) हसदु । 'क-ग-च-ज०' (१।१७७) द्लुक् **हसउ** ।

**[ [1]अइवाएज्जा ]** अतिपूर्व० 'पत्लृ गतौ' (९६२) पत् । अतिपतन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । वर्त्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । अनेन मि० → ज्जा० । अतिपत्-इ-ज्जा इति जाते 'णेरदेदावावे' (३।१४९) णिग्० → अत्० । 'लोकात्' (१।१।३) अतिपत-ज्जा । 'अदेल्लुक्यादे०' (३।१५३) प० → पा० । 'ज्जा-ज्जे' (३।१५९) त० → ते० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'पो वः' (१।२३१) पा० → वा० **अइवाएज्जा** ।

**[ अइवायाविज्जा ]** अतिपूर्व० 'पत्लृ गतौ' (९६२) पत् । अतिपतन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'लोकात्' (१।१।३) अतिपत् + इ । अतिपातयन्तं प्रयुङ्क्ते । पुनर्णिग्प्र० । 'णेरदेदावावे' (३।१४९) प्रथमे णिग्० → अत्० । 'लोकात्' (१।१।३) अतिपत् + अ । द्वितीये णिग्० → आवे० । 'समानानां०' (१।२।१) दीर्घः । अतिपतावे इति जाते वर्त्त० मिव् । अनेन मिव्० → ज्जा० । 'अदेल्लुक्यादे०' (३।१५३) प० → पा० । 'ह्रस्वः संयोगे' (१।८४) वे० → वि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० । 'पो वः' (१।२३१) पा० → वा० **अइवायाविज्जा** ।

**[ न समणुजाणामि ]** समनुपूर्व० 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । वर्त्त० मिव् । 'ज्ञो जाण-मुणौ' (४।७) ज्ञा० → जाण० । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'मौ वा' (३।१५४) ण० → णा० । 'नो णः' (१।२२८) नु० → णु० **समणुजाणामि** ।

---

१. नेव सयं पाणे **अइवाएज्जा**, नेवन्नेहिं पाणे अइवायाविज्जा, पाणे अइवायंते वि अन्ने न **समणुजाणिज्जा** । [पाक्षिकसूत्रे] नैव स्वयं प्राणानतिपातयामि, नैवान्यैः प्राणानतिपातयामि, प्राणानतिपातयतोऽप्यन्यान्न समनुजानामि ।

**[ न समणुजाणेज्जा ]** समणुजाण पूर्ववत् । वर्त्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । अनेन मि० → ज्जा० । 'ज्जा-ज्जे' (३।१५९) ण० → णे० **समणुजाणेज्जा** ।

**[ होज्ज ]** 'भू सत्तायाम्' (१) भू । वर्त्त० तिव् । अनेन तिव्० → ज्ज० । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० **होज्ज** ॥१७७॥

## मध्ये च स्वरान्ताद्वा ॥ ८।३।१७८ ॥

स्वरान्ताद्धातोः प्रकृतिप्रत्यययोर्मध्ये चकारात् प्रत्ययानां च स्थाने ज्ज-ज्जा इत्येतौ वा भवतः, वर्तमाना-भविष्यन्त्योर्विध्यादिषु च ॥

वर्तमाना-होज्जइ होज्जाइ होज्ज होज्जा । पक्षे-होइ । एवं - होज्जसि होज्जासि होज्ज होज्जा । पक्षे-होसि इत्यादि ॥

भविष्यन्ती-होज्जहिइ होज्जाहिइ होज्ज होज्जा । पक्षे-होहिसि(इ) । एवं - होज्जहिसि होज्जाहिसि होज्ज होज्जा । पक्षे - होहिसि । होज्जहिमि होज्जाहिमि होज्जस्सामि होज्जहामि होज्जस्सं होज्ज होज्जा [होहिमि] इत्यादि ॥

विध्यादिषु - होज्जउ होज्जाउ होज्ज होज्जा । भवतु भवेद्वेत्यर्थः । पक्षे - होउ ॥

स्वरान्तादिति किम् ? हसेज्ज हसेज्जा । तुवरेज्ज तुवरेज्जा ॥

**[ मध्ये च स्वरान्ताद्वा ]** मध्य सप्तमी ङि । च प्रथमा सि । स्वरान्त पञ्चमी ङसि । वा प्रथमा सि ।

**[ होज्जइ होज्जाइ होज्ज होज्जा ]** 'भू सत्तायाम्' (१) । भू । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । अनेन मध्ये ज्ज-ज्जा । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० होज्जइ होज्जाइ । एवं त्यादिस्थानेऽपि ज्ज-ज्जा **होज्ज होज्जा** ।

एवं यथाप्राप्तौ 'भविष्यति हिरादिः' (३।१६६) - 'मि-मो-मु-मे स्सा-हा नवा' (३।१६७) - 'मेः स्सं' (३।१६९) इत्यादि सूत्राणि प्रापयितव्यानि । व्यावृत्तौ तु 'वर्तमाना-भविष्यन्त्योश्च ज्ज-ज्जा वा' (३।१७७) - 'ज्जा-ज्जे' (३।१५९) एत्त्वमित्यादि ॥१७८॥

## क्रियातिपत्तेः ॥ ८।३।१७९ ॥

क्रियातिपत्तेः स्थाने ज्ज-ज्जावादेशौ भवतः ॥ होज्ज होज्जा । अभविष्यदित्यर्थः । जइ होज्ज वण्णणिज्जो ॥

**[ क्रियातिपत्तेः ]** क्रियातिपत्ति षष्ठी ङस् ।

**[ होज्ज होज्जा ]** 'भू सत्तायाम्' (१) भू (२) । क्रियातिपत्तिः स्यत् । अनेन स्यत्० → ज्ज-ज्जा आदेशौ । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० **होज्ज होज्जा** ।

**[ जइ होज्ज वण्णणिज्जो ]** यदि । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अव्ययस्य' (३।२।७) सिलुप् । 'आदेर्यो जः' (१।२४५) य० → ज० **जइ** । **होज्ज** पूर्ववत् ।

वर्णनीय । प्रथमा सि । 'वोत्तरीयानीय-तीय-कृद्ये ज्जः' (१।२४८) ईयस्य इज्ज आदेशः । 'नो णः' (१।२२८) न० → ण० । 'सर्वत्र ल-व०' (२।७९) र्लुक् **वण्णणिज्जो** । वर्णनीयोऽभविष्यदित्यर्थः ॥१७९॥

## न्त-माणौ ॥ ८।३।१८० ॥

क्रियातिपत्तेः स्थाने न्त-माणौ आदेशौ भवतः ॥ होन्तो । होमाणो । अभविष्यदित्यर्थः ॥

[1]हरिणट्ठाणे हरिणङ्क ! जइ सि हरिणाहिवं निवेसन्तो ।
न सहन्तो च्चिअ तो राहुपरिहवं से जियन्तस्स ॥

**[ न्त-माणौ ]** न्त-माण प्रथमा औ ।

**[ होन्तो ]** 'भू सत्तायाम्' (१) भू । क्रियातिपत्तिः स्यत् । अनेन स्यत्० → न्त० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० **होन्तो** ।

**[ होमाणो ]** भू । क्रियातिपत्तिः स्यत् । अनेन स्यत्० → माण० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० **होमाणो** ।

**[ हरिणट्ठाणे हरिणङ्क !............... ]**

अस्यार्थः - हे हरिणाङ्क ! हे चन्द्र ! यदि त्वं हरिणस्थाने हरिणाधिपं-सिहं निवेशयिष्यत्(न्यवेशयिष्यः) तदा से तस्य - सिंहस्य जीवितो राहुपरिभवनासहिष्यः(ष्यथाः) इत्यर्थः ।

यदि । प्रथमा सि । 'आदेर्यो जः' (१।२४५) य० → ज० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अव्ययस्य' (३।२।७) सिलुप् **जइ** ।

सि इत्यव्ययं त्यादयः इति सूत्रेण त्वमित्यर्थे निपात्यते **सि** ।

हरिणाधिपम् । 'ख-घ-थ-ध-भाम्' (१।१८७) धि० → हि० । 'पो वः' (१।२३१) प० → व० **हरिणाहिवं** ।

निपूर्व० 'विशंत् प्रवेशने' (१४१५) विश् । निविशन्तं(मानं) प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । क्रियातिपत्तिः स्यस् । अनेन स्यस्स्थाने न्तः । 'लघोरुपान्त्यस्य' (४।३।४) गु० वि० → वे० । 'णेरदेदावावे' (३।१४९) णिग्स्थाने अत् । 'लोकात्' (१।१।३) निवेशन्त । 'श-षोः सः' (१।२६०) श० → स० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निवेसन्तो** ।

'षहि मर्षणे' (९९०) षह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सह् । क्रियातिपत्तिः स्यथास् । अनेन स्यथास्स्थाने न्त० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) सहन्त । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सहन्तो** ।

**[ च्चिअ ]** 'णइ चेअ चिअ च्च अवधारणे' (२।१८४) इत्यनेन अवधारणेऽर्थे चिअ इति निपात्यते । सेवादित्वात् द्वित्वमपि **च्चिअ** ।

**[ तो ]** तद् । पञ्चमी ङसि । 'तदो डोः' (३।६७) ङसि० → डो० → ओ० इति । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । 'लोकात्' (१।१।३) **तो** ।

**[ राहुपरिहवं ]** राहुपरिभवम् । 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः **राहुपरिहवं** ॥१८०॥

**शत्रानशः ॥ ८।३।१८१ ॥**

शतृ-आनश् इत्येतयोः प्रत्येकं न्त-माण इत्येतावादेशौ भवतः ॥

शतृ-हसन्तो हसमाणो । आनश्-वेवन्तो वेवमाणो ॥

---

१. गा० र० - चन्द्रप्रक्रमः - ५५२ ।

**[ शत्रानशः ]** शत्रानश् षष्ठी ङस् ।

**[ हसन्तो हसमाणो ]** 'हसे हसने' (५४५) हस् (२) । हसतीति हसन् । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत् । अनेन अत्स्थाने न्त-माणश्च । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हसन्त-हसमाण । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **हसन्तो हसमाणो** ।

**[ वेवन्तो वेवमाणो ]** 'टुवेपृङ् चलने' (७५४) वेप् । वेपते = वेपमानः । 'शत्रानशावेष्यति०' (५।२।२०) आनश्प्र० । अनेन आनश्स्थाने न्त-माणश्च । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) वेपन्त-वेपमाण । 'पो वः' (१।२३१) प० → व० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वेवन्तो वेवमाणो** ॥१८१॥

## ई च स्त्रियाम् ॥ ८।३।१८२ ॥

स्त्रियां वर्तमानयोः शत्रानशोः स्थाने ई चकारात् न्त-माणौ च भवन्ति ॥

हसई हसन्ती हसमाणी । वेवई वेवन्ती वेवमाणी ॥

**[ ई च स्त्रियाम् ]** ई प्रथमा सि । च प्रथमा सि । स्त्री सप्तमी ङि ।

**[ हसई हसन्ती हसमाणी ]** 'हसे हसने' (५४५) हस् (३) । 'शत्रानशा०' (५।२।२०) शतृप्र० → अत् । अनेन अत्स्थाने ई-न्त-माणश्च । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) हसई । द्वितीये - तृतीये 'प्रत्यये ङीर्नवा' (३।३१) ङीप्र० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) हसन्ती-हसमाणी । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **हसई हसन्ती हसमाणी** ।

**[ वेवई वेवन्ती वेवमाणी ]** 'टुवेपृङ् चलने' (७५४) वेप् । 'शत्रानशा०' (५।२।२०) आनश्प्र० । अनेन आनश्स्थाने ई-न्त-माणश्च । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) वेपई । 'पो वः' (१।२३१) प० → व० । द्वितीये-तृतीये 'प्रत्यये ङीर्नवा' (३।३१) ङीप्र० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) वेवन्ती वेवमाणी । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **वेवई वेवन्ती वेवमाणी** ॥१८२॥

इति श्रीबृहत्तपागच्छे श्रीश्रीश्रीसौभाग्यसागरसूरिशिष्य- भुजिष्येण हर्षकुलपण्डितवचःप्राप्तप्रयोगरहस्येन उदयसौभाग्यगणिना लिखितायां हैमप्राकृतवृत्तिढुण्ढिकायां व्युत्पत्तिदीपिकाभिधानायां सर्वप्रयोगविशेषव्युत्पत्तिप्रकाशिकायां तृतीयः पादः समर्थितः ॥३॥

ऊर्ध्वं स्वर्गनिकेतनादपि तले पातालमूलादपि ।
त्वत्कीर्तिर्भ्रमति क्षितीश्वरमणे ! पारे पयोधेरपि ॥

तेनास्याः प्रमदास्वभावसुलभैरुच्चावचैश्चापलै-
स्ते वाचंयमवृत्तयोऽपि मुनयो मौनव्रतं त्याजिताः ॥१॥

अर्हम् - हे क्षितीश्वरमणे ! ते-तव कीर्त्तिः स्वर्गि(र्ग)निकेतनात् स्वर्गात् ऊर्ध्वं पातालमूलादपि पयोधेरपि पारे परिभ्रमति, तेन कारणेन अस्याः कीर्त्या उच्चावचैश्चापलैस्ते प्रसिद्धा मुनयो मौनं व्रतं त्याजिताः । किंविशिष्टा मौ० ? वाचंयमा मौनरूपा वृत्तिर्येषां ते, किंचापलैः ? प्रमदास्वभावेषु सुलभानि तैः इति काव्यार्थः ॥छा॥श्रीः॥

- नोध -

- नोध -

''णवमत्थ-दंसणं संनवेस-सिसिराओ बंध-रिद्धीओ ।
अविरलमिणमो आभुवण-बंधमिह णवर पययम्मि ॥''

( गउडवहो )

KIRIT GRAPHICS - 09898490091